RIG-VEDA-SANHITA,

THE

SACRED HYMNS OF THE BRAHMANS;

TOGETHER WITH THE

COMMENTARY OF SAYANACHARYA.

EDITED BY

MAX MÜLLER, M. A.

CHRIST CHURCH, OXFORD.

VOLUME III.

PUBLISHED UNDER THE PATRONAGE OF

THE HONOURABLE THE EAST-INDIA-COMPANY.

LONDON,

WILLIAM H. ALLEN AND CO.,

BOOKSELLERS TO THE HONOURABLE THE EAST-INDIA-COMPANY,

7, LEADENHALL STREET.

1856.

OXFORD.

PRINTED BY JAMES WRIGHT, PRINTER TO THE UNIVERSITY.

TO

COLONEL WILLIAM HENRY SYKES, CHAIRMAN,

ROSS DONNELLY MANGLES, ESQ., M.P., DEPUTY CHAIRMAN,

CHARLES MILLS, ESQ.,
RUSSELL ELLICE, ESQ.,
WILLIAM BUTTERWORTH BAYLEY, ESQ.,
JOHN SHEPHERD, ESQ.,
MARTIN TUCKER SMITH, ESQ., M.P.,
SIR HENRY WILLOCK, K.L.S.,
SIR JAMES WEIR HOGG, BART., M.P.,
ELLIOT MACNAGHTEN, ESQ.,
LIEUTENANT-COLONEL JAMES OLIPHANT,
WILLIAM JOSEPH EASTWICK, ESQ.,
JOHN HARVEY ASTELL, ESQ.,
HENRY THOBY PRINSEP, ESQ.,
JOHN POLLARD WILLOUGHBY, ESQ.,
SIR FREDERICK CURRIE, BART.,
LIEUT.-COL. SIR H. C. RAWLINSON, K.C.B.,
MAJOR-GEN. ROBERT JOHN HUSSEY VIVIAN,

DIRECTORS

OF

THE HONOURABLE THE EAST-INDIA-COMPANY,

THIS THIRD VOLUME

OF

THE RIG-VEDA-SANHITA

IS RESPECTFULLY AND GRATEFULLY DEDICATED

BY THEIR OBEDIENT SERVANT,

OXFORD, 1856.

MAX MÜLLER.

PREFACE.

In laying before the public the third volume of my edition of the Rig-veda and its Commentary by Sáyaṇa Áchárya, it gives me much pleasure to acknowledge the increasing interest which of late years has been evinced by the most eminent scholars in England, in India, and on the continent, with regard to these ancient remnants of the sacred poetry of the Brahmans. Their importance for Sanskrit literature had been felt ever since Sir William Jones, Colebrooke, and F. Rosen informed us of their existence, and gave us the first specimens of their contents; and no one acquainted with the later literature of India, the epic poems, the law-books, the systems of philosophy, could fail to see that our knowledge of the historical growth of the Indian mind must remain incomplete until we had gained an insight into that period of literature which precedes Vyása and Valmíki, Manu and Jaimini, and to which the poets, the lawgivers, and philosophers of India point with common consent as the highest authority for their inspirations, their belief, and their institutions. Sanskrit literature without the Veda was like Greek literature without Homer, like Arabic literature without the Koran, like English without Shakespear.

But as the study of Sanskrit owes its permanent interest chiefly to the fact that the ancient language of India has been proved to be most intimately connected with the classical languages of Europe, and that in it has been found the key to the most secret archives of the history of language in general, the Veda would never have engaged the serious attention of a large class of scholars, if this ancient literary relic had not been found to shed the most unexpected light on the darkest periods in the history of the most prominent nations of antiquity. The religious traditions of the Persians or the Zoroastrians have been traced back to their source in the *Veda*. Many of the most obscure grammatical forms in the arrow-headed inscriptions of Darius and Xerxes have

been deciphered by means of the *Veda*. The mythology of Greece and Italy, nay of Germany and Iceland, has suddenly assumed a new aspect and an intelligible expression by being confronted with the poetical language of the *Veda*. Even civil institutions, local customs, and proverbial expressions, which we meet with in the later history of the Arian nations, have received an unexpected explanation in the simple poetry of the *Veda*. In this manner the *Veda*, though not yet known in its completeness, has assumed an importance which no other literary production of India could ever have claimed; and we may rest convinced, that as long as man cherishes the records of his family, in the widest sense of the word, these simple songs will maintain their place among the most valued annals of ancient history. There is one class of readers that may have been disappointed—men who study ancient literature less on account of its historical than its poetical value. Those who expected in the Veda, strains like the elaborate odes of Pindar, or the vague and misty exhalations of Ossian, will have found but very little answering their expectations. But the true historian values facts, ancient and genuine; and a corroded copper As of the Roman republic is of greater value to him than an imperial gold medal of the most exquisite workmanship. What Schelling says with regard to the deities of the later Hindu pantheon, such as they are represented to us in the Mahábhárata, the poems of Kalidása, and the Puráṇas, applies to all facts of history: "Hideous or not, they stand before us, and so require a rational explanation *."

But it has been a still greater pleasure to me, while engaged for so many years in preparing a critical edition, not only of the text of the Rig-veda, but also of its Commentary by Sáyaṇa Ácharya, to observe how the conviction seems to be growing more and more general, that without this Commentary an accurate and scholarlike knowledge of the Veda could never have been obtained. There was at first much controversy as to the value of Sáyaṇa, and as to the necessity of an edition, and particularly of a critical edition, of his Commentary. Now it seemed to me, that his strong and his weak points must have been so apparent to all who entered honestly into the study of Sáyaṇa, that I hardly thought it incumbent on me to defend him against his enemies, or to save him from his friends. For though we all admired the quick perception and the brilliant divination displayed by some distinguished scholars in their attempts to guess the meaning of these ancient hymns without the help of that tradition which

* Schelling's Philosophy of Mythology, p. 24.

Sáyaṇa embodied in his Commentary—and though a work like that of the late M. Langlois, who actually published a complete translation of the Veda at a time when most scholars were content with deciphering a few lines, will always excite our admiration by the boldness, the perseverance, and the undoubted ingenuity which it displays—yet before the tribunal of a more severe scholarship such works could not be approved; and it begins to be recognised that the errors which they propagated have proved so mischievous as to outweigh the many right guesses which no doubt they contained.

It would have been equally wrong, however, to consider Sáyaṇa's Commentary as an infallible authority with regard to the interpretation of the Veda. Sáyaṇa gives the traditional, but not the original, sense of the Vaidik hymns. These hymns—originally popular songs, short prayers and thanksgivings, sometimes true, genuine, and even sublime, but frequently childish, vulgar, and obscure—were invested by the Brahmans with the character of an inspired revelation, and made the basis of a complete system of dogmatic theology. If therefore we wish to know how the Brahmans, from the time of the composition of the first Bráhmaṇa to the present day, understood and interpreted the hymns of their ancient Rishis, we ought to translate them in strict accordance with Sáyaṇa's gloss. This is the object which Professor Wilson has always kept in view in his translation of the Veda; and for the history of religion, which in India, as elsewhere, represents the gradual corruption of simple truth into hierarchical dogmatism and philosophical hallucination, his work will always remain the most trustworthy guide. Nor could it be said, that the tradition of the Brahmans, which Sáyaṇa embodied in his work, after the lapse of at least three thousand years, had changed the character of the whole of the Rig-veda. By far the greater part of these hymns is so simple and straightforward, that there can be no doubt that their original meaning was exactly the same as their traditional interpretation. But no religion, no poetry, no law, no language, can resist the wear and tear of thirty centuries; and in the Veda, as in other works, handed down to us from a very remote antiquity, the sharp edges of primitive thought, the delicate features of a young language, the fresh hue of unconscious poetry, have been washed away by the successive waves of what we call *tradition, whether we look upon it as a principle of growth or decay. To restore the primitive outlines of the Vaidik period of thought will be a work of great*

difficulty. *"We may collect all the passages where an obscure word occurs, we may compare them and look for a meaning which would be appropriate to all; but the difficulty lies in finding a sense which we can appropriate and transfer by analogy into our own language and thought. We must be able to translate our feelings and ideas into their language at the same time that we translate their poems and prayers into our own. We must not despair even where their words seem meaningless and their ideas barren or wild. What seems at first childish may at a happier moment disclose a sublime simplicity, and even in helpless expressions we may recognise aspirations after some high and noble idea. When the scholar has done his work, the poet and philosopher must take it up and finish it. Let the scholar collect, collate, sift, and reject—let him say what is possible or not according to the laws of the Vaidik language—let him study the commentaries, the Sútras, the Bráhmaṇas, and even later works, in order to exhaust all the sources from which information can be derived. He must not despise the tradition of the Brahmans, even where their misconceptions and the causes of their misconceptions are palpable. To know what a passage cannot mean is frequently the key to its real meaning; and whatever reasons may be pleaded for declining a careful perusal of the traditional interpretations of Yáska or Sáyaṇa, they can all be traced back to an ill-concealed 'argumentum paupertatis.' Not a corner in the Bráhmaṇas, the Sútras, Yáska, and Sáyaṇa should be left unexplored before we venture to propose a rendering of our own. Sáyaṇa, though the most modern, is on the whole the most sober interpreter. Most of his etymological absurdities must be placed to Yáska's account, and the optional renderings which he allows for metaphysical, theological, or ceremonial purposes, are mostly due to his regard for the Bráhmaṇas. These Bráhmaṇas, though nearest in time to the hymns of the Rig-veda, indulge in the most frivolous and ill-judged interpretations. When the ancient Rishi exclaims with a troubled heart, 'Who is the greatest of the gods? Who shall first be praised by our songs?'—the author of the Bráhmaṇa sees in the interrogative pronoun 'Who' some divine name, a place is allotted in the sacrificial invocations to a god 'Who,' and hymns addressed to him are called 'Whoish' hymns. To make such misunderstandings possible, we must assume a considerable interval between the composition of the hymns and the Bráhmaṇas. As the authors of the Bráhmaṇas were blinded by theology, the

* See the Author's Essay on the Veda and Zendavesta, page 13.

authors of the still later Niruktas were deceived by etymological fictions, and both conspired to mislead by their authority later and more sensible commentators, such as Sáyaṇa. Where Sáyaṇa has no authority to mislead him, his Commentary is at all events rational; but still his scholastic notions would never allow him to accept the free interpretation which a comparative study of these venerable documents forces upon the unprejudiced scholar. We must therefore discover ourselves the real vestiges of these ancient poets; and if we follow them cautiously, we shall find that with some effort we are still able to walk in their footsteps. We shall feel that we are brought face to face and mind to mind with men yet intelligible to us, after we have freed ourselves from our modern conceits. We shall not succeed always: words, verses, nay, whole hymns in the Rig-veda, will and must remain to us a dead letter. But where we can inspire those early relics of thought and devotion with new life, we shall have before us more real antiquity than in all the inscriptions of Egypt or Nineveh; not only old names and dates, and kingdoms and battles, but old thoughts, old hopes, old faith, and old errors, the old 'Man' altogether—old now, but then young and fresh, and simple and real in his prayers and in his praises."

How the Veda should be interpreted, and how Sáyaṇa's Commentary should be made use of for that purpose, has lately been shown in a work by M. Ad. Regnier, "Étude sur l'idiome des Védas et les origines de la Langue Sanscrite, Première Partie, Paris 1855." I may be allowed to quote from this excellent essay the following passage, which lays down with fairness and exactness the principles which ought to be followed by every student of the Veda. "Je joins au texte des hymnes celui du commentaire de Sáyaṇa Áchárya, que je suivrai, dans son interprétation, partout où il me semblera que la logique et la grammaire le permettent; toutes les fois que j'adopterai un autre avis que le sien, j'en donnerai les raisons: d'abord pour bien établir le sens, parce que, dans une matière souvent aussi obscure, il faut toujours savoir d'abord l'avis des Indiens eux-mêmes; puis, parce que ces scolies nous donneront l'occasion de faire connaissance avec quelques-unes des habitudes les plus ordinaires d'interprétation des glossateurs. Tous ceux qui ont eu le bonheur de suivre le cours de M. Eugène Burnouf savent quelle importance il attachait à l'explication des commentaires. Le meilleur moyen, selon lui, d'assurer et de hâter les progrès et de se rompre aux difficultés de la langue, c'était de se familiariser de bonne

heure avec la méthode et le style des grammairiens, style souvent très-abstrait et où les procédés d'expression synthétique sont poussés fréquemment à l'excès."

Even if the author had not paid this tribute to the memory of E. Burnouf, the accuracy and painstaking minuteness of his work would have shown that he belonged to Burnouf's school; and it is pleasing to see how the spirit of that eminent scholar seems still to be alive in that brilliant senate of learning of which he once formed so illustrious a member, when we read that the French Academy has proposed as one of its last prizes—

"Un commentaire particulièrement exégétique et grammatical, soit sur une partie suivie, soit sur un choix d'hymnes du Rig-véda, où l'on aura soin d'exposer toujours et de discuter, s'il y a lieu, même quand on ne l'adoptera pas, l'opinion du commentateur Sáyaṇa Áchárya."

Such a prize, while it gives a sanction to my work, for which I cannot sufficiently express my gratitude, will, it is to be hoped, act as an encouragement, and bring some of our young Sanskrit scholars toward that line of study which Burnouf pointed out to all of his pupils, as the most sure to lead to real and lasting results.

After what has been stated in the prefaces to the first and second volumes, I have little to add with regard to the MSS. which I used for the third volume. There is one notice which I lately received from the Rev. Dr. Stevenson, the distinguished editor and translator of the Sáma-veda, and which I subjoin here in confirmation of my views on the local origin of the three families of the MSS. of Sáyaṇa's Commentary.

"As I see you have formed a particular family of the two MSS. B 1. and B 2, I may as well mention to you all I have learnt of their history. B 1. was procured at Puna from a Wakil, who procured it from the family of the Guru of the late Peshwah; at least, so he said; and, as the family was poor, and no one else likely to have such a work, there is no reason to discredit his story. It is, as you will see, written by two different scribes, the greater part in what we at Bombay call Káyasthi lipi, the handwriting of Káyasths from the province of Guzerat. The letters in this portion are very deep. The rest is written by a Deccaní Brahman in what we call the Dakshaṇí lipi, and not so deep as the other. This difference is discernible even in the Cave inscriptions in the old character.

"B 2. was copied for M. Burnouf from that MS. by a Puna Brahman, whom I got to transcribe it for him.

"I have also an imperfect copy of another MS. of the Bháshya. The whole of the 7th Ashṭaka is wanting, and I have only two Adhyáyas of the 8th. If you would like to see them, I shall be happy to send them; and indeed the whole MS. is at your service. There is a complete copy of the Bháshya of the Rig-veda Sanhita in the library of the R. A. Society, Bombay branch. The first Ashṭaka is copied from B 1, and would be of no use to you; but the rest was taken, I am told, at Mr. Elphinstone's expense, or at that of the Bombay government, and deposited in the library, from a copy belonging to Dr. Taylor, which was carried to England, as I understood, to be deposited in the library of the India-House. As, however, you take no notice of such a work there*, I must have been under a mistake about that. However, there is no mistake about Dr. Taylor's having had such a work, and the Bombay copy having been taken, sometime about 1820, from it, with the exception of the first Ashṭaka, which was omitted, why I cannot say. The imperfect copy I have is partly taken from this, and partly made up of portions of a MS. received from the Wakil."

Another communication on the MSS. of Sáyaṇa's Commentary was kindly sent to me by my learned friend Mr. Fitz-Edward Hall, while yet at Benares. I had applied to him for help with regard to some extremely difficult passages in the fifth Ashṭaka, and in the hope that some more fragments of the MS. mentioned in my preface to the second volume, p. xii, might still be discovered in India. He wrote to me, Benares, Jan. 15, 1855:

"I was much afraid that I should have to send off this letter without being able to furnish you with the means of perhaps supplying the lacunæ you have encountered in the fifth Ashṭaka. In fact, but a few hours have elapsed since I was able to put together the extracts from MS. β, which I enclose. We have in the College library but one MS. of Sáyaṇa's Commentary on the R. V. It was copied in the Samvat year 1851, and is, as you will see under the heading of MS. α, of little value. Notwithstanding repeated enquiries, I was unable to get sight of any other MS. until β. was brought to me yesterday. This MS. is without date of transcription, and has no external indications of any antiquity. I think the passages from it, which I now send, fully justify me in ordering a

* Dr. Taylor's copy was not mentioned in the preface to the first volume, because it only begins with the third Ashṭaka. It will be seen from my preface to the second volume, which Dr. Stevenson had not received, that I recognised this MS. as one of the B. class, though, particularly in the later books, it has peculiar readings, and is sometimes evidently an abbreviation of the original text of the B. MSS.

copy to be made forthwith of the whole of the fifth Ashṭaka *. If you request it, I will have the remainder of the MS. copied; but, as there is a possibility that its character will differ in different Ogdoads, you had better send some test-passages by which to decide its value in the subsequent Ashṭakas.

"As for the sheet which I send you, it has reference to the last passage or passages noted in the paper you sent. I was not sure what it was you required. Accordingly, if I have erred, it has been on the right side. The first copy was made from *a*, which I afterwards changed by interlineations and erasures to correspond to *β*. I shall be happy if I hear that I have been the instrument of rescuing your work from even a single imperfection.

"Are you acquainted with an abridgment of Sáyaṇa's Commentary by Mudgala? The grammatical explanations are omitted altogether, and the remainder of the comment so abridged that the whole takes up about a fourth part the space of the original. Our copy professes to be taken in the Samvat year 147–. The last figure is unsupplied. Strange to say, it does not break off in the fourth Adhyáya of the first Ashṭaka, where all your MSS. of the A. and B. classes terminate; but it runs on to the words मित्रमहस्त्, p. 538, l. 5. Afterwards there occurs the same appearance of supplial by a later hand, to which you call attention; a peculiarity which I observed also in the MS. *β*. If this epitome may be trusted, the mutilated passage at the bottom of page 969 should run thus: युयं युवां यत्किंचनास्तम् निरतंसतम् । †.

* This copy has since been received. It begins with the third Adhyáya of the fifth Ashṭaka.

† This MS. has since been sent to the library of the East-India-House. It contains Ashṭaka I, II, and III, and the last three Adhyáyas of Ashṭaka IV. Some fragments of the first and seventh Ashṭakas were presented to me by Mr. Fitz-Edward Hall. I subjoin the beginning of the first Ashṭaka so far as it is legible, and without attempting to correct all mistakes:

श्रीगणेशाय नमः ।

ओं सच्चिदानंदभूपाय नित्याय विमलाय च ।
प्रत्यक्चेतनरूपाय जगद्रूपायते नमः ॥
गणेशाय नमस्तुभ्यं निर्विघ्नकरणाय च ।
सरस्वत्यै नमस्तुभ्यं ज्ञानबोधे स्थिरा भव ॥
आलोच्य पूर्वभाष्यं च बहृचस्य संमतः (समंततः?) ।
गहनं मन्यमानेन सुबोधेन समुद्धृतं ॥
नवनीतं यथा क्षीरात्सिकतायाश्च कांचनं ।
तथा समुद्धृतं सारं प्राणिनां बोधसिद्धये ॥
मौद्गल्यगोत्रेण च मुद्गलेन ह्यात्मानुभूतेन सुसंस्कृतेन ।
यथार्थभूतेन सुसाधकेन समुद्धृतं सारमिमं वरिष्ठं ॥

वेदार्थहीनस्य भारवाहकत्वं वेदांगे निरुक्ते उक्तं । स्थाणुरयं° न विजा° योऽर्थज्ञ° वेदमधीत्य वेदार्थो ज्ञातव्यः । तदुक्तं श्रौतस्मार्त्तकर्म कर्तव्यं फलत्यागकृतेन स्वशाखोक्तकर्मणा चित्तशुद्धिर्भविष्यति । चित्तशुद्ध्या ह्यात्मज्ञानं भविष्यति । तस्मात्कारणाद्वेदार्थज्ञानमवश्यं साधितव्यं ॥ ऋग्वेदस्याश्वलायनी सांख्यायनी शाकला बाष्कला मांडूका चेति पंच शाखाः । तत्र शाकलसंहितायां दश मंडलानि । तत्र प्रथमे मंडले चतुर्विंशानुवाकाः । तत्र प्रथमानुवाके त्रीणि सूक्तानि । देवताछंदर्षीणां सम्यग्बोधाय प्रकाशितानि । तत्र अग्निमीऴ इति नवर्चं प्रथमं सूक्तं । विश्वामित्रपुत्रो मधुछंदनामक ऋषिः । गायत्रं आग्नेयं ॥ ओं नमः श्रीगणपतये ॥ ओं

"Did you ever hear of a Rig-bháshya by Rávaṇa? Súrya Paṇḍit, in his Paramártha-prabhá, a commentary on the Bhagavadgíta, professes to have seen it. I am also told, that a commentary by Rávaṇa on one of the S'ákhás of the Yajur-veda is still extant.

"I have failed entirely in all attempts to trace the history of the MS. of Sáyaṇa, of which I sent you some fragments. But I have since procured a fragment of the eighth Ashṭaka, very like it in outward appearance."

In another letter, dated Ajmere, 24th May, 1856, the same distinguished scholar wrote to me:

"It must be perplexing to be obliged to illuminate Sáyaṇa's text with stars. I am not going to say that the publication of this work was undertaken prematurely: but I am pretty well assured, from what I have observed, that there still lie hidden, in the libraries of rigid Brahmans, scores of hereditary copies of this Commentary; and it is scarcely unreasonable to suppose that, if procurable, they might supply your lacunæ."

There is one more MS. which ought to be mentioned here. It belongs to the library of the East-India-House (No. 2612), and bears the title ऋग्वेदभाष्यषष्ठाष्टकसंपूर्णं. It is, however, not the sixth, but the fifth Ashṭaka of the Rig-veda. As it bears the date संवत् १६६४, it might have been expected to yield some help towards the restoration of Sáyaṇa's text; but on closer inspection it turned out an exact and literal reproduction of my own MS. Ca.

When I began this edition, I thought the whole of it would be completed in three or four volumes, and I now find that the first three volumes contain hardly more than half of the whole work. I must confess that I could have wished that the ancient poets of the Veda and their Indian commentators had been less diffuse; for though I believe that no edition of any author in Sanskrit or any other language, for which manuscripts had first to be copied, others to be collated, innumerable references to be verified, and an index to be made of every word, has ever been brought out so rapidly as this edition of the Rig-veda, yet I feel that ten years of my life are gone, and I know not whether I shall have sufficient time left to finish a work which I once undertook perhaps with too

अग्निमीळ इति । अग्निं देवं ईळे स्तौमि । कीदृशमग्निं । यज्ञस्य पुरोहितं यज्ञस्य संबंधिनि पूर्वभागे आहवनीयरूपेणावस्थितं । पुनः कीदृशं । देवं । दानादिगुणयुक्तं होतारं ऋत्विजं । देवानां यज्ञेषु होतृनामक ऋत्विक् अग्निरेव । पुनः कीदृशं । रत्नधातमं । यागफलरूपाणां रत्नानामतिशयेन धारयितारं ॥

much confidence. Yet even if I should not see the completion of this work, I should not be sorry for the time that I have spent on it; and nothing will ever induce me to change the principles which I have hitherto followed, and to give a hasty copy of a MS., instead of a critical edition of the text and commentary of the Rig-veda. I have had again for this volume the valuable assistance of my learned friend Dr. Aufrecht, and I sincerely regret that I shall no longer enjoy this advantage, as much of the correctness and accuracy of the last volumes was due to his conscientious cooperation, joined to the kind assistance which I have never failed to receive from my honoured friend Professor H. H. Wilson.

I have to express my deep obligation to the Court of Directors of the Honourable the East-India-Company, under the chairmanship of Colonel Sykes, and to the Board of Control, under the presidency of the Right Honourable Vernon Smith, for having sanctioned the continuation of this work, and granted funds necessary for its completion—an act of enlightened liberality, which will be applauded by all persons interested in the history of India and in the history of mankind, and by which one of the most important monuments of antiquity will be rescued from oblivion and restored in its integrity.

M. M.

OXFORD, June 5, 1856.

VARIETAS LECTIONIS.

Maṇḍala IV.

Page 1. line 4. (IV. 1, 1.) वामदेव्ये B. sec. man. वामदेवे A. B. वामदेवस्य Ca. वामदेव C.: cf. Páṇ. IV. 2, 9.

P. 2. l. 5. (IV. 1, 1.) तत्सहायेषु A. C. तत्सदेवं तत्सहेयेषु B.

P. 2. l. 21. (IV. 1, 2.) स्तोतॄन् Ca. नृदेवान् A. देवान् B. स्तोतृदेवान् C.

P. 4. l. 24. (IV. 1, 5.) अत्यंतफलप्रदः A. B. अत्यंतमीप्सितफलप्रदः C.

P. 5. l. 1. (IV. 1, 5.) रातेर्व्यत्ययेन कानच् A. B. रातेर्यङ्लुकि व्यत्ययेन शानच् C.

P. 6. l. 1. (IV. 1, 7.) स्वतेजसा परिवीतः परिवेष्टितः C. परिवीतः A. B.

P. 7. l. 4. (IV. 1, 9.) दापयित्वा A. B. दत्त्वा C.

P. 8. l. 14. (IV. 1, 12.) विपर्न्यै. The MSS. have विपन्यौ, but Sáyaṇa must have read विपर्न्यै.

P. 11. l. 27. (IV. 1, 18.) पश्चा पृष्ठदेशेषु C. पश्चा पृषग्देशेषु A. B.

P. 13. l. 5. (IV. 1, 20.) After जातवेदाः, Ca. जातान्येनं विंदंतीति वा जातवेदाः ।.

P. 16. l. 8. (IV. 2, 6.) स्वतवान्धनवानिति तलवकार उक्तं C. स्वतवान् धनवित्तलावकार उक्त A.; omitted in B. स्वतवान् has been repeated by conjecture.

P. 18. l. 12. (IV. 2, 9.) आहननं पापं B. A. C. omit पापं.

P. 18. l. 23. (IV. 2, 10.) असामस्तस्य C. असाम यस्य A. B. The readings of A 2, Colebrooke's MS., in verse 13, originally left out in Aa. (the MS. sent to me by Mr. Hall), seem to prove that A 2. is copied from Aa. See also IV. 4, 4.

P. 27. l. 25. (IV. 3, 6.) कत्कथा ब्रूयाः A. C. कत्पापं कथा ब्रूयाः B.

P. 29. l. 21. (IV. 3, 9.) इति त्वाः प्रजास्ता नामर्येणा निमिश्लेन A. B. इति त्वाः प्रजास्तामसर्येणामरणानिमिश्लेन C.

P. 31. l. 3. (IV. 3, 12.) प्रोत्साह्यमानः B. C. प्रगृह्यमानः A.

P. 31. l. 12. (IV. 3. 13.) प्रातिवेश्यस्य inserted from C. जनस्य B.

P. 32. l. 25. (IV. 3, 16.) निख्यानि नेयार्थानि गूढानि C. निख्या गूढानि B.; wanting in A.

P. 33. l. 27. (IV. 4, 1.) तपिष्ठैस्तप्ततमैस्तपिष्ठतमैरिति वा A., and Nir. MS. Par., where तृप्ततमै (तमृतमैः?) is given as a marginal note. Roth's edition has तपिष्ठैस्तप्ततमैस्तृप्ततमैः प्रपिष्ठतमैरिति वा ।. So has B., only तपिष्ठैः and तपिष्ठतमैः instead of तपिष्ठैः and तपिष्ठतमैः. C. has तपिष्ठैस्तमृतमैस्तपिष्ठतमैरिति वा.

P. 35. l. 18. (IV. 4, 4.) अरातिमदानं वा कुरुते deest in B.

P. 36. l. 3. (IV. 4, 5.) जामि जामिं बंधुं अबंधुशत्रून् A. जामिजामिं बंधुशत्रून् C. जामिं बंधुमजामिमबंधुं श्ताहशान् शत्रून् B.

P. 38. l. 12. (IV. 4, 9.) परिचरति A. B. परिचरत्येव स्तोता C.

P. 41. l. 8. (IV. 4, 14.) वा before वाजान् inserted by conjecture.

P. 41. l. 11. (IV. 4, 14.) प्रतिपादितं A. B. प्रार्थितं C.

P. 41. l. 21. (IV. 4, 15.) After परिचरेम ।, Ca. has भूते वा लिङ् । पर्यचराम ।.

P. 42. l. 23. (IV. 5, 1.) सामर्थ्याद्वविरिति C. सामर्थ्याद्विधिरिति A. B.

P. 43. l. 9. (IV. 5, 1.) किमिव—कूलमिव in A. B. C.; it seems to be a marginal note.

P. 43. l. 17. (IV. 15, 3.) प्रकारं C. प्रकारतरं A. B.

P. 43. l. 19. (IV. 15, 3.) नीयमानः C. स्थापितः B.; omitted in A.

P. 44. l. 15. (IV. 5, 4.) ये द्वेष्टारः conjecture. A. C. have द्वेष्टारः after स्थिराणि. B. omits it, but gives द्वेष्टृन् after जानतः.

P. 45. l. 24. (IV. 5, 7.) समानं सर्वेषामेकरूपं ॥ सर्वेषामेकरूपं समानं A. B. C.

P. 46. l. 5. (IV. 5, 7.) लुप्तोपममेतत् ॥ लुप्तोपमैतत् A. B. C.

P. 46. l. 7. (IV. 5, 7.) ज्योतिरादिभि C. ज्योतिरादित्य A. B.

P. 46. l. 9. (IV. 5, 7.) आरूपितं देवैर्नमस्या A. आरूपितं आरोपितं देवैर्नमस्यं B. आरूपितं आरोपितं देवैरद्दया C.

P. 48. l. 12. (IV. 5, 12.) दातव्यं C. तद्दातव्यं A. B.

P. 49. l. 1. (IV. 5, 13.) After पालयिष्यः, Ca. पत्नीस्थानीया वा ।.

P. 49. l. 9. (IV. 5, 14.) उक्थेन A. B. C. उच्छेदन Ca.

P. 50. l. 9. (IV. 6, 1.) इत्यत्र प्रकृत्यंशोनुवादः कः Ca. इत्यत्र कृत्यंशोनुवाकः A. B. C.

P. 56. l. 11. (IV. 7, 3.) प्रभासकं वृद्धेः कर्तारं C. प्रारंभकं B. A. gives no explanation.

P. 58. l. 4. (IV. 7, 7.) स्थाने after धामनि inserted from C.

P. 59. l. 9. (IV. 7, 9.) यद्यं त्वां B. C. यद्यद्वा A.

P. 59. l. 10. (IV. 7, 9.) जननहेतुं ॥ जनकहेतुं A. C. हेतुकहेतुं B.

P. 63. l. 24. (IV. 9, 5.) ब्रह्मा यो ॥ ब्रह्मा त्वो A. B. ब्रह्मा यो C.

P. 63. l. 25. (IV. 9, 5.) वा before सदस्यो added from C.

P. 68. l. 10. (IV. 11, 1.) भद्रं भजनीयं C.; omitted in A. भद्रं मंगलं B.: cf. 10, 1.

P. 71. l. 9. (IV. 12, 1.) छंदः supplied. त्रैष्टभं C. त्रैष्टुभो A. B.

P. 71. l. 18. (IV. 12, 1.) भावकेन Ca. लोपकेण A. तोषकेण B. C.

P. 72. l. 4. (IV. 12, 2.) यो after परिचरन् by conjecture. C. has स.

P. 74. l. 18. (IV. 13, 2.) मित्रोऽहरभिमानी added from C. B. has only मित्रो.

P. 75. l. 2. (IV. 13, 3.) अविमुंचंतः B. C. अविसंयतः A.; probably meant for अविसंसयंतः.

P. 75. l. 10. (IV. 13, 4.) जगन्निर्वाहात्मकस्य रसस्यादानार्थं ॥ जगन्निर्वाहकात्मकस्यादानार्थं A. C. जगन्निर्वाहकात्मकस्य दानार्थं B. जगन्निर्वाहकात्मकसंरस्यादानार्थं Ca.

P. 75. l. 12. (IV. 13, 4.) संवृण्वन् C. अपवृण्वन् A. B.

P. 76. l. 2. (IV. 13, 5.) नाकेन समवेतः A. C. ऋतेन समवेतः B.

P. 78. l. 3. (IV. 15, 1.) अस्य after पराभ्यां A. B. C.

P. 78. l. 25. (IV. 15, 2.) पर्येति A. B. C. परियाति Ait. Br.

P. 79. l. 13. (IV. 15, 4.) सायहृयो ॥ सायेहयो C. स्यायहयो Ca. स्यायहयो B. प्रायहयो A.

P. 79. l. 14. (IV. 15, 4.) अयीयजदिति ॥ यीयज इति C. यीयजत इति A. यीयजो यज्ञे इति B.

P. 79. l. 22. (IV. 15, 5.) इतेन यजमानस्य A. B. अनेन यजमानः C.

P. 82. l. 3. (IV. 16, 2.) समीपे नाम्नाम्नतुष्या यथा मुंचंति ॥ समीपे यज्ञाश मनुष्या यथा मुंचंति A. समीपे अज्ञाश मनुष्यां यथा अम्नाम्नुंचंति C. समीपेन मनुष्या यथा आम्नाम्नुंचति B.

P. 83. l. 24. (IV. 16, 6.) पर्वतमपि मेघं वा । अश्मेति मेघनामैतत् ॥ पर्वतमिति मेघं वा । मेघनामैतत् A. C. पर्वतं मेघं पर्वतमितिः मेघनामैतत् B. पर्वतमपि मेघं वा Ca.

P. 84. l. 10. (IV. 16, 7.) बभूव ॥ बभूव A. B. ऽभूः C.

P. 85. l. 1. (IV. 16, 9.) इति नृमणाः A. C. इति नृम्णाः B. It ought to be नृमणाः ।.

P. 89. l. 3. (IV. 16, 17.) अबोधि A. B. C.

P. 91. l. 2. (IV. 17, 1.) त्वं महाँ इति added by conjecture. The second Viniyoga is only given by C.

P. 92. l. 18. (IV. 17, 4.) विनाशरहितं Ca. विचाररहितं A. C. विच्युतिरहितं B.

P. 98. l. 2. (IV. 17, 16.) From स्वंभूतं to इत्यर्थः only in C. B. has कोशमाधारभूतमिंद्रमयते रक्षणार्थं माध्याश्रियामः न त्यजामः भजेम इत्यर्थः.

P. 101. l. 24. (IV. 18, 3.) अन्वब्रवीत् ॥ अनुब्रवीत् B. अनुब्रवीत् A. C.

P. 103. l. 10. (IV. 18, 6.) प्रतिपादकोक्तेन A. B. C.

P. 103. l. 24. (IV. 18, 7.) पापं after ब्रह्महत्यारूपं supplied by conjecture.

P. 108. l. 5. (IV. 19, 2.) नदीः C. आपः तासां B.; omitted in A.

P. 112. l. 21. (IV. 20, 2.) अभिलक्षीकृत्य C. अभिलक्ष्य B. अभिमुखीकृत्य A.

P. 113. l. 25. (IV. 20, 5.) इव after पीरपुरुष added from B. यो by conjecture.

P. 114. l. 12. (IV. 20, 6.) न्यृष्टं निगतं A. B. C. न्यृष्टं निर्गतं Ca. The usual explanation would be नितरां प्राप्तं or व्याप्तं ।.

P. 114. l. 19. (IV. 20, 7.) वारयिता A. B. निवारयिता C.

P. 119. l. 10. (IV. 21, 7.) सेवत इति यत् तत् B. C. सेवत इति यावत् A.

P. 121. l. 15. (IV. 22, 1.) यज्ञहिरादिकं च ॥ यत्र हविरादिकं च A. B. यत्र हविरादिकं च C.

P. 125. l. 10. (IV. 22, 10.) उपमाहि देहि C. उपमाहि उपसंस्कि A. B.

P. 126. l. 8. (IV. 23, 1.) कस्य after होमनिष्पादकस्य added by conjecture.

P. 131. l. 2. (IV. 24, 1.) परमैश्वर्ययुक्तं ॥ परमैश्वर्यं A. B. C.

P. 132. l. 10. (IV. 24, 4.) तदानीमेव नेमे केचन भाग्यवंतो C. तदानीमेवा तमे वा तमे क तं भाग्यवंतो A. तदानीमेव नमे भाग्यवंतो B.

P. 133. l. 3. (IV. 24, 6.) Ca. has after इत्था, सत्यमेव.

P. 133. l. 5. (IV. 24, 6.) The Pada MSS. have in the text अविवेनम्. The Sanhitá MSS. S. 2. 3. have अविवेनं तमित्; S. 1. अविवेनममित्. Sáyaṇa read अविवेनं.

P. 133. l. 16. (IV. 24, 7.) अत्रवाची A. अत्र भूक्ष्यवाची C. The whole passage is left out in B.

P. 134. l. 10. (IV. 24, 9.) न विक्रीतस्त्वयं मया C. न स विक्रीतवान्पुरा A. B. न विक्रीतः स्वयं मया Ca.

P. 134. l. 12. (IV. 24, 9.) वस्नं B. वस्नुं A. क्रेतुः C.

P. 134. l. 13. (IV. 24, 9.) चेकृतो ॥ चेकृतो C. चेकुतो A. Ca. चेकुतो B. Aa.

P. 134. l. 13. (IV. 24, 9.) अथ मूल्यार्थमेतस्यांमविचार्येव निर्णयः A. अथ मूल्यार्थमेतस्यांमविचार्यैव निश्चयः B. अथ मूल्यार्थमेतश्यात् विचार्यैव तु निर्णयः Ca. °मेतास्यात् C.

P. 134. l. 14. (IV. 24, 9.) इत्येवं C. अन्येव A. अन्येन B.

P. 134. l. 17. (IV. 24, 9.) इत्ययं A. C. ईरितं B.

P. 135. l. 2. (IV. 24, 10.) स्तुतिभिः। deest in A. B.

P. 135. l. 24. (IV. 25, 1.) तर्पणाय ईड्डे। इंद्रं स्तौति C. अपर्णाय ईड्ड। स इंद्रः A. अर्पणाय ईड्ड। याच्यते स इंद्रः B.

P. 137. l. 1. (IV. 25, 4.) धारयन् C. पारयत् A. B.: cf. S'atap. I. 4, 2, 2.–5, 1, 8.

P. 137. l. 14. (IV. 25, 5.) मनायुरिंद्रविषयस्तुतिकामश्च C. मनायुमनोयुक्तो यजमानः B.; omitted in A.

P. 137. l. 15. (IV. 25, 5.) सुप्रावी: सुष्टु प्राविता। सुप्राव्यी: हंविं सुष्टु प्रा यिता Aa. सुप्राव्यी: सुष्टु प्रायिता A. सुप्राव्यी: हविर्भिः सुष्टु प्रतर्पयिता C. सुप्रावी: सुष्टु प्रावयिता B.

P. 139. l. 14. (IV. 26, 1.) वामदेवो मनुरभवं। A. C. वामदेवः इंद्रो वा मनुरभवं।.

P. 139. l. 16. (IV. 26, 1.) आर्जुनेयं to ऋषिरहमेवास्मि given from C.; omitted in A. B. places किंच आर्जुनेयमर्जुन्याः पुत्रं कुत्समहं न्यृंजे प्रसाधयेऽहं कविः सर्वज्ञ उशना शुक्र इति मा पश्यत after इत्युक्तं भवति.

P. 140. l. 11. (IV. 26, 3.) व्यैरं अध्वंसयं B. व्यैरं प्रैरयं C. व्यैरं यं A.

P. 142. l. 21. (IV. 27, 1.) मामरक्षन्नित्यर्थः। अथाधुना श्येनः श्येनवत्स्थितोऽहं जवसा वेगेन निरदीयं। शरीरान्निरगमं। अनावरणमात्मानं ज्ञाननिर्गतोऽस्मीत्यर्थः। C. मामरक्षन्नित्यर्थः। अथानंतरं श्येनः सन् जवसा वेगेन गर्भात् निरदीयं निर्गतवानस्मि। B. The whole explanation after मामरक्षन्नित्यर्थः omitted in A.

P. 144. l. 14. (IV. 27, 5.) सोमराजस्य A. C. सोमरस्य B.

P. 145. l. 22. (IV. 28, 3.) सर्वा सर्वाणि A. C. शर्या सर्वाणि B. Instead of शर्वा, Sáyaṇa read सर्वा.

P. 150. l. 22. (IV. 30, 7.) किमित्यत्यंतं A. C. अत्यंतं B

P. 159. l. 7. (IV. 31, 15.) Before अस्माकमुत्तमं, A. B. have तस्मा त्वं, Ca. स्मात्वं.

P. 164. l. 7. (IV. 32, 19.) The commentary to this verse is only given in B. and Ca. A. has दश ते कलशानामित्यृक् त्यक्ता.

P. 165. l. 15. (IV. 32, 24.) यामेषु यज्ञेषु B. यामेषु गमनेषु Ca. यामेषु A.

P. 167. l. 4. (IV. 33, 2.) From वेषेण to कर्मभिः taken from Ca. B. परिविष्टी वेषणा पारंचर्य वेषणेन दंसनाभिः स्वकर्मसामर्थ्यैश्चारं etc. A. परिविष्टी परिवेषणेन परिचर्य वेषणा वेषणेन व्याप्ता यज्ञामंतराग्रवदेवानामिंद्रादीनां etc.

P. 167. l. 6. (IV. 33, 2.) युवशा कर्वेति देवप्राप्तेकरेकांतत्वेन देवैरेकत्वादिभावः। A. °त्वादिति भावः B. युवस्या कर्वेति देवत्वप्राप्तेरुत्क्रोपत्वेन देवैरुत्कत्वादिति भावः। Ca.

P. 167. l. 8. (IV. 33, 2.) मनायै ऋतेन A. मनायै मतिकृते Ca.

P. 167. l. 18. (IV. 33, 3.) ऋषयः A. B. ऋभवः Ca.

P. 168. l. 2. (IV. 33, 4.) After अकुर्वन्निति यत्, Ca. adds किं मृताया गोस्त्वचांगसु छाद्य तस्या मांसं समयोजयन्नित्यर्थः.

P. 168. l. 13. (IV. 33, 5.) देवत्वप्राप्त्युक्त्येन देवत्वेन तदा तेषु मध्ये एको ज्येष्ठः A. B. देवत्वप्राप्त्युक्तो ज्येष्ठः Ca.

P. 168. l. 15. (IV. 33, 5.) तदपरो कनिष्ठो वाजः B. तत्कनिष्ठस्ततोऽपि कनीयान् Ca.; omitted in A.

P. 175. l. 9. (IV. 34, 10.) वाजवतं बलवंतं B. वाजवंतमन्नवंतं C. वाजवंतं A.

P. 175. l. 11. (IV. 34, 10.) दातुं Ca. दत्त B. ददातु A. ददात C.

P. 175. l. 12. (IV. 34, 10.) रयिं after दत्त C. भूरिं A.; omitted in B.

P. 175. l. 19. (IV. 34, 11.) अपरक्ता A. B. अपगता C.

P. 175. l. 21. (IV. 34, 11.) After संमदथ, तथा च मरुद्भिः संमदथ should be added. B. has संमदथ । मरुद्भिः राजभिः राजमानैः etc.

P. 177. l. 2. (IV. 35, 3.) From अथ सोऽग्निः to कुशलहस्ता यूयं from C. B. gives the following commentary: हे वाजाः सुहस्ताः शोभनहस्तोपेताः ऋभवो यूयं चमसं चतुर्धा व्यकृणोत व्यकुरुत कृत्वा च हे सखे सखिभूताग्ने विशिष्टेति अनुग्रहेण सोमपानमित्यब्रवीत अवदत अथ यूयं अमृतस्यामरणधर्मकस्य etc.

P. 179. l. 8. (IV. 36, 9.) सोमदानवंतं तृतीयं A. B. सोमदानवंतं यत्तृतीयं Ca.

P. 179. l. 10. (IV. 36, 9.) परिवेषनवंतं A. B. परिचक्षणवर्नतं Ca.

P. 181. l. 24. (IV. 36, 6.) स्तुत्या युक्तो C. स्तुत्या A. स्तुत्यो B.

P. 184. l. 5. (IV. 37, 2.) दक्षायोत्साहाय C. दक्षाय बलाय B. दक्षायोत्साहाय A.

P. 188. l. 13. (IV. 38, 4.) After यजमानस्य, Ca. has आप इति देवताविशेषणं । अग्नः संभूत इत्यर्थः ।.

P. 189. l. 9. (IV. 38, 6.) Instead of शुभ्वा, Sáyaṇa explains सुभ्वा.

P. 190. l. 10. (IV. 38, 9.) अभिभवित्री जूतिं पराभिभूतिमित्युभयं वा ॥ अभिभवित्री जूतिं पराभिभूतिं चेत्युक्तं यं वा A. अभिभवित्री चेत्युक्तं य B 1. (वे B.). अभिभवती जूतिं पराभिभूतिं चेत्युभयं वा Ca.

P. 191. l. 13. (IV. 39, 1.) घासं C. ग्रासं A. Ca. वासं Aa. B.

P. 191. l. 13. (IV. 39, 1.) विवासयंती: A. B. Ca.

P. 191. l. 15. (IV. 39, 1.) After तारंतं, A. Ca. have वे (or ये). B. omits several words.

P. 191. l. 24. (IV. 39, 2.) तारकं यं A. Ca. तारयितारं B.

P. 192. l. 16. (IV. 39, 4.) यत्तदमन्महि ॥ तेदमन्महि A. Ca. यदमन्महि B.

P. 194. l. 11. (IV. 40, 2.) तुरण्यसत् । त्वरया सीदति added from B. इति तुरण्यसत् supplied by conjecture.

P. 194. l. 21. (IV. 40, 3.) वानुसृत्य ॥ वानुसृग A. वानुसृतृ C. वानु B.

P. 194. l. 24. (IV. 40, 3.) After श्येनस्येव, Ca. तस्य देवस्य.

P. 195. l. 7. (IV. 40, 4.) कर्षप्रदेशे C. कक्षिप्रदेशे A. कुक्षिप्रदेशे B.: cf. Rv. I. 117, 22.

P. 195. l. 8. (IV. 40, 4.) त्वरयति गंतुं ॥ त्वरयति गंतुः C. त्वरयितु गंतु A. गत्वतुं यंति B.

P. 195. l. 24. (IV. 40, 5.) चित्तरूपस्थितः C. चितरूपस्थितः A. चिंतनूपस्थितः B. हृदि स्थितः Ca.

P. 195. l. 26. (IV. 40, 5.) एकीकृत्योपास्यः परमात्ममंत्रप्रतिपाद्यः C. एकीकृत्योपास्य परमात्ममंत्रप्रतिपाद्यः Aa. एकीकृत्योपरस्परमंत्रप्रतिपाद्यः A. एकीकृत्यं परस्परपरमात्ममंत्रप्रतिपाद्यः B.

P. 196. l. 10. (IV. 40, 5.) यज्ञो ॥ यज्ञं A. B. C.

P. 197. l. 4. (IV. 41, 1.) हविष्मान् हविर्युक्तः etc. B. has हविष्मान् हविर्युक्तोऽमृतोऽमरणलक्षणेन अमृतः मरणरहितो होता न स्वर्गसाधनभूतोऽग्निरिव.

P. 197. l. 6. (IV. 41, 1.) उक्त उदितः C. उक्तं हिते A. उक्तः अभिहितेन B.

P. 198. l. 10. (IV. 41, 4.) After हिंसकः, A. C. have शत्रूणां. B. omits the whole passage.

P. 199. l. 1. (IV. 41, 6.) तनये तत्पुत्रे A. C. तनये पौत्रे B.

P. 199. l. 5. (IV. 41, 6.) परितक्मे ॥ परितनके A. B. C. परितक्मे गमने Ca.

P. 199. l. 24. (IV. 41, 8.) सुदानू शोभनफलदातारौ added from B.

P. 199. l. 25. (IV. 41, 8.) After कामयमानाः, A. has पंक्तये, B. यदमयः, C. पक्तयेडू. Ca. omits it. पक्तयो by conjecture, or यदातयो.

P. 199. l. 25. (IV. 41, 8.) अवसे रक्षणाय inserted in B. after पक्तयो.

P. 199. l. 27. (IV. 41, 8.) मनस ईश्वरा A. C. मनसा इषाः (i. e. मनस ईषाः) B.

P. 200. l. 7. (IV. 41, 9.) धनिकं स्वामिनं C. अधिकं स्वामिनां A. B.

P. 200. l. 15. (IV. 41, 10.) रथसमूहरूपस्य C. रथरूपस्य A. B.

P. 200. l. 16. (IV. 41, 10.) स्वमात्मना स्वयमेवाप्रयत्नेन from C.

P. 200. l. 17. (IV. 41, 10.) अवतं A. B. भवतं C.

P. 200. l. 25. (IV. 41, 11.) Before वाजसातौ, B. has ततोऽस्मदीये.

P. 201. l. 15. (IV. 42, 1.) क्षितिस्वर्गभेदेन ॥ क्षितिः स्वर्गभेदेन A. B. C.

P. 202. l. 11. (IV. 42, 3.) From तेऽप्यहमेव to द्यावापृथिव्यौ supplied from Ca.; left out in A. B. has रजसी राजमाने रोदसी द्यावापृथिव्यौ धारयं च धृतवानस्मि । किंच विद्वान् त्वष्टेव प्रजापतिरिव विश्वा सर्वाणि भुवनानि समैरयं । प्रेरयामि ॥.

P. 202. l. 20. (IV. 42, 4.) ऋतावा यज्ञवान् Ca.

P. 202. l. 21. (IV. 42, 4.) मदर्थमेव C. समर्थमेव A. B.

P. 203. l. 6. (IV. 42, 5.) परेषामभिभाविबलोऽहं A. C. अन्येषामभिभावुकोऽहं B.

P. 204. l. 1. (IV. 42, 7.) वृतानावृतान् B. वृतानाच्छन्नान् A. C.

P. 204. l. 2. (IV. 42, 7.) अप्संघान् C. अप्सुतान् A. मेघान् अप्सुतान् B.

P. 204. l. 8. (IV. 42, 8.) अराजकं दृष्ट्वा राष्ट्रं पुरुकुत्सस्य लिप्सया B. यत्यावराजक° Ca.

P. 204. l. 9. (IV. 42, 8.) पुनः प्रोचुः A. C. प्रतिप्रोचुः B.

P. 204. l. 24. (IV. 42, 9.) अप्रीणयत् C. प्रीणयति A. B.

P. 205. l. 6. (IV. 42, 10.) युवां संभक्तारो वयं C. युवां सो वयं A. हविषां संभक्तारो वयं B.

P. 205. l. 13. (IV. 43, 1.) प्रातरनुवाकाश्विनशस्त्रयोराश्विने C. प्रातरनुवाकाश्विने क्रतौ A. B.

P. 205. l. 23. (IV. 43, 1.) श्लेषयेम श्राययेम वा ॥ श्लेषयेम श्रयेम वा A. श्लेषयेम वा C. श्लेषयेमाशयेम वा B. The last reading explains श्रेषाम by आशयेम from अश्. But Sáyaṇa seems to give two different etymologies of श्रेषाम, either from श्लिष् or from श्रि.

P. 206. l. 6. (IV. 43, 2.) मृळयेदस्मान् A. C. सुखयेदस्मान् B. Sáyaṇa explains frequently मृड् by सुखयति.

P. 207. l. 23. (IV. 43, 6.) चेतारो गंतारो Ca.

P. 208. l. 10. (IV. 43, 7.) गरितारं only in A.

P. 208. l. 22. (IV. 44, 1.) गोः गवां Ca.

P. 209. l. 7. (IV. 44, 2.) After विभक्तिव्यत्ययः। A. C. have समिधे, Ca. समध्ये.

P. 209. l. 10. (IV. 44, 2.) वहंति वाहयंति Ca.

P. 210. l. 11. (IV. 44, 5.) इंद्धंतो यजमानाः C. इन्धमानाः A. B.

P. 211. l. 15. (IV. 45, 1.) Sáyaṇa has omitted युज्यते; B. reads द्योतमानस्यादित्यस्य सानु युज्यते वि सान्वौ समुच्छ्रितप्रदेशे etc.

P. 211. l. 17. (IV. 45, 1.) त्रिविधाः पृक्षासोऽन्नानि।. A. C. leave out पृक्षासोऽन्नानि. B. gives the whole passage in this way: त्रिविधाः मिथुना त्रेधा विहितं यात्र इदमन्नमशनं पृक्षासः अन्नानि

सानं स्वादयस्वेति हि श्रुतं ।. It seems that पृक्षासः अन्नानि, as युज्यते before, was inserted in B. from the margin. त्रेधा विहितं वा इदममशनं पानं खादस्वेति हि श्रुतं Ca. त्रेधा विहितं चात्र इदमसंमशनं पानं खादयस्वेति हि श्रुतं A.

P. 213. l. 16. (IV. 45, 6.) ते वाहभिः A. B. C.

P. 213. l. 17. (IV. 45, 6.) ध्वंसयंतो inserted from Ca., which has after रश्मयः । तो वाहभि प्रकाशाः प्रसिद्धौरश्वाहोभितावी दविध्वतः कंपयंतो ध्वंसयाता वा तमांसि etc.

P. 220. l. 4. (IV. 49, 2.) वामास्ये चारुः शोभनः ॥ वामास्ये सोमः A. वामस्ये सोमः B 1. हे इंद्रा-बृहस्पती चारुः शोभनः B 4. sec. man. Ca. omits the whole passage.

P. 220. l. 12. (IV. 49, 3.) संबंधि ॥ संबंधिनं A. B. C. See Amara-kosha II. 2, 5.

P. 221. l. 21. (IV. 50, 1.) मंद्रजिह्वं मादनजिह्वं मोदनजिह्वं तं Ca. मंद्रजिह्वं तं A. C. मंद्रजिह्वं मंद्रा जिह्वा यस्यासौ मंद्रजिह्वः तं B.

P. 222. l. 3. (IV. 50, 2.) उपक्षिपंति A. C 2. उपाक्षिपंति B. उपक्षपयंति Ca.

P. 227. l. 25. (IV. 51, 3.) After विमध्ये, Ca. अंधकारस्यांतर्मध्ये.

P. 228. l. 9. (IV. 51, 4.) तौ द्वौ तत्वयेऽपि B. त्ये द्वे तत्वयेऽपि A. यद्वौ तत्रयोऽपि Ca.

P. 229. l. 3. (IV. 51, 6.) अशोर्णा A. B. अजीर्णा Ca.

P. 229. l. 4. (IV. 51, 6.) यतः ॥ यथा A. B. C.

P. 229. l. 12. (IV. 51, 7.) ताः खलूपकारिण्यः Ca. ताः स्वरूपकारिण्यः A. °चारिण्यः B.

P. 229. l. 24. (IV. 51, 8.) देशादेकरूपादंतरिक्षात् Ca.

P. 229. l. 25. (IV. 51, 8.) ऋत्विग्घविरादिकं Ca. ऋत्विग्यशदिकं A. ऋत्विगादिकं B.

P. 230. l. 2. (IV. 51, 8.) प्रसंगादुपकारत्वाच्च A. B. प्रसरायकारकत्वाच्च Ca.

P. 230. l. 9. (IV. 51, 9.) अहिंसितवर्णा taken from Ca.

P. 231. l. 3. (IV. 51, 11.) विभातीर्विविधभानाः Ca.

P. 232. l. 9. (IV. 52, 4.) वियुज्यमाना B. C. युज्यमाना A.

P. 232. l. 22. (IV. 52, 6.) अनु पश्चात् taken from Ca.; omitted in A. B. C 2. B. has अन्वव अनुरक्ष sec. man.

P. 232. l. 24. (IV. 52, 7.) The Viniyoga is given in Ca. only.

P. 235. l. 11. (IV. 53, 5.) अंतरा द्यां न A. B. अंतरा क्षीतं Ca. Yáska, Nir. II. 10. अंतरा क्षांतं भवति ।.

P. 235. l. 17. (IV. 53, 5.) तिस्रो दिव इंद्रप्रजापतिसत्याख्यान् Ca. तिस्रोऽग्नेर्दिव इंद्रप्रजापतिसत्याख्यान् A. तिस्रो दिवो अग्नींद्रप्रजापतिरित्याख्यान् B.

P. 238. l. 2. (IV. 54, 3.) अनागसः अपापान् B.

P. 238. l. 12. (IV. 54, 4.) न प्रमीयेत् । न प्रहिंस्येत् A. B. न प्रमीयेत । न प्रहिंस्येत Ca.

P. 238. l. 13. (IV. 54, 4.) दैव्यस्येत्यधिकरणे ॥ दैव्यस्येति व्यधिकरणे A. B. C 2. दैव्यधिकरणे Ca.

P. 238. l. 16. (IV. 54, 4.) यत् यः ॥ यः B. यं । Ca. यौ A.

P. 238. l. 17. (IV. 54, 4.) सुवति प्रेरयति B.

P. 239. l. 1. (IV. 54, 5.) गच्छंतस्त्वां A. C. गच्छंतः प्राणिनस्त्वया B.

P. 239. l. 24. (IV. 55, 1.) The whole passage from कश्च वरूता सं to वारयिता is taken from Ca.

P. 240. l. 5. (IV. 55, 1.) समानाधिकरणा इति सामान्याधिकरण्यात् A. C 2. समिधिकरणा इति समानाधि-करणां यत् B. नामंत्रिते समानाधिकरणे (Páṇ. VIII. 1, 73.) इत्यविद्यमानवत्त्वप्रतिषेधात् Ca.

P. 240. l. 16. (IV. 55, 2.) दुःखानामभिक्षयिताटः Ca. दुःखानामक्षयिताटः A. B.

P. 241. l. 1. (IV. 55, 3.) यथा wanting in A. B. C.

P. 241. l. 2. (IV. 55, 3.) तथा ॥ ह तथा A. B. C 2. यथा B. sec. man. Ca. omits the whole passage.

P. 241. l. 19. (IV. 55, 5.) इंद्रसखस्य Ca. अद्रेसखस्य A. अद्रेः सखस्य B.

P. 243. l. 12. (IV. 56, 1.) Áśvaláyana adds इह ज्येष्ठे after मही द्यावापृथिवी.

P. 243. l. 19. (IV. 56, 1.) इह यज्ञे deest in A. C.

P. 245. l. 13. (IV. 56, 6.) राजयः । ईशाने भवयः । Ca.

P. 245. l. 13. (IV. 56, 6.) शरीरैकदेशेन Ca. शारीरैकदेन A. शरीरैक्यादिना B.

P. 245. l. 14. (IV. 56, 6.) द्यौ स्वीयेनोपरेण भुवं सा च स्वकीयेन कार्ष्णेयेन Ca. द्यौ स्वीयोनासरेणं भुवं सा च स्वकीयेन काष्णेयेन A 2 and 3. स्वीयोनोपरेण A 3. sec. man. द्यौः स्वीयेनासारेण भुवं सा च स्वकीयेन कार्म्येण B. त्यौ स्वीयोनासारेण भुव स च स्वकीयेन काष्यर्येर्यन C 2. द्यौः स्वीयेनोपरेण भुवं सा च स्वकीयेन काष्ण्येन Sáyaṇa's Commentary to the Sáma-veda.

P. 247. l. 2. (IV. 57, 2.) मधुस्रावि सुपूतं ॥ मधुस्रावितं सुपूतं Ca. मधुस्रावित A. मधुस्रावि तत्. B. puts सुपूतं शोधितं after ऊर्मिं प्रवृद्धं.

P. 248. l. 8. (IV. 57, 5.) हे शुनासीरा stands before अत शुन इंद्रः in A. B. In the quotation from Yáska, शुनो वायुः is left out in A. B. C. Sáyaṇa takes शुनासीरौ either as Indra and Váyu, or, according to the Nairuktás, as Váyu and Áditya. This is shown in verse 8. Ca. reads शुदेवः शुनदेवतेति शौनकः । अतः शुन इंद्रः सीरो वायुः इंद्रवायू । हे शुनासीरा इंद्रवायू । वाय्वादित्याविति नैरुक्ताः । शुनो वायुः शु इत्यंतरिक्षे etc. Shadguruśishya, in his Commentary on the Nirukta, writes, शुन इति वायोरभिधानं । आहुर्बृहद्देवताविदः । वायुः शुनः सीरः सूर्य शुनासीरौ वायुसूर्यौ वदंति । शुनासीरमिंद्रं यास्कस्तु मेने सूर्येंद्रौ तु मन्यते शाकपूनिरिति पराशरः.

P. 248. l. 8. (IV. 57, 5.) शु इति A 3. pr. man. Ca. pr. man. शुन इति A. sec. man. Ca. sec. man. शुन हति A 2. शु इति B. C. शु एति Nir.

P. 249. l. 9. (IV. 57, 8.) नो भूमिं फाला भूमिविदारककाष्ठाः ॥ ताः फाला भूमिविदारककाष्ठाः B. ता भूमिफालाः विदारककाष्ठाः A. नो भूमिं फालाः विदारककाष्ठाः Ca.

P. 249. l. 25. (IV. 58, 1.) इति वा समुद्रोऽग्निः पार्थिवः । Ca. इति वा पार्थेवः A. इति वा पार्थिवाः Ca. इति पार्थिवः B.

P. 250. l. 2. (IV. 58, 1.) ऊर्म्युत्पातकः A. ऊर्म्युत्पादकः Ca. ऊर्म्युत्पातृको B.

P. 250. l. 3. (IV. 58, 1.) समुद्रवण B. Ca. समुद्रचरण A. C 2.

P. 250. l. 17. (IV. 58, 2.) स्तवाम ॥ स्तुवामो B. स्तुमो A. C.

P. 250. l. 19. (IV. 58, 2.) शृंगाणि दिग्रूपाणि वेदचतुष्टयरूपाणि वा Ca.

P. 251. l. 4. (IV. 58, 3.) स त्रयाणां वर्णानां त्रिभिर्वेदैः Ca. In Ápastamba's Paribháshá-sútras we have यज्ञं व्याख्यास्यामः ॥१॥ स त्रयाणां वर्णानां ब्राह्मणराजन्ययोर्वैश्यस्य च ॥२॥ स त्रिभिर्वेदैर्विधीयते ॥३॥ See Zeitschrift der Deutschen Morgenländischen Gesellschaft, vol. IX, page xliii, "Über die Todtenbestattung bei den Brahmanen von Max Müller."

P. 251. l. 11. (IV. 58, 3.) महो दवः एव यज्ञात्मा महानुभावदेवः Ca.

P. 251. l. 14. (IV. 58, 3.) एत अयणार्थत्वात् A. एव अयणार्थत्वात् C. and Aa. pr. man. एव अयणार्थत्वात् Aa. sec. man. एवाअयणार्थत्वात् A. एवः अयणार्हत्वात् Ca.

P. 251. l. 20. (IV. 58, 3.) अन्याश्रयात्मकत्वेन संबद्धः Ca. अन्योन्याश्रयात्मकत्वेन संबंधः A. B.

P. 252. l. 16. (IV. 58, 5.) अप्संभवो Ca. अपः संभवो A. B.

P. 252. l. 25. (IV. 58, 6.) अस्याग्नेः उपरि ॥ उपरि deest in A. B.

P. 253. l. 19. (IV. 58, 7.) स यथा काष्ठा भिंदन् Ca.

P. 254. l. 11 and 13. (IV. 58, 9.) व्यंजयंत्यः instead of व्यंजयंती:, a mistake of frequent occurrence in Sáyaṇa.

P. 255. l. 2. (IV. 58, 11.) तदंते इति हृषा C. तदंते इति व्यथा A. तदंते घृताची B.

P. 255. l. 8. (IV. 58, 11.) विश्वं भुवनमधिश्रितं B. विश्वं भुवनं कृत्स्नं भूतजातमधिश्रितं । आश्रितं । तदपि च धाम कुत्र कुत्रास्ते इति ॥ उच्यते । Ca.; deest in A. C 2.

P. 255. l. 8. (IV. 58, 11.) अंतः समुद्रे वडवाग्नित्वेन B. अंतः समुद्रे अंतरिक्षस्य मध्ये सूर्यमंडलत्वेन Ca.; deest in A. C 2.

Maṇḍala V.

P. 257. l. 13. (V. 1, 3.) तदा B. यदैव C. यदव A.

P. 257. l. 26. (V. 1, 4.) विरूपे नानारूपे Ca.

P. 260. l. 4. (V. 1, 9.) यस्मै यज्ञाय B.

P. 260. l. 6. (V. 1, 9.) मानुषीणां यजमानरूपाणां Ca.

P. 260. l. 15. (V. 1, 10.) महि of the text is left unexplained in A. C. बृहन्महत् महि भद्रं महत्स्तुत्यं च B.

P. 261. l. 23. (V. 2, 1.) इक्ष्वाकुः A. B. ऐक्ष्वाकः C.

P. 262. l. 5. (V. 2, 1.) रागात् C. वेगात् A. B.

P. 262. l. 9. (V. 2, 1.) एवं गायन् स ऋषिर्ब्रह्महत्यां भार्यां जातां C. एवं गायन् । ऋषिर्ब्रह्महत्यां भार्याजातां A. एवं गायन् स ऋषि ब्रह्महत्यां भार्याजातां B.

P. 262. l. 11. (V. 2, 1.) सम्यक् तद्वरस्तोषयित्वा C. सकस्तरेस्तोषयित्वा A. संस्तरे तोषयित्वा B.

P. 262. l. 13. (V. 2, 1.) धावयन् A. C. धारयन् B.

P. 262. l. 21. (V. 2, 1.) निहितं स्थितं B. स्थितं C.; deest in A.

P. 262. l. 21. (V. 2, 1.) पुरः पुरोदेशे Ca. पुरः B.; deest in A.

P. 263. l. 4. (V. 2, 1.) कशिपुनाछन्नं B. Ca. pr. man. कशिपुना छिन्नं A. Ca. sec. man.

P. 263. l. 9. (V. 2, 2.) कुमारजनन° A. B. कुमारं चनन° B. pr. man. कुमारं हनन° B. sec. man. कुमारमातृ° C.

P. 264. l. 2. (V. 2, 4.) अरण्यां C. आरण्यं A. B.

P. 264. l. 22. (V. 2, 6.) मर्त्येषु तदीयेषु लोकेषु Ca.

P. 264. l. 26. (V. 2, 6.) अत्तेर्ब्रह्माणि ॥ अत्ता ब्रह्माणि A. C. अत्र ब्रह्माणि B.

P. 265. l. 1. (V. 2, 6.) प्राणमयं ॥ शाणां मेगं Aa. B. C. शाणां तेगं A.

P. 265. l. 11. (V. 2, 7.) अनेकरूपाद्यूपात् Ca. अनेकयूपात् A. B.

P. 265. l. 14. (V. 2, 7.) स्तुतिकर्मैतत् ॥ स्तुतिकर्मैतात् Ca. pr. man. स्तुतिकर्मत्वात् A. B. C.

P. 266. l. 20. (V. 2, 10.) भंगं B. यावां A. यारां C.

P. 268. l. 21. (V. 3, 3.) अपो taken from B.; deest in A. C.

P. 268. l. 22. (V. 3, 3.) उद्रापयितरग्ने C. रुद्रावर्धितराग्न A. रुद्रवर्द्धिताग्ने B.

P. 268. l. 24. (V. 3, 3.) अगम्यं A. अवश्नुगेम्यं C. गम्यं B.

P. 269. l. 17. (V. 3, 5.) अतिथिवत्पूज्यो भवसि from Ca. भवसि B.; omitted in A. C.

P. 271. l. 7. (V. 3, 9.) पुत्रस्थानीयः पुरुत्राता वा Ca.

P. 272. l. 13. (V. 3, 12.) वसवे वासकाय C. वसवे वासका A. वसवे धनार्थं वासकाः B.

P. 272. l. 13. (V. 3, 12.) अवाचि before ऋतवान् omitted by A. C.; B. puts it after आगोऽपराधं.

P. 272. l. 26. (V. 4, 1.) वृत्यवृक्षिभ्यां A. वृषवृक्षिभ्यां B. C.: cf. Páṇ. II. 1, 3.

P. 274. l. 19. (V. 4, 5.) दुरोणे not explained in A. B. C.

P. 275. l. 6. (V. 4, 6.) तर्पयसि पाहि A. B. C. तर्पयसि तर्हि?

P. 275. l. 21. (V. 4, 8.) दिव्यादिषु A. B. क्षित्यादिषु C.

P. 276. l. 18. (V. 4, 10.) त्वामत्रप्रदं मन्यमानो Ca.

P. 276. l. 19. (V. 4, 10.) कीरिणाशब्देन A. B. C.

P. 278. l. 7. (V. 5, 4.) The Sanhitás write, both here and X. 18, 10, ऊर्णम्रदाः.

P. 280. l. 14. (V. 6, 1.) Áśvaláyana has between the two verses a third: आ ते वत्सो मनो यमत्.

P. 283. l. 20. (V. 6, 9.) पचसि वा C. वसि वा A. सेवसि वा B.

P. 284. l. 1. (V. 6, 10.) अनुषक्तं संबद्धं Ca.

P. 284. l. 2. (V. 6, 10.) यज्ञे स्तुत्या स्तुवंति after स्थापयंति Ca.

P. 284. l. 3. (V. 6, 10.) निर्दिशंति। अजुर्यमु—यस्य भवंति Ca. निर्दिशंति। अजुर्येवा अश्वा यस्य भवंति A. निर्दिशंति किंच अस्मे अस्मासु सुवीर्यं शोभनपुत्रादिकं उतापि च त्यत् आश्वथ्यं आशवो अश्वा यस्य भवंति B.

P. 285. l. 10. (V. 7, 3.) द्योतमानस्याग्नस्य A. B. द्योतमानस्या Ca. द्योतमानस्याग्नेः C.

P. 285. l. 12. (V. 7, 3.) स्वीकरोति। A. B. स्वीकरोमि C.

P. 286. l. 13. (V. 7, 6.) स्पृहणीयमग्निं A. B. C.

P. 286. l. 14. (V. 7, 7.) व्याप्त्यर्थं A. C. व्यापारार्थं B.

P. 288. l. 2. (V. 7, 10.) अभिजः after व्यतिरिक्तैः added in A. B. C.

P. 289. l. 1. (V. 8, 2.) वृक्षाणां A. C. रक्षसां B.

From here B. gives only an extract of the commentary, leaving out all that does not belong materially to the explanation of the text, especially all grammatical rules and quotations from Yáska.

P. 293. l. 9. (V. 9, 1.) शिष्टाः पंक्त्यंतस्य च सूक्तस्येति परिभाषया अनुष्टुभः Ca.

P. 293. l. 20. (V. 9, 1.) B. has only the last explanation: जातं वेदो धनं यस्मात्स जातवेदाः.

P. 294. l. 1. (V. 9, 1.) मनिरत्र to अर्थत्वात् left out in B. The whole grammatical explanation from हविष्मंतः to the end of the verse is omitted in B.

P. 295. l. 3. (V. 9, 2.) यजमानप्रभृतीनां Aa. यजमानस्य प्रभूतं Ca. यजमानप्रभूतां A. यजमानस्य B.

P. 295. l. 26. (V. 9, 3.) After इत्याकारलोपः, Ca. adds नि धान्ये नित् (उ° १. ९.) अस्मात्सूत्रान्निदित्यनुवर्तते।.

P. 299. l. 11. (V. 10, 1.) नम्र् व्यापनं यस्य तन्नयोक्तं॥ नमं व्यापनं यस्य तथोक्तं A. C.

P. 302. l. 25. (V. 10, 6.) बहुलवचनात्वेऽल्लोपाभावः॥ बहुवचनत्वे लोपाभावः A. Ca. बहुवचनान्नलो-

पाभाव: C 2.: cf. Páṇ. VI. 4, 136. and Rv. VI. 15, 6. It may be meant for बहुलवचनाल्लोपाभाव:; cf. Páṇ. III. 3, 1.

P. 305. l. 2. (V. 11, 2.) मध्योदात्त: ॥ अंतोदात्त: । A. Ca.

P. 308. l. 4. (V. 12, 3.) नवेदा: ज्ञाता भुव: भवे: C 2. नवेदा: भुव: Ca. नवेदा: भुव: भवे: A. नवेदा: भुव: न वेत्तासि B.

P. 308. l. 5. (V. 12, 3.) ऋतूनामृतुपा वसंतादीनां पालक: B.

P. 313. l. 25. (V. 15, 2.) ते यजमाना: ॥ ये यजमाना: A. B. Ca.

P. 315. l. 3. (V. 15, 6.) तायुरिति स्तेननाम । पदमिव आत्मीयं मार्गमिव गुहा गुहायां दधान: आत्मन: शत्रूणां प्रकाशं निदधान: A. in margine, and C 2. which leaves out आत्मन:; Ca. and Aa. omit the whole passage. तायुर्न तस्करो यथा गुहायां पदं द्रव्यं दधान: धारयन् रक्षति तद्वत् B.

P. 333. l. 16. (V. 25, 9.) अस्माकं बलमाचरंतं A. शत्रुनाशकं B.; left out in Ca.

P. 341. l. 16. (V. 29, 1.) From संति to तेजांसि from B. संति रोचंन रोचना रोचमानानि वाय्वग्निसूर्यात्मकानि दिव्या दिव्यानि अंतरिक्षे भवानि तानि तेजांसि Ca.; left out in A.

P. 341. l. 18. (V. 29, 1.) शुद्धबला A. Ca. भद्रबला B.

P. 341. l. 26. (V. 29, 2.) ततो A. तथा B. तयो: Ca.

P. 342. l. 21. (V. 29, 4.) व्ययतेर्वा ॥ वेतेर्वा A. व्येतेर्वा Ca.

P. 343. l. 7. (V. 29, 5.) वह्न्यादय: A. Ca. अग्न्यादय: B.

P. 343. l. 11. (V. 29, 5.) स्वप्नपुत्रेण ॥ स्वभावे A. स्वभावेन Ca.

P. 347. l. 19. (V. 29, 15.) शूरतम वेंद्र हि निगम: A. Ca.; left out in B. [It is probable that before हि निगम: a quotation from the Veda was left out.]

P. 348. l. 14. (V. 30, 1.) शोभनक्षद्वारो Ca. शोभनाख्यद्वारो A. शोभनरथो यस्य etc. B.

P. 349. l. 11. (V. 30, 3.) विद्वान् before शृणवच्च added by conjecture. न: अस्मदीयानि यानि कर्माणि जुजोष: अनुष्ठितानि तानि विद्वान् जन: वेदत् जानातु अविद्वान् जन: शुश्रुवच्च शृणुयात् B.

P. 349. l. 22. (V. 30, 4.) वेषि गच्छसि B.

P. 350. l. 17. (V. 30, 6.) वदंति A. C. चरंति B. Ca.

P. 356. l. 17. (V. 31, 5.) अभिपचपापाणा: Ca. B. अभिषवणपाषाणा: A.

P. 357. l. 14. (V. 31, 7.) युवती: पवना: A. यवना: Ca.; left out in B. कपदान्?

P. 357. l. 15. (V. 31, 7.) समीपं वा ॥ समीप A. Ca.; left out in B.

P. 357. l. 22. (V. 31, 8.) पारे A. पार Ca. पार: B.; left out in C 2. Sáyaṇa mistook पार in the Sanhitá for a locative.

P. 366. l. 17. (V. 33, 2.) अनु after प्रीतिं is left out in A. Ca.; B. puts it after प्र.

P. 366. l. 25. (V. 33, 3.) यत् । सुपो लोप: । ये Ca.

P. 367. l. 9. (V. 33, 4.) हे इंद्र वृषा कामानां वर्षकस्त्वं सूर्याय पितृसूर्यं च स्व ओकसि स्वस्थाने चकर्थ कृतवानसि । किंच ते तव यद्यदा स्वभूतानि पुरू पुरूणि बहून्युक्थोक्थानि शस्त्राणि संति तदोर्वरासु शस्योपेतासु भूमिषु गवे वृष्ट्युदकाय युध्यन् जलप्रतिबंधकात् ततश्चे संपादयसि समत्सु B. From संहरन् to वर्धिता सन् left out in Ca.

P. 367. l. 20. (V. 33, 5.) Instead of कीदृशा वयं, B. has ते सत्वा प्राणिनो वयं.

P. 368. l. 20. (V. 33, 7.) उरुकलक्षणेन ॥ सूक्तलक्षणेन A. Ca.; left out in B.

P. 369. l. 15. (V. 33, 9.) अश्वा दाने विनियुक्ता A. अश्वाः । विदथस्य वेदनसाधनस्य यज्ञस्य रात्री दाने विनियुक्ता B. Ca.

P. 370. l. 25. (V. 34, 2.) सहस्रभृष्टिं ।. Sáyaṇa reads सहस्रभृष्टिः ।.

P. 371. l. 1. (V. 34, 3.) See for this verse Yáska Nir. VI. 19.

P. 371. l. 24. (V. 34, 4.) पित्रादिवध ॥ पित्रादिधन A. पित्रादिवत् Ca. B.

P. 373. l. 3. (V. 34, 7.) वणिज इव ॥ वणिजमिव A. वणिजं Ca.; left out in B.

P. 373. l. 6. (V. 34, 7.) पुरु पुरूणि ॥ पुरु पुरूणि A. पुरु पुरूणि महति Ca.; left out in B.

P. 373. l. 26. }
P. 374. l. 1. } (V. 34, 9.) अग्निवेशसुतं ॥ अग्निवेशिसुतं A. Ca. आग्निवेशिसुतं B.

P. 375. l. 12. (V. 35, 3.) अद्य यज्ञं A. अस्मद्यज्ञं Ca.

P. 378. l. 16. (V. 36, 3.) स्तोमयति A. B. Ca.

P. 379. l. 7. (V. 36, 5.) दीव्यतेर्वा ॥ दीव्यतेः A. B. Ca.

P. 380. l. 20. (V. 37, 2.) पन्नेजनीः A. Ca. अवनेजनीः B.

P. 383. l. 2. (V. 38. 3.) मरुत्समूहः A. मरुत्सहः Ca. मरुत्संगः B.

P. 384. l. 15. (V. 39, 2.) द्युक्षमन्नं A. द्युक्षमन्नं वा Ca. द्युक्षं धनं B.

P. 387. l. 9. (V. 40, 4.) योऽस्ति C. Mill. अस्ति A. B. Ca.

P. 388. l. 15. (V. 40, 7.) तव स्वभूतं B. स्वभूतं A. Ca.

P. 388. l. 25. (V. 40, 8.) मामिहावतमित्युपशिक्षन् only in B.

P. 389. l. 2. (V. 40, 8.) पूजयन्नमसा मंत्रैः ॥ पूजयन्नमस्कैः A. Ca. पूजयन् मन्त्रैः C. पूजयन् नममसा नमोक्तैः B. (भक्तैः?)

P. 389. l. 4. (V. 40, 8.) स्वाश्रयमया A. Ca. The whole explanation left out in B.

P. 389. l. 8. (V. 40, 8.) अपनोद्य ॥ अपोद्य A. Ca.

P. 389. l. 17. (V. 40, 9.) Instead of निगतव्याख्यैषा, B. has यं सूर्यमार्यमासुरः स्वर्भानुस्तमसाविध्यत् आवृणोत् वै खलु. What follows is taken from B. अन्वविंदन् इंद्रार्थं सोमयागदेवतास्तुतिनमस्कारैः (सोमयागे देव° B.) । अनुक्रमेण ईषदीषत् (ईषत् only once in B.) तमो विरुध्य लब्धवंत इत्यर्थः ॥ A. Ca.

P. 390. l. 6. (V. 41, 1.) दे वा हविर्दातृ च from B., which has देव हविदति च.

P. 390. l. 8. (V. 41, 1.) प्रयच्छथं A. C. प्रयच्छतं B.

P. 391. l. 1. (V. 41, 3.) धर्मिग्रहणं C. धर्मिणं A. Ca.

P. 391. l. 14. (V. 41, 4.) सोढा A. B. Ca. सोढा वा C. Mill.

P. 391. l. 16. (V. 41, 4.) समानगतिः from C.

P. 392. l. 1. (V. 41, 5.) स्तोतात्रि Ca.

P. 392. l. 2. (V. 41, 5.) होता रथैः A. होता होतात्रिः रथैः B. Ca.

P. 392. l. 13. (V. 41, 6.) प्र देवं A. B. C.

P. 392. l. 15. (V. 41, 6.) स्तुत ॥ स्तुतिं A. B. Ca.

P. 392. l. 23. (V. 41, 7.) वंदनार्हैः चितयद्भिः चतयद्भिः अर्कैः अर्चनीयैः शूषैः सुखकरैः इतरैः देवैः सह अंतरिक्षात् अविशेषेण सर्वप्रदेशात् वः युष्मभ्यं उपप्रैषे हविः उपप्रापयामि हे उक्षदेवते etc. B. This explanation of B. is referred to in A. and C. उपप्रापयामि अर्कं हविः A. Ca. omits all between उपप्रापयामि and हे उक्षदेवते.

P. 393. l. 21. (V. 41, 9.) पुराणवंतो A. C. पूरणवंतो B. Ca.

P. 393. l. 26. (V. 41, 9.) अभिद्रो अद्रो अभितः इषणे B.

P. 394. l. 6. (V. 41, 10.) पर्जन्यस्य A. पर्जन्यस्य वा C. Mill; left out in B. Ca.

P. 394. l. 10. (V. 41, 10.) अग्निः किंच भूतोऽग्निरेतारि A. अग्निरेतारि B. Ca.

P. 395. l. 19. (V. 41, 13.) परिहरन्तावर्यति A. B. परिहरन्तो वर्यंति Ca.

P. 396. l. 1. (V. 41, 14.) अपसा deest in B.

P. 398. l. 8. (V. 41, 19.) अथवा उर्वशी माध्यमिकी वाक् only in B. Ca.

P. 398. l. 11. (V. 41, 19.) वा after उदकस्य by conjecture. Yáska has not तेजसो, but ज्योतिषो. Cf. MS. Paris. and E. I. H.

P. 400. l. 5. (V. 42, 3.) हिरण्यानि A. Ca. सुवर्णानि B.

P. 400. l. 12. (V. 42, 4.) अस्मभ्यं गा दापयसि A. अस्मान् गाः प्रापयसि B. Ca.

P. 402. l. 23. (V. 42, 10.) आसुरं B. Ca. आसुकरा A.

P. 402. l. 25. (V. 42, 10.) पुनः पुनः प्रकृतिषु Ca.

P. 403. l. 14. (V. 42, 11.) वारिष्टस्य A. वा रिष्टस्य Ca. वातिरिक्तस्य A. व्यतिरिक्तस्य Ca. The whole passage left out in C. Mill, B.

P. 403. l. 25. (V. 42, 12.) दानमनसो वा A. दांतमनसो वा Ca. दांतमनसः B. C. (Mill) has a lacuna to verse 16.

P. 404. l. 1. (V. 42, 12.) इंद्रस्य A. रुद्रस्य B. Ca.

P. 405. l. 8. (V. 42, 15.) रुद्रेण left out in Ca.

P. 406. l. 22. (V. 43, 1.) तदर्थं only in A.

P. 407. l. 9. (V. 43, 2.) सुहस्ता अभिमतदानेन शोभनहस्ताः Ca. सुहस्ता शोभनहस्ता B.; deest in A.

P. 407. l. 16. (V. 43, 3.) चकृवांसः कुर्वाणाः A. चकृवांसः संपादकाः B. चकृवांसः Ca.

P. 408. l. 7. (V. 43, 4.) स च अंशुः अध्वर्युः B.

P. 409. l. 26. (V. 43, 8.) यातं A. C. गंतुं B.

P. 410. l. 2. (V. 43, 8.) तस्माद्युवमायातमागच्छतं B. at the end.

P. 410. l. 9. (V. 43, 9.) उरुक्रगुणाकाय A. Ca. उरुक्रलक्षणाय B.

P. 410. l. 9. (V. 43, 9.) नम इति वचनं A. Ca. Some words may be left out.

P. 410. l. 24. (V. 43, 10.) अवयविन्या Ca. अवयव्या A.

P. 411. l. 22. (V. 43, 12.) स यथा संतं A. स यथा स तं Ca.; left out in B.

P. 411. l. 24. (V. 43, 12.) हिरण्यवर्णा हितरमणीयवर्णा Ca.

P. 412. l. 8. (V. 43, 13.) ग्ना गंत्रीर्ज्वालास्ताभिर्युक्ता ओषधीर्वसानो निवासभूतः B.

P. 412. l. 17. (V. 43, 14.) रास्पी A. B. C.

P. 412. l. 19. (V. 43, 14.) अंजते A. भजंते B. Ca.

P. 412. l. 19. (V. 43, 14.) अगमन् । आगमन् । भजंते । रातहव्या दत्तहविष्का आयवो मनुष्या यजमाना नमसा नमस्कारेणागमन् । इष्टांतः । सुशेव्यं सुखाय हितं etc. B. Ca. omits all between the first वासाय and वासाय मृजंति.

P. 413. l. 4. (V. 43, 15.) पत्नीभिः B. Ca. दंपतीभिः A.

P. 413. l. 6. (V. 43, 16.) B. gives instead of अवशिष्टं गतं the explanation, देवो देवः सर्वोऽपि देवो मह्यं मदर्थं सुहवो भूतु । स्वाह्वानो भवतु । सोऽस्मान्दुर्मतौ मा पृथिवी मा धात् । मा स्थापयतु ॥

P. 413. l. 15. (V. 43, 17.) B. gives the same commentary as V. 42, 18.

P. 414. l. 4. (V. 44, 1.) ऐंद्रौ च शुक्रामंथिनौ A. शुक्रामंथिनौ Ca.

P. 414. l. 5. (V. 44, 1.) भवति Ca. भवतः A.

P. 414. l. 6. (V. 44, 1.) सवनस्य A. Ca. मधुच्युत Ca. मंथिपत A.

P. 414. l. 8. (V. 44, 1.) इति च याज्या चैंद्री A. इति याज्या चैंद्री Ca.

P. 414. l. 12. (V. 44, 1.) लंभयितारं A. फलं भावयितारं Ca.; omitted in B.

P. 414. l. 15. (V. 44, 1.) इत्यंतरात्मनः प्रैषः only in B. Ca.

P. 415. l. 10. (V. 44, 3.) सत्फलसाधनत्वात् A. सत्फलत्वात् B. Ca.

P. 415. l. 16. (V. 44, 3.) अरिष्टगमनत्वं A. इष्टगमनत्वं B. Ca.

P. 415. l. 25. (V. 44, 4.) यज्ञगमने A. गमने B.; left out in Ca.

P. 416. l. 1. (V. 44, 4.) नामकान्युदकानि A. उदकानि B.; left out in Ca.

P. 416. l. 4. (V. 44, 4.) यः पूरणः B. at the end of the verse.

P. 416. l. 11. (V. 44, 5.) कुत्सितावयवाशाखावंतं B.

P. 416. l. 12. (V. 44, 5.) गृभ्णान् गृह्णन् A. गृभ्णान् B. गृभ्णन् Ca.

P. 416. l. 25. (V. 44, 6.) रयिं from A.

P. 417. l. 22. (V. 44, 8.) भजते यजते A.

P. 417. l. 23. (V. 44, 8.) गमनशीलस्य only in A.

P. 417. l. 24. (V. 44, 8.) विष्टं A. विशिष्टं Ca.

P. 417. l. 26. (V. 44, 8.) यादृशं कामं B.

P. 418. l. 10. (V. 44, 9.) अवगच्छति B. Ca. अभिगच्छति A.

P. 418. l. 24. (V. 44, 10.) रमणीयाभिः स्तुतिभिर्मनोरथैः स्पृ° B.

P. 419. l. 7. (V. 44, 11.) शीघ्रं पातृसंकाशं गंता Ca. शीघ्रं यातृसकाशं गंता B. शीघ्रं मातृसकाशगांमाम A.

P. 419. l. 8. (V. 44, 11.) कक्ष्यपूरकश्च A. Ca. पूरकश्च B.

P. 419. l. 19. (V. 44, 12.) युष्माभिर्देवैः सहित B.

P. 419. l. 21. (V. 44, 12.) भवतीति A. भातीति B. Ca.

P. 420. l. 2. (V. 44, 13.) स च to धेनू left out in Ca. यो विश्वासां सर्वासां धियां स्तुतीनामूधः स्थानं देवसंघमुदंचनः सेवमानः स यजमानस्यागत्सारस्य मम सुतंभरो यागनिर्वाहक एतका ऋषिः सत्पतिः सतां विद्यमानानां फलानां पालयिता दाता भवतीत्यर्थः । धेनुः etc. B.

P. 420. l. 5. (V. 44, 13.) चास्य सामर्थ्यात् A. या सामर्थ्यात् Ca. सामर्थ्यात् B.

P. 420. l. 5. (V. 44, 13.) संकीर्तयन् A. कीर्तयन् B. Ca.

P. 420. l. 6. (V. 44, 13.) सुतंभरस्ताहृश इति A. सुतंभरस्यादश इति Ca. सुतंभरश्छांदस इति B.

P. 420. l. 21. (V. 44, 15.) The Sanhitá MSS., S. 1. 2. 3, add after 15. the following verse, which does not exist in the Padas, is not counted in the Anukramaṇiká, and not explained by Sáyaṇa:

जागर्षि त्वं भुवने जातवेदो जागर्षि यत्र यजते हविष्मान् ।
इदं हविः श्रद्दधानो जुहोमि तेने पासि गुह्यं नाम गोनाँ ॥

S. Bodl. 439. परिशिष्टं । जागर्षि गोनां ।. Not in 436.

P. 421. l. 7. (V. 45, 1.) अवेदयत् A. अवेदयः B. Ca.

P. 421. l. 7. (V. 45, 1.) गा इति संबंधः निगूढाः A. Ca. गा इति संबंधः B.

P. 421. l. 9. (V. 45, 1.) रश्मकायानुपरि भेदनाय आयसा: etc. B.

P. 421. l. 11. (V. 45, 1.) सरणशील: Ca. सरणझील: A. रणशील: B.

P. 421. l. 21. (V. 45, 2.) युक्तंदनं A. युक्तेन B. Ca.

P. 421. l. 25. (V. 45, 2.) स्थापिता रूपिता Ca.

P. 421. l. 26. (V. 45, 2.) सूर्यस्याज्ञयेति A. सूर्यस्य ज्ञापयतीति B. Ca.

P. 422. l. 16. (V. 45, 4.) यद्यपैकमेव पदं मध्ये व्यवधाश्छांदस: । A. अथ चैकमेव पदं मध्ये व्यवधानं छांदसं Ca.

P. 423. l. 3. (V. 45, 5.) संभजते B. Ca. संभक्तून् A.

P. 423. l. 5. (V. 45, 5.) विवेक: A. विशेष: Ca.

P. 423. l. 5. (V. 45, 5.) प्रांश: only in B.

P. 423. l. 18. (V. 45, 6.) बहुफलाकांक्षी कक्षीवान् A. बहुफलाकांक्षायन् Ca. बहुकांक्षवान् B.

P. 424. l. 4. (V. 45, 7.) अवरे A. अपरे Ca.

P. 424. l. 6. (V. 45, 7.) वा from Ca.

P. 424. l. 15. (V. 45, 8.) गवामावरकेऽंधकारेऽपवृते सति only in A.

P. 425. l. 1. (V. 45, 9.) सन् श्येन: A.

P. 425. l. 20. (V. 45, 11.) अपनिमित्तां Ca. अपां निमित्तां B.; left out in A.

P. 425. l. 22. (V. 45, 11.) समनुतिष्ठंत: B. Ca. सर्वेसमनुतिष्ठंत: A.

P. 426. l. 9. (V. 46, 1.) सुह: B. Ca.

P. 426. l. 9. (V. 46, 1.) प्रतिष्ठत: left out in B. Ca.

P. 426. l. 11. (V. 46, 1.) रश्मियन्ती A. रश्मिमिच्छंती B.; left out in Ca.

P. 426. l. 13. (V. 46, 1.) मम को भारोच्यते देवोच्यते Ca. मम को भारो च्येति तदेवेच्यते A.

P. 430. l. 15. (V. 47, 1.) युक्ता दुहितर्दिव: ।. The only passage where these words occur in the Rig-veda is I. 48, 1: but nothing is said there on the mutual relation of Dyaus and Ushas. A. has दुहितुर्दिव:.

P. 430. l. 17. (V. 47, 1.) योषसो A. Ca.

P. 430. l. 17. (V. 47, 1.) सुदुहितृत्वं Ca. दुहितृत्वं A.

P. 430. l. 19. (V. 47, 1.) दृश्यते A. उपदिश्यते Ca.

P. 431. l. 19. (V. 47, 3.) पूर्वस्य । अवयवलक्षणेय ॥ पूर्वस्यावयवलक्षणियं । Ca. पूर्व वयवलक्षणेय । A.

P. 432. l. 4. (V. 47, 4.) हविर्भि: स्तुतिभिश्च only in B. Ca.

P. 432. l. 5. (V. 47, 4.) गमयंति A. सरसमियंति B. Ca.

P. 432. l. 17. (V. 47, 5.) निर्मातु: only in A.

P. 433. l. 13. (V. 47, 7.) गाथं स्थितिं B. Ca. गाथं स्तुतिं A. (Rv. I. 61, 11.)

P. 434. l. 3. (V. 48, 1.) स्वं only in A.

P. 434. l. 15. (V. 48, 2.) वितन्वंति A. विन्वंति B. Ca.

P. 434. l. 18. (V. 48, 2.) जगदव्रत A. जगदावृतं B. जगददता Ca.

P. 434. l. 18. (V. 48, 2.) वृत्रमुखी: B. Ca.

P. 435. l. 2. (V. 48, 3.) आगत्यात्मा साम: A. आगत्या सोम: ॥ Ca. आगत्य सोमी B.

P. 435. l. 17. (V. 48, 4.) कथयाम्यहं B. Ca. कथयेयं स्तोत्रं A.

P. 437. l. 1. (V. 49, 2.) सवितु: only in A.

P. 437. l. 2. (V. 49, 2.) आयोर्मनुष्याय A. आयोर्मनुष्यस्य B. Ca.

P. 437. l. 3. (V. 49, 2.) गतं A. Ca. गतवंतं B. गमयंतं ?

P. 437. l. 4. (V. 49, 2.) स्तोतुं A. B. Ca.

P. 437. l. 18. (V. 49, 3.) शोभनीयानि B. Ca. शोभनानि A.

P. 438. l. 18. (V. 50, 1.) वैश्वदेवशस्त्रे वैश्वदेस्येति Ca. वैश्वदेवशस्त्रे आद्यस्तृचो वैश्वदेवे A.

P. 438. l. 19. (V. 50, 1.) The second Viniyoga given from A. has not been found in the 7th book of Áśvaláyana.

P. 438. l. 19. (V. 50, 1.) Ca. has a lacuna of some lines after द्वितीयचतुर्थ°.

P. 439. l. 1. (V. 50, 1.) The beginning in B. is quite different: देवस्य द्योतमानस्य नेतुः प्रापकस्य सवितुः सख्यं वुरीत अतः वृणीत मतः विश्वमरणधर्मात्मकः सर्वे जनाः राये धनस्य etc.

P. 439. l. 2. (V. 50, 1.) ईशीत A. ईशे B. Ca.

P. 439. l. 10. (V. 50, 2.) तेऽपि त्वदीयाः A. तेऽपि मे मदीयाः सतु Ca. तेऽपि मदीयाः संतु B.

P. 439. l. 13. (V. 50, 2.) उभये not in A.

P. 439. l. 24. (V. 50, 3.) प्रयच्छत from Ca.

P. 440. l. 21. (V. 51, 1.) सप्तमं ॥ षष्ठं A. B. Ca.

P. 441. l. 22. (V. 51, 1.) अभिपवण° A. अधिपवण° B. Ca.

P. 442. l. 10. (V. 51, 6.) ऐंद्रवायवतृचे Ca. ऐंद्रवायस्तृचः A.

P. 442. l. 19. (V. 51, 6.) अन्नरूपान Ca. अन्नरूपान्वा A.

P. 445. l. 16. (V. 51, 14.) हे पथ्ये पंथाः पथ्या स्वस्ति देवि अंतरिक्षमार्गः तत्र A. हे पथ्ये पथ्या स्वस्ति देवि पंथा अंतरिक्षमार्गः ॥ तत्र Ca. हे पथ्ये देवं पंथा अंतरिक्षमार्गः तत्र B. Cf. Nir. XI. 45: पथ्यास्वस्तिः पंथा अंतरिक्षं तन्निवासात्।.

P. 445. l. 17. (V. 51, 14.) यथा अभिमुखी तादृशी etc. B. after °मानिनी देवी।.

P. 446. l. 5. (V. 51, 15.) प्रयामकोपेन ॥ प्रयासकोपेन A. Ca.

P. 446. l. 7. (V. 51, 15.) At the end of the hymn the Sanhitá MSS. give the following Khila; S. 1. and S. Colebr. in the margin, S. 2. in the text:

स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानां।
असुरघ्नमिंद्रसखं समत्सु बृहद्यशो नावमिवा रुहेम ॥१॥
अंहोमुचमांगिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यं।
प्रयतपाणिः शरणं प्र पद्ये स्वस्ति संबाधेष्वभयं नो अस्तु ॥२॥

P. 446. l. 20. (V. 52, 1.) अनुष्वधं प्रत्यहं हविर्ल° B. प्रतिहं विर्ल° Ca. प्रति हविर्ल° A.

P. 446. l. 21. (V. 52, 1.) स्वधानु A. Ca.; left out in B.

P. 447. l 21. (V. 52, 4.) किं A. किंच B. and Ca. by the same mistake.

P. 448. l. 25. (V. 52, 7.) वृजने वा बले योगे A. वृजने बले Ca.; left out in B. Perhaps बले ये च.

P. 449. l. 10. (V. 52, 8.) उदकार्थं A. उदयार्थं Ca.

P. 450. l. 11. (V. 52, 11.) पारवत् A. परावरत् Ca. पारावार B.

P. 450. l. 20. (V. 52, 12.) छंदसोऽभिस्तोतारः B. Ca. छंदेभिस्तोतारः A.

P. 450. l. 20. (V. 52, 12.) स्तोतारः A. स्तुतौ विप्रिमाः B.; not explained in Ca.

P. 450. l. 21. (V. 52, 12.) याम्मरुत: A. Ca. ये मरुत: B.

P. 451. l. 8. (V. 52, 13.) दर्शनीयां महांतीहातो वा Ca., meant for दर्शनीया महांतो वा.

P. 451. l. 9. (V. 52, 13.) सर्वेत विधातार: A. सर्वस्य वि° Ca. सर्ववि° B.

P. 451. l. 10. (V. 52, 13.) अथ नमस्य रमय तिङ उत्तरत्वादनिघात: । उभयत्र सांहितिको दीर्घ: ॥ Ca. after स्तुहि. As रमया has been explained as an adjective, this addition was probably a marginal gloss.

P. 451. l. 17. (V. 52, 14.) तया वाह्र आ गच्छेति शेष: । ऋषेरु° ॥ तया ह वाह्र आगच्छति ऋषे: उ° Ca. तया वाह्र अभिगच्छेति शेष: । उ° A. आगच्छति ऋषे: उ° B.

P. 452. l. 2. (V. 52, 15.) यद्वा नेति संप्रत्यर्थे । वहति देवानिति वक्ष्यमाणा स्तुति: । तया एवां एतान्देवान्मरुतोऽच्छ मन्वान: स्तुवन् अभिष्टुवन् इति Ca. after मनुते.

P. 452. l. 3. (V. 52, 15.) मेधाविभि: प्रेरयितृभि: A.

P. 452. l. 13. (V. 52, 16.) आख्यातयो: Ca. निपातयो: A.

P. 453. l. 18. (V. 53, 1.) सुखेषु A. मखेषु B. Ca.

P. 453. l. 18. (V. 53, 1.) पृषती: B. पृषत: Ca. पृषत्य: A.

P. 454. l. 1. (V. 53, 2.) आक्रोशध्वनिं Ca.

P. 454. l. 2. (V. 53, 2.) कथा कथं य: पूर्वमिच्छंति B.

P. 454. l. 4. (V. 53, 2.) वृष्ट्यादीनि added in A. after अवतरेयु:.

P. 454. l. 10. (V. 53, 3.) अनयात् A. Ca.; B. omits the whole passage.

P. 454. l. 11. (V. 53, 3.) इत्थं लपते मद्यमाहु: A. इत्थं मे मह्यं लपंतमाहु: B. इत्थ मह्य लयंतमाहु: Ca.

P. 454. l. 13. (V. 53, 3.) अलेपा: A. Ca. अपापा: B.

P. 454. l. 14. (V. 53, 3.) तथा स्थितान् B. Ca. यथास्थितान् A.

P. 454. l. 25. (V. 53, 4.) धन्वसु निरुदकप्रदेशेषु B.

P. 455. l. 9. (V. 53, 5.) युष्माकं रथान् A. युष्माकं युष्मान् B. युष्मान् Ca.

P. 455. l. 9. (V. 53, 5.) मोदाय A. मदाय B. Ca.

P. 455. l. 11. (V. 53, 5.) दीप्ति: A. B. Ca.

P. 455. l. 11. (V. 53, 5.) वृष्ट्यां ॥ वृष्टय: A. B. C.

P. 456. l. 6. (V. 53, 7.) निर्भिंदंतो मेघात् B. Ca. वितरंतो A.

P. 456. l. 7. (V. 53, 7.) नवप्रसूतिका A.

P. 456. l. 9. (V. 53, 7.) नद्यो विमोकाय वर्तंते विविधं etc. A.

P. 456. l. 10. (V. 53, 7.) प्रतिनिवृत्य Ca. प्रतिवृत्य A.

P. 456. l. 18. (V. 53, 8.) परावतो दूरदेशे तत्र तत्र द्युलोकादौ A. परावतो दू तत्र तत्र दूरदेशादौ Ca.

P. 457. l. 2. (V. 53, 9.) मा before निकृष्टं from B.

P. 457. l. 12. (V. 53, 10.) B. has only the second explanation: हे मरुत: रथानां रहणशीलानां नव्यसीनां अजीर्णानां व: युष्माकं शर्धं येषामभिभावुकं त्वेषं दीप्तं तं मारुतं गणां स्तौमि । etc.

P. 457. l. 22. (V. 53, 11.) विचक्षित° Ca. विवक्षित A. अविवक्षितगणो भ्रात: inserted by Ca. in the commentary of the preceding verse, instead of अथ परोक्षकृत:.

P. 459. l. 2. (V. 53, 14.) तत्सर्वं A. सर्वेण B. Ca.

P. 459. l. 12. (V. 53, 15.) एवं भवति A. एवं भवंति B. य एवं भवंति Ca.

P. 461. l. 10. (V. 54, 3.) उज्ञत॰ B. Ca. उज्ञत॰ A.

P. 461. l. 20. (V. 54, 4.) रजांसि लोकान् B.

P. 461. l. 20. (V. 54, 4.) From हे भूतय: to हे मरुत: left out in Ca. The same lacuna seems to have existed in the MS. from which B. was copied, because B. gives quite a different explanation: अश्वाश्मागीन् अजय हे भूतय: कंपयितारो मरुत: यूयं ई अस्मान् नाह रिष्यथ न हिंसथ इष्टांत: नाव: यथा आश्रितानां रक्षंति तद्वत् ॥

P. 461. l. 21. (V. 54, 4.) विष्यथय ॥ विष्यथ A.

P. 462. l. 8. (V. 54, 5.) निहतवंत: A. निहितवंत: B. Ca.

P. 462. l. 15. (V. 54, 6.) वृष्टे: A. विविधं B.

P. 462. l. 15. (V. 54, 6.) In Ca. a lacuna from वृष्टे: to वृष्णो. Again B. has peculiar readings: हे वेधस: विविधं विधातार: मरुत: यत् अर्थसं मेघं मोषय ताडयथ तत् शर्धे: अभाति अशोभत् etc.

P. 462. l. 15. (V. 54, 6.) गणं A. C. Mill. बलं?

P. 463. l. 14. (V. 54, 8.) तद्वंतो मरुत: संघात्मकस्य पदार्थ(स्य marg.)विश्लेषयितार: नरो नराकारा नेतारो वा A. तद्वंतो मरुत: नरो संघात्मकस्य पदार्थस्य ग्रामजित: विश्लेषयितार: नरो नकारा नेतारो वा Ca. तद्वंत: मरुत: नर: संघात्मकस्य पदार्थस्य नेतार: ग्रामजित: विश्लेषयितार: मरुत: B.

P. 463. l. 15. (V. 54, 8.) अयं शब्दो A. नियुच्छब्दो Ca.

P. 463. l. 16. (V. 54, 8.) नर इव (for नरो यथा) A. Ca.; wanting in B.

P. 463. l. 17. (V. 54, 8.) दीप्ता A. दीप्तार B. Ca.

P. 463. l. 19. (V. 54, 8.) यद्वास्वरन् Ca. यदास्वरन् A.; wanting in B.

P. 464. l. 2. (V. 54, 9.) महत्तराय A. महत्पया B. Ca.

P. 464. l. 5. (V. 54, 9.) क्षुमतय: Ca. स्तुतय: A. मतय: B.

P. 464. l. 25. (V. 54, 11.) हारा ॥ आहारा A. B. C.

P. 464. l. 25. (V. 54, 11.) मधुराप्रुषा A. मधुरा B. Ca.

P. 465. l. 25. (V. 54, 13.) रमयंत A. B. Ca.

P. 466. l. 17. (V. 54, 15.) अभिगतनाम विस्तारयाम B.

P. 467. l. 9. (V. 55, 1.) यद्वोदकं A. तद्वोदकं Ca. तद्वदेकं B.

P. 468. l. 19. (V. 55, 5.) समुद्रवर्णसाधनात् Ca. यमुद्रवर्णसाधनात् A.

P. 469. l. 4. (V. 55, 6.) सारंगीवा A. Ca.; wanting in B.

P. 469. l. 23. (V. 55, 8.) उच्चार्यते Ca. after उच्यते.

P. 470. l. 15. (V. 55, 10.) Ca. has a lacuna from वस्यो to गृणाना:, which in B. is filled up arbitrarily, as in other similar instances.

P. 472. l. 9. (V. 56, 4.) अघ्न्या इव after गावो न A. B. Ca.

P. 472. l. 21. (V. 56, 5.) पूर्वाहो A. पूर्वो B. Ca.

P. 474. l. 10. (V. 56, 9.) आयाह्वयति A. आह्वयति Ca.

P. 475. l. 1. (V. 57, 1.) उदकेच्छवे A. उदकोत्सवे B. Ca.

P. 475. l. 19. (V. 57, 3.) यदा after हे मरुतो A.

P. 475. l. 20. (V. 57, 3.) धनानि च धूतुप प्रापयथ B. धनानि चाप Ca. धनार्थं A.

P. 475. l. 21. (V. 57, 3.) अवनता भृशं शंसंतीत्यर्थ: A. अवनता भृशं वंतीत्यर्थ: Ca. अवनता भृशं संतीत्यर्थ: C. Mill.

P. 476. l. 8. (V. 57, 4.) सरूपा: A. सदृशा: B. Ca.

P. 476. l. 18. (V. 57, 5.) शोभनजननाः A. शोभनजाताः B. शोभनजानाः Ca.

P. 477. l. 4. (V. 57, 6.) विपरिणतव्य: ॥ विपरिणेतव्य: A. Ca.

P. 477. l. 7. (V. 57, 6.) तथा वः तनूषु अवयवेषु विश्वा श्री सर्वा कांतिः पिपिशे आश्रिता B. In Ca. this passage and the beginning of the next verse are given only in the margin. B. has supplied the omission independently, as in V. 55, 9.

P. 477. l. 14. (V. 57, 7.) हे मरुतः गोमत् गोयुक्तं अश्ववत् अश्वयुक्तं रथवत् रथोपेतं सुवीरं सुष्ठु पुत्रोपेतं B. अश्वैरुपेतं चंद्रवत् A. and Ca. in marg.

P. 477. l. 15. (V. 57, 7.) एकवचनं ॥ बहुवचनं A. व्यत्येन बहुवचनं । अथवा left out in Ca.

P. 478. l. 2. (V. 57, 8.) एतानि सर्वाणि संबोधनप्रथमांतानि पूर्वस्य पूर्वस्याविद्यमानत्वेनोदात्तानि Ca. after प्रभूतस्तुतयः.

P. 478. l. 14. (V. 58, 1.) गणावयवभूता A. गणावयवा Ca.; wanting in B.

P. 480. l. 23. (V. 58, 6.) सह मरुतो taken from Ca.

P. 482. l. 6. (V. 59, 1.) रज आ अंतरिक्षं । B. रज आ तदर्थं अंतरिक्षं A. Ca.

P. 482. l. 17. (V. 59, 2.) ज्ञायंते ते ॥ ज्ञायंते न A. Ca. ज्ञायंते तेन B.

P. 482. l. 18. (V. 59, 2.) The explanation of अमात् is left out in A. Ca. अमात्स्वस्थानात् B. after हविर्भक्षणाय.

P. 482. l. 26. (V. 59, 3.) वृष्टेर्वि A. दृष्टेर्वि Ca. दृष्टे वि B.

P. 483. l. 11. (V. 59, 3.) स्तोत्राणि क उदकवत् A. B. Ca.

P. 483. l. 21. (V. 59, 5.) From सबंधवः to स्नेहयुक्ता left out in B. and Ca.

P. 484. l. 21. (V. 59, 7.) भनतेः ॥ नभतेः A. Ca. See Nighaṇṭu III. 14. and Dhátupáṭha, s.v.

P. 485. l. 7. (V. 59, 8.) अदितिर्भूमिश्च मिमातु from Ca.

P. 486. l. 7. (V. 60, 2.) प्रसिद्धासु वा Ca. after आंतासु.

P. 486. l. 20. (V. 60, 3.) सानु समुच्छ्रितः प्रदेशो रेजत । कंपते । B. सानु समुच्छ्रितः प्रदेशः रेजसे कंपसे कंपते Ca. सानु समुच्छ्रितप्रदेशं रेजय कंपयय A.

P. 487. l. 8. (V. 60, 4.) महांसि तेजांसि B., taken from the following explanation.

P. 487. l. 25. (V. 60, 6.) हे अग्ने added by B., before हे मरुतः.

P. 487. l. 25. (V. 60, 6.) यूयं उत् उत्कृष्टे उत्तमे परमे दिवि A. यूयं उत उत्कृष्टे उत्तमे परमे दिवि Ca. यूयं उत्तमे उत्कृष्टे दिवि B.

P. 488. l. 3. (V. 60, 6.) वित्ताद्धि Ca.; the rest, which ought to follow on the next page, being left out. वित्तात् वेत्थ B. वित्तात् विद्धि जानीहीति शेषः । Aa.

P. 488. l. 24. (V. 60, 8.) आयुभिरायुष्मद्भिः from B.

P. 489. l. 2. (V. 61, 1.) दार्भ्ये Anukramaṇí.

P. 489. l. 11. (V. 61, 1.) सुतां A. नृपं B. Ca.

P. 489. l. 12. (V. 61, 1.) प्रदास्यसि A. प्रदास्यहं B. Ca.

P. 489. l. 23. (V. 61, 1.) मुदितात्मविद्याः B. Ca. by the same mistake.

P. 489. l. 24. (V. 61, 1.) पश्चात्पुनर्गृहं गत्वा भूयो लब्ध्वा गवां शतं । ततो A. पुरुमील्हगृहं पश्चात गत्वा पश्चात्पुनर्गृहं । गत्वा भूयो लब्ध्वा गवां शतं दाल्भ्यो Ca. पुरुमील्हगृहं पश्चात् गत्वा पश्चात्पुनर्गृहं गत्वा भूयो लब्ध्वा गवां शतं दार्भ्यो B.

P. 489. l. 24. (V. 61, 1.) वाच्याचोदितः A. वाज्ञावोदितः Ca. वाह्वोदितः B. राज्ञा by conjecture.

P. 490. l. 16. (V. 61, 3.) ताडयन्वर्तत इत्यर्थः by conjecture. ताडयन्वंतत इत्यर्थः Ca. ताडयन्वत इत्यर्थः A.

P. 490. l. 17. (V. 61, 3.) वि विविच्य ॥ विवेच्य Ca. विविच्य A. वियमुः नियच्छंति B.

P. 490. l. 21. (V. 61, 4.) इतन Pada MS. P. 1. 2. एतन Sanhitá MS. S. 1. 2. 3.

P. 490. l. 25. (V. 61, 4.) रुद्रपुत्रा B. Ca. रुद्रपतिका A.

P. 490. l. 25. (V. 61, 4.) तावादयो यथा दीप्ताः from A.

P. 490. l. 26. (V. 61, 4.) The explanation of परा एतन (इतन the Pada MSS.) is left out in A. Ca. अग्नितपःऽग्निना तप्ताः यथा ससय तद्वत् परा तेन प्रदीप्ता भवथः। B.

P. 491. l. 15. (V. 61, 6.) हे आत्मन् B. after अपि च.

P. 491. l. 15. (V. 61, 6.) यद्वा उतेत्ययमेवकारार्थे । स्त्रीषु सैव A. यद्वा उतो वेत्येवमेवकारार्थे स्त्रीषु एकैव Ca.; not in B.

P. 491. l. 18. (V. 61, 6.) देव येन त्रायंते स्तुत्यादिना स देवत्रः। A. sec. man. देवत्रान्ययेन त्रायंते etc. A. pr. man. and Ca. A sentence is left out, which should be तद्विपरीतो or तदन्योऽदेवत्रः।. B. reads देवाः न त्रायंते स्तुत्यादीनायं (for स्तुत्यादिना येन) स अदेवत्रः।.

P. 491. l. 24. (V. 61, 7.) तथा तृष्यंतं विजानाति is left out in Ca., therefore B. has a peculiar explanation: तृष्यंतं पिपासितं विजानाति.

P. 492. l. 18. (V. 61, 9.) विप्राय, left out in A. Ca., is inserted in B. after प्रभृतगृहाय.

P. 492. l. 20. (V. 61, 9.) वियेमतुः। विशेषेण यमयतुः etc. A.

P. 493. l. 2. (V. 61, 10.) तं स्तुवे B. स्तुवत A. Ca.

P. 493. l. 7. (V. 61, 11.) जनप्रसिद्धैः ॥ जनीप्रसिद्धैः A. प्रसिद्धैः Ca.

P. 494. l. 23. (V. 61, 17.) The introductory verses are wanting in B.

P. 494. l. 23. (V. 61, 17.) After रथवी-, at the beginning of the third S'loka, three leaves are wanting in Ca., which are supplied by others, written by a modern hand. The omission goes as far as अश्वा व्याप- in V. 62, 7. These leaves are copied from an A. MS., which can be proved partly by the absence in this part of all various readings in A. and Ca., partly by the same mistakes occurring in both; e. g. 62, 6. भवयेति A. Ca. भवथ इति B. अनेकेकावश्यभक°, हिरण्यरूपं etc.

P. 495. l. 5. (V. 61, 17.) भगवन् A. C. भगवान् A. Ca.

P. 496. l. 17. (V. 62, 1.) मत्वर्थे° ॥ अन्वर्थे° A. Ca.: cf. Rv. I. 118, 5.

P. 496. l. 18. (V. 62, 1.) श्रेष्ठं एकं मुख्यं प्रशस्यं B.

P. 497. l. 5. (V. 62, 2.) आवर्तनायोगात् ॥ आवर्तमानायोगात् A. Ca.

P. 497. l. 12. (V. 62, 3.) ययोः सकाशात्तौ A. Ca. याभ्यां तौ B.

P. 498. l. 12. (V. 62, 5.) आत्मबलौ A. Ca. आयत्तबलौ B.

P. 498. l. 26. (V. 62, 6.) अनेकावश्यभकस्तंभोपेत सौ° A. Ca. अनेकस्थंभोपेतं सौ B.

P. 499. l. 9. (V. 62, 7.) अयोविकारा A. Ca. हिरण्यविकारा B.

P. 499. l. 11. (V. 62, 7.) विद्युत् सा च दिविभाजते A. विद्युत् सा व दिवि भाजते Ca. विद्युत तद्वत् B.

P. 499. l. 12. (V. 62, 7.) तिल्विले वा। वाशब्द इवार्थे। Ca.

P. 499. l. 14. (V. 62, 7.) निर्मिता स्थूणे यूपयष्टिरवस्थितः। Ca. निमिता स्थूणे यूपयष्टिरवस्थितं। A. निमित्तायष्टिः अवस्थितः B. स्थूणे might be a dual.

P. 499. l. 15. (V. 62, 7.) Instead of अधिगर्तस्य, Sáyaṇa explains अधि गर्तस्य; B. only has गर्तस्य गर्तं.

P. 499. l. 25. (V. 62, 8.) प्रजादिका B. प्राजादिकां Ca. प्राज्ञादिकां A.

P. 501. l. 6. (V. 63, 1.) ऋतस्योदकस्य गोपौ A. ऋतस्य यज्ञस्योदकस्य गोपौ Ca. ऋतस्य गोपौ यज्ञस्य रक्षितारौ B.

P. 502. l. 12. (V. 63, 4.) From उच्यते to -मंतो दृष्ट्वा left out in A. and Aa. The Mill MS. has no omission, which shows that in this part it was not copied directly from A. Colebrooke. That it is, however, a copy from an A. MS. is indicated by the fact that it has, like A., शत्रुमारकत्वात्, while B. Ca. read शत्रूणां मारकत्वात्.

P. 502. l. 14. (V. 63, 4.) त्वत्सृष्टौ आगच्छंति B.

P. 502. l. 20. (V. 63, 5.) उदकार्थं A. शुभकार्यार्थं B. Ca.

P. 502. l. 20. (V. 63, 5.) शोभनाश्वारं A. शोभनाश्वं B. Ca.

P. 502. l. 23. (V. 63, 5.) तन्यवः वर्धयितारः ततस्ते मरुतो B. तन्यवस्ततस्ते मरुतो Ca.

P. 503. l. 16. (V. 63, 7.) A. has हे मित्रावरुणा युवां धर्मणा जगद्धारकेण विपश्चिता स्तुत्येनेत्यर्थः। व्रता व्रतेन कर्मणा। अथवा विपश्चिता। स्तोतृनामैतत्। यजमानेन वृष्ट्या जगद्रक्षणस्य यजमानोऽपि कारणं। तत्कृतयाहुत्या वृष्ट्युत्पत्तेः। व्रता व्रतेन युवयोः कर्मणा असुरस्य. B. Ca. agree in हे मित्रावरुणा (मित्रावरुणौ added in B.) विपश्चिता प्राज्ञौ युवां धर्मणा जगद्धारकेण वृष्ट्यादिलक्षणेन कर्मणा व्रता (व्रतेन Ca.) यज्ञादिकर्माणि रक्षेथे पालयथः। असुरस्य etc.

P. 503. l. 17. (V. 63, 7.) यज्ञादिकर्माणि रक्षेथे। पालयथः। added from B. Ca. After वृष्ट्युत्पत्तेः, A. repeats व्रता व्रतेन युवयोः कर्मणा.

P. 503. l. 19. (V. 63, 7.) रक्षेथे इत्यर्थः A. विदीपय इत्यर्थः Ca. दीपयथः B.

P. 504. l. 8. (V. 64, 1.) अथायुवत्योच्यते A. अथायुवत्योच्यते Ca.; not in B. We might expect अथ संयुज्योच्यते.

P. 505. l. 14. (V. 64, 4.) B. and Ca. have स्पर्धमानाय instead of स्पर्धनाय A.

P. 506. l. 2. (V. 64, 6.) Both Padas read वरुणा; the Sanhitás वरुण; Sáyaṇa वरुणा. The same occurs V. 66, 6, where मित्र in the Sanhitá; मित्रा in the Pada.

P. 506. l. 16. (V. 64, 7.) यज्ञे B. Ca. गृहे A. The explanation of सत्र by यज्ञ is very common.

P. 506. l. 19. (V. 64, 7.) अर्चमानसं बिभ्रतौ अर्चनानसं ऋषिं धारयंतौ युवां B. at the end.

P. 507. l. 3. (V. 65, 1.) य स्तोता चिकेत जानाति स्तुतिं A. यस्तनोति स्तुति Ca. यस्तनोति स्तुतिं B.

P. 507. l. 4. (V. 65, 1.) देवत्रा देवेषु स्तोतृमध्ये॥ यद्वा देवेषु मध्ये A. देवत्रा देवेषु मध्ये Ca. B.

P. 507. l. 5. (V. 65, 1.) यस्य॥ यश्च A. B. Ca.

P. 507. l. 7. (V. 65, 1.) संभजते A. स लभते B. Ca.

P. 508. l. 6. (V. 65, 4.) अंहस्ततोऽपि A. Ca. अंहसः पापिनोऽपि B.

P. 508. l. 7. (V. 65, 4.) हि is explained twice in A. B. Ca., only मित्रस्य हि is left out in Ca.

P. 509. l. 15. (V. 66, 1.) रातहव्ये त्वमिति तस्यैवं A. रातहव्यस्यैव Ca.

P. 509. l. 16. (V. 66, 1.) आ आकारय A. आहूयाकारय Ca. आहूय B.

P. 509. l. 18. (V. 66, 1.) वरुणाय from B.

P. 509. l. 26. (V. 66, 2.) असुरविघातिमत् हंतुमित्यर्थः । A. असुरविघातिमहन् हे Ca.

P. 510. l. 11. (V. 66, 3.) संबंधिभिः B. संबंधिनः A. Ca.

P. 511. l. 3. (V. 66, 5.) श्रयतेरपि भवति from Ca.

P. 511. l. 26. (V. 67, 1.) यद्वा यजतं मामृषिं छत्नमाशाथे । अंतर्णीतन्यर्थः । आशयतं । व्यापयतमित्यर्थः । Ca. after बहुवचनीकर्तव्यं.

P. 512. l. 22. (V. 67, 4.) उदकस्य कर्तारः B. Ca. उदकस्पृशत्वस्य कर्तारः A.

P. 513. l. 4. (V. 67, 4.) The MSS. of the Pada have मित्र, not मित्रा.

P. 513. l. 6. (V. 67, 5.) सर्वैः स्तूयमानः A. सर्वैः स्तुतः B. Ca.

P. 514. l. 7. (V. 68, 2.) स्तुत्या गायत B. Ca.

P. 514. l. 18. (V. 68, 4.) हविर्षा B. Ca. बर्हिर्षा A.

P. 514. l. 24. (V. 68, 5.) वृष्ट्यर्था A. वर्षा B. Ca.

P. 515. l. 2. (V. 68, 5.) दानुमत्या दानवत्या दातृपूषितताया ॥ दानुमत्याः दानवत्याः दानमुषितताया A. दानुमत्याः । दातृपूषितताया । B. दानुमत्याः दानमत्याः ॥ दातृपु षितताया । Ca.

P. 515. l. 18. (V. 69, 1.) स्थिरतं A. स्थिरंतनं असंततं Ca.

P. 515. l. 24. (V. 69, 2.) इरावतीः इरां क्षीरलक्षणां तद्वत्यो A. Ca. इरावती क्षीरवत्यः B.

P. 515. l. 25. (V. 69, 2.) From तथा सिंधवः to तथा त्रयः left out in Ca. तथा वां सिंधवः नद्यः मधुमत् रसं दुदुह्रे दुहंति B.

P. 516. l. 2. (V. 69, 2.) पृथिव्यंतरिक्षद्युलोकानां from B. Ca.

P. 516. l. 20. (V. 69, 4.) पार्थिवस्य रजसो या यौ A. Ca. पार्थिवस्य भूलोकस्य B.

P. 517. l. 8. (V. 70, 1.) पुरोरपि बहु उरु बहुतरं A. Ca.; wanting in B. We should expect पुरुणोऽपि बहुनोऽप्युरु बहुतरं.

P. 517. l. 17. (V. 70, 2.) रुदद्भिः ॥ रुद्भिः A. रुचद्भिः Ca.

P. 517. l. 23. (V. 70, 3.) शोभनेन त्राणनेन A. शोभनेन Ca. शोभनपालकौ B.

P. 518. l. 6. (V. 70, 4.) समृद्धा वय अन्यथा [वयं कस्य] चित् धनेन शरीरपोषं न कुर्म इत्यर्थः । तथा शेष अतृप्तात्मकं etc. B. has समृद्धा वयं तथा शेषसा अन्यया चित धनेन मा शरीरपोषं न कुर्म तथा तनसा अन्यात्मकेन धने शरीरपोषं मा न कुर्मः ।. समृद्धा वयं अन्यथा चिन्न धनेन शरीरपोषं न कुर्म इत्यर्थः तथा शेषसा अपत्येन सहिता मा भुजेम A.

P. 518. l. 17. (V. 71, 1.) चरणीयं A. रमणीयं B. Ca.

P. 518. l. 19. (V. 71, 1.) निबर्हणौ हंतारौ शत्रूणां from Ca. बर्हणौ हंतारौ शत्रूणां B.

P. 518. l. 25. (V. 71, 2.) फलैः from B. Ca.

P. 519. l. 16. (V. 72, 1.) गतयोः after मित्रावरुणयोः Ca. in margine.

P. 521. l. 16. (V. 73, 3.) तेजोवत् A. तेजस्वत् B. Ca.: cf. Páṇ. I. 4, 18, 2.

P. 521. l. 16. (V. 73, 3.) चक्रं after तेजोवत् repeated in A. B. Ca.

P. 521. l. 18. (V. 73, 3.) प्रातरादिसवनात् A., and Ca. sec. man. °सवनानि B., and Ca. pr. man.

P. 522. l. 2. (V. 73, 4.) पौरेण मा सु etc. A.

P. 522. l. 4. (V. 73, 4.) गमयथः । गमयथुः A. Ca. एयमथुः B.

P. 522. l. 22. (V. 73, 6.) अविरलमित्यिता ऋषिः B. Ca. before सति ॥

P. 522. l. 22. (V. 73, 6.) उह्यते Aa. उह्यते A. उह्यत B. Ca.

P. 522. l. 24. (V. 73, 6.) दहंतमग्निम° B. Ca. दहंत मसु° A.

P. 524. l. 10. (V. 73, 10.) रथानिव शिल्पी तद्वत्सुक्षमे तानि संतु A. रथानिव शिल्पी तद्वत् तद्याम Ca. by corrections. रथान् इव शिल्पी तानि शंतमा सुखतमानि संतुष्टा B.

P. 524. l. 22. (V. 74, 1.) क्वौ भूमौ left out in A. कूस्थौ क्वौ भूमौ C. Mill.

P. 524. l. 22. (V. 74, 1.) शृणुथः from B. Ca. and C. Mill.

P. 524. l. 24. (V. 74, 1.) अथवा deest in A. and C. Mill.

P. 525. l. 6. (V. 74, 2.) तिष्ठतः ॥ तिष्ठथः A. B. Ca.

P. 525. l. 15. (V. 74, 3.) उल्लंघ्य याथः Ca. C. Mill. उल्लंघयथः A.

P. 526. l. 3. (V. 74, 4.) प्रेरयथः B. C. Ca.; not in A.

P. 526. l. 3. (V. 74, 4.) ईमिति पूरणः A. Ca. हि पूरणः B.

P. 526. l. 4. (V. 74, 4.) गृभीततातये गृहीतताये Ca. (for °तातये).

P. 526. l. 5. (V. 74, 4.) प्रबलं सिंहं B. C. Ca.; omitted in A.

P. 526. l. 14. (V. 74, 5.) तदा B. Ca. तथा A.

P. 526. l. 15. (V. 74, 5.) काममा कमनीयं रूपमृखे A.

P. 526. l. 22. (V. 74, 6.) वां इह संदर्शने B.

P. 527. l. 7. (V. 74, 7.) From सर्वतो to को यजमानो from A.; कः अयन्ने वन्ने कः यजमानः यज्ञैः युवां वन्ने विप्रवाहसा विप्रस्य यजमानस्य अभिमतप्रापयितारौ युवां कः विप्रः वन्ने B.

P. 527. l. 7. (V. 74, 7.) वहनीयौ by conjecture. वहनी A.

P. 527. l. 8. (V. 74, 7.) वव्रे । यो यजमानो यज्ञैर्वव्रे अत्यंत° etc.

P. 528. l. 1. (V. 74, 9.) मधुमंतौ सोमकामौ वा Ca.

P. 528. l. 4. (V. 74, 9.) अभीशुभिः ।; cf. Rv. I. 104, 1. अभिम्रभिर्दयितं A.; deest in B. Ca.

P. 528. l. 10. (V. 74, 10.) तत्र A. कुत्रचित्तत्रापि B. Ca.

P. 529. l. 10. (V. 75, 2.) यथा before अहं from B. Ca.

P. 529. l. 23. (V. 75, 3.) वाजिनधनौ A. Ca. अन्नधनौ B.

P. 530. l. 6. (V. 75, 4.) हे वृषणवसू to यमूनां from Ca. हे वृषणवसू वर्षधनौ B.; left out in A.

P. 530. l. 8. (V. 75, 4.) मृगो मृगयिता यर्यिगंता B. Ca. मृगो मृगयिता left out in A.

P. 530. l. 18. (V. 75, 5.) मायारहितं from B. Ca.

P. 530. l. 18. (V. 75, 5.) पथि Ca. पंथि B. मथि A.

P. 531. l. 19. (V. 75, 8.) अस्मिन्यज्ञे from B.

P. 531. l. 20. (V. 75, 8.) उपप्राभुतं A. प्राभुतं B. Ca. Ca. has at the end भू प्राप्तौ इति धातुः। यद्वा अवस्योः समीपे भवंतं ।.

P. 532. l. 1. (V. 75, 9.) अग्निराहवनीयः ऋत्वियः ऋतौ काले भव B. Ca. after अधीयत.

P. 532. l. 1. (V. 75, 9.) प्रकाशितहविरित्यर्थः । A. Ca. Cf. सुचक्षुः Böehtlingk, सुज्योतिः Benfey. चित्रशोचिः Rv. VI. 10, 3; but भद्रशोचे Rv. X. 45, 9.

P. 532. l. 23. (V. 76, 1.) From स्वांगैः to वसतीवरीभिः taken from Ca. कं प्रति । पीपिवांसं आप्यायितं घर्मं सुरूपं etc. A. कं प्रति । पीपिवांसं स्वांगैः परिवृढं घर्मं प्रदीप्तयज्ञं B.

P. 533. l. 6. (V. 76, 2.) हिंस्तां ॥ हिंस्तं A. Ca. B.

P. 533. l. 7. (V. 76, 2.) गंतृतमौ युवां A. गंतृतमौ अश्वि° Ca. B.

P. 533. l. 8. (V. 76, 2.) अश्वेन च after रक्षणेन B. Ca.

P. 533. l. 8. (V. 76, 2.) आगंतृतमौ अवर्तिं प्रति A. आगंतृतमौ नाशयंताविति शेषः अथवा अवर्तिं प्रति Ca. आगंतृतमौ नाशयंताविति शेषः । प्रति इंद्रियभू आगत वर्त्ति अजीवनं दारिद्र्यं नाशयित्वा दाशुषे etc. B.

P. 533. l. 11. (V. 76, 2.) भवतां । deest in A. B.

P. 533. l. 17. (V. 76, 3.) तमाना A. तिमाना Ca. after पंचदशधा.

P. 533. l. 23. (V. 76, 3.) किं तर्हि B. Ca. नैत्यावाहावा । A.

P. 533. l. 25. (V. 76, 3.) इतरदेवानां सोमस्य घर्मस्य वा पानं Ca. इतरदेवानां सोमस्य पानं B. इतरदेवानां पानं A.

P. 533. l. 25. (V. 76, 3.) नाततान न तनोति A. ततान तनोति Ca. आततान तनोति अश्विनर अश्विनौ न विहायेति शेषः । तस्मादागच्छतं B.

P. 534. l. 9. (V. 76, 4.) अपां ॥ अपः A. B. Ca.

P. 535. l. 19. (V. 77, 2.) देवगामि नो A. देवगामि B. Ca.

P. 535. l. 23. (V. 77, 2.) देवानां संभजनीय संभाव्यो A. देवानाभोक्रेति B. Ca.

P. 536. l. 19. (V. 77, 4.) कर्म विवेष A. कर्मविशेषं B. Ca.

P. 536. l. 20. (V. 77, 4.) पालयेत् ॥ पालयत् A. B. Ca.

P. 537. l. 4. (V. 78, 1.) The Anukramaṇí has besides, अंत्याः पंच गर्भस्राविण्य उपनिषत्.

P. 537. l. 7. (V. 78, 1.) The second Viniyoga is left out in Ca.

P. 537. l. 17. (V. 78, 1.) तौ यथा after इव by conjecture.

P. 537. l. 24. (V. 78, 2.) यवसं घासं Ca. B. यवसे घासाय A.

P. 538. l. 17. (V. 78, 4.) रथेन तं रक्षितुं B. Ca.; not in A. Ca. adds जवता before शंतमेन.

P. 538. l. 20. (V. 78, 5.) अत्रावुवंति A. अत्र ब्रुवंति B. Ca.

P. 538. l. 20. (V. 78, 5.) प्रक्षिप्य B. Ca. प्रक्षेप्य A.

P. 538. l. 22. (V. 78, 5.) निर्मेमिष्यंति A. निर्मिमिष्यंति Ca. समुद्रागिनिर्मिमिष्यति B. निर्मेयिष्यंति MS. of the Nítimanjarí.

P. 538. l. 23. (V. 78, 5.) कृशः B. Ca. शिशुः A.

P. 538. l. 26. (V. 78, 5.) रमयित्वा A. रमित्वाय B. Ca.

P. 539. l. 7. (V. 78, 5.) प्रसवोन्मुख्याः A. प्रसोष्यमाणायाः B. Ca.

P. 539. l. 7. (V. 78, 5.) षूङ् प्राणिप्रसवे लृटि शतरि रूपं संज्ञापूर्वस्य विधेरनित्यत्वात् गुणाभावः Ca. after योनिरिव.

P. 539. l. 16. (V. 78, 6.) The commentary is given according to A. B., with the exception that मम निर्गमार्थं appears only in B. Ca. has after सं चावय: the words प्रविष्टे मयि निर्गते चाप्रविष्टशंकापनोदनार्थं व्यचयश्च विगमयतं मम निगमार्थं etc. The same addition is found in the margin of A. by a later hand. C. Mill does not contain it.

P. 540. l. 8. (V. 78, 8.) यथा स्वयं समुद्रः तरंगैः कंपति एव एवं त्वं हे दशमास्य etc. B.

P. 540. l. 10. (V. 78, 8.) जरायुणः ॥ जरायुक्तः A. जरयुक्तः Ca.

P. 541. l. 5. (V. 79, 1.) अबोधयः प्रज्ञापयः B. Ca.

P. 542. l. 21. (V. 79, 5.) फलं ॥ बलं A.

P. 543. l. 3. (V. 79, 6.) स्तोतृषु left out in Ca. सूरिषु प्रजावत्सु B.

P. 544. l. 3. (V. 79, 9.) विभातं A. विवासं Ca. तमोविवासं B.

P. 544. l. 11. (V. 79, 10.) किमेतावत् हे यदित् एतावदेव A.

P. 545. l. 1. (V. 80, 1.) ऋतावरी सत्यवती B.

P. 546. l. 3. (V. 80, 4.) श्वेनी भवति। विशेषेण श्वेता भवति A. श्वेनी भवति Ca., with श्वेता भवति in marg. श्वेनी प्रकाशवती भवति B.

P. 546. l. 3. (V. 80, 4.) After प्रथममध्यमयोः we should expect स्थानयोः, as Rv. I. 71, 6. 114, 10.

P. 546. l. 5. (V. 80, 4.) पंथानं मेरोः प्रांतदेशं अनुक्रमेण B. Ca. omits all from दिशि to मिनाति.

P. 546. l. 7. (V. 80, 4.) अवगच्छंती च Ca. A.

P. 546. l. 25. (V. 80, 6.) प्रेरयति विवृणोति Ca.

P. 548. l. 18. (V. 81, 3.) शुभः शोभमानः सन् A. B. Ca.

P. 550. l. 10. (V. 82, 2.) असुरादयो ॥ सुरादयो A. B. Ca.

P. 550. l. 23. (V. 82, 4.) प्रजापशुगृहादिकं stood probably in the margin of the original Codex. A. inserts it after प्रेरय, while B. Ca. have it in the right place in the following verse.

P. 551. l. 20. (V. 82, 7.) तं हि ॥ स हि A. Ca.

P. 551. l. 20. (V. 82, 7.) सर्वात्मत्वात् A. सर्वात्मकत्वात् Ca.

P. 553. l. 1. (V. 83, 1.) जरयिता A. Ca.

P. 553. l. 10. (V. 83, 2.) A. Ca. begin with पर्जन्यस्तृपेराद्यंतविपरीतस्य. B. has अनागाः निष्पापः पर्जन्यः वृक्षान् हंति etc.

P. 555. l. 2. (V. 83, 6.) अर्वाङ् B. अर्वाग् A. Ca.

P. 556. l. 16. (V. 83, 10.) जलप्रदेशान् in A. before धन्वानि.

P. 556. l. 17. (V. 83, 10.) जलवतः कृतवानसि B. Ca.; not in A.

P. 556. l. 25. (V. 84, 1.) भूमिस्तोमे चैषा ॥ स्तोमे त्वेषा A. Ca.

P. 557. l. 18. (V. 84, 2.) उद्धृतं A. उद्धतं Ca.

P. 558. l. 3. (V. 84, 3.) यद्यस्याः ॥ यत् अस्याः A. यत् यस्मात् B. Ca.

P. 558. l. 5. (V. 84, 3.) दिवो नीचैरंतरि° A.

P. 558. l. 7. (V. 84, 3.) At the end of the 29th Varga the Sanhitás give a Khila:

वर्षंतु ते विभावरि दिवो अभ्रस्य विद्युतः।
रोहंतु सर्वबीजान्यव ब्रह्मद्विषो जहि ॥

P. 558. l. 15. (V. 85, 1.) हे अत्रे B. Ca. हे खलज्ञ A. (क्षेत्रज्ञ ?)

P. 558. l. 20. (V. 85, 1.) द्वितीयस्या तृतीयस्यां Ca.

P. 559. l. 3. (V. 85, 2.) A very similar but not identical passage is to be found in the S'atapatha-Br. III. 3, 1, 7. (p. 253.)

P. 559. l. 16. (V. 85, 3.) तद्धीयते ॥ तज्जीयते B. तद्वीयते A. Ca. Cf. Yáska.

P. 559. l. 21. (V. 85, 3.) प्रसारयति A. Ca. B.

P. 560. l. 6. (V. 85, 4.) समाच्छादयंति A. Ca. B.

P. 561. l. 3. (V. 85, 6.) बहुधो नद्यः only in A.

P. 561. l. 5. (V. 85, 6.) श्वोषितं न वरुणस्येति न वाच्यं तस्य वरुणादिरूपेणावस्थानात् Ca. श्वोदितं न वरुणवाच्यं तस्य वरुणादिरूपावस्थानात् A.

P. 561. l. 13. (V. 85, 7.) ईरिणात्मननाश्च शास्ती A. इरणात्मनना प्रशास्ती° Ca.

P. 561. l. 16. (V. 85, 7.) अशब्दं ॥ अशब्दं A. अशक्यं Ca. B.

P. 561. l. 24. (V. 85, 8.) द्यूते यथा यद्रिरिपुः B. A. द्यूते यथा अद्रिरिपुः Ca. pr. man. द्यूते यद्रिरिपुः Ca. sec. man.

P. 561. l. 24. (V. 85, 8.) यदस्मासु ॥ तस्मासु Ca. pr. man. तथास्मासु Ca. sec. man. A.; deest in B.

P. 562. l. 24. (V. 86, 2.) वा by conjecture.

P. 563. l. 10. (V. 86, 3.) प्रतीयते । प्रतिगच्छतः ॥ प्रतिगच्छतः B. प्रतियते प्रतिगच्छति Ca. भवति ईषते अभिगच्छति A.

P. 564. l. 2. (V. 86, 5.) मर्तेव मनुष्याविव तौ etc. A. मर्ताय मनुष्यायविव तौ Ca.; B. omits all. It seems that Sáyaṇa took मर्ताय for मर्तेव, misled perhaps by the following अंशेव.

P. 564. l. 15. (V. 86, 6.) रयिं धनं च Ca. B.; deest in A. It ought to be रयिं धनं गृणत्सु स्तुवत्सु ।.

P. 565. l. 1. (V. 87, 1.) वाचि नि° ॥ वाजिनि° A. Ca. वाक नि B.

P. 565. l. 2. (V. 87, 1.) विष्णवे व्याप्तयेंद्राय विष्णवे वा A. विष्णवे पा Ca.

P. 565. l. 18. (V. 87, 2.) स्तौति from B. Ca. After स्तौति, Ca. has वाक्यादित्वादनिघातः ।.

P. 565. l. 23. (V. 87, 2.) यो यूयं प्रबलाः A. शयो यूयं प्रबलाः Ca. ये च यूयं B.

P. 566. l. 8. (V. 87, 3.) तान् शृण्विरे repeated in A. Ca. after स्तुतवान्. Perhaps intended for तं शृण्विरे.

P. 566. l. 9. (V. 87, 3.) The explanation of इरी is omitted in A. नेष्ट स्था । नेशते च चाल° A. Ca. has निवासे तिष्ठतां ईरी ईरिता प्रेरिता नेष्टे स्था नेशते भवति च चाल°; B. निवासे तिष्ठतां इरीता प्रेरिता नेष्टे अनीश्वरो कश्चन भवति चाल°. इरी does not occur again in the Rig-veda.

P. 569. l. 12. At the end of the 5th Maṇḍala, S. 1. 2. and Colebr., where however the leaf containing it is bound after the 6th Adhyáya, and no accents marked, give the following Pariśishṭa:

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममा वह ॥१॥
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीं ।
यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं ॥२॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीं ।
श्रियं देवीमुप ह्वये श्रीर्मा देवीर्जुषतां ॥३॥
कांसोस्मितां हिरण्यप्राकारामार्द्रां[a] ज्वलंतीं तृप्तां तर्पयंतीं ।
पद्मेस्थितां पद्मवर्णां तामिहोप ह्वये श्रियं ॥४॥

[a] माद्रां S. 2.

चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां ।
तां पद्मनेमिं शरणं[b] प्र पद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥५॥१॥
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदंतु माया अंतरायाश्च[c] बाह्या अलक्ष्मीः ॥६॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि[d] राष्ट्रेऽस्मिन्कीर्तिं वृद्धिं ददातु मे ॥७॥
क्षुत्पिपासामला ज्येष्ठा अलक्ष्मीर्नाशयाम्यहं ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥८॥
गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ।
ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियं ॥९॥
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्यस्य[e] मयि श्रीः श्रयतां यशः ॥१०॥२॥
कर्दमेन प्रजा भूता मयि संभ्रम कर्दम ।
श्रियं वासय मे कुले[f] मातरं पद्ममालिनीं ॥११॥
आपस्रजंतु[g] स्निग्धानि चिक्लीत वस मे गृहे ।
नी च[h] देवीं मातरं श्रियं वासय मे कुले ॥१२॥
आर्द्रां पुष्करिणीं पुष्टिं[i] सुवर्णां हेममालिनीं[k] ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममा वह ॥१३॥
आर्द्रां पुष्करिणीं[l] यष्टिं[m] पिंगलां पद्ममालिनीं ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममा वह ॥१४॥
तां म आ वह जातवेदो लक्ष्मीमलपगामिनीं[n] ।
यस्यां हिरण्यं प्रभूतिं[o] गावो दास्योऽश्वान्विंदेयं पुरुषानहं ॥१५॥
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहं ।
श्रियः पंचदशर्चं च श्रीकामः सततं जपेत् ॥१६॥३॥
पद्मानने पद्म ऊरू[p] पद्माक्षी पद्मसंभवे ।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहं ॥१७॥[q]
अश्वदायी[r] गोदायी धनदायी महाधने ।
धनं मे जुषतां देवी[s] सर्वकामांश्च देहि मे ॥१८॥

b शरणमहं प्र S. 2. 3. c मायांतरा° S. 2. 3. d °भूतो सु S. 2. °भूतोऽस्तु S. 3.
e रूपमन्नस्य S. 3. f गृहे S. 1. g °जंति S. 1. आपः सजंतु S. 3. h नि च S. 1. 3.
i पुष्टिं S. 3. k पिंगलां पद्ममालिनीं S. 1. l यः करिणीं S. 2. 3. m यष्टिं S. 3.
n नप S. 3. o प्रभूतं S. 2. p ऊरु S. 3. q This verse is left out in S. 1.
r °दाये three times, S. 2. s देवि S. 3.

पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवे रथं ।
प्रजानां भवसी[t] माता आयुष्मंतं करोतु मे[u] ॥ १९ ॥ ४ ॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिंद्रो बृहस्पतिर्वरुणं[x] धनमस्तु ते[y] ॥ २० ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं[z] ददातु सोमिनः ॥ २१ ॥
न क्रोधो न च मात्सर्यं[a] न लोभो नाशुभा मतिः ।
भवंति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ २२ ॥[b]
सरसिजनिलये सरोजहस्ते धवलतरां शुभगंधमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यं ॥ २३ ॥
श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानं[c] महीयते ।
धनं धान्यं[d] पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ २४ ॥ ५ ॥

S. 3. adds after ver. 23. the following verses:

पद्मासने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोऽनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियां ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभां ॥
महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मि प्रचोदयात् ॥
आननंदकर्दम श्रीदश्चिक्लीत इव विश्रुतः ।
ऋणरोगादिदारिद्र्यपापक्षुदप मृत्यवः ।
रोगशोकमनस्तापा नश्यंतु सर्वदा ॥

Then follows verse 24.

On the margin of the same leaf S. 3. adds the following verses in red ink. The first three verses are addressed to S'iva, and followed by two addressed to Vishṇu. Kullúka, in his Commentary on Manu III. 233, explains बलानि by श्रीसूक्तशिवसंकल्पादीनि; and it is not unlikely, therefore, that he knew the S'rísúkta as followed by some verses addressed to S'iva.

विश्वेश्वर विरूपाक्ष विश्वरूप सदा शिव ।
शरणं भव भूतेश करुणा कर शंकर ॥ १ ॥
हर शंभो महादेव विश्वेशामरवल्लभ ।
शिव शंकर सर्वात्मन्नीलकंठ नमोऽस्तु ते ॥ २ ॥

[t] सि S. 3. [u] करोम्यहं S. 1. [x] वरुणं धनमुत्सृजे S. 1. [y] धनमश्विना S. 3.
[z] मह्यं S. 3. मिहं S. 1. [a] मात्सर्यै S. 3. [b] S. 1. inserts here the verse पद्मानने, and then repeats ver. 16: यः शुचिः. [c] मारोग्यमाविधात्पव° S. 1. 3. [d] धान्यं धनं S. 3.

मृत्युंजयाय रुद्राय नीलकंठाय शंभवे ।
अमृतेशाय शर्वाय श्रीमहादेवाय ते नमः ॥ ३ ॥
एतानि शिवनामानि यः पठेन्नियतः सकृत् ।
नास्ति मृत्युभयं तस्य पापरोगादि किंचन ॥
यज्ञेशाच्युत गोविंद माधवानंत केशव ।
कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥ १ ॥
कृष्णाय गोपिनाथाय चक्रिणे मुरवैरिणे ।
अमृतेशाय गोपाय गोविंदाय नमो नमः ॥ २ ॥
एतान्यनंतनामानि मंडलांते (सदा) पठेत् ।

Maṇḍala VI.

Besides the MSS. hitherto used, I possess for the sixth Maṇḍala a copy which I took from the MS. in the Paris Library. This MS. belongs to the A. class, and where it has peculiar readings they are marked by P.

P. 571. l. 7. (VI. 1, 2.) स्तुत्या A. स्तुत्यान Ca.

P. 572. l. 11. (VI. 1, 5.) उभयास ॥ त्वां उभयास A. Ca. त्वा उभयास B.

P. 573. l. 11. (VI. 1, 7.) दिवः स्वर्गमनयः A. दिवः। स्वर्गः ॥ अनयः Ca. दिवः स्वर्गः तं अनयः B.

P. 573. l. 12. (VI. 1, 7.) गमय इति वा A. गमय इति Ca. गमयेति?

P. 575. l. 16. (VI. 1, 13.) स्वामीत्येषपदं A. भरतस्वामी वसुतात्येतपदं Ca. वसुतेत्येतत्पदं may have been the original reading, unless Bharatasvámi took the two words वसुता ते as one. In this case the reading ought to be वसुतात इत्येकपदं ।.

P. 575. l. 18. (VI. 1, 13.) B. Ca. have वसूनि त्वे त्वां.

P. 580. l. 11. (VI. 2, 9.) अस्तीति ॥ अश्नीति Ca. वासीति A. अपीति शेषः B.

P. 582. l. 11. (VI. 3, 2.) शांतः B. श्रांतः A. श्रात Ca.

P. 583. l. 6. (VI. 3, 4.) स्पृहं ॥ प्रहुं Ca. स्पहुं A.

P. 583. l. 11. (VI. 3, 4.) वनं A. धनं Ca.

P. 583. l. 12. (VI. 3, 4.) मूर्तभूतं सर्वं Ca.

P. 584. l. 6. (VI. 3, 4.) ज्वालाः B.; deest in A. Ca.

P. 584. l. 23. (VI. 3, 7.) दीप्तेन to गमनशीलेन from Ca.

P. 585. l. 9. (VI. 3, 8.) सर्वं तीक्ष्णीकरोति Ca. after तनूकरोति; deest in A. B.

P. 586. l. 11. (VI. 4, 2.) प्रबुद्धो ॥ प्रवृद्धो A. B. Ca.

P. 586. l. 17. (VI. 4, 3.) उपमार्यस्य A. Ca. उपमानस्य Nirukta.

P. 587. l. 5. (VI. 4, 4.) स्वभावत्व एव A. स्वभावेनैव Ca.

P. 587. l. 8. (VI. 4, 4.) निवस A. निवससि B. निवासे: Ca.

P. 587. l. 15. (VI. 4, 5.) यष्टृभिः ॥ यष्टुभिः A. यज्वभिः B. Ca.

P. 587. l. 20. (VI. 4, 5.) अरातीररातिरदाता ॥ अरातीः अरातिवदतो (वदातो pr. man.) A. अरातीः अरातिवदतो Ca. अरातीः अरातीभि° B.

P. 587. l. 21. (VI. 4, 5.) आचक्षाणानां ॥ आचक्षाणां A. Ca.

P. 588. l. 12. (VI. 4, 6.) दिग्भागात् ॥ दिग्गामात् A. Ca.

P. 589. l. 4. (VI. 4, 8.) वेधि गमनाय प्रापयः B. Ca.

P. 589. l. 7. (VI. 4, 8.) वीर्यीरक्षा° Ca. वीरक्षा A.

P. 590. l. 15. (VI. 5, 3.) विश्वांतरात्मना B. Ca. वैश्वात्मना A.

P. 591. l. 4. (VI. 5, 4.) तृप्ततम A. तपस्वितम Ca. तपस्विन् B.: cf. Nir. VI. 12.

P. 592. l. 21. (VI. 6, 1.) उपमंतव्यं A. B. Ca.

P. 592. l. 22. (VI. 6, 1.) नवीयसा after नव्यसा Ca.

P. 594. l. 15. (VI. 6, 5.) After प्र पापतीति । प्रकर्षेण, Ca. leaves out all to the beginning of the next hymn. B. supplies this lacuna quite arbitrarily to verse 7, where it copies from A.: प्र पापतीति प्रकर्षेण पतति दृष्टांतः गोषुयुधः उदकमिमिश्रात् घातकोऽशनिर्न अशनिरिव सः यथा पतति तद्वत् अपि च दुर्वर्तुः दुहाहकज्वालाभिर्वर्तमानस्य अग्नेः भीमः भयंकरः क्षातिः दर्पः वनानि दयते दहति दृष्टांतः शूरस्येव प्रसितिः यथा शूरस्य बाधकं शौर्यं प्राणिनां घातकं भवति तद्वत् ॥ ६ ॥ आ भानुनेति ॥ हे अग्ने स त्वं महः महानु पार्थिवानि पृथिव्यां वर्तमानानि श्रयांसि व्यवहारार्थं इतस्ततः गच्छमानानि भूतानि ततंथ विस्तारय बाधकं वारयेत्यर्थः । अपि च तोदस्य तोदं प्राणिनामुपद्रवं पृषता भानुना घर्षकेन तेजसा आ समंतात् बाधस्व अपि चा प भया बलहिते सहोभिर्बलैः हे वनुषः कृष्णाग्ने वनुष्यत् कोधं कुर्वन् स्पृधः अस्मत् शत्रून् नि जूर्वं नितरां जय घातयेत्यर्थः ॥ ७ ॥

P. 594. l. 16. (VI. 6, 5.) मृजाना दाहोत्पाद्यमाना B.

P. 594. l. 18. (VI. 6, 5.) यथान्यैर्दुः सहं ॥ यथान्ये दुःसह A.

P. 596. l. 22. (VI. 7, 2.) That the MS. of Sáyaṇa at Paris, which I copied for the sixth Maṇḍala, belongs to the A. class can be clearly proved, for the first time, by VI. 7, 2. Here the Paris MS. reads (ग्रा)हयितारं गमयितारं; A. has हयितारं (in the margin ग्रा) गमयितारं; Ca. has ग्रहीतारं, and leaves out गमयितारं.

P. 599. l. 7. (VI. 8, 1.) The second Viniyoga is only in C. Mill and the Paris copy.

P. 600. l. 4. (VI. 8, 2.) व्रतानि कर्माणि B. व्रतानि व्रतानि कर्माणि C. Mill, A. P. व्रतानि व्रत-कर्माणि Ca.

P. 600. l. 19. (VI. 8, 3.) शोषणार्थं B. शेषणार्थं Ca. A., C. Mill, P.

P. 601. l. 1. (VI. 8, 4.) मध्ये from B. Ca.

P. 602. l. 6. (VI. 8, 7.) हे इष्टे यष्टव्य B. Ca. इष्टे इष्टव्य A.

P. 602. l. 22. (VI. 9, 1.) रंजयंतौ ॥ रक्षयंतौ A. C. ईक्षयंतौ B.

P. 602. l. 23. (VI. 9, 1.) स्वप्रवृत्तिभिः from B. Ca.

P. 603. l. 13. (VI. 9, 2.) न विजानामि यं पटं यज्ञलक्षणं from Ca.

P. 603. l. 24. (VI. 9, 2.) न च तात्कार्यं पटस्थानीयं प्रपंचं विजानामि यं प्रपंचं समरे A. न च तात्काय पटस्थानीयान्यपि वियदादीनि न विजानामि न च तात्कार्यं पटस्थानीयं प्रपंचसमरे Ca.

P. 605. l. 22. (VI. 9, 5.) निर्विकल्पं A. निर्विकारं Ca.

P. 605. l. 22. (VI. 9, 5.) मनसो Vájasaneyi-Sanhitá. मनो A. Ca.

P. 605. l. 23. (VI. 9, 5.) न केनचित् Ca. A. sec. man. न केचित् A. pr. man.

P. 611. l. 6. (VI. 11, 3.) After धनहेतुभूता, Ca. has धनं लभमाना या धनगयं लभेति यत् ।.

P. 612. l. 4. (VI. 11, 5.) आहूयत ॥ आहियत A. आहियता Ca. आसाद्यते B.

P. 612. l. 4. (VI. 11, 5.) All is left out from सुष्ठु to अन्नानि in Ca. Consequently

B. contains an independent explanation of this passage: सुवृक्तिः शोभना स्तुतिः अभ्यषि स्तूयते पृथिव्याः सदने कस्मिंश्चित्तथा सद्म सद्मनि यजमानगृहे यज्ञः अथापि यजमाने आश्रितो भवति.

P. 613. l. 16. (VI. 12, 2.) हंते° A. हंगते° Ca.

P. 614. l. 15. (VI. 12, 4.) कत्वा न आत्मीयेन कर्मणा च B. कत्वा न क्रतुना आत्मीयेन कर्मणा च Ca. कत्वा न क्रतुना कर्मणा च A.

P. 615. l. 11. (VI. 12, 6.) अर्वन् गंतर° A., C. Mill, P. अर्वन् चंतरा° B. Ca. अर्वंतरा A. by correction.

P. 619. l. 13. (VI. 14, 3.) व्रतविरोधिनं यागविरोधिनं B. Ca.

P. 619. l. 21. (VI. 14, 4.) सतां B. Ca. सत्ये A.

P. 620. l. 6. (VI. 14, 5.) असंभक्तं तस्यैवासाधारणं B. Ca.

P. 630. l. 15. (VI. 16, 1.) यष्टा यज्ञानां Ca. यष्टा देवयज्ञानां A.

P. 632. l. 1. (VI. 16, 6.) मरणधर्म: A. मरणरहितः B. Ca.

P. 632. l. 11. (VI. 16, 8.) दृष्टारं A. Ca.

P. 634. l. 9. (VI. 16, 14.) अग्ने य उक्तगुण तमु A. अग्ने य उक्तः तमु Ca. अग्ने तमेव B.

P. 634. l. 15. (VI. 16, 15.) कश्चिदृषिः गुण तमु तमेव त्वां अथर्वणः सोऽपि तमु तमेव त्वां A. pr. man. कश्चिदृषिः स्तौति हे अग्ने तमु etc. A. by corrections. कश्चिदृषिः स्तौति हे अग्ने तमु तमेव त्वां समीधे Ca. B.

P. 634. l. 15. (VI. 16, 15.) समेध A. साधु B. Ca.

P. 635. l. 2. (VI. 16, 16.) असुरैः A. Ca. अपरैः B.

P. 635. l. 3. (VI. 16, 16.) Ca. adds after शेषः the words यष्टा इत्था अमुत्र दूरत एव इतरा असुर्या गिरः संतु ता अशृणवन्नित्यर्थः ।.

P. 637. l. 16. (VI. 16, 25.) इच्छति ददातीत्यर्थः A. इच्छते ददामीत्यर्थः Ca. इच्छते ददासीत्यर्थः B.

P. 640. l. 15. (VI. 16, 35.) द्युलोकस्य A. B. द्युलोकस्यापि Ca.

P. 641. l. 8. (VI. 16, 38.) आश्रयणं सुखं वा Ca.

P. 641. l. 9. (VI. 16, 38.) घर्मार्ताः संतप्ताश्छायामुपागच्छंति B. Ca. घर्मार्तास्समुपागच्छंति A.

P. 646. l. 15. (VI. 17, 2.) तद्वान् गतसारमपि सोममपरित्यज्यन्यस्त्वं B. Ca.

P. 647. l. 1. (VI. 17, 3.) मदयतु A. मदयुक्तं करोतु B. Ca.

P. 647. l. 25. (VI. 17, 5.) अविचालितं from B. Ca.

P. 648. l. 6. (VI. 17, 6.) प्रज्ञया A. प्रकृत्या B. Ca.

P. 648. l. 8. (VI. 17, 6.) गोभ्यः । तादर्थ्ये चतुर्थी । Ca.

P. 649. l. 14. (VI. 17, 9.) °भुनास्मिन्काले त्वदीयाद्भ्रात्रस्यात्मीयाभ्यन्योः क्रोधाच्च भियसा भयेन द्विता द्विधा द्विः प्रकारेण कामेन मनसा च Ca. and B. pr. man. The reading of A., which has been adopted in the text, has been inserted by a later hand on the margin of B.

P. 650. l. 12. (VI. 17, 11.) आहवन्यास्यानि ॥ आहवनीयास्यानि A. Ca. आध° B.

P. 652. l. 16. (VI. 18, 1.) वातेर्वातं ॥ वातेर्वासं A. Ca.

P. 654. l. 1. (VI. 18, 4.) तुरतः अस्मान् हिंसतः B. Ca. तुरतः शत्रूणां हिंसन् A.

P. 654. l. 11. (VI. 18, 5.) स्तुत्यस्तोतृ° Ca. स्तोत्र° A.

P. 655. l. 17. (VI. 18, 8.) The Pada has च्यौत्न्याय; the Sanhitás and Commentary च्यौत्नाय.

P. 656. l. 9. (VI. 18, 9.) जहि Ca. B.; deest in A. वेधकर्मा Ca. गीतिकर्मा A.; deest in B.

P. 656. l. 16. (VI. 18, 10.) यथाग्निः from B. तथाग्निः Ca.

P. 656. l. 20. (VI. 18, 10.) अध्वनयत् युद्धे गर्जनलक्षणं शब्दं A. अध्वनयतात्युद्वेगलक्षणं गर्जनं Ca. अध्वनयत् उद्वेगलक्षणं गर्जनं B.

P. 657. l. 5. (VI. 18, 11.) बहुभिः बहुबलैः A. In Ca. all is left out after तुविवाजेभिः to आहूतेंद्र. B. has बहुबैः यजमानैः हे पुरुहूत बहुभिः आहूतेंद्र.

P. 657. l. 7. (VI. 18, 11.) अदेवो ॥ अदेवश्चित् A. Ca. अदेवः कश्चित् B.

P. 659. l. 21. (VI. 19, 1.) अहिंसनीयः A. अहिंसितो यः B. Ca.

P. 660. l. 6. (VI. 19, 2.) अवर्धयत A. वर्धते B. वर्धयते Ca.

P. 660. l. 25. (VI. 19, 4.) अनवद्याः पापरहिताः A. अनवद्याः अवद्यरहिताः Ca. अनवद्यरहिताः B.

P. 661. l. 9. (VI. 19, 5.) पथ्याः स्तोतॄणां हि रायो A. पथ्या तोमणाहितानि रायो Ca. पथ्या तोषणहितानि रायो B.

P. 665. l. 22. (VI. 20, 3.) पुरीणां A. असुरपुरीणां Ca. असुराणां पुरीणां B.

P. 666. l. 6. (VI. 20, 4.) अथतेस्तर्पणार्थाच्छंदो णिर्हिंवः Ca. after दशोण्ये.

P. 666. l. 9. (VI. 20, 4.) Ca. has पद्यते दं रूपं after पलायंत.

P. 666. l. 20. (VI. 20, 5.) सारथिसूताय Ca. सुताय B. सारथिभूताय A.

P. 668. l. 4. (VI. 20, 8.) °वंधनं ॥ °वचनं A. B. Ca.

P. 669. l. 11. (VI. 20, 11.) शत्रुभिः B. शत्रूणां A. Ca.

P. 669. l. 26. (VI. 20, 13.) सुन्वन्दभी° S. 1. P. 2. सुन्वद्भी S. 2. सुन्वत् P. 1.

P. 670. l. 7. (VI. 20, 13.) पक्तवान् ॥ पचनवान् A. B. Ca.

P. 671. l. 16. (VI. 21, 3.) प्रकाशयत् from B. Ca.

P. 673. l. 11. (VI. 21, 7.) स्थिरो A. B. Ca.

P. 673. l. 21. (VI. 21, 8.) अभिकामने A. अभिकामचरे Ca.

P. 674. l. 6. (VI. 21, 9.) पुरुधियं ॥ पुरंधियं A.; deest in B. Ca.: cf. Rv. I. 116, 13.

P. 676. l. 11. (VI. 22, 2.) The commentary to this verse is left out in A. Paris, C. Mill, and added at a later time in A. Colebr., apparently from Ca. The same happens in VI. 22, 9.

P. 676. l. 25. (VI. 22, 3.) जराहानिसहितः A. जरारहितः B. Ca.

P. 678. l. 6. (VI. 22, 6.) अनेन B. Ca. अयांनेन A., which omits अयानया before मायया.

P. 679. l. 2. (VI. 22, 8.) A. reads अंतरिक्ष्या. B. Ca. and all the MSS. of the text have अंतरिक्षा.

P. 679. l. 22. (VI. 22, 10.) संयती ॥ संयति A. संचनी Ca.

P. 680. l. 9. (VI. 22, 11.) अध्रागमस्य ॥ मध्रागमनस्य A. मध्र१द्रिगिति गिति Ca.

P. 680. l. 21. (VI. 23, 1.) महति added from B. Ca., which leave out बृहति.

P. 681. l. 12. (VI. 23, 2.) अपारयः ॥ यपरयः A. pr. man. येरयः sec. man. चेरयः Ca.

P. 683. l. 14. (VI. 23, 7.) अभिविश A. उपविश B. Ca.

P. 683. l. 24. (VI. 23, 8.) प्राशुवंतु ॥ left out in A. B. Ca.

P. 683. l. 25. (VI. 23, 8.) प्राशुवंतु after स्तोत्राणि B. Ca. आयम्याः आगच्छंतु A.

P. 684. l. 16. (VI. 23, 10.) यः जयदीश्वरो B. य इश्वतः । ईश्वर Ca. जय ईश्वरो A. All the MSS. of the text have जयत्.

P. 686. l. 2. (VI. 24, 3.) अतिरिच्यते B. Ca. प्ररिरिच्यते A.

P. 686. l. 11. (VI. 24, 4.) बहुकर्मन् A. बहुशक्तिन् B. Ca.

P. 686. l. 13. (VI. 24, 4.) यथा by conjecture.

P. 686. l. 14. (VI. 24, 4.) यत्र नियतैः ॥ यत्र नियतेः Ca. B. यस्य नियते A.

P. 686. l. 15. (VI. 24, 4.) सुदामन् सुष्ठु शत्रूणां बंधक B., proprio motu.

P. 687. l. 5. (VI. 24, 5.) मित्रादयोऽप्यत्र स्व A. मित्रादयोऽप्यस्य Ca.

P. 688. l. 11. (VI. 24, 8.) बहुगुणाः A. बहुगणाः Ca.

P. 688. l. 12. (VI. 24, 8.) सुगमनाः A. sec. man. असुगमनाः pr. man. असुरागमनाः B. Ca.

P. 690. l. 13. (VI. 25, 3.) हीनानि A. दीनानि B. Ca.

P. 691. l. 23. (VI. 25, 6.) व्यचस्वंतौ उद्योगवंतौ B.

P. 693. l. 8. (VI. 25, 9.) ते गृणंतः B. त्व त्वः ॥ गृणंतः Ca. ते त्वाः गृणंतः A.

P. 694. l. 8. (VI. 26, 2.) प्रतिभालयते Ca. प्रतिपालयत A.; deest in B.

P. 695. l. 12. (VI. 26, 5.) यत् is not explained in A. B. Ca.

P. 696. l. 21. (VI. 26, 8.) प्रतर्दनो Ca. प्रातर्दनो A. B.

P. 698. l. 16. (VI. 27, 4.) तस्य शेषः B. Ca.

P. 698. l. 18. (VI. 27, 4.) यत् before यस्मात् deest in A. Ca. इत् युष्मात् यस्मात् बलात् B.

P. 699. l. 5. (VI. 27, 5.) प्राग्भागे A. पूर्वभागे B. Ca.

P. 701. l. 4. (VI. 28, 1.) प्रजावतीः प्रजावत्यः संततिसहिताः पूर्वीः बह्वयः इंद्राय इंद्रार्थं उषः उषः कालान् प्रति दुहानाः दोग्ध्र्यः स्युर्भवेयुः B. प्रजावतीः प्रजावत्यः संततिसहिताः स्युर्भवेयुः Ca. प्रजावतीः प्रजारदोहमाना भवेयुः A. pr. man. प्रजावतीः प्रजावत्यः सहिताः दो° A. in marg.

P. 701. l. 12. (VI. 28, 2.) अपि तु A. अपि च B. Ca.

P. 702. l. 11. (VI. 28, 4.) रेणोः B. Ca. रेणुकस्य रेणोः A.

P. 702. l. 14. (VI. 28, 4.) प्रदेश B. प्रवेश A. Ca.

P. 702. l. 21. (VI. 28, 5.) छदेरिदं रूपं Ca. after यच्छतु.

P. 702. l. 23. (VI. 28, 5.) संश्रयणत्वात् A. संस्क्रियमाणत्वात् B. Ca.

P. 703. l. 6. (VI. 28, 6.) स्नेहयथ after मेदयथ B. Ca.

P. 703. l. 6. (VI. 28, 6.) आप्यायनं B. Ca. आप्यायं A.

P. 703. l. 9. (VI. 28, 6.) यागपरिषत्सु A. गपरिषत्सु Ca. परिषत्सु B.

P. 703. l. 9. (VI. 28, 6.) सर्वैर्दीयेत A. Ca. सर्वै दीयेत B.

P. 703. l. 15. (VI. 28, 7.) भवतेति ॥ भवतीति A. B. Ca.

P. 703. l. 19. (VI. 28, 7.) मा परिवृज्याः and न परिहरतु A.

P. 705. l. 14. (VI. 29, 2.) व्यत्ययेन Ca. after हस्ते, and A. Colebr. in the margin.

P. 705. l. 15. (VI. 29, 2.) वर्तमाना etc. ॥ वर्तमानान् रातयः Ca. वर्तमानान् हिता रायः A.

P. 705. l. 18. (VI. 29, 2.) अभिवपेति ॥ अभिवर्षेति A. अभिवर्षयति Ca.

P. 705. l. 20. (VI. 29, 2.) आयम्यंते A. आश्रीयंते Ca. आमिमिक्षुः B.

P. 707. l. 16. (VI. 29, 6.) हिनस्तु A. हंतु B. Ca.

P. 710. l. 4. (VI. 31, 1.) पृष्टस्य ॥ पृष्ट A. Ca.

P. 711. l. 9. (VI. 31, 3.) युध्यमानं B. Ca. after कुत्सेन.

P. 713. l. 10. (VI. 32, 2.) वलेन स्थापितं पर्वतं A. बिलेन स्थापितं Ca. बिले स्थापितं B.

P. 713. l. 13. (VI. 32, 2.) गृणानः स्तूयमानः is inserted in B. after अंगिरोभिः.

P. 713. l. 13. (VI. 32, 2.) वलस्य भृत्यैः A. वलवद्भिः Ca.; left out in B.

P. 714. l. 9. (VI. 32, 4.) प्रजाभिः B. °वेहवाभि A. यहवाभि Ca.

P. 715. l. 20. (VI. 33, 2.) अस्वापयः after अशापयः Ca.

P. 716. l. 1. (VI. 33, 3.) तान्वस्यमाणानुभयान् B. Ca.

P. 716. l. 1. (VI. 33, 3.) द्विप्रकाराम् after उभयविधान् Ca.

P. 717. l. 1. (VI. 33, 5.) गोषतमाः is not explained in A. गवां साकृततमाः B. गवां सकृतसाः Ca. गवां संभक्ततमा ?

P. 718. l. 9. (VI. 34, 3.) भृशं स्विद्यते A. शक्यते Ca.; deest in B.

P. 718. l. 11. (VI. 34, 3.) वर्धयंत्यो from B.

P. 719. l. 1. (VI. 34, 4.) Sáyaṇa takes सं यत् as a participle from सं इ.

P. 720. l. 8. (VI. 35, 2.) Ca. omits all from संश्लेषये: to संग्रामान्. B. gives a different explanation, नीयासे संहर त्वं आजीन्.

P. 720. l. 21. (VI. 35, 3.) आत्मनि योजये: B. Ca. आत्मना नियोजये: A.

P. 721. l. 3. (VI. 35, 4.) आह्लादयंती: A. आह्लादिता: B. Ca.

P. 722. l. 17 and 19. (VI. 36, 2.) वृंजंति S. 1, S. 3. sec. man., Pada 2. वृणंति P. 1, S. 2, S. 3. pr. man.

P. 724. l. 18. (VI. 37, 1.) स सुष्ठु वरणीयं A. B. Ca. सुष्ठुवरणीयं is the usual explanation.

P. 724. l. 19. (VI. 37, 1.) गुणजातं B. Ca. जातं A.

P. 725. l. 17. (VI. 37, 3.) पुरैव ॥ पुत्रैव A. The passage is left out in Ca. B. supplies the omission by कीदृशा अश्याः वायोः विदस्येत् वायोर्गमनमति कामत् यथा तथा गच्छत ।.

P. 726. l. 2. (VI. 37, 4.) विनाशयसि from B. Ca.

P. 729. l. 1. (VI. 39, 1.) सेव्यस्य from B. Ca.

P. 731. l. 14. (VI. 40, 2.) Áśvaláyana gives the whole Páda (अस्य to इंद्र).

P. 731. l. 23. (VI. 40, 2.) अपण° Ca. अयण° A.

P. 732. l. 6. (VI. 40, 3.) सम्यगिंधनैः Ca. before दीप्ते.

P. 732. l. 25. (VI. 40, 5.) पारगे A. Ca. परगे B. पारणे ?

P. 735. l. 12. (VI. 41, 5.) प्रजासु from B.

P. 736. l. 13. (VI. 42, 2.) ऋजिर्गत्यर्थः । तद्भावसाधन ॥ ऋजेर्गत्यर्थः । तभावसाधना । Ca. ऋजेर्गत्यर्थाभावसाधन A. ऋजेर्गत्यर्थात् भावसाधन ऋजीषशब्दः B.

P. 736. l. 15. (VI. 42, 2.) अन्य आह A. अन्यथाहा Ca.

P. 738. l. 6. (VI. 43, 3.) Ca. gives as the beginning of this verse, अथ तृतीया । यस्य गा अंतरिति ।; but this is followed by the commentary to the 4th verse: exactly the same occurs in B.

P. 740. l. 12. (VI. 44, 4.) अनुग्राहकं A. अनुग्रहकं Ca.

P. 741. l. 5. (VI. 44, 6.) विस्तारयेत A. B. विस्तर्य Ca.

P. 741. l. 7. (VI. 44, 6.) यस्मिंसेंद्रे ॥ यस्मिन् सेंद्रे A. यस्मिन्निंद्रे B. Ca.

P. 742. l. 4. (VI. 44, 8.) आत्मीयं B. आत्मीयं च A. आत्मीयं व Ca. From this verse B. gives again the complete commentary; agreeing, as formerly, more with A. than Ca. The Viniyogas, however, are omitted.

P. 749. l. 14. (VI. 44, 24.) हेतुगर्भवि° A. हेतुगर्भवि° B. गर्भहेतुर्वि° Ca.: cf. Sáyaṇa VIII. 2, 5 and 7.

P. 749. l. 24. The Sanhitás contain at the end of the 44th hymn (Asht. IV. 7, 20.) the following Khila:

चक्षुश्च श्रोत्रं च मनश्च वाक् प्राणापानौ देह इदं शरीरं ।
द्वौ प्रत्यंचावनुलोमौ विसर्गावेतं तं मन्ये[a] दशयंत्रमुत्सं ॥ १ ॥
उरश्च पृष्ठश्च[b] करौ च बाहू जंघे चोरू उदरं शिरश्च ।
रोमाणि[c] मांसं रुधिरास्थिमज्जमेतच्छरीरं जलबुद्बुदोपमं ॥ २ ॥[d]
भ्रुवौ ललाटे च तथा च कर्णौ हनू[e] कपोलौ छुबुकस्तथा[f] च ।
ओष्ठौ च दंताश्च तथैव जिह्वा मे तच्छरीरं मुखरत्नकोशं ॥ ३ ॥

P. 749. l. 26. (VI. 45, 1.) अतिनिवृत् A. Ca. अतिनिचृत् B. Ibidem, पादनिचृत् A. B. Ca. अतिनिवृत् B. Ca. °चृ° A. The Anukramaṇí has चृ°.

P. 751. l. 19. (VI. 45, 6.) अस्मभ्यं ॥ अस्मान् A. B. Ca.

P. 753. l. 14. (VI. 45, 13.) तंतस ॥ तंतसाय्य A. तंसाय B. तस Ca.: cf. Rv. VI. 18, 6.

P. 756. l. 6. (VI. 45, 23.) सीमयं ॥ सीमं A. सी B.; left out in Ca.

P. 757. l. 4. (VI. 45, 26.) मापयितुं A. Ca. नाशयितुं B.

P. 757. l. 26. (VI. 45, 29.) त्वां from B.

P. 758. l. 10. (VI. 45, 31.) Ca. has in the margin, written by a later hand, बृबुर्नाम राजर्षिः काष्ठछित् ।. A. Colebr. also has in the margin राजर्षिः, marked to be inserted after नाम. The Calcutta edition of Manu reads भृधु instead of बृबु; विजने instead of निजने; and महातपाः instead of महायशाः.

P. 758. l. 13. (VI. 45, 31.) कूले Ca. A. कुले B. जातितो A. B. ज्ञानतो Ca.

P. 759. l. 1. (VI. 45, 33.) तन्नं ॥ तत् B. A. नूनं Ca.

P. 759. l. 4. (VI. 45, 33.) धनस्य घा A.; deest in Ca. धनस्य वादौ B.

P. 759. l. 24. (VI. 46, 1.) यत्नाश्वः ॥ यथाश्वः A. B. अश्वः Ca.

P. 762. l. 20. (VI. 46, 8.) राजनि A. B. जने Ca.

P. 763. l. 9. (VI. 46, 9.) शत्रुप्रेरितं ॥ सर्वप्रेरितुं प A. सर्वर्षिप्रेरितं B. प्रेरिशकृमत् Ca.

P. 763. l. 19. (VI. 46, 10.) संतमो संतिमो Ca.

P. 764. l. 2. (VI. 46, 11.) यद्यदा before पर्याैन: A. B. Ca.

P. 764. l. 23. (VI. 46, 13.) महतो धनस्य from Ca.

P. 764. l. 24. (VI. 46, 13.) प्रेरये: A. प्रेरयसि Ca.; wanting in B. Again, in the next

[a] त्वं मन्ये all, except S. 3. [b] पृष्ठीश्च S. 2. [c] लोमानि S. 3. [d] In S. 3. the order of these two verses is inverted. [e] हनुः S. 1. [f] चुबुकः S. 3.

verse B. has प्रेरये: corrected to प्रेरयसि, and the second time प्रेरयसि. A. has प्रेरये: and प्रेरयसि; Ca. प्रेरयसे and प्रेरयसि ।.

P. 765. l. 12. (VI. 46, 14.) ग्रहीतव्ये A. गृहीते Ca. गृभीता गृभीते B.

P. 768. l. 19. (VI. 47, 6.) सर्वैंद्रं हि A. B 1. सं चं हि Ca. पूरयस्व ऐंद्रं हि.

P. 771. l. 11. (VI. 47, 12.) अभयरहितं A. Ca.; wanting in B.; probably to be corrected into °रहितत्वं ।.

P. 772. l. 8. (VI. 47, 14.) अपणार्थान् ॥ अयणार्थान् A. B. Ca., and again अयणाद्रव्यैः A. B. Ca.

P. 773. l. 8. (VI. 47, 16.) पूर्वमपरं ॥ पूर्वं ॥ ॥ त इत्येवं B. पूर्वैत इत्येवं A. पूर्वैश्च इत्येवं Ca. पूर्वमपरं is taken from an old fragment of Sáyaṇa's Commentary.

P. 773. l. 9. (VI. 47, 16.) वर्धमानानां from B.

P. 774. l. 4. (VI. 47, 18.) प्रतिनियतदर्शनाय A. नियत° Ca. प्रतिदर्शनाय B.

P. 775. l. 16. (VI. 47, 20.) नोस्मान् (नास्मात् A. Paris and C. Mill) अतः सापिरक्षतु A. अस्मान् अतः ॥ कारणात् हे बृह° etc. Ca.; left out in B.

P. 775. l. 17. (VI. 47, 20.) प्रवेदय: Ca. प्रदेयय A. प्रचोदय B.

P. 778. l. 21. (VI. 47, 28.) शीघ्रगामी ॥ शीघ्रगामिनं A. B. Ca.

P. 779. l. 13. (VI. 47, 29.) वधकर्मणः A. Ca. शब्दकर्मणः B. and Roth's edition.

P. 781. l. 3. (VI. 48, 1.) यवमध्यांत्या A. B. Ca. यवमध्या Anukramaṇí.

P. 781. l. 4. (VI. 48, 1.) तृतीयद्वा° ॥ तृतीया द्वादशका त्र्यष्टकेति A. तृतीयो द्वादशको अष्टकेति B. तृतीयो द्वादशकेति Ca.

P. 785. l. 11. (VI. 48, 8.) कर्तरि ॥ कर्तारं A. B. Ca.

P. 786. l. 15. (VI. 48, 11.) यागाय B. यामाय A. Ca.

P. 788. l. 5. (VI. 48, 15.) पूपणं पोपकं from B.

P. 791. l. 8. (VI. 48, 22.) From सकृत् to सकृत् only in A. Colebr., and partly in B.

P. 791. l. 11. S. 1. has at the end of this hymn the following verse:

यस्तृणैरध्ययनं तदधीतिं स्तृणानि भवते भव ।
वापीकूपतडागानां समुद्रं गच्छ स्वाहा ॥
सूक्तांते स्तृणान्यग्नौ ॥

P. 795. l. 5. (VI. 49, 7.) A. Paris and C. Mill have a lacuna after धर्षितुमश ..ो वृष्या तर्पय at the end of the 11th verse.

P. 795. l. 14. (VI. 49, 8.) वचस्या वचसा Ca.

P. 795. l. 26. (VI. 49, 9.) तत्प्रजायत B. तयत A. तय Ca.

P. 797. l. 1. (VI. 49, 11.) नभस्तलं Ca. नभस्थलं A. B.

P. 797. l. 2. (VI. 49, 11.) देशस्थितं A. देशस्थित: B. Ca.

P. 797. l. 10. (VI. 49, 12.) क्षिप्रगमनाय A. क्षिप्रगामिने B. Ca.

P. 800. l. 17. (VI. 50, 3.) महो महत् ॥ बृहन्महत् A. Ca. महत् B.

P. 801. l. 25. (VI. 50, 6.) प्रदेयात् Ca. प्रदद्यात् B. B 1; left out in A.

P. 803. l. 12. (VI. 50, 10.) परिचरणकैः A. परिचरकैः Ca. परिचारकैः B.

P. 810. l. 12. (VI. 51, 11.) क्षाम निवासभूमिं Ca. क्षां ता निवास तादृशाः भूमिं B. क्षां भमिं A.

P. 811. l. 21. (VI. 51, 14.) अदातारं A. B. आदातारं Ca.

P. 811. l. 22. (VI. 51, 14.) अदानपरः B. आदान A. Ca.

P. 813. l. 2. (VI. 52, 1.) यियक्षुरास ॥ इयक्षुरास B. इयक्षुराह Ca. इयक्षाह A.

P. 813. l. 16. (VI. 52, 2.) स्वस्याधि° ॥ स्वस्वाधि° A. स्वाधि° B. Ca.

P. 814. l. 3. (VI. 52, 3.) द्रुष्यमाणान् Ca. घृष्यमाणान् A. द्रुयमानान् B.

P. 815. l. 18. (VI. 52, 7.) निषण्णा भवत A. उपाविष्टा भवंतु B. निषीदत उपविशत Ca.

P. 816. l. 20. (VI. 52, 12.) यथानुपूर्व्या A. B. Ca.

P. 817. l. 17. (VI. 52, 14.) च्चित्तेन ॥ च्चित्तेव A. B. चित्तेव Ca. च्चितैव ?

P. 818. l. 6. (VI. 52, 15.) माया before प्रज्ञानाम from B.

P. 824. l. 25. (VI. 55, 1.) Ca. has after संगच्छावहै the remark, यद्वा आयामित्यस्याकाराकारलोपे वामिति भवति । आवां सचावहै इति संबंधः ॥

P. 826. l. 7. (VI. 55, 6.) निशृंभाः etc.: cf. Nir. VI. 3.

P. 827. l. 10. (VI. 56, 4.) स्तुतेंद्र A. B.

P. 827. l. 10. (VI. 56, 4.) यदुद्दिश्य Ca. यमुद्दिश्य A. यत् यमुद्दिश्य B. It was probably यद्धनमुद्दिश्य.

P. 828. l. 2. (VI. 56, 6.) सर्वदा deest in B.

P. 829. l. 4. (VI. 57, 4.) इंद्रः after यद्यदा A. B. Ca.

P. 829. l. 10. (VI. 57, 5.) इंद्रस्य after देवस्य by conjecture. B. inserts it at the beginning of the verse.

P. 829. l. 18. (VI. 57, 6.) यथा before आकर्षति by conjecture.

P. 829. l. 22. (VI. 58, 1.) वैश्वदेवस्य A. पौष्णस्य Ca.

P. 830. l. 8. (VI. 58, 1.) प्रकाशेन ॥ प्रकाशन Ca. प्रकाशे A. B.

P. 830. l. 10. (VI. 58, 1.) एकं after अन्यत् by conjecture. The passage is left out in B. Ca.

P. 830. l. 15. (VI. 58, 1.) पूषन् after अन्नवन् from Ca.

P. 830. l. 17. (VI. 58, 1.) यज्ञियं ते अन्यदयज्ञियं ते अन्यदिति वा A. Ca. यजतं ते अन्यद्यज्ञियं ते अन्यत् B. and Roth's edition.

P. 830. l. 18. (VI. 58, 1.) कर्मणी A. B. Ca. कर्मे Roth's edition.

P. 831. l. 15. (VI. 58, 3.) प्राहैषीत् ॥ प्राहोषीत् A. B. Ca., a common mistake of the MSS., which must be corrected also in vol. I. p. 477. l. 20. and p. 919. l. 16.

P. 831. l. 17. (VI. 58, 3.) Sáyaṇa mistook the voc. कृत for the nom. कृतः.

P. 832. l. 1. (VI. 58, 4.) अस्मिनो वरुणादयो Ca.

P. 833. l. 4. (VI. 59, 2.) श्रूयते Ca. स्तूयते A. B.

P. 833. l. 10. (VI. 59, 3.) संगतौ after समवेतौ from B. Ca.

P. 833. l. 22. (VI. 59, 4.) वाकं only in A., and struck out by a later hand in A. Colebr.

P. 833. l. 22. (VI. 59, 4.) जोषं after प्रीतिकरं repeated in A. B. Ca.

P. 833. l. 24. (VI. 59, 4.) भक्षयथ: Ca. भक्षथः B. भजथः A.

P. 833. l. 25. (VI. 59, 4.) The passage from Yáska is left out in B.; Ca. concludes with सुतेष्वित्यादि.

P. 834. l. 1. (VI. 59, 4.) तेभ्यृतस्य वर्धयितारौ न A.; not in Roth's edition,

P. 834. l. 1. (VI. 59, 4.) योऽयं ॥ अथ योऽयं Roth's edition. जोयं A.

P. 834. l. 12. (VI. 59, 5.) Some substantive is required after व्यापकान्; it was probably दिवसान्.

P. 836. l. 26. (VI. 60, 1.) वसुसमूहस्य from Ca. वासयितव्यस्य B.; deest in A.

P. 841. l. 24. (VI. 61, 1.) The Rig-vidhána reads द्विजः। नित्यं जपेत्।.

P. 842. l. 23. (VI. 61, 2.) पारावैाची A. पाराची Ca.; not in B., where the latter part of the verse is left out.

P. 843. l. 13. (VI. 61, 4.) क्रियायां from B.

P. 844. l. 19. (VI. 61, 9.) Ca. has ऋतावरी उदकवती at the beginning of the verse, but omits from तथा to अतिनयतु. A. and B. read ऋतावरीः, against the text.

P. 844. l. 20. (VI. 61, 9.) छंदसीति Ca. छांदसः A. B.

P. 844. l. 21. (VI. 61, 9.) अतिनयतु B. अभि नयतु A.

B., as before, gives only an extract of the commentary from the beginning of the 5th Ashṭaka. B 1., however, is more complete; and as the two MSS. begin to differ, the various readings of each have been noted, where they seemed to be of importance.

P. 847. l. 17. (VI. 62, 1.) प्रसंतौ ॥ प्रसनवंतौ A. B. Ca. प्रसवंतौ B 1.

P. 847. l. 18. (VI. 62, 1.) अग्नेरन्वितौ ॥ अग्निनौ (twice) अग्नेरन्वितौ A. Paris and C. Mill. अग्नेरग्निनौ A.; not in B 1. B 4. Ca.

P. 847. l. 18. (VI. 62, 1.) अर्चनीयमंत्रसाध्यैः A. मंत्रसाध्यैः B. अप्रगीतमंत्र° साध्यैः Ca. B 1.

P. 848. l. 2. (VI. 62, 1.) तमोनिवारणात् परियु° ॥ तमोनिवारणात् पर्युयू° Ca. °णान्पर्युयू° A.

P. 849. l. 13. (VI. 62, 5.) शस्त्रैः B. Ca. शस्त्रेण B 1.

P. 849. l. 16. (VI. 62, 5.) वलनशीलौ ॥ वला or वल्ग Ca. वल A.; deest in B 4. वल्गन or वलान B 1.

P. 851. l. 10. (VI. 62, 9.) मध्यम Ca. sec. man. उत्तम A. Ca. B 1.

P. 851. l. 11. (VI. 62, 9.) ननु before मनुष्याणां A. and Ca. margin; not in A. Paris and C. Mill. न तु B 1. द्रोहायैनमा° Ca. B 1. द्रोहायैचमा° A.

P. 853. l. 6. (VI. 63, 2.) The words from रिपो to अस्मदीयं, with the exception of गृहं before रिपो, which is given by conjecture, are taken from Ca. B 1. has the same as far as अंतरः; but omits the rest, तथा रक्षां.

P. 853. l. 17. (VI. 63, 3.) तृक्ष पृक्ष नक्ष Ca. A. Paris and C. Mill. तृक्ष नक्ष A. नक्ष पृक्ष नक्ष नक्ष B 1.

P. 854. l. 10. (VI. 63, 5.) श्रयितुं A. श्रयंथै Ca. श्रेयोर्थं B. श्रयं B 1.

P. 855. l. 1. (VI. 63, 6.) अन्वपतन् B 1. अनुपतन् A. B. Ca.

P. 856. l. 6. (VI. 63, 9.) पुरुषान्वयानश्वान्वा Ca. B 1. and A. P. रयानश्वान्वा A.; left out in B 4.

P. 856. l. 7. (VI. 63, 9.) अनुगुणाः A. Ca. B 1. अनुगुणान् B 4.

P. 862. l. 13. (VI. 66, 1.) रूपं and विदुषे from A. Paris and C. Mill. वसुरूतं चिकितुषे श्लोके B 1.

P. 863. l. 7. (VI. 66, 3.) सर्वज्ञात ॥ सर्वज्ञाते A. Ca. B 1. B 4.

P. 863. l. 9. (VI. 66, 3.) भवनाय B 1. सवनाय A. Ca. B 4.

P. 864. l. 3. (VI. 66, 5.) उच्चारयंत: A. B. Ca. धारयंत: A. P. and C. Mill.

P. 865. l. 13. (VI. 66, 8.) दीप्तस्यापि A. P. and C. Mill. दीप्तस्यापा A. pr. man. दीप्तस्या A. sec. man. द्योत दीप्तस्य B 1. दीप्तस्यास्या Ca. दीप्तस्यास्य B 4.

P. 866. l. 1. (VI. 66, 9.) य ॥ इव A. Ca. इयात् A. P. and C. Mill. इम B 1.

P. 866. l. 2. (VI. 66, 9.) राजपुरुष ॥ राज्ञ: पुरुष A., A. P., C. Mill, Ca. B 1.; deest in B 4.

P. 866. l. 16. (VI. 66, 11.) भाजमानचाहिं । भाजमानायुधं B 4.

P. 868. l. 4. (VI. 67, 3.) वा after स्तूयमानौ A. Ca. B 1.

P. 868. l. 15. (VI. 67, 4.) प्रभूतौ B. प्रभूतांतौ A. Ca.

P. 870. l. 16. (VI. 67, 9.) यज्ञेऽयजंतो जना: A. P., C. Mill. यज्ञे यज: A. यज्ञ यज: Ca. यज्ञे B 4. यत् ये यज्ञ B 1.

P. 870. l. 18. (VI. 67, 9.) न यज्ञयुक्ता: B 4. यज्ञयुक्ता न A. Ca. B 1.

P. 870. l. 19. (VI. 67, 9.) पुनंतीति पुत्रा: । न पुत्रा अपुत्रा इत्यर्थ: । A. Paris.

P. 872. l. 11. (VI. 68, 2.) Four leaves are wanting in A. Colebrooke. The lacuna extends from this verse to VII. 1, 2. Consequently for this part A. is represented only by A. Paris and C. Mill.

P. 873. l. 14. (VI. 68, 4.) स्तुतिभिर्वर्धयंते B. Ca. स्तुत्या वर्धते वर्धयंति A. P.; left out in C. Mill.

P. 874. l. 1. (VI. 68, 5.) प्राप्येत् A. P., C. Mill. प्राप्येत Ca. B 4. प्राप्यते B 1.

P. 875. l. 13. (VI. 68, 9.) सम्राजे आज्ञया राज्ञां शासकाय B. Ca. सम्राजोप्याज्ञां शंसकाय A. P., C. Mill.

P. 875. l. 16. (VI. 68, 9.) शोचिषा तेजसा युक्त: A. P., C. Mill. B. Ca., omitting this, have शोचिषा दीप्त्या after द्यावापृथिव्यौ.

P. 876. l. 12. (VI. 68, 11.) पात्रेषु B. Ca. पाने A. P., C. Mill.

P. 876. l. 18. (VI. 69, 1.) गाणगारिर्दैवत° ॥ गाणगारे देवत° Ca. गणागारिदेवत° A. P., C. Mill. गाणगारिर्दैवत° Ásvaláyana. गाणगारिदेवता° B 1.

P. 877. l. 4. (VI. 69, 1.) कर्मणो left out in B. Ca.

P. 877. l. 4. (VI. 69, 1.) सेवेथां ॥ सेवयेथां A. P., C. Mill; left out in B. Ca.

P. 878. l. 19. (VI. 69, 5.) विचक्रमाथे not in B. Ca.

P. 879. l. 7. (VI. 69, 6.) सोमनिधान: ॥ सोमाभिधान: A. P., C. Mill. सोमाभिधाना: B 1.; deest in B 4. Ca.

P. 879. l. 13. (VI. 69, 7.) मध्वोऽस्य मदकरं सोमं सोमस्य सोमं A. P., C. Mill. अस्य सोमस्य इमं सोमं मध्व: मधुरं Ca. in marg. मध्व: मधुरस्य मधुरं अस्य सोमस्य इमं सोमं B 4. The whole passage omitted in B 1.

P. 880. l. 13. (VI. 70, 1.) The Sútra is omitted in A. P., C. Mill, B 1. Ca. It stands in Ásvaláyana, Srauta-Sútra, IX. 5.: घृतवती भुवनानामभिश्रियेंद्र ऋभुभिर्वाजवद्भि: etc.

P. 881. l. 1. (VI. 70, 1.) धारकेन B. Ca. धारकेन A. P., C. Mill.

P. 881. l. 2. (VI. 70, 1.) बहुकार्ये वा भवत: B 1. Ca. बहुकार्येति भाव: A. P., C. Mill.

P. 882. l. 14. (VI. 70, 4.) याग: प्रवर्तते A. P., C. Mill. यागा: प्रवर्तते B. Ca.

P. 882. l. 21. (VI. 70, 5.) उदकार्यकर्माणौ Ca. B 4. उदककार्ये कर्माणौ A. P., C. Mill. उदकार्ये कर्माणौ B 1.

P. 883. l. 10. (VI. 70, 6.) विश्वशंभुवा सर्वस्य भावयित्र्यौ from B 4.

P. 883. l. 18. (VI. 71, 1.) इमनूतिष्ठेत् is wanting in Ásvaláyana MS.

P. 884. l. 4. (VI. 71, 1.) सवनाय सुवनाय etc. ॥ सवनाय सवनाय सवनाय दानाय वा A. P. सवनाय सवनाय दानाय वा C. Mill. सवनाय दानाय वा B 1. Ca. सवनाय दानाय B 4. It might have been सवनाय सुवनाय प्रेरणाय दानाय वा.

P. 884. l. 21. (VI. 71, 3.) सुखकारिभिः A: P. सुखकैः B. Ca.; left out in C. Mill.

P. 885. l. 2. (VI. 71, 3.) शत्रुः taken from B. Ca. नोऽस्माकं is repeated before मार्किः in A. P., C. Mill, Ca. B 1.

P. 886. l. 4. (VI. 71, 6.) किंच बहूक्त्या। Ca. A. B 1. किं बहुना B 4.

P. 886. l. 18. (VI. 72, 1.) अलंभयतं च जनान् ॥ अलभयतं वा जानान् अलभयंतं वा जनात् Ca. अलभयतं B 4. अलभयत वा जनान् B 1.

P. 887. l. 1. (VI. 72, 2.) व्युच्छंती ॥ व्युछंती व्युछवं Ca. व्यूछंती व्यंछतं B.

P. 888. l. 8. (VI. 72, 5.) शत्रुसैन्याभिभावुकं from B 4.

P. 888. l. 15. (VI. 73, 1.) Some words are left out after इति, which are to be supplied in this manner: स्विष्टकृतोऽनुवाक्या। मूलितं च। बृहस्पतिः समजयद्वसूनि. Cf. VII. 11, 2.

P. 889. l. 23. (VI. 73, 3.) संभक्तुकामः ॥ संभक्तकामः A. P., C. Mill. संभक्तुमिच्छन् Ca. B 4. संभक्तमिच्छन् B 1.

P. 891. l. 5. (VI. 74, 3.) शिथिलबंधं ॥ शिथिलं बंधं A. P., C. Mill. शिथिलबद्धं B 1. Ca.

P. 892. l. 3. (VI. 75, 1.) इषुस्तुतिरूपत्वात् etc. Ca. इषुस्तुरूपनिंमित्तदेवताके A. P., C. Mill. इषुस्तुतिपुरूपत्वात् B 1.

P. 894. l. 1. (VI. 75, 4.) समनस्केव from B. Ca. इव stands for यथा, otherwise we might write यजंती.

P. 894. l. 4. (VI. 75, 4.) चुर्येगिभ्यां निः Ca. चुर्ध्येगिभ्यां चिः A. P., C. Mill; omitted in B 1. The Sútra is not to be found in the Uṇádi-sútra, where चूर्णि and अग्नि are formed by a different rule.

P. 896. l. 24. (VI. 75, 10.) मेह ॥ मा रिष्टा A. P., C. Mill. माई B 4. मा इशिष Ca. B

P. 897. l. 18. (VI. 75, 11.) शर्मे शरणं प्रयच्छंतु A. शर्मे यच्छंतु Ca. शर्मे यच्छंति B 1.

P. 897. l. 25. (VI. 75, 12.) दृढा from B. Ca.

P. 900. l. 8. (VI. 75, 18.) उरुतरं ॥ उरु तुभ्यं A. P., C. Mill, Ca. उरु B.

My copy of the Paris MS. terminates with the sixth Maṇḍala.

Maṇḍala VII.

P. 901. l. 1. (VII. 1, 1.) The introduction and the commentary to the first verse are given from B 1. Ca. and C. Mill.

P. 901. l. 12. (VII. 1, 1.) Before प्रातरनुवाके, Ca. reads अविवाहनु. The whole passage omitted in C. Mill. Sáyaṇa may have written अविवाक्येऽहनि, which, as I observed too late, is a reading supported by the authority of Dr. Stephenson's MS.

P. 902. l. 7. (VII. 1, 1.) आगम्यगमनमेतं वा ॥ आगम्य तमनं वा Ca. B 1. अगम्यमतमनं वा C. Mill. गम्यं B 4.

P. 902. l. 8. (VII. 1, 1.) इस्तप्रच्युता इस्तगता Ca. B 1. इस्ते च्युता इस्ते गता C. Mill. इस्तच्युता B 4.

P. 906. l. 11. (VII. 1, 13.) अप्रीतिविषयात् A., C. Mill, C. Wilson. अप्रति° B. Ca.

P. 907. l. 6. (VII. 1, 15.) A. Ca. B 1. have सेदग्नियों after प्रबोधकं. B 4. places समेद्धारं प्रबोधकं after श्रोतार.

P. 908. l. 6. (VII. 1, 18.) अनवरतः B 1. अनववरतः A. अनववतरः Ca. अनवतरः B 4. अनवरत C. Mill.

P. 909. l. 2. (VII. 1, 20.) अथवा B 1. यथा वा A. Ca.; deest in B.

P. 909. l. 3. (VII. 1, 20.) त्वं before त्वत्परि° by conjecture. See, however, VII. 3, 10. VII. 7, 7.

P. 909. l. 4. (VII. 1, 20.) अभिनाश° B 1. A. Ca. अभिनाशि° Yáska.

P. 909. l. 16. (VII. 1, 21.) मोपक्षीयात ॥ नोपक्षीयत A. मापक्षीयतां B 4. मोपक्षीयंत Ca., C. Mill. मोपक्षीयते B 1.

P. 909. l. 25. (VII. 1, 22.) निग्रह° C. Mill, B. Ca. विग्रह° A.

P. 910. l. 10. (VII. 1, 23.) क्लास्ते B 4. कास्त A. Ca. B 1.

P. 911. l. 14. (VII. 2, 1.) पशाविशाविदं ॥ साविशाविदं A. Ca. सोविशाविदं B 1.

P. 912. l. 2. (VII. 2, 1.) देशं is left out after समुच्छ्रितं in A. B. C.

P. 912. l. 10. (VII. 2, 2.) सौमिका हविःसंस्थादीनि च C. Mill, C. Wilson. सौमिकानि इतराणि च B 1. सौमिकानि च A. Ca. इतराणि सौमिकानि च B 4.

P. 913. l. 6. (VII. 2, 4.) पादै B 4. पादौ Ca. A. B 1.

P. 914. l. 1. (VII. 2, 6.) दिव्ये दिवि भवे मही महत्यौ from B.

P. 915. l. 2. (VII. 2, 9.) तुरीपं ।. This is the correct reading instead of तुरीयं, as printed by mistake in III. 4, 9. Devarájayajvan explains तुरीपं by तूर्णं व्याप्तं शीलमस्य। पिवतः। तूर्णापि सत् तुरीपं। उदकमभिधेयं।.

P. 915. l. 17. (VII. 2, 10.) जननानि B 4. जानन् A. B 1. जनाना Ca. जनान् C. Mill, C. Wilson.

P. 916. l. 1. (VII. 2, 11.) अस्माकं ॥ अस्मान् A. B. C.

P. 917. l. 18. (VII. 3, 4.) सादति ॥ सादति A. Ca. सीदति B.

P. 918. l. 2. (VII. 3, 5.) आहवनीयायतने ॥ आहवनीयायते A. आहवनीयायेति Ca. आहवनीये C. Mill. आयतने B 4. आहवनीयाततनेये B 1.

P. 919. l. 8. (VII. 3, 8.) रक्षेः ॥ रक्ष A. B. Ca. रक्षाः C. Mill, C. Wilson.

P. 922. l. 7. (VII. 4, 5.) वनिभिश्च ॥ वनिनश्च A. B 1. Ca. वनिनिश्च C. Mill.

P. 922. l. 24. (VII. 4, 7.) परिवत्सं to धनं from B 4. Ca.; deest in A. B 1.

P. 923. l. 23. (VII. 4, 9.) त्वमु to निपाहि from B 4.

P. 925. l. 2. (VII. 5, 2.) वा before वायुधामः by conjecture.

P. 925. l. 9. (VII. 5, 3.) असितपर्णाः ॥ असितकृपर्णाः A. Ca. B.

P. 926. l. 7. (VII. 5, 5.) महांतं A. B. Ca.; deest in C. Mill.

P. 926. l. 8. (VII. 5, 5.) इत्यादि after हरितः A. Ca.; deest in B.

P. 926. l. 19. (VII. 5, 6.) असेवंत ॥ सेवंत A. B. Ca., C. Mill.

P. 927. l. 6. (VII. 5, 7.) कामान् च ॥ कामान्वा A. Ca., C. Mill, B 1. कामान् B 4.

P. 927. l. 15. (VII. 5, 8.) इममं C. Mill, B 1. इममभिमं A. Ca.

P. 929. l. 8. (VII. 6, 3.) वृथा कालस्य नेतॄन् । A. Ca. वृथा कालस्योत्क्षेमॄन् B 4.

P. 929. l. 9. (VII. 6, 3.) अग्निः to चकार from C. Mill; deest in A. Ca. पूर्वैः पुरातनः अग्निः अपरान् पुरुषान् अयज्यून् यागानर्हान् चकार B 4.

P. 930. l. 19. (VII. 6, 7.) आंतरिक्षाणि ॥ अंतरि° A. B. Ca., C. Mill.

P. 931. l. 2. (VII. 7, 1.) दश सूक्तेपूक्तो C. Mill. दशसूक्त उक्तो A. Ca. B 1.

P. 932. l. 7. (VII. 7, 3.) इडायां Ca. इळायां B 4. इजयां A.; deest in C. Mill.

P. 933. l. 12. (VII. 7, 6.) विकस्यंत C. Mill, B 1. विलुप्यंत A. Ca.

P. 933. l. 14. (VII. 7, 6.) मानुषाणां was most likely a mistake in the original MS. of Sáyaṇa. There is no various reading in any MS., but what Sáyaṇa intended to write was मायाणां ।.

P. 934. l. 18. (VII. 8, 2.) दीप्तीः B 1. दीप्तिः A. B. Ca. दीप्तः C. Mill.

P. 941. l. 5. (VII. 10, 5.) सूर्यस्य A. Ca., C. Mill, C. Wilson, B 1; left out in B 4.

P. 943. l. 3. (VII. 11, 5.) किमर्येमि° ॥ किमित्यत A. Ca., C. Mill, B 1.

P. 944. l. 11. (VII. 12, 3.) वर्धति from C. Mill.

P. 946. l. 6. (VII. 15, 1.) प्रायेण सर्वत्र Ca. A.; lacuna in C. Mill, B.

P. 947. l. 6. (VII. 15, 1.) From पावकवंतौ to स्वस्त्यय° from Ca., C. Mill.

P. 947. l. 7. (VII. 15, 1.) भगिनो ॥ भगि Ca. भगा C. Mill.

P. 948. l. 24. (VII. 15, 7.) कल्याणस्तोत्रिकं ।. We should expect कल्याणस्तोतृकं, and this is the reading of one MS. in VII. 15, 8.

P. 949. l. 25. (VII. 15, 11.) नोऽस्माकं repeated after पाठात् in A. C. Ca. B 1; not in B 4.

P. 950. l. 2. (VII. 15, 11.) °भागिनी C. Ca. भागी A. भागि B 1.

P. 952. l. 5. (VII. 16, 2.) वसिष्ठानां B 4. वसिष्ठा A. C. Ca. B 1.

P. 953. l. 8. (VII. 16, 5.) कामयस्व ॥ कामय त्वं A. B. C. कामय च B 1.

P. 953. l. 17. (VII. 16, 6.) यः before सुशंसो by conjecture.

P. 955. l. 13. (VII. 16, 11.) सोमेन पात्रं A. Ca. B. सोमपात्रं B 1. उशिक्षध्वं seems to be taken by Sáyaṇa in the sense of सिंचध्वं or पूरयत.

P. 955. l. 25. (VII. 17, 1.) सप्तापि C. Mill. सप्तदशापि A. Ca. सदा B 1.

P. 956. l. 12. (VII. 17, 2.) यज्ञगृहस्य देव्यो वा A. Ca. B 1. यज्ञस्य गृहस्य देव्यो च C. यज्ञगृहस्य B.

P. 959. l. 22. (VII. 18, 5.) गाधानि तलस्पर्शीनि B.

P. 959. l. 23. (VII. 18, 5.) चोधमानं A. B. C. बाधमानं? cf. Rv. I. 100, 18.

P. 960. l. 6. (VII. 18, 6.) न तु सनातः C. न तु समंत चन A. न तु सतु शंत चाशुत Ca. न तु सनंतः B 1.

P. 960. l. 9. (VII. 18, 6.) नियंत्रिता B. चयंत्रिता A. Ca. चयमंत्रिता B 1. इपयंत्रिता C.

P. 960. l. 12. (VII. 18, 6.) मत्स्यजनपदा Ca. A. । मत्स्या इव जनपदा B 1.

P. 960. l. 21. (VII. 18, 7.) तपोभिः अप्रवृद्धा A. Ca. B i. तपोभि वृद्धा C. तपोभिः प्रवृद्धा B.

P. 961. l. 1. (VII. 18, 7.) अजमम B. C. अजगत् B 1. अजगम् अजगत् Ca. अजगन् अजगम् A.

P. 961. l. 12. (VII. 18, 8.) पालयमान: ॥ पालयमान: A. C. Ca. पलायमान: । B 4. पालयमाना: । B 1.

P. 961. l. 19. (VII. 18, 9.) यथापूर्वं B. C. यथापूर्वं A. Ca.

P. 961. l. 21. (VII. 18, 9.) मयैनगंतव्यं B. मयैं चागंतव्यं A. C. Ca. मयैं चागतंव्यं B 1.

P. 961. l. 24. (VII. 18, 9.) सुतोकान् ॥ सुतोकनामान् A. C. Ca. B 1. सुतु चपमसंयुक्तान् B 4.

P. 962. l. 9. (VII. 18, 10.) निमित्तार्थें B 1. निमित्तार्थे A. निमित्तार्थे Ca. निमित्त C.

P. 962. l. 21. (VII. 18, 11.) युवाध्वर्युरिव etc. ॥ युवाध्वर्युरिव सदन् यज्ञगृहे बर्हिर्यस्मिन्युद्धे शूर etc. A. Ca. B 1. अध्वर्युरिव च यथा सदन् यज्ञगृहे बर्हि: यस्मिन्युद्धे शूर etc. B. यथाध्वार्युरिवा सदनि यज्ञगृहे बर्हि: यस्मिन्युद्धे सपत्नान् नि शिशाति निशातं लुनाति तस्मिन्युद्धे शूर etc. C. Mill, C. Wilson.

P. 964. l. 8. (VII. 18, 15.) चार्थंते B 1. चार्थंते A. B 4. C. Ca.

P. 965. l. 5. (VII. 18, 17.) अश्नीन् ॥ अश्नीन् B. अश्नान् A. C. Ca. B 1.

P. 965. l. 6. (VII. 18, 17.) वेश्यादे: कृत्यसूच्यै चाकरोद A. वेश्यादे: तस्य सूच्येवाकरोद Ca. वेश्यादे: कृत्यसूच्यै दे चाकरोद C. Mill. वेश्यादे: कृत्यं सूच्यैव करोद B 1.; deest in B 4. यूपादे: कृत्यं ?

P. 965. l. 8. (VII. 18, 17.) धनानि deest in A. B 1.

P. 965. l. 16. (VII. 18, 18.) विंद । लभ (it would be better to read लभस्व) यो भेद: ॥ विंद लभ सुवा: etc. B. यद उभयोरभेद: A. Ca. या उभयोरभेद C. विद उभयोरभेदा: B 1.

P. 967. l. 6. (VII. 18, 21.) उपगच्छंति ॥ अपगच्छंति A. C. Ca. अवग° B 1.

P. 967. l. 13. (VII. 18, 22.) इंद्रं ॥ इंद्र: A. B. Ca. इंद्र C.

P. 967. l. 16. (VII. 18, 22.) अतद्देवता° ॥ अतस्तद्देवता° A. Ca. अतदेवता° C. B 1.

P. 967. l. 22. (VII. 18, 23.) प्रशस्तातिसर्जना अश्वादिदानांगयुक्ता: Ca. A. प्रशस्तातिसर्वजनअश्वादिदानांगयुक्ता: C. Mill. प्रशस्तातिसर्जनअथादिकनामांगयुक्ता: B 1.

P. 971. l. 12. (VII. 19, 6.) त्वया दत्तानि A. B 1.

P. 973. l. 3. (VII. 19, 10.) शिव: कल्याण: शूर: B 4.

P. 973. l. 11. (VII. 19, 11.) जाया रक्षणेन after शरीरेण B 4.

ऋग्वेदसंहिता

सायणाचार्यविरचितमाधवीयवेदार्थप्रकाशनामकभाष्यसहिता

शार्मण्यदेशोत्पन्नेनेंगलण्डदेशनिवासिना भट्टमोक्षमूलरेण संशोधिता

श्रीमद्भारतवर्षाधिपतीनामनुमत्या च

उक्षतरणाभिधाननगरे

विद्यामंदिरसंस्थानमुद्रायंत्रालये मुद्रिता

संवत् १९१३ वर्षे

॥ तृतीयाष्टकचतुर्थाध्यायद्वादशवर्गादि पंचमाष्टकद्वितीयाध्यायपर्यंतं ॥

ओं

॥ श्रीगणेशाय नमः ॥

॥ अथ चतुर्थं मंडलं ॥

वामदेव्ये चतुर्थे मंडले पंचानुवाकाः। तत्र प्रथमेऽनुवाके दश सूक्तानि। तेषु त्वां ह्यग्ने सदमिदिति विंशत्यृचं प्रथमं सूक्तं। अत्रेयमनुक्रमणिका। त्वां ह्यग्ने विंशतिरष्ट्यतिजगतीधृतय आद्या उपाद्याश्चतस्रो वाल्यश्च वेति। मंडलद्रष्टा वामदेव ऋषिः। प्रथमा चतुःषष्ट्यक्षराष्टिर्द्वितीया द्विपंचाशदक्षरातिजगती तृतीया द्विसप्तत्यक्षरा धृतिश्चतुर्थ्याद्या अनादेशपरिभाषया सप्तदश त्रिष्टुभः। कृत्स्नस्य सूक्तस्य मंडलादिष्वाग्नेयमिति परिभाषयाग्निर्देवता द्वितीयाद्यास्तिस्रो वरुणदेवत्या वा॥ सूक्तविनियोगो लैंगिकः॥ आद्याध्यायोपाकरणे मंडलादिहोमे विनियुक्ता॥

॥ सैषा सूक्ते प्रथमा॥

त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा न्येरिरे।
अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं जनत प्रचेतसं॥१॥

त्वां। हि। अग्ने। सदं। इत्। सऽमन्यवः। देवासः। देवं। अरतिं। निऽएरिरे। इति। क्रत्वा। निऽएरिरे।
अमर्त्यं। यजत। मर्त्येषु। आ। देवं। आऽदेवं। जनत। प्रऽचेतसं। विश्वं। आऽदेवं। जनत। प्रऽचेतसं॥१॥

वामदेवः स्तौति। हे अग्ने समन्यवः। मन्युः स्पर्धा। तया सह वर्तमानाः। स्वसमानैः स्पर्धमाना इत्यर्थः। देवासो देवनशीला इंद्रादयो देवा देवं द्योतमानमरतिं शीघ्रं गंतारं त्वां सदमित्सदैव न्येरिरे हि। स्पर्धानिमित्ते युद्धे प्रेरयंति खलु। इतिशब्दो हेत्वर्थः। यस्माद्देवास्त्वां युद्धार्थं नितरां प्रेरयंति तस्माद्यजमानाः

ऋत्वा स्तुतिलक्षणेन कर्मणा न्येरिरे । यज्ञकर्मणि देवान्हविः प्रापयितुं देवा-नाह्वातुं च त्वां नितरां प्रेरयंति खलु । यजत यजनीय हे अग्ने अमर्त्यं मरण-धर्मरहितमा सर्वतो देवं द्योतमानं प्रचेतसं । प्रकृष्टं कर्मविषयं चेतो ज्ञानं यस्य ताहशं त्वां मर्त्येषु यागं कुर्वाणेषु मनुष्येष्वादेवमागंतारं जनत । देवा हविःप्र-पणार्थमजनयन् । तथा प्रचेतसं कर्मभिज्ञमादेवं तत्तद्यज्ञेष्वागंतारं त्वां विश्वं जनत । युगपन्नानादेशवर्तिषु यज्ञेषु यौगपद्येन हविरानयनार्थं व्याप्तं देवा अकुर्वन् ॥ न्येरिरे । ईर गतौ । लिटि मंत्रत्वादाम भवति । सहेति योगविभा-गात्समासः । हियोगादनिघातः । ऋत्वा । जसादिषु छंदसि वावचनमिति नादे-शाभावः । यणादेशः ॥

॥ अथ द्वितीया ॥

स भ्रातरं वरुणमग्न आ ववृत्स्व देवाँ अच्छा सुमती यज्ञवनसं ज्येष्ठं यज्ञवनसं ।
ऋतावानमादित्यं चर्षणीधृतं राजानं चर्षणीधृतं ॥ २ ॥

सः । भ्रातरं । वरुणं । अग्ने । आ । ववृत्स्व । देवान् । अच्छ । सुऽमती । यज्ञऽवनसं ।
ज्येष्ठं । यज्ञऽवनसं ।
ऋतऽवानं । आदित्यं । चर्षणिऽधृतं । राजानं । चर्षणिऽधृतं ॥ २ ॥

हे अग्ने स ताहशस्त्वं भ्रातरमेकस्थानवासेन भ्रातरं वरुणं । वृणोत्युदकमिति वरुणः । तं देवं यज्ञवनसं यज्ञैर्वननीयैर्हविर्भिः संभजनीयं यज्ञवनसं च यज्ञस्य संभक्तारं ज्येष्ठमतिशयेन प्रशस्यमृतावानमपां स्वामित्वयोदकवंतं सत्यवंतं वा आदित्यमदितेः पुत्रं चर्षणीधृतं मनुष्याणामुदकप्रदानेन धारकं सुमती शोभन-बुद्ध्या हेतुना चर्षणीधृतं चर्षणिभिर्विद्वद्भिर्धृतं राजानं राजंतं एताहशं वरुणं देवं देवान् देवनशीलान् स्तोतॄनच्छाभ्याववृत्स्व । आवर्तय । अभिमुखीकुरु ॥ ववृत्स्व । वृतु वर्तने । लोटि बहुलं छंदसीति विकरणस्य श्लुः । निघातः । सुमती । मंत्रे वृषेत्यादिना क्तिनुदात्तः । सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घः । एका-देशस्वरः । ज्येष्ठं । प्रशस्यस्येष्ठनि ज्य चेति ज्यादेशः । नित्त्वादाद्युदात्तः । एकादेशस्वरः । यज्ञवनसं । वन षण संभक्तौ । कर्मकर्तरि चासुन्प्रत्ययः । गतिकारकयोरपि पूर्वप-दप्रकृतिस्वरत्वं चेति पूर्वपदस्वरः ॥

प्रवर्ग्येऽभिष्टव उत्तरस्मिन्पटले सखे सखायमित्येषा । सूचितं च । सखे सखा-यमभ्या ववृत्स्वोर्ध्वं ऊ षु ण ऊतये । आ० ४. ७. । इति ॥

॥ सैषा सूक्ते तृतीया ॥

सखे सखायमभ्या ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्या ।
अग्ने मृळीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु ।
तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधि ॥३॥

सखे । सखायं । अभि । आ । ववृत्स्व । आशुं । न । चक्रं । रथ्याऽइव । रंह्या । अस्मभ्यं । दस्म । रंह्या ।
अग्ने । मृळीकं । वरुणे । सचा । विदः । मरुत्ऽसु । विश्वऽभानुषु ।
तोकाय । तुजे । शुशुचान । शं । कृधि । अस्मभ्यं । दस्म । शं । कृधि ॥३॥

सखे सखिभूत दस्म दर्शनीय हे अग्ने त्वं तव सखायं वरुणमस्मभ्यमस्मदर्थमाववृत्स्व । अभिमुखीकुरु । तत्र दृष्टांतः । रंह्या रंहणे गमने साधुभूतौ रथ्येव रथे योजितावश्वौ यथाशुं शीघ्रगंतृ चक्रं लक्ष्यदेशं प्रत्यभिमुखीकुरुतस्तद्वत् । हे अग्ने सचा तव सहाये वरुणे मृळीकं सुखकरं हविर्विदः । लब्धवानसि । तथा विश्वभानुषु सर्वतो व्याप्ततेजस्केषु मरुत्सु सुखकरं लब्धवानसि । आग्निवारुणाग्निमारुतयोः कर्मणोरिष्टवानसीत्यर्थः । शुशुचान दीप्यमान हे अग्ने तोकाय । तुज्यते पीड्यतेऽनेन माता गर्भवासेनेति तोकं पुत्रः । तस्मै तुजे । गच्छत्यनेनानृण्यं पितेति तुक् पौत्रः । तस्मै शं सुखं कृधि । कुरु । दस्म दर्शनीय हे अग्ने अस्मभ्यं शं कृधि । सुखं कुरु ॥ रथ्येव । रथस्येमावित्यर्थे रथाद्यदिति यत् । सुपां सुलुगिति सुपो डादेशः । रंह्या । रंहशब्दात्तत्र साधुरिति यत्प्रत्ययः । यतोऽनाव इत्याद्युदात्तत्वं ॥

त्वं नो अग्न इत्येतदारभ्येदं सूक्तमुत्तराणि सूक्तानि च प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे च विनियुक्तानि । सूत्रितं च । त्वं नो अग्ने वरुणस्य विद्वानित्येतत्प्रभृतीनि चत्वारि । आ० ४. १३. । इति ॥ अवभृथेष्ट्यां स्विष्टकृदर्थेऽग्नीवरुणौ यष्टव्यौ । तत्र त्वं नो अग्न इति द्वे याज्यानुवाक्ये । सूत्रितं च । अग्नीवरुणौ स्विष्टकृदर्थे त्वं नो अग्ने वरुणस्य विद्वानिति द्वे । आ० ६. १३. । इति ॥ अथातो यद्यग्निहोत्रं जुहुयात्तदाग्निवारुणीष्टिः । तस्यामेते एव याज्यानुवाक्ये । त्वं नो अग्ने वरुणस्य विद्वान्स त्वं नो अग्नेऽवमो भवोती । ऐ० ब्रा० ७. ९. । इति ॥

॥ सैषा सूक्ते चतुर्थी ॥

त्वं नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान्दे॒वस्य॒ हेळोऽव॑ यासिसीष्ठाः ।
यजि॑ष्ठो॒ वह्नि॑तमः॒ शोशु॑चानो॒ विश्वा॒ द्वेषां॑सि॒ प्र मु॑मुग्ध्य॒स्मत् ॥४॥
त्वं । नः॒ । अ॒ग्ने॒ । वरु॑णस्य । वि॒द्वान् । दे॒वस्य॑ । हेळः॑ । अव॑ । या॒सि॒सी॒ष्ठाः॒ ।
यजि॑ष्ठः । वह्नि॑ऽतमः । शोशु॑चानः । विश्वा॑ । द्वेषां॑सि । प्र । मु॒मु॒ग्धि॒ । अ॒स्मत् ॥४॥

हे अग्ने विद्वान् सर्वपुरुषार्थसाधनोपायज्ञस्त्वं देवस्य द्योतमानस्य वरुणस्य हेळः क्रोधान् नोऽस्मत्संबंधिनो वरुणकर्तृकान्याशग्रहणानवयासिसीष्ठाः। अपनय। यजिष्ठो यष्टृतमो वह्नितमो हविषामतिशयेन वोढा शोशुचानोऽतिशयेन दीप्यमानस्त्वं विश्वा सर्वाणि द्वेषांसि पापानि द्वेष्टॄणि रजांसि वा अस्मदस्मत्तः प्र मुमुग्धि। प्रकर्षेण मोचय ॥ हेळः। हेडृ अनादरे। क्विप्। शसि रूपं। शसः सुप्त्वादनुदात्तत्वे धातुस्वरः। यासिसीष्ठाः। यसेराशीर्लिङ्। यासि सीयुडागमः। छंदस्युभयथेति लिङः सार्वधातुकत्वात्सिलोपाभावः। अवपूर्वो यासिर्विनाशे वर्तते। मुमुग्धि। मुंचतेर्लोटि रूपं। बहुलं छंदसीति शपः श्लुः ॥

॥ अथ पंचमी ॥

स त्वं नो॑ अग्नेऽव॒मो भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्यु॑ष्टौ ।
अव॑ यक्ष्व नो॒ वरु॑णं॒ ररा॑णो वी॒हि मृ॑ळी॒कं सु॒हवो॑ न एधि ॥५॥
सः । त्वं । नः॒ । अ॒ग्ने॒ । अ॒व॒मः । भ॒व॒ । ऊ॒ती । नेदि॑ष्ठः । अ॒स्याः । उ॒षसः॑ । विऽउ॑ष्टौ ।
अव॑ । य॒क्ष्व॒ । नः॒ । वरु॑णं । ररा॑णः । वी॒हि । मृ॒ळी॒कं । सु॒ऽहवः॑ । नः॒ । ए॒धि॒ ॥५॥

हे अग्ने स तादृशस्त्वमूती ऊत्या रक्षणेन नोऽस्माकमवमोऽर्वाचीनः प्रत्यासन्नः सन् अस्या उषसो व्युष्टौ व्युच्छने प्रातःकालेऽग्निहोत्रादिकर्मसिद्ध्यर्थं नेदिष्ठो भव। अतिशयेनास्मदंतिकस्थो भव। यद्वा ऊत्या गमनेनास्माकमवमो रक्षको भव। किंच नोऽस्माकं वरुणं वरुणकृतं जलोदरादिरोगं आवरकं पापं वा अवयक्ष्व। अवयज। विनाशयेत्यर्थः। रराणोऽस्मद्दत्ते हविषि रममाणः। यद्वा यजमानेभ्योऽत्यंतफलप्रदस्त्वं मृळीकं सुखकरमिदं हविर्वीहि। भक्षय। किंच नोऽस्माकं सुहवः शोभनाह्वानोपेत एधि। भव ॥ नेदिष्ठः। अंतिकशब्दादिष्ठन्यंतिकबाढयोर्नेदसाधाविति नेद इत्यादेशः। नित्त्वादाद्युदात्तः। रराणः। रमतेः

कानचि मकारलोपश्छांदसः । यद्वा रातेर्व्यत्ययेन कानच् । अभ्यस्तानामादिः । एधि । अस्तेर्लोटि घ्वसोरेद्धावभ्यासलोपश्चेति ए इत्यादेशः । तस्यासिद्धत्वाद्धु-झल्भ्यो हेर्धिः । निघातः ॥

॥ इति तृतीयस्य चतुर्थे द्वादशो वर्गः ॥

॥ अथ षष्ठी ॥

अस्य श्रेष्ठा सुभगस्य संदृग्देवस्य चित्रतमा मर्त्येषु ।
शुचि घृतं न तप्तमघ्न्यायाः स्पार्हा देवस्य मंहनेव धेनोः ॥ ६ ॥
अस्य । श्रेष्ठा । सुऽभगस्य । संऽदृक् । देवस्य । चित्रऽतमा । मर्त्येषु ।
शुचि । घृतं । न । तप्तं । अघ्न्यायाः । स्पार्हा । देवस्य । मंहनाऽइव । धेनोः ॥ ६ ॥

सुभगस्य सुष्ठु भजनीयस्याग्नेर्देवस्य श्रेष्ठातिशयेन प्रशस्या संदृक् संदृष्टिर्मर्त्येषु चित्रतमातिशयेन चायनीया पूजनीया भवति । स्पार्हा सर्वैः स्पृहणीया भवति । तत्र दृष्टांतः । यथा देवस्य क्षीरं कामयमानस्य पुरुषस्याघ्न्याया अहंतव्याया गोः शुचि तेजोयुक्तं घृतं क्षरणयुक्तं तप्तं क्षीरं स्पृहणीयं भवति । तत्रैव दृष्टांतांतरं । यथा गां भिक्षमाणस्य मर्त्यस्य धेनोर्दोग्ध्र्या गोर्मंहनेव । मंहतिर्दानकर्मा । दानं यथा प्रियकरं भवति तद्वत् ॥ सुभगस्य । आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं । स्पार्हा । कर्षात्वतो घञोऽंत उदात्तः । देवस्य । दीव्यतीति देवः । दीव्यतेः कांत्यर्थस्य पचाद्यचि रूपं ॥

॥ अथ सप्तमी ॥

त्रिरस्य ता परमा संति सत्या स्पार्हा देवस्य जनिमान्यग्नेः ।
अनंते अंतः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः ॥ ७ ॥
त्रिः । अस्य । ता । परमा । संति । सत्या । स्पार्हा । देवस्य । जनिमानि । अग्नेः ।
अनंते । अंतरिति । परिऽवीतः । आ । अगात् । शुचिः । शुक्रः । अर्यः । रोरुचानः ॥ ७ ॥

अग्नेरग्न्यभिमानिनोऽस्य देवस्य त्रिस्त्रीण्यग्निवायुसूर्यात्मना त्रीणि ता तानि प्रसिद्धानि परमोत्तमानि सत्या यथार्थभूतानि जनिमानि जन्मानि स्पार्हा सर्वैः स्पृहणीयानि संति । यद्वाग्नेरेव त्रीणि जन्मानि दिवस्परि प्रथमं जज्ञे अग्निः । ऋग्वे० १०. ४५. १. । इति त्रीणि जाना परि भूषंत्यस्य । ऋग्वे० १. ९५. ३. । इत्येव-

मादिषु मंत्रेषु प्रसिद्धानि । अनंतेऽपर्यंते नभस्यंतर्मध्ये स्वतेजसा परिवीतः परिवेष्टितः शुचिः सर्वस्य शोधकः शुक्रो दीप्तियुक्तोऽत एव रोरुचानो भृशं दीप्यमानोऽर्यः स्वामी तादृशो देव आगात्। अस्मदीयं यज्ञं प्रत्यागच्छतु ॥ सत्या। शेश्छंदसि बहुलमिति शेर्लुक्। परिवीतः। व्येञ् संवरणे। कर्मणि क्तः। यजादित्वात्संप्रसारणं। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। अर्यः। ऋ गतौ। अर्यः स्वामिवैश्ययोरिति यत्प्रत्ययांतो निपातितः। स्वामिन्यंतोदात्तत्वं वक्तव्यमित्यंतोदात्तत्वं ॥

॥ अथाष्टमी ॥

स दूतो विश्वेदभि वष्टि सद्मा होता हिरण्यरथो रंसुजिह्वः ।
रोहिदश्वो वपुष्यो विभावा सदा रण्वः पितुमतीव संसत् ॥ ८ ॥

सः। दूतः। विश्वा। इत्। अभि। वष्टि। सद्म। होता। हिरण्यऽरथः। रंऽसुजिह्वः।
रोहित्ऽअश्वः। वपुष्यः। विभाऽवा। सदा। रण्वः। पितुमतीऽइव। संऽसत् ॥ ८ ॥

देवानां दूतो होता देवानामाह्वाता हिरण्यरथः सुवर्णमयरथोपेतो रंसुजिह्वो रमणीयशोभनज्वालोपेतः स तादृशोऽग्निर्विश्वेत् सर्वाण्येव सद्म देवयजनस्थानान्यभिवष्टि। कामयते। पुनश्च कीदृशः। रोहिदश्वः। रोहितवर्णा अश्वा यस्य स तथोक्तः। वपुष्यो वपुषि रूपे साधुर्विभावा कांतियुक्तोऽत एव सदा रण्वो रमणीयो भवति। तत्र दृष्टांतः। पितुमतीव संसत्। यथान्नादिवत्समृद्धं गृहं रमणीयं तद्वत् ॥ रंसुजिह्वः। रमतेरन्येभ्योऽपि दृश्यत इति विच्। बहुव्रीहौ पूर्वपदस्वरः। वपुष्यः। तत्र साधुरिति यत्। तित्स्वरितः। विभावा। छंदसीवनिपाविति वनिप् ॥

॥ अथ नवमी ॥

स चेतयन्मनुषो यज्ञबंधुः प्र तं मह्या रशनया नयंति ।
स क्षेत्यस्य दुर्यासु साधन्देवो मर्तस्य सधनित्वमाप ॥ ९ ॥

सः। चेतयत्। मनुषः। यज्ञऽबंधुः। प्र। तं। मह्या। रशनया। नयंति।
सः। क्षेति। अस्य। दुर्यासु। साधन्। देवः। मर्तस्य। सधनिऽत्वं। आप ॥ ९ ॥

यज्ञबंधुः। यज्ञेऽग्निहोत्रादौ बंधनं विनियोजनं यस्य स तथोक्तः। सोऽग्निर्मनुषः कर्मणि प्रवृत्तान्मनुष्यान् चेतयत्। जानाति। मह्या महत्या रशनया स्तुति-

रूपया रज्ज्वा युक्तं तं तादृशमग्निं प्रणयंति। उत्तरवेद्यादिष्वध्वर्य्वादयः प्रक्षिपंति। मर्तस्य मनुष्यस्यास्य यजमानस्य दुर्यासु गृहेषु साधन् अभीष्टानि साधयन् सोऽग्निः क्षेति। वसति। स देवो द्योतमानोऽग्निः सधनित्वं यस्य गृहे निवसति तेन धनिना साहित्यमाप। प्राप्नोति। प्रभूतं धनं यजमानाय दापयित्वा तेन सहितोऽभवदित्यर्थः॥ साधन्। राध साध संसिद्धौ। ण्यंतस्य शतरि रूपं॥

॥ अथ दशमी ॥

स तू नो अग्निर्नयतु प्रजानन्नच्छा रत्नं देवभक्तं यदस्य।

धिया यद्विश्वे अमृता अकृण्वन्द्यौष्पिता जनिता सत्यमुक्षन् ॥१०॥

सः। तु। नः। अग्निः। नयतु। प्रऽजानन्। अच्छ। रत्नं। देवऽभक्तं। यत्। अस्य।

धिया। यत्। विश्वे। अमृताः। अकृण्वन्। द्यौः। पिता। जनिता। सत्यं। उक्षन् ॥१०॥

प्रजानन् सर्वं जानानः सोऽग्निर्देवभक्तं देवैर्देवनशीलैः स्तोतृभिः संभजनीयमस्याग्नेः संबंधि यदुत्तमं रत्नं धनमस्ति तद्रत्नमच्छाभिमुख्येन तु क्षिप्रं नोऽस्मान्नयतु। प्रापयतु। अमृता मरणधर्मरहिता विश्वे सर्वे देवा धिया हविर्लक्षणेन कर्मणा हेतुना यद्यमग्निमकृण्वन् हविषां प्रापयितारमकुर्वन्। यस्य चाग्नेर्द्यौः पिता पालयित्री जनिता जनयित्री च। अग्ने दिवः सूनुरसि प्रचेताः। ऋग्वे० ३.२५.१.। इति श्रवणात्। यद्वा द्यौर्देवनशील आदित्यः पिता जनयिता च। आदित्यादग्निरित्याम्नानात्। सत्यं यथार्थभूतं तमग्निमुक्षन्। घृताद्याहुतिभिरध्वर्य्वादयः सिंचंति॥ देवभक्तं। भज सेवायां। कर्मणि क्तः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः। उक्षन्। उक्ष सेचने। लङि रूपं। बहुलं छंदसीत्यडभावः॥

॥ इति तृतीयस्य चतुर्थे त्रयोदशो वर्गः॥

॥ अथैकादशी ॥

स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ।

अपादशीर्षा गुहमानो अंतायोयुवानो वृषभस्य नीळे ॥११॥

सः। जायत। प्रथमः। पस्त्यासु। महः। बुध्ने। रजसः। अस्य। योनौ।

अपात्। अशीर्षा। गुहमानः। अंता। आऽयोयुवानः। वृषभस्य। नीळे ॥११॥

सोऽग्निः प्रथम आहवनीयादिरूपतया श्रेष्ठः सन् पस्त्यासु यजमानानां गृहेषु

जायत। आहुत्यधिकरणतया संपद्यते। तथा महो महतोऽस्य रजसोऽंतरिक्षस्य बुध्ने मूले पृथिव्यां तथापि योनावुत्तरवेद्यादिस्थाने संपद्यते। सोऽग्निरपात्पादवर्जितोऽशीर्षा शिरोवर्जितः। तदेवाह। अंताधंते पादशिरसी गुहमानो गूहमानः। अविज्ञेयपादशिरा इत्यर्थः। वृषभस्य वर्षणसमर्थस्य मेघस्य नीळे निलये नभस्यायोयुवानो धूमाकारेणात्मानमायोजयन्वर्तते। यद्वा यः प्रथमो वैद्युतोऽग्निः पस्त्यासु नदीषु बुध्नेऽंतरिक्षे महो महतो रजस उदकस्य तेजसो वा योनौ स्थाने च चरति। अपादशीर्षा पादशिरोवर्जितोऽंतात्मनः पर्यंतप्रदेशान् स्वतेजसा गुहमान आच्छादयन् पुनश्चायोयुवानस्तानि तेजांसि स्वात्मनि मिश्रीकुर्वन्वृषभस्य नीळे स्थाने नभसि चरति सोऽग्निरधुना कर्मयोग्यतयाजायत॥ अपात्। पादस्य लोपोऽहस्त्यादिभ्य इत्यकारलोपः समासांतः। गुहमानः। गुहू संवरणे। शविकरणी। शानचि रूपं। शानचो लसार्वधातुकस्वरे कृते प्रत्ययस्वरः। आयोयुवानः। यु मिश्रणे। यङ्लुकि शानचि रूपं। अभ्यस्तस्वरेणाद्युदात्तः॥

॥ अथ द्वादशी ॥

प्र शर्धं आर्त प्रथमं विपन्यँ ऋतस्य योना वृषभस्य नीळे।
स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयंत वृष्णे॥ १२॥
प्र। शर्धः। आर्त। प्रथमं। विपन्या। ऋतस्य। योना। वृषभस्य। नीळे।
स्पार्हः। युवा। वपुष्यः। विभाऽवा। सप्त। प्रियासः। अजनयंत। वृष्णे॥ १२॥

हे अग्ने विपन्या स्तुत्या युक्तमृतस्योदकस्य योनौ स्थाने वृषभस्य वर्षणसमर्थस्य मेघस्य नीळे कुलायभूतेऽंतरिक्षे वैद्युताग्निरूपेण त्वां वर्तमानं शर्धस्तेजः प्रथमं प्रार्त। प्रकर्षेण गच्छति। यश्चाग्निः स्पार्हः सर्वैः स्पृहणीयो युवा नित्यतरुणो वपुष्यः कमनीयो विभावा दीप्तिमान् तस्मै वृष्णेऽभिमतफलवर्षकाय प्रियासः प्रियाः सप्त होत्रका अजनयंत। स्तोत्रमकुर्वन्॥ आर्त। ऋ गतौ। लङि व्यत्ययेनात्मनेपदं। निघातः। विपन्या। पन चेत्यस्येन्प्रत्ययः। कृदिकारादक्तिन इति ङीष्। प्रत्ययस्वरेणांतोदात्तः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। विपन्यँ ऋतस्येत्यत्र संहितायामिकोऽसवर्णे शाकल्यस्य ह्रस्वश्च। पा० ६. १. १२७. । इत्यनिकोऽपि ह्रस्वोऽनुनासिकश्च॥

॥ अथ त्रयोदशी ॥

अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः ।
अश्मव्रजाः सुदुघा वव्रे अंतरुदुस्रा आजन्नुषसो हुवानाः ॥ १३ ॥

अस्माकं । अत्र । पितरः । मनुष्याः । अभि । प्र । सेदुः । ऋतं । आशुषाणाः ।
अश्मऽव्रजाः । सुऽदुघाः । वव्रे । अंतः । उत् । उस्राः । आजन् । उषसः । हुवानाः ॥ १३ ॥

अत्र लोके पूर्वे मनुष्या अस्माकं पितरोऽंगिरस ऋतं यज्ञमाशुषाणा अश्नुवानाः संतोऽभिप्रसेदुः । अग्निमभिलक्ष्य प्रजग्मुः । तेऽंगिरसोऽग्निपरिचर्याबलादश्मव्रजाः पर्वतैः परिवृता वव्रे । वृणोत्याच्छादयतीति वव्रं पर्वतविलांतर्वर्ति तमः । तस्मिन्नंतर्मध्ये स्थिताः सुदुघाः सुष्ठु दोग्ध्रीरुस्राः पणिभिरपहृता गा उदाजन् । तस्माद्बिलान्निरगमयन् । किं कुर्वंतः । तमसो विध्वंसिनीरुषसो देवीः प्रकाशार्थं हुवाना आह्वयंतः ॥ वव्रे । वृणोतेरौणादिकः कः । कृञादीनां द्वे भवत इति द्विर्वचनं ॥

॥ अथ चतुर्दशी ॥

ते मर्मृजत ददृवांसो अद्रिं तदेषामन्ये अभितो वि वोचन् ।
पश्वयंत्रासो अभि कारमर्चन्विदंत ज्योतिश्चकृपंत धीभिः ॥ १४ ॥

ते । मर्मृजत । ददृऽवांसः । अद्रिं । तत् । एषां । अन्ये । अभितः । वि । वोचन् ।
पश्वऽयंत्रासः । अभि । कारं । अर्चन् । विदंत । ज्योतिः । चकृपंत । धीभिः ॥ १४ ॥

तेऽंगिरसोऽद्रिं पणिभिरपहृतानां गवां निरोधकं पर्वतं ददृवांसो विदारयंतः संतो मर्मृजत । अग्निं पर्यचरन् । एषामंगिरसां तत्तादृशं कर्मान्ये महर्षयोऽभितः सर्वत्र जगति वि वोचन् । विशेषेणाकथयन् । पश्वयंत्रासः पशुनिर्गमनार्थानि यंत्राण्युपाया येषां तेऽंगिरसः कारमभिमतस्य प्रयोजनस्य कर्तारमग्निमभ्यर्चन् । अस्तुवन् । ततस्तमोपहमादित्याख्यं ज्योतिर्विदंत । अलभंत । ततो धीभिर्बुद्धिभिश्चकृपंत । यज्ञानकुर्वन् ॥ मर्मृजत । मृजूष् शुद्धौ । यङ्लुकि लङि व्यत्ययेनात्मनेपदं । निघातः । चकृपंत । कृपू सामर्थ्ये । ण्यंतस्य लुङि चङि सन्वद्भावाभावश्छांदसः ॥

॥ अथ पंचदशी ॥

ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षंतमद्रिं ।
दृळ्हं नरो वचसा दैव्येन व्रजं गोमंतमुशिजो वि वव्रुः ॥ १५ ॥
ते । गव्यता । मनसा । दृध्रं । उब्धं । गाः । येमानं । परि । संतं । अद्रिं ।
दृळ्हं । नरः । वचसा । दैव्येन । व्रजं । गोऽमंतं । उशिजः । वि । ववुरिति वव्रुः ॥ १५ ॥

नरः कर्मणां नेतार उशिजोऽग्निं कामयमानास्तेऽगिरसो गव्यता गा इच्छता मनसा दृध्रं गवां निर्गमनद्वारनिरोधकमुब्धं समुब्धं संहतं । यद्वा उभिः पूरणार्थः । गोभिः पूर्णं गा येमानं नियच्छंतं परि सर्वतः संतं वर्तमानं दृळ्हं दृढं गोमंतं गोभिर्युक्तं व्रजं गवां निवासस्थानमद्रिं पर्वतं दैव्येनाग्निविषयेण वचसा वेदात्मकेन स्तोत्रेण विवव्रुः । गोनिर्गमनार्थमुद्घाटितवंतः ॥ उब्धं । उभ्नातिर्हंतिना समानार्थः । यद्वा उन्भ पूरणे । कर्मणि क्तः । येमानं । यमेः कानच्येत्वाभ्यासलोपौ । चित्त्वादंतोदात्तः । परिषंतमित्यत्र संहितायामुपसर्गप्रादुर्भ्यामस्तिर्यच्परं इति षत्वं ॥

॥ इति तृतीयस्य चतुर्थे चतुर्दशो वर्गः ॥

॥ अथ षोडशी ॥

ते मन्वत प्रथमं नाम धेनोस्त्रिः सप्त मातुः परमाणि विंदन् ।
तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः ॥ १६ ॥
ते । मन्वत । प्रथमं । नाम । धेनोः । त्रिः । सप्त । मातुः । परमाणि । विंदन् ।
तत् । जानतीः । अभि । अनूषत । व्राः । आविः । भुवत् । अरुणीः । यशसा । गोः ॥ १६ ॥

हे अग्ने ते स्तोत्रं कुर्वाणा अंगिरसो मातुर्जनन्या धेनोर्वाचः संबंधि नाम स्तुतिसाधकं शब्दमात्रं प्रथमं पूर्वं मन्वत । अजानत । पश्चात्तस्या वाचः संबंधीनि त्रिः सप्तैकविंशतिसंख्याकानि स्तुतिसाधनानि छंदांसि । तानि च गायत्र्यादीनि जगत्यंतानि सप्त । अतिजगत्यादीन्यतिधृत्यंतानि सप्त । कृतिप्रभृतीन्युत्कृतिपर्यंतानि सप्तेति । एवं त्रिः सप्त छंदांसि परमाण्युत्तमानि विंदन् । अलभंत । एवंविधच्छंदोयुक्तैर्मंत्रैरग्निमस्तुवन्नित्यर्थः । तत्ततो जानतीः सर्वं जानाना व्राः । व्रा इत्युषोनाम । उषसोऽभ्यनूषत । अस्तुवन् । ततो गोः सूर्यस्य

यशसा तेजसा सहारुणीररुणवर्णोषा आविर्भुवत् आविरभूत्। यद्वा तेऽङ्गिरसः प्रथमं पुरातनं नाम एहि सुरभि गुग्गुलु गंधिनीति धेनोर्नामधेयं मन्वत। उच्चारयामासुः। मातुर्भूम्याः स्वभूतानि पणिभिरपहृतानि त्रिः सप्त रत्नानि विंदन्। उच्चरितं नाम जानंत्यो गावोऽभ्यनूषत। हंभारवलक्षणं शब्दमकुर्वन्। तदानीमुषाः प्रादुरभूदिति ॥ जानतीः। शतुरनुमो नद्यजादीति ङीप उदात्तत्वं। अनूषत। णु स्तुतौ। लुङि रूपं। कुटादित्वादगुणः। अरुणीः। सोरलोपश्छांदसो गौरीर्मिमायेतिवत् ॥

॥ अथ सप्तदशी ॥

नेशत्तमो दुधितं रोचत द्यौरुद्देव्या उषसो भानुरर्त।

आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन् ॥१७॥

नेशत्। तमः। दुधितं। रोचत। द्यौः। उत्। देव्याः। उषसः। भानुः। अर्त।

आ। सूर्यः। बृहतः। तिष्ठत्। अज्रान्। ऋजु। मर्तेषु। वृजिना। च। पश्यन् ॥१७॥

तमो रात्रिकृतं ध्वांतं दुधितं। दुधिः प्रेरणकर्मा। प्रातरग्निविहरणकाल उषसा प्रेरितं सत् नेशत्। अनश्यत। ततो द्यौरंतरिक्षं रोचत। अदीप्यत। ततो देव्या देवनशीलाया उषसो भानुः प्रभोदर्त। उद्गच्छति। अथ सूर्यो बृहतो महतोऽज्रानजरान्पर्वतान् गमनशीलान्रश्मीन्वातिष्ठत्। अध्यतिष्ठत्। किं कुर्वन्। मर्त्येषु मनुष्येषु विद्यमानमृजु सत्कर्म वृजिनानृजून्यसत्कर्माणि च पश्यन्। अध्यतिष्ठदिति शेषः ॥ नेशत्। णश अदर्शने। लङि णशिमन्योरलिट्येत्वं वक्तव्यमित्येत्वं। शपः पित्त्वादनुदात्तत्वे धातुस्वरः। रोचत। रुच दीप्तौ। लङि रूपं। वाक्यभेदादनिघातः ॥

॥ अथाष्टादशी ॥

आदित्पश्चा बुबुधाना व्यख्यन्नादिद्रत्नं धारयंत द्युभक्तं।

विश्वे विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यमस्तु ॥१८॥

आत्। इत्। पश्चा। बुबुधानाः। वि। अख्यन्। आत्। इत्। रत्नं। धारयंत। द्युऽभक्तं।

विश्वे। विश्वासु। दुर्यासु। देवाः। मित्र। धिये। वरुण। सत्यं। अस्तु ॥१८॥

आदित्सूर्योदयादनंतरं बुबुधानाः पणिभिरपहृता निरोधान्निर्गता गा जानाना अंगिरसः पश्चा पृष्ठप्रदेशेषु व्यख्यन्। अशेषेण ता गा अपश्यन्। तथा-

दिद्युर्नंतरं द्युभक्तं दीप्तियुक्तं देवैः संभक्तं वा रत्नं पणिभिरपहृतं धनं च धारयंत । अधारयन् । लब्धगोधनानामंगिरसां विश्वासु दुर्यासु सर्वेषु गृहेषु विश्वे यजनीयाः सर्वे देवा आजग्मुः । हे मित्र मित्रभूत हे वरुणोपद्रवाणां वारक हे अग्ने धिये कर्मणां कर्त्रे स्तोत्रे वा यजमानाय सत्यमस्तु । यदेतत्तवोपद्रववारणसामर्थ्यं तद्यथार्थभूतमस्तु ॥ पश्वा । पश्व पश्वा च छंदसीति निपातितः । बुबुधानाः । बुधेर्लिटि कानचि रूपं । निष्ठादंतोदात्तः । द्युभक्तं । भज सेवायां । कर्मणि क्तः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः ॥

॥ अथैकोनविंशी ॥

अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठं ।
शुच्यूधो अतृणन्न गवामंधो न पूतं परिषिक्तमंशोः ॥१९॥

अच्छ । वोचेय । शुशुचानं । अग्निं । होतारं । विश्वऽभरसं । यजिष्ठं ।
शुचि । ऊधः । अतृणत् । न । गवां । अंधः । न । पूतं । परिऽसिक्तं । अंशोः ॥१९॥

हे अग्ने शुशुचानं भृशं दीप्यमानं होतारं देवानामाह्वातारं विश्वभरसमाहुतिद्वारा वृष्टिप्रदानेन विश्वस्य पोषकं यजिष्ठं यष्टृतममग्निं त्वामच्छाभिलक्ष्य वोचेय । स्तवानि । गवामूधः शुचि शुद्धं पयो नातृणत् । तवाहुत्यर्थं यजमानो न दोग्धि । अंशोः सोमलताखंडस्य संबंध्यंधो रसाख्यमन्नं पूतं दशापवित्रेण शोधितं सत् न परिषिक्तं । गृहेषु न प्रक्षिप्तं । किंत्वनेन यजमानेन केवलं स्तुतिरेव क्रियते ॥ वोचेय । ब्रूञ आशीर्लिङि ब्रुवो वचिः । लिङ्याशिष्यङ् । छंदस्युभयथेति सार्वधातुकत्वात्सीयुटः सलोपः । अतृणत् । उतृदिर् हिंसानादरयोः । दोहनमेवोधोहिंसनं । परिषिक्तं । सिंचतेः कर्मणि क्तः । उपसर्गात्सुनोतीति संहितायां षत्वं । गतिरनंतर इति गतेः स्वरः ॥

॥ अथ विंशी ॥

विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणां ।
अग्निर्देवानामव आवृणानः सुमृळीको भवतु जातवेदाः ॥२०॥

विश्वेषां । अदितिः । यज्ञियानां । विश्वेषां । अतिथिः । मानुषाणां ।
अग्निः । देवानां । अवः । आऽवृणानः । सुऽमृळीकः । भवतु । जातऽवेदाः ॥२०॥

अयमग्निर्विश्वेषां सर्वेषां यज्ञियानां यज्ञार्हाणां देवानामदितिः। अदितिर्देवमाता। तद्वद्देवानां पोषक इत्यर्थः। यद्वा विश्वेषां देवानामदितिर्भूस्थानीयः आधारभूत इति यावत्। अयं वा अग्निर्वैश्वानर इति श्रुतेः। तथायमग्निर्विश्वेषां मानुषाणामतिथिरतिथिवत्पूज्यो भवति। देवानां देवनशीलानां स्तोतॄणामवोऽन्नं हविरावृणानः संभजन् जातवेदाः। जातं सर्वं वेत्तीति जातवेदाः। सोऽग्निस्तेषां स्तोतॄणां सुमृळीकः सुखकरो भवतु॥ अतिथिः। अत सातत्यगमने। ऋतन्यंजीत्यादिनेथिन्प्रत्ययः। निघ्वादाद्युदात्तः। मानुषाणां। मनोरपत्यानीत्यर्थे मनोर्जातावञ्यतौ षुक्चेत्यञ्प्रत्ययः। जित्वादाद्युदात्तः॥

॥ इति तृतीयस्य चतुर्थे पंचदशो वर्गः॥

यो मर्त्येष्विति विंशत्यृचं द्वितीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं। यो मर्त्येष्वित्यनुक्रमणिका॥ अस्य सूक्तस्य प्रातरनुवाकाश्विनशास्त्रयोः पूर्वसूक्त एव विनियोग उक्तः॥

॥ तत्र प्रथमा॥

यो मर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्निधायि।
होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै॥१॥

यः। मर्त्येषु। अमृतः। ऋतऽवा। देवः। देवेषु। अरतिः। निऽधायि।
होता। यजिष्ठः। मह्ना। शुचध्यै। हव्यैः। अग्निः। मनुषः। ईरयध्यै॥१॥

अमृतो मरणधर्मरहितो योऽग्निर्मर्त्येषु मनुष्येष्वृतावा सत्यवान्निधायि निहितः। यद्वा मर्त्येषु मनुष्यसंबंधिषु वागादींद्रियेषु निहितः। अग्निर्वाग्भूत्वा मुखं प्राविशदिति श्रुतेः। देवो देवनशीलो योऽग्निरिंद्रादिषु देवेष्वरतिरभिगंता शत्रूणां। यद्वा देवलोके गंता। निधायि निहितः स च होता देवानामाह्वाता यजिष्ठो यष्टृतमोऽग्निर्मह्ना स्वकीयेन महता तेजसा शुचध्यै दीपितुमुत्तरवेद्यां निहितः। किंच हव्यैर्हवनीयैराज्यपुरोडाशादिभिर्हविर्भिर्हेतुभिर्मनुषो मनुष्यस्य यजमानस्येरयध्यै स्वर्गं प्रति प्रेरणाय निहितः॥ अरतिः। ऋ गतौ। वहिवस्यर्तिभ्यश्चिदित्यतिप्रत्ययः। चित्वादंतोदात्तः। निधायि। दधातेः कर्मणि लुङि रूपं। पराद्विश्छंदसीत्युत्तरपदाद्युदात्तत्वं। शुचध्यै। शुच दीप्तौ। तुमर्थे कध्यैप्रत्ययः। कित्वाद्गुणः। प्रत्ययस्वरः। ईरयध्यै। ईरयतेस्तुमर्थे शध्यैप्रत्ययः। शित्वेन सार्वधातुकत्वाच्चिल्लोपाभावः॥

॥ अथ द्वितीया ॥

इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अंतरग्ने ।

दूत ईयसे युयुजान ऋष्व ऋजुमुष्कान्वृषणः शुक्रांश्च ॥ २ ॥

इह । त्वं । सूनो इति । सहसः । नः । अद्य । जातः । जातान् । उभयान् । अंतः । अग्ने ।

दूतः । ईयसे । युयुजानः । ऋष्व । ऋजुऽमुष्कान् । वृषणः । शुक्रान् । च ॥ २ ॥

हे सहसः सूनो बलस्य पुत्राग्ने अद्यास्मिन्दिवसे नोऽस्मदीय इह कर्मणि जात आधानपवमानेष्टिभिः संस्कृतस्त्वं जातानुत्पन्नानुभयान्देवमनुष्यानंतस्तेषां मध्ये दूतो हवींषि देवान्प्रापयितुमीयसे । गच्छसि । किं कुर्वन् । हे ऋष्व दर्शनीयाग्ने ऋजुमुष्कान् । मुष्कशब्देन मांसलोऽभिधीयते । ऋजवः प्रसाधकाः । ऋजवश्च ते मुष्काश्चेत्यृजुमुष्काः । तान्वृषणः रेतःसेचनसमर्थान् शुक्रान्दीप्यमानानश्वांश्च युयुजानः स्वरथे योजयन्नीयसे । यद्वा ऋष्व महन्नग्ने युयुजानो हविर्वहने नियुज्यमानस्त्वं वृषणो हविःसेचनसमर्थान्यजमानान् दीप्तान्देवांश्चेयसे ॥ सूनो सहसः । परमपि छंदसीति सहसः परांगवद्भावात् द्वयोः सर्वानुदात्तत्वं । ईयसे । ईङ् गतौ । दिवादिः । निघातः । युयुजानः । युजेः वर्तमाने लिटि कानचि रूपं । ऋष्व । संहितायामृत्यक इति प्रकृतिभावः । ऋजुमुष्कान् । समासस्वरः ॥

॥ अथ तृतीया ॥

अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा ।

अंतरीयसे अरुषा युंजानो युष्मांश्च देवान्विश आ च मर्तान् ॥ ३ ॥

अत्या । वृधस्नू इति वृधऽस्नू । रोहिता । घृतस्नू इति घृतऽस्नू । ऋतस्य । मन्ये । मनसा । जविष्ठा ।

अंतः । ईयसे । अरुषा । युजानः । युष्मान् । च । देवान् । विशः । आ । च । मर्तान् ॥ ३ ॥

हे अग्ने ऋतस्य सत्यभूतस्य तव संबंधिनौ मनसा मनसोऽपि जविष्ठा वेगवत्तमौ वृधस्नू । वर्धयतीति वृधमन्नं । तत्स्नरंतौ । घृतस्नू । घृतमुदकं तत्स्रवंतौ रोहिता रोहितवर्णावत्याश्वौ मन्ये । स्तौमि । अरुषारोचमानौ तावश्वौ युजानो रथे युंजानस्त्वं युष्मान् । देवेष्वग्नेरंतर्भावाद्बहुवचनीयरूपेण कीर्तनं । युष्मान्युष्म्यान्देवान् विशः परिचारकान्मर्त्यान्मनुष्यानंतः । षष्ठ्यर्थे द्वितीया । तेषां मध्य आ समंतादीयसे । हविः स्वीकर्तुं यजमानान् गच्छसि । तद्धविः प्रदातुं देवान्

गच्छसि ॥ मन्ये । मन्यतिरर्चतिकर्मा । मनसा । सुपां सुलुगिति पंचम्या आकारः । युजानः । युजिर् योगे । युजिबुधिदृशेः किदित्यानच्प्रत्ययः । चित्त्वादंतोदात्तः ॥

॥ अथ चतुर्थी ॥

अर्यमणं वरुणं मित्रमेषामिंद्राविष्णू मरुतो अश्विनोत ।
स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे जनाय ॥४॥

अर्यमणं । वरुणं । मित्रं । एषां । इंद्राविष्णू इति । मरुतः । अश्विना । उत ।
सुऽअश्वः । अग्ने । सुऽरथः । सुऽराधाः । आ । इत् । ऊं इति । वह । सुऽहविषे । जनाय ॥४॥

हे अग्ने स्वश्वः शोभनाश्वोपेतः सुरथः शोभनरथः सुराधाः शोभनधनोपेतस्त्वमेषां मर्त्यानां मध्ये सुहविषे शोभनहविष्काय जनाय यजमानायार्यमादीनुतापि चाश्विनौ यष्टव्यान्देवानावहेदु । आह्वयैव ॥ इंद्राविष्णू । ऋज्रेंद्रेत्यादिना निपातनादिंद्रशब्द आद्युदात्तः । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । सुहविषे । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥

॥ अथ पंचमी ॥

गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इळावाँ एषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान् ॥५॥

गोऽमान् । अग्ने । अविऽमान् । अश्वी । यज्ञः । नृवत्ऽसखा । सदं । इत् । अप्रऽमृष्यः ।
इळाऽवान् । एषः । असुर । प्रजाऽवान् । दीर्घः । रयिः । पृथुऽबुध्नः । सभाऽवान् ॥५॥

हे असुर बलवन्हे अग्ने मदीयोऽयं यज्ञो गोमान् गोभिस्तद्वानविमान् । अवयो मेषा अस्य संति तद्वान् अश्व्यश्वोपेतश्चास्तु । नृवत्सखा । नरः कर्मणां नेतारोऽध्वर्य्वादयस्तद्वंतः सखायोऽनुष्ठातारो यजमाना यस्य स तथोक्तः । सदमित्सदैवाप्रमृष्योऽप्रधृष्यश्चास्तु । तथेळावान् । इळा हविर्लक्षणमन्नं तद्वान् । प्रजावान्पुत्रपौत्रादियुक्तश्चास्तु । दीर्घोऽविच्छिन्नानुष्ठानोपेतो रयिर्धनवान् । लुप्तमत्वर्थीयः । पृथुबुध्नः । पृथूनि बहुलानि बुध्नानि धनादीनि कारणानि यस्य स तथोक्तः । सभावानुपद्रष्टृरूपसभायुक्तश्चास्तु ॥ नृवत्सखा । नरो येषां संतीति नृवत् । मतुप् । तस्य छांदसं वत्वं । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । बहुव्रीहौ पूर्वपदस्वरः ॥

॥ इति तृतीयस्य चतुर्थे षोडशो वर्गः ॥

॥ अथ षष्ठी ॥

यस्त इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपते त्वाया ।
भुवस्तस्य स्वतवाँः पायुरग्ने विश्वस्मात्सीमघायत उरुष्य ॥ ६ ॥

यः । ते । इध्मं । जभरत् । सिस्विदानः । मूर्धानं । वा । ततपते । त्वाऽया ।
भुवः । तस्य । स्वऽतवान् । पायुः । अग्ने । विश्वस्मात् । सीं । अघऽयतः । उरुष्य ॥ ६ ॥

हे अग्ने ते त्वदर्थं यः पुमान् सिष्विदानः सिस्विदानः स्विद्यद्गात्रः सन् इध्मं त्वत्तमिंधनार्थं काष्ठभारं जभरत् आहरति । यो वा त्वाया त्वत्कामनया मूर्धानं स्वमस्तकं ततपते काष्ठभारेण तापयति तस्य तादृशस्य पुंसः स्वतवान् । स्वतवान्धनवानिति तलवकार उक्तं । धनवान् भुवः । भवसि । पायुः पालयितासि । सीमेनं विश्वस्मादघायतोऽघं पापमिच्छतः पुरुषादुरुष्य । रक्ष ॥ जभरत् । हरतेर्लेङि चङि रूपं । चङ्यन्यतरस्यामिति चङ्पूर्वस्योदात्तत्वं । सिस्विदानः । ञिष्विदा गात्रप्रक्षरणे । कानचि रूपं । संहितायामादेशप्रत्यययोरिति धातुसकारस्य षत्वं । त्वाया । त्वामात्मन इच्छतीत्यर्थे क्यच् । प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः । दकारस्य छांदसमात्वं । क्यजंताद्धातोर्भावे अ प्रत्ययादित्यकारप्रत्ययः । सुपां सुलुगिति तृतीयाया आकारः । एकादेशस्वरः । भुवः । भवतेर्लेट्यडागमे रूपं । भूसुवोस्तिङीति गुणप्रतिषेधः । आगमस्यानुदात्तत्वे धातुस्वरः । स्वतवाँः पायुरित्यत्र संहितायां स्वतवान्पायौ । पा॰ ८. ३. ११. । इति नकारस्य रुत्वं । अत्रानुनासिकः पूर्वस्य तु वेत्याकारोऽनुनासिकः । रेफस्य विसर्जनीयः । कुप्वोः ᳲक ᳲपौ चेति ᳲप इत्यादेशः । अघायतः । अघमात्मन इच्छतीत्यर्थे सुपः क्यच् । अश्वाघस्यादित्यात्वं । तदंताच्छतृप्रत्ययः । शतुरनुम इति विभक्तेरुदात्तत्वं । उरुष्य । उरुशब्दः कंड्वादिः । लोटि रूपं । निघातः ॥

॥ अथ सप्तमी ॥

यस्ते भरादन्नियते चिदन्नं निशिषन्मंद्रमतिथिमुदीरत् ।
आ देवयुरिनधते दुरोणे तस्मिन्रयिर्ध्रुवो अस्तु दास्वान् ॥ ७ ॥

यः । ते । भरात् । अन्नियते । चित् । अन्नं । निऽशिषत् । मंद्रं । अतिथिं । उत्ऽईरत् ।
आ । देवऽयुः । इनधते । दुरोणे । तस्मिन् । रयिः । ध्रुवः । अस्तु । दास्वान् ॥ ७ ॥

हे अग्ने यः पुमानम्रियतेऽग्निमिच्छते ते तुभ्यं हविर्लेष्ट्यं पुरोडाशादिकमवं भरात् दातुं बिभृयात्। चिदिति चार्थे। यश्च मंद्रं मदकरं सोमं निशिषत् नितरां प्रयच्छति। यश्चातिथिमतिथिवत्पूज्यं त्वामुदीरत् उत्तरवेद्यां प्रणयति। आ अपि च यश्च देवयुर्देवत्वं कामयमानो दुरोणे स्वकीये गृह इनधते त्वां समिद्भिः समिंधते तस्मिन्नेतस्मिन्पुरुषे रयिः पुत्रो ध्रुव आस्तिक्यबुद्ध्या वैदिके मार्गे निश्चलोऽस्तु। तथा दास्वानौदार्योपेतश्चास्तु ॥ भरात्। डुभृञ् धारणपोषणयोरित्यस्य लेट्याडागमे रूपं। यद्वृत्तयोगादनिघातः। अम्रियते। अम्रमात्मन इच्छन्। क्यच्। क्यचि चेतीत्वं। ह्रस्वश्छांदसः। निशिषत्। शासु अनुशिष्टौ। लुङि सर्तिशास्त्यर्तिभ्यश्चेति च्लेरङादेशः। शास इदङ्हलोरितीत्वं। उदीरत्। ईर गतौ। लेटि व्यत्ययेन परस्मैपदं। अडागमः। आगमस्यानुदात्तत्वे धातुस्वरः। तिङि चोदात्तवतीति गतेर्निघातः। इनधते। ञिइंधी दीप्तौ। लटि व्यत्ययेन श्नम्। रुधादित्वात् श्नम्। श्नान्नलोप इति धातुनकारलोपः। क्ङिपरत्वाभावात् श्नसोरल्लोपभावः। यद्वृत्तयोगादनिघातः। श्नमः स्वरः। दास्वान्। दासृ दाने। संपदादिलक्षणो भावे क्विप्। तदस्यास्तीति मतुप्। मादुपधाया इति वत्वं। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः ॥

॥ अथाष्टमी ॥

यस्त्वा दोषा य उषसि प्रशंसात्प्रियं वा त्वा कृणवते हविष्मान्।
अश्वो न स्वे दम आ हेम्यावान्तमंहसः पीपरो दाश्वांसं ॥ ८ ॥
यः। त्वा। दोषा। यः। उषसि। प्रऽशंसात्। प्रियं। वा। त्वा। कृणवते। हविष्मान्।
अश्वः। न। स्वे। दमे। आ। हेम्याऽवान्। तं। अंहसः। पीपरः। दाश्वांसं ॥ ८ ॥

हे अग्ने यः पुमान् दोषा दोषायां रात्रौ त्वां प्रशंसात् संस्तुयात्। यश्चोषसि प्रातःकाले त्वां प्रशंसेत्। हविष्मान् संभृतहविष्को यो वा यजमानस्त्वा त्वां प्रियं हविर्भिः प्रीतं कृणवते कुर्यात् आ अथ दाश्वांसं हविर्दत्तवंतं तं यजमानं स्वे दमे स्वकीये गृहे हेम्यावान् सुवर्णनिर्मितकक्ष्यावानश्वो न अश्व इव संचरंस्त्वमंहसः पापरूपाद्दारिद्र्यात्पीपरः। पारं नय। तस्मै यजमानाय बहु धनं प्रयच्छेत्यर्थः ॥ दोषा। सप्तम्या आकारः। प्रशंसात्। शंसु स्तुतौ। लेट्याडागमे रूपं। कृणवते। कृवि हिंसाकरणयोरित्यस्य लेटि धिन्विकृण्व्योरच्चेत्युप्रत्ययः। लेटोऽडाटावित्य-

डागमः । यद्वृत्तयोगादनिघातः । प्रत्ययस्वरः । हेम्यावान् । हेमार्हति । छंदसि चेति यः । पीपरः । पॄ पालनपूरणयोरित्यस्य ण्यंतस्य लुङि चङि रूपं । निघातः ॥

॥ अथ नवमी ॥

यस्तुभ्यमग्ने अमृताय दाशद्दुवस्त्वे कृणवते यतस्रुक् ।
न स राया शशमानो वि योषन्नैनमंहः परि वरदघायोः ॥ ९ ॥

यः । तुभ्यं । अग्ने । अमृताय । दाशत् । दुवः । त्वे इति । कृणवते । यतऽस्रुक् ।
न । सः । राया । शशमानः । वि । योषत् । न । एनं । अंहः । परि । वरत् । अघऽयोः ॥ ९ ॥

हे अग्ने यो यजमानोऽमृताय मरणधर्मरहिताय तुभ्यं दाशत् हवींषि प्रयच्छेत् । यतस्रुक् संयतस्रुक् यश्च यजमानस्त्वे त्वयि दुवः परिचर्यां कृणवते करोति शशमानः स्तोत्रं कुर्वाणः स यजमानो राया धनेन न वियोषत् । न पृथग्भवेत् । सदा धनयुक्तो भवेदित्यर्थः । अघायोः पापमिच्छतो हिंसकस्य संबंध्यंह आहननं पापमेनं यजमानं न परिवरत् । न परिवृणुयात् । न स्पृशेदित्यर्थः ॥ दाशत् । दाशृ दाने । लेट्यडागमे रूपं । त्वे । सुपां सुलुगिति सप्तम्याः शे इत्यादेशः । कृणवते । यद्वृत्तयोगादनिघातः । योषत् । यु मिश्रणे । लेटि सिब्बहुलमिति सिप् । अडागमः । निघातः । वरत् । वृञ् वरणे । लेटि रूपं ॥

॥ अथ दशमी ॥

यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं रराणः ।
प्रीतेदसद्धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः ॥ १० ॥

यस्य । त्वं । अग्ने । अध्वरं । जुजोषः । देवः । मर्तस्य । सुऽधितं । रराणः ।
प्रीता । इत् । असत् । होत्रा । सा । यविष्ठ । असाम । यस्य । विधतः । वृधासः ॥ १० ॥

हे अग्ने रराणो रममाणो देवो दीप्यमानस्त्वं यस्य मर्तस्य मनुष्यस्य संबंधि सुधितं त्वदर्थं सुष्ठु निहितमध्वरमनुपहतं हविर्लक्षणमन्नं जुजोषः सेवसे हे यविष्ठ युवतम सा होत्रा स होता यजमानः प्रीतेदसत् । प्रीत एव भवेत् । असाम तस्य यजमानस्य संबंधिनो भवेम यस्य विधतोऽग्निपरिचर्यां कुर्वतो यजमानस्य होत्रादयो वृधासो यज्ञस्य वर्धयितारो भवंति ॥ जुजोषः । जुषी प्रीतिसेवनयोरित्यस्य बहुलं छंदसीति श्लुः । अडागमः । अभ्यस्तस्वरः । सुधितं । दधातेर्नि-

हायां सुधितवसुधितेति निपातनात् ब्यादेशः। गतिरनंतर इति गतेः स्वरः। असाम। असेर्लोट्याडुत्तमस्य पिच्चेत्याडागमः। उत्तमस्य पित्त्वाभावादनुदात्तत्वे धातुस्वरः। विधतः। विध विधाने। तुदादिः। शतुरनुम इति विभक्तेरुदात्तत्वं ॥

॥ इति तृतीयस्य चतुर्थे सप्तदशो वर्गः ॥

॥ अथैकादशी ॥

चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान्।

राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ॥ ११ ॥

चित्तिं। अचित्तिं। चिनवत्। वि। विद्वान्। पृष्ठाऽइव। वीता। वृजिना। च। मर्तान्।

राये। च। नः। सुऽअपत्याय। देव। दितिं। च। रास्व। अदितिं। उरुष्य ॥ ११ ॥

विद्वान् प्राणिनां पुण्यपापरूपाणि कर्माणि जानानः सोऽग्निश्चित्तिं ज्ञातव्यं पुण्यमचित्तिमनुपादेयत्वेनाचेतनीयं पापं। यद्वा चित्तिं ज्ञानमचित्तिमज्ञानं विचिनवत्। विचिनोतु। पृथक्करोतु। तत्र दृष्टांतः। पृष्ठेव। यथाश्वपालोऽश्वानां वीता कांतानि वृजिना दुर्वहाणि च पृष्ठा पृष्ठानि ज्ञेयोपादेयत्वेन पृथक्करोति तद्वत्। किंच मर्तान्पुण्यकृतोऽपुण्यकृतश्च मनुष्यान् पृथक्करोतु। हे देवाग्ने स्वपत्याय शोभनपुत्रोपेताय राये धनाय नोऽस्मान् कुरु। दितिं दातारं च रास्व। देहि। अदितिं। पंचम्यर्थे द्वितीया। अदातुः सकाशादुरुष्य। रक्ष ॥ चित्तिं। चिती संज्ञाने। स्त्रियां क्तिन्। नित्त्वादाद्युदात्तः। चिनवत्। चिनोतेर्लेट्यडागमः। दितिं। दाण् दाने। कर्मणि क्तिच्। रास्व। रा दाने। लोटि व्यत्ययेनात्मनेपदं। चवायोगे प्रथमेति न निघातः ॥

॥ अथ द्वादशी ॥

कविं शशासुः कवयोऽदब्धा निधारयंतो दुर्यास्वायोः।

अतस्त्वं दृश्याँ अग्न एतान्पड्भिः पश्येरद्भुताँ अर्य एवैः ॥ १२ ॥

कविं। शशासुः। कवयः। अदब्धाः। निऽधारयंतः। दुर्यासु। आयोः।

अतः। त्वं। दृश्यान्। अग्ने। एतान्। पट्ऽभिः। पश्येः। अद्भुतान्। अर्यः। एवैः ॥ १२ ॥

हे अग्ने आयोर्मनुष्यस्य दुर्यासु गृहेष्वदब्धाः केनाप्यतिरस्कृता निधारयंतो निवसंतः कवयः क्रांतदृशो देवाः कविं मेधाविनं त्वां शशासुः। होता भवेति

शशंसुः। अतः कारणादर्यो यज्ञस्य स्वामी त्वं हर्यशान्दर्शनीयानद्भुतानाश्चर्यरूपोपेतानिंद्रादीनेतान्देवानेवैर्गमनशीलैः पद्भिः पादैः स्वतेजोभिः पश्य। आनीयाः॥ हर्यशान्। हशिर् प्रेक्षणे। ऋदुपधाच्चाक्लृपिचृतेः। पा॰ ३.१.११०। इति कर्मणि क्यप्। किच्चादगुणः। पिच्चादनुदात्तत्वे धातुस्वरः॥

॥ अथ त्रयोदशी ॥

त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ।
रत्नं भर शशमानाय घृष्वे पृथु श्चंद्रमवसे चर्षणिप्राः॥ १३॥
त्वं। अग्ने। वाघते। सुऽप्रनीतिः। सुतऽसोमाय। विधते। यविष्ठ।
रत्नं। भर। शशमानाय। घृष्वे। पृथु। चंद्रं। अवसे। चर्षणिऽप्राः॥ १३॥

हे यविष्ठ युवतम घृष्वे दीप्तियुक्त यद्वा परेषां घर्षणशील हे अग्ने चर्षणिप्रा अपेक्षितप्रदानेन मनुष्याणां कामपूरकः सुप्रणीतिः सुष्ठुत्तरवेद्यां प्रणयनीयस्त्वं सुतसोमाय विधते तव परिचरणं कुर्वते शशमानाय त्वां स्तुवते वाघते यज्ञनिर्वाहकाय यजमानाय पृथु प्रभूत चंद्रमाह्लादकारि रत्नमुत्तमं धनमवसे रक्षणाय भर। आहर। प्रयच्छेत्यर्थः॥ सुप्रणीतिः। णीञ् प्रापणे। कर्मणि क्तिन्। तादौ च निति कृतीत्यनंतरप्रशब्दस्योदात्तत्वं। पृथु श्चंद्रमित्यत्र संहितायां ह्रस्वाच्चंद्रोत्तरपदे मंत्र इति सुडागमः। श्चुत्वेन शकारः॥

॥ अथ चतुर्दशी ॥

अधा ह यद्वयमग्ने त्वाया पड्भिर्हस्तेभिश्चकृमा तनूभिः।
रथं न क्रंतो अपसा भुरिजोर्ऋतं येमुः सुध्य आशुषाणाः॥ १४॥
अध। ह। यत्। वयं। अग्ने। त्वाऽया। पट्ऽभिः। हस्तेभिः। चकृम। तनूभिः।
रथं। न। क्रंतः। अपसा। भुरिजोः। ऋतं। येमुः। सुऽध्यः। आशुषाणाः॥ १४॥

हे अग्ने अध ह अथ खलु वयं त्वाया त्वत्कामनया पड्भिः पादैर्हस्तेभिर्हस्तैस्तनूभिरन्यैश्चावयवैश्चकृम यत् यस्मात्कारणात्कर्मसिद्ध्यर्थं त्वामुपपादयामस्तस्मात्सुध्यः सुकर्माण आशुषाणाः कर्माणि व्याप्नुवंतस्तेऽगिरस ऋतं सत्यभूतं त्वां भुरिजोः। बिभृतः कर्मकरणसामर्थ्यं पदार्थान्वेति भुरिजौ बाहू। तयोरपसा मंथनाख्येन कर्मणा येमुः। उद्यच्छंति। तत्र दृष्टांतः। रथं न। यथा क्रंतः कारवः शिल्पिनः

क्रामंतोऽध्वगा वा ह्रस्तयोर्यया रथमुद्यच्छंति तद्वत्। यद्वा भुरिजोः। देवान्मनुष्यांश्च बिभृत इति भुरिजौ द्यावापृथिव्यौ। तयोर्मध्येऽपसा परिचरणकर्मणा सत्यभूतं तमग्निं येमुः। उद्यच्छंति॥ अध। संहितायां निपातस्य चेति दीर्घः। कृंतः। करोतेः शतरि बहुलं छंदसीति विकरणस्य लुक्। प्रत्ययस्वरः। भुरिजोः। डुभृञ् धारणपोषणयोः। भृञ उच्च। उ० २.७१.। इतीजिप्रत्ययः। धातोरुकारो रपरः। प्रत्ययस्वरः॥

॥ अथ पंचदशी ॥

अधा मातुरुषसः सप्त विप्रा जायेमहि प्रथमा वेधसो नॄन्।
दिवस्पुत्रा अंगिरसो भवेमाद्रिं रुजेम धनिनं शुचंतः॥१५॥

अध। मातुः। उषसः। सप्त। विप्राः। जायेमहि। प्रथमाः। वेधसः। नॄन्।
दिवः। पुत्राः। अंगिरसः। भवेम। अद्रिं। रुजेम। धनिनं। शुचंतः॥१५॥

वामदेवोऽन्यैः षड्भिरंगिरोभिः सह ब्रूते। अधापि च मातुरुषसः सकाशात्सप्त सप्तसंख्याका विप्राः प्राज्ञा वयं स्मः। प्रथमाः श्रेष्ठा वयं वेधसोऽग्नेः परिचारकान्नॄन् वेधसो विधातॄन् रश्मीन् वा जायेमहि। वयं जनयामः। दिवो द्योतमानस्यादित्यस्य पुत्रा वयमंगिरसो भवेम। भूतिमंतः स्याम। शुचंतो दीप्यमाना वयं धनिनमुदकवंतमद्रिं मेघं रुजेम। वर्षार्थं भिद्याम। यद्वा धनिनं पणिनामकासुरापहृतगोधनयुक्तमद्रिं पर्वतं रुजेम। अंगिरसामादित्यपुत्रत्वमेवमाम्नायते। तस्य यद्रेतः प्रथममुददीप्यत तदसावादित्योऽभवदित्युपक्रम्य येऽंगारा आसंस्तेऽंगिरसोऽभवन्निति॥ जायेमहि। जनी प्रादुर्भावे। लिङि ज्ञाजनोर्जेति जादेशः। वेधसः। डुधाञ् धारणपोषणयोरित्यस्माद्विधाञो वेध च। उ० ४.२२४.। इत्यसिप्रत्ययः। धातोर्वेध इत्यादेशः। दिवस्पुत्रा इत्यत्र संहितायां षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं। रुजेम। रुजो भंगे। अदादिः। लिङि रूपं॥

॥ इति तृतीयस्य चतुर्थेऽष्टादशो वर्गः॥

॥ अथ षोडशी ॥

अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिंदंतो अरुणीरप व्रन्॥१६॥

अधं। यथा। नः। पितरः। परासः। प्रत्नासः। अग्ने। ऋतं। आऽशुषाणाः।
शुचि। इत्। अयन्। दीधितिं। उक्थऽशसः। क्षाम। भिंदंतः। अरुणीः। अप। व्रन् ॥१६॥

हे अग्ने अधापि च परासः श्रेष्ठाः प्रत्नासः पुराणा ऋतं सत्यभूतं यज्ञं यथा यथावदाशुषाणा अश्नुवाना नोऽस्माकं पितरोऽंगिरसः शुचि दीप्तं स्थानमयन्। अगच्छन्। तथा दीधितिं तेजश्चागच्छन्। किंच उक्थशास उक्थानां शस्त्राणां शंसितारः क्षाम क्षयकारणं तमः पापं वा भिंदंतो विनाशयंतोऽंगिरसोऽरुणीररुणवर्णाः पणिभिरपहृता गा उषसो वा अपव्रन्। अपावृण्वन्। प्रकाशितवंत इत्यर्थः ॥ अयन्। इण् गतौ। लङीणो यणिति यण्। व्यत्ययेनाडागमः। दीधितिं। दीधीङ् दीप्तिदेवनयोरित्यस्मात् क्तिनि हृस्वश्छांदसः। नित्त्वादाद्युदात्तः। उक्थशासः। उक्थशब्द उपपदे शंसु स्तुतावित्यस्मान्मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्निति ण्विन् नकारलोपश्च निपातनादेव। पदकाले हृस्वश्छांदसः। अरुणीः। गौरादिङीषंतः। एकादेशस्वरः। व्रन्। वृणोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। निघातः ॥

आग्रयण आग्नेंद्रस्य हविषः सुकर्माण इति याज्या। सूचितं च। सुकर्माणः सुरुचो देवयंतो विश्वे देवास आ गत। आ० २.९.। इति ॥

॥ सैषा सूक्ते सप्तदशी ॥

सुकर्माणः सुरुचो देवयंतोऽयो न देवा जनिमा धमंतः।
शुचंतो अग्निं ववृधंत इंद्रमूर्वं गव्यं परिषदंतो अग्मन् ॥१७॥
सुऽकर्माणः। सुऽरुचः। देवऽयंतः। अयः। न। देवाः। जनिम। धमंतः।
शुचंतः। अग्निं। ववृधंतः। इंद्रं। ऊर्वं। गव्यं। परिऽसदंतः। अग्मन् ॥१७॥

सुकर्माणः सुष्ठ्वनुष्ठितयागादिकर्माणः सुरुचः शोभनदीप्तयो देवयंतो देवान् कामयमाना देवा देवनशीलाः स्तोतारो जनिम स्वकीयं मानुषं जन्म धमंतो यागादिलक्षणेन कर्मणा निर्मलीकुर्वंतः। तत्र दृष्टांतः। अयो न। यथा कर्मारा अयो भस्त्रेण धमंति तद्वत्। तादृशा अग्निं शुचंतो हविर्भिर्दीपयंत इंद्रं ववृधंतः सोमेन स्तुत्या वा वर्धयंतोऽंगिरसः परिषदंतः परितः सीदंतः संत ऊर्वं महांतं गव्यं गोसंघमग्मन्। प्राप्नुवन् ॥ सुकर्माणः। सोर्मनसीत्युत्तरपदाद्युदात्तत्वं। धमंतः।

ध्मा शब्दाग्निसंयोगयोः। शतरि पाघ्रादिना धमादेशः। शपः पित्त्वादनुदात्तत्वे शतुर्लसार्वधातुकस्वरः। ववृधंतः। वृधु वर्धने। व्यत्ययेन परस्मैपदं। शतरि शपः श्लुः। गव्यं। समूह इत्यर्थे खलगोरथादिति यः। अग्मन्। गमेर्लुङि च्लेर्लुकि रूपं॥

॥ अथाष्टादशी ॥

आ यूथेव क्षुमति पश्वो अख्यद्देवानां यज्जनिमांत्युग्र।
मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायोः॥१८॥

आ। यूथाऽइव। क्षुऽमति। पश्वः। अख्यत्। देवानां। यत्। जनिम। अंति। उग्र।
मर्तानां। चित्। उर्वशीः। अकृप्रन्। वृधे। चित्। अर्यः। उपरस्य। आयोः॥१८॥

उग्र तेजस्विन्हे अग्ने देवानामंगिरसां संबंधि यज्जनिम गोसंघमंति पर्वतस्य समीप आख्यत्। आ समंतादिंद्रोऽपश्यत्। तत्र दृष्टांतः। यूथेव। यथा पश्वः पशूनां गवां यूथानि क्षुमत्यन्नवत्याढ्यगृहे वर्तमानानि पश्यंति जनास्तद्वत्। यद्वा हे अग्ने तव परिचारकोऽगिरसो गणो देवानामिंद्रादीनां यज्जनिम योऽयं जनोऽति मदंतिके पश्वः पणिभिरपहृतान्पशूनाख्यत्। समंतात्पश्यति। तत्र दृष्टांतः। यथा क्षुमति शब्दं कुर्वाणे गवां यूथा यूथे पशून्पश्यंति तद्वत्। मर्तानां चिन्मनुष्याणामुर्वशीरूरुभ्यामश्नुवानाः। उर्वभ्यश्नुत ऊरुभ्यामश्नुत इति यास्कः। नि० ५.१३.। प्रजा अकृप्रन्। ताभिरानीताभिर्गोभिः क्लृप्ताः समर्था अभवन्। चिदपि च अर्यः स्वामी लब्धगोधन उपरस्योप्तस्य निषिक्तस्यापत्यस्य वृधे वर्धनाय समर्थो भवति। तथायोर्मनुष्यस्य भृत्यादेश्च पोषणे समर्थो भवति॥ यूथेव। शसः सप्तम्या वा डादेशः। क्षुमति। क्षुदित्यन्ननाम। यद्वा टुक्षु शब्दे। भावे क्विप्। छांदसस्तकारलोपः। तदस्यास्तीति मतुप्। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। अख्यत्। ख्या प्रकथने। लुङि च्लेरस्यतिवक्तिख्यातिभ्योऽङित्यङादेशः। आतो लोपः। जनिम। जनी प्रादुर्भावे। हृजनिभ्यामिमनिन्निति इमनिन्प्रत्ययः। नित्त्वादाद्युदात्तः। अकृप्रन्। कृपू सामर्थ्ये। लङि बहुलं छंदसीति विकरणस्य लुक्। रुडागमः॥

॥ अथैकोनविंशी ॥

अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः।
अनूनमग्निं पुरुधा सुश्चंद्रं देवस्य मर्मृजतश्चारु चक्षुः॥१९॥

अकर्म । ते । सुऽअपसः । अभूम । ऋतं । अवस्रन् । उषसः । विऽभातीः ।
अनूनं । अग्निं । पुरुधा । सुऽचंद्रं । देवस्य । मर्मृजतः । चारु । चक्षुः ॥१९॥

हे अग्ने ते तव परिचरणमकर्म । कुर्मः । तेन कर्मणा स्वपसः शोभनकर्माणोऽभूम । विभातीर्व्युच्छंत्य उषस ऋतं तेजोऽवस्रन् । आच्छादयंति । धारयंतीत्यर्थः । तथा ता उषसोऽनूनं संपूर्णं पुरुधा बहुधा सुश्चंद्रं सुष्ठाह्लादकारिणं यद्वा सुहिरण्यमग्निं धारयंति । किंच देवस्य द्योतमानस्य तव चारु मनोहरं चक्षुस्तेजो मर्मृजतः परिचरंतो वयं स्वपसोऽभूमेति पूर्वेणान्वयः ॥ अकर्म । करोतेर्लेङि बहुलं छंदसीति विकरणस्य लुक् । मर्मृजतः । मृजूष् शुद्धौ । यङ्कुकि रुग्रिकौ च लुकीत्यभ्यासस्य रुगागमः । शतरि नाभ्यस्ताच्छतुरिति नुमभावः । अभ्यस्तस्वरः ॥

॥ अथ विंशी ॥

एता ते अग्न उचथानि वेधोऽवोचाम कवये ता जुषस्व ।
उच्छोचस्व कृणुहि वस्यसो नो महो रायः पुरुवार प्र यंधि ॥२०॥
एता । ते । अग्ने । उचथानि । वेधः । अवोचाम । कवये । ता । जुषस्व ।
उत् । शोचस्व । कृणुहि । वस्यसः । नः । महः । रायः । पुरुऽवार । प्र । यंधि ॥२०॥

वेधो विधातर्हे अग्ने कवये मेधाविने ते तुभ्यमेतैतान्युचथान्युक्थानि शस्त्राण्यवोचाम । त्वं ता तानि जुषस्व । सेवस्व । किंच त्वमुच्छोचस्व । उद्दीप्यस्व । नोऽस्मान्वस्यसोऽतिशयेन धनयुक्तान् कृणुहि । कुरु । तदेवोच्यते । पुरुवार पुरुभिर्बहुभिर्वरणीय महो रायो महद्धनं प्रयंधि । अस्मभ्यं प्रयच्छ ॥ अवोचाम । वच परिभाषणे । लुङि च्लेरङादेशः । पादादित्वादनिघातः । कृणुहि । कृवि हिंसाकरणयोरित्यस्य लोटि रूपं । तिङ उत्तरत्वादनिघातः । वस्यसः । वसुमच्छब्दादीयसुनि विन्मतोर्लुगिति मतुपो लुकि टिलोपे च कृत ईकारलोपश्छांदसः । यंधि । यमेर्लोटि बहुलं छंदसीति विकरणस्य लुक् । वा छंदसीति हेर्विकल्पेन पित्त्वादङित्वश्चेति धिरादेशः ॥

॥ इति तृतीयस्य चतुर्थे एकोनविंशो वर्गः ॥

आ वो राजानमिति षोडशर्चं तृतीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं । आ वः षोडशेत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः ॥

॥ तत्र प्रथमा ॥

आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वं ॥ १ ॥

आ । वः । राजानं । अध्वरस्य । रुद्रं । होतारं । सत्यऽयजं । रोदस्योः ।
अग्निं । पुरा । तनयित्नोः । अचित्तात् । हिरण्यऽरूपं । अवसे । कृणुध्वं ॥ १ ॥

हे ऋत्विग्यजमाना अध्वरस्य यज्ञस्य राजानमधिपतिं होतारं देवानामाह्वातारं रुद्रं रोरूयमाणं द्रवंतं शत्रून्रोदयंतं वा । यद्वा एषा वा अग्नेस्तनूर्यद्रुद्र इति रुद्रात्मकं रोदस्योर्द्यावापृथिव्योः सत्ययजं सत्यस्यान्नस्य दातारं । यद्वा सत्ययजं सत्येन हविषा देवान्यजंतं । यद्वा रोदस्योर्व्याप्य वर्तमानं हिरण्यरूपं सुवर्णप्रभं । एवंविधमग्निं वो युष्माकमवसे रक्षणाय तनयित्नोः । तनयित्नुरशनिः स ह्याकस्मिकः । तत्सदृशादचित्तात् । न विद्यते चित्तं यस्मिन् तदचित्तं । चित्तोपलक्षितसर्वेंद्रियोपसंहारो मरणमिति यावत् । तन्मरणात्पुरा प्रागेवा कृणुध्वं । यूयं समंताद्धविर्भिरग्निं भजध्वं ॥ रुद्रं । रोदयते रोदेर्णिलुक्च । उ॰ २.२३. । इति रक्प्रत्ययः । तनयित्नोः । तनिः शब्दार्थः । चुरादिरदंतः । स्तनिहृषिपुषिगमिमनिभ्यो णेरित्नुच् । उ॰ ३.२९. । इतीत्नुच्प्रत्ययः । चित्स्वरेणांतोदात्तः । सुपा सहैकादेश एकादेशस्वरः । कृणुध्वं । कृवि हिंसाकरणयोः । लोटि रूपं ॥

॥ अथ द्वितीया ॥

अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः ।
अर्वाचीनः परिवीतो नि षीदेमा उ ते स्वपाक प्रतीचीः ॥ २ ॥

अयं । योनिः । चकृम । यं । वयं । ते । जायाऽइव । पत्ये । उशती । सुऽवासाः ।
अर्वाचीनः । परिऽवीतः । नि । सीद । इमाः । ऊं इति । ते । सुऽअपाक । प्रतीचीः ॥ २ ॥

हे अग्ने त्वदर्थं यमुत्तरवेदिलक्षणं प्रदेशं वयं चकृम कुर्मः अयं योनिस्तव स्थानं भवति । तत्र दृष्टांतः । जायेव । यथा पत्य उशती पतिं कामयमाना सुवासाः शोभनवस्त्रोपेता जाया स्वात्मसमीपे तस्य स्थानं करोति तद्वत् । हे स्वपाक स्वपक्व सुकर्मन्नग्ने त्वं परिवीतो यष्टव्यदेवैस्तेजोभिर्वा परिवीतोऽर्वाचीनोऽस्मदभिमुखः सन् निषीद । उत्तरवेद्यामुपविश । तत्र स्थितस्य ते तवेमा ज्वालाः

स्तुतयो वा प्रतीचीस्त्वदभिमुखाः प्रवर्तंते ॥ चकृम । करोतेर्लिटि रूपं । वाक्यभेदान्निघाताभावः । अर्वाचीनः । विभाषांचेरदिगिति खः । परिवीतः । व्येञ् संवरणे । कर्मणि निष्ठा । यजादित्वात्संप्रसारणं । गतिरनंतर इति गतेः स्वरः ॥

॥ अथ तृतीया ॥

आ॒शृ॒ण्व॒ते अदृ॑पिताय॒ मन्म॑ नृ॒चक्ष॑से सुमृ॒ळी॒काय॑ वे॒धः ।
दे॒वाय॑ श॒स्तिम॒मृता॑य शंस॒ ग्रावे॑व॒ सोता॑ मधु॒षुद्यमीळे॑ ॥ ३ ॥
आ॒ऽशृ॒ण्व॒ते । अदृ॑पिताय । मन्म॑ । नृ॒ऽचक्ष॑से । सु॒ऽमृ॒ळी॒काय॑ । वे॒धः॒ ।
दे॒वाय॑ । श॒स्तिं । अ॒मृता॑य । शं॒स॒ । ग्रावा॑ऽइव । सोता॑ । म॒धु॒ऽसुत् । यं । ईळे॑ ॥ ३ ॥

वेधः स्तोत्राणां कर्तर्हे स्तोतराशृण्वते स्तोत्राकर्णनपरायादृपितायादृप्तायाप्रमत्ताय नृचक्षसे नृणां द्रष्टे सुमृळीकाय सुसुखायामृताय मरणधर्मरहिताय देवाय तस्मा अग्नये मन्म स्तोत्रं शस्तिं शस्त्रं च शंस । मधुषुन्मदकरस्य सोमस्य सोता । तत्र दृष्टांतः । ग्रावेव । यथा ग्रावा सोमस्य सोता तद्वत् । सोमाभिषवं कुर्वाणो यजमानो यमग्निमीळे स्तौति तस्मै शंसेति समन्वयः । यद्वा मधुषुत्सोमसुद्यजमानोऽग्निमीळे । स्तौति । तत्र दृष्टांतः । यथा ग्रावा सोमस्य सोता शब्दं करोति । प्रैते वदंतु प्र वयं वदाम ग्रावभ्यः । ऋग्वे० १०. ९४. १. । इत्यत्र ग्राव्णां कर्तृत्वं श्रुतमिति ॥ आशृण्वते । शतुरनुम इति विभक्तेरुदात्तत्वं । ईळे । ईड स्तुतौ । लटि लोपस्त आत्मनेपदेष्विति तलोपः । यद्वा लिटि तशब्दस्यैशादेशे कृते रूपं ॥

॥ अथ चतुर्थी ॥

त्वं चि॑न्नः॒ शम्या॑ अग्ने अ॒स्या ऋ॒तस्य॑ बोध्यृतचित्स्वा॒धीः ।
क॒दा त॑ उ॒क्था स॑ध॒माद्या॑नि क॒दा भ॑वंति स॒ख्या गृ॒हे ते॑ ॥ ४ ॥
त्वं । चित् । नः॒ । शम्यै॑ । अ॒ग्ने॒ । अ॒स्याः । ऋ॒तस्य॑ । बो॒धि॒ । ऋ॒त॒ऽचि॒त् । सु॒ऽआ॒धीः ।
क॒दा । ते॒ । उ॒क्था । स॒ध॒ऽमाद्या॑नि । क॒दा । भ॒वं॒ति॒ । स॒ख्या । गृ॒हे । ते॒ ॥ ४ ॥

हे अग्ने त्वं चित्त्वमेव शम्यै । शमीशब्दः कर्मनाम । अस्याः शम्यै नोऽस्मत्संबंधिनोऽस्य कर्मणो देवता भवसि । हे ऋतचित् सत्यज्ञ हे अग्ने स्वाधीः सुकर्मा सुध्यानो वा त्वमृतस्य बोधि । अस्मदीयं स्तोत्रं बुध्यस्व । ते तव सधमाद्यानि सहमदनिमित्तान्युक्था शस्त्राणि कदा कस्मिन्काले भवंति । भविष्यंति । तथा-

स्मदीये गृहे ते त्वया सह सख्या सख्यानि कदा भविष्यंति ॥ सधमाद्यानि। माद्यतेर्ण्यंतस्याचो यदिति यत्। सध मादस्थयोरिति सहस्य सधादेशः। भवंति। विभाषा कदाकर्ह्योः। पा० ३.३.५.। इति भविष्यदर्थे लट् ॥

॥ अथ पंचमी ॥

कथा ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः।
कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भगाय ॥५॥

कथा। ह। तत्। वरुणाय। त्वं। अग्ने। कथा। दिवे। गर्हसे। कत्। नः। आगः।
कथा। मित्राय। मीळ्हुषे। पृथिव्यै। ब्रवः। कत्। अर्यम्णे। कत्। भगाय ॥५॥

हे अग्ने त्वं तदस्मदीयं पापं वरुणाय कथा गर्हसे। केन हेतुना गर्हापूर्वमावेदयेः। हेति पूरणः। दिवे द्युलोकाय द्योतमानाय सूर्याय वा कथा कथं तत्पापमावेदयेः। नोऽस्माकमागस्तत्पापं कत्किमस्ति। त्वत्परिचरणान्नास्तीत्यर्थः। तथा मीळ्हुषेऽभिमतफलसेक्त्रे मित्राय पृथिव्यै च कथा ब्रवः। कथमागो ब्रूयाः। अर्यम्णे देवाय भगायैतन्नामकाय च देवाय कत्कथं ब्रूयाः ॥ कथा। किंशब्दात्था हेतौ च छंदसीति थाप्रत्ययः। प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञायां किमः कः। पा० ७.२.१०३.। इति कादेशः। मीळ्हुषे। मिह सेचने। दाश्वान् साह्वान् मीढ्वांश्चेति निपातितः। ब्रवः। ब्रूञ् व्यक्तायां वाचि। लेटि लेटोऽडाटावित्यडागमः। पादादित्वादनिघातः। आगमस्यानुदात्तत्वाद्धातुस्वरः ॥

॥ इति तृतीयस्य चतुर्थे विंशो वर्गः ॥

॥ अथ षष्ठी ॥

कद्धिष्ण्यासु वृधसानो अग्ने कद्वाताय प्रतवसे शुभंये।
परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥६॥

कत्। धिष्ण्यासु। वृधसानः। अग्ने। कत्। वाताय। प्रऽतवसे। शुभंऽये।
परिऽज्मने। नासत्याय। क्षे। ब्रवः। कत्। अग्ने। रुद्राय। नृऽघ्ने ॥६॥

हे अग्ने धिष्ण्यास्वाग्नीध्रीयादिधिष्ण्येषु वृधसानो घृताद्याहुतिभिर्वर्धमानस्त्वं कत्कथं ब्रूयाः। प्रतवसे प्रकृष्टबलाय शुभंये शुभस्य प्रापयित्रे परिज्मने परितो गंत्रे नासत्याय सत्यस्य नेत्रे। यद्वा न विद्यतेऽसत्यं यस्य तस्मै वाताय

वायवे। यद्वा नासत्यायेति वचनव्यत्ययः। नासत्याभ्यामश्विभ्यां। क्षे। क्षेति पृथिवीमाह। क्षियंति निवसंत्यस्यां प्राणिन इति। तस्यै क्षे पृथिव्यै च कत्कथं ब्रूयाः। हे अग्ने नृघ्ने नृणां पापकृतां हंत्रे रुद्राय देवाय कत्कथमागो ब्रवः। ब्रूयाः॥ वृधसानः। वृधु वर्धने। असानजित्यनुवृत्तावृंजिवृधिमंदिसहिभ्यः किदित्यसानच्प्रत्ययः। कित्त्वादगुणः। चित्त्वादंतोदात्तः। शुभंये। या प्रापणे। विच्। तत्पुरुषे कृति बहुलमिति द्वितीयाया अलुक्। कृत्स्वरः। क्षे। क्षि निवासगत्योः। अन्येभ्योऽपि दृश्यत इत्यधिकरणे डः। ततष्टाप्। चतुर्थ्येकवचन आतो धातोरित्यत्रात इति योगविभागादाकारलोपः। नृघ्ने। हन हिंसागत्योः। बहुलं छंदसीति क्विप्॥

॥ अथ सप्तमी ॥

कथा महे पुष्टिंभरायं पूष्णे कद्रुद्राय सुमखाय हविर्दे।
कद्विष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै ॥ ७ ॥

कथा। महे। पुष्टिंऽभरायं। पूष्णे। कत्। रुद्रायं। सुऽमखाय। हविःऽदे।
कत्। विष्णवे। उरुऽगायाय। रेतः। ब्रवः। कत्। अग्ने। शरवे। बृहत्यै ॥ ७ ॥

हे अग्ने महे महते पुष्टिंभराय पुष्टिधारकाय पूष्ण एतन्नामकाय देवाय कथा केन हेतुना पापं ब्रवीथाः। सुमखाय सुपूजनीयाय सुयज्ञाय वा हविर्देऽग्निरूपेण देवानां हविर्दात्रे। यद्वा स्विष्टकृत्त्वाद्धविषो दात्रे। रुद्राय कत्कथं ब्रूयाः। तथोरुगायायोरुभिर्बहुभिर्गीयमानाय। यद्वा प्रभूतकीर्त्तये विष्णवे रेतः क्षयहेतु पापं कत्कथं वदेः। शरवे। शृणाति पक्वा ओषधीरिति शरुः शरत्संवत्सरः। यद्वा हिंसिका निर्ऋतिः। बृहत्यै महत्यै शरदे निर्ऋत्यै वा कत्कथं पापं ब्रवः। ब्रूयाः॥ पुष्टिंभराय। डुभृञ् धारणपोषणयोः। संज्ञायां भृतृवृजीत्यादिना खच्। अरुर्द्विषदजंतस्य मुमिति पूर्वपदस्य मुमागमः। चित्त्वादंतोदात्तः। समासे कृत्स्वरः। हविर्दे। अनुदात्तस्य च यत्रोदात्तलोप इति सुप उदात्तत्वं। शरवे। शॄ हिंसायां। शॄस्वृस्निहित्रप्यसीत्यादिना उप्रत्ययः। निदित्यनुवृत्तेराद्युदात्तः॥

॥ अथाष्टमी ॥

कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः।
प्रति ब्रवोऽदितये तुराय साधा दिवो जातवेदश्चिकित्वान् ॥ ८ ॥

कथा । शर्धाय । मरुतां । ऋताय । कथा । सूरे । बृहते । पृच्छ्यमानः ।
प्रति । ब्रवः । अदितये । तुराय । साध । दिवः । जातऽवेदः । चिकित्वान् ॥ ८॥

हे अग्ने ऋताय गंत्रे सत्यभूताय वा मरुतां शर्धाय बलभूताय गणाय कथा केन हेतुना मदीयमागः प्रतिब्रूयाः । तेन पृच्छ्यमानः सन् तस्मै बृहते महते सूरे सूर्याय कथा कथं वदेः । तथादितये देव्यै तुराय त्वरितगमनाय वायवे । अदितयेऽदीनाय तुराय वा । प्रतिब्रवः । मदीयमागः कथं प्रतिब्रूयाः । यस्मादेवं तस्मात् हे जातवेदोऽग्ने चिकित्वान् तत्सर्वं जानानस्त्वं दिवो दीप्तान्देवान् साध । साधय । गच्छ । यद्वा दिवो द्युलोकस्य यज्ञवहनलक्षणं कार्यं साध । कुरु ॥ सूरे । सर्वविधीनां छंदसि विकल्पितत्वात् ङेर्यत्वाभावः । अतो गुण इति पररूपत्वं । पृच्छ्यमानः । प्रच्छ ज्ञीप्सायां । कर्मणि यक् । ग्रहिज्यादिना संप्रसारणं । शानचो लसार्वधातुकानुदात्तत्वे यक्स्वरः । साध । राध साध संसिद्धौ । अंतर्भावितण्यर्थस्य लोटि व्यत्ययेन शप् ॥

॥ अथ नवमी ॥

ऋतेन ऋतं नियतमीळ आ गोरामा सचा मधुमत्पक्वमग्ने ।
कृष्णा सती रुशता धासिनैषा जामर्येण पयसा पीपाय ॥ ९॥
ऋतेन । ऋतं । निऽयतं । ईळे । आ । गोः । आमा । सचा । मधुऽमत् । पक्वं । अग्ने ।
कृष्णा । सती । रुशता । धासिना । एषा । जामर्येण । पयसा । पीपाय ॥ ९॥

हे अग्ने ऋतेन सत्यभूतेन यज्ञेन नियतमनुस्यूतमृतमुदकं गोर्धेनोः पय एळे । आयाचे । सांनाय्यादिहविरर्थं गव्यं पयस्त्वां याच इत्यभिप्रायः । आमापक्वा सा गौर्मधुमन्माधुर्योपेतं पक्वं पयः सचा सह धारयति । कृष्णा कृष्णवर्णा सत्येषा गौ रुशता श्वेतेन धासिना प्राणिनां धारकेण जामर्येण । जायंत इति जाः प्रजाः । ता जा अमर्येणामरणनिमित्तेन तेन पयसा पीपाय । प्रजाः प्याययति । तवैष महिमा यद्रसान्परिणामयन्नेवं करोषि ॥ पीपाय । प्यायतेर्लिटि लिड्यङोश्चेति पीभावः ॥

॥ अथ दशमी ॥

ऋतेन हि ष्मा वृषभश्चिदक्तः पुमाँ अग्निः पयसा पृष्ठ्येन ।
अस्पंदमानो अचरद्वयोधा वृषा शुक्रं दुदुहे पृश्निरूधः ॥ १०॥

ऋतेन । हि । स्म । वृषभः । चित् । अक्तः । पुमान् । अग्निः । पयसा । पृष्ठ्येन ।
अस्पंदमानः । अचरत् । वयःऽधाः । वृषा । शुक्रं । दुदुहे । पृश्निः । ऊधः ॥१०॥

वृषभोऽभिमतफलवर्षकः पुमान् श्रेष्ठः सोऽग्निर्ऋतेन सत्यभूतेन पृष्ठ्येन धारकेण पयसाक्तः सिक्तो भवति । हि ष्म चित् वयः पूरणाः । वयोधा अन्नदः सोऽग्निरस्पंदमान एकत्रावस्थितः सन् एवाचरत् । सर्वत्र तेजसा चरति । तथा वृषाणां वर्षकः पृश्निः सूर्यः शुक्रं पय ऊधोऽतरिक्षं मेघं वा दुदुहे । दोग्धि ॥ अक्तः । अंजू व्यक्तिम्रक्षणगतिषु । कर्मणि निष्ठा । दुदुहे । द्विकर्मकोऽयं धातुः । ऊधः । अकथितं चेति कर्मसंज्ञा ॥

॥ इति तृतीयस्य चतुर्थे एकविंशो वर्गः ॥

॥ अथैकादशी ॥

ऋतेनाद्रिं व्यसन्भिदंतः समंगिरसो नवंत गोभिः ।
शुनं नरः परि षदन्नुषासमाविः स्वरभवज्जाते अग्नौ ॥११॥

ऋतेन । अद्रिं । वि । असन् । भिदंतः । सं । अंगिरसः । नवंत । गोभिः ।
शुनं । नरः । परि । सदन् । उषसं । आविः । स्वः । अभवत् । जाते । अग्नौ ॥११॥

अंगिरसो मेधातिथिप्रभृतय ऋतेन यज्ञेन हेतुना गवां निरोधकमद्रिं पर्वतं भिदंतो विदारयंतः संतो व्यसन् । व्यक्षिपन् । ततस्ते गोभिः संनवंत । समगच्छन् । नरः कर्मणां नेतारस्ते शुनं सुखेनोषसं परि सदन् । परितः प्राप्नुवन् । ततः स्वः सूर्योऽप्याविरभवत् । सर्वमेतदग्नौ त्वयि जाते मंथनेन निष्पादिते सत्यभूदिति ॥ असन् । अस्यतेर्लुङि च्लेरस्यतिवक्तीत्यादिनाङादेशः । अनित्यमागमानुशासनमिति थुगभावः ॥

॥ अथ द्वादशी ॥

ऋतेन देवीरमृता अमृक्ता अर्णोभिरापो मधुमद्भिरग्ने ।
वाजी न सर्गेषु प्रस्तुभानः प्र सदमित्स्रवितवे दधन्युः ॥१२॥

ऋतेन । देवीः । अमृताः । अमृक्ताः । अर्णःऽभिः । आपः । मधुमत्ऽभिः । अग्ने ।
वाजी । न । सर्गेषु । प्रऽस्तुभानः । प्र । सदं । इत् । स्रवितवे । दधन्युः ॥१२॥

हे अग्ने अमृता अमरणहेतव अमृक्ता रक्षःप्रभृतिभिरबाधिता मधुमद्भिर्मधु-

योपेतैरखर्वैर्भिरुद्रकैर्युक्ता देवीर्दिव्यो नद्य ऋतेन सत्येन यज्ञेन वा हेतुनापि आप्यायाः सत्यः सदमित्सदैव स्रवितवे स्रवणाय प्रदधन्युः । प्रगच्छंति । तत्र दृष्टांतः । वाजी न । यथा सर्गेषु प्रेरणेषु प्रस्तुभानः प्रोत्साह्यमानोऽश्वः प्रगच्छति तद्वत् ॥ आपः । आप्लृ व्याप्तौ । आप्नोतेः क्विप् ह्रस्वश्चेति कर्मणि क्विप् । अप्तृन्नित्यादिना जसि दीर्घः । प्रस्तुभानः । स्तोभतिरर्चतिकर्मा ॥

॥ अथ त्रयोदशी ॥

मा कस्य यक्षं सदमिद्धुरो गा मा वेशस्य प्रमिनतो मापेः ।
मा भ्रातुरग्ने अनृजोर्ऋणं वेर्मा सख्युर्दक्षं रिपोर्भुजेम ॥ १३ ॥

मा । कस्य । यक्षं । सदं । इत् । हुरः । गाः । मा । वेशस्य । प्रऽमिनतः । मा । आपेः ।
मा । भ्रातुः । अग्ने । अनृजोः । ऋणं । वेः । मा । सख्युः । दक्षं । रिपोः । भुजेम ॥ १३ ॥

हे अग्ने हुरोऽस्माकं हिंसकस्य कस्य कस्यचिदपि जंतोर्यक्षं यज्ञं सदमित्सदैव मा गाः । कदाचिदपि मा गच्छ । प्रमिनतो हिंसकस्य वेशस्य प्रातिवेश्यस्य यज्ञं मा गाः । तथापेर्मद्व्यतिरिक्तस्य बंधोर्यज्ञं मा गच्छ । तथानृजोः कुटिलचित्तस्य भ्रातुर्ऋणामृणवद्देयं हविर्मा वेः । मा कामयेथाः । तथा वयमपि सख्युर्मित्रस्य रिपोः शत्रोर्दत्तं भोगसमर्थं धनं मा भुजेम । मा भुंजीमहि । किंतु त्वया दत्तं धनं भुंजीमहि ॥ हुरः । हृ प्रसह्यकरणे । क्विप् । बहुलं छंदसीत्युत्वं । सावेकाच इति विभक्तेरुदात्तत्वं । भुजेम । भुज पालनाभ्यवहारयोः । आशीर्लिङि व्यत्ययेन परस्मैपदं । लिङ्याशिष्यङ्क्तित्यङ्प्रत्ययः ॥

॥ अथ चतुर्दशी ॥

रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः ।
प्रति ष्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद्वावृधानं ॥ १४ ॥

रक्ष । नः । अग्ने । तव । रक्षणेभिः । ररक्षाणः । सुऽमख । प्रीणानः ।
प्रति । स्फुर । वि । रुज । वीळु । अंहः । जहि । रक्षः । महि । चित् । ववृधानं ॥ १४ ॥

सुमख सुयज्ञ सुधनेति वा हे अग्ने ररक्षाणो भृशमस्माकं रक्षिता प्रीणानो हविर्भिः प्रीतस्त्वं तव रक्षणेभिस्त्वदीयैरवनैर्नोऽस्मान्रक्ष । पालय । प्रतिस्फुर । अस्मान्प्रतिदीप्यस्व । वीळु दृढमंहः पापं वि रुज । विशेषेण नाशय । किंच

महि चिन्महदपि वावृधानं वर्धमानं वृद्धं वा बाधकं रक्षो जहि ॥ णः । नश धातुस्थोरुषुभ्य इति संहितायां णत्वं । ररक्षाणः । रक्षेर्यङ्लुकि चानशि रूपं । जहि । हन हिंसागत्योः । लोटि हंतेर्ज इति जादेशः । आभाच्छास्त्रीयस्यासिद्धत्वादतो हेरिति लुक् न भवति ॥

॥ अथ पंचदशी ॥

एभिर्भव सुमना अग्ने अर्कैरिमान्स्पृश मन्मभिः शूर वाजान् ।
उत ब्रह्माण्यंगिरो जुषस्व सं ते शस्तिर्देववाता जरेत ॥ १५ ॥

एभिः । भव । सुऽमनाः । अग्ने । अर्कैः । इमान् । स्पृश । मन्मऽभिः । शूर । वाजान् ।
उत । ब्रह्माणि । अंगिरः । जुषस्व । सं । ते । शस्तिः । देवऽवाता । जरेत ॥ १५ ॥

हे अग्ने एभिर्मदीयैरर्कैरर्चनीयैः शस्त्रैः सुमनाः शोभनमनस्को भव । हे शूर इमानस्मदीयान्हविर्लक्षणान्वाजान्मन्मभिः स्तोत्रैः सह स्पृश । प्रतिगृहाण । उतापि च अंगिरः । अंगति हवींषि प्राप्नोतीत्यंगिरा अग्निः । यद्वा येऽंगारा आसंस्तेऽंगिरसोऽभवन्निति ब्राह्मणं । तेषामंगिरसां कारणत्वादग्नेरंगिरस्त्वं । तत्कारणत्वे च मंत्रः । ये अंगिरसः सूनवस्ते अग्नेः परि जज्ञिरे । ऋग्वे० १०. ६२. ५. । इति । तादृश हे अग्ने ब्रह्माणि मंत्रान् जुषस्व । सेवस्व । देववाता । देवार्थं गता देवान् स्तोतुं प्राप्तेत्यर्थः । तादृशी शस्तिः शंसनं ते त्वां संजरेत । संवर्धयतु ॥ स्पृश । स्पृश संस्पर्शने । तुदादिः । देववाता । वा गतिगंधनयोः । गत्यर्थाकर्मकेति कर्तरि क्तः । देवः । पचाद्यजंतः । क्ते चेति चतुर्थ्यंतस्य पदस्य प्रकृतिस्वरः ॥

॥ अथ षोडशी ॥

एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि ।
निवचना कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः ॥ १६ ॥

एता । विश्वा । विदुषे । तुभ्यं । वेधः । नीथानि । अग्ने । निण्या । वचांसि ।
निऽवचना । कवये । काव्यानि । अशंसिषं । मतिऽभिः । विप्रः । उक्थैः ॥ १६ ॥

वेधो विधातर्हे अग्ने विदुषे कर्मविषयज्ञानवते कवये क्रांतदर्शिने तुभ्यं नीथानि फलप्रापकाणि निण्या गूढानि निवचनानि नितरां वक्तव्यानि काव्यानि कविभिर्मेधाविभिः कृतान्येता विश्वैतानि सर्वाणि वचांसि वाक्यानि

मतिभिर्मननीयैः स्तोत्रैरुक्थैः शस्त्रैश्च सहितो विप्रः प्राज्ञोऽहमशंसिषं। अवोचं। तानि सेवस्वेत्यर्थः ॥

॥ इति तृतीयस्य चतुर्थे द्वाविंशो वर्गः ॥

कृणुष्वेति पंचदशर्चं चतुर्थं सूक्तं वामदेवस्यार्षं त्रैष्टुभं रक्षोहाग्निदेवताकं। कृणुष्व पंचोना राक्षोघ्नमित्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोः सूक्तविनियोगः ॥ प्रवर्ग्येऽभिष्टवे कृणुष्व पाज इत्याद्याः पंचर्चो विनियुक्ताः। सूचितं च। कृणुष्व पाजः प्रसितिं न पृथ्वीमिति पंच। आ॰ ४.६.। इति ॥

॥ तत्र प्रथमा ॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥१॥

कृणुष्व। पाजः। प्रऽसितिं। न। पृथ्वीं। याहि। राजाऽइव। अमऽवान्। इभेन।
तृष्वीं। अनु। प्रऽसितिं। द्रूणानः। अस्ता। असि। विध्य। रक्षसः। तपिष्ठैः ॥१॥

हे अग्ने पाजस्तेजःसंघं कृणुष्व। कुरुष्व। विस्तारय। तत्र दृष्टांतः। प्रसितिं न। यथा मृगयुः पृथ्वीं विस्तीर्णां प्रसितिं। प्रकर्षेण सीयते बध्यत इति प्रसितिर्वागुरा। तादृशीं प्रसितिं पक्षिग्रहणार्थं वनगहनेषु प्रसारयति तद्वत्त्वमपि रक्षांसि हंतुं महद्बलमयतस्तनुष्व। इभेन गतभयेन तेजःसंघेन युक्तस्त्वं याहि। रक्षांसि हंतुं गच्छ। तत्र दृष्टांतः। राजेव। यथामवान् राजा। सह वर्तत इत्यमोऽमात्यः। तद्वान्। यद्वा अमोऽमनं रोगः। शत्रूणां कर्तव्यै रोगैस्तद्वान्। शत्रूणां रोगभूत इत्यर्थः। राजेभेन गजेन युक्तः सन् परबलं प्रतिगच्छति तद्वत्। किंच तृष्वीं। तृष्वीति क्षिप्रनाम। क्षिप्रगामिनीं प्रसितिं प्रकृष्टां सेनामनुद्रूणानोऽनुगच्छन्। यद्वा तृष्वीमिति तृतीयार्थे द्वितीया। तृष्व्या क्षिप्रया प्रसित्यानुबद्धया संततया गत्या द्रूणानः परसेनां हिंसन् अस्ता शत्रूणां क्षेप्तासि। तपिष्ठैस्तप्तृतमैस्तेजोभी रक्षसो राक्षसान्विध्य। ताडय ॥ अत्र निरुक्तं। कुरुष्व पाजः। पाजः पालनात्। प्रसितिमिव पृथ्वीं। प्रसितिः प्रसयनात्तंतुर्वा जालं वा। याहि राजेवामात्यवानभ्यमनवान्स्ववान्वेरावता गणेन गतभयेन हस्तिनेति वा। तृष्व्यानु प्रसित्या द्रूणानः। तृष्वीति क्षिप्रनाम तरतेर्वा त्वरतेर्वा। अस्तासि विध्य रक्षसस्तपिष्ठैस्तप्ततमैस्तपिष्ठतमैरिति वा। नि॰ ६.१२.। इति ॥ कृणुष्व।

कृवि हिंसाकरणयोः । लोटि धिन्विकृण्व्योरचेत्युप्रत्ययः । व्यत्ययेनात्मनेपदं । विकरणस्वरस्तु सति शिष्टोऽपि लसार्वधातुकस्वरं न बाधत इति लसार्वधातुकस्वरः ॥

॥ अथ द्वितीया ॥

तव॑ भ्र॒मास॑ आशु॒या प॑तं॒त्यनु॑ स्पृश धृष॒ता शोशु॑चानः ।
तपूं॑ष्यग्ने जु॒ह्वा॑ पतं॒गानसं॑दितो॒ वि सृ॑ज॒ विष्व॑गु॒ल्काः ॥ २ ॥

तव॑ । भ्र॒मासः॑ । आ॒शु॒ऽया । प॒तं॒ति॒ । अनु॑ । स्पृ॒श॒ । धृ॒ष॒ता । शोशु॑चानः ।
तपूं॑षि । अ॒ग्ने॒ । जु॒ह्वा॑ । प॒तं॒गान् । असं॑ऽदितः । वि । सृ॒ज॒ । विष्व॑क् । उ॒ल्काः ॥ २ ॥

हे अग्ने तव भ्रमासो भ्रम्यंत आशुया शीघ्रगतयो रश्मयः पतंति । सर्वतः प्रसरंति । शोशुचानो भृशं दीप्यमानस्त्वं धृषताभिभवसमर्थेन तेजःसंघेन शत्रूननु क्रमेण स्पृश । दह । दहनोपायं दर्शयति । असंदितः परैरनिरुद्धस्त्वं तपूंषि तापकानि तेजांसि पतंगान् पतनशीलान्विस्फुलिंगानुल्काश्चेत्येतत्त्रितयं जुह्वा । हूयंतेऽस्यामाहुतय इति जुहूर्ज्वाला । तया विष्वक् सर्वतो विसृज । प्रसारय ॥ आशुया । आशुशब्दाज्जसः सुपां सुलुगिति याजादेशः । चित्स्वरः । धृषता । धृष प्रसहने । चुरादिराधृषीयः । व्यत्ययेन शः । शतुरनुम इति विभक्तेरुदात्तत्वं । जुह्वा । जुहोतेर्दीर्घश्चेति क्विप् द्विर्वचनं दीर्घत्वं । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वस्य नोङ्धात्वोरिति प्रतिषेध उदात्तस्वरितयोर्यण इति स्वरितत्वं । असंदितः । दो अवखंडने । कर्मणि निष्ठा । द्यतिस्यतीतीत्वं । नञा समासे तस्य स्वरः ॥

॥ अथ तृतीया ॥

प्रति॒ स्पशो॒ वि सृ॑ज॒ तूर्णि॑तमो॒ भवा॑ पा॒युर्वि॒शो अ॒स्या अद॑ब्धः ।
यो नो॑ दू॒रे अ॒घशं॑सो॒ यो अंत्य॑ग्ने॒ माकि॑ष्टे॒ व्यथि॒रा द॑धर्षीत् ॥ ३ ॥

प्रति॑ । स्पशः॑ । वि । सृ॒ज॒ । तूर्णि॑ऽतमः । भव॑ । पा॒युः । वि॒शः । अ॒स्याः । अद॑ब्धः ।
यः । नः॒ । दू॒रे । अ॒घऽशं॑सः । यः । अंति॑ । अग्ने॑ । माकिः॑ । ते॒ । व्यथिः॑ । आ । द॒ध॒र्षी॒त् ॥ ३ ॥

हे अग्ने तूर्णितमस्त्वरितमस्त्वं स्पशः परबाधकान्रश्मीन् चारान्वा सत्यानृतविवेकार्थं वि सृज । शत्रून्प्रति विशेषेण प्रेरय । अदब्धः केनाप्यहिंसितस्त्वमस्यास्त्वदीयाया विशोऽस्मदादिकायाः प्रजायाः पायुः पालको भव । कस्मात्तद्रक्षा-

भिमुपेक्षायामाह। नोऽस्माकं दूरे योऽघशंसः। अघं पापात्मकं शंसनमभिलाषः कीर्तनं वा यस्य सोऽघशंसः। यथाघशंसोऽत्यस्माकं समीपे तिष्ठति तस्मादुभयविधाच्छत्रोः पालको भव। किंच ते त्वत्संबंधिनोऽस्मान्माकिर्न कश्चिदपि व्यथिर्बाधको राक्षस आदधर्षीत्। आधर्षयतु। अस्माकं कश्चिदपि परिभवं मा करोत्वित्यर्थः॥ अंति। अंतिकस्य कादिलोप आद्युदात्तत्वं च। अग्ने। पादादित्वात्षाष्ठिकमाद्युदात्तत्वं। माकिष्ट इति संहितायां युष्मत्तततक्षुःष्वंतःपादमिति षत्वं। दधर्षीत्। धृष प्रसहने। लङि बहुलं छंदसीति शपः श्लुः। बहुलं छंदसीति तिप ईडागमः। निघातः॥

॥ अथ चतुर्थी ॥

उदग्ने तिष्ठ प्रत्या तनुष्व न्य१मित्राँ ओषतात्तिग्महेते।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कं॥४॥

उत्। अग्ने। तिष्ठ। प्रति। आ। तनुष्व। नि। अमित्रान्। ओषतात्। तिग्मऽहेते।
यः। नः। अरातिं। संऽइधान। चक्रे। नीचा। तं। धक्षि। अतसं। न। शुष्कं॥४॥

तिग्महेते। तिग्मास्तीक्ष्णा हेतयो ज्वाला यस्य स तथोक्तः। तादृश हे अग्ने उत्तिष्ठ। रक्षोहननार्थमुद्यतो भव। शत्रून्प्रत्यातनुष्व। ज्वालासंघं विस्तारय। तैस्तेजःसंघैरमित्रान् शत्रून्न्योषतात्। नितरां दह। हे समिधान समिद्भिर्दीप्यमानाग्ने यः पुमान् नोऽस्माकमरातिं। भावप्रधाननिर्देशः। अरातित्वं शात्रवं चक्रे कुरुतेऽरातिमदानं वा कुरुते तं पुमांसं नीचा न्यग्भूतं धक्षि। दह। तत्र दृष्टांतः। अतसं न। यथा शुष्कमनार्द्रमतसं काष्ठं दहसि तद्वत्॥ ओषतात्। उष दाहे। लोटि हेस्तुह्योरिति तातङादेशः। धक्षि। दहेर्लोटि बहुलं छंदसीति शपो लुक्। हो ढ इति ढत्वं। भष्भावः। षढोः कः सीति कत्वं। निघातः॥

॥ अथ पंचमी ॥

ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून्॥५॥

ऊर्ध्वः। भव। प्रति। विध्य। अधि। अस्मत्। आविः। कृणुष्व। दैव्यानि। अग्ने।
अव। स्थिरा। तनुहि। यातुऽजूनां। जामिं। अजामिं। प्र। मृणीहि। शत्रून्॥५॥

हे अग्ने ऊर्ध्वो भव। रक्षोहननार्थमुद्युक्तो भव। अस्मदस्मत्तोऽधि अधिकान्या-

यसान् प्रति विध्य। प्रत्येकं ताडय। दैव्यानि तेजांसि चाविष्कृणुष्व। आविष्कुरु। एतद्द्वयं विधाय यातुजूनां यातयितुं प्राणिनः क्लेशयितुं ये जवं कुर्वंति तेषां यातुधानानां स्थिरा दृढानि धनूंष्यवतनुहि। अवगतज्यानि कुरु। किंच जामिमजामिं बंधुमबंधुं शत्रून्प्रमृणीहि। प्रजहि। यद्वा जामिं यः पूर्वं प्रहृतस्तं। अजामिं पूर्वमप्रहृतं। एवंभूतान् शत्रून् जहि। प्रहृतोऽयमित्यपेक्षां मा कृथाः॥ आविष्कृणुष्वेत्यत्र संहितायामिदुदुपधस्य चाप्रत्ययस्य चेति षत्वं। तनुहि। तनोतेर्लोट्युतश्च प्रत्ययाच्छंदसि वावचनमिति हेर्लुगभावः। यातुजूनां। जु गतौ। क्विब्वचीत्यादिना क्विप्। दीर्घः। आमि छांदसो नुम्। मृणीहि। मृङ् प्राणत्यागे। अंतर्भावितण्यर्थस्य लोटि बहुलं छंदसीति विकरणस्य श्ना। निघातः॥

॥ इति तृतीयस्य चतुर्थे त्रयोविंशो वर्गः॥

॥ अथ षष्ठी॥

स ते॑ जानाति सुम॒तिं य॑विष्ठ॒ य ईव॑ते॒ ब्रह्म॑णे गा॒तुमैर॑त्।
विश्वा॑न्यस्मै सु॒दिना॑नि रा॒यो द्यु॒म्नान्य॒र्यो वि दुरो॑ अ॒भि द्यौ॑त्॥६॥

सः। ते॒। जा॒ना॒ति॒। सु॒ऽम॒तिम्। य॒वि॒ष्ठ॒। यः। ईव॑ते। ब्रह्म॑णे। गा॒तुम्। ऐर॑त्।
विश्वा॑नि। अ॒स्मै॒। सु॒ऽदिना॑नि। रा॒यः। द्यु॒म्नानि॑। अ॒र्यः। वि। दुरः॑। अ॒भि। द्यौ॒त्॥६॥

यविष्ठ युवतम। यद्वा देवानां हवींषि मिश्रयितृतम हे अग्ने यः पुमानीवते गमनवते कल्याणहेतुभूतागमनाय ब्रह्मणे परिवृढाय तुभ्यं गातुं। गीयत उच्चार्येत इति गातुः स्तोत्रं। तदैरत् प्रेरयति स पुमान् ते तव सुमतिं कल्याणकरीमनुग्रहात्मिकां बुद्धिं जानाति। लभत इत्यर्थः। अस्मै स्तोत्रं कृतवते यजमानाय तदर्थं विश्वानि सुदिनानि शोभनानि दिनानि रायो धनानि द्युम्नानि द्युतिमंति रत्नकनकादीनि दुरो गृहानभि अभिलक्ष्यार्यो यज्ञानां स्वामी त्वं वि द्यौत्। विशेषेण द्योतस्व। केचिदत्र वाक्यभेदमंगीकुर्वते। स्तोत्रं कृतवते यजमानाय विश्वानि सुदिनान्यभ्युदयकारीणि भवंति। रायः। रांति क्षीरादीनीति रायो गोधनानि। द्युम्नानि द्योतमानानि कनकादीनि चास्मै भवंति। अर्यः कर्मणामनुष्ठाता स यजमानो दुरो गृहानभि वि द्यौत्। विशेषेण द्योतते॥ ईवते। ई गतौ। क्विप्। तदस्यास्तीति मतुप्। छंदसीर इति मतुपो वत्वं। ऐरत्। ईर गतौ। यद्वृत्तयोगादनिघातः। अर्यः। ऋ गतौ। अर्यः स्वामिवैश्ययोरिति यत्प्रत्ययांतो

निपातितः। स्वामिन्यंतोदात्तत्वं। द्यौत्। द्युत दीप्तौ। छांदसे लुङि द्युद्भ्यो लुङीति परस्मैपदं। बहुलं छंदसीत्यडभावः ॥

॥ अथ सप्तमी ॥

सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः।

पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥ ७ ॥

सः। इत्। अग्ने। अस्तु। सुऽभगः। सुऽदानुः। यः। त्वा। नित्येन। हविषा। यः। उक्थैः।

पिप्रीषति। स्वे। आयुषि। दुरोणे। विश्वा। इत्। अस्मै। सुऽदिना। सा। असत्। इष्टिः ॥ ७ ॥

हे अग्ने यः पुमान् नित्येन यावज्जीवं संकल्पितेनाग्निहोत्रादिसाधनभूतेन हविषा त्वा त्वां पिप्रीषति प्रीणयितुमिच्छति। यश्चोक्थैः शस्त्रैः प्रीणयितुमिच्छति सेत् स एव पुमान् सुभगः शोभनधनः सौभाग्यवान्वा सुदानुः शोभनदानोपेतश्चास्तु। किंच दुरोणे दुरवने कृच्छ्रलभ्ये स्वे स्वकीय आयुषि शतवर्षाख्ये जीवने तिष्ठतु। अस्मै यजमानाय विश्वा सर्वाणि सुदिना शोभनानि दिनानि भवंतु। अस्य सेष्टिः स यज्ञोऽसत्। फलसाधनसमर्थो भवतु ॥ पिप्रीषति। प्रीञ् तर्पणे। धातोः कर्मण इति सन्। असत्। अस्तेर्लेट्यडागमः। इष्टिः। मंत्रे वृषेत्यादिना क्तिन्नुदात्तः ॥

उखासंभरणीयेष्टावग्नेः स्रुचभृतोऽर्चामि त इति याज्या। सूचितं च। अर्चामि ते सुमतिं घोष्यर्वागितीदंप्रभृतिकर्मणां। आ॰ ४.१.। इति ॥

॥ सैषाष्टमी ॥

अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः।

स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ ८ ॥

अर्चामि। ते। सुऽमतिं। घोषि। अर्वाक्। सं। ते। ववाता। जरतां। इयं। गीः।

सुऽअश्वाः। त्वा। सुऽरथाः। मर्जयेम। अस्मे इति। क्षत्राणि। धारयेः। अनु। द्यून् ॥ ८ ॥

हे अग्ने ते तव सुमतिमनुग्रहकरां शोभनां बुद्धिमर्चामि। पूजयामि। ववाता पुनःपुनस्त्वामभिगच्छंतीयमुच्यमाना गीर्वाग्घोषि घोषयुक्तं यथा भवति तथार्वाक् त्वदभिमुखं ते त्वां संजरतां। स्तौतु। वयमपि स्वश्वाः शोभनाश्वोपेताः सुरथाश्च। उपलक्षणमेतत्। पुत्रपौत्रादिभिः सहिताः संतस्त्वां मर्जयेम। अलं-

कुर्वीम। परिचरेमेति यावत्। त्वं तु अनु द्यूनन्वहमस्मे अस्मासु क्षत्राणि धनानि धारयेः। निधेहि ॥ घोषि। घुष शब्दने। औणादिक इन्। नित्त्वादाद्युदात्तः। वावाता। वा गतिगंधनयोरित्यस्य यङ्गंतस्य निष्ठायां रूपं। मर्जयेम। मृजूष् शौचालंकारयोः। एयंतस्य लिङि रूपं। वृद्ध्यभावश्छांदसः ॥

॥ अथ नवमी ॥

इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून्।
क्रीळंतस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानां ॥ ९ ॥
इह। त्वा। भूरि। आ। चरेत्। उप। त्मन्। दोषाऽवस्तः। दीदिऽवांसं। अनु। द्यून्।
क्रीळंतः। त्वा। सुऽमनसः। सपेम। अभि। द्युम्ना। तस्थिऽवांसः। जनानां ॥ ९ ॥

हे अग्ने इह रक्षोहननाख्ये कर्मणि यद्वास्मिंल्लोके पुरुषो दोषावस्ता रात्र्यहनि च दीदिवांसं दीप्यमानं त्वामनु द्यूनन्वहं त्मन् आत्मना स्वयमेवोप समीपे भूरि भूयिष्ठं यथा भवति तथाचरेत्। परिचरति। तस्माद्वयमपि जनानां शत्रूणां द्युम्ना द्युम्नानि धनान्यभितस्थिवांसस्त्वत्प्रसादादात्मसात्कुर्वंतोऽत एव क्रीळंतः स्वे स्वे गृहे पुत्रपौत्रादिभिः सह संक्रीडमानास्तथा सुमनसः शोभनमनस्काः संतस्त्वां सपेम। परिचरेम। यद्वा दोषावस्तरिति संबुद्धिः। दोषाया रात्रिकृतस्य तमसो वस्तराच्छादयितर्निवारयितः ॥ त्मन्। आत्मन्शब्दस्य तृतीयायाः सुपां सुलुगिति लुक्। मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः। दोषावस्तः। द्वंद्वपक्षे कार्तकौजपादयश्चेति पूर्वपदप्रकृतिस्वरः। संबुद्धिपक्ष आमंत्रितस्य पादादित्वात् षाष्ठिकमाद्युदात्तत्वं। सपेम। षप समवाये। लिङि रूपं। निघातः ॥

॥ अथ दशमी ॥

यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥ १० ॥
यः। त्वा। सुऽअश्वः। सुऽहिरण्यः। अग्ने। उपऽयाति। वसुऽमता। रथेन।
तस्य। त्राता। भवसि। तस्य। सखा। यः। ते। आतिथ्यं। आनुषक्। जुजोषत् ॥ १० ॥

हे अग्ने यः पुमान् स्वश्वः शोभनाश्वोपेतः सुहिरण्यो यागयोग्यधनोपेतो वसुमता व्रीह्यादिधनयुक्तेन रथेन सहितः सन् त्वामुपयाति परिचरणार्थं तव समीपं

गच्छति तस्य पुंसस्त्राता सर्वदुरितेभ्यो रक्षको भवसि । यश्च पुमान् ते तवातिथ्यमतिथियोग्यां पूजामानुषगनुक्रमेण जुजोषत् प्रापयति तस्य पुंसः सखा तदुचितफलप्रदानेनोपकर्ता भवसि ॥ उपयाति । सह सुपेत्यच योगविभागात्समासः । तिपः पित्त्वादनुदात्तत्वे धातुस्वरः । तिङि चोदात्तवतीति गतेर्निघातः । आतिथ्यं । अतिथिशब्दादतिथेर्ञ्य इति ञ्यप्रत्ययः । प्रत्ययस्वरः । जुजोषत् । जोषयतेर्लेङि बहुलं छंदसीति शपः श्लुः । छंदस्युभयथेति तिप आर्द्धधातुकत्वाण्णिलोपः । अभ्यस्तानामादिरित्याद्युदात्तः ॥

॥ इति तृतीयस्य चतुर्थे चतुर्विंशो वर्गः ॥

॥ अथैकादशी ॥

महो रुजामि बंधुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥ ११ ॥

महः । रुजामि । बंधुता । वचःऽभिः । तत् । मा । पितुः । गोतमात् । अनु । इयाय ।
त्वं । नः । अस्य । वचसः । चिकिद्धि । होतः । यविष्ठ । सुक्रतो इति सुऽक्रतो । दमूनाः ॥ ११ ॥

हे होतर्देवानामाह्वातर्यविष्ठ युवतम सुक्रतो शोभनप्रज्ञ हे अग्ने वचोभिस्त्वदुद्देशेन कृतैः स्तोत्रैः समुपजाता येयं बंधुता बंधुभावस्तया बंधुतया महो महतो राक्षसान्रुजामि । भनज्मि । तत्तादृशं स्तोत्रात्मकं वचः पितुरुत्पादयितुर्गोतमादृषेः सकाशान्मा वामदेवं मामन्वियाय । दमूना दांतमना दानमना वा शत्रूणामुपक्षपयिता वा तादृशस्त्वं नोऽस्मदीयस्यास्य वचसः स्तोत्रात्मकमेतद्वाक्यं चिकिद्धि । जानीहि ॥ चिकिद्धि । कित ज्ञाने । जुहोत्यादिकः । लोटि रूपं । होतः । पादादित्वात् षाष्ठिकमाद्युदात्तत्वं । इतरयोस्तु नामंत्रिते समानाधिकरण इति प्रथमस्याविद्यमानवद्भावनिषेधादपादादित्वेन निघातः ॥

॥ अथ द्वादशी ॥

अस्वप्नजस्तरणयः सुशेवा अतंद्रासोऽवृका अश्रमिष्ठाः ।
ते पायवः सध्र्यंचो निषद्याग्ने तव नः पांत्वमूर ॥ १२ ॥

अस्वप्नऽजः । तरणयः । सुऽशेवाः । अतंद्रासः । अवृकाः । अश्रमिष्ठाः ।
ते । पायवः । सध्र्यंचः । निऽसद्य । अग्ने । तव । नः । पांतु । अमूर ॥ १२ ॥

अमूर अमूढ सर्वज्ञ। यद्वा अमूर अप्रतिहतगते हे अग्ने अस्वप्नजोऽस्वपंतः। जागरूका इति यावत्। तरणयः सततगमनस्वभावा आपद्भ्यस्तारका वा सुशेवाः सुसुखा अतंद्रासोऽतंद्रा अनलसाः सर्वदोद्युक्ता अवृका अहिंसका अश्रमिष्ठा अश्रांततमाः सध्र्यंचः परस्परं संगताः पायवो रक्षकास्ते तादृशास्तव रश्मयो निषद्यास्मद्यज्ञे निषण्णा भूत्वा नोऽस्मान्पांतु। रक्षंतु ॥ अस्वप्नजः। स्वपितृषोर्नजिङ्प्रत्ययः। मध्येऽवग्रहश्छांदसः। सध्र्यंचः। सहपूर्वादंचतेः क्विप्। सहस्य सध्रिरिति सहस्य सध्र्यादेशः। सध्र्यादेशस्यांतोदात्तत्वनिपातनाद्यणादेश उदात्तस्वरितयोरिति स्वरितत्वं। अमूर। मुह वैचित्ये। निष्ठायां ढकारस्य रेफश्छांदसः। यद्वा मूङ् बंधने। औणादिको रक्॥

॥ अथ त्रयोदशी ॥

ये पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरितादरक्षन्।

ररक्ष तान्सुकृतो विश्ववेदा दिप्संत इद्रिपवो नाह देभुः ॥ १३ ॥

ये। पायवः। मामतेयं। ते। अग्ने। पश्यंतः। अंधं। दुःऽइतात्। अरक्षन्।

ररक्ष। तान्। सुऽकृतः। विश्वऽवेदाः। दिप्संतः। इत्। रिपवः। न। अह। देभुः ॥ १३ ॥

अत्रेयमैतिहासिकी कथा। उचथ्यस्य गर्भिणी ममतानामधेयां भार्यां तदनुजो बृहस्पतिरचकमत। तस्यां रेत आधित्सुं तं बृहस्पतिं गर्भस्थं रेतोऽब्रवीत्। रेतोऽत्र मा सैक्षीरहमत्र वसामीति। एवमुक्तो बृहस्पतिर्निरुद्धरेतस्कः सन् रेतोरूपं गर्भं शशाप। जात्यंधत्वरूपं दीर्घं तमः प्राप्नुहीति। ततस्तस्यां दीर्घतमा अजनिष्ट। स चांध्यपरिहारायाग्निं स्तुत्वा चक्षुरलभतेति। तदिदानीमाह। हे अग्ने पायवो रक्षकाः पश्यंतोऽंधोऽयमिति कृपादृष्ट्या पश्यंतस्ते तव ये रश्मयो मामतेयं ममतायाः पुत्रमंधं चक्षुर्हीनं दीर्घतमसं दुरितादांध्यलक्षणाच्छापादरक्षन् चक्षुःप्रदानेनापालयन् विश्ववेदा विश्वप्रज्ञो भवान् सुकृतः शोभनचक्षुःप्रदानादिकर्मकृतवतस्तान्रश्मीन्ररक्ष। आदरेण परिगृह्य पालयति। तेषां परिग्रहसिद्धिरभिधीयते। दिप्संत इत् दंभितुं परिभवितुमिच्छंत एव रिपवः शत्रव एनं दीर्घतमसं नाह देभुः। नैव परिभवंति खलु ॥ मामतेयं। ममताया अपत्यमित्यर्थे स्त्रीभ्यो ढक्। दिप्संतः। दंभु दंभे। सनीवंतर्धेत्यादिना इडभावः। दंभ इच्चेतीकारः। देभुः। श्रंथिग्रंथिदंभिस्वंजीनामुपसंख्यानमिति लिटः कित्त्वादुपधालोपः ॥

॥ अथ चतुर्दशी ॥

त्वया वयं सधन्य१स्त्वोतास्तव प्रणीत्यश्याम वाजान्।
उभा शंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥१४॥

त्वया। वयं। सऽधन्यः। त्वाऽऊताः। तव। प्रऽनीती। अश्याम। वाजान्।
उभा। शंसा। सूदय। सत्यऽताते। अनुष्ठुया। कृणुहि। अह्रयाण ॥१४॥

अह्रयाण अलज्जितगमन। अह्रयाणोऽह्रीतयान इति यास्कः। तादृश हे अग्ने वयं स्तोतारस्त्वया सधन्यस्त्वत्प्रसादात्समानधनास्त्वोतास्त्वया रक्षिता वयं तव प्रणीती प्रणीत्या तव प्रेरणेनानुज्ञया वा वाजानन्नान्यश्याम। प्राप्नुयाम। हे सत्यताते। सत्यं तनोतीति वा सत्यं तायते यस्मिन्निति वा सत्यतातिः। हे सत्यताते शंसा पापानां शंसितारावुभावासन्नविप्रकृष्टौ शत्रू सूदय। जहि। अनुष्ठुयानुक्रमेण कृणुहि। अस्मिन्सूक्ते प्रतिपादितमर्थं कुरु॥ सधन्यः। धनमेषामस्तीति छंदसीवनिपावितीप्रत्ययः। एरनेकाच इति यण्। उदात्तस्वरितयोरिति स्वरितत्वं। अनुष्ठुया। अपदुःसुषु स्थ इति विधीयमानः कुप्रत्ययो बहुलवचनादनुपूर्वस्यापि भवति। सुपां सुलुगिति तृतीयाया याजादेशः। अह्रयाण। ह्री लज्जायां। बहुलं छंदसीति शपः श्लुभावाभावः। अनित्यमागमशासनमिति मुगभावः॥

॥ अथ पंचदशी ॥

अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय।
दहाशसो रक्षसः पाह्य१स्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥१५॥

अया। ते। अग्ने। संऽइधा। विधेम। प्रति। स्तोमं। शस्यमानं। गृभाय।
दह। अशसः। रक्षसः। पाहि। अस्मान्। द्रुहः। निदः। मित्रऽमहः। अवद्यात् ॥१५॥

हे अग्ने अयानया समिधा दीप्तया स्तुत्या विधेम। परिचरेम। अस्माभिः शस्यमानमिमं स्तोमं स्तोत्रं प्रतिगृभाय। प्रतिगृहाण। अशसः। शंसंति स्तुवंतीति शसः स्तोतारः। ते न भवंतीत्यशसो नृशंसाः। तान्रक्षसो दह। भस्मसात्कुरु। हे मित्रमहो मित्रैः पूजनीय हे अग्ने द्रुहो द्रोग्धुर्निदो निंदकादवद्यात्परिवादाच्चास्मान् पाहि। रक्ष॥ गृभाय। ग्रहेर्लोटि छंदसि शायजपीति श्नः शायच्। हृग्रहोर्भः। पाहि। वाक्यभेदादनिघातः। निदः। णिदि कुत्सायां। क्विप्।

आगमानुशासनस्यानित्यत्वान्नुमभावः । सावेकाच इति विभक्तेरुदात्तत्वं । अव-द्यात् । अवद्यपण्येति यत् । ययतोश्चातदर्थे । पा० ६.२.१५६. । इत्यंतोदात्तत्वं । मित्रमहो अवद्यादित्यत्र संहितायामव्यादवद्यादित्येङः प्रकृतिभावः ॥

॥ इति तृतीयस्य चतुर्थे पंचविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरं-धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये *तृतीयाष्टके चतुर्थोऽध्यायः समाप्तः ॥*

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

चतुर्थे मंडले प्रथमेऽनुवाके दश सूक्तानि । वैश्वानरायेति पंचदशर्चं पंचमं सूक्तं वामदेवस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकं । अत्रानुक्रमणिका । वैश्वानराय वैश्वानरीयमिति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

वैश्वानराय मीळ्हुषे सजोषाः कथा दाशेमाग्नये बृहद्भाः ।
अनूनेन बृहता वक्षथेनोप स्तभायदुपमिन्न रोधः ॥१॥

वैश्वानराय । मीळ्हुषे । सऽजोषाः । कथा । दाशेम । अग्नये । बृहत् । भाः ।
अनूनेन । बृहता । वक्षथेन । उप । स्तभायत् । उपऽमित् । न । रोधः ॥१॥

सजोषाः सजोषसः समानप्रीतियुक्ता वयमृत्विग्यजमाना वैश्वानराय विश्वा-नरसंबंधिन एतन्नामकाय मीळ्हुषेऽभिमतवृष्ट्यादिसेक्त्रे बृहद्बृहते महते भा भा-समानायाग्नये देवाय कथा कथं केन प्रकारेण दाशेम । दद्याम । सामर्थ्याद्धविरिति

गम्यते। अथवा बृहद्भा इत्युत्तरत्र योज्यं। कया दाशेमेत्युक्तं। किं तयाधिक्यमिति तदुच्यते। योऽग्निर्बृहन्महान्भा भासमानश्च सन् अनूनेनाविकलेन संपूर्णेन अत एव बृहता प्रभूतेन वक्षथेन वोढव्येन स्वशरीरेणोपस्तभायत् उपस्तभ्नाति। सामर्थ्याद्द्यामिति शेषः। द्युलोकं व्याप्नोतीत्यर्थः। तत्र दृष्टांतः। उपमिन्न रोधः। उप समीपे मीयते क्षिप्यत इत्युपमित् स्थूणा। सा यथा तृणाच्छादनादिनिरोधकं वंशादिकमुपस्तभ्नाति तद्वत्। यद्वा वक्षथेनोक्थलक्षणेन फलादिवाहकेन स्तोत्रेण सह द्युलोकमुपस्तभायत्॥ स्तभायत्। स्तंभुः सौत्रो धातुः। लङि छंदसि शायजपीति व्यत्ययेनाहावपि शायजादेशः। बहुलं छंदसीत्यडागमाभावः। किमिव। उपमिन्न रोधः। उप समीपे मीयत इत्युपमिदुदकं। कूलमिव॥

॥ अथ द्वितीया ॥

मा निंदत य इमां मह्यं रातिं देवो ददौ मर्त्याय स्वधावान्।
पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो यह्वो अग्निः॥२॥

मा। निंदत। यः। इमां। मह्यं। रातिं। देवः। ददौ। मर्त्याय। स्वधाऽवान्।
पाकाय। गृत्सः। अमृतः। विऽचेताः। वैश्वानरः। नृऽतमः। यह्वः। अग्निः॥२॥

हे होत्रादयोऽमुं वैश्वानरमग्निं मा निंदत। निंदां मा कुरुत। स्तुतेत्यर्थः। यो देवो दीप्यमानोऽग्निः स्वधावानस्मद्दत्तेन हविर्लक्षणेनान्नेन तद्वान् सन् मर्त्याय मरणधर्माय पाकाय परिपक्वप्रज्ञाय मह्यं यजमानायेमामिदानीं दीयमानप्रकारां रातिं धनं ददौ दत्तवान्। स विशेष्यते। गृत्सो मेधावी। मेधाविनामैतत्। अमृतोऽमरणस्वभावो विचेता विशिष्टप्रज्ञो वैश्वानरो विश्वैर्नरैराहवनीयादिरूपेण नीयमानो नृतमो नेतृतमः फलादीनां यह्वो महान्। महन्नामैतत्। अग्निरंगनादिगुणविशिष्टः। तादृशमग्निं स्तुतेति भावः॥

॥ अथ तृतीया ॥

साम द्विबर्हा महि तिग्मभृष्टिः सहस्ररेता वृषभस्तुविष्मान्।
पदं न गोरपगूळ्हं विविद्वानग्निर्मह्यं प्रेदु वोचन्मनीषां॥३॥

साम। द्विऽबर्हाः। महि। तिग्मऽभृष्टिः। सहस्रऽरेताः। वृषभः। तुविष्मान्।
पदं। न। गोः। अपऽगूळ्हं। विविद्वान्। अग्निः। मह्यं। प्र। इत्। ऊं इति। वोचत्। मनीषां॥३॥

द्विबर्हा द्वयोर्मध्यमोत्तमयोः स्थानयोः परिवृढस्तिग्मभृष्टिस्तीक्ष्णतेजाः सहस्ररेता बहुविधहिरण्यरेतस्कः । रेतःशब्दः सारवाची । प्रभूतसारो वा । वृषभो वर्षिता कामानां तुविष्मान्बहुधन ईदृशोऽयमग्निरत्यंतगोपितं गोः पदं न नष्टाया गोः पदमिवापगूळ्हमत्यंतरहस्यं । मनीषाशब्दो ज्ञानवाची सन्नत्र ज्ञातव्ये वर्तते । मनीषां ज्ञातव्यं महि महत्पूज्यं सामास्मदभिमतं स्तोत्रं विविद्वान् विशेषेण जानन् प्रेदु वोचत् । प्रैव ब्रवीतु ॥

॥ अथ चतुर्थी ॥

प्र ताँ अग्निर्बभसत्तिग्मजंभस्तपिष्ठेन शोचिषा यः सुराधाः ।
प्र ये मिनंति वरुणस्य धाम प्रिया मित्रस्य चेततो ध्रुवाणि ॥ ४ ॥
प्र । तान् । अग्निः । बभसत् । तिग्मऽजंभः । तपिष्ठेन । शोचिषा । यः । सुऽराधाः ।
प्र । ये । मिनंति । वरुणस्य । धाम । प्रिया । मित्रस्य । चेततः । ध्रुवाणि ॥ ४ ॥

योऽग्निः सुराधाः शोभनधनः स तिग्मजंभस्तीक्ष्णदंष्ट्रः सन् तपिष्ठेन शोचिषातिशयेन शत्रूणां तापकेन तेजसा तान्वक्ष्यमाणान् द्वेष्टॄन्प्र बभसत् । प्रकर्षेण भर्त्सयतु । दहत्वित्यर्थः ॥ भस भर्त्सनदीप्त्योः । लेटीतश्च लोप इतीकारलोपः । लेटोऽडाटावित्यडागमः ॥ तानित्युक्तं कानित्याह । ये द्वेष्टारश्चेततो जानतः । एतदुभयविशेषणं । मित्रस्य वरुणस्य च प्रिया प्रियाणि ध्रुवाणि स्थिराणि धाम धामानि तेजःस्थानानि कर्माणि वा प्र मिनंति प्रकर्षेण हिंसंति ॥ मीञ् हिंसायां । मीनातेर्निगम इति ह्रस्वत्वं । विकरणस्वरः ॥

॥ अथ पंचमी ॥

अभ्रातरो न योषणो व्यंतः पतिरिपो न जनयो दुरेवाः ।
पापासः संतो अनृता असत्या इदं पदमजनता गभीरं ॥ ५ ॥
अभ्रातरः । न । योषणः । व्यंतः । पतिऽरिपः । न । जनयः । दुःऽएवाः ।
पापासः । संतः । अनृताः । असत्याः । इदं । पदं । अजनत । गभीरं ॥ ५ ॥

अभ्रातरो भ्रात्रादिबंधुरहिता योषणो न गतभर्तृका योषित इव ॥ वा षपूर्वस्य निगम इति विकल्पनाद्दीर्घाभावः ॥ ता यथा भर्तृगृहात्पितृगृहं प्रत्यायंति तद्वद्यंतो गच्छंतः । यज्ञादीनपहायामार्गे वर्तमाना इत्यर्थः । तथा पतिरिपो न जनयः

पतिद्वेषिण्यः स्त्रिय इव दुरेवा दुष्टगतयो दुराचारा अत एव पापासः पापाः संतोऽनृता मानससत्यरहिता असत्या वाचिकसत्यरहिता मनसा वाचाग्निमभजमाना इदं पापिभिरनुभूयमानतया प्रसिद्धं गभीरमगाधं पदं नरकस्थानमजनत । अजनयंत । उत्पादयंति ॥ लङि जनेरंतर्भावितण्यर्थाद्व्यत्ययेनैकवचनं ॥

॥ इति तृतीयस्य पंचमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

इदं मे अग्ने कियते पावकामिनते गुरुं भारं न मन्म ।

बृहद्दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु ॥ ६ ॥

इदं । मे । अग्ने । कियते । पावक । अमिनते । गुरुं । भारं । न । मन्म ।

बृहत् । दधाथ । धृषता । गभीरं । यह्वं । पृष्ठं । प्रयसा । सप्तऽधातु ॥ ६ ॥

हे पावक शोधकाग्ने कियतेऽत्यल्पाय गुरुं भारं न वोढुमशक्यं भारमिव । तं यथा धर्तुमसहमानः पातयति तद्वत्त्वदीयं कर्मामिनतेऽहिंसतेऽत्यजते मे मह्यमिदं ज्ञातव्यत्वेन प्रसिद्धं बृहत्प्रभूतं मन्म मननीयं धनं दधाथ । देहि । तदेव विशेष्यते । धृषता शत्रूणां धर्षकेण प्रयसा । अन्ननामैतत् । अन्नेन युक्तं गभीरमन्यैरनवगाह्यं यह्वं महत्पृष्ठं स्प्रष्टुं योग्यं सप्तधातु ग्राम्यारण्यभेदेन सप्तप्रकारं । सप्त ग्राम्याः पशवः सप्तारण्या इति श्रुतेः । ईदृग्धनं देहीत्यर्थः । गुरुं भारं न अन्यदीयं भारं यथान्यस्मै ददाति तद्वदस्माकं दातव्यं धनं देहीति वा योज्यं ॥

॥ अथ सप्तमी ॥

तमिन्न्वे३व समना समानमभि क्रत्वा पुनती धीतिरश्याः ।

ससस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपितं जबारु ॥ ७ ॥

तं । इत् । नु । एव । समना । समानं । अभि । क्रत्वा । पुनती । धीतिः । अश्याः ।

ससस्य । चर्मन् । अधि । चारु । पृश्नेः । अग्रे । रुपः । आरुपितं । जबारु ॥ ७ ॥

अग्निविद्युदादित्यास्त्रयोऽपि मतभेदेन वैश्वानरशब्दाभिधेया इति यास्केनोक्तत्वादत्रादित्यात्मना वैश्वानरः स्तूयते । तमित्तमेव वैश्वानरं द्युस्थानं समानं सर्वेषामेकरूपं समना सदृशी तद्योग्या पुनत्यस्मान् शोधयित्री धीतिर्मतिरस्मदीया स्तुतिः क्रत्वा तदुचितेन कर्मणा न्वेव क्षिप्रमेवाश्याः । अभिप्राप्नुयात् । भजेदित्यर्थः ॥

अश्नोतेर्लिङि बहुलं छंदसीति विकरणस्य लुक्। व्यत्ययेन परस्मैपदं मध्यमपुरुषत्वं च ॥ पूर्ववत्तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः। यस्य द्युस्थानस्य वैश्वानरस्य जवारु जवमानरोहि चारु दीप्तं मंडलं। जवारु जवमानरोहीति वा जरमाणरोहीति वेति यास्कः। नि० ६. १७.। अग्रे पुरस्तात्पूर्वस्यां दिशि रुपः। आरोपयति स्वात्मनि सस्यादीनि रुविति भूमिरुच्यते। तस्याः सकाशात्सस्य। लुप्तोपममेतत्। स्वपत इव निश्चलस्य पृश्नेः। द्युनामैतत् स्वः पृश्निरिति द्युलोकादित्ययोः साधारणनामसु पाठात्। ज्योतिरादिभिः स्पृश्यमानस्य द्युलोकस्याधि उपरि चर्मन् चर्मणे चरणाय ॥ चरेरौणादिको मनिन्। सुपां सुलुगिति चतुर्थ्या लुक् ॥ आरुपितमारोपितं देवैः। तमश्या इति पूर्वेणान्वयः ॥

॥ अथाष्टमी ॥

प्रवाच्यं वचसः किं मे अस्य गुहा हितमुप निणिग्वदंति।
यदुस्रियाणामप वारिव व्रन्पाति प्रियं रुपो अग्रं पदं वेः ॥ ८ ॥

प्रऽवाच्यं। वचसः। किं। मे। अस्य। गुहा। हितं। उप। निणिक्। वदंति।
यत्। उस्रियाणां। अप। वाःऽइव। व्रन्। पाति। प्रियं। रुपः। अग्रं। पदं। वेरिति वेः ॥८॥

मे मदीयस्यास्य वक्ष्यमाणस्य वचसो वाक्यस्य किं प्रवाच्यमस्ति। तथ्यमेवोच्यत इत्यर्थः। किं तद्वच इत्युच्यते। उस्रियाणां। गोनामैतत्। क्षीराद्युत्स्राविणीनां गवां संबंधि यत्क्षीरं वारिवोदकमिव तद्यथा सेकेनाविष्कुर्वंति तथापव्रन् अपवृण्वंति दोग्धारो निणिक्। नितरां नेनेक्ति शोधयतीति निणिक् क्षीरमुच्यते। तादृक् क्षीरमनेन वैश्वानरेण गुहा गुहायामुपहितमुपनिहितं वदंति वेत्तारः। किंचायं वेर्व्याप्ताया रुपो भूम्याः प्रियं सर्वेषामाधारत्वेन प्रियभूतमग्रं श्रेष्ठं पदं स्थानं पाति। रक्षति ॥

॥ अथ नवमी ॥

इदमु त्यन्महि महामनीकं यदुस्रिया सचत पूर्व्यं गौः।
ऋतस्य पदे अधि दीद्यानं गुहा रघुष्यद्रघुयद्विवेद ॥ ९ ॥

इदं। ऊं इति। त्यत्। महि। महां। अनीकं। यत्। उस्रिया। सचत। पूर्व्यं। गौः।
ऋतस्य। पदे। अधि। दीद्यानं। गुहा। रघुऽस्यत्। रघुऽयत्। विवेद ॥ ९ ॥

इदमु इदमेव त्यत्प्रसिद्धं महि महत्पूज्यं महां महतां देवानामनीकं समूहरूपं सूर्यमंडलं वैश्वानर एवेति शेषः। पूर्व्यं पूर्वकालीनं पूरकं वा यन्मंडलमुस्रिया क्षीराद्युत्पादयित्री गौरग्निहोत्राद्यर्थं सचत सेवते। ऋतस्योदकस्य पदे स्थानेऽंतरिक्षेऽप्यधिकं। यद्वाधीति सप्तम्यर्थानुवादः। दीद्यानं द्योतमानं गुहा गुहायां रघुष्यत् शीघ्रं स्यंदमानं रघुयत् शीघ्रं गच्छत्सूर्यमंडलं विवेद। वैश्वानरमेवेति ज्ञातवानस्मि॥

॥ अथ दशमी ॥

अधं द्युतानः पित्रोः सचासामनुत गुह्यं चारु पृश्नेः।
मातुष्पदे परमे अंति षद्गोर्वृष्णः शोचिषः प्रयतस्य जिह्वा ॥१०॥

अधं। द्युतानः। पित्रोः। सचां। आसा। अमनुत। गुह्यं। चारुं। पृश्नेः।
मातुः। पदे। परमे। अंति। सत्। गोः। वृष्णः। शोचिषः। प्रऽयतस्य। जिह्वा ॥१०॥

अध अथ द्युतानो दीप्यमानः पित्रोर्द्यावापृथिव्योः सचा सह मध्ये व्याप्तः सन् पृश्नेर्गोः संबंधि चारु रमणीयं गुह्यमूधसि निगूढं पय आसा स्वकीयेनास्येनामनुत। मानायाबुध्यत। उक्तमेवार्थं विवृणोति। मातुः क्षीरादिनिर्मात्र्या गोः परमे पद उत्कृष्टे स्थान ऊधोलक्षणेऽंति सत् समीपे विद्यमानं क्षीरं वृष्णः फलानां वर्षितुः शोचिषो दीप्तस्य प्रयतस्याहवनीयादिरूपेण नियतस्य वैश्वानरस्य जिह्वा पातुमिच्छतीति शेषः॥

॥ इति तृतीयस्य पंचमे द्वितीयो वर्गः ॥

॥ अथैकादशी ॥

ऋतं वोचे नमसा पृच्छ्यमानस्तवाशसा जातवेदो यदीदं।
त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रविणं यत्पृथिव्यां ॥११॥

ऋतं। वोचे। नमसा। पृच्छ्यमानः। तवं। आऽशसा। जातऽवेदः। यदिं। इदं।
त्वं। अस्य। क्षयसि। यत्। ह। विश्वं। दिवि। यत्। ऊं इतिं। द्रविणं। यत्। पृथिव्यां ॥११॥

अहं यजमानो नमसा नमस्कारेण सह पृच्छ्यमानोऽन्यैरनुयुज्यमानः सन् ऋतं वोचे। सत्यं ब्रवीमि। किं तदित्युच्यते। हे जातवेदो जातानां वेदितर्जातप्रज्ञ वाग्ने तवाशसा त्वत्स्तुत्या साधनेन यदीदं धनं लब्धमस्माभिः स्यात् अस्य धनस्य

त्वं क्षयसि। त्वमेवेश्वरो भवसि। तस्य धनस्य यज्ञादिद्वाराग्न्यर्थत्वादिति भावः। विश्वमिति अवस्यमिदमुक्तं। यद्व विश्वं यत्खलु कृत्स्नं धनमस्ति तस्यापीशिषे। विश्वमिति सामान्येन यदुक्तं तदेव विशदयति। दिवि द्युलोके यद् द्रविणं यदेव धनं यच्च पृथिव्यां धनं तस्य सर्वस्य त्वमीश्वरो भवसि। यज्ञार्थं द्रव्यमुत्पन्नमिति स्मरणात्। अग्निव्यतिरेकेण यज्ञासंभवादिति भावः॥

॥ अथ द्वादशी ॥

किं नो अस्य द्रविणं कद्ध रत्नं वि नो वोचो जातवेदश्चिकित्वान्।
गुहाध्वनः परमं यन्नो अस्य रेकु पदं न निदाना अगन्म ॥१२॥

किं। नः। अस्य। द्रविणं। कत्। ह। रत्नं। वि। नः। वोचः। जातऽवेदः। चिकित्वान्।
गुहा। अध्वनः। परमं। यत्। नः। अस्य। रेकु। पदं। न। निदानाः। अगन्म ॥१२॥

पूर्वमंत्रेण यस्य धनस्याग्निस्वामित्वमुक्तमस्य धनस्य किं द्रविणं किं साधनभूतं नोऽस्मभ्यं दातव्यं धनमस्ति। कद्ध रत्नं किं च रमणीयं हितकरं धनमस्ति। तद्धनं हे जातवेदो जातधनाग्ने चिकित्वांश्चेतनावानभिज्ञस्त्वं नोऽस्मभ्यं विवोचः। विब्रूहि। यद्वा किं दातव्यं द्रविणमस्ति। अस्य द्रविणराशेः कद्ध रत्नमिति योज्यं। अस्याध्वनो धनप्राप्तिमार्गस्य यद्गुहा गुहायां निहितं गूढं परममुत्कृष्टं प्राप्तव्यमस्ति तदपि नोऽस्मभ्यं विवोचः। वयं रेकु रिक्तं पदं गंतव्यं स्थानं गृहादिकं निदाना अन्यैर्निंद्यमानाः॥ कर्मणि कर्तृप्रत्ययः॥ नागन्म। न प्राप्नुमः॥

॥ अथ त्रयोदशी ॥

का मर्यादा वयुना कद्ध वाममच्छा गमेम रघवो न वाजं।
कदा नो देवीरमृतस्य पत्नीः सूरो वर्णेन ततनन्नुषासः ॥१३॥

का। मर्यादा। वयुना। कत्। ह। वामं। अच्छ। गमेम। रघवः। न। वाजं।
कदा। नः। देवीः। अमृतस्य। पत्नीः। सूरः। वर्णेन। ततनन्। उषसः ॥१३॥

का मर्यादा का प्राप्त्यादिव्यवस्था का च वयुना प्रज्ञानं पदार्थविषयं किं च वामं वननीयं पदार्थजातं। एतत्सर्वमच्छ गमेम। अभिगच्छेम। तत्र दृष्टांतः। रघवो न वाजं। शीघ्रगामिनोऽश्वादयः संग्राममिव तद्वत्। कदा कस्मिन्काले नोऽस्माकं व्यवहाराय देवीर्देव्यो द्योतमाना अमृतस्यामरणधर्मस्यादित्यस्य पत्नीः

पत्न्यः पालयित्र्यः सूरः प्रसविष्य उषसो वर्णेन प्रकाशेन ततनन्। विस्तारयेयुः। एवं सूर्यसंबंधिन उषसः स्तुत्या सर्वात्मनो वैश्वानरस्य स्तुतिरवगंतव्या ॥ तनोतेर्लेटि बहुलं छंदसीति विकरणस्य लुः। द्विर्भावहलादिशेषौ ॥

॥ अथ चतुर्दशी ॥

अनिरेण वचसा फल्ग्वेन प्रतीत्येन कृधुनातृपासः।
अधा ते अग्ने किमिहा वदंत्यनायुधास आसता सचंतां ॥ १४॥

अनिरेण। वचसा। फल्ग्वेन। प्रतीत्येन। कृधुना। अतृपासः।
अध। ते। अग्ने। किं। इह। वदंति। अनायुधासः। असता। सचंतां ॥ १४॥

अनिरेण। इरान्नं। तद्रहितेन फल्ग्वेनोक्थेन प्रतीत्येन प्रतिगंतव्येन। आरोहेणेत्यर्थः। कृधुना ह्रस्वेन। कृध्विति ह्रस्वनाम कृधुको वम्रक इति तन्नामसूक्तत्वात्। एवंविधेन वचसातृपासोऽतृप्ता जनाः। अध अधुनेहास्मिन् लोके हे अग्ने ते त्वां किं वदंति। निर्हेविष्केण वचसा न किंचिल्लभ्यत इत्यर्थः। किंत्वनायुधासः। आयुधशब्दः साधनं लक्षयति। हविरादिसाधनरहितास्तेऽसता दुःखेन सचंतां। संगच्छंतां ॥

॥ अथ पंचदशी ॥

अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आ रुरोच।
रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौत् ॥ १५॥

अस्य। श्रिये। संऽइधानस्य। वृष्णः। वसोः। अनीकं। दमे। आ। रुरोच।
रुशत्। वसानः। सुदृशीकऽरूपः। क्षितिः। न। राया। पुरुऽवारः। अद्यौत् ॥ १५॥

समिधानस्य समिध्यमानस्य। कर्मणि कर्तृप्रत्ययः। वृष्णो वर्षितुः फलस्य वसोर्वासयितुरस्याग्नेरनीकं तेजःसंघो दमे यागगृह आ रुरोच। सर्वतो दीप्यते। किमर्थं। श्रिये श्रेयसे यजमानानां। सोऽग्नी रुशत्। वर्णनामैतत्। दीप्तं तेजो वसान आच्छादयन् अत एव सुदृशीकरूपः सुष्ठु दर्शनीयरूपः पुरुवारो बहुभिर्ऋत्विग्भिर्यजमानैर्वरणीयः सन्नद्यौत्। द्योतते। किमिव। रायाश्वादिधनेन क्षितिर्न राजादिरिव। क्षितिरिति मनुष्यनाम ॥

॥ इति तृतीयस्य पंचमे तृतीयो वर्गः ॥

ऊर्ध्व ऊ षु ण इत्येकादशर्चं षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं। ऊर्ध्व ऊ त्वेकादशेत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छंदसीदं। सूचितं च। ऊर्ध्व ऊ षु णः सस्य यद्विगुतेति पंच। आ० ४.१३.। इति ॥

॥ तत्र प्रथमा ॥

ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान्।
त्वं हि विश्वमभ्यसि मन्म प्र वेधसश्चित्तिरसि मनीषां ॥१॥

ऊर्ध्वः। ऊं इति। सु। नः। अध्वरस्य। होतः। अग्ने। तिष्ठ। देवऽताता। यजीयान्।
त्वं। हि। विश्वं। अभि। असि। मन्म। प्र। वेधसः। चित्। तिरसि। मनीषां ॥१॥

हे अध्वरस्य होतर्यागसंबंधिनां देवानामाह्वातः। यद्वा होतरित्यत्र प्रकृत्यंशोऽनुवादः। हे होमनिष्पादकाग्ने यजीयान्यष्टृतमस्त्वं नोऽस्माकमूर्ध्व ऊ षु तिष्ठ। उन्नत एव तिष्ठ। नित्यमुन्नतो भवतीत्यर्थः। कुत्रेति तदुच्यते। देवताता देवतातौ। देवास्तायंते विस्तीर्यंतेऽत्रेति देवतातिर्यज्ञः। तस्मिन्। त्वं हि त्वं खलु विश्वं सर्वं मन्म मननीयं शत्रूणां धनमभ्यसि। अभिभवसि। किंच वेधसश्चित्। चित्पूजायां। स्तोतुर्यजमानादेर्मनीषां मतिं स्तुतिं प्रतिरसि। प्रवर्धयसि। प्रपूर्वस्तिरतिर्वर्धनार्थः ॥

॥ अथ द्वितीया ॥

अमूरो होता न्यसादि विक्ष्व१ग्निर्मंद्रो विदथेषु प्रचेताः।
ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्तभायदुप द्यां ॥२॥

अमूरः। होता। नि। असादि। विक्षु। अग्निः। मंद्रः। विदथेषु। प्रऽचेताः।
ऊर्ध्वं। भानुं। सविताऽइव। अश्रेत्। मेताऽइव। धूमं। स्तभायत्। उप। द्यां ॥२॥

अमूरोऽमूढः। प्रगल्भ इत्यर्थः। होता होमनिष्पादको मंद्रो मदनीयो मादयिता वा प्रचेताः प्रकृष्टज्ञानोऽग्निर्देवो विक्ष्वृत्विग्रूपासु प्रजासु मध्ये विदथेषु यागेषु निमित्तभूतेषु न्यसादि। नितरां स्थापितः। अथ तथाभूतोऽग्निर्भानुं दीप्तिं सवितेवोदितः सूर्य इवोर्ध्वमश्रेत्। ऊर्ध्वमुखमाश्रयति। किंच मेतेव स्थूणेव। सा यथा स्वाधिष्ठितं वंशादिकं स्तभ्नाति तद्वदयमग्निर्धूमं स्वोत्थितं द्यामुप द्युलोकस्योपरि स्तभायत्। स्तभ्नाति ॥

॥ अथ तृतीया ॥

यता सुजूर्णी रातिनी घृताची प्रदक्षिणिद्देवतातिमुराणः ।
उदु स्वरुर्नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः ॥ ३ ॥

यता । सुऽजूर्णिः । रातिनी । घृताची । प्रऽदक्षिणित् । देवऽतातिं । उराणः ।
उत् । ऊं इति । स्वरुः । नवऽजाः । न । अक्रः । पश्वः । अनक्ति । सुऽधितः । सुऽमेकः ॥ ३ ॥

यता संयता सुजूर्णिः शोभनजवा सुष्ठु जीर्णा पुराणी वा । घृताची । घृतमंचतीति घृताची जुहूः । रातिनी । रातिर्धनं । हविर्लक्षणधनवती । आज्यपूर्णा भवतीत्यर्थः । देवतातिं यज्ञं तथोराण उरु कुर्वाणोऽध्वर्युरग्निर्वा प्रदक्षिणित् । प्रदक्षिणमेतीति प्रदक्षिणित् । प्रदक्षिणगमनो भवति ॥ अकारलोपश्छांदसः ॥ नवजा नवजातस्तदानीमेवोत्पादितः स्वरुर्न । यूपशकलवाची स्वरुश्च यूपं लक्षयति । चषालवंतः स्वरवः पृथिव्यां । ऋग्वे॰ ३. ८. १०. । इत्यादिषु स्वरुशब्देन यूपाभिधानाच्च । नकारः समुच्चये । यूपोऽप्युदु । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । उन्नतो भवति । किंच अक्र आक्रमिता सुमेकः सुदीप्तः सुधितः स्वधितिरित्यर्थः । सोऽपि पश्वः पशूननक्ति । गच्छति । यद्वा सुधितः स्वरुरेवोदु उत्कृष्टः पश्वः पशूननक्ति । स्वरुणा पशुमनक्तीति श्रुतेः ॥

॥ अथ चतुर्थी ॥

स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात् ।
पर्यग्निः पशुपा न होता त्रिविष्ट्येति प्रदिव उराणः ॥ ४ ॥

स्तीर्णे । बर्हिषि । संऽइधाने । अग्नौ । ऊर्ध्वः । अध्वर्युः । जुजुषाणः । अस्थात् ।
परि । अग्निः । पशुऽपाः । न । होता । त्रिऽविष्टि । एति । प्रऽदिवः । उराणः ॥ ४ ॥

बर्हिषि वेद्यां स्तीर्ण आस्तृते सत्यग्नावाहवनीयादिके समिधाने सम्यगिध्यमाने सत्यध्वर्युरध्वरस्य नेता जुजुषाणो देवान्प्रीणयन्नूर्ध्वोऽस्थात् । तिष्ठति । होता होमनिष्पादकः प्रदिवः । पुराणनामैतत् । पुरातन उराणः स्वल्पमपि हविर्देवयोग्यत्वसंपादनेनोरु कुर्वाणः । उराण उरु कुर्वाण इति निरुक्तं । यद्वै देवैर्जोष्यते हविस्तन्निरिमाणं वर्धत इति श्रुतेरग्नेरुरुकरणमुचितं । ईदृशोऽग्निः पशूपा न पशूनां पालक इव पशून् त्रिविष्टि त्रिरावृत्य पर्येति । त्रिर्हि पर्यग्निः क्रियते ॥

॥ अथ पंचमी ॥

परि त्मना मितद्रुरेति होताग्निर्मंद्रो मधुवचा ऋतावा ।
द्रवंत्यस्य वाजिनो न शोका भयंते विश्वा भुवना यदभ्राट् ॥ ५ ॥

परि । त्मना । मितऽद्रुः । एति । होता । अग्निः । मंद्रः । मधुऽवचाः । ऋतऽवा ।
द्रवंति । अस्य । वाजिनः । न । शोकाः । भयंते । विश्वा । भुवना । यत् । अभ्राट् ॥ ५ ॥

उक्तमेवार्थं स्पष्टयति । अयं होता होमनिष्पादकोऽग्निस्त्मनात्मना स्वरूपेणैव मितद्रुः परिमितगतिः सन् पर्येति । परितो गच्छति पशुं । कीदृशोऽयं । मंद्रो मदनीयो मोदयिता वा मधुवचा मधुरवचन ऋतावा यज्ञवान् । वाजिनो हविष्मतोऽस्याग्नेः शोका न दीप्तयोऽपि । नशब्दोऽप्यर्थे । द्रवंति । गच्छंति परितः । यद्वा नकार उपमार्थीयः । वाजिनो न अश्वा इव द्रवंतीति योज्यं । यद्यस्मादयमभ्राट् भ्राजते तस्माद्विश्वा भुवना सर्वाणि भूतजातानि भयंते । भीतानि भवंति ॥

॥ इति तृतीयस्य पंचमे चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः ।
न यत्ते शोचिस्तमसा वरंत न ध्वस्मानस्तन्वी३ रेप आ धुः ॥ ६ ॥

भद्रा । ते । अग्ने । सुऽअनीक । संऽदृक् । घोरस्य । सतः । विषुणस्य । चारुः ।
न । यत् । ते । शोचिः । तमसा । वरंत । न । ध्वस्मानः । तन्वि । रेपः । आ । धुरिति धुः ॥ ६ ॥

हे स्वनीक शोभनज्वालाग्ने घोरस्य भीतिजनकस्यापि सतो विषुणस्य विष्वक् सर्वतो व्याप्तस्य ते तव चारू रमणीया भद्रा स्तुत्या कल्याणी वा मूर्तिः संदृक् संदृष्टिः । सम्यक् दृश्या भवतीतित्यर्थः । यद्यस्मात्ते शोचिर्दीप्तिं तमसांधकारेण न वरंत वारयंति निशाः । यस्माच्च ध्वस्मानो ध्वंसका राक्षसादयस्ते तन्वि तव शरीरे रेपः पापं ध्वंसनादिरूपं नाधुः न दधति न कुर्वंति । अतः संदृगिति संबंधः ॥

॥ अथ सप्तमी ॥

न यस्य सातुर्जनितोरवारि न मातरापितरा नू चिदिष्टौ ।
अधा मित्रो न सुधितः पावको३ऽग्निर्दीदाय मानुषीषु विक्षु ॥ ७ ॥

न। यस्यं। सातुः। जनितोः। अवारि। न। मातरापितरा। नु। चित्। इष्टौ।
अर्ध। मित्रः। न। सुऽधितः। पावकः। अग्निः। दीदाय। मानुषीषु। विक्षु ॥७॥

जनितोर्जनयितुर्वृष्ट्युत्पादकस्य यस्य वैश्वानरस्य सातुः सनिः पश्वादिलक्षणं दानं दीप्तिर्वा नावारि केनापि न वार्यते। किंच मातरापितरा मातापितरौ द्यावापृथिव्यौ यस्येष्टौ प्रेषणे नू चित् क्षिप्रमेव न प्रभवतः अधापि च मित्रो न सखेव सुधितः सुतृप्तः पावकः शोधकोऽग्निर्मानुषीषु मनोः संबंधिनीषु विक्षु प्रजासु दीदाय। दीप्यते ॥ दीपी दीप्तौ। पकारलोपश्छांदसः। व्यत्ययेन परस्मैपदं। लिट्यभ्यासस्य ह्रस्वे कृते तुजादित्वाद्दीर्घत्वं ॥

॥ अथाष्टमी ॥

द्विर्यं पंच जीजनन्त्संवसानाः स्वसारो अग्निं मानुषीषु विक्षु।
उषर्बुधमथर्यो३न दंतं शुक्रं स्वासं परशुं न तिग्मं ॥८॥

द्विः। यं। पंच। जीजनन्। संऽवसानाः। स्वसारः। अग्निं। मानुषीषु। विक्षु।
उषःऽबुधं। अथर्यः। न। दंतं। शुक्रं। सुऽआसं। परशुं। न। तिग्मं ॥८॥

मानुषीषु मनोः संबंधिनीषु विक्षु प्रजासु संवसानाः संगच्छमाना द्विः पंच दश स्वसारोऽंगुलयो यमग्निं जीजनन् मंथनेनोदपादयन् ॥ जनी प्रादुर्भावे। लुङि छांदसत्वादडभावः ॥ कीदृशं। अथर्यो न स्त्रिय इवोषर्बुधमुषसि बुध्यमानं दंतं हविषां भक्षकं शुक्रं रश्मिभिर्दीप्यमानं स्वासं शोभनास्यं तिग्मं तीक्ष्णं परशुं न परशुमिव रक्षसां हंतारमिति शेषः ॥

॥ अथ नवमी ॥

तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वंचः स्वंचः।
अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वंत दस्माः ॥९॥

तव। त्ये। अग्ने। हरितः। घृतऽस्नाः। रोहितासः। ऋजुऽअंचः। सुऽअंचः।
अरुषासः। वृषणः। ऋजुऽमुष्काः। आ। देवऽतातिं। अह्वंत। दस्माः ॥९॥

हे अग्ने त्ये ते प्रसिद्धास्तव हरितस्त्वत्संबंधिनोऽश्वा देवतातिमस्मदीयं यागं प्रत्याह्वंत। ऋत्विग्भिराहूयंते ॥ लुङि लिपिसिचिह्वश्चेत्यङादेशः ॥ कीदृशाः। घृतस्ना घृतस्नुवो बलातिशयान्नासापुटादिस्थानेभ्य उदकं क्षरंतो रोहितासो रो-

हिता लोहितवर्णा ऋजंचः। ऋजुकुटिलमंचंति गच्छंतीत्यृजंचः सुष्टु गच्छंतः। अरुषास आरोचमाना वृषणो युवानो वर्षितारो वा॥ वा षपूर्वस्य निगम इति विकल्पेन दीर्घविधानादत्र दीर्घाभावः॥ ऋजुमुष्काः साधनमुष्का दस्रा दर्शनीयाः॥

॥ अथ दशमी ॥

ये ह त्ये ते सहमाना अयासस्त्वेषासो अग्ने अर्चयश्चरंति।
श्येनासो न दुवसनासो अर्थं तुविष्वणसो मारुतं न शर्धः॥१०॥
ये। ह। त्ये। ते। सहमानाः। अयासः। त्वेषासः। अग्ने। अर्चयः। चरंति।
श्येनासः। न। दुवसनासः। अर्थं। तुविऽस्वनसः। मारुतं। न। शर्धः॥१०॥

हे अग्ने ये ह खलु त्ये ते प्रसिद्धाः सहमानाः शत्रूनभिभवंतोऽयासो गमनशीलास्त्वेषासो दीप्ता दुवसनासः परिचरणीयास्ते त्वदीया अर्चयो रश्मयः श्येनासो न अश्वा इवार्थं गंतव्यं चरंति। गच्छंति। कीदृशाः। मारुतं शर्धो न मरुत्संबंधी गण इव तुविष्वणसस्तुविस्वना अधिकध्वनयो भवंति॥

॥ अथैकादशी ॥

अकारि ब्रह्म समिधान तुभ्यं शंसात्युक्थं यजते व्यू धाः।
होतारमग्निं मनुषो नि षेदुर्नमस्यंत उशिजः शंसमायोः॥११॥
अकारि। ब्रह्म। संऽइधान। तुभ्यं। शंसाति। उक्थं। यजते। वि। ऊं इति। धाः।
होतारं। अग्निं। मनुषः। नि। सेदुः। नमस्यंतः। उशिजः। शंसं। आयोः॥११॥

हे समिधान समिध्यमानाग्ने तुभ्यं त्वदर्थं ब्रह्म स्तोत्रमकारि। अस्माभिः कृतं। होतोक्थं शस्त्ररूपं स्तोत्रं शंसाति। शंसति॥ शन्सु स्तुतौ। लेटोऽडाटावित्यडागमः॥ त्वां यजमानो यजते। अतः कारणादस्मभ्यं धनं वि धाः। विधेहि॥ दधातेश्छांदसे लुङि बहुलं छंदसीत्यडभावः। उ इति पादपूरणः॥ किंच आयोर्मनुष्यस्य शंसं शंसनीयं होतारं देवानामाह्वातारमग्निं त्वां नमस्यंतः पूजयंत उशिजः पश्वादिलक्षणं धनं कामयमाना मनुषो मनुष्या ऋत्विजो निषेदुः। उपाविशन्। सेवंत इत्यर्थः॥

॥ इति तृतीयस्य पंचमे पंचमो वर्गः॥

अयमिहेत्येकादशर्चं सप्तमं सूक्तं वामदेवस्यार्षमाग्नेयं। आद्या जगती त्रि-

याद्याः पंचानुष्टुभः शिष्टास्त्रिष्टुभः । तथा चानुक्रांतं । अयमिहाद्री जगती पंचानुष्टुभ इति ॥ सूक्तविनियोगो लैंगिकः ॥ अग्निप्रणयनेऽयमिहेति वैश्यस्य प्रतिपत् । तथा च सूचितं । अयमिह प्रथमो धायि धातृभिरिति तु राजन्यवैश्ययोराद्ये । आ॰ २.१७.। इति ॥

॥ तत्र प्रथमा ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥ १ ॥
अयं । इह । प्रथमः । धायि । धातृऽभिः । होता । यजिष्ठः । अध्वरेषु । ईड्यः ।
यं । अप्नवानः । भृगवः । विऽरुरुचुः । वनेषु । चित्रं । विऽभ्वं । विशेऽविशे ॥ १ ॥

धातृभिर्यज्ञार्थं कर्म कुर्वद्भिरध्वर्युभिरिहास्मिन्यज्ञे होता देवानामाह्वाता यजिष्ठोऽतिशयेन यष्टाध्वरेषु यागेष्वीड्य ऋत्विग्भिः स्तूयमानः प्रथमः सर्वेषां देवानां मुख्योऽयमाहवनीयादिस्थानेषु प्रत्यक्षेणोपलभ्यमानोऽग्निर्धायि । अधायि । निहितः ॥ दधातेः कर्मणि लुङ् । बहुलं छंदस्यमाङ्योग इत्यडभावः । तिङ्ङतिङ इति निघातः ॥ अयमग्निरित्युक्तं कोऽसावग्निरित्यत आह । अप्नवानो भृगुसंबंधी कश्चिदृषिः स चान्ये भृगवश्च वनेष्वरण्येषु चित्रं दावाग्निरूपेण बहुधा दर्शनीयं विशे विशे । वीप्सया सर्वजनव्याप्तिर्गृह्यते । सर्वस्या विशः प्रजाया विभ्वं विभुमीश्वरं यं देवानां हविर्वाहकत्वेन प्रसिद्धमग्निं विरुरुचुः दीप्तियुक्तं कुर्वंति स्म । यमिति यच्छब्दस्यायमितीदंशब्देन संबंधः ॥

अग्ने कदा त इति प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतावानुष्टुभे छंदस्यग्ने कदा त इत्याद्याः पंचर्चः । सूचितं च । अग्ने कदा त इति पंच । आ॰ ४.१३.। इति ॥

॥ तासां प्रथमा सूक्ते द्वितीया ॥

अग्ने कदा त आनुषग्भुवद्देवस्य चेतनं ।
अधा हि त्वा जगृभ्रिरे मर्तासो विक्ष्वीड्यं ॥ २ ॥
अग्ने । कदा । ते । आनुषक् । भुवत् । देवस्य । चेतनं ।
अध । हि । त्वा । जगृभ्रिरे । मर्तासः । विक्षु । ईड्यं ॥ २ ॥

हे अग्ने अधातः कारणाद्देवस्य द्योतमानस्य ते तव संबंधि चेतनं तेजः कदा-

नुषक् अनुषक्तं भुवत्। भवेत् ॥ लेट्यडागमः। बहुलं छंदसीति विकरणस्य लुक्। भूसुवोस्तिङीति गुणप्रतिषेधः ॥ अतः कारणादित्युक्तं। कस्माद्धेतोरित्युच्यते। हि यस्मात्कारणान्मर्तासो मनुष्या विक्षु विड्भिः प्रजाभिरीड्यं त्वा त्वां जगृभ्रिरे जगृहिरे गृह्णंति ॥ ग्रहेर्धातोर्लिटि हग्रहोर्भ इति भत्वं। बहुलं छंदसीति रुडागमः ॥

॥ अथ तृतीया ॥

ऋतावानं विचेतसं पश्यंतो द्यामिव स्तृभिः।
विश्वेषामध्वराणां हस्कर्तारं दमेदमे ॥ ३ ॥
ऋतऽवानं। विऽचेतसं। पश्यंतः। द्यांऽइव। स्तृऽभिः।
विश्वेषां। अध्वराणां। हस्कर्तारं। दमेऽदमे ॥ ३ ॥

ऋतावानममायिनं विचेतसं विशिष्टज्ञानं स्तृभिर्नक्षत्रैः परिवृतं द्यामिव विस्फुलिंगैः समेतं विश्वेषां सर्वेषामध्वराणां यज्ञानां हस्कर्तारं प्रभासकं वृद्धेः कर्तारं वाग्निं पश्यंत ऋत्विगादयो दमे दमे सर्वस्मिन्यज्ञगृहे जगृभ्रिर इति पूर्वेण संबंधः ॥

॥ अथ चतुर्थी ॥

आशुं दूतं विवस्वतो विश्वा यश्चर्षणीरभि।
आ जभ्रुः केतुमायवो भृगवाणं विशेविशे ॥ ४ ॥
आशुं। दूतं। विवस्वतः। विश्वाः। यः। चर्षणीः। अभि।
आ। जभ्रुः। केतुं। आयवः। भृगवाणं। विशेऽविशे ॥ ४ ॥

योऽग्निर्विश्वाश्चर्षणीः सर्वाः प्रजा अभिभवति आयवो मनुष्याः। आयव इति मनुष्यनाम आयवो यदव इति मनुष्यनामसु पाठात्। आशुं क्षिप्रगामिनं विवस्वतो मनुष्यस्य यजमानस्य दूतं। विवस्वत इति मनुष्यनामेदं। केतुं प्रज्ञापकं भृगवाणं भृगुवदाचरंतं। दीप्यमानमित्यर्थः ॥ सर्वप्रातिपदिकेभ्यः क्विप् वक्तव्य इति क्विप्। तदंताल्लटो व्यत्ययेन शानच्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तत्वं ॥ तमग्निं विशे विशे सर्वस्यै प्रजाया आजभ्रुः। आजह्रुः ॥ हग्रहोर्भ इति भत्वं ॥

॥ अथ पंचमी ॥

तमीं होतारमानुषक्चिकित्वांसं नि षेदिरे ।

रण्वं पावकशोचिषं यजिष्ठं सप्त धामभिः ॥ ५ ॥

तं । ईं । होतारं । आनुषक् । चिकित्वांसं । नि । सेदिरे ।

रण्वं । पावकऽशोचिषं । यजिष्ठं । सप्त । धामऽभिः ॥ ५ ॥

ऋत्विगादयो मनुष्या आनुषक् आनुपूर्व्येण होतारं देवानामाह्वातारं चिकित्वांसं जानंतं ॥ कित ज्ञाने । लिटः क्वसुः । द्विर्भावहलादिशेषचुत्वदीर्घाः । प्रत्ययस्वरः ॥ तमीं तमिममग्निं निषेदिरे । निषादयंति स्म । कीदृशं । रण्वं रमणीयं पावकशोचिषं शोधकदीप्तिं यजिष्ठं यष्टृतमं सप्तभिर्धामभिस्तेजोभिर्युक्तं ॥

॥ इति तृतीयस्य पंचमे षष्ठो वर्गः ॥

॥ अथ षष्ठी ॥

तं शश्वतीषु मातृषु वन आ वीतं अश्रितं ।

चित्रं संतं गुहा हितं सुवेदं कूचिदर्थिनं ॥ ६ ॥

तं । शश्वतीषु । मातृषु । वने । आ । वीतं । अश्रितं ।

चित्रं । संतं । गुहा । हितं । सुऽवेदं । कूचित्ऽअर्थिनं ॥ ६ ॥

शश्वतीषु बह्वीषु मातृष्वप्सु । ताः सस्यादिनिर्मातृकत्वान्मातर इत्युच्यंते । वन आ वृक्षसमूहे च । आकारश्चार्थे । संतं विद्यमानं वीतं कांतमश्रितं प्राणिभिर्दाहभयादसेवितं । दुरासदमित्यर्थः । चित्रं चायनीयं गुहा गुहायां हितं निहितं सुवेदं सुविज्ञानं सुधनं वा कूचिदर्थिनं क्वापि हविष्यर्थिनं समिदाज्यपुरोडाशादिहविः स्वीकुर्वंतं ॥ क्वेत्यत्र वकारस्य छांदसे संप्रसारणे परपूर्वत्वे च हल इति दीर्घत्वं ॥ एवंभूतमग्निं निषेदिर इति पूर्वेण संबंधः ॥

प्रातरनुवाकाश्विनशस्त्रयोस्त्रिष्टुभे छंदसि ससस्य यद्वियुतेत्याद्याः पंचर्चः । सूत्रितं च । ससस्य यद्वियुतेति पंच । आ० ४.१३. । इति ॥

॥ सैषा सूक्ते सप्तमी ॥

ससस्य यद्वियुता सस्मिन्नूधन्नृतस्य धामन्रणयंत देवाः ।

महाँ अग्निर्नमसा रातहव्यो वेरध्वराय सदमिदृतावा ॥ ७ ॥

ससस्य। यत्। विऽयुता। सस्मिन्। ऊधन्। ऋतस्य। धामन्। रणयंत। देवाः।
महान्। अग्निः। नमसा। रातऽहव्यः। वेः। अध्वराय। सदं। इत्। ऋतऽवा ॥७॥

यद्यमग्निं देवाः स्तोतारः ससस्य स्वप्नस्य वियुता वियुते वियोगे। उषसीत्यर्थः। ऋतस्योदकस्य धामन् धामनि स्थाने सस्मिन् सर्वस्मिन्नूधन्नूधनि यज्ञे रणयंत रमयंति। स्तोत्रैरिति शेषः। महान्प्रभूतो नमसा नमस्कारेण रातहव्यो दत्तहविष्क ऋतावा सत्यवान् सोऽग्निः सदमित्सदैवाध्वरायाध्वरं यजमानैः कृतं यज्ञं॥ सुपां सुपो भवंतीति वक्तव्यमिति वचनाद्द्वितीयार्थे चतुर्थी॥ वेः। वेत्ति। जानाति। यद्वा देवा इंद्रादयः ससस्य ऋत्विग्भिः सेव्यस्य यद्यस्याग्नेर्वियुता विशिष्टे सस्मिन् भजनीय ऋतस्य सत्यस्य धामन् धामनि योनावूधन्नूधनि यज्ञे रणयंत रमयंते महान्प्रभूतो नमसा हविषा रातहव्यो दत्तहविष्क ऋतावा सत्यवान् सोऽग्निरध्वराय यज्ञार्थं सदमित्सदैव वेः। गंता भवति। अध्वराय यज्ञं वेः कामयते वा॥

॥ अथाष्टमी ॥

वेरध्वरस्य दूत्यानि विद्वानुभे अंता रोदसी संचिकित्वान्।
दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि ॥८॥
वेः। अध्वरस्य। दूत्यानि। विद्वान्। उभे इति। अंतरिति। रोदसी इति। संऽचिकित्वान्।
दूतः। ईयसे। प्रऽदिवः। उराणः। विदुःऽतरः। दिवः। आऽरोधनानि ॥८॥

हे अग्ने विद्वान् सर्वं जानानस्त्वमध्वरस्य यज्ञस्य संबंधीनि दूत्यानि दूतकर्माणि वेः। वेत्सि कामयसे वा। यद्वा वेरिति यज्ञविशेषणं। वेर्यजमानस्याभीष्टफलजनकस्याध्वरस्य यागस्य संबंधीनि दूत्यानि दूतकर्माणि विद्वान् जानन् उभे रोदसी उभयो रोदस्योर्द्यावापृथिव्योरंतर्मध्ये स्थितमंतरिक्षं संचिकित्वान् सम्यक् जानन् प्रदिवः। पुराणनामैतत् प्रत्नं प्रदिव इति पुराणनामसु पाठात्। उराणोऽल्पमपि हविरुरु बहु कुर्वाणः। उराण उरु कुर्वाण इति यास्केनोक्तत्वात्। विदुष्टरो विद्वत्तरो देवानां दूतस्त्वं दिवः स्वर्गस्यारोधनान्यारोहणानि। आरोहणार्हाणि स्थानानीत्यर्थः। देवानां हवींष्यर्पयितुमीयसे। गच्छसि॥

॥ अथ नवमी ॥

कृष्णं त एम रुशतः पुरो भाश्चरिष्ण्व१र्चिर्वपुषामिदेकं।

यदप्रवीता दधते ह गर्भं सद्यश्चिज्जातो भवसीदु दूतः ॥९॥

कृष्णं। ते। एम। रुशतः। पुरः। भाः। चरिष्णु। अर्चिः। वपुषां। इत्। एकं।

यत्। अप्रऽवीता। दधते। ह। गर्भं। सद्यः। चित्। जातः। भवसि। इत्। ऊं इति। दूतः ॥९॥

हे अग्ने रुशतो रोचमानस्य ते तव संबंध्येम। एमन्शब्देन गमनमार्ग उच्यते। एम वर्त्म कृष्णं कृष्णवर्णं भवति। भास्तव संबंधिनी दीप्तिः पुरः पुरस्ताद्भवति। चरिष्णु संचरणशीलमर्चिस्त्वदीयं तेजो वपुषां वपुष्मतां रूपवतां। तेजस्विनामित्यर्थः। एकमिन्मुख्यमेव भवति। यद्यं त्वामप्रवीता अनुपगता यजमाना गर्भं त्वज्जननहेतुमरणिं दधते ह धारयंति खलु स त्वं सद्यश्चित्सद्य एव जात उत्पन्नः सन् दूतो भवसीदु। यजमानस्य दूतो भवस्येव ॥

॥ अथ दशमी ॥

सद्यो जातस्य ददृशानमोजो यदस्य वातो अनुवाति शोचिः।

वृणक्ति तिग्मामतसेषु जिह्वां स्थिरा चिदन्ना दयते वि जंभैः ॥१०॥

सद्यः। जातस्य। ददृशानं। ओजः। यत्। अस्य। वातः। अनुऽवाति। शोचिः।

वृणक्ति। तिग्मां। अतसेषु। जिह्वां। स्थिरा। चित्। अन्ना। दयते। वि। जंभैः ॥१०॥

सद्यो जातस्यारणिनिर्मंथनादनंतरमेवोत्पन्नस्याग्नेरोजस्तेजो ददृशानं। ऋत्विगादिभिर्दृश्यमानं भवतीति शेषः। वातो वायुर्यद्यदास्याग्नेः शोचिर्दीप्तिमनु लक्षीकृत्य वाति गच्छति तदा सोऽयमग्निरतसेषु वृक्षसंघेषु तिग्मां तीक्ष्णां जिह्वां ज्वालां वृणक्ति। संयोजयति। स्थिरा चित् स्थिराण्यप्यन्नान्नरूपाणि काष्ठादीनि जंभैस्तेजोभिर्विदयते। विखंडयति। भक्षयतीत्यर्थः ॥

॥ अथैकादशी ॥

तृषु यदन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः।

वातस्य मेळिं सचते निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा ॥११॥

तृषु। यत्। अन्ना। तृषुणा। ववक्ष। तृषुं। दूतं। कृणुते। यह्वः। अग्निः।

वातस्य। मेळिं। सचते। निऽजूर्वन्। आशुं। न। वाजयते। हिन्वे। अर्वा ॥११॥

यथोऽग्निस्तृषु क्षिप्रमेवान्नान्यन्नानि काष्ठादीनि तृषुणा क्षिप्रेण रश्मिसमूहेन ववक्ष वहति। दहतीत्यर्थः। यह्वो महान् सोऽग्निस्तृषुमात्मानं दूतं कृणुते। यजमानदूतं करोति। निजूर्वन् काष्ठानि विशेषेण दहन्नग्निर्वातस्य वायोर्मेळिं बलं सचते। सेवते। आशुं न। अश्वसादी यथाश्वं तथार्वा गमनशीलोऽग्निः स्वरश्मिं वाजयते। वाजिनं बलवंतं करोति। हिन्वे। प्रेरयति च ॥

॥ इति तृतीयस्य पंचमे सप्तमो वर्गः ॥

दूतं व इत्यष्टर्चमष्टमं सूक्तं वामदेवस्यार्षं गायत्रीछंदस्कमग्निदेवताकं। तथा चानुक्रम्यते। दूतं वोऽष्टौ गायत्रं त्विति ॥ व्यूळ्हे दशरात्रे प्रथमे छंदोम इदं सूक्तं जातवेदस्यनिविद्धानीयं। तथा च सूत्रितं। दूतं व इत्याग्निमारुतं। आ० ८.९.। इति ॥ इदमादिके द्वे सूक्ते प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छंदसि विनियुक्ते। सूत्रितं च। अग्ने पावक दूतं व इति सूक्ते। आ० ४.१३.। इति ॥

॥ तत्र प्रथमा ॥

दूतं वो विश्ववेदसं हव्यवाहममर्त्यं। यजिष्ठमृंजसे गिरा ॥१॥

दूतं। वः। विश्वऽवेदसं। हव्यऽवाहं। अमर्त्यं। यजिष्ठं। ऋंजसे। गिरा ॥१॥

हे अग्ने विश्ववेदसं। विश्वं समस्तं वेदो धनं यस्यासौ विश्ववेदाः। तं सर्वविदं वा हव्यवाहं देवेभ्यो हविषां वोढारममर्त्यममरणधर्माणं यजिष्ठमतिशयेन यष्टारं दूतं देवानां वस्त्वां गिरा स्तुतिरूपया वाचा ऋंजसे। यजमानोऽहं प्रसाधयामि। वर्धयामीत्यर्थः। ऋंजतिः प्रसाधनकर्मेति यास्कः ॥

॥ अथ द्वितीया ॥

स हि वेदा वसुधितिं महाँ आरोधनं दिवः। स देवाँ एह वक्षति ॥२॥

सः। हि। वेद। वसुऽधितिं। महान्। आऽरोधनं। दिवः। सः। देवान्। आ। इह। वक्षति ॥२॥

स हि प्रसिद्ध एवाग्निर्वसुधितिं यजमानाभीष्टफलरूपधनस्य दानं वेद। वेत्ति। महान् प्रभूतोऽग्निर्दिव आरोधनमारोहणं देवानां स्थानं वेत्ति। सोऽग्निरिहास्मिन्यज्ञे देवानिंद्रादीनावक्षति। आवहतु ॥ वहेर्धातोर्लिङर्थे लेडिति लेट्। तस्य तिप्। सिब्बहुलं लेटीति सिप्। लेटोऽडाटावित्यडागमश्च। हो ढ इति ढत्वं। ढत्वकत्वषत्वानि। तिङ्ङतिङ इति निघातः ॥

॥ अथ तृतीया ॥

स वेद देव आनमं देवाँ ऋतायते दमे। दाति प्रियाणि चिद्वसु ॥३॥

सः। वेद। देवः। आऽनमं। देवान्। ऋतऽयते। दमे। दाति। प्रियाणि। चित्। वसु ॥३॥

देवो द्योतमानः सोऽग्निरानमं यजमानादीनानमयितुं नमस्कारयितुं देवानिंद्रादीन्वेद। क्रमेण वेत्ति। दमे यज्ञगृह ऋतायत ऋतं यज्ञमिच्छते यजमानाय प्रियाणि चिदभीष्टान्यपि वसु वसूनि पश्वादीनि धनानि दाति। ददाति। प्रयच्छति ॥

॥ अथ चतुर्थी ॥

स होता सेदु दूत्यं चिकित्वाँ अंतरीयते। विद्वाँ आरोधनं दिवः ॥४॥

सः। होता। सः। इत्। ऊं इति। दूत्यं। चिकित्वान्। अंतः। ईयते। विद्वान्। आऽरोधनं। दिवः ॥४॥

सोऽग्निर्होता देवानामाह्वाता भवति। सेदु स एवाग्निर्दूत्यं देवानां दूतकर्म चिकित्वान् जानन् दिवः स्वर्गस्यारोधनमारोहणमारोहणार्हं देवानां स्थानं च विद्वान् जानन् अंतर्द्यावापृथिव्योर्मध्य ईयते। गच्छति ॥ ईङ् गतौ। दिवादिभ्यः श्यन्। तिङ्ङतिङ इति निघातः ॥

॥ अथ पंचमी ॥

ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः। य ईं पुष्यंत इंधते ॥५॥

ते। स्याम। ये। अग्नये। ददाशुः। हव्यदातिऽभिः। ये। ईं। पुष्यंतः। इंधते ॥५॥

ते तव यजमानाः स्याम। भूयाम। त इत्युक्तं क इत्युच्यते। ये यजमाना अग्नये हव्यदातिभिर्हविर्दानैर्ददाशुः प्रीतिं कुर्वंति। ईमेनमग्निं पुष्यंतो वर्धयंतो ये यजमाना इंधते समिद्भिर्दीप्तियुक्तं कुर्वंति ॥

॥ अथ षष्ठी ॥

ते राया ते सुवीर्यैः ससवांसो वि शृण्विरे। ये अग्ना दधिरे दुवः ॥६॥

ते। राया। ते। सुऽवीर्यैः। ससऽवांसः। वि। शृण्विरे। ये। अग्ना। दधिरे। दुवः ॥६॥

ये यजमाना अग्नावग्नौ ॥ सुपां सुलुगित्याकारः ॥ दुवः परिचर्यां दधिरे धारयंति। कुर्वंतीत्यर्थः। ते ससवांसोऽग्निं संभजमाना राया पश्वादिलक्षणेन धनेन विशृण्विरे। विश्रूयंते। प्रख्यायंते। ते सुवीर्यैः शोभनवीर्योपेतैः पुत्रादिभिश्च विश्रूयंते ॥

॥ अथ सप्तमी ॥

अस्मे रायो दिवेदिवे सं चरंतु पुरुस्पृहः। अस्मे वाजास ईरतां ॥७॥

अस्मे इति। रायः। दिवेऽदिवे। सं। चरंतु। पुरुऽस्पृहः। अस्मे इति। वाजासः। ईरतां ॥७॥

पुरुस्पृह ऋत्विगादिभिरभिलष्यमाणा रायः पश्वादिधनान्यस्मे अस्मासु यजमानेषु दिवे दिवे प्रतिदिनं संचरंतु। प्रचरंत्यो भवंतु॥ दिवशब्दादुत्तरस्याः सप्तम्याः सुपां सुलुगित्यादिना शेआदेश ऊडिदमित्यादिना च तस्योदात्तत्वं। नित्यवीप्सयोरिति द्विर्भावे सत्युत्तरभागस्यानुदात्तं चेत्यनुदात्तत्वं॥ वाजासोऽन्नानि चास्मे अस्मानीरतां। प्रेरयंतु॥

॥ अथाष्टमी ॥

स विप्रश्चर्षणीनां शवसा मानुषाणां। अति क्षिप्रेव विध्यति ॥८॥

सः। विप्रः। चर्षणीनां। शवसा। मानुषाणां। अति। क्षिप्राऽइव। विध्यति ॥८॥

विप्रो मेधावी। विप्र इति मेधाविनाम विप्रो धीर इति तन्नामसु पाठात्। सोऽग्निः शवसा बलेन। शव इति बलनाम पाजः शव इति तन्नामसु पाठात्। मानुषाणां मनुसंबंधिनां चर्षणीनां प्रजानां क्षिप्रेव क्षेप्याख्येव विनाशयितुमर्हाणि। दुरितानीति शेषः। अति विध्यति। अति विध्यतु। अतिशयेन नाशयतु॥

॥ इति तृतीयस्य पंचमेऽष्टमो वर्गः ॥

अग्ने मृळेत्यष्टर्चं नवमं सूक्तं वामदेवस्यार्षं गायत्रीछंदस्कमग्निदेवताकं। अनुक्रांतं च। अग्ने मृळेति॥ द्वितीये छंदोम इदं सूक्तं जातवेदस्यनिविद्धानीयं। सूचितं च। क्रीळं वः शर्धोऽग्ने मृळेत्याग्निमारुतं। आ० ८.१०.। इति॥

॥ तत्र प्रथमा ॥

अग्ने मृळ महाँ असि य ईमा देवयुं जनं। इयेथ बर्हिरासदं ॥१॥

अग्ने। मृळ। महान्। असि। यः। ईं। आ। देवऽयुं। जनं। इयेथ। बर्हिः। आऽसदं॥१॥

हे अग्ने मृळ। अस्मान् सुखय। स त्वं महानसि। प्रभूतो भवसि। यस्त्वमीमिमं देवयुं देवानां कामयितारं जनं यजमानं बर्हिर्दर्भैमासदं यज्ञ आसत्तुमा इयेथ आगच्छसि॥

॥ अथ द्वितीया ॥

स मानुषीषु दूळभो विक्षु प्रावीरमर्त्यः । दूतो विश्वेषां भुवत् ॥ २ ॥

सः । मानुषीषु । दुःऽदभः । विक्षु । प्रऽअवीः । अमर्त्यः । दूतः । विश्वेषां । भुवत् ॥ २ ॥

दूळभो दुर्दभो राक्षसादिना दुर्हिंसो मानुषीषु मनुसंबंधिनीषु विक्षु प्रजासु प्रावीः प्रकर्षेण गंतामर्त्योऽमरणधर्मा सोऽग्निर्विश्वेषां सर्वेषां देवानां दूतो भुवत् । भवतु ॥

॥ अथ तृतीया ॥

स सद्म परि णीयते होता मंद्रो दिविष्टिषु । उत पोता नि षीदति ॥ ३ ॥

सः । सद्म । परि । नीयते । होता । मंद्रः । दिविष्टिषु । उत । पोता । नि । सीदति ॥ ३ ॥

सोऽग्निः सद्म यज्ञगृहं परि णीयते । ऋत्विग्भिः परितो नीयते । नीयमानः सन् दिविष्टिषु यागेषु मंद्रो मदनीयः स्तुत्यः सोऽग्निर्होता च भवति । उतापि च पोता सन्निषीदति । यज्ञगृह उपविशति ॥

॥ अथ चतुर्थी ॥

उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे । उत ब्रह्मा नि षीदति ॥ ४ ॥

उत । ग्नाः । अग्निः । अध्वरे । उतो इति । गृहऽपतिः । दमे । उत । ब्रह्मा । नि । सीदति ॥ ४ ॥

उतापि चाग्निरध्वरे यागे ग्ना देवपत्नीर्यजति । यष्टा भवतीत्यर्थः । यद्वा ग्ना गच्छन्नध्वर्युर्भवति । उतो अपि च सोऽग्निर्दमे यज्ञगृहे गृहपतिर्यजमानश्च भवति । उतापि च ब्रह्मा ब्राह्मणाच्छंसी सन्निषीदति । उपविशति ॥

॥ अथ पंचमी ॥

वेषि ह्यध्वरीयतामुपवक्ता जनानां । हव्या च मानुषाणां ॥ ५ ॥

वेषि । हि । अध्वरिऽयतां । उपऽवक्ता । जनानां । हव्या । च । मानुषाणां ॥ ५ ॥

अध्वरीयतां यज्ञमिच्छतां मानुषाणां मनुसंबंधिनां जनानां हव्या च हव्यानि हवींषि हे अग्ने वेषि हि । कामयसे खलु । उपवक्ताध्वर्युप्रभृतीनां सर्वेषां कर्मणामनुज्ञार्थं मां प्रणयेत्यादिरूपस्य वाक्यस्य वक्ता सन् ब्रह्मा चासि । ब्रह्मा वो वदति जातविद्यामिति श्रुतेः । उपवक्ता सर्वेषां कर्मणामवैकल्यार्थमुपद्रष्टा वा सदस्योऽसि । स हि सप्तदशः कर्मणामुपद्रष्टा भवतीत्यापस्तंबेनोक्तत्वात् ॥

॥ अथ षष्ठी ॥

वेषीद्वस्य दूत्यं१ यस्य जुजोषो अध्वरं। हव्यं मर्तस्य वोळ्हवे ॥६॥

वेषि। इत्। ऊं इति। अस्य। दूत्यं। यस्य। जुजोषः। अध्वरं। हव्यं। मर्तस्य। वोळ्हवे ॥६॥

हे अग्ने त्वं मर्तस्य मनुष्यस्य यस्य यजमानस्याध्वरं यागं हव्यं हविर्वोळ्हवे वोढुं ॥ वहेर्धातोस्तुमर्थे सेसेनस इति तवेन्प्रत्ययः । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं ॥ जुजोषः सेवेथाः ॥ जुषी प्रीतिसेवनयोः । लेट् । बहुलं छंदसीति शपः श्लुर्द्विर्भावश्च । लेटोऽडाटावित्यडागमः ॥ अस्य यजमानस्य दूत्यं दूतकर्म वेषीदु । कामयस एव ॥

॥ अथ सप्तमी ॥

अस्माकं जोष्यध्वरमस्माकं यज्ञमंगिरः। अस्माकं शृणुधी हवं ॥७॥

अस्माकं। जोषि। अध्वरं। अस्माकं। यज्ञं। अंगिरः। अस्माकं। शृणुधि। हवं ॥७॥

हे अंगिरोऽग्ने त्वमस्माकमध्वरमस्मदीयं यागं जोषि। जुषस्व। सेवस्व। अस्माकमस्मदीयं यज्ञं यजनसाधनं हविश्च जुषस्व। अस्माकमस्मदीयं हवमाह्वानरूपं स्तोत्रं च शृणुधि। शृणु॥ शृणोतेर्लोण्मध्यमैकवचने सिप्। तस्य हिरादेशे श्रुवः शृ चेति धातोः श्नुप्रत्ययः शृभावश्च। श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः ॥

॥ अथाष्टमी ॥

परि ते दूळभो रथोऽस्माँ अश्नोतु विश्वतः। येन रक्षसि दाशुषः ॥८॥

परि। ते। दुःऽदभः। रथः। अस्मान्। अश्नोतु। विश्वतः। येन। रक्षसि। दाशुषः ॥८॥

हे अग्ने त्वं येन रथेन विश्वतो विश्वासु सर्वासु दिक्षु गच्छन् दाशुषो हविःप्रदातृन्यजमानान्रक्षसि विघ्नेभ्यः पालयसि त्वदीयो दूळभो दुर्दभो दुर्हिंसः स रथोऽस्मान्यजमानान् परि परितः सर्वतोऽश्नोतु। व्याप्नोतु॥ अश्नोतेर्व्यत्ययेन परस्मैपदं॥

॥ इति तृतीयस्य पंचमे नवमो वर्गः ॥

अग्ने तमद्येत्यष्टर्चं दशमं सूक्तं वामदेवस्यार्षमाग्नेयं। तथा चानुक्रमणिका। अग्ने तमद्य पदपांक्तं पंचमी महापदपंक्तिरंत्योष्णिक् चतुर्थी षष्ठ्युपांत्या वा सप्तम्याः पंचकौ मुख्यौ तृतीयः सप्तको नवकश्चाष्टम्याः पंचकः पादश्चतुष्कः सप्तकस्त्रैष्टुभश्चेति। इदं कृत्स्नमपि सूक्तं पदपंक्तिश्छंदस्कं पंचकाश्चत्वारः षट्कश्चे-

कथतुर्थचतुष्को वा पदपंक्तिरित्युक्तलक्षणत्वात्। पंचमी तव स्वादिष्ठेत्येषा महापदपंक्तिः पंच पंचकाः षट्कैक इति लक्षणसद्भावात्। अंत्या शिवा नः सख्येत्येषोष्णिक्ककुप्छंदस्का। चतुर्थीषष्ठीसप्तम्य आभिष्टे अद्य घृतं न पूतं कृतं चिद्धि ष्मेत्येतास्तिस्र उष्णिहः पदपंक्त्यो वा। अथ सप्तम्यष्टम्योः पदपंक्त्युष्णिहोः परिभाषोक्तपादविच्छेदापवादाय प्रकारांतरेण विच्छेदः कृतः॥ दशमेऽहनीदं सूक्तमाज्यशस्त्रं। सूचितं च। अग्ने तमद्याश्वं न स्तोमैरित्याज्यं। आ० ८.१०.। इति॥ पिंडपितृयज्ञेऽग्ने तमद्येत्यनयाग्निं प्रत्यागच्छेत्। सूचितं च। अग्निं प्रत्येयादग्ने तमद्याश्वं न स्तोमैः। आ० २.७.। इति॥ पौनराधेयिक्यां स्विष्टकृत्येषैव याज्या। सूचितं च। अग्ने तमद्याश्वं न स्तोमैरिति संयाज्ये। आ० २.८.। इति॥

॥ तत्र प्रथमा ॥

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशं। ऋध्यामा त ओहैः॥१॥

अग्ने। तं। अद्य। अश्वं। न। स्तोमैः। क्रतुं। न। भद्रं। हृदिऽस्पृशं। ऋध्याम। ते। ओहैः॥१॥

हे अग्ने अद्यास्मिन्नहनि वयमृत्विगादय ओहैरिंद्रादिप्रापकैः स्तोमैः स्तोत्रसमूहैस्तं प्रसिद्धं त्वामृध्याम। समर्धयामः। कीदृशं त्वां। अश्वं न वोढारमश्वमिव तथा हविषो वाहकं क्रतुं न कर्तारमिव। उपकर्तारमित्यर्थः। तथा भद्रं भजनीयं हृदिस्पृशं हृदयंगमं। अतिशयेन प्रियमित्यर्थः॥

पौनराधेयिक्यामिष्टौ प्रधानस्याधा ह्यग्न इत्येषानुवाक्या। एभिर्नो अर्कैरिति तस्यां स्विष्टकृतोऽनुवाक्या। आभिष्टे अद्येति प्रधानस्य याज्या। सूचितं च। अधा ह्यग्ने क्रतोर्भद्रस्याभिष्टे अद्य गीर्भिर्गृणंत एभिर्नो अर्कैः। आ० २.८.। इति॥

॥ सैषा द्वितीया ॥

अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः। रथीर्ऋतस्य बृहतो बभूथ॥२॥

अध। हि। अग्ने। क्रतोः। भद्रस्य। दक्षस्य। साधोः। रथीः। ऋतस्य। बृहतः। बभूथ॥२॥

अधा हि इदानीमेव हे अग्ने त्वं क्रतोरस्मदीयस्य यागस्य रथीर्नेता बभूथ। भवसि॥ छंदसि लुङ्लङ्लिट इति भवतेर्वर्तमानेऽर्थे लिटि सिपस्थल्। आर्धधातुकस्येड्वलादेरितीडागमे प्राप्ते बभूथाततंथेति निपातनादिडभावः॥ कीदृशस्य यागस्य। भद्रस्य भजनीयस्य दक्षस्य प्रवृद्धस्य साधोरभीष्टफलानां साधकस्य ऋतस्य सत्यभूतस्य बृहतो महतः॥

॥ अथ तृतीया ॥

एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः। अग्ने विश्वेभिः सुमना अनीकैः॥३॥

एभिः। नः। अर्कैः। भव। नः। अर्वाङ्। स्वः। न। ज्योतिः। अग्ने। विश्वेभिः।

सुऽमनाः। अनीकैः॥३॥

हे अग्ने ज्योतिर्ज्योतिष्मान् स्वर्ण सूर्य इव तथा विश्वेभिर्विश्वैः समस्तैरनीकैस्तेजोभिः सुमनाः शोभनमनस्कस्त्वं नोऽस्मदीयैरेभिरेतैरर्कैरर्चनीयैः स्तोत्रैर्नोऽस्माकमर्वाङभिमुखो भव ॥

॥ अथ चतुर्थी ॥

आभिष्टे अद्य गीर्भिर्गृणंतोऽग्ने दाशेम। प्र ते दिवो न स्तनयंति शुष्माः॥४॥

आभिः।ते।अद्य।गीःऽभिः।गृणंतः।अग्ने।दाशेम।प्र।ते।दिवः।न।स्तनयंति।शुष्माः॥४॥

अद्यास्मिन्दिवसे हे अग्ने आभिर्गीर्भिः स्तुतिरूपाभिर्वाग्भिर्गृणंतस्त्वां स्तुवंतो वयमृत्विगादयस्ते तुभ्यं दाशेम। हवींषि दद्याम। दिवो न सूर्यस्य रश्मय इव ते त्वदीयाः शुष्माः शोधका ज्वालाः प्र स्तनयंति। प्रकर्षेण शब्दायंते। यद्वा दिवो न मेघा इव त्वदीया ज्वालाः शब्दायंते ॥

॥ अथ पंचमी ॥

तव स्वादिष्ठाग्ने संदृष्टिरिदा चिदह्न इदा चिदक्तोः।

श्रिये रुक्मो न रोचत उपाके ॥५॥

तव। स्वादिष्ठा। अग्ने। संऽदृष्टिः। इदा। चित्। अह्नः। इदा। चित्। अक्तोः।

श्रिये। रुक्मः। न। रोचते। उपाके ॥५॥

हे अग्ने स्वादिष्ठा स्वादुतमा प्रियतमा तव त्वदीया संदृष्टिर्दीप्तिरह्न इदा चित् दिवसस्येदानीं चाक्तोरिदा चित्। अक्तुरिति रात्रिनाम शर्वर्यक्तुरूर्म्येति रात्रिनामसु पाठात्। रात्रेरिदानीं च। अहोरात्र इत्यर्थः॥ अंजू व्यक्तिम्रक्षणकांतिगतिष्वित्यस्माद्धातोः क्तिश्चेत्यौणादिकसूत्रेण तुप्रत्ययः। तस्य क्तिवद्भावस्य त्रितुचेतीट्प्रतिषेधः। अनिदितामित्युपधानकारलोपः। चोः कुरिति कुत्वं ॥ रुक्मो नालंकार इव श्रिये पदार्थमाश्रयितुमुपाकेऽन्तिके। उपाक इत्यंतिकनाम आक उपाक इति तन्नामसु पाठात्। रोचते। राजते ॥

॥ अथ षष्ठी ॥

घृतं न पूतं तनूरेरेपाः शुचि हिरण्यं। तत्ते रुक्मो न रोचत स्वधावः ॥६॥

घृतं। न। पूतं। तनूः। अरेपाः। शुचि। हिरण्यं। तत्। ते। रुक्मः। न। रोचत। स्वधाऽवः॥६॥

हे स्वधावः। स्वधाशब्दोऽन्नवाची। अन्नवन्नग्ने पूतं शोधितं घृतं नाज्यमिव तनूस्त्वदीया मूर्तिररेपाः पापरहिता भवति। शुचि शुद्धं हिरण्यं हितरमणीयं ते त्वदीयं तत्प्रसिद्धं तेजो रुक्मो न भूषणमिव रोचत। रोचते। भासते ॥

॥ अथ सप्तमी ॥

कृतं चिद्धि ष्मा सनेमि द्वेषोऽग्न इनोषि मर्तात्। इत्था यजमानादृतावः ॥७॥

कृतं। चित्। हि। स्म। सनेमि। द्वेषः। अग्ने। इनोषि। मर्तात्। इत्था। यजमानात्।
ऋतऽवः ॥७॥

हे ऋतावः सत्यवन्नग्ने कृतं चित् यजमानेन कृतमपि सनेमि चिरंतनं। सनेमीति पुराणनाम सनेमि पूर्व्यमिति पुराणनामसु पाठात्। द्वेषः पापं मर्तान्मनुष्याद्यजमानादित्था सत्यं। इत्थेति सत्यनामैतत् अद्धेत्थेति तन्नामसु पाठात्। इनोषि हि स्म। प्रेरयस्येव खलु। नाशयसीत्यर्थः ॥

॥ अथाष्टमी ॥

शिवा नः सख्या संतु भ्रात्राग्ने देवेषु युष्मे।
सा नो नाभिः सदने सस्मिन्नूधन् ॥८॥

शिवा। नः। सख्या। संतु। भ्रात्रा। अग्ने। देवेषु। युष्मे इति।
सा। नः। नाभिः। सदने। सस्मिन्। ऊधन् ॥८॥

हे अग्ने नोऽस्मदीयानि सख्या सख्यानि भ्रात्रा भ्रात्राणि भ्रातृसंबंधीनि कर्माणि देवेषु द्योतमानेषु युष्मे युष्मासु ॥ सुपां सुलुगिति सप्तमीबहुवचनस्य शेआदेशः ॥ शिवा शिवानि संतु। मंगलानि भवंतु। सा सखित्वभ्रातृकर्मसंततिः सदने देवानां स्थाने सस्मिन्नूधनि सर्वस्मिन्यज्ञे नोऽस्माकं नाभिर्बंधनं भवति ॥

॥ इति तृतीयस्य पंचमे दशमो वर्गः ॥

॥ इति चतुर्थे मंडले प्रथमोऽनुवाकः ॥

द्वितीयेऽनुवाक एकादश सूक्तानि। तत्र भद्रं त इति षडृचं प्रथमं सूक्तं वामदेवस्यार्षं त्रिष्टुप्छंदस्कमग्निदेवताकं। भद्रं षडित्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छंदसीदमादिके द्वे सूक्ते विनियुक्ते। तथा च सूत्रितं। भद्रं त अग्न इति सूक्ते। आ० ४.१३.। इति ॥

॥ तत्र प्रथमा ॥

भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य।
रुशद्दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नं ॥१॥
भद्रं। ते। अग्ने। सहसिन्। अनीकं। उपाके। आ। रोचते। सूर्यस्य।
रुशत्। दृशे। ददृशे। नक्तऽया। चित्। अरूक्षितं। दृशे। आ। रूपे। अन्नं ॥१॥

हे सहसिन् बलवन्नग्ने ते त्वदीयं भद्रं भजनीयमनीकं तेजः सूर्यस्योपाके समीपभूते। दिवस इत्यर्थः। आ रोचते। समंताद्दीप्यते। रुशद्रोचमानं दृशे दर्शनीयं तेजो नक्तया चिद्रात्रावपि ददृशे। दृश्यते। आ इत्ययं शब्दश्चेत्यर्थे वर्तते। आ किंच अरूक्षितं स्निग्धं दृशे दर्शनीयमन्नं पुरोडाशादिरूपं हवी रूपे रूपवति त्वय्यृत्विगादिभिर्हुतं भवति ॥

॥ अथ द्वितीया ॥

वि षाह्यग्ने गृणते मनीषां खं वेपसा तुविजात स्तवानः।
विश्वेभिर्यद्वावनः शुक्र देवैस्तन्नो रास्व सुमहो भूरि मन्म ॥२॥
वि। साहि। अग्ने। गृणते। मनीषां। खं। वेपसा। तुविऽजात। स्तवानः।
विश्वेभिः। यत्। ववनः। शुक्र। देवैः। तत्। नः। रास्व। सुऽमहः। भूरि। मन्म ॥२॥

हे तुविजात मंथनीयारणिद्वारा यज्ञादिकर्मसु बहुजन्मन्नग्ने स्तवान ऋत्विगादिभिः स्तूयमानस्त्वं वेपसा यज्ञादिकर्मणा। वेप इति कर्मनाम वेषो वेपो विष्टीति कर्मनामसु पाठात्। मनीषां स्तुतिं गृणते कुर्वते यजमानाय खं यजमानप्राप्यस्य पुण्यलोकस्य द्वारं विषाहि। विष्य। विमुंचेत्यर्थः ॥ षोऽन्तकर्मणीत्यस्माद्धातोर्लोटि मध्यमपुरुषैकवचनं। सिप्। दिवादिभ्यः श्यन्। तस्य बहुलं छंदसीति लुक्। आदेच उपदेशेऽशितीत्यात्वं। सेर्हिरादेशः। तिङ्ङतिङ इति निघातः ॥ हे शुक्र दीप्यमानाग्ने त्वं विश्वेभिर्विश्वैः सर्वैः ॥ बहुलं छंदसीति भिस

ऐसभावः ॥ देवैरिंद्रादिभिः सह यत्पश्वादिधनं ववनो यजमानेभ्यः प्रयच्छेः ॥ वनतेर्लेट् । तस्य सिप इतश्च लोप इतीकारलोपः । बहुलं छंदसीति विकरणस्य श्लुः । श्लाविति द्विर्वचनं । हलादिशेषः । लेटोऽडाटावित्यडागमः । यद्वृत्तान्नित्य-मिति निघाताभावः ॥ हे सुमहः शोभनतेजस्काग्ने भूरि प्रभूतं मन्म मननीयं तद्धनं नोऽस्मभ्यं रास्व । देहि ॥

महापितृयज्ञे स्विष्टकृतोऽग्निः कव्यवाहनो यष्टव्यः । तस्य द्वे अनुवाक्ये । तत्र त्वदग्ने काव्येति द्वितीयानुवाक्या । तथा च सूत्रितं । त्वदग्ने काव्या त्वन्मनीषाः स प्रत्नथा सहसा जायमानः । आ० २.१९. । इति ॥

॥ सैषा सूक्ते तृतीया ॥

त्वद॑ग्ने का॒व्या॑ त्वन्म॑नी॒षास्त्वदु॒क्था जा॑यंते॒ राध्या॑नि ।

त्वदे॑ति॒ द्रवि॑णं वी॒रपे॑शा इ॒त्थाधि॑ये दा॒शुषे॒ मर्त्या॑य ॥ ३ ॥

त्वत् । अ॒ग्ने॒ । का॒व्या॑ । त्वत् । म॒नी॒षाः । त्वत् । उ॒क्था । जा॒यं॒ते॒ । राध्या॑नि ।

त्वत् । ए॒ति॒ । द्रवि॑णं । वी॒रऽपे॑शाः । इ॒त्थाऽधि॑ये । दा॒शुषे॑ । मर्त्या॑य ॥ ३ ॥

हे अग्ने काव्या काव्यानि हविर्वहनदेवतानयनादीन्यग्निसंबंधीनि कर्माण्या-ध्वर्यवाणि कर्माणि वा त्वद्भवतो जायंते । उत्पद्यंते । मनीषाः स्तुतिरूपा वाच-स्त्वदेव जायंते । राध्यानि राद्धुं योग्यान्युक्थोक्थानि शस्त्राणि त्वत्तो जायंते । इत्थाधिये । धीरिति कर्मनाम । इत्थेति सत्यनामसु पाठात् सत्यकर्मणे दाशुषे हवींषि दत्तवते मर्त्याय मनुष्याय यजमानाय वीरपेशाः । पेश इति रूपनाम । इदं विक्रांतं रूपं । अत्र लिंगव्यत्ययेन वीरपेशा इति रूपं । द्रविणं पश्वादिधनं त्वत्त एति । निर्गच्छति । उत्पद्यत इत्यर्थः ॥

॥ अथ चतुर्थी ॥

त्वद्वा॒जी वा॑जंभ॒रो विहा॑या अभिष्टि॒कृज्जा॑यते स॒त्यशु॑ष्मः ।

त्वद्र॒यिर्दे॒वजू॑तो मयो॒भुस्त्वदा॒शुर्जू॑जु॒वाँ अ॑ग्ने॒ अर्वा॑ ॥ ४ ॥

त्वत् । वा॒जी । वा॒जं॒ऽभ॒रः । विऽहा॑याः । अ॒भि॒ष्टि॒ऽकृत् । जा॒य॒ते॒ । स॒त्यऽशु॑ष्मः ।

त्वत् । र॒यिः । दे॒वऽजू॑तः । म॒यः॒ऽभुः । त्वत् । आ॒शुः । जू॒जु॒ऽवान् । अ॒ग्ने॒ । अर्वा॑ ॥ ४ ॥

हे अग्ने वाजी बलवान्वाजंभरो हविर्लक्षणान्नस्य वाहकः ॥ अग्नेर्वाजंभर

इत्येषा वैदिकी संज्ञा। संज्ञायां भृतृवृजीति वाजशब्दे कर्मण्युपपदे [illegible]। अरुर्द्विषदजंतस्येति मुमागमः। चित इत्यंतोदात्तत्वं ॥ विहाया महान् [illegible] यज्ञकृत् अभ्येषणकृद्वा। सत्यशुष्मः सत्यबलः पुत्रस्तत्त्वतो जायते। [illegible]। देवजूतो देवैः प्रेरितो मयोभुः सुखप्रदः। मय इति सुखनामैतत्। रयिर्धनं त्वज्जायते। आशुः शीघ्रगामी। अप्रतिहतगमन इत्यर्थः। जूजुवान्वेगेन गच्छन्वा-श्वस्त्वत्तो जायते ॥

॥ अथ पंचमी ॥

त्वाम॑ग्ने प्रथ॒मं दे॑व॒यंतो॑ दे॒वं मर्ता॑ अमृत मं॒द्रजि॑ह्वं।

द्वे॒षो॒युत॒मा वि॑वासंति धी॒भिर्दमू॑नसं गृ॒हप॑तिम॒मूरं॑ ॥५॥

त्वां। अ॒ग्ने॒। प्र॒थ॒मं। दे॒व॒ऽयंतः॑। दे॒वं। मर्ताः॑। अ॒मृ॒त॒। मं॒द्रऽजि॑ह्वं।

द्वे॒षः॒ऽयुतं॑। आ। वि॒वा॒सं॒ति॒। धी॒भिः। दमू॑नसं। गृ॒हऽप॑तिं। अ॒मूरं॑ ॥५॥

हे *अमृत अमरणशीलाग्ने देवयंतो* देवानिच्छंतो मर्त्या मनुष्या यजमानास्त्वां धीभिः स्तुतिभिः कर्मभिर्वा आ विवासंति। समंतात्परिचरंति। कीदृशं त्वां। प्रथमं देवानामाद्यं देवं द्योतमानं मंद्रजिह्वं। देवानां मादयित्री जिह्वा यस्य तं। द्वेषोयुतं द्वेषसां पापानां पृथक्कर्तारं दमूनसं रक्षसां दमनकरणमनसोपेतं। दमूनःशब्दस्य कथमयमर्थ इति दमूना दममना वा दानमना वा दांतमना वापि वा दम इति गृहनाम तन्मनाः स्यादिति यास्केनोक्तत्वादिति ॥ दमु उपशमने। दमेरूनसिरित्यौणादिक ऊनसिप्रत्ययः ॥ गृहपतिं गृहाणां पालयितारममूरममूढं। प्रगल्भमित्यर्थः ॥

स्वस्त्ययन्यामारे अस्मदिति स्वस्तिमत्तोऽग्नेर्याज्या। सूचितं च। आरे अस्मदमतिमारे अंहः। आ० २.१०.। इति ॥

॥ अथ षष्ठी ॥

आरे अ॒स्मदम॑तिमारे अंह॒ आरे विश्वां॑ दुर्म॒तिं यन्नि॒पासि॑।

दो॒षा शि॒वः स॑हसः सूनो अग्ने॒ यं दे॒व आ चि॒त्सच॑से स्व॒स्ति ॥६॥

आरे। अ॒स्मत्। अम॑तिं। आरे। अंहः॑। आरे। विश्वां॑। दुः॒ऽम॒तिं। यत्। नि॒ऽपासि॑।

दो॒षा। शि॒वः। स॒ह॒सः॒। सू॒नो॒ इति॑। अ॒ग्ने॒। यं। दे॒वः। आ। चि॒त्। सच॑से। स्व॒स्ति ॥६॥

हे सहसः सूनो बलस्य पुत्र। मथ्यमानोऽग्निर्मंथनकारिणां हि बलेन जायत इत्यग्नेर्बलपुत्रत्वं। हे अग्ने दोषा रात्रौ शिवः शिवकरो देवो द्योतमानस्त्वं यं यानस्मान् स्वस्त्यविनाशाय आ सचसे परितः सेवसे। चिदिति पूरणः। यद्य-स्मात्कारणान्निपासि यजमानान्नितरां पालयसि तेभ्योऽस्मदस्मत्तोऽमतिं पाप-रूपामशनेच्छामारे दूरे कुरु। अशनाया वै पाप्मामतिरिति ब्राह्मणं। आरे दूरेऽस्मत्तोंऽहः पापं कुरु। आरे इति दूरनामैतत्। अस्मत्त आरे दूरे दुर्मतिं दुर्मनस्त्वं कुरु॥

॥ इति तृतीयस्य पंचम एकादशो वर्गः ॥

यस्त्वामग्न इति षड्टचं द्वितीयं सूक्तं। वामदेव ऋषिः। त्रैष्टुभं छंदः। अग्निर्देवता। यस्त्वामित्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

यस्त्वामग्न इनधते यतस्रुक्त्रिस्ते अन्नं कृणवत्सस्मिन्नहन्।

स सु द्युम्नैरभ्यस्तु प्रसक्षत्तव क्रत्वा जातवेदश्चिकित्वान्॥१॥

यः। त्वां। अग्ने। इनधते। यतऽस्रुक्। त्रिः। ते। अन्नं। कृणवत्। सस्मिन्। अहन्।

सः। सु। द्युम्नैः। अभि। अस्तु। प्रऽसक्षत्। तव। क्रत्वा। जातऽवेदः। चिकित्वान्॥१॥

हे अग्ने यतस्रुक् स्रुचा संबद्धो यो यजमानस्त्वामिनधते दीप्तियुक्तं कुर्यात्। यः सस्मिन्नहन् सर्वस्मिन्नहनि ते तुभ्यं त्रिस्त्रिवारं सवनत्रयेऽन्नं हविर्लक्षणमन्नं कृणवत् कुर्यात् हे जातवेदो जातानां वेदितरग्ने तव तोषकेण क्रत्वेंधनादिहेतुना कर्मणा प्रसक्षत् प्रसहमानं त्वदीयं तेजश्चिकित्वान् जानन् स यजमानो द्युम्नैर्ध-नैर्यशोभिर्वा सु अत्यंतमभ्यस्तु। शत्रूनभिभवतु॥

॥ अथ द्वितीया ॥

इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा सपर्यन्।

स इधानः प्रति दोषामुषासं पुष्यन्रयिं सचते घ्नन्नमित्रान्॥२॥

इध्मं। यः। ते। जभरत्। शश्रमाणः। महः। अग्ने। अनीकं। आ। सपर्यन्।

सः। इधानः। प्रति। दोषां। उषसं। पुष्यन्। रयिं। सचते। घ्नन्। अमित्रान्॥२॥

हे अग्ने यो यजमानस्ते तुभ्यमिध्मं होमसाधनं समिज्जातं जभरत् आहरेत्॥

हञ् हरणे । लिङर्थे लेट् । तस्य तिप इतश्च लोप इतीकारलोपः । बहुलं छंदसीति शपः श्लुः । द्विर्वचनादिकार्यं । लेटोऽडाटावित्यडागमः । हृग्रहोर्भ इति भत्वं ॥ शश्रमाण इध्माद्याहरणे श्राम्यन्महो महतस्तवानीकं । आकारचार्थे । तेजश्च सपर्यन्परिचरन् यो यजमानो दोषां प्रति रात्रिं लक्षीकृत्योषसं प्रत्युषःकालं च लक्षीकृत्य । कालत्रयेऽपीत्यर्थः । इधान इंधानस्त्वां दीप्तियुक्तं करोति पुष्यन् प्रजाभिः पशुभिश्च पुष्टः सन् स यजमानोऽमित्रान् शत्रून् घ्नन्हिंसन्रयिं धनं सचते । सेवते । सर्वदा पश्वादिधनसमृद्धो भवतीत्यर्थः ॥

उखासंभरणीयेष्टावग्नेः क्षत्रभृतोऽनुवाक्या । तथा च सूचितं । अग्निरीशे बृहतः क्षत्रियस्यार्चामि ते सुमतिं घोष्यर्वाक् । आ॰ ४.१. । इति ॥

॥ सैषा सूक्ते तृतीया ॥

अग्निरीशे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः ।
दधाति रत्नं विधते यविष्ठो व्यानुषङ्मर्त्याय स्वधावान् ॥ ३ ॥

अग्निः । ईशे । बृहतः । क्षत्रियस्य । अग्निः । वाजस्य । परमस्य । रायः ।
दधाति । रत्नं । विधते । यविष्ठः । वि । आनुषक् । मर्त्याय । स्वधाऽवान् ॥ ३ ॥

अग्निर्बृहतो महतः क्षत्रियस्य बलस्येशे । ईश्वरो भवति ॥ वर्तमानार्थे लिट् ॥ किंच अग्निः परमस्योत्कृष्टस्य वाजस्यान्नस्य रायः पश्वादेर्धनस्य चेशे । यविष्ठो युवतमः स्वधावानन्नवान् तेजस्वी वाग्निर्विधते परिचरते । विधतिः परिचरणकर्मेति यास्कः । मर्त्याय मनुष्याय यजमानाय रत्नं रमणीयं धनमानुषक् अनुषक्तं विदधाति । करोति ॥

॥ अथ चतुर्थी ॥

यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः ।
कृधी ष्व१स्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥ ४ ॥

यत् । चित् । हि । ते । पुरुषऽत्रा । यविष्ठ । अचित्तिऽभिः । चकृम । कत् । चित् । आगः ।
कृधि । सु । अस्मान् । अदितेः । अनागान् । वि । एनांसि । शिश्रथः । विष्वक् । अग्ने ॥ ४ ॥

हे यविष्ठ युवतमाग्ने यच्चिद्धि यद्यपि खलु ते त्वदीयेषु पुरुषत्रा परिचारकेष्वचित्तिभिरज्ञानैः कच्चिदागः किंचिदपि पापं वयं चकृम तथापि हे अग्ने अस्मा-

नदितेर्भूमेरनागाननागसः पापरहितान् सु अत्यंतं कृधि। कुरु। हे अग्ने विष्वक् सर्वतो विद्यमानान्येनांस्यस्माभिः कृतानि पापानि विशिश्रथः। विश्लथय। शिथिलीकुरु ॥

॥ अथ पंचमी ॥

महश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानां।
मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः ॥५॥
महः। चित्। अग्ने। एनसः। अभीके। ऊर्वात्। देवानां। उत। मर्त्यानां।
मा। ते। सखायः। सदं। इत्। रिषाम। यच्छ। तोकाय। तनयाय। शं। योः ॥५॥

हे अग्ने देवानामिंद्रादीनामुत अपि च मर्त्यानां मनुष्याणामभीकेऽंतिके। अभीक इत्यंतिकनामैतत्। अस्माभिर्यत्पापं कृतं महश्चिन्महतोऽप्यूर्वाद्विस्तृताद्स्मादेनसः पापात्ते त्वदीयाः सखायो मित्रभूताः स्तोतारो वयं सदमित्सर्वदैव मा रिषाम। मा हिंसिता भूम। हे अग्ने त्वं तोकाय पुत्राय तनयाय पौत्राय शं पापरूपोपद्रवाणां शांतिं योः सुकृतोत्पादितं सुखं च यच्छ। देहि ॥

॥ अथ षष्ठी ॥

यथा ह त्यद्वसवो गौर्यं चित्पदि षितामसुंचता यजत्राः।
एवो ष्व१स्मन्मुंचता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥६॥
यथा। ह। त्यत्। वसवः। गौर्यं। चित्। पदि। सितां। अमुंचत। यजत्राः।
एवो इति। सु। अस्मत्। मुंचत। वि। अंहः। प्र। तारि। अग्ने। प्रऽतरं। नः। आयुः ॥६॥

यजत्रा यजनीयाः पूजार्हा हे वसवो निवासयितारोऽग्नयो यूयं यथा ह यथैव त्यत्त्यां तां पदि पादे सितां बद्धां गौर्यं चित् गौरीं गामप्यमुंचत त्यक्तवंतो भूयास्त एवो एवमेवास्मत्तोऽंहः पापं सु अत्यंतं विमुंचत। विमुक्तं कुरुत। बहुवचनं पूजार्थं। हे अग्ने त्वया प्रतरं प्रवृद्धं नोऽस्मदीयमायुः प्रतारि। प्रवृद्धं क्रियतां ॥

॥ इति तृतीयस्य पंचमे द्वादशो वर्गः ॥

प्रत्यग्निरिति पंचर्चं तृतीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं तत्तन्मंत्रवर्णाभिधेयोषःप्रभृतिदेवतं वा। तथा चानुक्रांतं। प्रत्यग्निः पंच लिंगोक्तदैवतं त्वेक इति ॥ लैंगिको विनियोगः ॥

॥ तत्र प्रथमा ॥

प्रत्यग्निरुषसामग्रमख्यद्विभातीनां सुमना रत्नधेयं।
यातमश्विना सुकृतो दुरोणमुत्सूर्यो ज्योतिषा देव एति ॥१॥

प्रति। अग्निः। उषसां। अग्रं। अख्यत्। विऽभातीनां। सुऽमनाः। रत्नऽधेयं।
यातं। अश्विना। सुऽकृतः। दुरोणं। उत्। सूर्यः। ज्योतिषा। देवः। एति ॥१॥

सुमनाः शोभनमनस्कोऽग्निर्विभातीनां व्युच्छंतीनामुषसामुषोदेवतानां रत्नधेयं रत्नधानं। धनप्रकाशकमित्यर्थः। अग्रं प्रति पूर्वकालं लक्षीकृत्याख्यत्। प्रवृद्धो भवति। हे अश्विनाश्विनौ युवां सुकृतो यजमानस्य दुरोणं गृहं। दुरोण इति गृहनाम दुरोणे दुर्या इति गृहनामसु पाठात्। यातं। गच्छतं। सूर्य ऋत्विगादीनां प्रेरको देवो ज्योतिषा स्वेन तेजसोदेति। उषःकाले प्रादुर्भवतीत्यर्थः ॥

॥ अथ द्वितीया ॥

ऊर्ध्वं भानुं सविता देवो अश्रेद्रप्सं दविध्वद्गविषो न सत्वा।
अनु व्रतं वरुणो यंति मित्रो यत्सूर्यं दिव्यारोहयंति ॥२॥

ऊर्ध्वं। भानुं। सविता। देवः। अश्रेत्। द्रप्सं। दविध्वत्। गोऽइषः। न। सत्वा।
अनु। व्रतं। वरुणः। यंति। मित्रः। यत्। सूर्यं। दिवि। आऽरोहयंति ॥२॥

सविता प्रेरको देव ऊर्ध्वमुन्मुखं भानुमश्रेत्। आश्रयति। यद्यदा रश्मयः सूर्यं दिवि द्युलोक आरोहयंति आरोहणं कारयंति तदा वरुणो राज्यभिमानी देवो मित्रोऽहरभिमान्यन्ये देवाश्च व्रतं तत्संबंधि कर्मानुयंति। अनुगच्छंति। अनुगमने दृष्टांत उच्यते। द्रप्सं पार्थिवं रजो दविध्वद्धुन्वन्। विकिरन्नित्यर्थः। गविषो गा इच्छन् सत्वा न वृषभ इव तद्वत् ॥

॥ अथ तृतीया ॥

यं सीमकृण्वन्तमसे विपृचे ध्रुवक्षेमा अनवस्यंतो अर्थं।
तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहंति ॥३॥

यं। सीं। अकृण्वन्। तमसे। विऽपृचे। ध्रुवऽक्षेमाः। अनवऽस्यंतः। अर्थं।
तं। सूर्यं। हरितः। सप्त। यह्वीः। स्पशं। विश्वस्य। जगतः। वहंति ॥३॥

ध्रुवक्षेमाः स्थिरनिवासाः सृष्टिकर्तारो देवाः ईं सर्वतश्चमसे तमसो विमृचे पृथक्करणायार्थं जगल्लक्षणं कार्यमनवस्यंतोऽविमुंचंतः कुर्वंत एव यं सूर्यमकृण्वन्। असृजन्नित्यर्थः। यह्वीर्महत्यः सप्त सप्तसंख्याका हरितोऽश्वा विश्वस्य समस्तस्य जगतः प्राणिसमूहस्य स्पशं प्रेरकत्वेन ज्ञातारं तं सूर्यं वहंति। धारयंति॥

॥ अथ चतुर्थी ॥

वर्हिष्ठेभिर्विहरन्यासि तंतुमवव्ययन्नसितं देव वस्म।
दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्वं१तः॥४॥
वर्हिष्ठेभिः। विऽहरन्। यासि। तंतुं। अवऽव्ययन्। असितं। देव। वस्म।
दविध्वतः। रश्मयः। सूर्यस्य। चर्मऽइव। अव। अधुः। तमः। अप्ऽसु। अंतरिति॥४॥

हे देव द्योतमान सूर्य त्वं जगन्निर्वाहात्मकस्य रसस्यादानार्थं तंतुं रश्मिसमूहं विहरन्विस्तारयन् असितं कृष्णवर्णं वस्म नक्तंचराणांनिवासभूतां रात्रिमवव्ययन् अवाचीनं यथा भवति तथा संवृण्वन्। तिरस्कुर्वन्नित्यर्थः। वहिष्ठेभिर्वोढुमत्यंतं शक्तैरश्वैर्यासि। गमनमार्गं गच्छसि। अस्यामृचि पूर्वार्द्धे सूर्यस्य प्रत्यक्षमर्थं प्रतिपाद्योत्तरार्द्धे परोक्षमर्थं प्रतिपादयितुमाह। दविध्वतो धुन्वानाः सूर्यस्य संबंधिनो रश्मयः किरणा अप्स्वंतरिक्षे। आप इत्यंतरिक्षनाम आकाशमापः पृथिवी तन्नामसु पाठात्। अंतर्मध्ये चर्मेव चर्मवत्स्थितं तमोऽधकारमवाधुः। अवाचीनमदधुः। तिरस्कुर्वंतीत्यर्थः॥

॥ अथ पंचमी ॥

अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न।
कया याति स्वधया को ददर्श दिवः स्कंभः समृतः पाति नाकं॥५॥
अनायतः। अनिऽबद्धः। कथा। अयं। न्यङ्। उत्तानः। अव। पद्यते। न।
कया। याति। स्वधया। कः। ददर्श। दिवः। स्कंभः। संऽऋतः। पाति। नाकं॥५॥

आयतशब्दो दूरवाची। तद्विपरीतोऽनायत आसीनः सन्नयं प्रत्यक्षेणोपलभ्यमानो मंडलाभिमानी सूर्योऽनिबद्धः। केनापि बद्धो न क्रियते। अपि चायं सूर्यो न्यङ्ङवाङ्मुखः सन् केनचित्कथा कथं नावपद्यते। न हिंस्यते। किंचायमुत्तान ऊर्ध्वमुखत्वेन तिष्ठन् कथा स्वधया केन बलेन याति। गच्छति। स्वधाशब्दोऽन-

त्वाच्च तत्कार्यं बलं लक्षयति। अपि च दिवो द्युलोकस्य स्कंभः स्तंभः समृतो नाकेन समवेतः सूर्यो नाकं स्वर्गं पाति। पालयति। को ददर्श। तत्तत्त्वतः को पश्यति। न कोऽपि जानातीत्यर्थः ॥

॥ इति तृतीयस्य पंचमे त्रयोदशो वर्गः ॥

प्रत्यग्निरुषस इति पंचर्चं चतुर्थं सूक्तं वामदेवस्यार्षं त्रैष्टुभमाग्नेयं मांत्रवर्णिकदेवतं वा। तथा चानुक्रांतं। प्रत्यग्निरिति। लिंगोक्तदैवतं त्विति तुशब्दादस्यापि सूक्तस्य लिंगोक्तदेवतत्वं ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्रत्य॒ग्निरु॒षसो॑ जा॒तवे॑दा॒ अख्य॑द्दे॒वो रोच॑माना॒ महो॑भिः।
आ ना॑सत्योरुगा॒या रथे॑ने॒मं य॒ज्ञमुप॑ नो यात॒मच्छ॑ ॥१॥

प्रति॑। अ॒ग्निः। उ॒षसः॑। जा॒तऽवे॑दाः। अख्य॑त्। दे॒वः। रोच॑मानाः। महः॑ऽभिः।
आ। ना॒स॒त्या॒। उ॒रु॒ऽगा॒या॒। रथे॑न। इ॒मम्। य॒ज्ञम्। उप॑। नः॒। या॒त॒म्। अच्छ॑ ॥१॥

देवो द्योतमानो जातवेदा जातधनोऽग्निर्महोभिस्तेजोभी रोचमाना दीप्यमाना उषसः प्रत्युषसो लक्षीकृत्याख्यत्। प्रवृद्धो भवति। उरुगाया प्रभूतगमनौ हे नासत्याश्विनौ रथेन नोऽस्मदीयमिमं यज्ञमच्छाभिमुखमुपयातं। उपगच्छतं ॥

॥ अथ द्वितीया ॥

ऊ॒र्ध्वं के॒तुं स॑वि॒ता दे॒वो अ॑श्रे॒ज्ज्योति॒र्विश्व॑स्मै॒ भुव॑नाय कृ॒ण्वन्।
आप्रा॒ द्यावा॑पृथि॒वी अ॒न्तरि॑क्षं॒ वि सूर्यो॑ र॒श्मिभि॒श्चेकि॑तानः ॥२॥

ऊ॒र्ध्वम्। के॒तुम्। स॒वि॒ता। दे॒वः। अ॒श्रे॒त्। ज्योतिः॑। विश्व॑स्मै। भुव॑नाय। कृ॒ण्वन्।
आ। अ॒प्राः॒। द्यावा॑पृथि॒वी इति॑। अ॒न्तरि॑क्षम्। वि। सूर्यः॑। र॒श्मिऽभिः॑। चेकि॑तानः ॥२॥

विश्वस्मै सर्वस्मै भुवनाय लोकाय ज्योतिस्तेजः कृण्वन् कुर्वन् सविता प्रेरको देव ऊर्ध्वमुन्मुखं केतुं प्रकाशकं भानुमश्रेत्। आश्रयति। वि चेकितानः सर्वं विशेषेण पश्यन् सूर्यो रश्मिभिः स्वकीयैः किरणैर्द्यावापृथिवी द्युलोकभूलोकावंतरिक्षं चाप्राः। समंतादपूरयत् ॥

॥ अथ तृतीया ॥

आवहंत्यरुणीर्ज्योतिषागान्मही चित्रा रश्मिभिश्चेकिताना ।
प्रबोधयंती सुविताय देव्यु१षा ईयते सुयुजा रथेन ॥ ३ ॥
आऽवहंती । अरुणीः । ज्योतिषा । आ । अगात् । मही । चित्रा । रश्मिऽभिः । चेकिताना ।
प्रऽबोधयंती । सुविताय । देवी । उषाः । ईयते । सुऽयुजा । रथेन ॥ ३ ॥

आवहंती धनानि धारयंत्यरुणीररुणवर्णा । प्रथमैकवचने द्वितीयाबहुवचनं छांदसं । ज्योतिषा तेजसा युक्ता मही महती रश्मिभिः किरणैश्चित्रा दर्शनीया चेकिताना जानत्युषा आगात् । आगच्छत् । किंच प्रबोधयंती सुप्तान् प्रबुद्धान् कुर्वती देवी द्योतमानोषाः सुयुजा शोभनयुक्तेन रथेन सुविताय सुखप्राप्तय ईयते । गच्छति ॥

॥ अथ चतुर्थी ॥

आ वां वहिष्ठा इह ते वहंतु रथा अश्वास उषसो व्युष्टौ ।
इमे हि वां मधुपेयाय सोमा अस्मिन्यज्ञे वृषणा मादयेथां ॥ ४ ॥
आ । वां । वहिष्ठाः । इह । ते । वहंतु । रथाः । अश्वासः । उषसः । विऽउष्टौ ।
इमे । हि । वां । मधुऽपेयाय । सोमाः । अस्मिन् । यज्ञे । वृषणा । मादयेथां ॥ ४ ॥

हे अश्विनाविह यज्ञे वहिष्ठा वोढृतमास्ते प्रसिद्धा रथा रंहणा गंतारोऽश्वासोऽश्वा वां युवामुषस उषोदेवताया व्युष्टौ व्युच्छनकाल आ वहंतु । समंतान्नयंतु । हि यस्मात्कारणात् हे वृषणा वृषणौ कामानां वर्षितारौ हे अश्विनाविमे सोमा वां युवां मधुपेयाय मधोः सोमस्य पानायास्मिन्यज्ञे मादयेथां । हर्षयेथां ॥

॥ अथ पंचमी ॥

अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ।
कया याति स्वधया को ददर्श दिवः स्कंभः समृतः पाति नाकं ॥ ५ ॥
अनायतः । अनिऽबद्धः । कथा । अयं । न्यङ् । उत्तानः । अव । पद्यते । न ।
कया । याति । स्वधया । कः । ददर्श । दिवः । स्कंभः । संऽऋतः । पाति । नाकं ॥ ५ ॥

इयमृक्पूर्वं व्याख्याता ॥

॥ इति तृतीयस्य पंचमे चतुर्दशो वर्गः ॥

अग्निर्होतेति दशर्चं पंचमं सूक्तं वामदेवस्यार्षं गायत्रं । अत्रेयमनुक्रमणिका । अग्निर्होता दश गायत्रमृषिर्बोधदिति द्वाभ्यां सोमकं साहदेव्यमस्तौदन्त्याभ्या- मश्विनावायुरयाचतेति । बोधद्यदिति द्वृचेन सोमकराजा स्तूयत एव वाश्विति द्वृचेनाश्विनौ शिष्टाभिः षड्भिरग्निः स्तूयते । अतस्ता एव देवताः ॥ सूक्तविनि- योगो लैंगिकः ॥ पशोः पर्यग्निकरणेऽग्निर्होता न इत्याद्यस्तृचोऽनुवचनीयः । तथा च सूत्रितं । अग्निर्होता न इति तृचं पर्यग्नयेऽन्वाह । आ० ३. २. । इति ॥ प्रातरनुवाकेऽप्याग्नेये क्रतौ गायत्रे छंदस्याश्विनशस्त्रे चायं तृचो विनियुक्तः । तथा च सूत्रितं । अग्निर्होता नो अध्वर इति तिस्रः । आ० ४. १३. । इति ॥

॥ तत्र प्रथमा ॥

अग्निर्होता नो अध्वरे वाजी सन्परि णीयते । देवो देवेषु यज्ञियः ॥१॥

अग्निः । होता । नः । अध्वरे । वाजी । सन् । परि । नीयते । देवः । देवेषु । यज्ञियः ॥१॥

होता देवानामाह्वाता होमनिष्पादको वाग्निर्नोऽस्मदीयेऽध्वरे यागे । वा- जीत्येतल्लुप्तोपमाकं । वाजी शीघ्रगामी वोढाश्व इव तथा देवेभ्यो हविर्वाहकः सन् परि णीयते । परितः समंतात्प्राप्यते । तथा ब्राह्मणं च भवति । वाजी सन्परिणीयत इति वाजिनमिव ह्येनं संतं परिणयंति । ऐ० ब्रा० २. ५. । इति । कीदृ- शोऽग्निः । देवेषु द्योतमानेष्विंद्रादिमध्ये देवो द्योतमानो यज्ञियो यज्ञार्हः ॥

॥ अथ द्वितीया ॥

परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव । आ देवेषु प्रयो दधत् ॥२॥

परि । त्रिऽविष्टि । अध्वरं । याति । अग्निः । रथीःऽइव । आ । देवेषु । प्रयः । दधत् ॥२॥

देवेषु द्योतमानेष्विंद्रादिषु । प्रय इत्यन्ननामैतद् । प्रयो यजमानैर्दत्तं हवीरूप- मन्नमा दधत् आ समंताद्धारयन्नग्निरंगनादिगुणविशिष्टोऽग्निस्त्रिविष्टि त्रिवारं । सवनत्रयेऽपीत्यर्थः । परि परितः समंतादध्वरं यजमानैः कृतं यागं याति । गच्छति । परिगमने दृष्टांतः । रथीरिव । रथवान्पुरुषो यथा शीघ्रं याति तद्वत् । तथा च ब्राह्मणं । परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिवेत्येष हि रथीरिवाध्वरं पर्येति । ऐ० ब्रा० २. ५. । इति ॥

॥ अथ तृतीया ॥

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥३॥

परि। वाजऽपतिः। कविः। अग्निः। हव्यानि। अक्रमीत्। दधत्। रत्नानि। दाशुषे ॥३॥

वाजपतिर्वाजानामन्नानां पतिः पालकः। परि वाजपतिः कविरित्येष हि वाजानां पतिः। ऐ० ब्रा० २.५.। इति ब्राह्मणं। कविः क्रांतदर्शी मेधावी वा दाशुषे हविर्दत्तवते यजमानाय रत्नानि रमणीयानि धनानि दधत् प्रयच्छन्नग्निर्हव्यानि हवींषि पर्यक्रमीत्। परितः क्रामति। व्याप्नोति ॥

॥ अथ चतुर्थी ॥

अयं यः सृंजये पुरो दैववाते समिध्यते। द्युमाँ अमित्रदंभनः ॥४॥

अयं। यः। सृंजये। पुरः। दैवऽवाते। संऽइध्यते। द्युऽमान्। अमित्रऽदंभनः ॥४॥

यः प्रसिद्धोऽयं प्रत्यक्षेणोपलभ्यमानोऽग्निर्दैववाते देववातस्य पुत्रे सृंजये। सृंजयो नाम कश्चित्सोमयाजी। तस्मिन्निमित्तभूते सति। तद्यागार्थमित्यर्थः। सृंजयस्य यष्टृत्वं तैत्तिरीया आमनंति। वासिष्ठो ह सात्यहव्यो देवभागं पप्रच्छ यत्सृंजयान्बहुयाजिनोऽयीयजदिति। पुरः पूर्वस्यां दिशि स्थितायामुत्तरवेद्यां समिध्यते सम्यग्दीप्यते अमित्रदंभनः शत्रूणां हिंसकः सोऽग्निर्द्युमान् दीप्तिमान् भवतीति शेषः ॥

॥ अथ पंचमी ॥

अस्य घा वीर ईवतोऽग्नेरीशीत मर्त्यः। तिग्मजंभस्य मीळ्हुषः ॥५॥

अस्य। घ। वीरः। ईवतः। अग्नेः। ईशीत। मर्त्यः। तिग्मऽजंभस्य। मीळ्हुषः ॥५॥

वीरः स्तुतौ विक्रांतो मर्त्यो मरणधर्मा यजमानस्तिग्मजंभस्य तीक्ष्णतेजसो मीळ्हुषोऽभिलषितफलानां सेक्तुरीवतो गमनवतोऽस्याग्नेरीशीत। ईश्वरो भवेत्। घेति पादपूरणः। एतेन यजमान आत्माभीष्टफलं कारयितुं समर्थो भवतीत्यर्थः॥

॥ इति तृतीयस्य पंचमे पंचदशो वर्गः ॥

॥ अथ षष्ठी ॥

तमर्वंतं न सानसिमरुषं न दिवः शिशुं। मर्मृज्यंते दिवेदिवे ॥६॥

तं। अर्वंतं। न। सानसिं। अरुषं। न। दिवः। शिशुं। मर्मृज्यंते। दिवेऽदिवे ॥६॥

यजमाना अर्वंतं न शीघ्रगामिनमश्वमिव सानसिं संभजनीयं दिवः शिशुं न द्युलोकस्य पुत्रभूतं सूर्यमिवारुषमारोचमानं तमग्निं दिवे दिवे प्रतिदिनं मर्मृज्यंते। भृशं परिचरणं कुर्वंति ॥

॥ अथ सप्तमी ॥

बोधद्यन्मा हरिभ्यां कुमारः साहदेव्यः। अच्छा न हूत उदरं ॥७॥

बोधत्। यत्। मा। हरिऽभ्यां। कुमारः। साहऽदेव्यः। अच्छ। न। हूतः। उत्। अरं ॥७॥

साहदेव्यः सहदेवनाम्नो राज्ञः पुत्रः कुमारः सोमकाभिधो राजा हरिभ्यामश्वाभ्यामश्वौ दातुं मा मां यद्यदा बोधत् बोधयामासेमौ तवाश्वाविति तदाहमच्छाभिमुख्येन कुमारेण हूतः सन् नोदरं। तावश्वावलब्ध्वा न निर्गतवानस्मि ॥

॥ अथाष्टमी ॥

उत त्या यजता हरी कुमारात्साहदेव्यात्। प्रयता सद्य आ ददे ॥८॥

उत। त्या। यजता। हरी इति। कुमारात्। साहऽदेव्यात्। प्रऽयता। सद्यः। आ। ददे ॥८॥

उतापि च साहदेव्यात्सहदेवस्य पुत्रात्कुमारात्सोमकाद्राज्ञो यजता पूजनीयौ प्रयता प्रयतौ त्या त्यौ तौ प्रसिद्धौ हरी अश्वौ सद्यो यस्मिन्दिने तेनाहूतस्तस्मिन्नेव दिन आददे। आदत्तवानस्मि। मंत्रद्रष्टा ऋषिर्बोधदित्यृग्द्वयेन कुमारमश्वेप्सयाभ्युपगम्याश्वावेतस्माल्लब्ध्वा प्रीतोऽभवदित्यर्थः ॥

॥ अथ नवमी ॥

एष वां देवावश्विना कुमारः साहदेव्यः। दीर्घायुरस्तु सोमकः ॥९॥

एषः। वां। देवौ। अश्विना। कुमारः। साहऽदेव्यः। दीर्घऽआयुः। अस्तु। सोमकः ॥९॥

देवौ द्योतमानौ हे अश्विनौ वां युवां तर्पकः साहदेव्यः सहदेवस्य पुत्रः कुमारः सोमकः सोमकाभिधान एष राजा दीर्घायुरस्तु। शतायुष्को भवतु। एतमु हैव प्रोचतुः पर्वतनारदौ सोमकायेत्यादिना सर्वे हैव महाराजा आसुः। ऐ० ब्रा० ७. ३४.। इत्यनेन ब्राह्मणेन सोमकस्य राजत्वं स्पष्टीकृतं ॥

॥ अथ दशमी ॥

तं युवं देवावश्विना कुमारं साहदेव्यं। दीर्घायुषं कृणोतन ॥१०॥

तं। युवं। देवौ। अश्विना। कुमारं। साहऽदेव्यं। दीर्घऽआयुषं। कृणोतन ॥१०॥

हे देवावश्विना द्योतमानावश्विनौ. युवं युवां साहदेव्यं सहदेवस्य पुत्रं कुमारं सोमकाख्यं राजानं दीर्घायुषं शतायुष्कं कृणोतन । कुरुतं । अनेन तृचेनास्य कुमारस्य दीर्घमायुरश्विनावृषिरयाचतेत्यर्थः ॥

॥ इति तृतीयस्य पंचमे षोडशो वर्गः ॥

आ सत्यो यात्वित्येकविंशत्यृचं षष्ठं सूक्तं त्रैष्टुभमैंद्रं । अथेयमनुक्रमणिका । आ सत्यः सैकैंद्रमिति । तथैंद्रमित्युक्तत्वादग्न्यधिकारो निवृत्त इत्यवगम्यते ॥ चतुर्विंशेऽहनि माध्यंदिनसवने मैत्रावरुणशस्त्र इदं द्वितीयमहीनसूक्तं । तथा च सूत्रितं । आ सत्यो यात्वित्यहीनसूक्तं द्वितीयं मैत्रावरुणे । आ० ७.५. । इति ॥ समूळ्हे दशरात्रे नवमेऽहनि निष्केवल्यशस्त्र इदं सूक्तं । तथा च सूत्रितं । आ सत्यो यात्वहं भुवं तत्त इंद्रियमिति निष्केवल्यं । आ० ८.७. । इति ॥

॥ तत्र प्रथमा ॥

आ सत्यो यातु मघवाँ ऋजीषी द्रवंत्वस्य हरय उप नः ।

तस्मा इदंधः सुषुमा सुदक्षमिहाभिपित्वं करते गृणानः ॥ १ ॥

आ । सत्यः । यातु । मघऽवान् । ऋजीषी । द्रवंतु । अस्य । हरयः । उप । नः ।

तस्मै । इत् । अंधः । सुसुम । सुऽदक्षं । इह । अभिऽपित्वं । करते । गृणानः ॥ १ ॥

ऋजीषी । ऋजीषशब्देन निष्पिष्टो विगतसारः सोमोऽभिधीयते । तद्वान् सत्यः सत्यवान्मघवान्धनवानिंद्रो नोऽस्माकमुप समीप आयातु । आगच्छतु । किंच अस्येंद्रस्य हरयोऽश्वा नोऽस्माकमुप समीपे द्रवंतु । आगच्छंतु । वयं यजमाना इहास्मिन्यज्ञे तस्मा इंद्राय सुदक्षं शोभनबलं । सारोपेतमित्यर्थः । इदिदं प्रत्यक्षेणोपलभ्यमानमंधोऽन्नरूपं सोमं सुषुम । अभिषुतं कुर्याम । गृणानोऽस्माभिः स्तूयमान इंद्रोऽभिपित्वमस्मदभिमतप्राप्तिं करते । करोतु ॥

॥ अथ द्वितीया ॥

अव स्य शूराध्वनो नांतेऽस्मिन्नो अद्य सवने मंदध्यै ।

शंसात्युक्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म ॥ २ ॥

अव । स्य । शूर । अध्वनः । न । अंते । अस्मिन् । नः । अद्य । सवने । मंदध्यै ।

शंसाति । उक्थं । उशनाऽइव । वेधाः । चिकितुषे । असुर्याय । मन्म ॥ २ ॥

हे शूर शत्रूणामभिभवसमर्थेंद्र अवेदातीमस्मिन् सवने माध्यंदिनाख्ये मंदध्यै त्वां मादयितुं नोऽस्मानवस्य। विमुंच। तत्र दृष्टांतः। अध्वनो गंतव्यस्य मार्गस्यांते समीपे नाश्वान्मनुष्या यथा मुंचंति तद्वत्। उशनेव काव्य इव वेधाः शंसिता यजमानो हे इंद्र चिकितुषे सर्वं जानतेऽसुर्यायासुराणां हिंसकाय तुभ्यं मन्म मननीयमुक्थ्यं शस्त्ररूपं स्तोत्रं शंसाति। शंसनं करोति॥

॥ अथ तृतीया ॥

कविर्न निण्यं विदथानि साधन्वृषा यत्सेकं विपिपानो अर्चात्।

दिव इत्था जीजनत्सप्त कारूनह्ना चिच्चक्रुर्वयुना गृणंतः ॥३॥

कविः। न। निण्यं। विदथानि। साधन्। वृषा। यत्। सेकं। विऽपिपानः। अर्चात्।

दिवः। इत्था। जीजनत्। सप्त। कारून्। अह्ना। चित्। चक्रुः। वयुना। गृणंतः ॥३॥

कविर्मेधावी निण्यं न। निण्यमित्यंतर्हितनामैतत्। अंतर्हितं गूढमर्थमिव विदथानि वेदनीयानि कार्यजातानि साधन् साधयन् वृषा कामानां वर्षितेंद्रो यद्यदा सेकं सेचनीयं सोमं विपिपानोऽत्यर्थं पिबन् अर्चात् विशेषेणार्चति। सोमपाने श्रद्धां करोतीत्यर्थः। तदानीं दिवोऽमुष्माल्लोकादित्था सत्यमेव सप्त सप्तसंख्याकान् कारूनरश्मीन् जीजनत्। अजीजनत्। जनयति। गृणंतः स्तूयमाना रश्मयो वयुना वयुनानि मनुष्याणां ज्ञानान्यह्ना चित् दिवसेनापि चक्रुः। कृतवंतः॥

॥ अथ चतुर्थी ॥

स्व१र्यद्वेदि सुदृशीकमर्कैर्महि ज्योती रुरुचुर्यद्ध वस्तोः।

अंधा तमांसि दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ ॥४॥

स्वः। यत्। वेदि। सुऽदृशीकं। अर्कैः। महि। ज्योतिः। रुरुचुः। यत्। ह। वस्तोः।

अंधा। तमांसि। दुधिता। विऽचक्षे। नृऽभ्यः। चकार। नृऽतमः। अभिष्टौ ॥४॥

यद्ध यदा खलु महि महत्प्रभूतं ज्योतिस्तेजोरूपं यत्स्वर्यो द्युलोकोऽर्कै रश्मिभिः सुदृशीकं सुष्ठु दर्शनीयं वेदि अवेदि ज्ञायते तदानीं देवास्तस्मिन् स्वर्गे वस्तोर्निवासार्थं रुरुचुः। दीप्तियुक्ता बभूवुः। नृतमो नेतृतमः सूर्योऽभिष्टावभ्यागमने नृभ्यो नृणां विचक्षे विशेषेण दर्शनायांधांधकाररूपाणि निविडानि तमांसि दुधिता दुधितानि नाशितानि चकार। कृतवान्॥

॥ अथ पंचमी ॥

ववक्ष इंद्रो अमितमृजीष्यु१भे आ पप्रौ रोदसी महित्वा।

अतश्चिदस्य महिमा वि रेच्यभि यो विश्वा भुवना बभूव ॥५॥

ववक्षे। इंद्रः। अमितं। ऋजीषी। उभे इति। आ। पप्रौ। रोदसी इति। महिऽत्वा।

अतः। चित्। अस्य। महिमा। वि। रेचि। अभि। यः। विश्वा। भुवना। बभूव ॥५॥

ऋजीषी। ऋजीषशब्देन निष्पिष्टो विगतसारः सोमोऽभिधीयते। तद्वानिंद्रः परमैश्वर्ययुक्तोऽमितमियत्तारहितं महिमानं ववक्षे। उवाह। किंच महित्वा महत्त्वेन स्वेन महिम्नोभे रोदसी उभे द्यावापृथिव्यावा पप्रौ। समंतादपूरयत्। य इंद्रो विश्वा भुवना सर्वाणि भुवनान्यभिबभूव तिरश्चकार अतश्चिदेभ्योऽपि विश्वेभ्यो भुवनेभ्योऽस्येंद्रस्य महिमा विरेचि। अतिरिरिचे। अधिको बभूवेत्यर्थः ॥

॥ इति तृतीयस्य पंचमे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

विश्वानि शक्रो नर्याणि विद्वानपो रिरेच सखिभिर्निकामैः।

अश्मानं चिद्ये बिभिदुर्वचोभिर्व्रजं गोमंतमुशिजो वि वव्रुः ॥६॥

विश्वानि। शक्रः। नर्याणि। विद्वान्। अपः। रिरेच। सखिऽभिः। निऽकामैः।

अश्मानं। चित्। ये। बिभिदुः। वचःऽभिः। व्रजं। गोऽमंतं। उशिजः। वि।

ववुरिति वव्रुः ॥६॥

विश्वानि समस्तानि नर्याणि मनुष्याणां हितानि वृष्ट्यादीनि कार्याणि विद्वान् जानन् शक्रः समर्थ इंद्रो निकामैर्निकामयमानेभ्यः सखिभिर्मित्रभूतेभ्यो मरुद्भ्यः। व्यत्ययेन चतुर्थ्यर्थे तृतीया। अपो वृष्टिलक्षणान्युदकानि रिरेच। रिक्तीचकार। इंद्रः सस्यादिफलसिद्ध्यर्थं मेघस्यान्युदकानि मरुद्भ्यो दत्तवानित्यर्थः। यद्वा निकामैर्निकामयमानैः सखिभिर्मरुद्भिः सहितः सन् अपो नभसः सकाशात्। अप इत्यंतरिक्षनामैतत्। अत्र विभक्तिव्यत्ययः। रिरेच। व्यतिरिक्तो बभूव। ये मरुतो वचोभिर्वायुरूपैर्ध्वनिभिरश्मानं चित् पर्वतमपि मेघं वा। अश्मेति मेघनामैतत्। बिभिदुः अभैत्सुः उशिजः कामयमानास्ते मरुतो गोमंतं गोभिरुपेतं व्रजमंगिरसां संबंधि गोस्थानं विवव्रुः। आच्छादयामासुः ॥

॥ अथ सप्तमी ॥

अपो वृत्रं वव्रिवांसं पराहन्प्रावत्ते वज्रं पृथिवी सचेताः ।
प्रार्णांसि समुद्रियाण्यैनोः पतिर्भवञ्छवसा शूर धृष्णो ॥७॥

अपः । वृत्रं । वव्रिऽवांसं । परा । अहन् । प्र । आवत् । ते । वज्रं । पृथिवी । सऽचेताः ।
प्र । अर्णांसि । समुद्रियाणि । ऐनोः । पतिः । भवन् । शवसा । शूर । धृष्णो इति ॥७॥

हे इंद्र प्रावत् राक्षसादिभ्यः प्रकर्षेण लोकान् पालयितृ ते त्वदीयं वज्रमपो वृष्टिलक्षणान्युदकानि वव्रिवांसमावरकं वृत्रं मेघं पराहन्। प्रकर्षेण प्रेरयति स्म। पृथिवी भूमिः सचेताश्चेतनावती। त्वया संगता बभूव। धृष्णो धर्षणशील हे शूर विक्रांतेंद्र त्वं शवसा बलेन पतिर्भवन् लोकानां पालकः सन् समुद्रियाणि समुद्रसंबंधीन्यर्णांसि नभसि स्थितान्युदकानि प्रैणोः। प्रेरको बभूथ ॥

॥ अथाष्टमी ॥

अपो यदद्रिं पुरुहूत दर्दराविर्भुवत्सरमा पूर्व्यं ते ।
स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नंगिरोभिर्गृणानः ॥८॥

अपः । यत् । अद्रिं । पुरुऽहूत । दर्दः । आविः । भुवत् । सरमा । पूर्व्यं । ते ।
सः । नः । नेता । वाजं । आ । दर्षि । भूरिं । गोत्रा । रुजन् । अंगिरःऽभिः । गृणानः ॥८॥

हे पुरुहूत बहुभिराहूतेंद्र यद्यदापः प्रति वृष्टिलक्षणान्युदकानि लक्षीकृत्याद्रिं मेघं दर्दः विदारितवानसि सरमा देवशुनी पूर्व्यं पुरा ते तुभ्यं पणिभिरपहृतं गोधनमाविर्भुवत्। प्रकाशयामास। अंगिरोभिर्ऋषिभिर्गृणानः स्तूयमानः सन् गोत्रा गोत्राण्यभ्राणि रुजन् नोऽस्मान् भूरिं प्रभूतं वाजमन्नं नेता प्रापयिता स त्वमादर्षि। आदरं कृतवानसि ॥

॥ अथ नवमी ॥

अच्छा कविं नृमणो गा अभिष्टौ स्वर्षाता मघवन्नाधमानं ।
ऊतिभिस्तमिषणो द्युम्नहूतौ नि मायावानब्रह्मा दस्युरर्त ॥९॥

अच्छ । कविं । नृऽमनः । गाः । अभिष्टौ । स्वःऽसाता । मघऽवन् । नाधमानं ।
ऊतिऽभिः । तं । इषणः । द्युम्नऽहूती । नि । मायाऽवान् । अब्रह्मा । दस्युः । अर्त ॥९॥

हे मघवन्धनवन्निंद्र नृमणः। नृभिर्मनुष्यैर्मन्यत इति नृमणाः। त्वं कविं मेधाविनं कुत्समच्छ गाः। अभ्यगाः। किंच स्वर्षाता। स्वर्धनं। तस्य सातौ दाने निमित्तेऽभिष्टौ कवेरभिगमे सति नाधमानं युद्धार्थं त्वां याचमानं कुत्समूतिभिः शत्रुकृतोपद्रवपरिहाररूपै रक्षणैरिषणः। प्रेरितवानसि। मायावान् कपटवानब्रह्मा। ऋत्विग्भिः क्रियमाणं सर्वं कर्मजातमनुज्ञारूपेण जानन् ऋत्विग्विशेषो ब्रह्मशब्देनोच्यते। स न विद्यते यस्य सोऽब्रह्मा। वेदोक्तकर्मस्वास्तिक्यरहित इत्यर्थः। दस्युः कुत्सस्य शत्रुर्द्युम्नहूतौ द्युम्नं धनं हूतिराह्वानं यस्यां युधि तस्यां न्यर्त। विनष्टो बभूव। इंद्रः कुत्सेनाहूतः सन् तस्य शत्रुं हतवानित्यर्थः॥

॥ अथ दशमी ॥

आ दस्युघ्ना मनसा याह्यस्तं भुवत्ते कुत्सः सख्ये निकामः।

स्वे योनौ नि षदतं सरूपा वि वां चिकित्सदृतचिद्ध नारी॥१०॥

आ। दस्युऽघ्ना। मनसा। याहि। अस्तं। भुवत्। ते। कुत्सः। सख्ये। निऽकामः।

स्वे। योनौ। नि। सदतं। सऽरूपा। वि। वां। चिकित्सत्। ऋतऽचित्। ह। नारी॥१०॥

अत्र काचिदाख्यायिका श्रूयते। कथंरुरुनामकः कश्चिद्राजर्षिः। तस्य पुत्रः कुत्साख्यो राजर्षिरासीत्। स च कदाचिच्छत्रुभिः सह युयुत्सुः संग्रामे स्वयमशक्तः सन् शत्रूणां हननार्थमिंद्रस्याह्वानं चकार। स चेंद्रः कुत्सस्य गृहमागत्य तस्य शत्रून् जघान। तदनंतरमतिप्रीत्या तयोः सख्यमभवत्। सख्यानंतरमिंद्र एनमपि स्वकीयं गृहं प्रापयामास। तत्र शचींद्रं प्राप्तुमागता सती तौ समानरूपौ दृष्ट्वायमिंद्रोऽयं कुत्स इति विवेकाभावेन संशयं चकारेति। अनयाख्यायिकया प्रतीयमानोऽर्थोऽत्र प्रतिपाद्यते। हे इंद्र दस्युघ्ना शत्रूणां हंत्रा मनसा युक्तस्त्वमस्तं कुत्सस्य गृहं। अस्तमिति गृहनामैतत्। आयाहि। आगाः॥ लुङर्थे लोट्॥ कुत्सश्च ते तव संबंधिनि सख्ये निकामो नितरां कामयमानो भुवत्। अभवत्। ततस्तौ युवां स्वे योनौ स्वकीये स्थाने निषदतं। न्यसीदतं। उपविष्टावभूतं। ऋतचित्सत्यदर्शनी नारींद्रस्य भार्या शची सरूपा समानरूपौ वां युवां विचिकित्सत्। संशयं चकार॥

॥ इति तृतीयस्य पंचमेऽष्टादशो वर्गः॥

॥ अथैकादशी ॥

यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः ।
ऋज्रा वाजं न गध्यं युयूषन्कविर्यदहन्पार्याय भूषात् ॥ ११ ॥

यासि । कुत्सेन । सऽरथं । अवस्युः । तोदः । वातस्य । हर्योः । ईशानः ।
ऋज्रा । वाजं । न । गध्यं । युयूषन् । कविः । यत् । अहन् । पार्याय । भूषात् ॥ ११ ॥

हे इंद्र अवस्युः कुत्सस्य रक्षणमिच्छन् ॥ छंदसि क्यच् परेच्छायामपि दृश्यते ॥ तोदस्तोदकः शत्रूणां हिंसको वातस्य वायुसदृशयोर्वेगवतोर्हर्योरश्वयोरीशान ईश्वरस्त्वं कुत्सेन कुत्साख्येन राजर्षिणा सरथं यासि । गच्छसि । गध्यं ग्राह्यं । गध्यं गृह्णातेः । ऋज्रा वाजं न गध्यं युयूषन्नित्यपि निगमो भवतीति निरुक्तं । वाजं नान्नमिव ऋज्रा ऋजुगामिनावश्वौ युयूषन् स्वकीये रथे योजयन् कविः प्राज्ञः कुत्सो यद्यस्मिन्नहन्नहनि दिवसे पार्याय पारणाय आपन्निस्तरणाय भूषात् प्रभवते तस्मिन्नेव दिने कुत्सेन सरथं यासीति पूर्वेण संबंधः ॥

॥ अथ द्वादशी ॥

कुत्साय शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा ।
सद्यो दस्यून्प्र मृण कुत्स्येन प्र सूरश्चक्रं वृहतादभीके ॥ १२ ॥

कुत्साय । शुष्णं । अशुषं । नि । बर्हीः । प्रऽपित्वे । अह्नः । कुयवं । सहस्रा ।
सद्यः । दस्यून् । प्र । मृण । कुत्स्येन । प्र । सूरः । चक्रं । वृहतात् । अभीके ॥ १२ ॥

शुष्णं पिप्रुमित्यस्यामृचि । ऋग्वे॰ १. १०३. ८. । प्रतिपादितोऽर्थः कुत्सायेत्यनेन ऋग्द्वयेन स्पष्टीक्रियते । हे इंद्र त्वं कुत्साय कुत्सार्थमशुषं । शूषमिति सुखनामैतत् । तद्रहितं । अत्र दीर्घाभावः । शुष्णं शुष्णनामानमसुरं निबर्हीः । न्यबर्हीः । अवधीः । तथाह्नो दिवसस्य प्रपित्वे प्रक्रमे पूर्वाह्णे कुयवं कुयवनामानमसुरं च हतवानसि । तथा स त्वं सहस्रा सहस्रेण बहुभिः परिजनैः सह सद्यो यस्मिन् काले कुयवमवधीस्तस्मिन् काल एव कुत्स्येन । कुत्स इति वज्रनामैतत् । कुत्स एव कुत्स्यं वज्रं । तेन दस्यून् शत्रून्प्रमृण । जहि ॥ भूतार्थे लोट् ॥ हतवानसि । तथा सूरः प्रेरकस्य सूर्यस्य चक्रमायुधमभीके समीपे संग्रामे वा प्र वृहतात् । प्रकर्षेण छिन्नवानसि ॥

॥ अथ त्रयोदशी ॥

त्वं पिप्रुं मृगयं शूशुवांसमृजिश्वने वैदथिनाय रंधीः ।
पंचाशत्कृष्णा नि वपः सहस्रात्कं न पुरो जरिमा वि दर्दः ॥ १३ ॥

त्वं । पिप्रुं । मृगयं । शूशुऽवांसं । ऋजिश्वने । वैदथिनाय । रंधीः ।
पंचाशत् । कृष्णा । नि । वपः । सहस्रा । अत्कं । न । पुरः । जरिमा । वि । दर्दरिति दर्दः ॥ १३ ॥

हे इंद्र त्वं पिप्रुं पिप्रुनामानमसुरं शूशुवांसं प्रवृद्धं मृगयं मृगयनामानमसुरं च हतवानसि । किंच स त्वं वैदथिनाय विदथिनः पुत्राय ऋजिश्वने ऋजिश्वनाम्ने राज्ञे रंधीः । वशमनयः । पंचाशत्पंचाशत्संख्याकानि सहस्रा सहस्राणि कृष्णा कृष्णवर्णानि रक्षांसि निवपः । न्यवपः । अवधीः । तथा स त्वं जरिमा जरात्कं न वयोविशेषं रूपमिव पुरः शंबरस्य नगराणि विदर्दः । विदारितवानसि ॥

॥ अथ चतुर्दशी ॥

सूर उपाके तन्वं१ दधानो वि यत्ते चेत्यमृतस्य वर्पः ।
मृगो न हस्ती तविषीमुषाणः सिंहो न भीम आयुधानि बिभ्रत् ॥ १४ ॥

सूरः । उपाके । तन्वं । दधानः । वि । यत् । ते । चेति । अमृतस्य । वर्पः ।
मृगः । न । हस्ती । तविषीं । उषाणः । सिंहः । न । भीमः । आयुधानि । बिभ्रत् ॥ १४ ॥

हे इंद्र सूरः प्रेरकस्य सूर्यस्योपाके समीपे तन्वं त्वदीयं शरीरं यद्यदा दधानो धारकोऽभवः तदामृतस्य मरणरहितस्य ते त्वदीयं वर्पो रूपं विचेति । व्यचेति । हे इंद्र ज्ञातृभिर्विशेषेणाज्ञायत । सूर्यस्य समीपे सर्वाणि रूपाणि मलिनी-भवंति न तथेंद्रस्य रूपं किंतु सूर्यस्य समीप इंद्रस्य रूपं विशेषेण भासमानं बभूवेत्यर्थः । अपि च हे इंद्र हस्ती मृगो न गजविशेषो मृग इव तविषीं परेषां बलमुषाणो दहन् आयुधानि वज्रादीनि शस्त्राणि बिभ्रद्बिभ्राणस्त्वं सिंहो न सिंह इव भीमो भयंकरोऽभूः ॥

॥ अथ पंचदशी ॥

इंद्रं कामा वसूयंतो अग्मन्स्वर्मीळ्हे न सवने चकानाः ।
श्रवस्यवः शशमानास उक्थैरोको न रण्वा सुदृशीव पुष्टिः ॥ १५ ॥

इंद्रं । कामाः । वसुऽयंतः । अग्मन् । स्वःऽमीळ्हे । न । सवने । चकानाः ।
श्रवस्यवः । शशमानासः । उक्थैः । ओकः । न । रण्वा । सुदृशीऽइव । पुष्टिः ॥ १५ ॥

कामा राक्षसादिभयनिवारणार्थमिंद्रं कामयमाना वसूयंतः पश्वादिधनमिच्छंतः स्तोतार इंद्रं परमैश्वर्ययुक्तमग्मन् । अगमन् । गच्छंति ॥ वर्तमानार्थे छांदसो लुङ् ॥ कीदृशाः स्तोतारः । स्वर्मीळ्हे न युद्ध इव सवने यज्ञे चकाना याचमानाः श्रवस्यवोऽन्नकामा उक्थैः स्तोत्रैः शशमानासः शंसमानाः स्तुवंतः । तदा सोऽयमिंद्र ओको न स्तोतॄणामावास इव भवति । रण्वा रमणीया सुदृशीव पुष्टिः शोभनदर्शना लक्ष्मीरिव भवति ॥

॥ इति तृतीयस्य पंचम एकोनविंशो वर्गः ॥

॥ अथ षोडशी ॥

तमिद्व इंद्रं सुहवं हुवेम यस्ता चकार नर्या पुरूणि ।
यो मावते जरित्रे गध्यं चिन्मक्षू वाजं भरति स्पार्हराधाः ॥ १६ ॥

तं । इत् । वः । इंद्रं । सुऽहवं । हुवेम । यः । ता । चकार । नर्या । पुरूणि ।
यः । माऽवते । जरित्रे । गध्यं । चित् । मक्षु । वाजं । भरति । स्पार्हऽराधाः ॥ १६ ॥

य इंद्रो नर्या नर्याणि मनुष्यहितानि पुरूणि बहूनि ता तानि प्रसिद्धानि कर्माणि चकार अकरोत् । किंच स्पार्हराधाः स्पृहणीयधनो य इंद्रो मावते मत्सदृशाय जरित्रे स्तोत्रे गध्यं चित् ग्राह्यं संयोजनीयमपि वाजमन्नं मक्षु शीघ्रं भरति आहरति वयं स्तोतारो हे यजमाना वो युष्मभ्यं तमित्तमेवेंद्रं सुहवं शोभनमाह्वानं यथा भवति तथा हुवेम । आह्वयामः ॥

॥ अथ सप्तदशी ॥

तिग्मा यदंतरशनिः पताति कस्मिंश्चिच्छूर मुहुके जनानां ।
घोरा यदर्य समृतिर्भवात्यध स्मा नस्तन्वो बोधि गोपाः ॥ १७ ॥

तिग्मा । यत् । अंतः । अशनिः । पताति । कस्मिन् । चित् । शूर । मुहुके । जनानां ।
घोरा । यत् । अर्य । संऽऋतिः । भवाति । अध । स्म । नः । तन्वः । बोधि । गोपाः ॥ १७ ॥

हे शूर विक्रांतेंद्र यद्यदा कस्मिंश्चित्सर्वस्मिन्नपि जनानां मनुष्याणां मुहुके

मोहके युद्धेऽंतरस्माकं मध्ये तिग्मा तीक्ष्णाशनिः पताति पतेत्। हे अर्य स्वामिन्निंद्र यद्यदास्माकं शत्रुभिः सह घोरा भीमरूपा समृतिर्युद्धं भवाति भवेत् अध तदानीं नोऽस्मदीयस्य तन्वः शरीरस्य गोपा रक्षको बोधि स्म। अबोधि। शत्रुभ्यः सकाशादस्मावक्षकत्वेन बुद्धवानसि खलु ॥

॥ अथाष्टादशी ॥

भुवोऽविता वामदेवस्य धीनां भुवः सखावृको वाजसातौ।
त्वामनु प्रमतिमा जगन्मोरुशंसो जरित्रे विश्वध स्याः ॥१८॥

भुवः। अविता। वामऽदेवस्य। धीनां। भुवः। सखा। अवृकः। वाजऽसातौ।
त्वां। अनु। प्रऽमतिं। आ। जगन्म। उरुऽशंसः। जरित्रे। विश्वध। स्याः ॥१८॥

हे इंद्र त्वं वामदेवस्य वामदेवाख्यस्य मंत्रद्रष्टुर्मम संबंधिनीनां धीनां कर्मणामविता रक्षिता भुवः। भव। अवृको हिंसारहितस्त्वं वाजसातौ युद्धे सखा मम सुहृद्भुवः। भव। हे इंद्र वयं प्रमतिं प्रकृष्टज्ञानं त्वामनु लक्षीकृत्याजगन्म। आगच्छाम। स त्वं विश्वध सर्वदा जरित्रे स्तोत्र उरुशंसो महता शंसनेन युक्तः स्याः। भवेः ॥

॥ अथैकोनविंशी ॥

एभिर्नृभिरिंद्र त्वायुभिष्ट्वा मघवद्भिर्मघवन्विश्व आजौ।
द्यावो न द्युम्नैरभि संतो अर्यः क्षपो मदेम शरदश्च पूर्वीः ॥१९॥

एभिः। नृऽभिः। इंद्र। त्वायुऽभिः। त्वा। मघवत्ऽभिः। मघऽवन्। विश्वे। आजौ।
द्यावः। न। द्युम्नैः। अभि। संतः। अर्यः। क्षपः। मदेम। शरदः। च। पूर्वीः ॥१९॥

हे मघवन्धनवन्निंद्र विश्वे विश्वस्मिन्नाजौ संग्रामे त्वायुभिः शत्रुजयार्थं त्वां कामयमानैर्मघवद्भिस्त्वदर्थं दीयमानहविर्लक्षणैर्धनैरुपेतैरेभिः प्रत्यक्षेणोपलभ्यमानैर्नृभिः पुत्रपौत्राद्यैः परिजनैः सहिता वयं यजमाना द्युम्नैर्धनैर्द्यावो न द्योतमानाः प्रकाशमाना धनिनो यथा तथार्योऽरीन् शत्रूनभिसंतोऽभिभवंतः क्षपः सर्वा रात्रीः पूर्वीर्बह्वीः शरदश्च संवत्सरांश्च मदेम। स्तवाम। यजमानाः सर्वेषु कालेषु स्तोत्रैरिंद्रं हर्षयंतीत्यर्थः ॥

॥ अथ विंशी ॥

एवेदिंद्राय वृषभाय वृष्णे ब्रह्माकर्म भृगवो न रथं।

नू चिद्यथा नः सख्या वियोषदसन्न उग्रोऽविता तनूपाः ॥२०॥

एव। इत्। इंद्राय। वृषभाय। वृष्णे। ब्रह्म। अकर्म। भृगवः। न। रथं।

नु। चित्। यथा। नः। सख्या। विऽयोषत्। असत्। नः। उग्रः। अविता। तनूऽपाः ॥२०॥

यथेंद्रो नोऽस्मदीयानि सख्या सख्यानि कर्माणि नू चित् वियोषत् न पृथक्कुर्यात् उग्रस्तेजस्वी तनूपाः शरीराणां पालक इंद्रो यथा नोऽस्मानविता रक्षितासत् स्यात् तथा वयं यजमाना एवेदेवमेवोक्तप्रकारेणेंद्राय वृषभाय कामानां वर्षित्रे वृष्णे नित्यतरुणाय ब्रह्म स्तोत्रमकर्म। अकुर्म। तत्र दृष्टांतः। भृगवो दीप्तास्तक्षाणो रथं न रथमिव तद्वत्। यजमानेभ्यो यथेंद्रोऽभीप्सितफलप्रदो भवति तथेंद्रं यजमाना स्तुवंतीत्यर्थः ॥

॥ अथैकविंशी ॥

नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३न पीपेः।

अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥२१॥

नु। स्तुतः। इंद्र। नु। गृणानः। इषं। जरित्रे। नद्यः। न। पीपेरिति पीपेः।

अकारि। ते। हरिऽवः। ब्रह्म। नव्यं। धिया। स्याम। रथ्यः। सदाऽसाः ॥२१॥

हे इंद्र नु क्षिप्रं स्तुतः पूर्वैर्ऋषिभिः संस्तुतो नु क्षिप्रं गृणानोऽस्माभिः स्तूयमानश्च त्वमिषमन्नं जरित्रे स्तोत्रे मह्यं नद्यो न अद्भिर्नदीरिव पीपेः। प्यायय। प्रवृद्धं कुरु। हे इंद्र हरिवो हरिवन् हरिसंज्ञकाश्वोपेतेंद्र ते तुभ्यं नव्यं नवतरं ब्रह्म स्तोत्रमकारि। अस्माभिः क्रियते। रथ्यो रथवंतो वयं धिया प्रज्ञारूपया स्तुत्या सदासास्त्वां सर्वदा भजमानास्त्वदर्थं हवीरूपस्यान्नस्य दातारो वा स्याम। भूयास्म ॥

॥ इति तृतीयस्य पंचमे विंशो वर्गः ॥

त्वं महाँ इंद्र तुभ्यमित्येकविंशत्यृचं सप्तमं सूक्तं। अत्रेयमनुक्रमणिका। त्वं महाँ असिक्न्यामेकपदेति। असिक्न्यां यजमानो न होतेत्येकपदा विराट् शिष्टा विंशतिस्त्रिष्टुभः। इंद्रो देवता॥ समूळ्हे दशरात्रेऽष्टमेऽहनि निष्केवल्य इदं सूक्तं

विनियुक्तं । तथा च सूचितं । त्वं महाँ इंद्र तुभ्यमिति निष्केवल्यं । आ० ८.७. । इति ॥ इंद्रस्य वृषभस्त्वं महाँ इति पशुपुरोडाशस्यानुवाक्या । सूचितं च । त्वं महाँ इंद्र तुभ्यं ह क्षाः सत्राहनं । आ० ३.८. । इति ॥

॥ तत्र प्रथमा ॥

त्वं म॒हाँ इं॑द्र॒ तुभ्यं॑ ह॒ क्षा अनु॑ क्ष॒त्रं मं॒हना॑ मन्यत॒ द्यौः ।
त्वं वृ॒त्रं शव॑सा जघ॒न्वान्त्सृ॒जः सिन्धूँ॒रहि॑ना जग्रसा॒नान् ॥ १ ॥
त्वं । म॒हान् । इं॒द्र॒ । तुभ्यं॑ । ह॒ । क्षाः । अनु॑ । क्ष॒त्रं । मं॒हना॑ । म॒न्य॒त॒ । द्यौः ।
त्वं । वृ॒त्रं । शव॑सा । ज॒घ॒न्वान् । सृ॒जः । सिंधू॑न् । अहि॑ना । ज॒ग्र॒सा॒नान् ॥ १ ॥

हे इंद्र त्वं महान्प्रभूतो भवसि । क्षाः पृथिवी । क्षा इति पृथिवीनामैतत् । मंहना महत्त्वेन युक्ता सती तुभ्यं ह त्वदर्थमेव क्षत्रं त्वदीयं बलमनुमन्यत । अन्वमन्यत । अनुमतीचकार । द्यौश्च त्वदर्थं बलमन्वमन्यत । हे इंद्र त्वं शवसा त्वदीयेन बलेन वृत्रं लोकानामावरकं वृत्रनामकमसुरं जघन्वान् । हतवान् । किंच अहिना वृत्रेण जग्रसानान् जग्रहाणान् ग्रस्तान् ॥ ग्रसतेर्लिटः कानजादेशः ॥ सिंधून् सृजः । असृजः । सृष्टवानसि ॥

॥ अथ द्वितीया ॥

तव॑ त्वि॒षो जनि॑मन्रेजत॒ द्यौ रेज॒द्भूमि॑र्भि॒यसा॒ स्वस्य॑ म॒न्योः ।
ऋ॒घा॒यंत॑ सु॒भ्व१ः पर्व॑तास॒ आर्द॒न्धन्वा॑नि स॒रयं॑त॒ आपः॑ ॥ २ ॥
तव॑ । त्वि॒षः । जनि॑मन् । रे॒ज॒त॒ । द्यौः । रेज॑त् । भूमिः॑ । भि॒यसा॑ । स्वस्य॑ । म॒न्योः ।
ऋ॒घा॒यंत॑ । सु॒ऽभ्वः॑ । पर्व॑तासः । आर्द॑न् । धन्वा॑नि । स॒रयं॑ते । आपः॑ ॥ २ ॥

हे इंद्र त्विषो दीप्यमानस्य तव त्वदीये जनिमन् जन्मनि सति द्यौरंतरिक्षं स्वस्य त्वदीयान्मन्योः कोपात् । पंचम्यर्थे षष्ठी । भियसा जातभयेन रेजत । अरेजत् । अकंपत । भूमिश्च रेजत् । कंपमाना बभूव । सुभ्वो महांतः पर्वतासः । पर्वता मेघाः । ऋघायंत । सस्यादीनां वृष्टिप्रदानार्थं नियामकेन त्वयाबध्यंत । तथा मेघा आर्दन् । प्राणिनां पिपासारूपां पीडामहिंसन् । तथा मेघा धन्वान्युदकरहितान्देशानापोऽपः सरयंते । गमयंति ॥

॥ अथ तृतीया ॥

भिनद्गिरिं शवसा वज्रमिष्णन्नाविष्कृण्वानः सहसान ओजः ।
वधीद्वृत्रं वज्रेण मंदसानः सरन्नापो जवसा हतवृष्णीः ॥३॥

भिनत् । गिरिं । शवसा । वज्रं । इष्णन् । आविःऽकृण्वानः । सहसानः । ओजः ।
वधीत् । वृत्रं । वज्रेण । मंदसानः । सरन् । आपः । जवसा । हतऽवृष्णीः ॥३॥

सहसानः शत्रूणामभिभवन्नोजस्तेज आविष्कृण्वान आविष्कुर्वन्निंद्रो वज्रमिष्णन् वज्रं प्रेरयन् शवसा बलेन गिरिं पर्वतजातं भिनत् । अभिनत् । बिभेद । किंच मंदसानः सोमेन मोदमान इंद्रो वज्रेण वृत्रं वृत्रनामानमसुरं वधीत् । अवधीत् । जघान । तत आपो वृत्रेणावृतान्युदकानि हतवृष्णीः । हतो वृषा वृष्णो यासां ता हतवृष्ण्यः । ता वृत्रवधानंतरं निवारणरहिताः सत्यो जवसा वेगेन सरन् । असरन् । अगच्छन् ॥

॥ अथ चतुर्थी ॥

सुवीरस्ते जनिता मन्यत द्यौरिंद्रस्य कर्ता स्वपस्तमो भूत् ।
य ईं जजान स्वर्यं सुवज्रमनपच्युतं सदसो न भूम ॥४॥

सुऽवीरः । ते । जनिता । मन्यत । द्यौः । इंद्रस्य । कर्ता । स्वपःऽतमः । भूत् ।
यः । ईं । जजान । स्वर्यं । सुऽवज्रं । अनपऽच्युतं । सदसः । न । भूम ॥४॥

हे इंद्र यः प्रजापतिः स्वर्यमृत्विगादिभिः स्तुत्यं सुवज्रं शोभनवज्रोपेतं सदसः स्वकीयात्स्वर्गाख्यात्स्थानादनपच्युतं विनाशरहितं च । नेति समुच्चयार्थे । भूम भूम्ना महत्त्वेन युक्तमीमेनं त्वां जजान अजीजनत् ॥ जन जनन इति धातुः ॥ द्यौर्द्योतमानस्ते तव जनिता जनयिता स प्रजापतिः सुवीरः शोभनपुत्रवानहमस्मीति मन्यत । अमन्यत । किंच इंद्रस्य कर्तेंद्रस्य जनयिता प्रजापतिः स्वपस्तमोऽत्यंतं शोभनकर्माभूत् ॥

॥ अथ पंचमी ॥

य एक इच्च्यावयति प्र भूमा राजा कृष्टीनां पुरुहूत इंद्रः ।
सत्यमेनमनु विश्वे मदंति रातिं देवस्य गृणतो मघोनः ॥५॥

यः । एकः । इत् । च्यवयति । प्र । भूम । राजा । कृष्टीनां । पुरुऽहूतः । इंद्रः ।
सत्यं । एनं । अनु । विश्वे । मदंति । रातिं । देवस्य । गृणतः । मघोनः ॥५॥

कृष्टीनां सर्वासां प्रजानां राजा प्रभुः पुरुहूतो बहुभिराहूत एक इद्देवानां मध्ये मुख्य एव य इंद्रो भूम भूतं निष्पन्नं शत्रुभ्यो भयं प्र च्यावयति प्रकर्षेण नाशयति विश्वे सर्वे यजमाना मघोनो मघवतः । हविर्लक्षणधनवत इत्यर्थः । देवस्येंद्रसमाश्रयात् द्योतमानस्य गृणतः स्तुवतो रातिं बंधुमेनमिंद्रमनु लक्ष्यीकृत्य सत्यमेव मदंति । स्तुवंति ॥

॥ इति तृतीयस्य पंचम एकविंशो वर्गः ॥

॥ अथ षष्ठी ॥

सत्रा सोमा अभवन्नस्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः ।
सत्राभवो वसुपतिर्वसूनां दत्रे विश्वा अधिथा इंद्र कृष्टीः ॥६॥
सत्रा । सोमाः । अभवन् । अस्य । विश्वे । सत्रा । मदासः । बृहतः । मदिष्ठाः ।
सत्रा । अभवः । वसुऽपतिः । वसूनां । दत्रे । विश्वाः । अधिथाः । इंद्र । कृष्टीः ॥६॥

विश्वे सर्वे सोमा अस्येंद्रस्य सत्रा । सत्रेति सत्यनामैतत् । सत्यमेव प्रभूता अभवन् । किंच मदासो मदा मदकराः सोमा बृहतो महतोऽस्येंद्रस्य मदिष्ठा मादयितृतमाः सत्रा सत्यमेवाभवन् । हे इंद्र त्वं वसुपतिर्धनपतिः । न केवलं धनपतिः किंतु वसूनां सर्वेषां पश्वादीनां धनानां पतिः सत्रा सत्यमेवाभवः । भवसि । हे इंद्र त्वं दत्रे धने निमित्तभूते सति विश्वाः सर्वाः कृष्टीः स्तोत्रीः प्रजा अधिथाः । धारयसि ॥

॥ अथ सप्तमी ॥

त्वमध प्रथमं जायमानोऽमे विश्वा अधिथा इंद्र कृष्टीः ।
त्वं प्रति प्रवत आशयानमहिं वज्रेण मघवन्वि वृश्चः ॥७॥
त्वं । अध । प्रथमं । जायमानः । अमे । विश्वाः । अधिथाः । इंद्र । कृष्टीः ।
त्वं । प्रति । प्रऽवतः । आऽशयानं । अहिं । वज्रेण । मघऽवन् । वि । वृश्चः ॥७॥

अध अपि च प्रथममेव जायमानस्त्वममे वृत्रनिमित्ते भये सति विश्वाः सर्वाः कृष्टीः प्रजा अधिथाः । रक्षकत्वेन धारयसि । हे मघवन्धनवन्निंद्र त्वं प्रति

प्रवतः प्रति प्रवणामुदकवतो देशान् लक्षीकृत्याशयानमपां निरोधकमहिं वृत्र-नामानमसुरं वज्रेण विवृश्चः । छिन्नवानसि ॥

इंद्रस्य वृत्रघ्नः पशौ सत्राहणमिति हविषोऽनुवाक्या । सूचितं च । सत्राहणं दाधृषिं तुम्रमिंद्रं सहदानुं पुरुहूतं क्षियंतं । आ० ३.८. । इति ॥

॥ सैषा सूक्तेऽष्टमी ॥

सत्राहणं दाधृषिं तुम्रमिंद्रं महामपारं वृषभं सुवज्रं ।
हंता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥ ८ ॥
सत्राऽहनं । दधृषिं । तुम्रं । इंद्रं । महां । अपारं । वृषभं । सुऽवज्रं ।
हंता । यः । वृत्रं । सनिता । उत । वाजं । दाता । मघानि । मघऽवा । सुऽराधाः ॥ ८ ॥

सत्राहणं बहूनां शत्रूणां हंतारं दाधृषिमत्यंतं धर्षकं तुम्रं । तुमिः प्रेरणकर्मा । शत्रूणां प्रेरकं महां महांतमपारमपरिमाणं । विनाशरहितमित्यर्थः । वृषभं कामानां वर्षितारं सुवज्रं शोभनेन वज्रेणोपेतमिंद्रं । वयं स्तोतारः स्तुमेति शेषः । य इंद्रो वृत्रं वृत्रनामानमसुरं हंता हिंसिता भवति । उतापि च य इंद्रो वाजमन्नं सनिता दाता भवति । सुराधाः शोभनधनयुक्तो यो मघवेंद्रो मघानि धनानि दाता भवति । तमिंद्रं स्तुमेति पूर्वेणान्वयः ॥ अत्र सर्वत्र तृनंतत्वान्न लोकाव्ययेति षष्ठीप्रतिषेधे सति द्वितीयैव भवति ॥

॥ अथ नवमी ॥

अयं वृतश्चातयते समीचीर्य आजिषु मघवा शृण्व एकः ।
अयं वाजं भरति यं सनोत्यस्य प्रियासः सख्ये स्याम ॥ ९ ॥
अयं । वृतः । चातयते । संऽईचीः । यः । आजिषु । मघऽवा । शृण्वे । एकः ।
अयं । वाजं । भरति । यं । सनोति । अस्य । प्रियासः । सख्ये । स्याम ॥ ९ ॥

मघवा धनवान्य इंद्र आजिषु संग्रामेष्वेको मुख्य एव शृण्वे श्रूयते अयमिंद्रः समीचीः संगता वृतः । वृण्वंत्याच्छादयंति लोकानिति वृतः शत्रुसेनाः । ताश्च-तयते । नाशयति । अयमिंद्रो यं वाजं यदन्नं सनोति यजमानाय ददाति तं वाजं भरति । यजमानस्य तदन्नं दातुं बिभर्ति । स्तोतारो वयमस्यैवंभूतस्येंद्रस्य सख्ये सखित्वे प्रियासः प्रियाः स्याम । भवेम ॥

॥ अथ दशमी ॥

अयं शृण्वे अध जयन्नुत घ्नन्नयमुत प्र कृणुते युधा गाः ।
यदा सत्यं कृणुते मन्युमिंद्रो विश्वं दृळ्हं भयत एजदस्मात् ॥१०॥

अयं । शृण्वे । अध । जयन् । उत । घ्नन् । अयं । उत । प्र । कृणुते । युधा । गाः ।
यदा । सत्यं । कृणुते । मन्युं । इंद्रः । विश्वं । दृळ्हं । भयते । एजत् । अस्मात् ॥१०॥

अथापि च अयमिंद्रो जयन् शत्रून्विजयन् शृण्वे । श्रूयते । सर्वत्र प्रख्यातो भवति । घ्नन्नपि च घ्नन् शत्रून्हिंसन् सर्वत्र श्रूयते । उतापि च युधा युद्धेन गाः शत्रूणां प्र कृणुते । शत्रुसकाशादाहरति । किंच इंद्रो यदा मन्युं कोपं सत्यमेव कृणुते विशदं करोति तदानीं दृळ्हं स्थिरं स्थावररूपमेजत्कंपमानं जंगमरूपं च विश्वं समस्तं जगदस्मादिंद्राद्भयते । बिभेति ॥

॥ इति तृतीयस्य पंचमे द्वाविंशो वर्गः ॥

॥ अथैकादशी ॥

समिंद्रो गा अजयत्सं हिरण्या समश्विया मघवा यो ह पूर्वीः ।
एभिर्नृभिर्नृतमो अस्य शाकै रायो विभक्ता संभरश्च वस्वः ॥११॥

सं । इंद्रः । गाः । अजयत् । सं । हिरण्या । सं । अश्विया । मघऽवा । यः । ह । पूर्वीः ।
एभिः । नृऽभिः । नृऽतमः । अस्य । शाकैः । रायः । विऽभक्ता । संऽभरः । च । वस्वः ॥११॥

यो ह यः खलु मघवा धनवानिंद्रो गा असुराणां समजयत् सम्यक् जितवान् भवति । किंच हिरण्यानि हितरमणीयानि शत्रुसंबंधीनि धनानि समजयत् । तथा अश्वियाश्वियानि शत्रुसंबंधिनोऽश्वसमूहान् सम्यक् जयति स्म । तथा पूर्वीर्बह्वीः शत्रुसेनाः समजयत् । इंद्रः सर्वान् शत्रून् जित्वा सकलमपि पश्वादिधनमपहृतवानित्यर्थः । शाकैः सामर्थ्यैर्नृतमो नेतृतमः पश्वादीनामतिशयेन निर्वाहकः स इंद्र एभिर्नृभिर्नेतृभिः स्तोतृभिः स्तुतः सन् अस्य रायः पश्वादिरूपस्य धनस्य विभक्ता स्तोतृभ्यो विभागस्य कर्ता । दाता भवतीत्यर्थः । किंच वस्वो वसुनो धनस्य संभरश्च संभर्ता धारकश्च भवति ॥

॥ अथ द्वादशी ॥

कियत्स्विदिंद्रो अध्येति मातुः कियत्पितुर्जनितुर्यो जजान ।
यो अस्य शुष्मं मुहुकैरियर्ति वातो न जूतः स्तनयद्भिरभ्रैः ॥१२॥
कियत् । स्वित् । इंद्रः । अधि । एति । मातुः । कियत् । पितुः । जनितुः । यः । जजान ।
यः । अस्य । शुष्मं । मुहुकैः । इयर्ति । वातः । न । जूतः । स्तनयत्ऽभिः । अभ्रैः ॥१२॥

य इंद्रो मातुर्जनन्या सकाशात्कियत्स्विद्यावद्बलमध्येति अधिगच्छति । पितुः सकाशात्कियद्यावद्बलमधिगच्छति । य इंद्रो जनितुर्जनयितुर्यस्मात्प्रजापतेः सकाशादिदं दृश्यमानं जगज्जजान अजनयत् । य इंद्रस्तस्मात्प्रजापतेः सकाशादस्य जगतः शुष्मं यावद्बलं मुहुकैर्मुहुर्मुहुरियर्ति प्रेरयति स्तनयद्भिर्गर्जद्भिरभ्रैर्मेघैर्जूतः प्रेरितो वातो न वायुरिव तथा स इंद्रः स्तोतृभिर्जूतः प्रेरितो हविःप्रदानार्थमाहूतो भवति ॥

॥ अथ त्रयोदशी ॥

क्षियंतं त्वमक्षियंतं कृणोतीयर्ति रेणुं मघवा समोहं ।
विभंजनुरशनिमाँ इव द्यौरुत स्तोतारं मघवा वसौ धात् ॥१३॥
क्षियंतं । त्वं । अक्षियंतं । कृणोति । इयर्ति । रेणुं । मघऽवा । संऽओहं ।
विऽभंजनुः । अशनिमान्ऽइव । द्यौः । उत । स्तोतारं । मघऽवा । वसौ । धात् ॥१३॥

मघवा धनवानिंद्रः क्षियंतं धनराहित्येन क्षीयमाणं त्वमेकं जनमक्षियंतं धनेनाक्षीयमाणं कृणोति । करोति । अकिंचनः कश्चित्पुरुष इंद्रं स्तुत्वा धनसमृद्धोऽभवदित्यर्थः । अशनिमानशनिना युक्तो द्यौरिवांतरिक्षमिव विभंजनुः शत्रूणां विशेषेण भंजको मघवेंद्रः समोहं समूढं रेणुं पापमियर्ति । स्तोतुः सकाशात्प्रेरयति । उतापि च मघवा धनवानिंद्रः स्तोतारं वसौ धने धात् । अधात् । निदधाति ॥

॥ अथ चतुर्दशी ॥

अयं चक्रमिषणत्सूर्यस्य न्येतशं रीरमत्ससृमाणं ।
आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्ने रजसो अस्य योनौ ॥१४॥

अयं । चक्रं । इषणत् । सूर्यस्य । नि । एतशं । रीरमत् । ससृमाणं ।
आ । कृष्णः । ईं । जुहुराणः । जिघर्ति । त्वचः । बुध्ने । रजसः । अस्य । योनौ ॥१४॥

प्रैतशं सूर्ये पस्पृधानमित्यर्धर्चे । ऋग्वे० १.६१.१५.। पूर्वं काचिदाख्यायिका सूचिता। अत्राप्ययं चक्रमिति पूर्वार्धे सा सूच्यते। स्वश्वनामा कश्चिद्राजा। स च पुत्रार्थं सूर्यमुपास्ते। स च सूर्यः पुत्ररूपेण स्वयमेव तत्रोत्पन्नः सन् एतशाख्येन महर्षिणा सार्धं युद्धं चकार। तदानीं स ऋषिर्युद्धे जयार्थमिंद्रं तुष्टाव। स इंद्रस्तेन स्तूयमानः सन् स्वश्वपुत्रस्य सूर्यस्य संबंधिनः संग्रामादेनमपालयदिति। अयमिंद्रः सूर्यस्य चक्रमायुधमिषणत्। प्रैरयत्। ससृमाणं युद्धार्थं सरंतं गच्छंतमेतशनामानमृषिं निरीरमत्। न्यरीरमत्। निवारितवान्। जुहुराणः कुटिलं यथा भवति तथा संचरन् कृष्णः कृष्णवर्णो मेघस्त्वचस्तेजसो बुध्ने मूलभूते रजसोऽस्योदकस्य योनौ स्थानेऽतरिक्षे स्थितमीमेनमिंद्रमाजिघर्ति । आसिंचति । शत्रूणां प्रेरिताच्चक्रादेस्तस्तं ररक्षेत्यर्थः ॥

॥ अथ पंचदशी ॥

असिक्न्यां यजमानो न होता ॥१५॥

असिक्न्यां । यजमानः । न । होता ॥१५॥

एकपदेयमृक् पूर्वर्चा सह दृष्टांतत्वेन संबध्यते । असिक्न्यां रात्रौ यजमानो न यजमान इव होता होतारमाह्वातारमग्निं । द्वितीयार्थे प्रथमा । सोमेनासिंचति तद्वन्मेघ इंद्रमासिंचतीत्यर्थः ॥

॥ इति तृतीयस्य पंचमे त्रयोविंशो वर्गः ॥

॥ अथ षोडशी ॥

गव्यंत इंद्रं सख्याय विप्रा अश्वायंतो वृषणं वाजयंतः ।
जनीयंतो जनिदामक्षितोतिमा च्यावयामोऽवते न कोशं ॥१६॥

गव्यंतः । इंद्रं । सख्याय । विप्राः । अश्वऽयंतः । वृषणं । वाजयंतः ।
जनिऽयंतः। जनिऽदां। अक्षितऽऊतिं। आ। च्यवयामः। अवते। न। कोशं ॥१६॥

गव्यंतो गा इच्छंतोऽश्वायंतोऽश्वानिच्छंतो वाजयंतो वाजमन्नमिच्छंतो जनीयंतो जायामिच्छंतो विप्रा मेधाविनः स्तोतारो वयं सख्यायेंद्रसंबंधिने सखित्वाय

वृषणं कामानां वर्षितारं जनिदां जायाप्रदमक्षितोतिमक्षीणरक्षं। सर्वदा रक्षा-करमित्यर्थः। एवंभूतमिंद्रमाच्यावयामः। आगमयामः। तत्र दृष्टांतः। अवते कूपे। अवत इति कूपनाम अवतोऽवटः क्रिविरिति कूपनामसु पाठात्। कोशं न जलोद्धरणपात्रमिव। पुरुषा जलोद्धरणपात्रं जलेन पूरयितुं कूपे यथाच्या-वयंति तथा वयमाच्यावयाम इत्यर्थः॥

॥ अथ सप्तदशी ॥

त्राता नो बोधि ददृशान आपिरभिख्याता मर्डिता सोम्यानां।
सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयोधाः ॥१७॥
त्राता। नः। बोधि। ददृशानः। आपिः। अभिऽख्याता। मर्डिता। सोम्यानां।
सखा। पिता। पितृऽतमः। पितॄणां। कर्ता। ईं। ऊं इति। लोकं। उशते। वयःऽधाः ॥१७॥

हे इंद्र आपिराप्तो ददृशानः सर्वं पालकत्वेन पश्यंस्त्वं नोऽस्माकं त्राता रक्षको बोधि। भव। किंच। अभिख्याताभिद्रष्टा मर्डिता सुखयिता सोम्यानां सोमार्हाणां यजमानादीनां सखा प्रजापतिना समानख्यातिः पिता पालकः। केवलं पालको न किंतु पितॄणां पालकानां मध्ये पितृतमोऽतिशयेन पालकः कर्तेमु पितॄणां स्रष्टा च त्वं लोकं स्वर्गादिलोकमुशते कामयमानाय स्तोत्रे वयोधाः। वय इत्यन्न-नामैतत्। अन्नप्रदो भव॥

॥ अथाष्टादशी ॥

सखीयतामविता बोधि सखा गृणान इंद्र स्तुवते वयो धाः।
वयं ह्या ते चकृमा सबाध आभिः शमीभिर्महयंत इंद्र ॥१८॥
सखिऽयतां। अविता। बोधि। सखा। गृणानः। इंद्र। स्तुवते। वयः। धाः।
वयं। हि। आ। ते। चकृम। सऽबाधः। आभिः। शमीभिः। महयंतः। इंद्र ॥१८॥

हे इंद्र त्वं सखीयतां सखित्वमिच्छतामस्माकमविता रक्षिता बोधि। भव। तथा गृणानः स्तूयमानस्त्वं सखा भव। हे इंद्र स्तुवते स्तुतिं कुर्वते मह्यं वयोऽन्नं धाः। अधाः। धेहि। हे इंद्र सबाधो बाधासहिता वयं हि वयं खलु ते त्वामा-चकृम। आह्वयामः। किं कुर्वंतः। आभिः प्रत्यक्षेणोपलभ्यमानैः शमीभिः स्तुति-रूपैः कर्मभिर्महयंतस्त्वां पूजयंतः॥

इंद्रस्य वृषभः पुरोडाशस्य स्तुत इंद्र इति याज्या । सूचितं च । स्तुत इंद्रो मघवा यद्ध वृत्रेव यस्य इंद्रः सत्यः सम्राट् । आ० ३.८. । इति ॥

॥ सैषा सूक्त एकोनविंशी ॥

स्तुत इंद्रो मघवा यद्ध वृत्रा भूरीण्येको अप्रतीनि हंति ।

अस्य प्रियो जरिता यस्य शर्मन्नकिर्देवा वारयंते न मर्ताः ॥१९॥

स्तुतः । इंद्रः । मघऽवा । यत् । ह । वृत्रा । भूरीणि । एकः । अप्रतीनि । हंति ।

अस्य । प्रियः । जरिता । यस्य । शर्मन् । नकिः । देवाः । वारयंते । न । मर्ताः ॥१९॥

यद्ध यदा खलु मघवा धनवानिंद्रः स्तुतोऽस्माभिः स्तुतो भवति तदेंद्र एकोऽसहाय एव भूरीणि बहून्यप्रतीन्यप्रतिगमनानि । अभिगमनयुक्तानीत्यर्थः । वृत्रा वृत्राणि शत्रून्हंति । हिनस्ति । यस्येंद्रस्य शर्मन् शर्मण्याश्रये वर्तमानं स्तोतारं देवा नकिर्वारयंते निवारणं न कुर्वंति मर्ताश्च न निवारयंते निवारणं न कुर्वंति अस्येंद्रस्य जरिता स्तोता प्रियो भवति ॥

आग्निमारुतशस्त्र एवा न इंद्र इति परिधानीया । सूचितं च । एवा न इंद्रो मघवा विरप्शीति परिदध्यात् । आ० ५. २०. । इति ॥

॥ सैषा सूक्ते विंशी ॥

एवा न इंद्रो मघवा विरप्शी करत्सत्या चर्षणीधृदनर्वा ।

त्वं राजा जनुषां धेह्यस्मे अधि श्रवो माहिनं यज्जरित्रे ॥२०॥

एव । नः । इंद्रः । मघऽवा । विऽरप्शी । करत् । सत्या । चर्षणिऽधृत् । अनर्वा ।

त्वं । राजा । जनुषां । धेहि । अस्मे इति । अधि । श्रवः । माहिनं । यत् । जरित्रे ॥२०॥

विरप्शी बहुविधशब्दवान् चर्षणीधृत् सर्वासां प्रजानां धारयितानर्वाप्रत्यृतः । केनापि प्रतिकूलेनाप्राप्त इत्यर्थः । मघवा धनवानिंद्र एवैवमस्माभिः स्तुतः सन् नोऽस्माकं सत्या सत्यरूपाण्यभिमतानि फलानि करत् । करोतु । हे इंद्र जनुषां जन्मवतां सर्वेषां राजा प्रभुस्त्वं माहिनं महिम्नोपेतं यच्छ्रवो यद्यशो जरित्रे स्तोत्रे देयं तद्यशोऽस्मे अस्मास्वधि अधिकत्वेन धेहि ॥ एवा न इंद्रो मघवा विरप्शी- त्यादि ब्राह्मणं । ऐ० ब्रा० ३. ३८. ॥

॥ अथैकविंशी ॥

नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३न पीपेः ।

अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ २१ ॥

नु । स्तुतः । इंद्र । नु । गृणानः । इषं । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।

अकारि । ते । हरिऽवः । ब्रह्म । नव्यं । धिया । स्याम । रथ्यः । सदाऽसाः ॥ २१ ॥

नू ष्टुत इंद्रेति व्याख्याता ॥

॥ इति तृतीयस्य पंचमे चतुर्विंशो वर्गः ॥

अयं पंथा इति त्रयोदशर्चमष्टमं सूक्तं त्रैष्टुभं। अत्रानुक्रमणिका। अयं पंथाः सप्तोना संवाद इंद्रादितिवामदेवानामिति। यस्य वाक्यं स ऋषिर्या तेनोच्यते सा देवतेति परिभाषितत्वादृषिदेवते तत्र तत्र ज्ञातव्ये। अस्मिन् सूक्ते इंद्रादितिवामदेवसंवादरूपिणी काचिदाख्यायिका श्लोकरूपेण सूच्यते। गर्भस्थो ज्ञानसंपन्नो वामदेवो महामुनिः। मतिं चक्रे न जायेयां योनिदेशात्तु मातृतः॥ किंतु पार्श्वादितश्चेति ज्ञात्वा नु जननी त्विदं। दध्यौ शांत्यै शची देवीमदितिं त्विंद्रमातरं॥ अदितिस्त्विंद्रसहिता गर्भिणीमभ्यगाद्वने। अदितींद्रवामदेवा संवादमथ चक्रिरे॥ संवाद इति सूत्रेण कथा सैषात्र सूच्यते। नोक्तो वक्तृविशेषोऽत्र ह्युपदेशेष्वनुक्तितः॥ अर्थतस्त्ववगंतव्यो वक्तृभेद इति स्थितिः। इंद्रोऽदितिर्ऋषिश्चास्मिन्नथः सूक्ते समूचिरे॥ गर्भे शयानं सुचिरं मातुर्गर्भादनिर्गतं। वामदेवं प्रति ब्रूत आद्ययर्चा शतक्रतुः॥ द्वितीयादिभिरर्धर्चैर्ऋषिरत्राह पंचभिः। न ही न्वस्येति सप्त स्युरर्धर्चा अदितेर्वचः॥ ममच्चन त्वा युवतिरित्यृचः पंच वै मुनेः। दौर्गत्यशांतिमत्राह वामदेवस्तथांत्यया॥ एवमर्थाद्वक्तृभेद इति बह्वृचशासनं। अर्थो विवेकस्पष्टत्वादुपदेशेषु नेरितः। ऋषिदैवतसिद्ध्यर्थं विवेकादर्थ ईरित इति॥

॥ तत्र प्रथमा ॥

अयं पंथा अनुवित्तः पुराणो यतो देवा उदजायंत विश्वे ।

अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः ॥ १ ॥

अयं । पंथाः । अनुऽवित्तः । पुराणः । यतः । देवाः । उत्ऽअजायंत । विश्वे ।

अतः । चित् । आ । जनिषीष्ट । प्रऽवृद्धः । मा । मातरं । अमुया । पत्तवे । करिति कः ॥ १ ॥

पुराणोऽनादिरयं प्रत्यक्षेणोपलभ्यमानः पंथा योनिनिर्गमनरूपो मार्गोऽनु आनुपूर्व्येण वित्तः । सर्वैर्जायमानैर्लब्धः । यतो यस्माद्योनिमार्गाद्विश्वे सर्वे देवा उदजायंत उत्कर्षेणोत्पन्ना भवंति । तस्माद्योनिमार्गान्मनुष्या उत्पन्ना भवंतीति किमु वक्तव्यं । अतश्चिदस्माद्योनिमार्गादेव प्रवृद्धो गर्भे प्रकर्षेण वृद्धिं गतो वामदेव आ जनिषीष्ट । आ समंताज्जायतां । अमुयामूं मातरं पत्तवे पतनाय । मरणायेत्यर्थः । मा कः । मा करोतु ॥

॥ अथ द्वितीया ॥

नाहमतो निरया दुर्गहैतत्तिरश्चता पार्श्वान्निर्गमाणि ।
बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै ॥२॥

न । अहं । अतः । निः । अय । दुःऽगहा । एतत् । तिरश्चता । पार्श्वात् । निः । गमानि ।
बहूनि । मे । अकृता । कर्त्वानि । युध्यै । त्वेन । सं । त्वेन । पृच्छै ॥२॥

वामदेव एवमुक्तवंतमिंद्रं प्रत्याह । अहमतो योनिमार्गान्न निरया । न निरयाणि । न निर्गच्छानि । एतद्योनिनिर्गमरूपं वर्त्म दुर्गहा । दुर्ग्रहं । दुःखेन ग्राह्यं । न प्राप्यं भवतीत्यर्थः । किंतु तिरश्चता तिरश्चीनात्पार्श्वान्निर्गमानि । निर्गच्छानि । योनिदेशादनिर्गतोऽहं पार्श्वं भित्त्वा निर्गच्छानीत्यर्थः । अन्यैरकृतमिदमेव न केवलं मया क्रियते किंत्वन्यैरकृतानि बहूनि कर्माणि कर्त्वानि कर्तव्यानि संति । त्वेनैकेन सपत्नेन विवदमानेन सह युध्यै । युद्धं करवाणि । त्वेनैकेन बुभुत्सुना संपृच्छै । सम्यक् पृच्छानि ॥

॥ अथ तृतीया ॥

परायतीं मातरमन्वचष्ट न नानु गान्यनु नू गमानि ।
त्वष्टुर्गृहे अपिबत्सोममिंद्रः शतधन्यं चम्वोः सुतस्य ॥३॥

पराऽयतीं । मातरं । अनु । अचष्ट । न । न । अनु । गानि । अनु । नु । गमानि ।
त्वष्टुः । गृहे । अपिबत् । सोमं । इंद्रः । शतऽधन्यं । चम्वोः । सुतस्य ॥३॥

मयि गर्भे स्थिते सतींद्रो मदीयां मातरं परायतीं परेतां म्रियमाणामन्वचष्ट । अन्वब्रवीत् । एवमपीदानीं गर्भे स्थितोऽहं पुराणं पंथानं न नानुगानि । नानुगच्छानीति न । किंतु नु क्षिप्रमनुगमानि । अनुगच्छान्येव । वामदेवः स्वकीय-

मकृत्यकारित्वं परिहृत्येंद्रस्याकृत्यकारित्वमुत्तरार्धेन प्रतिपादयति । इंद्रश्चान्योः सोमाभिषवफलकयोः सुतस्य सोमं सुतवतोऽभिषुतवतस्त्वष्टुः संबंधिनि गृहेऽनाहूतः सन् शतधन्यं बहुधनेन क्रीतं सोममपिबत् । बलात्कारेण सोमस्य पानं कृतवान् । अयमर्थस्तैत्तिरीयैस्त्वष्टा हतपुत्रो वींद्रं सोममाहरदित्यनुवाके । तै० सं० २.४.१२. । महता प्रबंधेन प्रपंचितः ॥

॥ अथ चतुर्थी ॥

किं स ऋधक्कृणवद्यं सहस्रं मासो जभार शरदश्च पूर्वीः ।

नही न्वस्य प्रतिमानमस्त्यंतर्जातेषूत ये जनित्वाः ॥४॥

किं । सः । ऋधक् । कृणवत् । यं । सहस्रं । मासः । जभार । शरदः । च । पूर्वीः ।

नहि । नु । अस्य । प्रतिऽमानं । अस्ति । अंतः । जातेषु । उत । ये । जनिऽत्वाः ॥४॥

अदितिर्यमिंद्रं सहस्रं बहून्मासो मासान्पूर्वीर्बह्वीः शरदश्च संवत्सरांश्च जभार बभार ॥ बिभर्तेरिदं रूपं ॥ गर्भे स्थित इंद्रो बहुषु संवत्सरेष्वदितिं क्लेशितवानित्यर्थः । एवंभूतः स इंद्रः किं यत्किमपि । सर्वमपीत्यर्थः । ऋधक् विरुद्धं कर्म कृणवत् । अकरोत् । इंद्रस्याक्षेपमसहमानादितिरिंद्रमातापेनं प्रति ब्रूते । हे वामदेव जातेषूत्पन्नेष्वंतर्मध्येऽस्येंद्रस्य प्रतिमानं न ह्यस्ति । न विद्यते खलु । नु इति पादपूरणार्थः । उतापि च ये देवादयो जनित्वा जनयितव्या जनयिष्यमाणास्तेषु मध्येऽस्येंद्रस्य प्रतिमानं नास्ति ॥

॥ अथ पंचमी ॥

अवद्यमिव मन्यमाना गुहाकरिंद्रं माता वीर्येणा न्यृष्टं ।

अथोदस्थात्स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः ॥५॥

अवद्यंऽइव । मन्यमाना । गुहा । अकः । इंद्रं । माता । वीर्येण । निऽऋष्टं ।

अथ । उत् । अस्थात् । स्वयं । अत्कं । वसानः । आ । रोदसी इति । अपृणात् ।

जायमानः ॥५॥

गुहा गुहायां गह्वररूपे सूतिकागृहे जातमिंद्रमवद्यमिव गर्हमिव मन्यमाना जानती मातेंद्रजनन्यदितिर्वीर्येण सामर्थ्येन न्यृष्टं नितरां प्राप्तमकः । अकरोत् । अथानंतरं जायमान उत्पद्यमान इंद्रः स्वयमेवात्कं तेजो वसान आच्छादकः सन् ।

द्यामन्तरिक्षं इत्यर्थः । उदस्थात् । उन्नत्वेनातिष्ठत् । किंच रोदसी द्यावापृथिव्याव-पृणात् । समंतात्पूरयामास ॥

॥ इति तृतीयस्य पंचमे पंचविंशो वर्गः ॥

॥ अथ षष्ठी ॥

एता अर्षंत्यललाभवंतीर्ऋतावरीरिव संक्रोशमानाः ।

एता वि पृच्छ किमिदं भनंति कमापो अद्रिं परिधिं रुजंति ॥ ६ ॥

एताः । अर्षंति । अललाऽभवंतीः । ऋतवरीःऽइव । संऽक्रोशमानाः ।

एताः । वि । पृच्छ । किं । इदं । भनंति । कं । आपः । अद्रिं । परिऽधिं । रुजंति ॥ ६ ॥

अललाभवंतीरललेत्येवंरूपं शब्दं कुर्वत्य ऋतावरीरिवोदकवत्य एवैता नद्यः संक्रोशमाना इंद्रमहत्त्वप्रतिपादकोद्भूतेन हर्षेण बहुविधं शब्दायमानाः सत्योऽर्षंति । गच्छंति । एवंभूता नद्य इदं किं भनंति श्रोचयाह्यं शब्दायमानं किं वदंतीममर्थं हे ऋषे त्वमेता नदीर्वि पृच्छ । विशेषेण पृष्टवान् भव । एवं संपृच्छ । विचारिते सत्येतच्छब्दायमानमिंद्रमाहात्म्यस्यैव वचनं भवतीत्यर्थः । किंच आप उदकानि परिधिमावरकं कमद्रिं कं मेघं रुजंति । भंजंति । आपः कमपि मेघं न भंजंति किंतु इंद्रो मम पुत्र एवोदकावरकं मेघं भंक्त्वापः प्रवर्तयतीत्यर्थः ॥

॥ अथ सप्तमी ॥

किमु ष्विदस्मै निविदो भनंतेंद्रस्यावद्यं दिधिषंत आपः ।

ममैतान्पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद्वि सिंधून् ॥ ७ ॥

किं । ऊं इति । स्वित् । अस्मै । निऽविदः । भनंत । इंद्रस्य । अवद्यं । दिधिषंते । आपः ।

मम । एतान् । पुत्रः । महता । वधेन । वृत्रं । जघन्वान् । असृजत् । वि । सिंधून् ॥ ७ ॥

यदेंद्रो वृत्रासुरं हतवान् तदा शाश्वतीं ब्रह्महत्यां प्राप्तवानिति वामदेवस्याभिप्रायमुत्कीयादितिराह । निविदः । मरुत्वतीयशस्त्रे प्रयुज्यमानानि मरुत्स्तोत्रो मरुद्गण इत्यादीनींद्रस्तुतिप्रतिपादकानि कानिचित्पदानि निविच्छब्देनोच्यंते । ता निविदोऽस्मा इमं वृत्रवधनिमित्तं ब्रह्महत्यारूपं पापं प्राप्नुवंतमिंद्रं किमु ष्वित् भनंत । भनंति । किं वदंतीति चेत् तर्हि पापरहितं मत्वा निविदः

श्नुवंति । कथमिंद्रस्य पापरहितत्वं । उच्यते । आपः फेनरूपेणास्येंद्रस्यावद्यं ब्रह्महत्यादिरूपं पापं दिधिषंते । धारयंति । मम पुत्रो मदीयः पुत्र इंद्रो महता प्रभूतेन वधेन । वध इति वज्रनामैतत् । वज्रेण वृत्रं जघन्वान् । हतवान् । तत एतान् सिंधूनुदकानि व्यसृजत् । विशेषेण स्वैरत्वेन संतु सृष्टवान् । इंद्रेणोत्सृष्टा आपस्तस्य पापं जगृहुरित्यर्थः ॥

॥ अथाष्टमी ॥

ममच्चन त्वा युवतिः परास ममच्चन त्वा कुषवा जगार ।
ममच्चिदापः शिशवे ममृड्युर्ममच्चिदिंद्रः सहसोदतिष्ठत् ॥८॥

ममत् । चन । त्वा । युवतिः । पराऽआस । ममत् । चन । त्वा । कुषवा । जगार ।
ममत् । चित् । आपः । शिशवे । ममृड्युः । ममत् । चित् । इंद्रः । सहसा । उत् । अतिष्ठत् ॥८॥

सूक्तशेषेण ऋषिरिंद्रं स्तौति । हे इंद्र ममच्चन माद्यंत्येव । प्रमत्तैवेत्यर्थः । युवतिस्त्वदीया मातादितिस्त्वा त्वां परास । पराचिक्षेप । किंच कुषवानाम्नी राक्षसी सा ममच्चन प्रमत्तैव त्वा त्वां जगार । गिरति स्म । हे इंद्र ममच्चित्प्रमाद्यंत्य एवापः शिशवे जाताय तुभ्यं ममृड्युः । सुखयांचक्रुः । ममच्चित् माद्यन्नेवेंद्रः सहसा स्वेन वीर्येणोदतिष्ठत् । सूतिकागृहाद्राक्षसीं बाधमानः सन् उत्कर्षेण तस्थौ ॥

॥ अथ नवमी ॥

ममच्चन ते मघवन्व्यंसो निविविध्वाँ अप हनू जघान ।
अधा निविद्ध उत्तरो बभूवाञ्छिरो दासस्य सं पिणग्वधेन ॥९॥

ममत् । चन । ते । मघऽवन् । विऽअंसः । निऽविविध्वान् । अप । हनू इति । जघान ।
अध । निऽविद्धः । उत्ऽतरः । बभूवान् । शिरः । दासस्य । सं । पिणक् । वधेन ॥९॥

हे मघवन्धनवन्निंद्र ममच्चन प्रमाद्यन्नेव व्यंसो नाम राक्षसो निविविध्वान् प्रविध्यन् ते हनू त्वदीये हनू मुखपार्श्वे अपजघान । अपहतवान् । अध अथानंतरं हे इंद्र निविद्धो राक्षसेन ताडितस्त्वमुत्तरो व्यंसादधिकबलो बभूवान् भूतः सन् दासस्य क्षीणस्य व्यंसस्य शिरो वधेन वज्रेण संपिणक् । पिष्टवानसि ॥

॥ अथ दशमी ॥

गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिंद्रं ।
अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्वं इच्छमानं ॥१०॥

गृष्टिः । ससूव । स्थविरं । तवागां । अनाधृष्यं । वृषभं । तुम्रं । इंद्रं ।
अरीळ्हं । वत्सं । चरथाय । माता । स्वयं । गातुं । तन्वे । इच्छमानं ॥१०॥

गृष्टिः काचिन्नौर्वत्सं यथा ससूव सुषुवे तथा मातेंद्रजनन्यदितिश्चरथाय स्वेच्छया संचरणायेंद्रं ससूव । सुषुवे । कीदृशमिंद्रं । स्थविरं वयसा प्रवृद्धं तवागां प्रवृद्धबलमनाधृष्यं शत्रुभिरनभिभाव्यं वृषभं सेचनसमर्थं तुम्रं प्रेरकमरीळ्हं शत्रुभिरनभिभूतं स्वयं गातुमन्यनिरपेक्षगमनं तन्वे शरीरायेच्छमानमिच्छंतं ॥

॥ अथैकादशी ॥

उत माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः ।
अथाब्रवीद्वृत्रमिंद्रो हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व ॥११॥

उत । माता । महिषं । अनु । अवेनत् । अमी इति । त्वा । जहति । पुत्र । देवाः ।
अथ । अब्रवीत् । वृत्रं । इंद्रः । हनिष्यन् । सखे । विष्णो इति । विऽतरं । वि । क्रमस्व ॥११॥

उतापिच हे मदीय पुत्रेंद्र अमी वह्न्यादयो देवास्त्वा त्वां जहति त्यजंति इत्युक्तवतींद्रस्य मातादितिरिंद्रं महिषं महांतं । महिष इति महन्नामैतत् । अन्ववेनत् । अयाचत । अथानंतरं हे विष्णो व्यापनशील हे सखे मित्रभूत हरे त्वं वृत्रं हनिष्यन् हंतुमिच्छन् वितरं विक्रमस्व । अतिपराक्रमी भवेतींद्रो विष्णुमब्रवीत् । उवाच ॥

॥ अथ द्वादशी ॥

कस्ते मातरं विधवामचक्रच्छयुं कस्त्वामजिघांसच्चरंतं ।
कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणाः पितरं पादगृह्य ॥१२॥

कः । ते । मातरं । विधवां । अचक्रत् । शयुं । कः । त्वां । अजिघांसत् । चरंतं ।
कः । ते । देवः । अधि । मार्डीके । आसीत् । यत् । प्र । अक्षिणाः । पितरं । पादऽगृह्य ॥१२॥

हे इंद्र यद्यस्मात्कारणात्पितुः सकाशाज्जनिष्यमाणान्नीतस्त्वं त्वदीयं पितरं

पादगृह्य पादेषु गृहीत्वा प्राक्षिणाः प्रकर्षेणावधीः तस्मात्कारणात्ते त्वत्तोऽन्यः को देवो मातरं स्वकीयजननीं विधवां पितृवधेन पतिरहितामचक्रत्। अकरोत्। कस्त्वत्तोऽन्यः शयुं शयानं चरंतं जाग्रतं वा त्वामजिघांसत्। हंतुमैच्छत्। ते त्वत्तोऽन्यः को देवो मार्डीके प्रजानां सुखकरणेऽधि अधिक आसीत्। अयमर्थ ऋक्सामे वै देवेभ्य इत्यनुवाके यज्ञो दक्षिणामभ्यध्यायदित्यादिब्राह्मणेन। तै० सं० ६.१.३.६.। तैत्तिरीयकैर्बहुधा प्रपंचितः ॥

॥ अथ त्रयोदशी ॥

अवर्त्या शुन आंत्राणि पेचे न देवेषु विविदे मर्डितारं।
अपश्यं जायाममहीयमानामधा मे श्येनो मध्वा जभार ॥१३॥

अवर्त्या। शुनः। आंत्राणि। पेचे। न। देवेषु। विविदे। मर्डितारं।
अपश्यं। जायां। अमहीयमानां। अध। मे। श्येनः। मधु। आ। जभार ॥१३॥

अनया वामदेवः स्वकीयं दारिद्र्यं सूचयन्निंद्रस्योत्कर्षमाह। वामदेवोऽहमवर्त्या जीवनोपायराहित्येन शुनः शुनकसंबंधीन्यांत्राणि पुरीतंति पेचे। अपचं। देवेषु द्योतमानेषु ब्रह्मादिषु मध्य इंद्रादन्यं मर्डितारं सुखयितारं न विविदे। न लेभे। किंच जायां स्वकीयां भार्याममहीयमानामश्लाघनीयामपश्यं। अद्राक्षं। अध अथानंतरं श्येनः श्येनवच्छीघ्रगामींद्रो मे मह्यं मधु मधुरोपेतमुदकमाजभार। आजहार ॥

॥ इति तृतीयस्य पंचमे षड्विंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके पंचमोऽध्यायः संपूर्णः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

चतुर्थे मंडले द्वितीयानुवाकेऽष्टसूक्तानि व्याख्यातानि । एवा त्वामिंद्रेत्येकादशर्चं नवमं सूक्तं । तस्य मंडलादिपरिभाषया वामदेव ऋषिः । अनादेशपरिभाषया त्रिष्टुप् छंदः । इंद्रो देवता । तथा चानुक्रांतं । एवैकादशेति ॥ अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणशस्त्र इदं सूक्तं । सूत्र्यते हि । एवा त्वामिंद्रोशन्नु षु णः सुमना उपाक इति याज्या । आ० ५.१६. । इति ॥ पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि मैत्रावरुणशस्त्रेऽहीनसूक्तं तत्स्थाने त्रीणि संपातसूक्तानि । तत्रेदं प्रथमं सूक्तं । सूत्रितं च । एवा त्वामिंद्र यन्न इंद्रः । आ० ७.५. । इति ॥

॥ तत्र प्रथमा ॥

एवा त्वामिंद्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः ।
महामुभे रोदसी वृद्धमृष्वं निरेकमिद्वृणते वृत्रहत्ये ॥१॥
एव । त्वां । इंद्र । वज्रिन् । अत्र । विश्वे । देवासः । सुऽहवासः । ऊमाः ।
महां । उभे इति । रोदसी इति । वृद्धं । ऋष्वं । निः । एकं । इत् । वृणते । वृत्रऽहत्ये ॥१॥

अत्रास्मिन्यज्ञे वज्रिन् हे वज्रवन्निंद्र सुहवासः सुहवाः शोभनाह्वाना ऊमा रक्षका विश्वे देवासः सर्वे देवा उभे रोदसी द्यावापृथिव्यौ च एवैवमुक्तप्रकारेण स्तूयमानं महां महांतं प्रभूतं वृद्धं गुणैः प्रवृद्धमृष्वं दर्शनीयं त्वामेकमिदेकमेव वृत्रहत्ये वृत्रहननार्थं निर्वृणते । निःशेषेण संभजंते ॥

॥ अथ द्वितीया ॥

अवासृजंत जिव्रयो न देवा भुवः सम्राळिंद्र सत्ययोनिः ।
अहन्नहिं परिशयानमर्णः प्र वर्तनीररदो विश्वधेनाः ॥२॥
अव । असृजंत । जिव्रयः । न । देवाः । भुवः । संऽराट् । इंद्र । सत्यऽयोनिः ।
अहन् । अहिं । परिऽशयानं । अर्णः । प्र । वर्तनीः । अरदः । विश्वऽधेनाः ॥२॥

हे इंद्र देवास्त्वां जिव्रयो न जीर्णाः प्रवृद्धाः पितरो यूनः पुत्रानिवावासृजंत । असुरवधार्थं प्रेरयन् । ततो हे इंद्र सत्ययोनिः सत्यनिवासस्त्वं सम्राट् सर्वेषां लोकानामधीश्वरो भुवः । अभवः । अर्णां उदकं लक्षीकृत्य परिशयानं परितः समंताच्छयनं कुर्वंतमहिं वृत्रासुरमहन् । अवधीः । विश्वधेना विश्वस्य प्रीणयित्रीर्वर्तनीः सर्वत्र प्रवर्तिका नदीः प्रारदः । प्रकर्षेण विलेखनं कृतवानसि । इंद्रो वृत्रं हत्वा तेनावृतान्युदकानि प्रवाहरूपेण प्रवर्तयतीत्यर्थः ॥

॥ अथ तृतीया ॥

अतृप्णुवंतं वियतमबुध्यमबुध्यमानं सुषुपाणमिंद्र ।
सप्त प्रति प्रवत आशयानमहिं वज्रेण वि रिणा अपर्वन् ॥ ३ ॥
अतृप्णुवंतं । विऽयतं । अबुध्यं । अबुध्यमानं । सुसुपानं । इंद्र ।
सप्त । प्रति । प्रऽवतः । आऽशयानं । अहिं । वज्रेण । वि । रिणाः । अपर्वन् ॥ ३ ॥

हे इंद्र त्वमतृप्णुवंतं भोगेष्वतृप्यंतं वियतं शिथिलांगमबुध्यं दुर्विज्ञानमबुध्यमानं किमप्यजानंतं सुषुपाणं सुप्तं सप्त सर्पणस्वभावाः प्रवतोऽपः प्रत्याशयानमावृत्य तिष्ठंतमहिं वृत्रमपर्वन् अपर्वणि पौर्णमास्यां वज्रेण विरिणाः । व्यरिणाः । विशेषेण हतवानसि । पौर्णमास्यां वृत्रवधस्त्वष्टा हतपुत्र इत्यनुवाके प्रति वा एनं पौर्णमास आमावास्यायां प्याययंतीति तैत्तिरीयेऽप्युक्तः । तै० सं० २.५.२.५. ॥

॥ अथ चतुर्थी ॥

अक्षोदयच्छवसा क्षाम बुध्नं वार्ण वातस्तविषीभिरिंद्रः ।
दृळ्हा न्यौभ्नादुशमान ओजोऽवाभिनत्ककुभः पर्वतानां ॥ ४ ॥
अक्षोदयत् । शवसा । क्षाम । बुध्नं । वाः । न । वातः । तविषीभिः । इंद्रः ।
दृळ्हा । नि । औभ्नात् । उशमानः । ओजः । अव । अभिनत् । ककुभः । पर्वतानां ॥ ४ ॥

इंद्रः परमैश्वर्ययुक्तः शवसा बलेन बुध्नमंतरिक्षं क्षाम क्षीणोदकमक्षोदयत् । संपिपेष । तत्र दृष्टांतः । वातो वायुस्तविषीभिर्बलैर्वार्न उदकमिव तद्वत् । किंच ओजो बलमुशमानः कामयमान इंद्रो दृळ्हानि दृढानि स्थिराण्यपभाणि न्यौभ्नात् । अभांक्षीत् । तथा पर्वतानां गिरीणां ककुभः पक्षानवाभिनत् । अत्यंतमभैत्सीत् ॥

॥ अथ पंचमी ॥

अभि प्र दद्रुर्जनयो न गर्भं रथा इव प्र ययुः साकमद्रयः ।
अतर्पयो विसृत उब्ज ऊर्मीन्त्वं वृताँ अरिणा इंद्र सिंधून् ॥५॥

अभि । प्र । दद्रुः । जनयः । न । गर्भं । रथाःऽइव । प्र । ययुः । साकं । अद्रयः ।
अतर्पयः । विऽसृतः । उब्जः । ऊर्मीन् । त्वं । वृतान् । अरिणाः । इंद्र । सिंधून् ॥५॥

हे इंद्र त्वामद्रयो मरुतो जनयो जनन्यो गर्भं न पुत्रमिवाभिप्रदद्रुः । अभिजग्मुः । किंच रथा इव रंहणशीला रथा यथा तथा वृत्रवधार्थं त्वया साकं प्र ययुः । प्रकर्षेणायासिषुः । हे इंद्र त्वं विसृतो विसरणशीला नदीरतर्पयः । अग्निरपूरयः । तयोर्मीन्मेघानुब्जः । अवधीः । तथा त्वं वृतान्वृत्रेणावृतान् सिंधूनपोऽरिणाः । प्रेरयः ॥

॥ इति तृतीयस्य षष्ठे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

त्वं महीमवनिं विश्वधेनां तुर्वीतये वय्याय क्षरंतीं ।
अरमयो नमसैजदर्णः सुतरणाँ अकृणोरिंद्र सिंधून् ॥६॥

त्वं । महीं । अवनिं । विश्वऽधेनां । तुर्वीतये । वय्याय । क्षरंतीं ।
अरमयः । नमसा । एजत् । अर्णः । सुऽतरणान् । अकृणोः । इंद्र । सिंधून् ॥६॥

हे इंद्र त्वं महीं महतीं विश्वधेनां विश्वस्य प्रीणयित्रीं तुर्वीतये तुर्वीतिनाम्ने राज्ञे वय्याय वय्यनाम्ने च क्षरंतीमभीष्टान् कामान्दुहंतीमवनिं भूमिं नमसान्नेनैजदेजता चलतार्णोऽर्णसोदकेन चारमयः । रमयसि । इंद्रः पृथिवीमन्नोदकसमृद्धां करोतीत्यर्थः । किंच हे इंद्र त्वं सिंधून् जलानि सुतरणान् सुष्ठु तीर्णान्यकृणोः । अकार्षीः ॥

॥ अथ सप्तमी ॥

प्रागुवो नभन्वो३न वक्वा ध्वस्रा अपिन्वद्युवतीरृतज्ञाः ।
धन्वान्यज्राँ अपृणक्तृषाणाँ अधोगिंद्रः स्तर्यो३दंसुपत्नीः ॥७॥

प्र । अयुवः । नभन्वः । न । वक्वाः । ध्वस्राः । अपिन्वत् । युवतीः । ऋतऽज्ञाः ।
धन्वानि । अज्रान् । अपृणक् । तृषाणान् । अधोक् । इंद्रः । स्तर्यः । दंऽसुपत्नीः ॥७॥

इंद्रो नभन्वः शत्रूणां हिंसिका वक्वा न सेना इव ध्वस्राः कूलानां ध्वंसिका युवतीरद्भिर्मिश्रिता ऋतज्ञा ऋतस्योदकस्य जनयित्रीरग्रुवः। अग्रुव इति नदीनामैतत्। अग्रगामिनीर्नदीः प्रापिन्वत्। प्रकर्षेणापूरयत्। तथा धन्वानि निर्जलानुन्नतान्देशांश्च वृष्ट्यापृणक्। अपूरयत्। तथाज्रान्मार्गस्य गंतॄन् तृषाणान् पिपासया युक्तान् पुरुषानपृणक्। अपूरयत्। किंच इंद्रो दंसुपत्नीः। दमनपरा असुराः सुष्ठु पतयो यासां ताः स्तर्यः स्तरीर्निवृत्तप्रसवा गा अधोक्। अदुहत्। इंद्रो राक्षसकृतनिरोधदुःखान्निरुद्धप्रसवा अपि गा विमुच्य सप्रसवाश्चकारेत्यर्थः॥

॥ अथाष्टमी ॥

पूर्वीरुषसः शरदश्च गूर्ता वृत्रं जघन्वाँ असृजद्वि सिंधून्।
परिष्ठिता अतृणद्बद्बधानाः सीरा इंद्रः स्रवितवे पृथिव्या ॥८॥

पूर्वीः। उषसः। शरदः। च। गूर्ताः। वृत्रं। जघन्वान्। असृजत्। वि। सिंधून्।
परिऽस्थिताः। अतृणत्। बद्बधानाः। सीराः। इंद्रः। स्रवितवे। पृथिव्या ॥८॥

वृत्रं वृत्राख्यमसुरं जघन्वान्हतवानिंद्रो गूर्तास्तमिस्रया गीर्णाः पूर्वीर्बह्वीरुषसः शरदश्च संवत्सरांश्च व्यसृजत्। विशेषेण ससर्ज। तथा सिंधून् वृत्रेणावृतान्युदकानि व्यसृजत्। किंच परिष्ठिता मेघेषु परितः स्थिता बद्बधाना वृत्रेण परितो बध्यमाना सीरा नदीः। सीरा इति नदीनामैतत्। पृथिव्या पृथिवीरूपेण मार्गेण स्रवितवे स्रवितुं गमनार्थमतृणत्। अविध्यत्॥

॥ अथ नवमी ॥

वम्रीभिः पुत्रमग्रुवो अदानं निवेशनाद्धरिव आ जभर्थ।
व्यंधो अख्यदहिमाददानो निर्भूदुखच्छित्समरंत पर्व ॥९॥

वम्रीभिः। पुत्रं। अग्रुवः। अदानं। निऽवेशनात्। हरिऽवः। आ। जभर्थ।
वि। अंधः। अख्यत्। अहिं। आऽददानः। निः। भूत्। उखऽछित्। सं। अरंत। पर्व ॥९॥

हे हरिवो हरिसंज्ञाश्वोपेतेंद्र त्वं वम्रीभिरुपजिह्विकाभिरदानमद्यमानमग्रुवः। अग्रू नाम काचित्। तस्याः पुत्रं निवेशनाद्वल्मीकाख्यात्स्थानादाजभर्थ आहृतवानसि। आददान इंद्रेणाह्रियमाणोऽग्रुवः पुत्रोऽंधः पूर्वमंधः सन् अहिं सर्पं व्यख्यत्। विशेषेणापश्यत्। ततो निर्भूत्। वल्मीकान्निर्गतोऽभूत्। उखच्छि-

वल्मीकाख्याया उत्खायाश्छेदकानि पर्व पर्वाणयस्य सर्वाण्यंगानां शिथिलानि पर्वाणि समरंत । समगच्छंत । उपजिह्विकाभिः शिथिलीकृतान्यग्रुवः पुत्रस्य पर्वाणींद्रेण समधीयंतेत्यर्थः ॥

॥ अथ दशमी ॥

प्र ते पूर्वाणि करणानि विप्राविद्वाँ आह विदुषे करांसि ।
यथायथा वृष्ण्यानि स्वगूर्तापांसि राजन्नर्याविवेषीः ॥१०॥

प्र । ते । पूर्वाणि । करणानि । विप्र । आऽविद्वान् । आह । विदुषे । करांसि ।
यथाऽयथा । वृष्ण्यानि । स्वऽगूर्ता । अपांसि । राजन् । नर्या । अविवेषीः ॥१०॥

हे राजन्राजमानेंद्र वृष्ण्यानि वर्षणयोग्यानि स्वगूर्ता स्वगूर्तानि स्वयमुद्गीर्णानि नर्या नर्याणि मनुष्यहितान्यपांसि त्वत्संबंधीनि कर्माणि यथायथाविवेषीर्व्याप्नोः । अकार्षीरिति यावत् । तथातथा हे विप्र प्राज्ञेंद्र विदुषे विदुषः सर्वं जानतस्ते त्वत्संबंधीनि पूर्वाणि पुरातनानि करणानि कर्माण्याविद्वान् आसमंतादजानन् वामदेवः करांसि त्वदीयानि कर्माणि प्र प्रकर्षेणाह । ब्रवीति ॥

॥ अथैकादशी ॥

नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥

नु । स्तुतः । इंद्र । नु । गृणानः । इषं । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यं । धिया । स्याम । रथ्यः । सदाऽसाः ॥११॥

हे इंद्र नु क्षिप्रं स्तुतः पूर्वैर्ऋषिभिः संस्तुतो नु क्षिप्रं गृणानोऽस्माभिः स्तूयमानस्त्वमिषमन्नं जरित्रे स्तोत्रे मह्यं नद्यो नाद्भिर्नदीरिव पीपेः । प्यायय । प्रवृद्धं कुरु । हे हरिवो हरिसंज्ञकाश्वोपेतेंद्र ते तुभ्यं नव्यं नवतरं ब्रह्म स्तोत्रमकारि । अस्माभिः क्रियते । रथ्यो रथवंतो वयं धिया प्रज्ञारूपया स्तुत्या सदासास्त्वां सर्वदा भजमानास्त्वदर्थं हवीरूपस्यान्नस्य दातारो वा स्याम । भूयास्म ॥

॥ इति तृतीयस्य षष्ठे द्वितीयो वर्गः ॥

आ न इंद्रेत्येकादशर्चं दशमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रं । आ न इत्यनुक्रमणिका ॥ पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि निष्केवल्य एतन्निविद्धानीयं ।

सूचितं च । आ न इंद्र इति निष्केवल्यं । आ० ७.५. । इति ॥ महाव्रतेऽप्येतत्सं-पातसूक्तं । तथैव पंचमारण्यके सूचितं च । आ न इंद्रो दूरादा न आसादिति संपातः । ऐ० आ० ५.८. । इति ॥

॥ तत्र प्रथमा ॥

आ न इंद्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगे समत्सु तुर्वणिः पृतन्यून् ॥ १ ॥

आ । नः । इंद्रः । दूरात् । आ । नः । आसात् । अभिष्टिऽकृत् । अवसे । यासत् । उग्रः ।
ओजिष्ठेभिः । नृऽपतिः । वज्रऽबाहुः । संऽगे । समत्ऽसु । तुर्वणिः । पृतन्यून् ॥ १ ॥

अभिष्टिकृद्यजमानसंबंधिनामभिष्टीनां कर्तोग्रस्तेजस्वींद्रो नोऽस्माकमवसे रक्षणाय दूरादायासत् । आयातु । आगच्छतु । अपि च आसादासन्नादंतिकाच्च नोऽस्माकमवसे रक्षणायायासत् । आयातु । कीदृशः । समत्सु संग्रामेषु संगे शत्रुभिः संयोगे सति पृतन्यून् शत्रून् तुर्वणिर्हिंसन् वज्रबाहुर्वज्रहस्तो नृपतिर्वृष्टिद्वारा नृणां मनुष्याणां पालक ओजिष्ठेभिरतिशयेन तेजस्विभिर्मरुद्भिर्युक्त इति शेषः ॥

॥ अथ द्वितीया ॥

आ न इंद्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥ २ ॥

आ । नः । इंद्रः । हरिऽभिः । यातु । अच्छ । अर्वाचीनः । अवसे । राधसे । च ।
तिष्ठाति । वज्री । मघऽवा । विऽरप्शी । इमं । यज्ञं । अनु । नः । वाजऽसातौ ॥ २ ॥

अर्वाचीनोऽस्मदभिमुख इंद्रोऽवसेऽस्मदीयाय रक्षणाय राधसे च धनाय च नोऽच्छास्मानभिलक्षीकृत्य हरिभिरश्वैः सहायातु । आगच्छतु । किंच वज्री वज्रवान्मघवा धनवान्विरप्शी महान् । विरप्शीति महन्नामसु पाठात् । अस्मदीयस्य कर्मणो द्वेष्टृभिरसुरादिभिः सह नोऽस्माकं वाजसातौ युद्धे प्राप्ते सतीममस्मदीयं यज्ञमनूद्दिश्य तिष्ठाति । तिष्ठतु ॥

॥ अथ तृतीया ॥

इमं यज्ञं त्वमस्माकमिंद्र पुरो दधत्सनिष्यसि क्रतुं नः ।
श्वघ्नीव वज्रिन्त्सनये धनानां त्वया वयमर्य आजिं जयेम ॥ ३ ॥

इमं । यज्ञं । त्वं । अस्माकं । इंद्र । पुरः । दधत् । सनिष्यसि । क्रतुं । नः ।
श्वघ्नीऽइव । वज्रिन् । सनये । धनानां । त्वया । वयं । अर्यः । आजिं । जयेम ॥३॥

हे इंद्र त्वं नोऽस्मान्पुरो दधत् पुरस्कृतान् कुर्वन् अस्माकं क्रतुं क्रियमाणमिमं यज्ञं सनिष्यसि । संभजिष्यसि । अपि च श्वघ्नीव मृगयुर्मृगानिव हे वज्रिन् वज्रवन्निंद्र त्वयार्योऽरयः स्तोतारो वयं धनानां पश्वादिधनानां सनये लाभायाजिं शत्रुसंबंधिनं संग्रामं जयेम । संजीयास्म ॥

अपिशर्मि मध्यंदिनसवने मैत्रावरुणस्योशन्नु षु ण इति प्रस्थयाज्या । सूचितं च । उशन्नु षु णः सुमना उपाक इति याज्या । आ० ५.१६. । इति ॥

॥ सैषा सूक्ते चतुर्थी ॥

उशन्नु षु णः सुमना उपाके सोमस्य नु सुषुतस्य स्वधावः ।
पा इंद्र प्रतिभृतस्य मध्वः समंधसा ममदः पृष्ठ्येन ॥४॥

उशन् । ऊं इति । सु । नः । सुऽमनाः । उपाके । सोमस्य । नु । सुऽसुतस्य । स्वधाऽवः ।
पाः । इंद्र । प्रतिऽभृतस्य । मध्वः । सं । अंधसा । ममदः । पृष्ठ्येन ॥४॥

हे स्वधावोऽन्नवन्निंद्र सुमनाः शोभनमनस्कस्त्वमुपाके समीपे नोऽस्मानुशन्नु सु अत्यंतं कामयमानः सन् सुषुतस्य सुष्ठुभिषुतं प्रतिभृतस्य संभृतं मध्वो मादकं सोमस्य सोमं नु क्षिप्रमेव पाः । पिब । पृष्ठ्येन । पृष्ठ्यशब्देन माध्यंदिनसवन उद्गातृभिर्गीयमानं स्तोत्रमुच्यते । तत्संबंधिनांधसा पीतेन सोमेन संममदः । प्रहृष्टो भव ॥

॥ अथ पंचमी ॥

वि यो ररप्श ऋषिभिर्नवेभिर्वृक्षो न पक्वः सृण्यो न जेता ।
मर्यो न योषामभि मन्यमानोऽच्छा विवक्मि पुरुहूतमिंद्रं ॥५॥

वि । यः । ररप्शे । ऋषिऽभिः । नवेभिः । वृक्षः । न । पक्वः । सृण्यः । न । जेता ।
मर्यः । न । योषां । अभि । मन्यमानः । अच्छ । विवक्मि । पुरुऽहूतं । इंद्रं ॥५॥

पक्वः पक्वफलो वृक्षो न वृक्ष इव । अत्र सृणिशब्दोऽंकुशवाची । तेनायुधमात्रं लक्ष्यते । सृण्य आयुधकुशलो जेता न शत्रुविजयी वीरपुरुष इव यो नवेभिर्नवैर्नूतनैर्ऋषिभिर्वि ररप्शे विविधं स्तूयते स्तोताहं पुरुहूतं बहुभिराहूतं तमिंद्र-

मत्काभिलक्षीकृत्य विवक्मि। विशेषेण वच्मि। स्तौमि। तत्र दृष्टांतः। अभिमन्यमानो मदीयेयं योषिदित्यभिजानन्मर्यो मर्त्यो योषां न स्त्रीमिव तद्वत् ॥

॥ इति तृतीयस्य षष्ठे तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

गिरिर्न यः स्वतवाँ ऋष्व इंद्रः सनादेव सहसे जात उग्रः।

आदर्ता वज्रं स्थविरं न भीम उद्नेव कोशं वसुना न्यृष्टं ॥ ६॥

गिरिः। न। यः। स्वऽतवान्। ऋष्वः। इंद्रः। सनात्। एव। सहसे। जातः। उग्रः।

आऽदर्ता। वज्रं। स्थविरं। न। भीमः। उद्नाऽइव। कोशं। वसुना। निऽऋष्टं ॥ ६॥

गिरिर्न पर्वत इव स्वतवान् स्वयं प्रवृद्ध ऋष्वो महान्। ऋष्व इति महन्नाम महत् ब्रध्न ऋष्व इति तन्नामसु पाठात्। उग्र ओजस्वी य इंद्रः सहसे शत्रोरभिभवाय सनादेव चिरादेव जात उत्पन्नो भीमः शत्रूणां भयंकरः स इंद्र उद्नेव कोशमुदकेन जलपात्रमिव वसुना तेजसा न्यृष्टं निगतं स्थविरं वृहद्वज्रं न वज्रं च। नेति चार्थे। आदर्ता। आहृतवानासीत् ॥

॥ अथ सप्तमी ॥

न यस्य वर्ता जनुषा न्वस्ति न राधस आमरीता मघस्य।

उद्वावृषाणस्तविषीव उग्रास्मभ्यं दद्धि पुरुहूत रायः ॥ ७॥

न। यस्य। वर्ता। जनुषा। नु। अस्ति। न। राधसः। आऽमरीता। मघस्य।

उत्ऽववृषाणः। तविषीऽवः। उग्र। अस्मभ्यं। दद्धि। पुरुऽहूत। रायः ॥ ७॥

हे इंद्र यस्य तव कश्चिज्जनुषा जन्मना स्वत एव नु सत्यं वर्ता वारयिता नास्ति। राधसो यज्ञादिकर्मणां साधकस्य मघस्य त्वया दीयमानस्य धनस्यामरीता कश्चिदपि नाशयिता नास्ति हे तविषीवो बलवन्नुग्र तेजस्विन् हे पुरुहूत बहुभिराहूतेंद्र उद्ववृषाणोऽभीष्टान् कामान्वर्षकस्त्वं रायः पश्वादिधनान्यस्मभ्यं स्तोतृभ्यो दद्धि। देहि ॥

॥ अथाष्टमी ॥

ईक्षे राय क्षयस्य चर्षणीनामुत व्रजमपवर्तासि गोनां।

शिक्षानरः समिथेषु प्रहावान्वस्वो राशिमभिनेतासि भूरिं ॥ ८॥

ईशे । रायः । क्षयस्य । चर्षणीनां । उत । व्रजं । अपऽवर्ता । असि । गोनां ।
शिक्षाऽनरः । संऽइथेषु । प्रहाऽवान् । वस्वः । राशिं । अभिऽनेता । असि । भूरिं ॥८॥

हे इंद्र त्वं चर्षणीनां प्रजानां रायो धनस्य क्षयस्य गृहस्य चेशे । ईक्षसे । उतापि च गोनां गवां व्रजं समूहमपवर्तापवारकोऽसि । निरोधकेभ्योऽसुरेभ्यो गवां मोचयिता भवसीत्यर्थः । किंच हे इंद्र शिक्षानरः शिक्षया नेता प्रज्ञानां शासकः समिथेषु युद्धेषु प्रहावान् प्रहरणवांस्त्वं भूरिं प्रभूतं वस्वो धनस्य राशिं समूहमभिनेतासि । प्रापयिता च भवसि ॥

॥ अथ नवमी ॥

कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहु का चिदृष्वः ।
पुरु दाशुषे विचयिष्ठो अंहोऽथा दधाति द्रविणं जरित्रे ॥९॥

कया । तत् । शृण्वे । शच्या । शचिष्ठः । यया । कृणोति । मुहु । का । चित् । ऋष्वः ।
पुरु । दाशुषे । विऽचयिष्ठः । अंहः । अथ । दधाति । द्रविणं । जरित्रे ॥९॥

शचिष्ठोऽतिशयेन प्राज्ञः । तदिति लिंगव्यत्ययः । तत् स इंद्रः कया शच्या कया प्रज्ञया । शचीति प्रज्ञानामैतत् । शृण्वे । श्रूयते । ऋष्वो महानिंद्रो मुहु मुहुर्यया प्रज्ञया का चित् कानिचित्कर्माणि कृणोति । करोति । स इंद्रो दाशुषे हविर्दत्तवते यजमानाय पुरु भूयिष्ठमंहः पापं विचयिष्ठोऽतिशयेन नाशको भवति । अथापि च जरित्रे स्तोत्रे द्रविणं पश्वादिधनं दधाति । ददाति ॥

॥ अथ दशमी ॥

मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत्ते ।
नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिंद्र स्तुवंतः ॥१०॥

मा । नः । मर्धीः । आ । भर । दद्धि । तत् । नः । प्र । दाशुषे । दातवे । भूरिं । यत् । ते ।
नव्ये । देष्णे । शस्ते । अस्मिन् । ते । उक्थे । प्र । ब्रवाम । वयं । इंद्र । स्तुवंतः ॥१०॥

हे इंद्र त्वं नोऽस्मान्मा मर्धीः । मा हिंसीः । किंतु त्वमाभर । पोषको भव । हे इंद्र ते त्वदीयं भूरि बह्वपि यद्धनं दाशुषे हविर्दत्तवते यजमानाय दातवे दातुं । प्रभवतीति शेषः । नोऽस्मभ्यं तद्धनमाहृत्य दद्धि । देहि । हे इंद्र त्वां स्तुवंतो वयम-

स्मिन्बुवते ऽस्मिन्निमित्तेऽवस्याऽस्मभ्यं ते त्वदर्थं नव्ये नूतने यज्ञे ब्रह्मणे देवे दातव्ये हविषि निमित्तभूते सति प्र ब्रवाम । प्रकर्षेण त्वां वदाम ॥

॥ अथैकादशी ॥

नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो॒३॑ न पीपेः ।

अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥

नु । स्तुतः । इंद्र । नु । गृणानः । इषं । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।

अकारि । ते । हरिऽवः । ब्रह्म । नव्यं । धिया । स्याम । रथ्यः । सदाऽसाः ॥११॥

पूर्वं व्याख्याता ॥

॥ इति तृतीयस्य षष्ठे चतुर्थो वर्गः ॥

आ यात्विंद्र इत्येकादशर्चमेकादशं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रं । आ यात्वित्यनुक्रांतं ॥ पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहन्येतन्निविद्धानीयं । सूचितं च । आ यात्विंद्रोऽवस इति मरुत्वतीयं । आ० ७.५. । इति ॥

॥ तत्र प्रथमा ॥

आ यात्विंद्रोऽवस उप न इह स्तुतः सधमादस्तु शूरः ।

वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥१॥

आ । यातु । इंद्रः । अवसे । उप । नः । इह । स्तुतः । सधऽमात् । अस्तु । शूरः ।

ववृधानः । तविषीः । यस्य । पूर्वीः । द्यौः । न । क्षत्रं । अभिऽभूति । पुष्यात् ॥१॥

स इंद्रो नोऽस्माकमवसे रक्षणायोपायातु । उपागच्छतु । य इंद्र इहास्मिन्यज्ञे स्तुतः । शूरो विक्रांतो ववृधानः प्रवृद्धोऽयमिंद्रः सधमादस्तु । अस्माभिः सह माद्यन् भवतु । यस्येंद्रस्य तविषीस्तविष्यो बलानि पूर्वीः पूर्व्यो बह्वीः संतीति शेषः । यश्चेंद्रो द्यौर्न द्योतमानः सूर्य इवाभिभूति परकीयं बलमभिभावुकं क्षत्रं स्वकीयं बलं तेजो वा पुष्यात् पुष्यतु । स इंद्र उपायात्विति पूर्वेण संबंधः ॥

॥ अथ द्वितीया ॥

तस्येदिह स्तवथ वृष्ण्यानि तुविद्युम्नस्य तुविराधसो नॄन् ।

यस्य क्रतुर्विदथ्यो॒३॑ न सम्राट् साह्वान्तरुत्रो अभ्यस्ति कृष्टीः ॥२॥

तस्य। इत्। इह। स्तवथ। वृष्ण्यानि। तुविऽद्युम्नस्य। तुविऽराधसः। नॄन्।
यस्य। क्रतुः। विदथ्यः। न। सम्ऽराट्। सह्वान्। तरुत्रः। अभि। अस्ति। कृष्टीः॥२॥

तुविद्युम्नस्य बहुकीर्तेस्तुविराधसो बहुधनस्य तस्येत्तस्येंद्रस्यैव वृष्ण्यानि बलभूतान्नॄन् नेतॄन्मरुतो हे स्तोतारो यूयमिहास्मिन्यज्ञे स्तवथ। स्तुत। साह्वान् शत्रूनभिभावुकस्तरुत्रोऽस्मानापद्भ्यस्तारको यस्येंद्रस्य क्रतुः कर्म कृष्टीः शत्रुसंबंधिनीः प्रजा अभ्यस्ति अभिभवति। तत्र दृष्टांतः। विदथ्यो न सम्राट्। विदथार्हो न यज्ञार्हः सम्राट् सकललोकानामधिपतिरिव तद्वत्। तस्य वृष्ण्यानीति पूर्वेण संबंधः॥

॥ अथ तृतीया ॥

आ यात्विंद्रो दिव आ पृथिव्या मक्षू समुद्रादुत वा पुरीषात्।
स्वर्णरादवसे नो मरुत्वान्परावतो वा सदनादृतस्य॥३॥

आ। यातु। इंद्रः। दिवः। आ। पृथिव्याः। मक्षु। समुद्रात्। उत। वा। पुरीषात्।
स्वःऽनरात्। अवसे। नः। मरुत्वान्। पराऽवतः। वा। सदनात्। ऋतस्य॥३॥

मरुत्वान्मरुद्भिः सहित इंद्रो नोऽस्माकमवसे रक्षणाय दिवः स्वर्गलोकादायातु। आगच्छतु। पृथिव्या भूलोकाच्च मक्षु शीघ्रमायातु। उत वा अथवा समुद्रादंतरिक्षलोकाच्चायातु। समुद्र इत्यंतरिक्षनाम सगरः समुद्रोऽध्वरमिति तन्नामसु पाठात्। अथवा पुरीषादुदकादायातु। पुरीषमित्युदकनाम मधु पुरीषं पिप्पलमिति तन्नामसु पाठात्। स्वर्णरात् स्वरादित्यो नरो नेता यस्य तस्माल्लोकाच्चायातु। परावतो वा दूराच्चायातु। ऋतस्योदकस्य सदनात्स्थानान्मेघलोकाच्चायातु॥

॥ अथ चतुर्थी ॥

स्थूरस्य रायो बृहतो य ईशे तमु ष्टवाम विदथेष्विंद्रं।
यो वायुना जयति गोमतीषु प्र धृष्णुया नयति वस्यो अच्छ॥४॥

स्थूरस्य। रायः। बृहतः। यः। ईशे। तं। ऊं इति। स्तवाम। विदथेषु। इंद्रं।
यः। वायुना। जयति। गोऽमतीषु। प्र। धृष्णुऽया। नयति। वस्यः। अच्छ॥४॥

य इंद्रः स्थूरस्य स्थूलस्य बृहतो महतो रायो धनस्येशे ईष्टे विदथेषु यज्ञेषु। विदथ इति यज्ञनामैतत्। तमिंद्रमु तमिंद्रमेव वयं स्तोतारः स्तवाम। य इंद्रो

[illegible] बलेन गोमतानु [illegible] [illegible] [illegible]
[illegible] इंद्रः [illegible] वसीयः [illegible] [illegible]
प्रापयति । तमेवेंद्रं स्तवामेति पूर्वेण संबंधः ॥

॥ अथ पंचमी ॥

उप यो नमो नमसि स्तभायन्निर्यर्ति वाचं जनयन्यजध्यै ।
ऋंजसानः पुरुवार उक्थैरेंद्रं कृण्वीत सदनेषु होता ॥ ५ ॥

उप । यः । नमः । नमसि । स्तभायन् । इयर्ति । वाचं । जनयन् । यजध्यै ।
ऋंजसानः । पुरुऽवारः । उक्थैः । आ । इंद्रं । कृण्वीत । सदनेषु । होता ॥ ५ ॥

उपस्तभायन् लोकानुपस्तंभयन् यजध्यै यष्टुं वाचं गर्जितलक्षणां वाचं जनयन् प्रजनयन् ऋंजसानः प्रसाध्यमानः । ऋंजतिः प्रसाधनकर्मेति यास्कः । उक्थैः शस्त्रलक्षणैः स्तोत्रैः पुरुवारो बहुभिः संभजनीयो य इंद्रो नमसि । नम इत्यन्ननामैतत् । यजमानैर्दत्ते हविषि नमो यजमानेभ्यो यज्ञादिसाधनमन्नमियर्ति प्रेरयति । इंद्रो हविषा तृप्तः सन् वृष्टिद्वारान्नं प्रयच्छति तेन चान्नेन पुनर्यज्ञः प्रजायत इत्यर्थः । अस्मदीयो होता सदनेषु यज्ञगृहेषु तमिंद्रमाकृण्वीत । अभिमुखीकरोतु ॥

॥ इति तृतीयस्य षष्ठे पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

धिषा यदि धिषण्यंतः सरण्यान्त्सदंतो अद्रिमौशिजस्य गोहे ।
आ दुरोषाः पास्त्यस्य होता यो नो महान्त्संवरणेषु वह्निः ॥ ६ ॥

धिषा । यदि । धिषण्यंतः । सरण्यान् । सदंतः । अद्रिं । औशिजस्य । गोहे ।
आ । दुरोषाः । पास्त्यस्य । होता । यः । नः । महान् । संऽवरणेषु । वह्निः ॥ ६ ॥

धिषण्यंतो धिषणामिंद्रविषयां स्तुतिमिच्छंत औशिजस्य । उशिजः कामयमाना ऋत्विजः । तेषां संबंध्यौशिजो यजमानः । तस्य गोहे गृहे सदंतो निषीदंतो जना अद्रिं । आदृणाति शत्रूनित्यद्रिरिंद्रः । तमिंद्रं धिषा स्तुत्वा यदि यदा सरण्यान् उपागच्छेयुः । तदा स इंद्र आयातु । नोऽस्माकं संवरणेषु शत्रुसंबंधिषु

[illegible] दुरोणा
[illegible] ॥

॥ अथ सप्तमी ॥

सचा यदीं भार्वेरस्य वृष्णः सिर्षक्ति शुष्मः स्तुवते भराय ।
गुहा यदीमौशिजस्य गोहे प्र यद्धिये प्रायसे मदाय ॥ ७ ॥

सचा । यत् । ईं । भार्वेरस्य । वृष्णः । सिर्सक्ति । शुष्मः । स्तुवते । भराय ।
गुहा । यत् । ईं । औशिजस्य । गोहें । प्र । यत् । धिये । प्र । अयसे । मदाय ॥ ७ ॥

भार्वेरस्य । भर्वेरो जगद्भर्ता प्रजापतिः । तस्य पुत्रो भार्वेरः । तस्य वृष्णः कामानां वर्षितुरिंद्रस्य संबंधी ईमेष शुष्मो बलं स्तुवते स्तोत्रं कुर्वंतं यजमानं सिषक्ति सेवत इति यत्तत्सचा सत्यमेव । ईमेतद्बलमौशिजस्य यजमानस्य भराय भर्तुं गुहा गुहायां गुहारूपे हृदये प्रभवतीति यत्तत्सत्यं । यजमानस्य गोहे गृहे धिये कर्मणे प्रभवतीति यत्तत्सत्यं । अयसे गमनाय कामानां प्राप्तये मदाय हर्षाय तत्र यद्बलं प्रभवति तत्सत्यं । इंद्रस्य बलं यजमानं सर्वदा पालयतीत्यर्थः ॥

॥ अथाष्टमी ॥

वि यद्वरांसि पर्वतस्य वृण्वे पयोभिर्जिन्वे अपां जवांसि ।
विदद्गौरस्य गवयस्य गोहे यदी वाजाय सुध्यो३ वहंति ॥ ८ ॥

वि । यत् । वरांसि । पर्वतस्य । वृण्वे । पयःऽभिः । जिन्वे । अपां । जवांसि ।
विदत् । गौरस्य । गवयस्य । गोहें । यदि । वाजाय । सुऽध्यः । वहंति ॥ ८ ॥

इंद्रः पर्वतस्य मेघस्य वरांसि द्वाराणि विवृण्वे विवृतानि कृतवानिति यत् । अपामुदकानां जवांसि वेगान्पयोभिर्जलैर्जिन्वे प्रीणयतीति यत् । यदि यदा सुध्यः शोभनकर्माणो यजमाना वाजायान्नाय वहंति इंद्रं प्राप्नुवंति तदा गोहे गृहे गौरस्य गौरमृगस्य गवयस्य गवयमृगस्य च विदत् तौ द्वौ प्रभू लभत इति यत् । तत्सर्वं सचेति पूर्वेण संबंधः ॥

अभ्युदयेष्टाविंद्रस्य प्रदातुर्भद्रा ते हस्तेति याज्या । सूत्रितं च । दीर्घस्ते अस्त्वंकुशो भद्रा ते हस्ता सुकृतोत पाणी । आ० ३. १३. । इति ॥

॥ सैषा सूक्ते नवमी ॥

भद्रा ते हस्ता सुकृतोत पाणी प्रयंतारा स्तुवते राध इंद्र ।
का ते निषत्तिः किमु नो ममत्सि किं नोदुदु हर्षसे दातवा उ ॥९॥
भद्रा । ते । हस्ता । सुऽकृता । उत । पाणी इति । प्रऽयंतारा । स्तुवते । राधः । इंद्र ।
का । ते । निऽसत्तिः । किं । ऊं इति । नो इति । ममत्सि । किं । न । उत्ऽउत् ।
ऊं इति । हर्षसे । दातवै । ऊं इति ॥९॥

हे इंद्र ते त्वदीयौ भद्रा भद्रौ कल्याणौ हस्ता हस्तौ सुकृता सुकृतौ शोभनकर्माणौ भवतः । उतापि च पाणी त्वदीयौ हस्तौ स्तुवते स्तोत्रे यजमानाय राधो धनं प्रयंतारा प्रयंतारौ प्रदातारौ भवतः । हे इंद्र ते त्वदीया निषत्तिर्निसदनं स्थितिः का । त्वमस्मान् किमु किमर्थं नो ममत्सि । न मादयसि । किमुदुदु किमर्थमेव दातवा अस्माकं धनं दातुं न हर्षसे । हृष्टो न भवसि ॥

इंद्रस्य वार्चघ्नस्य पशावेवा वस्व इति हविषो याज्या । सूचितं च । एवा वस्व इंद्रः सत्यः सम्राड्ढ्वाग्वदंत्यविचेतनानि । आ० ३.१३. । इति ॥

॥ सैषा सूक्ते दशमी ॥

एवा वस्व इंद्रः सत्यः सम्राड्ढंता वृत्रं वरिवः पूरवे कः ।
पुरुष्टुत क्रत्वा नः शग्धि रायो भक्षीय तेऽवसो दैव्यस्य ॥१०॥
एव । वस्वः । इंद्रः । सत्यः । संऽराट् । हंता । वृत्रं । वरिवः । पूरवे । करिति कः ।
पुरुऽस्तुत । क्रत्वा । नः । शग्धि । रायः । भक्षीय । ते । अवसः । दैव्यस्य ॥१०॥

एवैवमुक्तप्रकारेण स्तूयमानः सत्यः सत्यवान्वस्वो धनस्य सम्राडीश्वरो वृत्रं वृत्रनामानमसुरं हंता हिंसितेंद्रः पूरवे मनुष्याय यजमानाय वरिवो धनं कः । करोति । ददातीत्यर्थः । क्रत्वा कर्मणा स्तुतिहेतुना हे पुरुष्टुत बहुभिर्यजमानैः स्तुतेंद्र त्वं नोऽस्मभ्यं रायो धनानि शग्धि । देहि । ते त्वया दीयमानस्य दैव्यस्य देवसंबंधिनोऽवसोऽन्नस्य । कर्मणि षष्ठी । अन्नं भक्षीय । अहं भजेयं ॥

॥ अथैकादशी ॥

नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥

नु। स्तुतः। इंद्र। नु। गृणानः। इषं। जरित्रे। नद्यः। न। पीपेरिति पीपेः।
अकारि। ते। हरिऽवः। ब्रह्म। नव्यं। धिया। स्याम। रथ्यः। सदाऽसाः ॥११॥

पूर्वं व्याख्याता ॥

॥ इति तृतीयस्य षष्ठे षष्ठो वर्गः ॥

॥ इति चतुर्थे मंडले द्वितीयोऽनुवाकः ॥

तत्र तृतीयानुवाक एकादश सूक्तानि। तत्र यन्न इंद्र इत्येकादशर्चं प्रथमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रं। यन्न इत्यनुक्रमणिका॥ पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि माध्यंदिनसवने मैत्रावरुणशस्त्रे द्वितीयमिदं संपातसूक्तं। सूत्रितं च। एवा त्वामिंद्र यन्न इंद्रः। आ॰ ७.५.। इति ॥

॥ तत्र प्रथमा ॥

यन्न इंद्रो जुजुषे यच्च वष्टि तन्नो महान्करति शुष्म्या चित्।
ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति ॥१॥

यत्। नः। इंद्रः। जुजुषे। यत्। च। वष्टि। तत्। नः। महान्। करति। शुष्मी। आ। चित्।
ब्रह्म। स्तोमं। मघऽवा। सोमं। उक्था। यः। अश्मानं। शवसा। बिभ्रत्। एति ॥१॥

इंद्रो नोऽस्मदीयं यद्धविर्लक्षणान्नादिकं जुजुषे सेवते यद्धविरादिकं च वष्टि कामयते महान् प्रभूतः शुष्मी बलवानिंद्रः। चिदिति चार्थे। ब्रह्म चित् हविर्लक्षणपुरोडाशादिकमन्नं च स्तोमं स्तोत्रसमूहं च सोममभिषुतं सोमं चोक्थोक्थानि शस्त्राणि चेत्येवंभूतं तद्ब्रह्मादिचतुष्टयमाकरति। आकरोतु। स्वीकरोतु। मघवा धनवान्। अश्मशब्दो वज्रवाची। अश्मानं वज्रं बिभ्रत् धारयन् शवसा बलेन युक्तो य इंद्र एति आगच्छति। स इंद्रः स्वीकरोत्विति पूर्वेण संबंधः॥

॥ अथ द्वितीया ॥

वृषा वृषंधिं चतुरश्रिमस्यन्नुग्रो बाहुभ्यां नृतमः शचीवान्।
श्रिये परुष्णीमुषमाण ऊर्णां यस्याः पर्वाणि सख्याय विव्ये ॥२॥

वृषा। वृषंधिं। चतुःऽअश्रिं। अस्यन्। उग्रः। बाहुऽभ्यां। नृऽतमः। शचीऽवान्।
श्रिये। परुष्णीं। उषमाणः। ऊर्णां। यस्याः। पर्वाणि। सख्याय। विव्ये ॥२॥

वृषा कामानां वर्षिता वृषंधिं मेघभेदनद्वारेण वर्षं कुर्वंतं चतुरश्रिं चतसृभि-रश्रिभिर्धाराभिरुपेतं वज्रं बाहुभ्यामस्यन् शत्रुषु प्रक्षिपन् उग्र उद्गूर्णबलो नृतमः नेतृतमः शचीवान् कर्मवानिंद्र ऊर्णामाच्छादिकां परुष्णीं पर्ववतीं नदीं श्रिय आश्रयणार्थमुषमाणः सेवमानो भवति । यस्या नद्याः पर्वाणि भिन्नान्देशान् सख्याय सखिकर्मणे विव्ये संवृतवान् ।

॥ अथ तृतीया ॥

यो दे॒वो दे॒वत॑मो॒ जाय॑मानो म॒हो वाजे॑भिर्म॒हद्भि॑श्च॒ शुष्मैः॑ ।
दधा॑नो॒ वज्रं॑ बा॒ह्वोरु॒शन्तं॒ द्याममे॑न रेजय॒त्प्र भूम॑ ॥३॥
यः । दे॒वः । दे॒वऽत॑मः । जाय॑मानः । म॒हः । वाजे॑भिः । म॒हत्ऽभिः॑ । च॒ । शुष्मैः॑ ।
दधा॑नः । वज्र॑म् । बा॒ह्वोः । उ॒शन्त॑म् । द्याम् । अमे॑न । रे॒ज॒य॒त् । प्र । भूम॑ ॥३॥

देवो दीप्यमानो देवतमो दातृतमो जायमान उत्पद्यमानो य इंद्रो महो महद्भिर्वाजेभिरन्नैर्महद्भिः शुष्मैर्बलैश्च । युक्तोऽभवदिति शेषः । स इंद्रो बाह्वोर्हस्तयोरुशंतं कामयमानं वज्रं दधानो धारयन् अमेन बलेन द्यां द्युलोकं च भूम भूलोकं च प्रैरेजयत् । प्रकंपयति स्म ॥

॥ अथ चतुर्थी ॥

विश्वा॒ रोधां॑सि प्र॒वत॑श्च पू॒र्वीर्द्यौर्ऋ॒ष्वाज्जनि॑मन्रेजत॒ क्षाः ।
आ मा॒तरा॒ भर॑ति शु॒ष्म्या गोर्नृ॒वत्परि॑ज्मन्नोनुवन्त॒ वाताः॑ ॥४॥
विश्वा॑ । रोधां॑सि । प्र॒ऽवतः॑ । च॒ । पू॒र्वीः । द्यौः । ऋ॒ष्वात् । जनि॑मन् । रे॒ज॒त॒ । क्षाः ।
आ । मा॒तरा॑ । भर॑ति । शु॒ष्मी । आ । गोः । नृ॒ऽवत् । परि॑ऽज्मन् । नो॒नु॒व॒न्त॒ । वाताः॑ ॥४॥

विश्वा विश्वानि रोधांसि । रोधःशब्देनोन्नतप्रदेशा उच्यंते । उन्नतप्रदेशाः पर्वताश्च पूर्वीः पूर्व्यो बहूनि प्रवतः प्रवणानि । समुद्राश्चेत्यर्थः । द्यौर्द्युलोकश्च क्षाः पृथिवी च जनिमन्निंद्रस्य जन्मनि सत्यृष्वान्महतोऽस्मादिंद्राद्रेजत । अरेजंत । अकंपंत । किंच शुष्मी बलवानिंद्रो गोर्गंतुः सूर्यस्य मातरा मातरौ मातापितृभूतौ द्यावापृथिव्यौ च । आ इति चार्थे । आभरति । आ समंताद्बिभर्ति । नृवन्मनुष्या इव वाता इंद्रेण प्रेरिता वायवश्च परिज्मन्नंतरिक्षे नोनुवंत । शब्दायंते ॥

॥ अथ पंचमी ॥

ता तू त इंद्र महतो महानि विश्वेष्वित्सवनेषु प्रवाच्या।
यच्छूर धृष्णो धृषता दधृष्वानहिं वज्रेण शवसाविवेषीः ॥५॥

ता। तु। ते। इंद्र। महतः। महानि। विश्वेषु। इत्। सवनेषु। प्रऽवाच्या।
यत्। शूर। धृष्णो इति। धृषता। दधृष्वान्। अहिं। वज्रेण। शवसा। अविवेषीः ॥५॥

हे इंद्र महतः प्रभूतस्य ते त्वदीयानि ता तानि कर्माणि तु क्षिप्रं महानि महांति भवंति। विश्वेष्वित्सर्वेष्वेव सवनेषु प्रातःसवनादिकर्मसु त्वदीयानि कर्माणि प्रवाच्या प्रवाच्यानि स्तोतृभिः प्रकर्षेण वक्तुं योग्यानि स्तुत्यानीति यत्। हे धृष्णो प्रगल्भ हे शूर विक्रांतेंद्र दधृष्वान्पालकत्वेन लोकान्धारयन् शवसा बलेन युक्तस्त्वं धृषता धर्षकेण वज्रेणाहिं वृषमसुरमविवेषीः अवधीरिति यत्। एतदादीनि कर्माणि महांतीति पूर्वेण संबंधः। अत्राविवेषीरिति वधकर्मा ॥

॥ इति तृतीयस्य षष्ठे सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

ता तू ते सत्या तुविनृम्ण विश्वा प्र धेनवः सिस्रते वृष्ण ऊध्नः।
अधा ह त्वद्वृषमणो भियानाः प्र सिंधवो जवसा चक्रमंत ॥६॥

ता। तु। ते। सत्या। तुविऽनृम्ण। विश्वा। प्र। धेनवः। सिस्रते। वृष्णः। ऊध्नः।
अध। ह। त्वत्। वृषऽमनः। भियानाः। प्र। सिंधवः। जवसा। चक्रमंत ॥६॥

हे तुविनृम्णाधिकबलेंद्र ते त्वदीयानि विश्वा विश्वानि ता तानि कर्माणि तु क्षिप्रं सत्या सत्यानि भवंति। हे इंद्र वृष्णः कामानां वर्षितुस्त्वत्तो भयाद्धेनवो गाव ऊध्नः स्वकीयादापीनात्प्र सिस्रते। प्रकर्षेण क्षीरं क्षरंति। अधापि च हे वृषमनः कामानां वर्षणपरमनस्केंद्र सिंधवो नद्यस्त्वत्त्वत्तो भियाना बिभ्यत्यः सत्यो जवसा वेगेन प्र चक्रमंत ह। प्रकर्षेण गच्छंति खलु ॥

॥ अथ सप्तमी ॥

अत्राह ते हरिवस्ता उ देवीरवोभिरिंद्र स्तवंत स्वसारः।
यत्सीमनु प्र मुचो बद्बधाना दीर्घामनु प्रसितिं स्यंदयध्यै ॥७॥

अर्ध । अह । ते । हरिऽवः । ताः । ऊं इति । देवीः । अवःऽभिः । इंद्र । स्तवंत । स्वसारः ।
यत् । सीं । अनु । प्र । मुचः । बद्बधानाः । दीर्घां । अनु । प्रऽसितिं । स्यंदयध्यै ॥ ७ ॥

हे इंद्र त्वं यद्यदा बद्बधाना वृत्रेण बध्यमानाः सीमनु एना नदीरुद्दिश्य दीर्घामत्यधिकां प्रसितिं बंधनमनु स्यंदयध्यै यथाकामं स्यंदितुं प्र मुचः प्रकर्षेणामोचयः हे हरिवो हरिवन्निंद्र अधाहाथैव मोचनवेलायां ता उ ताः प्रसिद्धा एव देवीर्देव्यो द्योतमानाः स्वसारो नद्यः । अत्र स्वसृशब्दो नदीवाची । अवोभिस्त्वत्कृतै रक्षणैस्ते त्वां स्तवंत । स्तावयंति । नदीपूरणादिभिः कर्मभिर्जना इंद्रं स्तुवंतीत्यर्थः ॥

॥ अथाष्टमी ॥

पिपीळे अंशुर्मद्यो न सिंधुरा त्वा शमी शशमानस्य शक्तिः ।
अस्मद्र्यक्शुशुचानस्य यम्या आशुर्न रश्मिं तुव्योजसं गोः ॥ ८ ॥
पिपीळे । अंशुः । मद्यः । न । सिंधुः । आ । त्वा । शमी । शशमानस्य । शक्तिः ।
अस्मद्र्यक् । शुशुचानस्य । यम्याः । आशुः । न । रश्मिं । तुविऽओजसं । गोः ॥ ८ ॥

हे इंद्र मद्यो मादयितांशुः सोमः पिपीळे । अपीड्यत । अभ्यसूयतेत्यर्थः । नेति संप्रत्यर्थे । न इदानीं सिंधुः स्यंदमानः सोमस्त्वा त्वामायम्याः । आयच्छतु । शुशुचानस्य दीप्यमानस्य शशमानस्य स्तुवतः संबंध्यस्मद्र्यगस्मदभिमुखं शमी शमनं शक्तिः स्तुतिकर्म चायच्छतु । तत्र दृष्टांतः । आशुः शीघ्रगामी यंता गोर्गंतुरश्वस्य तुव्योजसं बहुबलं । दृढमित्यर्थः । रश्मिं न अश्वबंधनरज्जुमिव तद्वत् ॥

॥ अथ नवमी ॥

अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि सत्रा सहुरे सहांसि ।
अस्मभ्यं वृत्रा सुहनानि रंधि जहि वधर्वनुषो मर्त्यस्य ॥ ९ ॥
अस्मे इति । वर्षिष्ठा । कृणुहि । ज्येष्ठा । नृम्णानि । सत्रा । सहुरे । सहांसि ।
अस्मभ्यं । वृत्रा । सुऽहनानि । रंधि । जहि । वधः । वनुषः । मर्त्यस्य ॥ ९ ॥

हे सहुरे सहनशीलेंद्र त्वं सत्रा सर्वदा सहांसि शत्रूनभिभावुकानि वर्षिष्ठा वर्षिष्ठानि प्रवृद्धानि ज्येष्ठा ज्येष्ठानि प्रशस्तानि नृम्णानि बलान्यस्मे अस्मभ्यं

कृणुहि । कुरु । हे इंद्र त्वमस्मभ्यं सुहनानि शोभनवधानि वृत्रा वृत्राणि शत्रून् रंधि । रंधय । वशं नय । किंच वनुषो हिंसकस्य मर्त्यस्य मरणधर्मणः शत्रोः संबंधि वधो हननसाधनमायुधं जहि । नाशय ॥

॥ अथ दशमी ॥

अस्माकमित्सु शृणुहि त्वमिंद्रास्मभ्यं चित्राँ उप माहि वाजान् ।
अस्मभ्यं विश्वा इषणः पुरंधीरस्माकं सु मघवन्बोधि गोदाः ॥ १० ॥

अस्माकं । इत् । सु । शृणुहि । त्वं । इंद्र । अस्मभ्यं । चित्रान् । उप । माहि । वाजान् ।
अस्मभ्यं । विश्वाः । इषणः । पुरंऽधीः । अस्माकं । सु । मघऽवन् । बोधि । गोऽदाः ॥ १० ॥

हे इंद्र त्वमस्माकमित् अस्मदीया एव स्तुतीः सु सुष्ठु शृणुहि । तथा हे इंद्र त्वं चित्रान् चायनीयानि वाजानन्नान्यस्मभ्यमुपमाहि । देहि । किंच अस्मभ्यं विश्वाः सर्वाः पुरंधीर्बुद्धीरिषणः । प्रेरय । अपि च हे मघवन्धनवन्निंद्र अस्माकं गोदा गवां दाता सु सुष्ठु बोधि । भव ॥

॥ अथैकादशी ॥

नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इंद्र । नु । गृणानः । इषं । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यं । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

पूर्वं व्याख्याता ॥

॥ इति तृतीयस्य षष्ठेऽष्टमो वर्गः ॥

कथा महामित्येकादशर्चं द्वितीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रं । ऋतस्य हीत्याद्यास्तिस्र ऋतदेवताका वा । तथा चानुक्रांतं । कथोपांत्यास्तिस्र ऋतदेव्यो वेति ॥ आभिप्लविकेऽहनि दशरात्रे प्रथमेऽहनि माध्यंदिनसवने मैत्रावरुणशस्त्रेऽहीनसूक्तस्य स्थान इदं तृतीयं संपातसूक्तं । सूत्रितं च । कथा महामिंद्रः पूर्भिद्य एक इत् । आ० ७.५. । इति ॥ महाव्रते निष्केवल्य एतत् । तथैव पंचमारण्यके शौनकेन सूत्रितं च । कथा महामवृधत्कस्य होतुरिति संपातः । ऐ० आ० ५.८. । इति ॥

॥ तत्र प्रथमा ॥

कथा महामवृधत्कस्य होतुर्यज्ञं जुषाणो अभि सोममूधः ।
पिबन्नुशानो जुषमाणो अंधो ववक्ष ऋष्वः शुचते धनाय ॥१॥

कथा । महां । अवृधत् । कस्य । होतुः । यज्ञं । जुषाणः । अभि । सोमं । ऊधः ।
पिबन् । उशानः । जुषमाणः । अंधः । ववक्षे । ऋष्वः । शुचते । धनाय ॥१॥

महां महांतं गुणैः प्रवृद्धमिंद्रं कथा कथं केन प्रकारेणावृधत् । वर्धयेत् । अस्मत्प्रेरिता स्तुतिरिति शेषः । तस्य महिम्नोऽतिमहत्त्वादिति भावः । स एवेंद्रो होतुर्होमनिष्पादकस्य कस्य यजमानस्य यज्ञं यागं जुषाणः प्रीयमाणः सन् ऊध अभि । अभिगच्छेदिति शेषः । उपसर्गश्रुतेरुचितक्रियाध्याहारः । किंच ऊध उद्धतमतिप्रवृद्धं सोममंधः सोमलक्षणमन्नं पिबन्नास्वादयन् उशानस्तदेवान्नं कामयमानो जुषमाणः सेवमानश्च ऋष्वो महानिंद्रः शुचते प्रदीप्ताय धनाय पीत-मेवान्नं जठरे धारयति । अनेन वाक्यद्वयेनेंद्रस्याचिंत्यचरितत्वं ख्यापितं भवति ॥ हिरण्यादिलक्षणाय । उक्तलक्षणं धनं कस्मै यजमानाय दातुं ववक्षे । वहति ।

॥ अथ द्वितीया ॥

को अस्य वीरः सधमादमाप समानंश सुमतिभिः को अस्य ।
कदस्य चित्रं चिकिते कदूती वृधे भुवच्छशमानस्य यज्योः ॥२॥

कः । अस्य । वीरः । सधऽमादं । आप । सं । आनंश । सुमतिऽभिः । कः । अस्य ।
कत् । अस्य । चित्रं । चिकिते । कत् । ऊती । वृधे । भुवत् । शशमानस्य । यज्योः ॥२॥

अस्येंद्रस्य संबंधिनं सधमादं । सह माद्यंतीति सधमादः संग्रामः । तं । सह सोमपानं वा वीरः स्तोत्राणाममित्राणां वा वीरयिता कः पुमानाप । प्राप्नोति । कश्चास्येंद्रस्य सुमतिभिः शोभनाभिरनुग्रहबुद्धिभिः समानंश । संगच्छते । कत्कदा वास्येंद्रस्य चित्रं चायनीयं धनं चिकिते । प्रज्ञायते । तत्प्रदानसमर्थं न कोऽपि जानातीत्यर्थः । कत्कदा वा शशमानस्य स्तुवतो यज्योर्यष्टुर्यजमानस्य वृधे वर्धना-योती ऊत्या रक्षया भुवत् । भवेत् ॥

॥ अथ तृतीया ॥

कथा शृणोति हूयमानमिंद्रः कथा शृण्वन्नवसामस्य वेद ।
का अस्य पूर्वीरुपमातयो ह कथैनमाहुः पपुरिं जरित्रे ॥३॥

कथा । शृणोति । हूयमानं । इंद्रः । कथा । शृण्वन् । अवसां । अस्य । वेद ।
काः । अस्य । पूर्वीः । उपऽमातयः । ह । कथा । एनं । आहुः । पपुरिं । जरित्रे ॥३॥

इंद्रः परमैश्वर्ययुक्तो हूयमानमाह्वयंतं स्तोतारं कथा कथं शृणोति । स्तोत्राणि शृण्वन्नस्य स्तोतुः संबंधीन्यवसां रक्षणानि कथा कथं च वेद । वेत्ति । पूर्वीः पुरातनान्यस्येंद्रस्य संबंधीन्युपमातयो दानानि का ह । कानि संतीति शेषः । तानि दानानि जरित्रे स्तोतुः संबंधिनां कामानां पपुरिं पूरयितारमेनमिंद्रं कथा कथं चाहुः । वदंति ॥

॥ अथ चतुर्थी ॥

कथा सबाधः शशमानो अस्य नशदभि द्रविणं दीध्यानः ।
देवो भुवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत् ॥४॥

कथा । सऽबाधः । शशमानः । अस्य । नशत् । अभि । द्रविणं । दीध्यानः ।
देवः । भुवत् । नवेदाः । मे । ऋतानां । नमः । जगृभ्वान् । अभि । यत् । जुजोषत् ॥४॥

सबाधः सपत्नानां पीडासहितः शशमान इंद्रविषयां स्तुतिं कुर्वन् दीध्यानः कर्मभिर्दीप्यमानो यजमानोऽस्येंद्रस्य संबंधि द्रविणं पश्वादिधनं कथा कथमभिनशत् । अभिप्राप्नोति । नमो हविर्लक्षणमन्नं जगृभ्वान् गृहीतवानिंद्रो यद्यदाभिजुजोषत् मामभिसेवेत तदा देवो दीप्यमान इंद्रो मे मदीयानामृतानां स्तोत्राणां नवेदा अतिशयेन ज्ञाता भुवत् । भवेत् । अत्र निपातस्थो नकारोऽतिशयवाची ॥

॥ अथ पंचमी ॥

कथा कदस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं जुजोष ।
कथा कदस्य सख्यं सखिभ्यो ये अस्मिन्कामं सुयुजं ततस्रे ॥५॥

कथा । कत् । अस्याः । उषसः । विऽउष्टौ । देवः । मर्तस्य । सख्यं । जुजोष ।
कथा । कत् । अस्य । सख्यं । सखिऽभ्यः । ये । अस्मिन् । कामं । सुऽयुजं । ततस्रे ॥५॥

देवो द्योतमान इंद्रोऽस्यां उषसो व्युष्टौ प्रभाते मर्तस्य मर्त्यस्य मनुष्यस्य स्तोतुः संबंधि सख्यं सखिकर्म कथा कथं केन प्रकारेण कत्कदा जुजोष। सेवेत। ये स्तोतारोऽस्मिन्निंद्रे सुयुजं सुष्ठु प्रयुज्यमानं कामं कामनीयं हविः स्तोत्रं च ततस्ते वितेनिरे अस्येंद्रस्य सख्यं सखिकर्म सखिभ्यः स्तोतृभ्यः कथा कथं कत्कदाचित्। भवेदिति शेषः ॥

॥ इति तृतीयस्य षष्ठे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

किमादमंत्रं सख्यं सखिभ्यः कदा नु ते भ्रात्रं प्र ब्रवाम।
श्रिये सुदृशो वपुरस्य सर्गाः स्व१र्ण चित्रतममिष आ गोः ॥६॥
किं। आत्। अमत्रं। सख्यं। सखिऽभ्यः। कदा। नु। ते। भ्रात्रं। प्र। ब्रवाम।
श्रिये। सुऽदृशः। वपुः। अस्य। सर्गाः। स्वः। न। चित्रऽतमं। इषे। आ। गोः ॥६॥

हे इंद्र वयं यजमानास्ते त्वदीयममत्रं शत्रूनभिभावुकं सख्यं सखिकर्म सखिभ्यः स्तोतृभ्यः किमात् किं स्वित् प्र ब्रवाम। प्रकर्षेण वदेम। ते त्वदीयं भ्रात्रं भ्रातृकर्म च कदा नु कदा खलु प्र ब्रवाम। सुदृशः शोभनदर्शनस्यास्येंद्रस्य संबंधिनः सर्गा उद्योगाः श्रिये सर्वेषां स्तोतॄणां श्रेयसे। भवंतीति शेषः। स्वर्ण सूर्यो यथा दर्शनीयतमस्तथा गोर्गंतुरिंद्रस्य चित्रतमं दर्शनीयतमं वपुः शरीरमेषे। आ समंतात्सर्वैरिष्यते ॥

॥ अथ सप्तमी ॥

द्रुहं जिघांसन्ध्वरसमनिंद्रां तेतिक्ते तिग्मा तुजसे अनीका।
ऋणा चिद्यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे ॥७॥
द्रुहं। जिघांसन्। ध्वरसं। अनिंद्रां। तेतिक्ते। तिग्मा। तुजसे। अनीका।
ऋणा। चित्। यत्र। ऋणऽयाः। नः। उग्रः। दूरे। अज्ञाताः। उषसः। बबाधे ॥७॥

अयमिंद्रो द्रुहं द्रोहं कुर्वंतीं ध्वरसं हिंसिकामनिंद्रामिंद्रमजानतीं राक्षसीं जिघांसन् हंतुमिच्छन् तिग्मा तिग्मानि पूर्वमेव तीक्ष्णान्यनीकानीकान्यायुधानि तुजसे तद्वधाय तेतिक्ते। अत्यर्थं तीक्ष्णीकरोति। यत्र यासूषःसु तदुपलक्षितेष्वहःस्वृणा चित् ऋणान्यपि नोऽस्मान्बाधंत इति शेषः। ता उषसश्चोग्र

उकूर्धवल ऋणया ऋणस्य हंतेंद्रः । यातिर्बधकर्मा । दूरेऽज्ञाता अननुभूताः सतीर्बबाधे । अपीडयत् ॥

ऋतपेयनाम्न्येकाहे मरुत्वतीयनिष्केवल्यशस्त्रयोर्निविद्धानात्पुरस्तादृतस्य ही- त्येतदादिके द्वे ऋचौ क्रमेण शंसनीये । सूचितं च । ऋतस्य हि शुरुधः संति पूर्वीरिति सूक्तमुखीये । आ॰ ९.७. । इति ॥

॥ सैषा सूक्तेऽष्टमी ॥

ऋतस्य हि शुरुधः संति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हंति ।
ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः ॥ ८ ॥

ऋतस्य । हि । शुरुधः । संति । पूर्वीः । ऋतस्य । धीतिः । वृजिनानि । हंति ।
ऋतस्य । श्लोकः । बधिरा । ततर्द । कर्णा । बुधानः । शुचमानः । आयोः ॥ ८ ॥

अत्र ऋतशब्देनेंद्रो वादित्यो वा सत्यं वा यज्ञो वोच्यते ॥ ऋतस्य ऋतदेवस्य संबंधिन्यः पूर्वीर्बह्व्यः शुरुध आपः संति हि । भवंति खलु । ऋतस्य ऋतदेवस्य संबंधिनी धीतिः प्रज्ञा तद्विषया स्तुतिर्वा वृजिनानि वर्जनीयानि पापानि हंति । हिनस्ति । ऋतस्य ऋतदेवस्य श्लोकः स्तुतिरूपा वागायोर्गंतुर्मनुष्यस्य संबंधिनौ बधिरा बधिरौ कर्णा कर्णौ ततर्द । तृणत्ति । कीदृशः श्लोकः । बुधानो बुध्यमानः शुचमानो दीप्यमानः ॥

॥ अथ नवमी ॥

ऋतस्य दृळ्हा धरुणानि संति पुरूणि चंद्रा वपुषे वपूंषि ।
ऋतेन दीर्घमिषणंत पृक्ष ऋतेन गाव ऋतमा विवेशुः ॥ ९ ॥

ऋतस्य । दृळ्हा । धरुणानि । संति । पुरूणि । चंद्रा । वपुषे । वपूंषि ।
ऋतेन । दीर्घं । इषणंत । पृक्षः । ऋतेन । गावः । ऋतं । आ । विवेशुः ॥ ९ ॥

वपुषे वपुष्मतः । षष्ठ्यर्थे चतुर्थी । ऋतस्य ऋतदेवस्य संबंधीनि दृळ्हा दृढानि धरुणानि धारकाणि पुरूणि बहूनि चंद्रा चंद्राण्याह्लादकानि वपूंषि रूपाणि संति । भवंति । ऋतेन ऋतदेवेन दीर्घमत्यधिकं पृक्षोऽन्नमिषणंत । स्तोतार इच्छंति । ऋतेन ऋतदेवेन गावो धेनव ऋतं यज्ञं दक्षिणात्वेनाविवेशुः । प्रविशंति । यद्वा गावो रश्मय ऋतमुदकमाविवेशुः ॥

॥ अथ दशमी ॥

ऋतं येमान ऋतमिद्वनोत्यृतस्य शुष्मस्तुरया उ गव्युः ।
ऋताय पृथ्वी बहुले गभीरे ऋताय धेनू परमे दुहाते ॥ १० ॥

ऋतं । येमानः । ऋतं । इत् । वनोति । ऋतस्य । शुष्मः । तुरऽया । ऊं इति । गव्युः ।
ऋताय । पृथ्वी इति । बहुले इति । गभीरे इति । ऋताय । धेनू इति । परमे इति ।
दुहाते इति ॥ १० ॥

ऋतमृतदेवं येमानो नियच्छन् स्तुतिभिर्वशीकुर्वन् स्तोता ऋतमित् ऋतदेवमेव वनोति । संभजते । ऋतस्य ऋतदेवस्य संबंधि शुष्मो बलं तुरयास्तूर्णं गव्युः । उ इति चार्थे । जलकामश्च भवति । बहुले विस्तीर्णे गभीरे दुरवगाहे पृथ्वी द्यावापृथिव्यावृताय ऋतदेवाय भवतः । धेनू प्रीणयित्र्यौ परमे उत्कृष्टे द्यावापृथिव्यावृताय ऋतदेवायैव दुहाते । दोहनं कुर्वाते ॥

॥ अथैकादशी ॥

नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इंद्र । नु । गृणानः । इषं । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यं । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

पूर्वं व्याख्याता ॥

॥ इति तृतीयस्य षष्ठे दशमो वर्गः ॥

का सुष्टुतिरित्येकादशर्चं तृतीयं सूक्तं वामदेवस्यार्षमैंद्रं । दशम्यनुष्टुप् शिष्टास्त्रिष्टुभः । तथा चानुक्रमणिका । का सुष्टुतिरुपांत्यानुष्टुबिति । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

का सुष्टुतिः शवसः सूनुमिंद्रमर्वाचीनं राधस आ ववर्तत् ।
ददिर्हि वीरो गृणते वसूनि स गोपतिर्निष्षिधां नो जनासः ॥ १ ॥

का । सुऽस्तुतिः । शवसः । सूनुं । इंद्रं । अर्वाचीनं । राधसे । आ । ववर्तत् ।
ददिः । हि । वीरः । गृणते । वसूनि । सः । गोऽपतिः । निःऽसिधां । नः । जनासः ॥ १ ॥

का ईदृशी सुष्टुतिः शवसः सूनुं बलस्य पुत्रं। अतिबलिनमित्यर्थः। अर्वाचीनमस्मदभिमुखमिंद्रं परमैश्वर्ययुक्तं राधसे धनायास्मभ्यं धनं दातुमाववर्तत्। आवर्तयेत्। हे जनासो जना यजमाना वीरो विक्रांतो गोपतिः पश्वादिधनस्य पालकः स इंद्रो निःषिधां निःषेद्धॄणां शत्रूणां संबंधीनि वसूनि धनानि गृणते गृणद्भ्यः स्तोतृभ्यो नोऽस्मभ्यं ददिर्हि। दाता खलु भवति ॥

॥ अथ द्वितीया ॥

स वृत्रहत्ये हव्यः स ईड्यः स सुष्टुत इंद्रः सत्यराधाः।

स यामन्ना मघवा मर्त्याय ब्रह्मण्यते सुष्वये वरिवो धात् ॥२॥

सः। वृत्रऽहत्ये। हव्यः। सः। ईड्यः। सः। सुऽस्तुतः। इंद्रः। सत्यऽराधाः।

सः। यामन्। आ। मघऽवा। मर्त्याय। ब्रह्मण्यते। सुस्वये। वरिवः। धात् ॥२॥

स इंद्रो वृत्रहत्ये वृत्राणां शत्रूणां हत्ये हनने निमित्तभूते सति यामन्युद्धे हव्य आह्वातव्यो भवति। स इंद्र ईड्यः स्तुत्यो भवति। स इंद्रः सुष्टुतः सन् सत्यराधा यजमानेभ्यो दातुं सत्यधनो भवति। मघवा धनवान् स इंद्रो ब्रह्मण्यते स्तोत्रमिच्छते सुष्वये सोमं सुन्वते मर्त्याय मनुष्याय यजमानाय वरिवो धनं। वरिव इति धननामैतत्। आधात्। आ समंताद्ददाति ॥

॥ अथ तृतीया ॥

तमिन्नरो वि ह्वयंते समीके रिरिक्वांसस्तन्वः कृण्वत त्रां।

मिथो यत्त्यागमुभयासो अग्मन्नरस्तोकस्य तनयस्य सातौ ॥३॥

तं। इत्। नरः। वि। ह्वयंते। संऽईके। रिरिक्वांसः। तन्वः। कृण्वत। त्रां।

मिथः। यत्। त्यागं। उभयासः। अग्मन्। नरः। तोकस्य। तनयस्य। सातौ ॥३॥

नरो नेतारो मनुष्याः समीके युद्धे तमित्तमेवेंद्रं वि ह्वयंते। विविधमाह्वानं कुर्वते। तन्वः स्वकीयानि शरीराणि रिरिक्वांसस्तपसा रेचयंतो यजमानास्तमेवेंद्रं त्रां त्रातारं कृण्वत। कृण्वते। कुर्वते। यद्यदा मिथः परस्परं संगता उभयास उभये यजमानाः स्तोतारश्च त्यागं त्यागकर्तारं दातारमिंद्रमग्मन् उपगच्छंति तदा नर उभयविधमनुष्यास्तोकस्य पुत्रस्य तनयस्य पौत्रस्य च सातौ लाभे निमित्तभूते सति तमेवेंद्रं त्रातारं कुर्वंतीति संबंधः ॥

॥ अथ चतुर्थी ॥

ऋतूयंति क्षितयो योगं उग्राशुषाणासो मिथो अर्णसातौ ।
सं यद्विशोऽववृत्रंत युध्मा आदिन्नेम इंद्रयंते अभीके ॥४॥

ऋतुऽयंति । क्षितयः । योगे । उग्र । आशुषाणासः । मिथः । अर्णऽसातौ ।
सं । यत् । विशः । अववृत्रंत । युध्माः । आत् । इत् । नेमे । इंद्रयंते । अभीके ॥४॥

हे उग्रोद्गूर्णबलेंद्र आशुषाणासो व्याप्नुवंतः क्षितयो मनुष्याः । क्षितय इति मनुष्यनामैतत् । अर्णसातौ सस्यादिफलसिद्ध्यर्थमुदकलाभे निमित्ते सति मिथः परस्परं योगे संबंधे सति ऋतूयंति । ऋतूनि कर्माणीच्छंति । यद्यदा युध्मा योधयित्र्यो विशः प्रजा अभीके युद्धे । अभीक इति संग्रामनामैतत् । समववृत्रंत संवर्तंते परस्परं संगच्छंते आदित् तदानीमेव नेमे केचन भाग्यवंतो योधका इंद्रयंते । युद्ध इंद्रमिच्छंति ॥

॥ अथ पंचमी ॥

आदिद्ध नेम इंद्रियं यजंत आदित्पक्तिः पुरोळाशं रिरिच्यात् ।
आदित्सोमो वि पपृच्यादसुष्वीनादिज्जुजोष वृषभं यजध्यै ॥५॥

आत् । इत् । ह । नेमे । इंद्रियं । यजंते । आत् । इत् । पक्तिः । पुरोळाशं । रिरिच्यात् ।
आत् । इत् । सोमः । वि । पपृच्यात् । असुस्वीन् । आत् । इत् । जुजोष । वृषभं । यजध्यै ॥५॥

आदित्तदानीमेव युद्धकाले नेमेऽन्ये योधा इंद्रियं बलवंतमिंद्रं यजंते ह । पूजयंति खलु । कश्चिदादिदनंतरमेव पुरोळाशं पिष्टरूपं हविः पक्तिः पचन् रिरिच्यात् । इंद्राय दद्यात् । आदिदनंतरमेव सोमोऽभिषुतसोमो यजमानोऽसुष्वीननभिषुतसोमान्यजमानान्विपपृच्यात् । धनैः पृथक्कुर्यात् । आदिदनंतरमेव कश्चिद्वृषभं कामानां वर्षितारमिंद्रं यजध्यै यष्टुं जुजोष । सेवते ॥

॥ इति तृतीयस्य षष्ठ एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

कृणोत्यस्मै वरिवो य इत्थेंद्राय सोममुशते सुनोति ।
सध्रीचीनेन मनसाविवेनन्तमित्सखायं कृणुते समत्सु ॥६॥

कृणोति । अस्मै । वरिवः । यः । इत्था । इंद्राय । सोमं । उशते । सुनोति ।
सध्रीचीनेन । मनसा । अविंऽवेनन् । तं । इत् । सखायं । कृणुते । समत्ऽसु ॥ ६ ॥

यो यजमानः सोममुशते कामयमानायेत्थामुत्र स्वर्गलोके स्थितायेंद्राय सुनोति अभिषवं करोति इंद्रोऽप्यस्मै यजमानाय वरिवो धनं कृणोति । करोति । सध्रीचीनेन संगतेन मनसा प्रवणेन चित्तेनाविवेनं । वेनतिः कांतिकर्मा । विवेनो विगतेच्छः । तदन्योऽविवेनः । आत्मानं कामयमानं तमित्तमेव सुन्वंतं यजमानं सखायं मित्रं समत्सु संग्रामेष्विंद्रः कृणुते । करोति ॥

॥ अथ सप्तमी ॥

य इंद्राय सुनवत्सोममद्य पचात्पक्तीरुत भृज्जाति धानाः ।
प्रति मनायोरुचथानि हर्यन्तस्मिन्दधद्वृषणं शुष्ममिंद्रः ॥ ७ ॥

यः । इंद्राय । सुनवत् । सोमं । अद्य । पचात् । पक्तीः । उत । भृज्जाति । धानाः ।
प्रति । मनायोः । उचथानि । हर्यन् । तस्मिन् । दधत् । वृषणं । शुष्मं । इंद्रः ॥ ७ ॥

अद्यास्मिन्दिवसे यो यजमान इंद्राय परमैश्वर्ययुक्ताय देवाय सोमं सोमलक्षणमन्नं सुनवत् सुनुयात् अभिषवं कुर्यात् । तथा यः पक्तीः पक्तव्यांश्च पुरोडाशादीन्पचात् पचेत् पचनं कुर्यात् । उतापि च यो धाना भर्जनयोग्यान्यवान् । अत्र भृष्टयववाची धानाशब्दस्तद्योग्यं यवमात्रं लक्षयति । भृज्जाति भृज्जेत् भर्जनं कुर्यात् इंद्रो मनायोः स्तुतिमिच्छतो यजमानस्योचथानि स्तोत्राणि प्रतिहर्यन् प्रतिकामयमानः सन् तस्मिन्यजमाने वृषणं कामानां वर्षणसमर्थं शुष्मं बलं दधत् । धारयति ॥

॥ अथाष्टमी ॥

यदा समर्यं व्यचेदृघावा दीर्घं यदाजिमभ्यख्यदर्यः ।
अचिक्रदद्वृषणं पत्न्यच्छा दुरोण आ निशितं सोमसुद्भिः ॥ ८ ॥

यदा । सऽमर्यं । वि । अचेत् । ऋघावा । दीर्घं । यत् । आजिं । अभि । अख्यत् । अर्यः ।
अचिक्रदत् । वृषणं । पत्नी । अच्छ । दुरोणे । आ । निऽशितं । सोमसुत्ऽभिः ॥ ८ ॥

यदा ऋघावा शत्रूणां हिंसक इंद्रः समर्यं सह मर्तव्यं शत्रुं व्यचेत् व्यज्ञासीत् विशेषेण जानीयात् । यद्यदार्यः स्वामींद्रो दीर्घमत्यधिकमाजिं संग्राममभ्यख्यत्

अभिषवेत् तदा ह्यस्येंद्रस्य पत्नी दुरोणे यज्ञगृहे सोमसुद्भिः सोमवद्भिर्बहुभिर्नि-
र्मितं तीव्रीकृतं। सोमपानेनोत्साहवंतमित्यर्थः। वृषणं कामानां वर्षितारमिंद्र-
मच्छाभि आचिक्रदत्। आक्रंदति। आह्वयते ॥

॥ अथ नवमी ॥

भूयसा वस्नमचरत्कनीयोऽविक्रीतो अकानिषं पुनर्यन्।

स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहंति प्र वाणं ॥९॥

भूयसा। वस्नं। अचरत्। कनीयः। अविऽक्रीतः। अकानिषं। पुनः। यन्।

सः। भूयसा। कनीयः। न। अरिरेचीत्। दीनाः। दक्षाः। वि। दुहंति। प्र। वाणं ॥९॥

अत्र ऋग्द्वये संप्रदायविद्भिः पूर्वाचार्यैः केचित् श्लोकाः पठ्यंते। त एव लिख्यंते ॥ अल्पं यः परिगृह्णाति मूल्यं पण्येन भूयसा। स क्रेतारं पुनर्गच्छन् विक्रीतस्त्वयं मया॥ इति ब्रुवन्कामयते पुनर्मूल्यस्य पूरणं। स विक्रेता पुनर्मूल्यं भूयसा न प्रपूरयेत्॥ हीनं न लभते वस्नं यदा विक्रीतवान्पुरा। यथासमयमेव स्याद्वयोर्न पुनरन्यथा॥ अयं विक्रय एवेति समयश्चेत्कृतो भवेत्। अथ मूल्यार्थ-मेतत्स्याद्विचार्यैव तु निर्णयः॥ इत्येवं समयोऽकारि तदा मूल्यं प्रपूर्यते। तस्मा-दादौ मया कार्यः समयोऽचेति चिंतयन्॥ वामदेवो वशीकृत्य शक्रं स्तोत्रेण भूयसा। विक्रीणन् समयं चक्र इंद्रं क इममित्यृचि॥ अतश्च द्वृच एकार्थो भूयसा वस्नमित्ययमिति॥ अयमर्थः प्रतिपाद्यते। कश्चिद्भूयसा भूम्ना पण्येन द्रव्येण कनी-योऽल्पतरं वस्नं वसु मूल्यं धनमचरत्। प्राप्नोति। पुनर्यन् क्रेतारं पुनर्गच्छन् स विक्रेतायमर्थो ममाविक्रीत इति ब्रुवन्नकानिषं। मूल्यपूर्तिं कामयते॥ व्यत्ययेनोत्तमपुरुषः॥ स विक्रेता भूयसा धनेन कनीयोऽल्पतरं मूल्यं नारिरेचीत्। क्रेतुः सकाशान्न रिक्तीकरोति। न लभत इत्यर्थः। दीना असमर्था दक्षाः समर्थाश्च वाणं वचनं विप्रदुहंति। यथोक्तं क्रयकाले तथैव लभंते॥

॥ अथ दशमी ॥

क इमं दशभिर्ममेंद्रं क्रीणाति धेनुभिः।

यदा वृत्राणि जंघनदथैनं मे पुनर्ददत् ॥१०॥

कः। इमं। दशऽभिः। मम। इंद्रं। क्रीणाति। धेनुऽभिः।

यदा। वृत्राणि। जंघनत्। अथ। एनं। मे। पुनः। ददत् ॥१०॥

मम स्वकीयमिमं स्वभूतमिंद्रं धेनुभिः प्रीणयित्रीभिर्दशभिर्दशसंख्याकाभिः स्तुतिभिः कः क्रीणाति। क्रयं करोति। तदानीं हे क्रेतारो युष्माकं मध्य एवमपि समयः क्रियते। यदायमिंद्रो वृत्राणि तदीयान् शत्रून् जंघनत् हन्यात् अथानंतरमेवैनमिंद्रं मे मह्यं पुनर्ददत्। पुनर्दद्यात् ॥

॥ अथैकादशी ॥

नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः।

अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥

नु। स्तुतः। इंद्र। नु। गृणानः। इषं। जरित्रे। नद्यः। न। पीपेरिति पीपेः।

अकारि। ते। हरिऽवः। ब्रह्म। नव्यं। धिया। स्याम। रथ्यः। सदाऽसाः ॥११॥

पूर्वं व्याख्याता ॥

॥ इति तृतीयस्य षष्ठे द्वादशो वर्गः ॥

को अद्येत्यष्टर्चं चतुर्थं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। को अद्याष्टाविति॥ दशरात्रे चतुर्थेऽहनि माध्यंदिने सवने स्तोमवृद्धौ मैत्रावरुणशस्त्र आरंभणीयाया उपरिष्टादिदं सूक्तमावपनीयं च। सूचितं च। स्तोमे वर्धमाने को अद्य नर्यः। आ० ७.१२.। इति ॥

॥ तत्र प्रथमा ॥

को अद्य नर्यो देवकाम उशन्निंद्रस्य सख्यं जुजोष।

को वा महेऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे ॥१॥

कः। अद्य। नर्यः। देवऽकामः। उशन्। इंद्रस्य। सख्यं। जुजोष।

कः। वा। महे। अवसे। पार्याय। संऽइद्धे। अग्नौ। सुतऽसोमः। ईट्टे ॥१॥

अद्यास्मिन्दिवसे को नर्यो मनुष्यहितो देवकामो देवानिच्छन् उशन् कामयमान इंद्रस्य सख्यं सखित्वं जुजोष। सेवते। किंच सुतसोमोऽभिषुतसोमः को वा यजमानोऽग्नौ समिद्धे प्रज्वलिते सति महे महते प्रवृद्धाय पार्याय पारमर्हतेऽवसे तर्पणायेट्टे। इंद्रं स्तौति ॥

॥ अथ द्वितीया ॥

को नानाम वचसा सोम्याय मनायुर्वा भवति वस्त उस्राः ।
क इंद्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कवये क ऊती ॥२॥

कः । ननाम । वचसा । सोम्याय । मनायुः । वा । भवति । वस्ते । उस्राः ।
कः । इंद्रस्य । युज्यं । कः । सखिऽत्वं । कः । भ्रात्रं । वष्टि । कवये । कः । ऊती ॥२॥

को यजमानो वचसा वाग्रूपया स्तुत्या सोम्याय सोमार्हायेंद्राय ननाम । नमति । प्रह्वीभवति । को वेंद्राय मनायुर्भवति । स्तुतिकामोऽस्ति । क उस्रा इंद्रेण दत्ता गा वस्ते । आच्छादयति । धारयतीत्यर्थः । क इंद्रस्य युज्यं साहाय्यं वष्टि । इच्छति । कः सखित्वं कः भ्रात्रं भ्रातृभावं वष्टि । इच्छति । कवये क्रांतदर्शिन इंद्रायोती ऊतये तर्पणाय । को भवतीति शेषः ॥

॥ अथ तृतीया ॥

को देवानामवो अद्या वृणीते क आदित्याँ अदितिं ज्योतिरीट्टे ।
कस्याश्विनाविंद्रो अग्निः सुतस्यांशोः पिबंति मनसाविवेनं ॥३॥

कः । देवानां । अवः । अद्य । वृणीते । कः । आदित्यान् । अदितिं । ज्योतिः । ईट्टे ।
कस्य । अश्विनौ । इंद्रः । अग्निः । सुतस्य । अंशोः । पिबंति । मनसा । अविऽवेनं ॥३॥

अद्यास्मिन्दिने को यजमानो देवानां द्योतमानानामिंद्रादीनामवो रक्षणं वृणीते । प्रार्थयते । क आदित्यान्देवानदितिं देवमातरं च ज्योतिरुदकं चेट्टे । याचते । अश्विनावश्विदेवाविंद्रश्चाग्निश्च मनसा स्तुत्या प्रीताः संतोऽविवेनमविगतकामं । यथाकाममित्यर्थः । कस्य यजमानस्य संबंधिनं सुतस्याभिषुतस्यांशोः सोमस्य । सोममित्यर्थः । पिबंति । पानं कुर्वंति ॥

॥ अथ चतुर्थी ॥

तस्मा अग्निर्भारतः शर्म यंसज्ज्योक्पश्यात्सूर्यमुच्चरंतं ।
य इंद्राय सुनवामेत्याह नरे नर्याय नृतमाय नृणां ॥४॥

तस्मै । अग्निः । भारतः । शर्म । यंसत् । ज्योक् । पश्यात् । सूर्यं । उत्ऽचरंतं ।
यः । इंद्राय । सुनवाम । इति । आह । नरे । नर्याय । नृऽतमाय । नृणां ॥४॥

भारतो हविषो भर्ताग्निः। प्राणो भूत्वा प्रजा धारयन् भारत इति वाजसनेयकं। अग्निस्तस्मै यजमानाय शर्म सुखं यंसत्। यच्छेत्। किंच अयमग्निर्ज्योक् चिरकालमुच्चरंतमुद्यंतं सूर्यं पश्यात्। पश्येत्। यो यजमान इंद्राय सुनवामेत्याह इंद्रार्थं सोमाभिषवं कुर्यामिति ब्रवीति। कीदृशायेंद्राय। नरे नेत्रे नर्याय नरहिताय नृणां नराणां नेतॄणां मध्ये नृतमाय नेतृतमाय ॥

॥ अथ पंचमी ॥

न तं जिनंति बहवो न दभ्रा उर्वस्मा अदितिः शर्म यंसत्।
प्रियः सुकृत्प्रिय इंद्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी ॥५॥
न। तं। जिनंति। बहवः। न। दभ्राः। उरु। अस्मै। अदितिः। शर्म। यंसत्।
प्रियः। सुऽकृत्। प्रियः। इंद्रे। मनायुः। प्रियः। सुप्रऽअवीः। प्रियः। अस्य। सोमी ॥५॥

दभ्रा अल्पा बहवो न बहवोऽपि शत्रुजनास्तं यजमानं न जिनंति। न हिंसंतु। य इंद्राय सुनवामेत्याह तमिति पूर्वेण संबंधः। अदितिरिंद्रमातास्मै यजमानायोरु विस्तीर्णं शर्म सुखं यंसत्। यच्छतु। किंच इंद्र इंद्राय सुकृत् शोभनयागादीनां कर्ता यजमानो प्रियो भवति। मनायुरिंद्रविषयस्तुतिकामश्चास्येंद्रस्य प्रियो भवति। सुप्रावीः सुष्ठु प्राविता सुष्ठु प्रगच्छन्नुपगच्छन्वा यजमानोऽस्येंद्रस्य प्रियो भवति। सोमी सोमवान्यजमानोऽस्येंद्रस्य प्रियो भवति ॥

॥ इति तृतीयस्य षष्ठे त्रयोदशो वर्गः ॥

॥ अथ षष्ठी ॥

सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते केवलेंद्रः।
नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवहंतेदवाचः ॥६॥
सुप्रऽअव्यः। प्राशुषाट्। एषः। वीरः। सुष्वेः। पक्तिं। कृणुते। केवला। इंद्रः।
न। असुष्वेः। आपिः। न। सखा। न। जामिः। दुःप्रऽअव्यः। अवऽहंता। इत्। अवाचः ॥६॥

प्राशुषाट् शत्रूणां प्रकर्षेण शीघ्रमभिभविता वीरो विक्रांत एष इंद्रः सुप्राव्यः सुष्ठूपगच्छतो हविर्भिः सुष्ठु प्रतर्पयितुर्वा सुष्वेः सुन्वतो यजमानस्य संबंधिनीं केवला केवलामसाधारणां पक्तिं कृणुते। आत्मनः कुरुते। किंचेंद्रोऽसुष्वेरसुन्वतो यजमानस्यापिर्व्याप्तो न भवति। इंद्रोऽयजमानस्य सखा न भवति। जामिर्बंधुश्च

न भवति । अपि च दुष्प्राप्यो दुरुपगमनस्यावाचः स्तुतिरहितस्य पुरुषस्यावहंतैत् हिंसितैव भवति ॥

॥ अथ सप्तमी ॥

न रेवता पणिना सख्यमिंद्रोऽसुन्वता सुतपाः सं गृणीते ।
आस्य वेदः खिदति हंति नग्नं वि सुष्वये पक्तये केवलो भूत् ॥ ७ ॥
न । रेवता । पणिना । सख्यं । इंद्रः । असुन्वता । सुतऽपाः । सं । गृणीते ।
आ । अस्य । वेदः । खिदति । हंति । नग्नं । वि । सुस्वये । पक्तये । केवलः । भूत् ॥ ७ ॥

सुतपा अभिषुतं सोमं पिबन्निंद्रो रेवता धनवता पणिना वणिजा लुब्धेनासुन्वता सोमाभिषवमकुर्वतायजमानेन सह सख्यं सखित्वं न संगृणीते । न संस्तौति । नानुमन्यत इत्यर्थः । किंच अस्यायजमानस्य नग्नं निरर्थकं वेदो धनं ज्ञानं वा आखिदति । उद्धरति । हंति । हिनस्ति च । अपि च सुष्वये सोमं सुन्वते पक्तये हवींषि पचते यजमानाय केवलोऽसाधारणः सन् विभूत् । विभवति ॥

॥ अथाष्टमी ॥

इंद्रं परेऽवरे मध्यमास इंद्रं यांतोऽवसितास इंद्रं ।
इंद्रं क्षियंत उत युध्यमाना इंद्रं नरो वाजयंतो हवंते ॥ ८ ॥
इंद्रं । परे । अवरे । मध्यमासः । इंद्रं । यांतः । अवऽसितासः । इंद्रं ।
इंद्रं । क्षियंतः । उत । युध्यमानाः । इंद्रं । नरः । वाजयंतः । हवंते ॥ ८ ॥

पर उत्कृष्टा अवरे निकृष्टाश्च जना इंद्रं हवंते । आह्वयंति । मध्यमासो मध्यमाश्चेंद्रमेव हवंते । यांतः कार्यसिद्ध्यर्थं गच्छंतो जना इंद्रमेवाह्वयंति । अवसितासो निविष्टाश्चेंद्रमेवाह्वयंति । क्षियंतो गृहे निवसंतो जना इंद्रमेव हवंते । उतापि च युध्यमाना युद्धं कुर्वाणा जना जयार्थमिंद्रमेवाह्वयंति । वाजयंतो वाजमन्नमिच्छंतो नरो नेतारो मनुष्या इंद्रमेव हवंते ॥

॥ इति तृतीयस्य षष्ठे चतुर्दशो वर्गः ॥

अहं मनुरिति सप्तर्चं पंचमं सूक्तं वामदेवस्यार्षं । अत्रेयमनुक्रमणिका । अहं मनुः सप्ताद्याभिस्तिसृभिरिंद्रमिवात्मानमृषिस्तुष्टावेंद्रो वात्मानं परा नवाष्टौ वा

श्येनस्तुतिरिति। अथाहं मनुरित्याद्याभिस्तिसृभिरात्मानमिंद्ररूपेण वामदेवः स्तुतवान् यद्वा इंद्र एवात्मानं स्तुतवान्। अतो वामदेववाक्यपक्षे वामदेव ऋषिरिंद्रो देवता। इंद्रवाक्यपक्षे त्विंद्र ऋषिः परमात्मा देवता। त्रिष्टुप् छंदः। अवशिष्टानां वामदेव ऋषिः। अवशिष्टाभिरुत्तरसूक्तेन च सुपर्णात्मना ब्रह्म स्तूयते। अतस्तासां परब्रह्म देवता॥ श्येननाम्न्येकाहे माध्यंदिनसवने मरुत्वतीयशस्त्र इदं सूक्तं। सूचितं च। श्येनाजिराभ्याममिचरन्यजेताहं मनुर्गर्भे नु सन्। आ० ९.७.। इति॥

॥ तत्र प्रथमा॥

अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः।
अहं कुत्समार्जुनेयं न्यृंजेऽहं कविरुशना पश्यता मा॥१॥
अहं। मनुः। अभवं। सूर्यः। च। अहं। कक्षीवान्। ऋषिः। अस्मि। विप्रः।
अहं। कुत्सं। आर्जुनेयं। नि। ऋंजे। अहं। कविः। उशना। पश्यत। मा॥१॥

इदमादिमंत्रत्रयेण गर्भे वसन्वामदेव उत्पन्नतत्त्वज्ञानः सन् सर्वात्म्यं स्वानुभवं मन्वादिरूपेण प्रदर्शयन्नाह। अहं वामदेवो मनुरभवं। सर्वस्य मंता प्रजापतिरस्मि। अहमेव सूर्यश्च सर्वस्य प्रेरकः सविता चास्मि। विप्रो मेधावी कक्षीवान् दीर्घतमसः पुत्र एतत्संज्ञक ऋषिरप्यहमेवास्मि। आर्जुनेयमर्जुन्याः पुत्रं कुत्समेतन्नामकमृषिं न्यृंजे। नितरां प्रसाधयामि। कविः क्रांतदर्श्युशनैतदाख्य ऋषिरहमेवास्मि। उक्तमुपलक्षणं। परमार्थदृष्ट्या कृत्स्नमप्यहमेवास्मीत्यर्थः। हे जना मां सर्वात्मकं पश्यत। यूयमप्येवमेव स्वस्वरूपमनुभवतेत्युक्तं भवति॥

॥ अथ द्वितीया॥

अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय।
अहमपो अनयं वावशाना मम देवासो अनु केतमायन्॥२॥
अहं। भूमिं। अददां। आर्याय। अहं। वृष्टिं। दाशुषे। मर्त्याय।
अहं। अपः। अनयं। वावशानाः। मम। देवासः। अनु। केतं। आयन्॥२॥

अहं वामदेव इंद्रो वा आर्याय मनवे भूमिं पृथ्वीमददां। दत्तवानस्मि। दाशुषे हविर्दत्तवते मर्त्याय मनुष्याय यजमानाय वृष्टिं सस्याद्यभिवृद्ध्यर्थं वृष्टिलक्षण-

मुदकमहमेवाददां । किंच अहं वावशानाः शब्दायमाना अप उदकान्यनयं । सर्वमपि प्रदेशमगमयं । देवासो वह्यादयो देवा मम केतं मदीयं संकल्पमन्वायन् । अनुयंति ॥

॥ अथ तृतीया ॥

अहं पुरो मंदसानो व्यैरं नव साकं नवतीः शंबरस्य ।
शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावं ॥३॥
अहं । पुरः । मंदसानः । वि । ऐरं । नव । साकं । नवतीः । शंबरस्य ।
शतऽतमं । वेश्यं । सर्वऽताता । दिवःऽदासं । अतिथिऽग्वं । यत् । आवं ॥३॥

अहं वामदेव इंद्रो वा मंदसानः सोमेन माद्यन्नव नवसंख्याका नवतीर्नवतिसंख्याकाश्च शंबरस्यैतन्नामकस्यासुरस्य संबंधीनि पुरः पुराणि साकं युगपदेव व्यैरं । अध्वंसयं । शततमं शतसंख्यापूरणं पुरं वेश्यं दिवोदासनाम्ने प्रवेशार्हमकरवं । सर्वताता सर्वतातौ यज्ञेऽतिथिग्वमतिथीनामभिगंतारं दिवोदासं दिवोदासनामकं राजर्षिं यदावं अपालयं । तदा पुरो व्यैरमिति पूर्वेण संबंधः ॥

॥ अथ चतुर्थी ॥

प्र सु ष विभ्यो मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा ।
अचक्रया यत्स्वधया सुपर्णो हव्यं भरन्मनवे देवजुष्टं ॥४॥
प्र । सु । सः । विऽभ्यः । मरुतः । विः । अस्तु । प्र । श्येनः । श्येनेभ्यः । आशुऽपत्वा ।
अचक्रया । यत् । स्वधया । सुऽपर्णः । हव्यं । भरत् । मनवे । देवऽजुष्टं ॥४॥

अथैतदादिभिः श्येनः स्तूयते । हे मरुतो वेगेन मरुत्सदृशाः पक्षिणः स प्रसिद्धः श्येनाख्यो विः पक्षी विभ्यः पक्षिभ्यो युष्मत्तः प्र सु अस्तु । बलेन प्रकृष्टो भवतु । किंच श्येनेभ्यः शंसनीयगमनेभ्यः स्वसमानजातिभ्यः पक्षिभ्यः सकाशादाशुपत्वाशुपतनः शीघ्रगामी श्येनः प्रकृष्टो भवतु । सुपर्णः शोभनपतनो यद्यदा श्येनोऽचक्रया चक्रवर्जितया स्वधया रथेन देवजुष्टं देवैः सेवितं हव्यं सोमलक्षणं हविर्मनवे प्रजापतये भरत् अहरत् द्युलोकसकाशादाहृतवान् । अत्र स्वधाशब्दो रथवाच्यचक्रया स्वधया वर्तमानमित्यादौ । ऋग्वे० १०. २७. १९. । दर्शनात् ॥

॥ अथ पंचमी ॥

भरद्यदि विरतो वेविजानः पथोरुणा मनोजवा असर्जि।

तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र ॥५॥

भरत्। यदि। विः। अतः। वेविजानः। पथा। उरुणा। मनःऽजवाः। असर्जि।

तूयं। ययौ। मधुना। सोम्येन। उत। श्रवः। विविदे। श्येनः। अत्र ॥५॥

यदि यदा विः पक्षी श्येनोऽतोऽमुष्माद्द्युलोकाद्वेविजानः सोमकान् भीषयन् भरत् अहरत् सोममाहृतवान् तदोरुणा विस्तीर्णेन पथांतरिक्षमार्गेण मनोजवा मनोवद्वेगयुक्तः सन् असर्जि। संसृष्ट आसीत्। सोम्येन सोममयेन मधुनान्नेन सह तूयं क्षिप्रं ययौ। जगाम। उतापि च अत्रास्मिन् लोके श्येनः सुपर्णः श्रवः सोमाहरणनिमित्तं यशो विविदे। लेभे॥

॥ अथ षष्ठी ॥

ऋजीपी श्येनो ददमानो अंशुं परावतः शकुनो मंद्रं मदं।

सोमं भरद्दादृहाणो देवावान्दिवो अमुष्मादुत्तरादादाय ॥६॥

ऋजीपी। श्येनः। ददमानः। अंशुं। पराऽवतः। शकुनः। मंद्रं। मदं।

सोमं। भरत्। दादृहाणः। देवऽवान्। दिवः। अमुष्मात्। उत्ऽतरात्। आऽदाय ॥६॥

ऋजीप्यृजुगामी परावतो दूरादंशुं सोमं ददमानो धारयन् श्येनः शंसनीयगमनो देववान्देवैः सहितः शकुनः पक्षी मंद्रं मदनीयं स्तुत्यं मदं मदकरं सोममुत्तरादुन्नततरादमुष्माद्दिवो द्युलोकादादाय स्वीकृत्य दादृहाणो दृढीभवन् भरत्। अहरत्॥

॥ अथ सप्तमी ॥

आदाय श्येनो अभरत्सोमं सहस्रं सवाँ अयुतं च साकं।

अत्रा पुरंधिरजहादरातीर्मदे सोमस्य मूरा अमूरः ॥७॥

आऽदाय। श्येनः। अभरत्। सोमं। सहस्रं। सवान्। अयुतं। च। साकं।

अत्र। पुरंऽधिः। अजहात्। अरातीः। मदे। सोमस्य। मूराः। अमूरः ॥७॥

श्येनः शंसनीयगमनः पक्षी सवान् सवानां यज्ञानां सहस्रं सहस्रसंख्याक-

मयुतं चायुतसंख्याकं । अपरिमितसंख्याकमित्यर्थः । साकं सह सोमं सोमलक्षणमन्नमादायादानं कृत्वाभरत् । अहरत् । आजहार । अथास्मिन् सोम आहृते सति पुरंधिः पुरंधीर्बहुकर्मामूरोऽमूढः प्राज्ञ इंद्रः सोमस्य संबंधिनि मदे हर्षे सति मूरा मूढा अरातीः शत्रूनजहात् । अत्यजत् । जघानेत्यर्थः ॥ अरातिशब्दः स्त्रीलिंगः ॥

॥ इति तृतीयस्य षष्ठे पंचदशो वर्गः ॥

गर्भे न्विति पंचर्चं षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभं । अंत्या शक्करी षट्पंचाशदक्षरा । श्येनो देवता । पूर्वसूक्तेऽष्टौ वेत्युक्तत्वादंत्याया इंद्रो वा देवता । तथा चानुक्रांतं । गर्भे नु पंचांत्या शक्करीति ॥ श्येने निष्केवल्यशस्त्र इदं सूक्तं । सूत्रं तु पूर्वमुदाहृतं ॥

॥ तत्र प्रथमा ॥

गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ।
शतं मा पुर आयसीररक्षन्नध श्येनो जवसा निरदीयं ॥१॥
गर्भे । नु । सन् । अनु । एषां । अवेदं । अहं । देवानां । जनिमानि । विश्वा ।
शतं । मा । पुरः । आयसीः । अरक्षन् । अध । श्येनः । जवसा । निः । अदीयं ॥१॥

अत्रैष श्लोकः पठ्यते । श्येनभावं समास्थाय गर्भाद्योगेन निःसृतः । ऋषिर्गर्भे शयानः सन् ब्रूते गर्भे नु सन्निति । गर्भे तु गर्भ एव सन् विद्यमानोऽहं वामदेव एषामिंद्रादीनां देवानां विश्वा विश्वानि सर्वाणि जनिमानि जन्मान्यन्ववेदं । आनुपूर्व्येणाज्ञासिषं । परमात्मनः सकाशात्सर्वे देवा जाता इत्यवेदिषमित्यर्थः । इतः पूर्वं शतं बह्व्यायसीरयोमयान्यभेद्यानि पुरः शरीराणि मा मामरक्षन् । अपालयन् । यथाहं शरीराद्व्यतिरिक्तमात्मानं न जानीयां तथा मामरक्षन्नित्यर्थः । अधाधुना श्येनः श्येनवत्स्थितोऽहं जवसा वेगेन निरदीयं । शरीरान्निरगमं । अनावरणमात्मानं जानन्निर्गतोऽस्मीत्यर्थः । पुरुषे ह वा अयमादित । ऐ० आ० २.२५. । इति खंडे गर्भ एवैतच्छयानो वामदेव एवमुवाचेत्यादिनायमर्थः सम्यक् प्रतिपादितः ॥

॥ अथ द्वितीया ॥

न घा स मामप जोषं जभाराभीमास त्वक्षसा वीर्येण ।
ईर्मा पुरंधिरजहादरातीरुत वाताँ अतरच्छूशुवानः ॥२॥

न। घ। सः। मां। अप। जोषं। जभार। अभि। ईं। आस। त्वक्षसा। वीर्येण।
ईर्मा। पुरंऽधिः। अजहात्। अरातीः। उत। वातान्। अतरत्। शूशुवानः ॥२॥

स गर्भो मां वामदेवं जोषं पर्याप्तं न घ नैवापजभार। अवजहार। गर्भेऽपि वसतो मे मोहो नाभूदित्यर्थः। अहं तु ईमिदं गर्भस्थं दुःखं त्वक्षसा तीक्ष्णेन वीर्येण ज्ञानसामर्थ्येनाभ्यास। अभ्यभवं। ईर्मा सर्वस्य प्रेरकः पुरंधिः पुरां धारकः परमात्मारातीर्गर्भसंश्रितान् शत्रूनजहात्। अत्यजत्। जघान। उतापि च शूशुवानो वर्धमानः परिपूर्णः परमात्मा वातान् गर्भक्लेशकरान्वायूनतरत्। अतारीत् ॥

॥ अथ तृतीया ॥

अव यच्छ्येनो अस्वनीदध द्योर्वि यद्यदि वात ऊहुः पुरंधिं।
सृजद्यदस्मा अव ह क्षिपज्ज्यां कृशानुरस्ता मनसा भुरण्यन् ॥३॥

अव। यत्। श्येनः। अस्वनीत्। अध। द्योः। वि। यत्। यदि। वा। अतः। ऊहुः। पुरंऽधिं।
सृजत्। यत्। अस्मै। अव। ह। क्षिपत्। ज्यां। कृशानुः। अस्ता। मनसा। भुरण्यन् ॥३॥

अथ तदानीं सोमाहरणकाले यद्यदा श्येनो द्योर्द्युलोकादवास्वनीत् अवाङ्मुखं शब्दमकरोत्। यदि वा यदा च। वेति चार्थे। यद्यं पुरंधिं सोममतोऽस्माच्छ्येनाद्व्यूहुः सोमपाला विक्षिप्तवंतः। यद्यदास्ता शराणां क्षेप्ता मनसा मनोवेगेन भुरण्यन् गंतुमिच्छन् कृशानुरेतन्नामकः सोमपालो ज्यां धनुषः कोटौ मौर्वीं क्षिपद्ध चिक्षेप खलु। अस्मै श्येनाय शरमवासृजत् त्यक्तवान्। तथा च ब्राह्मणं। तस्या अनुविसृज्य कृशानुः सोमपालः सव्यस्य पदो नखमच्छिनदित्यादि। यदा सोमपाला इत्थमित्थं चक्रुस्तदा श्येनः सोममाजहारेत्यृचोत्तरया संबंधः ॥

॥ अथ चतुर्थी ॥

ऋजिप्य ईमिंद्रावतो न भुज्युं श्येनो जभार बृहतो अधि ष्णोः।
अंतः पतत्पतत्र्यस्य पर्णमध यामनि प्रसितस्य तद्वेः ॥४॥

ऋजिप्यः। ईं। इंद्रऽवतः। न। भुज्युं। श्येनः। जभार। बृहतः। अधि। स्नोः।
अंतरिति। पतत्। पतत्रि। अस्य। पर्णं। अध। यामनि। प्रऽसितस्य। तत्। वेरिति वेः ॥४॥

ऋजिप्य ऋजुगामी श्येन इंद्रवत इंद्रो रक्षको यस्य तस्माद्बृहतो महतोऽधि

उपरि द्योः स्थिताद्द्युलोकादीमेनं सोमं जभार। आजहार। तत्र दृष्टांतः। इंद्रवत्। इंद्रः समर्थः। तद्वत्तो देशाद्भुज्युं न भुज्युनामकं राजानं यथाश्विनावाजहतु-स्तद्वत्। अध तदानीं यामनि युद्धे प्रसितस्य कृशानोरस्त्रैर्बद्धस्य वेगैंतुरस्यांतर्मध्ये स्थितं पतत्रि पतनशीलं तत्पर्णं पतत्। अपतत् ॥

॥ अथ पंचमी ॥

अध श्वेतं कलशं गोभिरक्तमापिप्यानं मघवा शुक्रमंधः।
अध्वर्युभिः प्रयतं मध्वो अग्रमिंद्रो मदाय प्रति धत्पिबध्यै शूरो मदाय प्रति धत्पिबध्यै ॥५॥

अध। श्वेतं। कलशं। गोभिः। अक्तं। आऽपिप्यानं। मघऽवा। शुक्रं। अंधः।
अध्वर्युऽभिः। प्रऽयतं। मध्वः। अग्रं। इंद्रः। मदाय। प्रति। धत्। पिबध्यै। शूरः। मदाय। प्रति। धत्। पिबध्यै ॥५॥

अधाधुना शूरो विक्रांतो मघवा धनवानिंद्रः श्वेतं शुभ्रं कलशं कलशे पात्रे स्थितं गोभिर्गव्येन पयसाक्तं सिक्तमापिप्यानमाप्यायंतं शुक्रं सारोपेतमध्वर्युभिः प्रयतं दत्तमंधः सोमलक्षणमन्नं मध्वो मधुरस्य सोमरसस्याग्रमग्रे मदाय मदार्थं पिबध्यै पातुं प्रतिधत्। प्रतिदधातु। पुनरुक्तिरादरार्था ॥

॥ इति तृतीयस्य षष्ठे षोडशो वर्गः ॥

त्वा युजेति पंचर्चं सप्तमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमिंद्रासोमदेवताकं। अनुक्रांतं च। त्वा युजेंद्रासोममिति। विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

त्वा युजा तव तत्सोम सख्य इंद्रो अपो मनवे सस्रुतस्कः।
अहन्नहिमरिणात्सप्त सिंधूनपावृणोदपिहितेव खानि ॥१॥

त्वा। युजा। तव। तत्। सोम। सख्ये। इंद्रः। अपः। मनवे। सऽस्रुतः। करिति कः।
अहन्। अहिं। अरिणात्। सप्त। सिंधून्। अप। अवृणोत्। अपिहिताऽइव। खानि ॥१॥

हे सोम तव त्वदीये तत्तस्मिन् सख्ये सखित्वे सति त्वा त्वया युजा सहायेनेंद्रः सस्रुतः सरणशीला अपो वृष्टिलक्षणान्युदकानि मनवे मनुष्येभ्यः कः। अकरोत्।

किंच अहिं वृत्रमसुरमहन्। हतवान्। सप्त सर्पणशीलाः सिंधूनपोऽरिणात्। प्रैरयत्। अपिहितेवापिहितानीव वृत्रेण तिरोहितानि च। अपेवशब्दश्चार्थे। खानि स्रोतसां द्वाराण्यपावृणोत्। उद्घाटितवान्॥

॥ अथ द्वितीया ॥

त्वा युजा नि खिदत्सूर्यस्येंद्रश्चक्रं सहसा सद्य इंदो।
अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि॥२॥

त्वा। युजा। नि। खिदत्। सूर्यस्य। इंद्रः। चक्रं। सहसा। सद्यः। इंदो इति।
अधि। स्नुना। बृहता। वर्तमानं। महः। द्रुहः। अप। विश्वऽआयु। धायि॥२॥

हे इंदो सोम इंद्रः सद्यः सपदि त्वा त्वया युजा सहायेन सूर्यस्य प्रेरकस्य सवितुः संबंधिनः पूर्वं द्विचक्रस्य रथस्यैकं चक्रं सहसाभिभावुकेन बलेन निखिदत्। आच्छिनत्। कीदृशं। अधि उपरि स्नुना स्थितेन बृहता महतांतरिक्षेण वर्तमानं। किंच महो महतः प्रभूतस्य द्रुहो द्रोग्धुः सूर्यस्य संबंधि विश्वायु सर्वतो गंतृ चक्रमपधायि। इंद्रेणापहारि॥

॥ अथ तृतीया ॥

अहन्निंद्रो अदहदग्निरिंदो पुरा दस्यून्मध्यंदिनादभीके।
दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि बर्हीत्॥३॥

अहन्। इंद्रः। अदहत्। अग्निः। इंदो इति। पुरा। दस्यून्। मध्यंदिनात्। अभीके।
दुःऽगे। दुरोणे। क्रत्वा। न। यातां। पुरु। सहस्रा। शर्वा। नि। बर्हीत्॥३॥

हे इंदो सोम अभीके संग्रामे दस्यून् शत्रूनिंद्रोऽहन्। अवधीत्। अग्निः कांश्चिच्छत्रूनदहत्। ददाह। कीदृशाविंद्राग्नी। मध्यंदिनान्मध्याह्नात्पुरा पुरस्तात्पूर्वाह्णे तव पानाल्लब्धबलाविति शेषः। यातां गच्छतामसुराणां पुरु पुरूणि बहूनि सर्वा सर्वाणि निरवशेषाणि सहस्रा सहस्राण्यपरिमितानि निबर्हीत्। न्यबर्हीत्। इंद्रोऽवधीत्। तत्र दृष्टांतः। दुरोणे दरवने रक्षितुमशक्ये दुर्गे दुरवगाहे देशे क्रत्वा न कर्मणा स्वकीयं कार्यमुद्दिश्य गच्छतः पथिकान्यथा धनलोलुपश्चोरो हंति तद्वत्॥

॥ अथ चतुर्थी ॥

विश्वस्मात्सीमधमाँ इंद्र दस्यून्विशो दासीरकृणोरप्रशस्ताः ।

अबाधेथाममृणतं नि शत्रूनविंदेथामपचितिं वधत्रैः ॥४॥

विश्वस्मात् । सीं । अधमान् । इंद्र । दस्यून् । विशः । दासीः । अकृणोः । अप्रऽशस्ताः ।

अबाधेथां । अमृणतं । नि । शत्रून् । अविंदेथां । अपऽचितिं । वधत्रैः ॥४॥

हे इंद्र त्वं सीमेनान्दस्यून्विश्वस्मात्सर्वस्माद्गुणादधमान् हीनानकृणोः । अकरोः । किंच दासीः कर्महीना विशो मानुषीः प्रजा अप्रशस्ता गर्हिता अकृणोः । हे इंद्रासोमौ युवां शत्रूनबाधेथां । न्यमृणतं । नितरां हिंसितवंतौ । अपि च वधत्रैस्तेषां शत्रूणां प्रहारैरपचितिं पूजां जनेभ्योऽविंदेथां । अलभेथां ॥

॥ अथ पंचमी ॥

एवा सत्यं मघवाना युवं तदिंद्रश्च सोमोर्वमश्व्यं गोः ।

आदर्दृतमपिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना ॥५॥

एव । सत्यं । मघऽवाना । युवं । तत् । इंद्रः । च । सोम । ऊर्वं । अश्व्यं । गोः ।

आ । अदर्दृतं । अपिऽहितानि । अश्ना । रिरिचथुः । क्षाः । चित् । ततृदाना ॥५॥

हे सोम त्वं चेंद्रश्चेति युवामुभावूर्वं महांतमश्व्यमश्वसमूहं गोर्गवां समूहं चादर्दृतं । आदरयतं । अपिहितानि पणिभिराच्छादितानि गवां वृंदानि क्षाश्चित् पणीनां भूमीश्चाश्नाशनपरेण बलेन रिरिचथुः । रेचितवंतौ । हे मघवानौ धनवंताविंद्रासोमौ ततृदाना शत्रूणां हिंसकौ युवं युवामेवैवमुक्तप्रकारेण यत्कृतवंतौ तत्सर्वं सत्यमेव ॥

॥ इति तृतीयस्य षष्ठे सप्तदशो वर्गः ॥

आ नः स्तुत इति पंचर्चमष्टमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रं । आ नः स्तुत इत्यनुक्रमणिका । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

आ नः स्तुत उप वाजेभिरूतीइंद्र याहि हरिभिर्मंदसानः ।

तिरश्चिदर्यः सवना पुरूण्यांगूषेभिर्गृणानः सत्यराधाः ॥१॥

आ । नः । स्तुतः । उप । वाजेभिः । ऊती । इंद्र । याहि । हरिऽभिः । मंदसानः ।
तिरः । चित् । अर्यः । सवना । पुरूणि । आंगूषेभिः । गृणानः । सत्यऽराधाः ॥ १ ॥

हे इंद्र स्तुतस्त्वं वाजेभिर्वाजैरन्नैः सह तिरश्चित् प्राप्तानि । तिरः सत इति प्राप्तस्य । नि० ३. २०. । इति *यास्कः ।* पुरूणि पूर्णानि सवना सवनानि नोऽस्मदीयान्यज्ञानुप प्रत्यूती ऊत्या नोऽस्माकं रक्षणार्थं हरिभिरश्वैरायाहि । आगच्छ । कीदृशः । मंदसानो मोदमानोऽर्यः स्वाम्यांगूषेभिः स्तोत्रैर्गृणानः स्तूयमानः सत्यराधाः सत्यधनः ॥

॥ अथ द्वितीया ॥

आ हि ष्मा याति नर्यश्चिकित्वान्हूयमानः सोतृभिरुप यज्ञं ।
स्वश्वो यो अभीरुर्मन्यमानः सुष्वाणेभिर्मदति सं ह वीरैः ॥ २ ॥
आ । हि । स्म । याति । नर्यः । चिकित्वान् । हूयमानः । सोतृऽभिः । उप । यज्ञं ।
सुऽअश्वः । यः । अभीरुः । मन्यमानः । सुस्वानेभिः । मदति । सं । ह । वीरैः ॥ २ ॥

नर्यो नृभ्यो हितश्चिकित्वान् सर्वं जानन् सोतृभिः सोममभिषुण्वद्भिर्ऋत्विग्भिर्हूयमान आहूयमान इंद्रोऽस्मदीयं यज्ञमुप प्रति आयाति । आगच्छतु । हि स्मेति पूरणौ । स्वश्वः शोभनाश्वोपेतोऽभीरुर्निर्भयशीलः सुस्वानेभिः सुन्वद्भिर्यजमानैर्मन्यमानः स्तूयमानो य इंद्रो वीरैः शूरैर्मरुद्भिः सह संमदति ह सह माद्यत्येव । स इंद्र आगच्छत्विति पूर्वेण संबंधः ॥

॥ अथ तृतीया ॥

श्रावयेदस्य कर्णा वाजयध्यै जुष्टामनु प्र दिशं मंदयध्यै ।
उद्वावृषाणो राधसे तुविष्मान्करन्न इंद्रः सुतीर्थाभयं च ॥ ३ ॥
श्रवय । इत् । अस्य । कर्णा । वाजयध्यै । जुष्टां । अनु । प्र । दिशं । मंदयध्यै ।
उत्ऽववृषाणः । राधसे । तुविष्मान् । करत् । नः । इंद्रः । सुऽतीर्था । अभयं । च ॥ ३ ॥

हे स्तोतस्त्वमस्येंद्रस्य संबंधिनी कर्णा कर्णौ वाजयध्या इंद्रं बलिनं कर्तुं जुष्टामनु दिशं सेवितासु सर्वासु दिक्षु प्र मंदयध्यै प्रकर्षेणेंद्रं मादयितुं च श्रवय । स्तोत्राणि श्रावय । इदिति पूरणः । उद्ववृषाणः सोमेनोत्सिच्यमानस्तुविष्मान्व-

लवानिंद्रो नोऽस्माकं राधसे धनार्थं सुतीर्था शोभनानि तीर्थान्यभयं च भयरा-
हित्यं च करत् । करोतु ॥

॥ अथ चतुर्थी ॥

अच्छा यो गंता नाधमानमूती इत्था विप्रं हवमानं गृणंतं ।
उप त्मनि दधानो धुर्या३शून्त्सहस्राणि शतानि वज्रबाहुः ॥४॥
अच्छं । यः । गंता । नाधमानं । ऊती । इत्था । विप्रं । हवमानं । गृणंतं ।
उपं । त्मनिं । दधानः । धुरि । आशून् । सहस्राणि । शतानि । वज्रऽबाहुः ॥४॥

वज्रबाहुर्वज्रहस्तो य इंद्रस्त्मन्यात्मनि स्थितानात्मवश्यान् सहस्राणि सहस्रसं-
ख्याकान् शतानि शतसंख्याकानाशून् शीघ्रगामिनोऽश्वान्धुरि रथवहनप्रदेश उप-
दधानः संस्थापयन्नूती रक्षणार्थं नाधमानं याचमानं विप्रं मेधाविनं हवमानमा-
ह्वयंतमित्थेत्थमनेन प्रकारेण गृणंतं स्तुवंतं यजमानमच्छाभिमुख्येन गंता गम-
नशीलो । भवतीति शेषः । स इंद्रः सुतीर्थान्यभयं च करोत्विति पूर्वेण संबंधः ॥

॥ अथ पंचमी ॥

त्वोतासो मघवन्निंद्र विप्रा वयं ते स्याम सूरयो गृणंतः ।
भेजानासो बृहद्दिवस्य राय आकाय्यस्य दावने पुरुक्षोः ॥५॥
त्वाऽऊतासः । मघऽवन् । इंद्र । विप्राः । वयं । ते । स्याम । सूरयः । गृणंतः ।
भेजानासः । बृहत्ऽदिवस्य । रायः । आऽकाय्यस्य । दावने । पुरुऽक्षोः ॥५॥

हे मघवन्धनवन्निंद्र त्वोतासस्त्वया रक्षिता विप्रा मेधाविनो गृणंतस्त्वां स्तुवंतः
सूरयः स्तोतारो वयं बृहद्दिवस्य महद्दीप्तेराकाय्यस्य आ समंतात्स्तुत्यस्य पुरुक्षोर्ब-
हन्नस्य बहुकीर्तेर्वा ते त्वदीयस्य रायो धनस्य दावने दाने निमित्ते सति भेजा-
नासस्त्वां भजमानाः स्याम । भवेम ॥

॥ इति तृतीयस्य षष्ठेऽष्टादशो वर्गः ॥

नकिरिंद्रेति चतुर्विंशत्यृचं नवमं सूक्तं वामदेवस्यार्षं गायत्रं । अष्टमी चतुर्विंशी
च द्वे अनुष्टुभौ । इंद्रो देवता । दिवश्चिद्घेत्ययं तृच उषोदेवताक इंद्रदेवताकश्च ।
तथा चानुक्रांतं । नकिश्चतुर्विंशतिर्दिवश्चित्तृच उषस्यश्च गायत्रं ह्यष्टम्यंत्ये चानुष्टु-

भाविति ॥ अतिरात्रे तृतीये पर्याये मैत्रावरुणशस्त्र उत्तमावर्जमिदं सूक्तं । तथा च सूचितं । नकिरिंद्र त्वदुत्तर इत्युत्तमामुद्धरेत् । आ० ६.४. । इति ॥

॥ तत्र प्रथमा ॥

नकिरिंद्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन् । नकिरेवा यथा त्वं ॥१॥

नकिः । इंद्र । त्वत् । उत्ऽतरः । न । ज्यायान् । अस्ति । वृत्रऽहन् । नकिः । एव । यथा । त्वं ॥१॥

हे वृत्रहन्निंद्र वृत्रस्य नाशकेंद्र । लोक एकोऽपीति शेषः । त्वत्तस्त उत्तर उत्कृष्टतरो नकिरस्ति । न भवति । त्वत्तो ज्यायान् प्रशस्यतर एकोऽपि नास्ति । हे इंद्र त्वं लोके यथा प्रसिद्धो भवसि तथाविध एकोऽपि नकिरेवास्ति । नैव भवति । कश्चिदपि लोक इंद्रसदृशो नास्तीत्यर्थः ॥

॥ अथ द्वितीया ॥

सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः । सत्रा महाँ असि श्रुतः ॥२॥

सत्रा । ते । अनु । कृष्टयः । विश्वा । चक्राऽइव । ववृतुः । सत्रा । महान् । असि । श्रुतः ॥२॥

हे इंद्र कृष्टयः प्रजास्ते त्वामनु लक्षीकृत्य सत्रा सत्यमेव ववृतुः । वर्तंते । तत्र दृष्टांतः । विश्वा विश्वानि व्याप्तानि चक्रेव चक्राणीव । यथा चक्राणि शकटमनुवर्तंते तद्वत् । हे इंद्र महांस्त्वं सत्रा सत्यमेव श्रुतो विश्रुतोऽसि । गुणैः प्रख्यातो भवसि ॥

॥ अथ तृतीया ॥

विश्वे चनेदना त्वा देवास इंद्र युयुधुः । यदहा नक्तमातिरः ॥३॥

विश्वे । चन । इत् । अना । त्वा । देवासः । इंद्र । युयुधुः । यत् । अहा । नक्तं । आ । अतिरः ॥३॥

हे इंद्र विश्वे चनेत्सर्व एव देवासोऽसुरान्विजिगीषवो देवा अना प्राणरूपेण बलेन त्वा त्वां सहायं लब्ध्वा युयुधुः । असुरैः सह युद्धं चक्रुः । यद्यस्मात्कारणादहा अहःसु नक्तं रात्रिषु चातिरः आ समंतात् शत्रूनवधीः । अतः कारणाद्युयुधुरिति पूर्वेण संबंधः ॥

॥ अथ चतुर्थी ॥

यत्रोत बाधितेभ्यश्चक्रं कुत्साय युध्यते । मुषाय इंद्र सूर्यं ॥४॥

यत्र । उत । बाधितेभ्यः । चक्रं । कुत्साय । युध्यते । मुषायः । इंद्र । सूर्यं ॥४॥

यत्र यस्मिन्युद्ध उतापि च हे इंद्र त्वं बाधितेभ्यः कुत्ससहायेभ्यो युध्यते युद्धं कुर्वते कुत्साय च सूर्यं सूर्यसंबंधि चक्रं मुषायः अमुष्णाः । अपहृतवानसीत्यर्थः । तस्मिन्युद्धे प्रावः शचीभिरेतशमिति परेण संबंधः ॥

॥ अथ पंचमी ॥

यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत् । त्वमिंद्र वनूँरहन् ॥ ५ ॥

यत्र । देवान् । ऋघायतः । विश्वान् । अयुध्यः । एकः । इत् । त्वं । इंद्र । वनून् । अहन् ॥ ५ ॥

हे इंद्र त्वमेक इदसहाय एव यत्र यस्मिन् संग्रामे देवानिंद्रादीनृघायतो बाधमानान्विश्वान् सर्वान्राक्षसादीनयुध्यः युद्धमकरोः । तथा वनून् हिंसकानहन् अवधीः ॥

॥ इति तृतीयस्य षष्ठ एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

यत्रोत मर्त्याय कमरिणा इंद्र सूर्यं । प्रावः शचीभिरेतशं ॥ ६ ॥

यत्र । उत । मर्त्याय । कं । अरिणाः । इंद्र । सूर्यं । प्र । आवः । शचीभिः । एतशं ॥ ६ ॥

यत्र यस्मिन् संग्राम उतापि च हे इंद्र त्वं मर्त्याय मनुष्यायैतशाख्याय ऋषये सूर्यमरिणाः अहिंसीः । कमिति पूरणः । तदानीं शचीभिर्युद्धकर्मभिरेतशमेतत्संज्ञकमृषिं प्रावः । प्रकर्षेणारक्षः ॥

॥ अथ सप्तमी ॥

किमादुतासि वृत्रहन्मघवन्मन्युमत्तमः । अत्राह दानुमातिरः ॥ ७ ॥

किं । आत् । उत । असि । वृत्रऽहन् । मघऽवन् । मन्युमत्ऽतमः । अत्र । अह । दानुं । आ । अतिरः ॥ ७ ॥

हे वृत्रहन् वृत्राणामावरकाणां तमसां हंतर्मघवन्धनवन्निंद्र त्वमादनंतरमेव उतापि च । किमिति प्रश्ने । मन्युमत्तमोऽसि । अत्यंतं क्रोधवान् भवसि । अत्रास्मिन्नंतरिक्षेऽहैव दानुं दनोः पुत्रं वृत्रमातिरः । आ समंतादहिंसीः ॥

॥ अथाष्टमी ॥

एतद्घेदुत वीर्य१मिंद्र चकर्थ पौंस्यं । स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः ॥८॥

एतत् । घ । इत् । उत । वीर्यं । इंद्र । चकर्थ । पौंस्यं । स्त्रियं । यत् । दुःऽहनायुवं ।
वधीः । दुहितरं । दिवः ॥८॥

हे इंद्र उतापि च यद्यस्त्वमेतदुपलक्षितं पौंस्यं बलं वीर्यं सामर्थ्योपेतं चकर्थ कृतवानसि । घेदिति पूरणौ । किंच दुर्हणायुवं दुष्टं हननमिच्छंतीं दिवो दुहितरं द्युलोकसकाशादुत्पन्नां स्त्रियमुषसं वधीः अवधीः ॥

॥ अथ नवमी ॥

दिवश्चिद्घा दुहितरं महान्महीयमानां । उषासमिंद्र सं पिणक् ॥९॥

दिवः । चित् । घ । दुहितरं । महान् । महीयमानां । उषसं । इंद्र । सं । पिणक् ॥९॥

हे इंद्र महांस्त्वं दिवो दुहितरं द्युलोकस्य पुत्रीं महीयमानां पूज्यमानामुषसमुषोदेवीं संपिणक् चिद्घ । संपिष्टवानसि खलु ॥

॥ अथ दशमी ॥

अपोषा अनसः सरत्संपिष्टादह बिभ्युषी । नि यत्सीं शिश्नथद्वृषा ॥१०॥

अप । उषाः । अनसः । सरत् । संऽपिष्टात् । अह । बिभ्युषी । नि । यत् । सीं ।
शिश्नथत् । वृषा ॥१०॥

वृषा कामानां वर्षितेंद्रो यद्यदा सीमेतदुषःसंबंधि शकटं निशिश्नथत् न्यवधीत् तदोषा उषोदेवता बिभ्युषींद्रसकाशाद्भीता सती संपिष्टादिंद्रेण संचूर्णितादनसः शकटादपसरत् । अपजगाम । अहेति पूरणः ॥

॥ इति तृतीयस्य षष्ठे विंशो वर्गः ॥

॥ अथैकादशी ॥

एतदस्या अनः शये सुसंपिष्टं विपाश्या । ससार सीं परावतः ॥११॥

एतत् । अस्याः । अनः । शये । सुऽसंपिष्टं । विऽपाशि । आ । ससार । सीं । पराऽवतः ॥११॥

सुसंपिष्टमिंद्रेण सुष्ठु संचूर्णितमस्या उषसः संबंध्येतदनः शकटं विपाशि ।

विपाडाख्या नदी। तस्यां तत्तीर आशये। आ समंताच्छेते। अशेत। सीमिवबुधो-देवता शकटे भग्ने सति परावतो दूरदेशात्ससार। अपससार॥

॥ अथ द्वादशी ॥

उत सिंधुं विबाल्यं वितस्थानामधि क्षमि। परि ष्ठा इंद्र मायया ॥१२॥

उत। सिंधुं। विऽबाल्यं। विऽतस्थानां। अधि। क्षमि। परि। स्थाः। इंद्र। मायया ॥१२॥

हे इंद्र उतापि च विबाल्यं विगतबाल्यावस्थां संपूर्णजलां वितस्थानां वितिष्ठमानां सिंधुं नदीमधि क्षमि क्षमायां मायया प्रज्ञया परिष्ठाः। पर्यस्थाः। सर्वतः स्थापनं कृतवानसि ॥

॥ अथ त्रयोदशी ॥

उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनं। पुरो यदस्य संपिणक् ॥१३॥

उत। शुष्णस्य। धृष्णुऽया। प्र। मृक्षः। अभि। वेदनं। पुरः। यत्। अस्य। संऽपिणक् ॥१३॥

उतापि च हे इंद्र धृष्णुया धर्षकस्त्वं शुष्णस्य शुष्णनाम्नोऽसुरस्य संबंधि वेदनं वित्तमभि अभितः सर्वतः प्र मृक्षः। प्रकर्षेणाबाधथाः। यद्यदास्य शुष्णस्य पुरः पुराणि नगराणि संपिणक् संपिष्टवानसि। तदा प्र मृक्ष इति संबंधः॥

॥ अथ चतुर्दशी ॥

उत दासं कौलितरं बृहतः पर्वतादधि। अवाहन्निंद्र शंबरं ॥१४॥

उत। दासं। कौलिऽतरं। बृहतः। पर्वतात्। अधि। अव। अहन्। इंद्र। शंबरं ॥१४॥

उतापि च हे इंद्र त्वं दासमुपक्षपयितारं कौलितरं कुलितरनाम्नोऽपत्यं शंबर-मसुरं बृहतो महतः पर्वतादद्रेरध्युपरि अव अवाचीनं कृत्वाहन्। हतवानसि॥

॥ अथ पंचदशी ॥

उत दासस्य वर्चिनः सहस्राणि शतावधीः। अधि पंच प्रधींरिव ॥१५॥

उत। दासस्य। वर्चिनः। सहस्राणि। शता। अवधीः। अधि। पंच। प्रधीन्ऽइव ॥१५॥

उतापि च हे इंद्र त्वं प्रधीनिव चक्रस्य परितः स्थितान् शंकूनिव हिंसकान्पंच शता पंचशतानि पंचशतसंख्याकान् सहस्राणि सहस्रसंख्याकान्दासस्य लोका-

[illegible]र्चिनो वर्चिनामकस्यासुरस्य संबंधिनोऽनुचरान्पुरुषानध्यधिकमवधीः । हतवानसि ॥

॥ इति तृतीयस्य षष्ठ एकविंशो वर्गः ॥

॥ अथ षोडशी ॥

उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः । उक्थेष्विंद्र आभजत् ॥ १६ ॥

उत । त्यं । पुत्रं । अग्रुवः । पराऽवृक्तं । शतऽक्रतुः । उक्थेषु । इंद्रः । आ । अभजत् ॥ १६ ॥

उतापि च शतक्रतुरिंद्रस्त्यं तं प्रसिद्धमग्रुव एतन्नाम्न्याः पुत्रं परावृक्तमेतन्नामकमुक्थेषु स्तोत्रेष्वाभजत् । भागिनं कृतवान् । अयमर्थो वम्रीभिः पुत्रमग्रुवः । ऋग्वे० ४. १९. ९. । इत्यस्यामृचि प्रतिपादित इति ॥

॥ अथ सप्तदशी ॥

उत त्या तुर्वशायदू अस्नातारा शचीपतिः । इंद्रो विद्वाँ अपारयत् ॥ १७ ॥

उत । त्या । तुर्वशायदू इति । अस्नातारा । शचीऽपतिः । इंद्रः । विद्वान् । अपारयत् ॥ १७ ॥

उतापि च अस्नातारास्नातारौ ययातिशापादनभिषिक्तौ त्या त्यौ तौ प्रसिद्धौ तुर्वशायदू तुर्वशनामानं यदुनामकं च राजानौ शचीपतिः कर्मणां पालकः । यद्वा शचींद्रस्य भार्या । तस्याः पतिर्भर्ता विद्वान् सकलमपि जानन्निंद्रोऽपारयत् । अभिषेकार्हावकरोत् ॥

॥ अथाष्टादशी ॥

उत त्या सद्य आर्या सरयोरिंद्र पारतः । अर्णाचित्ररथावधीः ॥ १८ ॥

उत । त्या । सद्यः । आर्या । सरयोः । इंद्र । पारतः । अर्णाचित्ररथा । अवधीः ॥ १८ ॥

उतापि च सद्यः सपदि हे इंद्र त्वं त्या त्यौ तावार्यावार्यत्वाभिमानिनौ संतावपि । इंद्रविषयभक्तिश्रद्धारहितावित्यर्थः । सरयोः सरय्वा नद्याः पारतः पारे तीरे वसंतावर्णाचित्ररथा अर्णनामकं चित्ररथनामकं च राजानाववधीः । अहिंसीः ॥

॥ अथैकोनविंशी ॥

अनु द्वा जहिता नयोऽधं श्रोणं च वृत्रहन् । न तत्ते सुम्नमष्टवे ॥ १९ ॥

अनु । द्वा । जहिता । नयः । अंधं । श्रोणं । च । वृत्रऽहन् । न । तत् । ते । सुम्नं । अष्टवे ॥ १९ ॥

हे वृत्रहन् वृत्रस्य हिंसकेंद्र त्वं जहिता जहितौ सर्वैर्बंधुभिस्त्यक्तावंधं चक्षुर्हीनमेकं श्रोणं च पंगुमपरं च द्वा एतौ द्वावनुनयः। अंधपंगुत्वपरिहारेणानुनीतवानसि। हे इंद्र ते त्वया दत्तं तत्सुखं सुखमष्टवे व्याप्तुं कोऽपि न प्रभवतीति शेषः॥

॥ अथ विंशी ॥

शतमश्मन्मयीनां पुरामिंद्रो व्यास्यत्। दिवोदासाय दाशुषे ॥ २० ॥

शतं। अश्मन्ऽमयीनां। पुरां। इंद्रः। वि। आस्यत्। दिवःऽदासाय। दाशुषे ॥ २० ॥

इंद्रोऽश्मन्मयीनां पाषाणैर्निर्मितानां पुरां शंबरस्य संबंधिनां नगराणां शतं शतसंख्याकं दिवोदासायैतन्नामकाय दाशुषे हविर्दत्तवते यजमानाय व्यास्यत्। व्यक्षिपत्॥

॥ इति तृतीयस्य षष्ठे द्वाविंशो वर्गः ॥

॥ अथैकविंशी ॥

अस्वापयद्दभीतये सहस्रा त्रिंशतं हथैः। दासानामिंद्रो मायया ॥ २१ ॥

अस्वापयत्। दभीतये। सहस्रा। त्रिंशतं। हथैः। दासानां। इंद्रः। मायया ॥ २१ ॥

इंद्रो मायया स्वकीयया शक्त्या दासानां लोकानामुपक्षपयितॄणां राक्षसादीनां त्रिंशतं त्रिंशत्संख्याकानि सहस्रा सहस्राणि दभीतये दभीतिनामकस्यार्थाय हथैर्हननसाधनैरायुधैरस्वापयत्। अवधीत्॥

॥ अथ द्वाविंशी ॥

स घेदुतासि वृत्रहन्त्समान इंद्र गोपतिः। यस्ता विश्वानि चिच्युषे ॥ २२ ॥

सः। घ। इत्। उत। असि। वृत्रऽहन्। समानः। इंद्र। गोऽपतिः। यः। ता। विश्वानि। चिच्युषे ॥ २२ ॥

उतापि च हे इंद्र यस्त्वं ता तानि विश्वा विश्वानि समस्तान् शत्रून् चिच्युषे प्राच्यावयः हे वृत्रहन् वृत्राणां शत्रूणां हिंसकेंद्र गोपतिर्गवां पालकः स त्वं समानः सर्वेषां यजमानानां समः सन् प्रख्यातोऽसि। घेदिति पूरणौ॥

॥ अथ त्रयोविंशी ॥

उत नूनं यदिंद्रियं करिष्या इंद्र पौंस्यं। अद्या नकिष्टदा मिनत् ॥ २३ ॥

उत। नूनं। यत्। इंद्रियं। करिष्याः। इंद्र। पौंस्यं। अद्य। नकिः। तत्। आ। मिनत् ॥ २३ ॥

उताधि च हे इंद्र यत्पौंस्यं त्वदीयं बलमिंद्रियं सामर्थ्योपेतं नूनं करिष्याः कृतवानसि खलु अद्याद्यतनः कश्चित्तद्बलं नकिरामिनत्। न हिंस्यात् ॥

॥ अथ चतुर्विंशी ॥

वामंवामं त आदुरे देवो ददात्वर्यमा।

वामं पूषा वामं भगो वामं देवः करूळती ॥२४॥

वामंऽवामं। ते। आऽदुरे। देवः। ददातु। अर्यमा।

वामं। पूषा। वामं। भगः। वामं। देवः। करूळती ॥२४॥

हे आदुरे शत्रूणां दारयितरिंद्र ते तव वामं वामं यद्यद्वननीयं संभजनीयं धनमस्ति लोके तद्वामं वस्वर्यमारीणां नियमयितैतन्नामको देवो ददातु। प्रयच्छतु। तथा करूळती कृत्तदंतः पूषा पोषको देवो वामं धनं ददातु। भगोऽपि धनं ददातु। अत्र करूळतीत्येतत्संनिहितत्वाद्भग इत्यनेन संबंधनीयं। अथवार्यमादीनां त्रयाणामपि विशेषणत्वेन भाव्यं। कथं पूष्णो विशेषणं स्यादिति साकांक्षत्वात् न। संनिध्याकांक्षयोः सद्भावेऽपि योग्यतामंतरेणान्वयायोगात्। तस्मात्पूषा प्रपिष्टभागोऽदंतको हीत्यादिश्रुतिषु पूष्ण एवादंतकत्वेन प्रसिद्धेर्व्यवहितस्यापि तस्यैव विशेषणत्वं युक्तं। वामं वननीयं भवतीत्यादि निरुक्तं। ६.३१.। अत्र द्रष्टव्यं ॥

॥ इति तृतीयस्य षष्ठे त्रयोविंशो वर्गः ॥

कया न इति पंचदशर्चं दशमं सूक्तं वामदेवस्यार्षमैंद्रं गायत्रं। अभी षु ण इत्येषा पादनिवृन्नाम गायत्री त्रयः सप्तकाः पादनिवृदिति तल्लक्षणयुक्तत्वात्। तथा चानुक्रमणिका। कया पंचोनाभी षु पादनिवृदिति ॥ सूक्तविनियोगो लैंगिकः। अग्निष्टोमे चातुर्विंशिकेऽहनि च माध्यंदिने सवने मैत्रावरुणस्य कया न इत्याद्यस्तृचः स्तोत्रियः। सूत्रितं च। होत्रकाणां कया नश्चित्र आ भुवत्। आ० ७.४.। इति ॥ वरुणप्रघासेषु कायस्य हविषोऽनुवाक्या कया न इत्येषा। तथा सूत्रितं च। कया नश्चित्र आभुवद्धिरण्यगर्भः समवर्तताग्रे। आ० २.१७.। इति॥

॥ तत्र प्रथमा ॥

कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥१॥

कया। नः। चित्रः। आ। भुवत्। ऊती। सदाऽवृधः। सखा। कया। शचिष्ठया। वृता ॥१॥

सदावृधः सदा वर्धमानश्चित्रश्चायनीयः पूजनीयः सखा मित्रभूत इंद्रः कयोती ऊत्या तर्पणेन नोऽस्माना भुवत्। आभिमुख्येन भवेत्। शचिष्ठया प्रज्ञावत्तमया प्रज्ञासहितमनुष्ठीयमानेन कया वृता केन वर्तनेन कर्मणा चाभिमुखो भवेत् ॥

॥ अथ द्वितीया ॥

कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदंधसः। दृळ्हा चिदारुजे वसु ॥२॥

कः। त्वा। सत्यः। मदानां। मंहिष्ठः। मत्सत्। अंधसः। दृळ्हा। चित्। आऽरुजे। वसु ॥२॥

मंहिष्ठः पूजनीयः सत्यः सत्यभूतो मदानां मादयितॄणां मध्ये को मदकरोऽधसः सोमस्य रसो दृळ्हा चित् दृढान्यपि वसु वसूनि शत्रूणां धनान्यारुज आ समंतात्भंकुं हे इंद्र त्वा त्वां मत्सत्। मादयेत् ॥

॥ अथ तृतीया ॥

अभी षु णः सखीनामविता जरितॄणां। शतं भवास्यूतिभिः ॥३॥

अभि। सु। नः। सखीनां। अविता। जरितॄणां। शतं। भवासि। ऊतिऽभिः ॥३॥

हे इंद्र त्वं सखीनां समानख्यातीनां जरितॄणां स्तोतॄणामविता रक्षिता त्वं शतं शतेन बह्वीभिरूतिभी रक्षाभिः सह नोऽस्माकं सु सुष्ठ्वभिभवासि। अभिमुखो भव ॥

॥ अथ चतुर्थी ॥

अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः। नियुद्भिश्चर्षणीनां ॥४॥

अभि। नः। आ। ववृत्स्व। चक्रं। न। वृत्तं। अर्वतः। नियुत्ऽभिः। चर्षणीनां ॥४॥

हे इंद्र त्वं वृत्तं चक्रं न वर्तमानं चक्रमिवार्वत उपगंतॄन्नोऽस्मान् चर्षणीनामस्मदीयानां मनुष्याणां नियुद्भिः स्तुतिभिरभ्याववृत्स्व। अभ्यावर्तस्व ॥

॥ अथ पंचमी ॥

प्रवता हि क्रतूनामा हा पदेव गच्छसि। अभक्षि सूर्ये सचा ॥५॥

प्रऽवता। हि। क्रतूनां। आ। ह। पदाऽइव। गच्छसि। अभक्षि। सूर्ये। सचा ॥५॥

हे इंद्र त्वं क्रतूनां कर्मणां यजमानानां संबंधिनः प्रवता प्रवतः प्रवणान्देशान्पदेव पदानि स्वकीयानि स्थानानीवागच्छसि हि। आगतो भवसि खलु। हेति पूरणः। हे इंद्र त्वामहं सूर्येण सचा सहाभक्षि। भजे ॥

॥ इति तृतीयस्य षष्ठे चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

सं यत्त इंद्र मन्यवः सं चक्राणि दधन्विरे । अध त्वे अध सूर्ये ॥ ६ ॥

सं । यत् । ते । इंद्र । मन्यवः । सं । चक्राणि । दधन्विरे । अध । त्वे इति । अध । सूर्ये ॥ ६ ॥

हे इंद्र ते त्वदर्थं मन्यवः स्तुतयो यद्यदा संदधन्विरे अस्माभिरनुमन्यंते । चक्राणि चंक्रमणानि कर्माणि च संदधन्विरे अध तदानीं ताः स्तुतयस्तानि कर्माणि च त्वे त्वयि भवंति । अध तदनंतरं सूर्ये च भवंति ॥

॥ अथ सप्तमी ॥

उत स्मा हि त्वामाहुरिन्मघवानं शचीपते । दातारमविदीधयुं ॥ ७ ॥

उत । स्म । हि । त्वां । आहुः । इत् । मघऽवानं । शचीऽपते । दातारं । अविऽदीधयुं ॥ ७ ॥

हे शचीपते कर्मपालकेंद्र उतापि च मघवानं धनवंतं दातारं स्तोतृभ्योऽभीष्टप्रदं त्वा त्वामविदीधयुं । विदीधयुरदीप्यमानः । न विदीधयुरविदीधयुः । तं दीप्यमानमाहुः स्म । प्रवदंति खलु । हीदिति द्वयं पूरणार्थं ॥

॥ अथाष्टमी ॥

उत स्मा सद्य इत्परि शशमानाय सुन्वते । पुरू चिन्मंहसे वसु ॥ ८ ॥

उत । स्म । सद्यः । इत् । परि । शशमानाय । सुन्वते । पुरु । चित् । मंहसे । वसु ॥ ८ ॥

उतापि च हे इंद्र त्वं सद्य इत्सद्य एव शशमानाय स्तुतिं कुर्वते । शशमानः शंसमान इति यास्केनोक्तत्वात् । सुन्वते सोमाभिषवं कुर्वते यजमानाय पुरु चित्पुरूणि बहून्यपि वसु वसूनि धनानि परि परितो मंहसे स्म । प्रयच्छसि खलु ॥

॥ अथ नवमी ॥

नहि ष्मा ते शतं चन राधो वरंत आमुरः । न च्यौत्नानि करिष्यतः ॥ ९ ॥

नहि । स्म । ते । शतं । चन । राधः । वरंते । आऽमुरः । न । च्यौत्नानि । करिष्यतः ॥ ९ ॥

हे इंद्र आमुरो बाधका राक्षसादयस्ते त्वदीयं शतं चन शतपरिमितमपि राधो धनं नहि वरंते स्म । न वारयंति खलु । किंच शत्रूणां हिंसनं करिष्यतस्तव च्यौत्नानि बलानि न वारयंति ॥

॥ अथ दशमी ॥

अस्माँ अवंतु ते शतमस्मान्त्सहस्रमूतयः । अस्मान्विश्वा अभिष्टयः ॥१०॥

अस्मान्। अवंतु। ते। शतं। अस्मान्। सहस्रं। ऊतयः। अस्मान्। विश्वाः। अभिष्टयः॥१०॥

हे इंद्र ते त्वदीयाः शतं शतसंख्याका ऊतयो रक्षा अस्मानवंतु । रक्षंतु । सहस्रं सहस्रसंख्याकास्त्वदीया रक्षा अस्मानवंतु । विश्वाः सर्वाण्यभीष्टयस्त्वदीयान्यभिगमनान्यस्मानवंतु ॥

॥ इति तृतीयस्य षष्ठे पंचविंशो वर्गः ॥

॥ अथैकादशी ॥

अस्माँ इहा वृणीष्व सख्याय स्वस्तये । महो राये दिवित्मते ॥११॥

अस्मान् । इह । वृणीष्व । सख्याय । स्वस्तये । महः । राये । दिवित्मते ॥११॥

हे इंद्र त्वमिहास्मिन्यज्ञेऽस्मान्यजमानान् सख्याय सखिभावाय स्वस्तयेऽविनाशाय च महो महते दिवित्मते दीप्तिमते राये धनाय च वृणीष्व । संभजस्व ॥

॥ अथ द्वादशी ॥

अस्माँ अविड्ढि विश्वहेंद्र राया परीणसा । अस्मान्विश्वाभिरूतिभिः ॥१२॥

अस्मान् । अविड्ढि । विश्वहा । इंद्र । राया । परीणसा । अस्मान् । विश्वाभिः । ऊतिऽभिः ॥१२॥

हे इंद्र त्वं विश्वहा सर्वेष्वहःसु परीणसा महता राया धनेनास्मान्यजमानान विड्ढि । रक्ष । किंच विश्वाभिः *सर्वाभिरूतिभी* रक्षाभिरस्मानविड्ढि ॥

॥ अथ त्रयोदशी ॥

अस्मभ्यं ताँ अपा वृधि व्रजाँ अस्तेव गोमतः । नवाभिरिंद्रोतिभिः ॥१३॥

अस्मभ्यं । तान् । अप । वृधि । व्रजान् । अस्ताऽइव । गोऽमतः । नवाभिः । इंद्र । ऊतिऽभिः ॥१३॥

हे इंद्र त्वं नवाभिर्नूतनाभिरूतिभी रक्षाभिरस्तेव क्षेप्ता शूर इव गोमतो गोभिर्युक्तान् तान् प्रसिद्धान्व्रजान् गोनिवासानस्मभ्यमपावृधि । उद्घाटय ॥

॥ अथ चतुर्दशी ॥

अस्माकं धृष्णुया रथो द्युमाँ इंद्रानपच्युतः । गव्युरश्वयुरीयते ॥१४॥

अस्माकं। धृष्णुऽया। रथः। द्युऽमान्। इंद्र। अनपऽच्युतः। गव्युः। अश्वऽयुः। ईयते ॥१४॥

हे इंद्र धृष्णुया धृष्णुः शत्रूणां धर्षको द्युमान्दीप्तिमाननपच्युतो विनाशरहितो गव्युर्गोमानश्वयुरश्ववानस्माकमस्मत्संबंधी रथ ईयते । सर्वत्र गच्छतु । तेन रथेनास्मान्रक्षेत्यर्थः ॥

अस्माकमुत्तमं कृधीत्यनयादित्यं दृष्ट्वा रथादवरोहेत् । तथा च सूत्रितं । अस्माकमुत्तमं कृधीत्यादित्यमीक्षमाणो जपित्वावरोहेत् । गृ॰ सू॰ २. ६. । इति ॥

॥ सैषा पंचदशी ॥

अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य । वर्षिष्ठं द्यामिवोपरि ॥१५॥

अस्माकं। उत्ऽतमं। कृधि। श्रवः। देवेषु। सूर्य। वर्षिष्ठं। द्यांऽइव। उपरि ॥१५॥

हे सूर्य सर्वस्य प्रेरकेंद्र हे आदित्य वा त्वं देवेषु द्योतमानेषु वस्वादिषु मध्येऽस्माकमस्मत्संबंधि श्रवो यश उत्तममुत्कृष्टं कृधि । कुरु । तत्र दृष्टांतः । वर्षिष्ठमतिशयेन प्रवृद्धं सेचनसमर्थं वा द्यामिव द्युलोकं यथा सर्वेषां लोकानामुपरि स्थितमुत्कृष्टमकरोस्तद्वत् ॥

॥ इति तृतीयस्य षष्ठे षड्विंशो वर्गः ॥

आ तू न इंद्रेति चतुर्विंशत्यृचमेकादशं सूक्तं वामदेवस्यार्षं गायत्रमैंद्रं । अंत्ये कनीनकेवेत्यादिके द्वे इंद्रस्याश्वदेवताके । तथा चानुक्रांतं । आ तू नश्चतुर्विंशतिरंत्याभ्यामिंद्राश्वौ स्तुताविति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

आ तू नं इंद्र वृत्रहन्नस्माकमर्धमा गहि । महान्महीभिरूतिभिः ॥१॥

आ। तु। नः। इंद्र। वृत्रऽहन्। अस्माकं। अर्धं। आ। गहि। महान्। महीभिः। ऊतिऽभिः ॥१॥

हे वृत्रहन् वृत्राणां शत्रूणां हिंसकेंद्र त्वं नोऽस्मान्प्रति तु क्षिप्रमागच्छ । हे इंद्र महान्प्रभूतस्त्वं महीभिर्महतीभिरूतिभी रक्षाभिः सहास्माकमर्धं समीपमागहि । आगच्छ ॥

॥ अथ द्वितीया ॥

भूमिश्चिद्घासि तूतुजिरा चित्र चित्रिणीष्वा। चित्रं कृणोष्यूतये ॥२॥

भूमिः। चित्। घ। असि। तूतुजिः। आ। चित्र। चित्रिणीषु। आ। चित्रं। कृणोषि। ऊतये ॥२॥

हे चित्र चायनीय पूजनीयेंद्र त्वं भूमिश्चित् भ्रमणशीलोऽपि तूतुजिर्घासि। अस्मदभीष्टप्रदाता च भवसि। आकारश्चार्थे। चित्रिणीषु चित्रकर्मयुक्तास्वस्मद्रूपासु प्रजासु चित्रं चायनीयं धनमूतये रक्षणाय आ कृणोषि। आ समंतात्करोषि। घेति पूरणः ॥

॥ अथ तृतीया ॥

दभ्रेभिश्चिच्छशीयांसं हंसि व्राधंतमोजसा। सखिभिर्ये त्वे सचा ॥३॥

दभ्रेभिः। चित्। शशीयांसं। हंसि। व्राधंतं। ओजसा। सखिऽभिः। ये। त्वे इति। सचा ॥३॥

हे इंद्र त्वं दभ्रेभिश्चिदल्पैरपि सखिभिर्यजमानैः सह शशीयांसं ॥ शश प्लुतगतौ ॥ उत्प्लवमानं व्राधंतं महांतमपि शत्रुमोजसा बलेन हंसि। नाशयसि। ये यजमानास्त्वे त्वयि सचा संगताः। तैरिति पूर्वेण संबंधः ॥

॥ अथ चतुर्थी ॥

वयमिंद्र त्वे सचा वयं त्वाभि नोनुमः। अस्माँअस्माँ इदुदव ॥४॥

वयं। इंद्र। त्वे इति। सचा। वयं। त्वा। अभि। नोनुमः। अस्मान्ऽअस्मान्। इत्। उत्। अव ॥४॥

हे इंद्र वयं यजमानास्त्वे त्वयि सचा संगताः स्मः। वयं त्वा त्वामभिनोनुमः। अतिशयेनाभिष्टुमः। हे इंद्र त्वमप्यस्मानस्मानित् सर्वानस्मानेवोदव। उत्कर्षेण रक्ष ॥

॥ अथ पंचमी ॥

स नश्चित्राभिरद्रिवोऽनवद्याभिरूतिभिः। अनाधृष्टाभिरा गहि ॥५॥

सः। नः। चित्राभिः। अद्रिऽवः। अनवद्याभिः। ऊतिऽभिः। अनाधृष्टाभिः। आ। गहि ॥५॥

हे अद्रिवो वज्रवन्निंद्र स त्वं चित्राभिश्चायनीयाभिरनवद्याभिरनिंदिताभिरनाधृष्टाभिः शत्रुभिरप्रधर्षितैरूतिभी रक्षणैः सहितो नोऽस्मानागहि। आगच्छ ॥

॥ इति तृतीयस्य षष्ठे सप्तविंशो वर्गः ॥

॥ अथ षष्ठी ॥

भूयामो षु त्वावतः सखाय इंद्र गोमतः। युजो वाजाय घृष्वये ॥६॥

भूयामो इति। सु। त्वाऽवतः। सखायः। इंद्र। गोऽमतः। युजः। वाजाय। घृष्वये ॥६॥

हे इंद्र त्वावतस्त्वत्सदृशस्य गोमतो गोभिर्युक्तस्य देवस्य संबंधिनः सखायः स्तोतारो वयं घृष्वये महते वाजायान्नाय युजः संयुक्ताः सु सुष्ठु भूयामो। भवामैव ॥

॥ अथ सप्तमी ॥

त्वं ह्येक ईशिष इंद्र वाजस्य गोमतः। स नो यंधि महीमिषं ॥७॥

त्वं। हि। एकः। ईशिषे। इंद्र। वाजस्य। गोऽमतः। सः। नः। यंधि। महीं। इषं ॥७॥

हे इंद्र हि यस्मात्कारणात्त्वमेक एव गोमतो गोभिर्युक्तस्य वाजस्यान्नस्येशिषे प्रभवसि अतः कारणात्स त्वं नोऽस्मभ्यं महीं महतीमिषमन्नं यंधि। प्रयच्छ ॥

॥ अथाष्टमी ॥

न त्वा वरंते अन्यथा यद्दित्ससि स्तुतो मघं। स्तोतृभ्य इंद्र गिर्वणः ॥८॥

न। त्वा। वरंते। अन्यथा। यत्। दित्ससि। स्तुतः। मघं। स्तोतृऽभ्यः। इंद्र। गिर्वणः ॥८॥

हे इंद्र गिर्वणो गिरां संभक्तः स्तुतोऽस्माभिः संस्तुतो यद्यदा स्तोतृभ्योऽस्मभ्यं मघं धनं दित्ससि दातुमिच्छसि तदा त्वा त्वामन्यथा प्रकारांतरेण न वरंते। न निवारयंति। किंतु सर्वेऽप्यनुकूला एव भवंति ॥

॥ अथ नवमी ॥

अभि त्वा गोतमा गिरानूषत प्र दावने। इंद्र वाजाय घृष्वये ॥९॥

अभि। त्वा। गोतमाः। गिरा। अनूषत। प्र। दावने। इंद्र। वाजाय। घृष्वये ॥९॥

हे इंद्र त्वा त्वामभि लक्षीकृत्य गोतमा एतन्नामका ऋषयो गिरा स्तुतिरूपया वाचा दावने धनदानार्थं प्रानूषत। प्रकर्षेण स्तुवंति। घृष्वये महते वाजायान्नाय प्रस्तुवंति ॥

॥ अथ दशमी ॥

प्र ते वोचाम वीर्या३ या मंदसान आरुजः। पुरो दासीरभीत्य ॥१०॥

प्र। ते। वोचाम। वीर्या। याः। मंदसानः। आ। अरुजः। पुरः। दासीः। अभिऽइत्य ॥१०॥

हे इंद्र मंदसानः सोमेन मोदमानस्त्वं दासीः घेधुरसुरस्य स्वभूता याः पुरो यानि नगराण्यभीत्याभिगम्यारुजः आ समंतादभांक्षीः हे इंद्र ते त्वदीयानि तानि वीर्या वीर्याणि वयं स्तोतारः प्र वोचाम । प्रकर्षेण वदाम ॥

॥ इति तृतीयस्य षष्ठेऽष्टाविंशो वर्गः ॥

॥ अथैकादशी ॥

ता ते गृणंति वेधसो यानि चकर्थ पौंस्या । सुतेष्विंद्र गिर्वणः ॥ ११ ॥

ता । ते । गृणंति । वेधसः । यानि । चकर्थ । पौंस्या । सुतेषु । इंद्र । गिर्वणः ॥ ११ ॥

हे इंद्र गिर्वणो गिरां स्तुतिरूपाणां वाचां संभक्ता त्वं यानि पौंस्या पौंस्यानि बलानि चकर्थ कृतवानसि हे इंद्र वेधसः प्राज्ञाः सुतेष्वभिषुतेषु सोमेषु ते त्वदीयानि ता तानि बलानि गृणंति । कीर्तयंति ॥

॥ अथ द्वादशी ॥

अवीवृधंत गोतमा इंद्र त्वे स्तोमवाहसः । ऐषु धा वीरवद्यशः ॥ १२ ॥

अवीवृधंत । गोतमाः । इंद्र । त्वे इति । स्तोमऽवाहसः । आ । एषु । धाः । वीरऽवत् । यशः ॥ १२ ॥

स्तोमवाहसः स्तोमानां स्तोत्राणां वोढारो गोतमा ऋषयो हे इंद्र त्वे त्वामवीवृधंत । स्तोत्रैर्वर्धयंति । त्वमेषु गोतमेषु वीरवत्पुत्रपौत्रादियुक्तं यशोऽन्नमाधाः । निधेहि ॥

॥ अथ त्रयोदशी ॥

यच्चिद्धि शश्वतामसींद्र साधारणस्त्वं । तं त्वा वयं हवामहे ॥ १३ ॥

यत् । चित् । हि । शश्वतां । असि । इंद्र । साधारणः । त्वं । तं । त्वा । वयं । हवामहे ॥ १३ ॥

हे इंद्र त्वं यच्चिद्धि यद्यपि खलु शश्वतां बहूनां सर्वेषां यजमानानां साधारणोऽसि सामान्यो भवसि तथापि तमेव त्वा त्वां वयं स्तोतारो हवामहे । आह्वयामः ॥

॥ अथ चतुर्दशी ॥

अर्वाचीनो वसो भवास्मे सु मत्स्वांधसः । सोमानामिंद्र सोमपाः ॥ १४ ॥

अर्वाचीनः । वसो इति । भव । अस्मे इति । सु । मत्स्व । अंधसः । सोमानां । इंद्र । सोमऽपाः ॥ १४ ॥

हे वसो वसो निवासयितरिंद्र नमस्मे अस्मासु यजमानेष्वर्वाचीनोऽभिमुखो भव । तथा हे सोमपाः सोमानां पातरिंद्र त्वं सोमानामंधसोऽन्नेन सु सुष्ठु मत्स्व । माद्य ॥

॥ अथ पंचदशी ॥

अस्माकं त्वा मतीनामा स्तोम इंद्र यच्छतु । अर्वागा वर्तया हरी ॥१५॥

अस्माकं । त्वा । मतीनां । आ । स्तोमः । इंद्र । यच्छतु । अर्वाक् । आ । वर्तय । हरी इति ॥१५॥

मतीनां स्तोतॄणां ॥ मन्यतेः कर्तरि क्तिच् ॥ अस्माकं संबंधि स्तोमः स्तोत्रं हे इंद्र त्वा त्वामायच्छतु । अस्मासु नियच्छतु । त्वमपि हरी त्वदीयावश्वावर्वागस्मदभिमुखं यथा भवति तथावर्तय । परिवर्तनं कुरु ॥

॥ अथ षोडशी ॥

पुरोळाशं च नो घसो जोषयासे गिरश्च नः । वधूयुरिव योषणां ॥१६॥

पुरोळाशं । च । नः । घसः । जोषयासे । गिरः । च । नः । वधूयुःऽइव । योषणां ॥१६॥

हे इंद्र त्वं नोऽस्मदीयं पुरोळाशं च पुरोडाशरूपमन्नं घसः । अद्धि । तथा नोऽस्मदीया गिरश्च स्तुतिरूपा वाचश्च जोषयासे । सेवस्व । तत्र दृष्टांतः । वधूयुरिव । स्त्रीकामो यथा योषणां स्त्रीणां गिरः सेवते तद्वत् ॥

॥ इति तृतीयस्य षष्ठ एकोनविंशो वर्गः ॥

॥ अथ सप्तदशी ॥

सहस्रं व्यतीनां युक्तानामिंद्रमीमहे । शतं सोमस्य खार्यः ॥१७॥

सहस्रं । व्यतीनां । युक्तानां । इंद्रं । ईमहे । शतं । सोमस्य । खार्यः ॥१७॥

वयं स्तोतार इंद्रं परमैश्वर्ययुक्तं युक्तानां शिक्षितानां व्यतीनां गमनवतामश्वानां सहस्रं सहस्रसंख्याकमीमहे । याचामहे । तथा सोमस्याभिषुतसोमस्य शतं शतसंख्याकाः खार्यः खारीरीमहे । अत्र मानविशेषवाचिना खारीशब्देन द्रोणकलश उपलक्ष्यते । अपरिमितद्रोणकलशान् बहून्यज्ञान्याचामह इत्यर्थः ॥

॥ अथाष्टादशी ॥

सहस्रा ते शता वयं गवामा च्यावयामसि । अस्मत्रा राध एतु ते ॥१८॥

सहस्रा । ते । शता । वयं । गवां । आ । च्यवयामसि । अस्मऽत्रा । राधः । एतु । ते ॥१८॥

हे इंद्र ते त्वदीयानि गवां सहस्रा सहस्रसंख्याकानि शता शतसंख्याकानि चाभ्यावयामसि । आभ्यावयामः । अस्मदभिमुखं कुर्मः । तथास्मचास्मदीयं राधो धनं ते त्वत्त एतु । आगच्छतु ॥

॥ अथैकोनविंशी ॥

दश ते कलशानां हिरण्यानामधीमहि । भूरिदा असि वृत्रहन् ॥१९॥

दश । ते । कलशानां । हिरण्यानां । अधीमहि । भूरिऽदाः । असि । वृत्रऽहन् ॥१९॥

हे इंद्र ते त्वत्तः कलशानां कुंभानां । कुंभपरिमितानामिति यावत् । हिरण्यानां हितरमणीयानां धनानां दश दशसंख्याकान्यधीमहि । धारयामः । हे वृत्रहन्वृत्राणां शत्रूणां हिंसकेंद्र त्वं भूरिदा असि । बहुप्रदो भवसि ॥

॥ अथ विंशी ॥

भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर । भूरि घेदिंद्र दित्ससि ॥२०॥

भूरिऽदाः । भूरि । देहि । नः । मा । दभ्रं । भूरि । आ । भर । भूरि । घ । इत् । इंद्र । दित्ससि ॥२०॥

हे इंद्र भूरिदा बहुप्रदस्त्वं भूरि बहु धनं नोऽस्मभ्यं देहि । प्रयच्छ । किंतु दभ्रमल्पं धनं मा प्रयच्छ । भूरि बहुलं धनमस्मभ्यमाभर । आहर । किंच भूरीत् अदभ्रमेव धनं दित्ससि घ । अस्मभ्यं दातुमिच्छसि खलु ॥

॥ अथैकविंशी ॥

भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन् । आ नो भजस्व राधसि ॥२१॥

भूरिऽदाः । हि । असि । श्रुतः । पुरुऽत्रा । शूर । वृत्रऽहन् । आ । नः । भजस्व । राधसि ॥२१॥

हे वृत्रहन्वृत्रस्य हिंसक शूर विक्रांतेंद्र भूरिदा बहुप्रदस्त्वं पुरुत्रा पुरुषु बहुषु यजमानेषु श्रुतोऽसि हि । विख्यातो भवसि खलु । राधसि धने नोऽस्माना भजस्व । आ समंताद्भागिनः कुरु ॥

॥ अथ द्वाविंशी ॥

प्र ते बभ्रू विचक्षण शंसामि गोषणो नपात् । माभ्यां गा अनु शिश्रथः ॥२२॥

प्र । ते । बभ्रू इति । विऽचक्षण । शंसामि । गोऽसनः । नपात् । मा । आभ्यां । गाः । अनु । शिश्रथः ॥२२॥

हे विचक्षण प्राज्ञेंद्र ते त्वदीयौ बभ्रू बभ्रुवर्णावश्वौ प्र शंसामि । प्रकर्षेण

स्तौमि । हे गोसनो गवां सनितर्हे नपात् न पातयितः स्तोतृनविनाशयितः । किंतु पालयितरित्यर्थः । हे इंद्र त्वमाभ्यां त्वदीयाभ्यामश्वाभ्यां गा अनु अस्मदीया गा लक्षीकृत्य मा शिश्रथः । विनष्टा मा कार्षीः । गावोऽश्वदर्शनाद्बिभ्यति । तन्मा भूदित्यर्थः ॥

॥ अथ त्रयोविंशी ॥

कनीनकेव विद्रधे नवे द्रुपदे अर्भके । बभ्रू यामेषु शोभेते ॥ २३ ॥

कनीनकाऽइव । विद्रधे । नवे । द्रुऽपदे । अर्भके । बभ्रू इति । यामेषु । शोभेते इति ॥ २३ ॥

विद्रधे विहढे व्यूढे नवे नवजातेऽर्भकेऽल्पके द्रुपदे द्रुमाख्यस्थाने स्थिते कनीनकेव कमनीये शालभंजिके इव हे इंद्र बभ्रू बभ्रुवर्णौ त्वदीयावश्वौ यामेषु यज्ञेषु शोभेते । कांतियुक्तौ भवतः । कनीनके कन्यके । कन्या कमनीया भवति केयं नेतव्येति वा कमनेनानीयत इति वा कनतेर्वा स्यात्कांतिकर्मण इत्यादि निरुक्तं ॥

॥ अथ चतुर्विंशी ॥

अरं म उस्रयाम्णेऽरमनुस्रयाम्णे । बभ्रू यामेष्वस्रिधा ॥ २४ ॥

अरं । मे । उस्रऽयाम्ने । अरं । अनुस्रऽयाम्ने । बभ्रू इति । यामेषु । अस्रिधा ॥ २४ ॥

हे इंद्र अस्रिधास्रिधावहिंसकौ बभ्रू बभ्रुवर्णौ त्वदीयावश्वौ यामेषु गमनेषु प्राप्तेषु सत्सूस्रियाम्णे । उस्राभ्यामनडुद्भ्यां युक्तेन रथेन यातीत्युस्रयामा । तस्मै मे मह्यमरमलं पर्याप्तकारिणौ भवतां । अनुस्रयाम्णे पद्मामेव गच्छते मह्यमरं पर्याप्तकारिणौ भवतां ॥

॥ इति तृतीयस्य षष्ठे त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके षष्ठोऽध्यायः

॥ दशतय्याश्चतुर्थमंडले तृतीयानुवाकः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

चतुर्थेऽनुवाके त्रयोदश सूक्तानि । तत्र प्र ऋभुभ्य इत्येकादशर्चं प्रथमं सूक्तं वामदेवस्यार्षं त्रैष्टुभं । तुह्यादिपरिभाषयेदमादिसूक्तपंचकमृभुदेवताकं । अत्रानुक्रमणिका । प्र ऋभुभ्य एकादशार्भवं वा इति ॥ व्यूढे दशरात्रे चतुर्थेऽहनि वैश्वदेवशस्त्र आर्भवनिविद्धानीयमिदं । तथा च सूचितं । प्र ऋभुभ्यः प्र शुक्रैत्विति वैश्वदेवं । आ० ८.८. । इति ॥

॥ तत्र प्रथमा ॥

प्र ऋभुभ्यो दूतमिव वाचमिष्य उपस्तिरे श्वैतरीं धेनुमीळे ।
ये वातजूतास्तरणिभिरेवैः परि द्यां सद्यो अपसो बभूवुः ॥ १ ॥
प्र । ऋभुऽभ्यः । दूतंऽइव । वाचं । इष्ये । उपऽस्तिरे । श्वैतरीं । धेनुं । ईळे ।
ये । वातऽजूताः । तरणिऽभिः । एवैः । परि । द्यां । सद्यः । अपसः । बभूवुः ॥ १ ॥

तत्र ऋभूणां पूर्वं मनुष्याणामेव सतां तपसा देवत्वप्राप्तिरार्भवं शंसत्यृभवो वै देवेभ्यः । ऐ० ब्रा० ३.३०. । इत्यत्र ब्राह्मणे स्पष्टमाम्नाता । केचन ऋभवो नाम सूर्यरश्मय इत्याचक्षते । अहं यजमान ऋभुभ्य उरुभासमानेभ्य एतन्नामकेभ्यो देवेभ्यो वाचं स्तुतिरूपां प्रेष्ये । प्रेरयामि । किमिव । दूतमिव । यथा दूतं स्वकार्यं प्रति प्रेषयंति तद्वत् । किंच उपस्तिरे सोमोपस्तरणाय श्वैतरीं पयोयुक्तां श्वेततरां वा धेनुमीळे । याचाम्यृभून् । य ऋभवो वातजूता वातसमानगतयोऽपसो जगदुपकारिकर्माणः संतस्तरणिभिस्तारकैरेवैर्गमनशीलैरश्वैर्द्यामंतरिक्षं सद्यस्तदानीमेव परिबभूवुः परिभवंति सर्वतो व्याप्नुवंति । अथ रश्मय एव ऋभव इत्युक्तत्वादादित्यं वा रश्मयः परितो व्याप्नुवंति ॥

॥ अथ द्वितीया ॥

यदारमक्रन्नृभवः पितृभ्यां परिविष्टी वेषणा दंसनाभिः ।
आदिद्देवानामुप सख्यमायन्धीरासः पुष्टिमवहन्मनायै ॥ २ ॥

यदा । अरं । अक्रन् । ऋभवः । पितृऽभ्यां । परिऽविष्टी । वेषणा । दंसनाभिः ।
आत् । इत् । देवानां । उप । सख्यं । आयन् । धीरासः । पुष्टिं । अवहन् । मनायै ॥२॥

यदा यस्मिन्काल ऋभवः पितृभ्यां मातापितृभ्यां परिविष्टी परिवेषणेन परिचर्यया वेषणा वेषणेन व्याप्त्या । यद्वा वेषेण जरद्रूपयोर्युवत्वकरणेन दंसनाभिरन्यैश्चमसनिर्माणादिकर्मभिररमत्यर्थमक्रन् आदिदनंतरमेव देवानामिंद्रादीनां सख्यं सखित्वं समानख्यानत्वं देवतात्वमुपायन् । आगमन् । युवशा कर्वा । ऋग्वे० १. १६१. ३. । इति देवत्वप्राप्तेरेकांतत्वेन देवैरुक्तत्वादिति भावः । किंच धीरासो धीरा बुद्धिमंतस्तेषां पुष्टिं गवादिविषयां मनाया ऋतेन यजमानायावहन् । वहंति । धारयंति । यद्वा सविषयां पुष्टिं मनायै मनसे प्रकृष्टमनस्कत्वायावहन् ॥

॥ अथ तृतीया ॥

पुनर्ये चक्रुः पितरा युवाना सना यूपेव जरणा शयाना ।
ते वाजो विभ्वाँ ऋभुरिंद्रवंतो मधुप्सरसो नोऽवंतु यज्ञं ॥३॥
पुनः । ये । चक्रुः । पितरा । युवाना । सना । यूपाऽइव । जरणा । शयाना ।
ते । वाजः । विऽभ्वा । ऋभुः । इंद्रऽवंतः । मधुऽप्सरसः । नः । अवंतु । यज्ञं ॥३॥

य ऋभवः पितरा मातापितरौ यूपेव छिन्नस्थाणू इव जरणा जीर्णौ शयानौ पुनः सना सदा युवाना युवानौ चक्रुः नित्यतरुणावकुर्वन् ते वाजो विभ्वा ऋभुश्च एतन्नामकास्त्रयः सुधन्वन आंगिरसस्य पुत्रा ऋषय इंद्रवंतोऽनुग्राहकेणेंद्रेण तद्वंतो मधुप्सरसो मधुरस्य सोमरसस्य भक्षयितारो मनोहररूपा वा नोऽस्मदीयं यज्ञमवंतु । रक्षंतु गच्छंतु वा ॥

॥ अथ चतुर्थी ॥

यत्संवत्समृभवो गामरक्षन्यत्संवत्समृभवो मा अपिंशन् ।
यत्संवत्समभरन्भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः ॥४॥
यत् । संऽवत्सं । ऋभवः । गां । अरक्षन् । यत् । संऽवत्सं । ऋभवः । माः । अपिंशन् ।
यत् । संऽवत्सं । अभरन् । भासः । अस्याः । ताभिः । शमीभिः । अमृतऽत्वं । आशुः ॥४॥

संवत्सं । संवसंति भूतान्यस्मिन्निति संवत्सः संवत्सरः । संवत्सरपर्यंतमृभवो गां

मृता[illegible]मालभन् । स्वसामर्थ्यादिति यत् यदेतत्कर्मोक्ति । तथा [illegible] [illegible]ऋभवो मांसमस्या एव गोर्मांसमपिंशन् अवयवानकुर्वन्निति यत् । किंच संवत्सं संवत्सरपर्यंतमस्या भासोऽभरन् दीप्तीरवयवशोभा अकुर्वन्निति यत् ताभिः शमीभिर्मृताया गोर्नवीकरणविषयैः कर्मभिरमृतत्वमाप्नुः । देवत्वं प्राप्ताः । धेनुः कर्त्वेति देवत्वप्राप्तिसाधनत्वेन देवैः प्रतिश्रुतत्वात् । यद्वाच संवत्समित्येतत्[illegible] सहेति व्याख्येयं ॥

॥ अथ पंचमी ॥

ज्येष्ठ आह चमसा द्वा करेति कनीयान्त्रीन्कृणवामेत्याह ।

कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत्पनयद्वचो वः ॥ ५ ॥

ज्येष्ठः । आह । चमसा । द्वा । कर । इति । कनीयान् । त्रीन् । कृणवाम । इति । आह ।

कनिष्ठः । आह । चतुरः । कर । इति । त्वष्टा । ऋभवः । तत् । पनयत् । वचः । वः ॥ ५ ॥

एकं चमसं चतुरः कृणोतन । ऋग्वे० १.१६१.२. । इति यदा देवदूतोऽग्निर्ऋभूनाह देवत्वप्राप्तुक्थेन तदा तेषु मध्ये देवत्वप्राप्त्युत्क एको ज्येष्ठ ऋभुरितरावाह । किमिति उच्यते । चमसा द्वा करेति । एकमेव संतं द्वौ कृणवामेति । कनीयान् तदनंतरो विभ्वा त्रीन् कृणवाम करवामेत्याह । तदवरः कनिष्ठो वाजश्चतुरः कर चतुर्धा करवामेत्याह । तदेव चतुष्करणरूपं हे ऋभवस्त्वष्टा युष्मद्गुरुः पनयत् । अस्तौत् । अंगीचकारेत्यर्थः ॥

॥ इति तृतीयस्य सप्तमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मुरेतां ।

विभ्राजमानांश्चमसाँ अहेवावेनत्त्वष्टा चतुरो ददृश्वान् ॥ ६ ॥

सत्यं । ऊचुः । नरः । एव । हि । चक्रुः । अनु । स्वधां । ऋभवः । जग्मुः । एतां ।

विऽभ्राजमानान् । चमसान् । अहाऽइव । अवेनत् । त्वष्टा । चतुरः । ददृश्वान् ॥ ६ ॥

नरो मनुष्यरूपा ऋभवः सत्यमूचुः । सत्यमेवाब्रुवन् । हि यस्मादेत एवैवं चक्रुः चतुरोऽकुर्वन् । यथोक्तं तथैव कृतत्वादित्यभिप्रायः । अनु चतुर्धाकरणानंतरमेतां तृतीयसवनगतां स्वधां सोमाख्यममृतमृभवो जग्मुः । एकं चमसं चतुरः कृणोतन साकं देवैर्यज्ञियासो भविष्यथेति श्रुतत्वात् । अथ त्वष्टा देवो विभ्राजमानानहेवा-

हानीव दीप्यमानांश्चमसांश्चतुरो ददृश्वान्दृष्टवान् सन्नवेनत्। अकामयत। अंगीचकारेत्यर्थः ॥

॥ अथ सप्तमी ॥

द्वादंश द्यून्यदगोह्यस्यातिथ्ये रणंन्नृभवः ससंतः।

सुक्षेत्राकृण्वन्ननंयंत सिंधून्धन्वातिष्ठन्नोषधीर्निम्नमापः ॥ ७ ॥

द्वादंश। द्यून्। यत्। अगोह्यस्य। आतिथ्ये। रणंन्। ऋभवः। ससंतः।

सुऽक्षेत्रा। अकृण्वन्। अनंयंत। सिंधून्। धन्वं। आ। अतिष्ठन्। ओषधीः।

निम्नं। आपः ॥ ७ ॥

तत्र रश्मय एव ऋभव इत्युक्तत्वात्तद्रूपेण स्तूयंते। यद्यदा द्वादश द्यून्दिवसान्। आर्द्रादिद्वादशवृष्टिनक्षत्राणीत्यर्थः। अगोह्यस्यागोप्यस्यादित्यस्य गृह आतिथ्ये। अकस्मादागतोऽतिथिः। तदुचितं सत्काररूपं कर्मातिथ्यं। तदर्थं ससंतः स्वपंतः सुखेन निवसंत ऋभवो रणन् रमंते। अगोह्यस्य यदसस्तना गृहे। ऋग्वे० १. १६१. ११.। इत्युक्तं। तदानीं सुक्षेत्राकृण्वन् अकृष्टानि शून्यानि क्षेत्राणि वृष्ट्या सस्यादिसमृद्धान्यकुर्वन्। सिंधून्नदीरनयंत। प्रैरयन्। तस्मिन् काल ओषधीरोषधयो धन्व निरुदकस्थानमाश्रित्यातिष्ठन्। निम्नं नीचस्थानमापोऽतिष्ठन्। उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वप इत्युक्तं ॥

॥ अथाष्टमी ॥

रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपां।

त आ तक्षंत्वृभवो रयिं नः स्ववसः स्वपसः सुहस्ताः ॥ ८ ॥

रथं। ये। चक्रुः। सुऽवृतं। नरेऽस्थां। ये। धेनुं। विश्वऽजुवं। विश्वऽरूपां।

ते। आ। तक्षंतु। ऋभवः। रयिं। नः। सुऽअवसः। सुऽअपसः। सुऽहस्ताः ॥ ८ ॥

य ऋभवः सुवृतं सुचक्रं सुष्ठु वर्तमानं वा नरेष्ठां नेतरि चक्रे वर्तमानं रथं चक्रुः। ये च विश्वजुवं विश्वस्य प्रेरयित्री विश्वरूपां बहुरूपामेतन्नामिकां वा धेनुं गां चक्रुः अकुर्वन्। बृहस्पतिर्विश्वरूपामुपाजत। ऋग्वे० १. १६१. ६.। इत्युक्तं। ते महांत ऋभवो नोऽस्माकं रयिं धनमा तक्षंतु। सर्वतो निष्पादयंतु। कीदृशास्त ऋभवः। स्वपसः सुकर्माणः स्ववसः शोभनान्नोपेताः सुहस्ताः शोभनहस्ताः ॥

॥ अथ नवमी ॥

अपो ह्येषामजुषंत देवा अभि क्रत्वा मनसा दीध्यानाः ।
वाजो देवानामभवत्सुकर्मेंद्रस्य ऋभुक्षा वरुणस्य विभ्वा ॥ ९ ॥

अपः । हि । एषां । अजुषंत । देवाः । अभि । क्रत्वा । मनसा । दीध्यानाः ।
वाजः । देवानां । अभवत् । सुऽकर्मा । इंद्रस्य । ऋभुक्षाः । वरुणस्य । विऽभ्वा ॥ ९ ॥

एषामृभूणामपोऽश्वरथनिर्माणादिरूपं कर्म देवा इंद्रादयोऽजुषंत । असेवंत । इंद्रो हरी युयुजे अश्विना रथमित्यादिमंत्रोक्तप्रकारेण स्वीकृतवंत इत्यर्थः । कीदृशास्ते । क्रत्वा वरप्रदानरूपेण कर्मणा मनसा शोभनेन चित्तेनानुग्रहयुक्तेनाभिदीध्याना दीप्यमानाः । देवानामनुग्रहेण किं लब्धमित्याह । सुकर्मा शोभनव्यापारो वाजः कनीयान्देवानां सर्वेषां संबंध्यभवत् । तथेंद्रस्य संबंध्यृभुक्षा ऋभुज्येष्ठः । विभ्वा मध्यमो वरुणस्य संबंध्यभवत् ॥

॥ अथ दशमी ॥

ये हरी मेधयोक्था मदंत इंद्राय चक्रुः सुयुजा ये अश्वा ।
ते रायस्पोषं द्रविणान्यस्मे धत्त ऋभवः क्षेमयंतो न मित्रं ॥ १० ॥

ये । हरी इति । मेधया । उक्था । मदंतः । इंद्राय । चक्रुः । सुऽयुजा । ये । अश्वा ।
ते । रायः । पोषं । द्रविणानि । अस्मे इति । धत्त । ऋभवः । क्षेमऽयंतः । न । मित्रं ॥ १० ॥

य ऋभवो हरी अश्वौ मेधया प्रज्ञयोक्था उक्थैः स्तुतिभिर्मदंतो हर्षयंतश्चक्रुः । ये च तौ सुयुजा सुयुजौ सुयोजनावश्वाविंद्रायेंद्रार्थं चक्रुः अकुर्वन् हे ऋभवस्ते यूयं रायस्पोषं धनपुष्टिं द्रविणानि गवादिधनानि च सुखानि वास्मे अस्मासु धत्त । धारयत । किमिव । क्षेमयंतः क्षेममिच्छंतो मित्रं न मित्रमिव । अत्र यद्यप्येक एव ऋभुनामा तत्संबंधादितरेऽप्यृभव उच्यंते प्राणभृन्न्यायेन ॥

॥ अथैकादशी ॥

इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रांतस्य सख्याय देवाः ।
ते नूनमस्मे ऋभवो वसूनि तृतीये अस्मिन्सवने दधात ॥ ११ ॥

इदा । अह्नः । पीतिं । उत । वः । मदं । धुः । न । ऋते । श्रांतस्य । सख्याय । देवाः ।
ते । नूनं । अस्मे इति । ऋभवः । वसूनि । तृतीये । अस्मिन् । सवने । दधात ॥ ११ ॥

इदानीं चमसादिनिर्माणानंतरमह्नः सुत्याहसंबंधिनस्तृतीये सवने पीतिं सोमपानमुतापि च मदं तज्जनितं वो युष्माकं धुः। ददुर्देवाः। श्रांतस्य श्रांतात्तपो-युक्तादृते सख्याय सखित्वाय न भवंति देवाः। यत एते श्रांता अतो ददुरित्यर्थः। हे ऋभवस्ते महांतो यूयं नूनं निश्चयमस्मे अस्मास्वस्मिन् तृतीये सवने वसूनि धनानि दधात। धारयत ॥

॥ इति तृतीयस्य सप्तमे द्वितीयो वर्गः ॥

ऋभुर्विभ्वेत्येकादशर्चं द्वितीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमार्भवं। ऋभुर्विभ्वेत्य-नुक्रमणिका॥ व्यूढे दशरात्रे पंचमेऽहनि वैश्वदेवशस्त्र आर्भवनिविद्धानीयमिदं। ऋभुर्विभ्वा स्तुषे जनं। आ० ८.८.। इति सूचितत्वात् ॥

॥ तत्र प्रथमा ॥

ऋभुर्विभ्वा वाज इंद्रो नो अच्छेमं यज्ञं रत्नधेयोप यात।

इदा हि वो धिषणा देव्यह्नामधात्पीतिं सं मदा अग्मता वः ॥१॥

ऋभुः। विऽभ्वा। वाजः। इंद्रः। नः। अच्छ। इमं। यज्ञं। रत्नऽधेया। उप। यात।

इदा। हि। वः। धिषणा। देवी। अह्नां। अधात्। पीतिं। सं। मदाः। अग्मत। वः ॥१॥

ऋभुर्विभ्वा वाज इंद्रश्चैते देवा नोऽस्मदीयमिमं यज्ञमच्छाभिमुखं रत्नधे-यास्मभ्यं रत्नधानायोपयात। उपगच्छत। ननु इंद्रः सोमस्वामित्वादागच्छतु कथमेतेषां यज्ञप्राप्तिरिति चेत्। उच्यते। इदा हीदानीं खलु वो युष्माकं धिषणा वाक् देवी प्रजापतेः संबंधिन्यह्नां सोमाभिषवसंबंधिनां पीतिं सोमपानमधात्। स प्रजापतिरब्रवीत्सवितारं तव वा इमेऽंतेवासास्त्वमेवैभिः संपिबस्व। ऐ० ब्रा० ३.३०.। इति ब्राह्मणं। यस्मादेवं तस्मान्मदाश्च वो युष्मान् समग्मत। संगताः। यद्वा वो मदा देवैः संगताः ॥

॥ अथ द्वितीया ॥

विदानासो जन्मनो वाजरत्ना उत ऋतुभिर्ऋभवो मादयध्वं।

सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे रयिमेरयध्वं ॥२॥

विदानासः। जन्मनः। वाजऽरत्नाः। उत। ऋतुऽभिः। ऋभवः। मादयध्वं।

सं। वः। मदाः। अग्मत। सं। पुरंऽधिः। सुऽवीरां। अस्मे इति। रयिं। आ। ईरयध्वं ॥२॥

हे वाजरत्नाः सोमलक्षणेनान्नेन राजमाना ऋभवो यूयं जन्मनो जननस्य देवत्वलक्षणस्य देवत्वप्राप्तिं विदानासो जानंतः। यद्वा विदानासः सोमप्राप्तिं जानंतो जन्मनः पूर्वं मनुष्यजन्मवंतश्च संतः। उतशब्दश्चार्थे। ऋतुभिर्देवैः सह मादयध्वं। वो युष्मान्मदाः सोमपानजनिताः समग्मत। संगताः। पुरंधिः स्तुतिरपि समग्मत। ते यूयमस्मे अस्माकं सुवीरां शोभनैर्वीरैरुपेतां रयिमेरयध्वं। प्रेरयत ॥

॥ अथ तृतीया ॥

अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्वत्प्रदिवो दधिध्वे।
प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः ॥३॥

अयं। वः। यज्ञः। ऋभवः। अकारि। यं। आ। मनुष्वत्। प्रऽदिवः। दधिध्वे।
प्र। वः। अच्छ। जुजुषाणासः। अस्थुः। अभूत। विश्वे। अग्रिया। उत। वाजाः ॥३॥

हे ऋभवो वो युष्मदर्थमयं यज्ञोऽकारि। यं यज्ञं मनुष्वन्मनुष्यवत्प्रदिवः प्रकर्षेण द्योतमानाः संत आदधिध्वे धारयत जठरे। तदर्थं वो युष्मानच्छाभिमुख्येन जुजुषाणासः सेवमानाः सोमाः प्रास्थुः। प्रतिष्ठंते। उतापि च धारयित्वा च हे वाजा ऋभवो विश्वे यूयमग्रियाग्राह्या अग्रयत्वसंपादिनो वा अभूत। भवथ ॥

॥ अथ चतुर्थी ॥

अभूदु वो विधते रत्नधेयमिदा नरो दाशुषे मर्त्याय।
पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय ॥४॥

अभूत्। ऊं इति। वः। विधते। रत्नऽधेयं। इदा। नरः। दाशुषे। मर्त्याय।
पिबत। वाजाः। ऋभवः। ददे। वः। महि। तृतीयं। सवनं। मदाय ॥४॥

हे नरो नेतार ऋभवो वो युष्माकमनुग्रहादिदेदानीं तृतीये सवने रत्नधेयं दातव्यं रत्नं विधते। विधतिः परिचरणकर्मा। स्तुत्या परिचरते दाशुषे हविर्दत्तवते मर्त्याय यजमानाय मह्यमभूत्। भवतु। तदर्थं हे वाजा हे ऋभवः। एतद्द्वयं विभ्वनामकस्याप्युपलक्षणं। इतरापेक्षया प्रत्येकं बहुवचनं। यूयं पिबत। तदर्थं वो ददे। किं। महि महत्प्रभूतं तृतीयं सवनं। तत्संबंधिनं सोममित्यर्थः। किमर्थं। मदाय हर्षाय तृप्तये वा ॥

॥ अथ पंचमी ॥

आ वाजा यातोप न ऋभुक्षा महो नरो द्रविणसो गृणानाः ।
आ वः पीतयोऽभिपित्वे अह्नामिमा अस्तं नवस्व इव ग्मन् ॥५॥

आ । वाजाः । यात । उप । नः । ऋभुक्षाः । महः । नरः । द्रविणसः । गृणानाः ।
आ । वः । पीतयः । अभिऽपित्वे । अह्नां । इमाः । अस्तं । नवस्वःऽइव । ग्मन् ॥५॥

हे वाजा ऋभुक्षा नरो नेतारो यूयं न उपायात । किं कुर्वंतः । महो महतो द्रविणसो धनस्य ॥ कर्मणि षष्ठ्यौ ॥ महत् द्रविणं गृणानाः स्तुवंतः । किंच अह्नामभिपित्वेऽभिपतने समाप्तौ । तृतीये सवन इत्यर्थः । वो युष्मानिमाः पीतयः पानान्याग्मन् । आगच्छंति । तत्र दृष्टांतः । अस्तं । गृहनामैतत् । गृहं नवस्वो नवप्रसवा गाव इव ॥

॥ इति तृतीयस्य सप्तमे तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः ।
सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इंद्रवंतः ॥६॥

आ । नपातः । शवसः । यातन । उप । इमं । यज्ञं । नमसा । हूयमानाः ।
सऽजोषसः । सूरयः । यस्य । च । स्थ । मध्वः । पात । रत्नऽधाः । इंद्रऽवंतः ॥६॥

हे शवसो नपातो बलस्य न पातयितारस्तस्य पुत्रा वा । बलवंत इत्यर्थः । यूयं नमसा स्तोत्रेण हूयमाना आकारिताः संत इमं यज्ञमुपायातन । उपागच्छत । कीदृशा यूयं । सजोषस इंद्रेण सह प्रीताः सूरयो मेधाविनः । इंद्रस्य चैषां च कः प्रसंग इत्युच्यते । यस्य च स्थ । चेति प्रसिद्धौ । यस्येंद्रस्य संबंधिनो यूयं भवथ तदुचिताश्च निर्माणादित्यभिप्रायः । यस्मादेवं तस्मादिंद्रवंतः प्रीतेनेंद्रेण तद्वंतो रत्नधा रमणीयधनानां दातारो यूयं मध्वो मधुरं सोमं पात । पिबत ॥

॥ अथ सप्तमी ॥

सजोषा इंद्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः ।
अग्रेपाभिर्ऋतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥७॥

सऽजोषाः । इंद्र । वरुणेन । सोमं । सऽजोषाः । पाहि । गिर्वणः । मरुत्ऽभिः ।
अग्रेऽपाभिः । ऋतुऽपाभिः । सऽजोषाः । ग्नाःपत्नीभिः । रत्नऽधाभिः । सऽजोषाः ॥७॥

हे इंद्र त्वं वरुणेन रात्र्यभिमानिदेवेन सजोषाः समानप्रीतिः सन् सोमं पाहि । पिब । हे गिर्वणो गीर्भिर्वननीय संभजनीयेंद्र त्वं मरुद्भिः सजोषाः संगतः सन् सोमं पाहि । पिब । किंच अग्रेपाभिः प्रथमपातृभिर्ऋतुपाभिर्ऋतुयाजदेवैश्च ग्नाःपत्नीभिः । स्त्रीणां पालयित्र्यो ग्नाःपत्न्यः । ताभिः । मेना ग्ना इति स्त्रीणामिति निरुक्तं । रत्नधाभी रमणीयधनदातृभिर्ऋतुभिः सह पिब । यद्वैतत् ग्नाःपत्नीभिरित्यस्य विशेषणं । ताभिर्वा सजोषाः सोमं पिब ॥

॥ अथाष्टमी ॥

सजोषस आदित्यैर्मादयध्वं सजोषस ऋभवः पर्वतेभिः ।
सजोषसो दैव्येना सवित्रा सजोषसः सिंधुभी रत्नधेभिः ॥८॥

सऽजोषसः । आदित्यैः । मादयध्वं । सऽजोषसः । ऋभवः । पर्वतेभिः ।
सऽजोषसः । दैव्येन । सवित्रा । सऽजोषसः । सिंधुऽभिः । रत्नऽधेभिः ॥८॥

हे ऋभव आदित्यैः सजोषसः संगता यूयं मादयध्वं । तथा पर्वतेभिः पर्ववद्भिः पर्वण्यर्च्यमानैर्देवविशेषैः सजोषसो मादयध्वं । तथा च दैव्येन देवेभ्यो हितेन सवित्रा सजोषसो रत्नधेभी रत्नानां दातृभिः सिंधुभिः स्यंदनस्वभावैर्नद्यभिमानिदेवैश्च सजोषसो मादयध्वं ॥

॥ अथ नवमी ॥

ये अश्विना ये पितरा य ऊती धेनुं ततक्षुर्ऋभवो ये अश्वा ।
ये अंसत्रा य ऋधग्रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ॥९॥

ये । अश्विना । ये । पितरा । ये । ऊती । धेनुं । ततक्षुः । ऋभवः । ये । अश्वा ।
ये । अंसत्रा । ये । ऋधक् । रोदसी इति । ये । विऽभ्वः । नरः । सुऽअपत्यानि । चक्रुः ॥९॥

य ऋभवोऽश्विनाश्विनावूती ऊत्या क्रियया रथनिर्माणरूपयाप्रीणयन् । ये च पितरा पितरौ ततक्षुः तक्षणेन समपादयन् जीर्णौ संतावूती ऊत्या युवानौ चक्रुः । ये च धेनुं ततक्षुः मृतायाः पुनर्नवीकरणेन । ये चाश्वाश्वौ ततक्षुः । निश्चर्मणो गामरिणीत धीतिभिर्या जरंता युवशा ता कृणोतनेत्याद्युक्तं । ये चांस-

यांसत्राणि कवचानि देवेभ्यश्चक्रुः । ये च रोदसी द्यावापृथिव्यावृधक् पृथक्चक्रुः । एवमुक्तप्रकारेण ये विभ्वो व्याप्ता ऋभवो नरो नेतारः स्वपत्यानि स्वपत्यसाधनानि तत्प्राप्तिसाधनानि वा कर्माणि चक्रुः । तेऽग्रेपा इत्युत्तरेण संबंधः ॥

॥ अथ दशमी ॥

ये गोमंतं वाजवंतं सुवीरं रयिं धत्थ वसुमंतं पुरुक्षुं ।

ते अग्रेपा ऋभवो मंदसाना अस्मे धत्त ये च रातिं गृणंति ॥१०॥

ये । गोऽमंतं । वाजऽवंतं । सुऽवीरं । रयिं । धत्थ । वसुऽमंतं । पुरुऽक्षुं ।

ते । अग्रेऽपाः । ऋभवः । मंदसानाः । अस्मे इति । धत्त । ये । च । रातिं । गृणंति ॥१०॥

हे ऋभवो ये यूयं गोमंतं गोसहितं वाजवंतमन्नवंतं सुवीरं शोभनपुत्रोपेतं वसुमंतं निवासयोग्यगृहादिधनोपेतं पुरुक्षुं बह्वन्नं रयिं धनं धत्थ धारयथ मह्यं दातुं हे ऋभवस्ते यूयमग्रेपाः प्रथमं पातारो मंदसाना माद्यंतः संतोऽस्मे अस्मभ्यं धत्त । दत्त रयिं । ये च यूयं रातिं दानं दत्तं सोमं वा गृणंति स्तुवंति ते धत्त । यद्वा ये च रातिं गृणंति यजमानास्तेभ्योऽपि धत्त ॥

॥ अथैकादशी ॥

नापाभूत न वोऽतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन् ।

समिंद्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः ॥११॥

न । अप । अभूत । न । वः । अतीतृषाम । अनिःऽशस्ताः । ऋभवः । यज्ञे । अस्मिन् ।

सं । इंद्रेण । मदथ । सं । मरुत्ऽभिः । सं । राजऽभिः । रत्नऽधेयाय । देवाः ॥११॥

हे ऋभवो यूयं नापाभूत । नापगच्छत । अपरक्ता न भवत । वयं च वो युष्मान्नातीतृषाम । अत्यंतं तृषितान्मा करवाम । अतो हे ऋभवो देवा अनिःशस्ता अनिंदिताः संतोऽस्मिन्यज्ञ इंद्रेण संमदथ । राजभी राजमानैरन्यैर्देवैः संमदथ । तृप्ता भवथ । किमर्थं । रत्नधेयाय रमणीयाय धनदानाय ॥

॥ इति तृतीयस्य सप्तमे चतुर्थो वर्गः ॥

इहोप यातेति नवर्चं तृतीयं सूक्तं वामदेवस्यार्षं त्रैष्टुभमार्भवं । इहोप नवेत्यनुक्रमणिका ॥ तृतीयसवने मैत्रावरुणस्येदमुक्थ्यमानसूक्तं । सूचितं च । आ त्वा वहंतस्सावि देवमिहोप यातेत्यनुसवनं । आ० ५.५. । इति ॥

॥ तत्र प्रथमा ॥

इहोर्प यात शवसो नपातः सौधन्वना ऋभवो मार्प भूत ।

अस्मिन्हि वः सर्वने रत्नधेयं गमंत्विंद्रमनु वो मदासः ॥१॥

इह । उर्प । यात । शवसः । नपातः । सौधन्वनाः । ऋभवः । मा । अप॑ । भूत ।

अस्मिन् । हि । वः । सर्वने । रत्नऽधेयं । गमंतु । इंद्रं । अनु । वः । मदासः ॥१॥

हे शवसो नपातो बलस्य पुत्रास्तस्य न पातयितारो वा हे सौधन्वनाः सुधन्वनः पुत्रा हे ऋभवो यूयमिहोपयात । अस्मिन् तृतीये सवन उपगच्छत । मापभूत । अपगता न भवत । अस्मिन् सवने रत्नधेयं रमणीयधनस्य दातारमिंद्रमनु अनुसृत्य वो युष्मान्मदासो मदकराः सोमा गमंतु । गच्छंतु ॥ अन्विति क्रियया वा संबध्यते । इंद्रं युष्मांश्चान्वागच्छंत्वित्यर्थः । हि पूरणः ॥

॥ अथ द्वितीया ॥

आगन्नृभूणामिह रत्नधेयमभूत्सोमस्य सुषुतस्य पीतिः ।

सुकृत्यया यत्स्वपस्यया चँ एकं विचक्र चमसं चतुर्धा ॥२॥

आ । अगन् । ऋभूणां । इह । रत्नऽधेयं । अभूत् । सोमस्य । सुऽसुतस्य । पीतिः ।

सुऽकृत्यया । यत् । सुऽअपस्यया । च । एकं । विऽचक्र । चमसं । चतुःऽधा ॥२॥

ऋभूणां युष्माकमिह तृतीयसवने रत्नधेयं रत्नदानमागन् । आगच्छतु मह्यं । यद्वा युष्माकमेव सोमाख्यं रत्नमागन् । यस्मात्सोमस्य सुषुतस्य पीतिः पानमभूत् । प्रजापतिना लब्धमित्यर्थः । तदपि कुत इति चेत् । उच्यते । यद्यस्मात्सुकृत्यया शोभनहस्तव्यापारेण स्वपस्यया शोभनरथनिर्माणादिकर्मेच्छया चैकं संतं चमसं चतुर्धा विचक्र कृतवंतः ॥

॥ अथ तृतीया ॥

व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत ।

अथैत वाजा अमृतस्य पंथां गणं देवानामृभवः सुहस्ताः ॥३॥

वि । अकृणोत । चमसं । चतुःऽधा । सखे । वि । शिक्ष । इति । अब्रवीत ।

अथ । ऐत । वाजाः । अमृतस्य । पंथां । गणं । देवानां । ऋभवः । सुऽहस्ताः ॥३॥

हे ऋभवो यूयं चमसं चतुर्धा व्यकृणोत । व्यकुरुत । कृत्वा च हे सखे हे सखिभूताग्ने विभिद्धानुगृहाण सोमपानमित्यब्रवीत । अवदत यूयं । अथ सोऽग्निर्युष्मानवादीत् खलु । किमिति । हे वाजा ऋभवः सुहस्ताः कुशलहस्ता यूयममृतस्यामरणधर्मकस्य स्वर्गस्य पंथां पंथानमैत । गच्छत । किं तदमृतमिति । देवानामिंद्रादीनां गणं संघातमैत ॥

॥ अथ चतुर्थी ॥

किंमयः स्विच्चमस एष आस यं काव्येन चतुरो विचक्र ।
अथा सुनुध्वं सवनं मदाय पात ऋभवो मधुनः सोम्यस्य ॥४॥

किंऽमयः । स्वित् । चमसः । एषः । आस । यं । काव्येन । चतुरः । विऽचक्र ।
अथ । सुनुध्वं । सवनं । मदाय । पात । ऋभवः । मधुनः । सोम्यस्य ॥४॥

किंमयः स्वित् किमात्मक एष चमस आस । स्वित् प्रश्ने । यं चमसमेकं संतं काव्येन कवीनां संबंधिना कर्मणा कौशलेन चतुरो विचक्र कृतवंतः । अथाधुना सवनं । सूयत इति सवनः सोमः । तं मदाय हर्षाय सुनुध्वं हे ऋत्विजः । हे ऋभवो यूयं च सोम्यस्य सोमसंबंधिनं मधुनो मधुरं रसं पात । पिबत ॥

॥ अथ पंचमी ॥

शच्याकर्त पितरा युवाना शच्याकर्त चमसं देवपानं ।
शच्या हरी धनुतरावतष्टेंद्रवाहावृभवो वाजरत्नाः ॥५॥

शच्या । अकर्त । पितरा । युवाना । शच्या । अकर्त । चमसं । देवऽपानं ।
शच्या । हरी इति । धनुऽतरौ । अतष्ट । इंद्रऽवाहौ । ऋभवः । वाजऽरत्नाः ॥५॥

हे वाजरत्ना रमणीयसोमान्ना हे ऋभवो यूयं शच्या कर्मणा पितरा मातापितरौ युवाना युवानावकर्त । अकुरुत । तथा शच्या चमसं देवपानं देवपानार्हमकर्त । चतुर्धाकुरुतेत्यर्थः । शच्या हरी अतष्ट । तक्षणेन संपादितवंतः । कीदृशौ हरी । धनुतरौ शीघ्रं गंतृतराविंद्रवाहाविंद्रवोढारौ ॥

॥ इति तृतीयस्य सप्तमे पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

यो वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदाय ।
तस्मै रयिमृभवः सर्ववीरमा तक्षत वृषणो मंदसानाः ॥ ६ ॥

यः । वः । सुनोति । अभिऽपित्वे । अह्नां । तीव्रं । वाजासः । सवनं । मदाय ।
तस्मै । रयिं । ऋभवः । सर्वऽवीरं । आ । तक्षत । वृषणः । मंदसानाः ॥ ६ ॥

हे ऋभवो वाजासोऽन्नवंतो वो युष्मभ्यं यो यजमानोऽह्नामभिपित्वेऽभिपतने । तृतीयसवन इत्यर्थः । तस्मिन् तीव्रं रसवत्तरं सवनं । सूयत इति सवनः सोमः । तं मदाय सुनोति तस्मै सर्ववीरं बहुपुत्रोपेतं रयिं धनं हे वृषणः फलवर्षितारो मंदसाना मोदमानाः संत आतक्षत । संपादयतेत्यर्थः ॥

॥ अथ सप्तमी ॥

प्रातः सुतमपिबो हर्यश्व माध्यंदिनं सवनं केवलं ते ।
समृभुभिः पिबस्व रत्नधेभिः सखीँ याँ इंद्र चकृषे सुकृत्या ॥ ७ ॥

प्रातरिति । सुतं । अपिबः । हरिऽअश्व । माध्यंदिनं । सवनं । केवलं । ते ।
सं । ऋभुऽभिः । पिबस्व । रत्नऽधेभिः । सखीन् । यान् । इंद्र । चकृषे । सुऽकृत्या ॥ ७ ॥

हे हर्यश्व हरितवर्णाश्वोपेतेंद्र प्रातः प्रातःसवने सुतमभिषुतं सोममपिबः । पिबस्व । माध्यंदिनं सवनं केवलं ते । परं तवैव नान्येषां । सवनद्वयस्य पृथगभिधानात्तृतीयसवनं परिशिष्यते । तृतीयसवने रत्नधेभी रमणीयदानैर्ऋभुभिः संपिबस्व । हे इंद्र यानृभून् सुकृत्या शोभनकर्मणा सखीन् चकृषे अकरोः ॥

॥ अथाष्टमी ॥

ये देवासो अभवता सुकृत्या श्येना इवेदधि दिवि निषेद ।
ते रत्नं धात शवसो नपातः सौधन्वना अभवतामृतासः ॥ ८ ॥

ये । देवासः । अभवत । सुऽकृत्या । श्येनाःऽइव । इत् । अधि । दिवि । निऽसेद ।
ते । रत्नं । धात । शवसः । नपातः । सौधन्वनाः । अभवत । अमृतासः ॥ ८ ॥

हे ऋभवो ये यूयं सुकृत्या शोभनकर्मणा देवासो देवा अभवत अभूत । श्येना इवेत् शंसनीयगतयो गृध्रविशेषा इव दिवि द्युलोकेऽधि निषेद अधिनिषण्णाः हे

यवसो यशसो बलवंतश्च यूयं रत्नं धनं धात्त। प्रयच्छत। हे सौधन्वना अमृता-सोऽमृता देवा अभवत॥

॥ अथ नवमी ॥

यत्तृतीयं सवनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः।
तदृभवः परिषिक्तं व एतत्सं मदेभिरिंद्रियेभिः पिबध्वं ॥९॥

यत्। तृतीयं। सवनं। रत्नऽधेयं। अकृणुध्वं। सुऽअपस्या। सुऽहस्ताः।
तत्। ऋभवः। परिऽसिक्तं। वः। एतत्। सं। मदेभिः। इंद्रियेभिः। पिबध्वं ॥९॥

हे सुहस्ताः शोभनहस्ता ऋभवो रत्नधेयं रमणीयसोमदानवद्यत्तृतीयं सवनमकृणुध्वं प्रसाधितवंतः स्वपस्या शोभनकर्मेच्छया तदेतत्सवनं सवनगतं सोमद्रव्यं परिषिक्तं परिषेचनवद्वो युष्माकं संबंधिभिर्मदेभिर्मोदयद्भिरिंद्रियेभिरिंद्रियैः संपिबध्वं। यद्यपि वदनमेव पानसाधनं तथापि चक्षुःश्रोत्रादीनामपि दर्शनश्रवणादिना तृप्तिसद्भावात्पातृत्वमुपचर्यते॥

॥ इति तृतीयस्य सप्तमे षष्ठो वर्गः॥

अनश्वो जात इति नवर्चं चतुर्थं सूक्तमार्भवं। ऋषिर्वामदेवः। अंत्या त्रिष्टुप् शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः। अनश्वोऽंत्या त्रिष्टुबित्यनुक्रमणिका॥ आभिप्लविके तृतीयेऽहनि वैश्वदेवशस्त्र आर्भवनिविद्धानीयमिदं। तथा च सूचितं। अनश्वो जातः परावतो य इति वैश्वदेवं। आ० ७.७.। इति॥

॥ तत्र प्रथमा॥

अनश्वो जातो अनभीशुरुक्थ्यो३ रथस्त्रिचक्रः परि वर्तते रजः।
महत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ ॥१॥

अनश्वः। जातः। अनभीशुः। उक्थ्यः। रथः। त्रिऽचक्रः। परि। वर्तते। रजः।
महत्। तत्। वः। देव्यस्य। प्रऽवाचनं। द्यां। ऋभवः। पृथिवीं। यत्। च। पुष्यथ ॥१॥

हे ऋभवोऽश्विनोः संबंधी युष्मद्दत्तो रथोऽनश्वो जातो वाहनाश्वनिरपेक्षः संपन्नः। तथानभीशुः प्रग्रहरहित उक्थ्यः स्तुत्यस्त्रिचक्रश्चक्रत्रययुक्तः सन् रजोऽंतरिक्षं परिवर्तते। परिभ्रमति। महत्प्रभूतं तद्रूपनिर्माणाख्यं कर्म वो युष्माकं

देव्यस्य देवकस्य प्रवाचनं प्रवक्तृ प्रख्यापकं। यत्र येन कर्मणा द्यां पृथिवीं च पुष्यथ पुष्टां कुरुथ ॥

॥ अथ द्वितीया ॥

रथं ये चक्रुः सुवृतं सुचेतसोऽविह्वरंतं मनसस्परि ध्यया ।
ताँ ऊ न्वऽस्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि ॥२॥

रथं। ये। चक्रुः। सुऽवृतं। सुऽचेतसः। अविऽह्वरंतं। मनसः। परि। ध्यया।
तान्। ऊं इति। नु। अस्य। सवनस्य। पीतये। आ। वः। वाजाः। ऋभवः। वेदयामसि ॥२॥

सुचेतसः शोभनचित्ता य ऋभवः सुवृतं सुवर्तनचक्रमविह्वरंतमकुटिलं रथं मनसः परि ध्यया मनसो ध्यानेनाप्रयत्नेन नु क्षिप्रं चक्रुः तान्। उशब्द एवार्थे। तानेवास्य सवनस्य पीतय एतं सोमं पातुं हे वाजा हे ऋभवो वो युष्मानावेदयामसि। आवेदयामः ॥

॥ अथ तृतीया ॥

तद्वो वाजा ऋभवः सुप्रवाचनं देवेषु विभ्वो अभवन्महित्वनं ।
जिव्री यत्संता पितरा सनाजुरा पुनर्युवाना चरथाय तक्षथ ॥३॥

तत्। वः। वाजाः। ऋभवः। सुऽप्रवाचनं। देवेषु। विऽभ्वः। अभवत्। महिऽत्वनं।
जिव्री इति। यत्। संता। पितरा। सनाऽजुरा। पुनः। युवाना। चरथाय। तक्षथ ॥३॥

हे वाजा ऋभवो हे विभ्वो विभवः। इतरापेक्षया परस्परं बहुवचनमित्युक्तं। वो युष्माकं तन्महित्वनं महत्त्वं माहात्म्यं देवेषु मध्ये सुप्रवाचनं प्रवाच्यमभवत्। तदित्युक्तं यदित्याह। जिव्री वृद्धौ संतौ सनाजुरा सदा जीर्णौ संतौ पितरा पितरौ पुनर्युवाना नित्यतरुणौ चरथाय यथेच्छं संचरणाय तक्षथ। संपादितवंतः ॥

॥ अथ चतुर्थी ॥

एकं वि चक्र चमसं चतुर्वयं निश्चर्मणो गामरिणीत धीतिभिः ।
अथा देवेष्वमृतत्वमानश श्रुष्टी वाजा ऋभवस्तद्व उक्थ्यं ॥४॥

एकं। वि। चक्र। चमसं। चतुःऽवयं। निः। चर्मणः। गां। अरिणीत। धीतिऽभिः।
अथ। देवेषु। अमृतऽत्वं। आनश। श्रुष्टी। वाजाः। ऋभवः। तत्। वः। उक्थ्यं ॥४॥

हे ऋभव एकं चमसमेकमेव संतं पानसाधनं चमसं चतुर्वयं। वयाः शाखाः। चतुःशाखं चतुरवयवं विचक्र। व्यकुरुत। तथा धीतिभिः कर्मभिश्चर्मणो नूतनां गां निरपिणीत। समस्कुरुत। निरित्येष समित्येतस्य स्थाने। अथ अतः कारणात् देवेषु मध्येऽमृतत्वमानश। प्राप्नुत। हे वाजा हे ऋभवस्तत्ताहशं वो युष्माकं कर्म। श्रुष्टीति क्षिप्रनामैतत्। क्षिप्रमुक्थ्यं स्तुत्यं भवति ॥

॥ अथ पंचमी ॥

ऋभुतो र॒यिः प्र॑थ॒मश्र॑वस्तमो॒ वाज॑श्रुतासो॒ यमजी॑जन॒न्नरः॑ ।
वि॒भ्व॒त॒ष्टो वि॒दथे॑षु प्र॒वाच्यो॒ यं दे॑वा॒सोऽव॑था॒ स विच॑र्षणिः ॥५॥

ऋ॒भुतः॑ । र॒यिः । प्र॒थ॒मश्र॑वःऽतमः । वाज॑ऽश्रुतासः । यं । अजी॑जनन् । नरः॑ ।
वि॒भ्व॒ऽत॒ष्टः । वि॒दथे॑षु । प्र॒ऽवा॒च्यः॑ । यं । दे॒वा॒सः॒ । अव॑थ । सः । वि॒ऽच॑र्षणिः ॥५॥

ऋभुत ऋभूणां सकाशात्प्रथमश्रवस्तमः प्रथमं मुख्यमतिशयितमन्नं यशो वा यस्य धनस्य तद्रयिर्धनमस्माकं। भवत्विति शेषः। वाजश्रुतासो वाजैः सह विख्याता नरो नेतार ऋभवो यं रयिमजीजनन् उत्पादितवंतः। विभ्वतष्टो विभ्वभिर्ऋभुभिस्तष्टस्तक्षणसंपन्नश्चमसोऽश्विनो रथो वा विदथेषु यज्ञेषु प्रवाच्यः। प्रकर्षेण स्तुत्यः। हे देवासो द्योतमाना यूयं यं रथं चमसं वावथ रक्षथ स विचर्षणिर्विविधं द्रष्टा भवति। द्रष्टव्यो भवतीत्यर्थः ॥

॥ इति तृतीयस्य सप्तमे सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

स वा॒ज्यर्वा॒ स ऋषि॑र्वच॒स्यया॒ स शूरो॒ अस्ता॒ पृत॑नासु दु॒ष्टरः॑ ।
स रा॒यस्पोषं॒ स सु॒वीर्यं॑ दधे॒ यं वाजो॒ विभ्वाँ॑ ऋभवो॒ यमावि॑षुः ॥६॥

सः । वा॒जी । अर्वा॑ । सः । ऋषिः॑ । व॒च॒स्यया॑ । सः । शूरः॑ । अस्ता॑ । पृत॑नासु । दु॒स्तरः॑ ।
सः । रा॒यः । पोषं॑ । सः । सु॒ऽवीर्यं॑ । द॒धे॒ । यं । वाजः॑ । वि॒ऽभ्वा॑ । ऋ॒भवः॑ । यं । आवि॑षुः ॥६॥

स वाजी वेजनवान् बलवान् सन् अर्वारणकुशलो भवति। स ऋषिरतींद्रियज्ञानी सन् वचस्यया स्तुत्या युक्तो भवति। स शूरो विक्रांतः सन् अस्ता क्षेप्ता शत्रूणां भवति। स्वयं च पृतनासु संग्रामेषु दुष्टरो नाभिभाव्यो भवति। स एव रायस्पोषं धनपुष्टिं दधे। धत्ते। स सुवीर्यं सुवीरत्वं दधे। धत्ते। यं मनुष्यं वाजो

विश्वा ऋभवश्चाविषुः अरक्षन् स एवमेवं भवतीति। अंत्यस्य बहुवचिर्देशस्तथा-
त्वामृभुव्यवहारप्राचुर्याभिप्रायः ॥

॥ अथ सप्तमी ॥

श्रेष्ठं वः पेशो अधि धायि दर्शतं स्तोमो वाजा ऋभवस्तं जुजुष्टन ।
धीरासो हि ष्ठा कवयो विपश्चितस्तान्व एना ब्रह्मणा वेदयामसि ॥७॥
श्रेष्ठं। वः। पेशः। अधि। धायि। दर्शतं। स्तोमः। वाजाः। ऋभवः। तं। जुजुष्टन।
धीरासः। हि। स्थ। कवयः। विपःऽचितः। तान्। वः। एना। ब्रह्मणा। आ। वेदयामसि ॥७॥

श्रेष्ठमत्युत्कृष्टमत एव दर्शतं दर्शनीयं वो युष्माकं पेशो रूपमधि धायि। अधि-निहितं। अतस्तदुचितो यः स्तोमः स्तोत्रमस्मत्कृतमस्ति हे वाजा ऋभवस्तं स्तोमं स्तोत्रं जुजुष्टन। सेवध्वं। ये यूयं धीरासो हि धीमंतः प्रसिद्धाः कवयो मेधाविनो विपश्चितो ज्ञानवंतः स्थ तान्वो युष्मानेनैनेन ब्रह्मणा मंत्रेण शस्त्रात्मकेनावेदयामसि। अथवोक्तलक्षणा विपश्चितः स्तोतारो यान् स्तुवंतीति शेषः। तान्ब्रह्मणावेदयामः। प्रज्ञापयामः ॥

॥ अथाष्टमी ॥

यूयमस्मभ्यं धिषणाभ्यस्परि विद्वांसो विश्वा नर्याणि भोजना ।
द्युमंतं वाजं वृषशुष्ममुत्तममा नो रयिमृभवस्तक्षता वयः ॥८॥
यूयं। अस्मभ्यं। धिषणाभ्यः। परि। विद्वांसः। विश्वा। नर्याणि। भोजना।
द्युऽमंतं। वाजं। वृषऽशुष्मं। उत्ऽतमं। आ। नः। रयिं। ऋभवः। तक्षत। आ। वयः ॥८॥

हे ऋभवो यूयमस्मभ्यं धिषणाभ्यस्परि स्तुतिभ्यो निमित्तभूताभ्यः ॥ परीति पंचम्यर्थानुवादी ॥ यद्वा अस्मन्मतिभ्योऽधिकानि नर्याणि नृभ्यो हितानि विश्वा सर्वाणि भोजना भोग्यानि विद्वांसो जानंतः संत आतक्षत। संपादयत। किंच द्युमंतं दीप्तिमंतं हिरण्यादिरूपं वाजं बलवंतं वृषशुष्मं सेक्तॄणां बलवतां शोष-कमुत्तमं रयिं नोऽस्माकं वयोऽन्नं चातक्षत हे ऋभवः ॥

॥ अथ नवमी ॥

इह प्रजामिह रयिं रराणा इह श्रवो वीरवत्तक्षता नः ।
येन वयं चितयेमात्यन्यान्तं वाजं चित्रमृभवो ददा नः ॥९॥

इह। प्रऽजां। इह। रयिं। ररा॑णाः। इह। श्रवः। वीरऽवंत्। तक्षत। नः।
येन। वयं। चितयेम। अति। अन्यान्। तं। वाजं। चित्रं। ऋभवः। दद। नः ॥८॥

नोऽस्माकमिह यज्ञे रराणा रममाणाः प्रजां पुत्रपौत्रादिरूपां तक्षत। संपादयत। इहैव यज्ञे रयिं च तक्षत। इहैव यज्ञे श्रवो यशो वीरवद्वीरैर्भृत्यादिभिरुपेतं तक्षत। किंच वयं येन वाजेनान्यानस्मत्समानति चितयेम अतिक्रम्य ज्ञायेमहि तं चित्रं चायनीयं वाजमन्नं हे ऋभवो नो दद। अस्मभ्यं दत्त ॥

॥ इति तृतीयस्य सप्तमेऽष्टमो वर्गः ॥

उप नो वाजा इत्यष्टर्चं पंचमं सूक्तं वामदेवस्यार्षमार्भवं त्रैष्टुभं। पंचम्याद्याश्चतस्रोऽनुष्टुभः। तथा चानुक्रांतं। उप नोऽष्टौ चतुरनुष्टुबंतमिति ॥ व्यूढे दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्र आद्याश्चतस्रः शस्याः। उप नो वाजा इति त्रयोदशार्भवं चतस्रश्च। आ० ८.८.। इति हि सूचितं ॥

॥ तत्र प्रथमा ॥

उप॑ नो वाजा अध्वरमृ॑भुक्षा देवा॑ यात पथिभिर्देवयानैः॑।
यथा॑ यज्ञं मनु॑षो विक्ष्वा३॑सु द॑धिध्वे र॑ण्वाः सुदिने॑ष्वह्नां॑ ॥१॥

उप॑। नः। वाजाः। अध्वरं। ऋभुक्षाः। देवाः॑। यात। पथिऽभिः। देवऽयानैः॑।
यथा॑। यज्ञं। मनु॑षः। विक्षु। आसु। दधिध्वे। रण्वाः। सुऽदिने॑षु। अह्नां॑ ॥१॥

हे वाजा हे ऋभुक्षा ऋभवो हे देवा नोऽध्वरं यागमुपयात। उपगच्छत। देवयानैर्देवैर्गंतव्यैः पथिभिर्मार्गैः। यथा येन प्रकारेण मनुषो मनोः संबंधिनीष्वासु विक्षु प्रजासु यजमानेषु मध्ये हे रण्वा रमणीया ऋभवोऽह्नां सुदिनेषु सुदिनत्वनिमित्तेषु यज्ञमस्मदीयं दधिध्वे धारयथ। यथा येन प्रकारेण यज्ञमागत्य सुदिनत्वं कुरुथ तथा यज्ञमायातेति ॥

॥ अथ द्वितीया ॥

ते वो॑ हृदे मन॑से संतु यज्ञा जुष्टा॑सो अद्य घृतनि॑र्णिजो गुः।
प्र वः॑ सुतासो॑ हरयंत पूर्णाः क्रत्वे॑ दक्षा॑य हर्षयंत पीताः ॥२॥

ते। वः। हृदे। मन॑से। संतु। यज्ञाः। जुष्टा॑सः। अद्य। घृतऽनिर्णिजः। गुः।
प्र। वः। सुतासः। हरयंत। पूर्णाः। क्रत्वे। दक्षा॑य। हर्षयंत। पीताः ॥२॥

अद्यास्मिन्यागदिने त एते यज्ञा यागसाधनाः सोमा वो हृदे हृदयाय मनसे तत्प्रीतये संतु । भवंतु । अद्यास्मिन्दिने जुष्टासः पर्याप्ताः सोमा घृतनिर्णिजो मिश्रणद्रव्येण दीप्तरूपा गुः । गच्छंतु युष्मद्धृदयं । सुतासोऽभिषुताः सोमाश्चमसेषु पूर्णा वो युष्मदर्थं प्रहरयंत । प्रह्रियंते । यद्वा हर्यतिः कांतिकर्मण इदं रूपं । प्रकर्षेण वो युष्मान् कामयंते । क्रत्वे क्रतवे कर्मणे दक्षायोत्साहाय पीता हर्षयंत । हर्षयंतु ॥

॥ अथ तृतीया ॥

ऋ॒दा॒यं दे॒वहि॑तं॒ यथा॑ वः॒ स्तोमो॒ वाजा ऋभुक्षणो द॒दे वः॑ ।
जु॒ह्वे मनु॒ष्वदुप॑रासु वि॒क्षु यु॒ष्मे सचा॑ बृ॒हद्दि॑वेषु॒ सोम॑म् ॥३॥

ऋ॒तुऽउ॒दा॒यं । दे॒वऽहि॑तं । यथा॑ । वः॒ । स्तोमः॑ । वा॒जाः॒ । ऋ॒भु॒क्ष॒णः॒ । द॒दे । वः॒ ।
जु॒ह्वे । म॒नु॒ष्वत् । उप॑रासु । वि॒क्षु । यु॒ष्मे इति॑ । सचा॑ । बृ॒हत्ऽदि॑वेषु । सोम॑म् ॥३॥

ऋदायं ऋदयं सवनत्रयगमनोपेतं देवहितं सोमाख्यमन्नं देवेभ्यो हितं देवैर्वा विहितं । तृतीयसवनस्थमित्यर्थः । तद्यथा वो युष्मान्ददे धारयति । हे वाजा हे ऋभुक्षण ऋभवो यथा स्तोमः स्तोत्रं वो ददे धारयति उपरासु॥ उप देवयजन-समीपे रमंत इत्युपराः ॥ तासु विक्षु प्रजासु बृहद्दिवेषु प्रभूतदीप्तिषु देवेषु मध्ये मनुष्वत् मनुरिव युष्मे युष्मदर्थं सचा सहानेकयहेषु प्रस्थितं जुह्वे। जुहोमि सोमं॥

॥ अथ चतुर्थी ॥

पीवो॑अश्वाः शु॒चद्र॑था॒ हि भू॒ताय॑ःशिप्रा वाजिनः सु॒निष्काः॑ ।
इंद्र॑स्य सूनो शवसो नपातोऽनु॑ वश्चेत्यग्रियं॒ मदा॑य ॥४॥

पीवः॑ऽअश्वाः । शु॒चत्ऽर॑थाः । हि । भू॒त । अय॑ःऽशिप्राः । वा॒जि॒नः॒ । सु॒ऽनि॒ष्काः॒ ।
इंद्र॑स्य । सू॒नो॒ इति॑ । श॒व॒सः॒ । न॒पा॒तः॒ । अनु॑ । वः॒ । चे॒ति॒ । अ॒ग्रि॒यं । मदा॑य ॥४॥

हे वाजिन ऋभवः पीवोअश्वाः । पीवानोऽश्वा येषां ते तादृशाः । तथा शुचद्रथा दीप्तरथा अयःशिप्राः । शिप्रे हनू नासिके वा । अयोवत्सारभूतशिप्राः सुनिष्काः शोभनधनाश्च भूत । भवत । हे इंद्रस्य सूनो सूनवः पुत्रवद्रक्षणीया हे शवसो नपातो बलस्य पुत्रा बलिनो वो युष्मभ्यं मदायानुचेति । अन्वज्ञायि देवेष्वग्रियमग्रे भवं तृतीयसवनं ॥

॥ अथ पंचमी ॥

ऋभुमृभुक्षणो रयिं वाजे वाजिन्तमं युजं।
इंद्रस्वंतं हवामहे सदासातममश्विनं ॥५॥

ऋभुं। ऋभुक्षणः। रयिं। वाजे। वाजिन्ऽतमं। युजं।
इंद्रस्वंतं। हवामहे। सदाऽसातमं। अश्विनं ॥५॥

हे ऋभुक्षण ऋभव ऋभुमुरुभासमानं रयिं धनरूपं। तद्धेतुभूतत्वात् ताच्छब्द्यं। वाजे संग्रामे वाजिन्तममत्यंतबलवंतं युजं परस्परयोगोपेतमिंद्रस्वंतमिंद्रवंतमिंद्रियवंतं सदासातमं सर्वदा दातृतममश्विनमश्ववंतं भवतां गणं हवामहे। आह्वयामि ॥

॥ इति तृतीयस्य सप्तमे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

सेदृभवो यमवथ यूयमिंद्रश्च मर्त्यं।
स धीभिरस्तु सनिता मेधसाता सो अर्वता ॥६॥

सः। इत्। ऋभवः। यं। अवथ। यूयं। इंद्रः। च। मर्त्यं।
सः। धीभिः। अस्तु। सनिता। मेधऽसाता। सः। अर्वता ॥६॥

हे ऋभवो यूयमिंद्रश्च यं मर्त्यमवथ रक्षथ सेत्स एवास्तु। भवतु। नान्यः श्रेष्ठो भवतीत्यर्थः। स एव धीभिः सनिता संभक्ता भवतु। मेधसाता मेधसातौ यज्ञे स एवार्वतारणवताश्वेन युक्तो भवतु ॥

॥ अथ सप्तमी ॥

वि नो वाजा ऋभुक्षणः पथश्चितन यष्टवे।
अस्मभ्यं सूरयः स्तुता विश्वा आशास्तरीषणि ॥७॥

वि। नः। वाजाः। ऋभुक्षणः। पथः। चितन। यष्टवे।
अस्मभ्यं। सूरयः। स्तुताः। विश्वाः। आशाः। तरीषणि ॥७॥

हे वाजा हे ऋभुक्षण ऋभवो नोऽस्माकं पथो मार्गान् यष्टवे यष्टुं यज्ञमार्गान्वि-

चित्तन । चिचेतयत । प्रज्ञापयतेत्यर्थः । अस्मभ्यं हे सूरयो मेधाविनो यूयं स्तुताः संतो विश्वा आशाः सर्वा दिशस्तरीषणि तरीतुसामर्थ्ये । वितरतेति शेषः ॥

॥ अथाष्टमी ॥

तं नो॑ वाजा ऋभुक्षण॒ इंद्र॒ नास॑त्या र॒यिं ।
सम॑श्वं॑ चर्षणि॒भ्य॒ आ पु॒रु श॑स्त म॒घत्त॑ये ॥ ८ ॥

तं । न॒ः । वा॒जाः॒ । ऋ॒भु॒क्ष॒णः॒ । इंद्र॑ । नास॑त्या । र॒यिं ।
सं । अश्वं॑ । च॒र्ष॒णिऽभ्यः॑ । आ । पु॒रु । श॒स्त॒ । म॒घत्त॑ये ॥ ८ ॥

अनया स्तुतिमुपसंहृत्याभिमतमाशास्ते । हे वाजा हे ऋभुक्षण ऋभवो हे इंद्र हे नासत्याश्विनौ ते यूयं नोऽस्मभ्यं चर्षणिभ्यो मनुष्येभ्यः स्तोतृभ्यस्तं पुरु प्रभूतं रयिं धनमश्वं च पुरु प्रभूतं मघत्तये धनदानाय समाशस्त । सम्यगाशासनं कुरुत ॥

॥ इति तृतीयस्य सप्तमे दशमो वर्गः ॥

उतो हि वामिति दशर्चं षष्ठं सूक्तं । वामदेव ऋषिः । त्रिष्टुप् छंदः । दधिक्रा देवता । आद्या द्यावापृथिव्या । अत्रानुक्रमणिका । उतो हि दश दाधिक्रं हि द्यावापृथिव्याद्येति । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

उ॒तो हि वां॑ दा॒त्रा संति॒ पूर्वा॒ या पू॒रुभ्य॑स्त्र॒सद॑स्युर्नितो॒शे ।
क्षे॒त्रा॒सां द॑दथुरुर्व॒रा॒सां घ॒नं दस्यु॑भ्यो अ॒भिभू॑तिमु॒ग्रं ॥ १ ॥

उ॒तो इति॑ । हि । वां॒ । दा॒त्रा । संति॑ । पूर्वा॑ । या । पू॒रुऽभ्यः॑ । त्र॒सद॑स्युः । नि॒ऽतो॒शे ।
क्षे॒त्र॒ऽसां । द॒द॒थुः॒ । उ॒र्व॒रा॒ऽसां । घ॒नं । दस्यु॑ऽभ्यः । अ॒भिऽभू॑तिं । उ॒ग्रं ॥ १ ॥

उतो इति पूरणः । अस्या द्यावापृथिव्यत्वादत्र तद्वाचकशब्दाभावेऽपि ते एव संबोध्ये । हे द्यावापृथिव्यौ वां युवाभ्यां सकाशाद्दात्रा दानकर्त्रा पौरुकुत्सेन त्रसदस्युना लब्धानि पूर्वा पूर्वाणि पुरातनानि पूरकाणि वा धनानि संति । या यानि धनानि पूरुभ्योऽर्थिभ्यो मनुष्येभ्यस्त्रसदस्यू राजा नितोशे न्यतोशत दत्त-वान् । क्षेत्रसां । क्षेत्राणि सर्वा भूमीः सनोतीति क्षेत्रसा अश्वः । तं ददथुः । तथोर्वरासां । उर्वरा सर्वसस्याढ्या भूः । तां सनोतीत्युर्वरासाः पुत्रः । तं ददथुः ।

घनं हननार्हमायुधं दस्युभ्यो दस्यूनां वधार्थं च ददथुः। कीदृशमायुधं। अभिभूतिमभिभवितारमुग्रमुद्गूर्णबलं। यद्वोत्तरार्धमेकं वाक्यं। दातव्यानि धनान्युक्तलक्षणं पुत्रं च ददथुः। दत्तवन्तौ स्थः। तानि मह्यमपि ददाथामित्यर्थः॥

॥ अथ द्वितीया ॥

उत वाजिनं पुरुनिष्षिध्वानं दधिक्रामु ददथुर्विश्वकृष्टिं।

ऋजिप्यं श्येनं प्रुषितप्सुमाशुं चर्कृत्यमर्यो नृपतिं न शूरं॥२॥

उत। वाजिनं। पुरुनिःऽसिध्वानं। दधिऽक्रां। ऊं इति। ददथुः। विश्वऽकृष्टिं।

ऋजिप्यं। श्येनं। प्रुषितऽप्सुं। आशुं। चर्कृत्यं। अर्यः। नृऽपतिं। न। शूरं॥२॥

उतापि च वाजिनं गमनवंतं। अश्वरूपं वा देवं अग्नेरश्वरूपस्यैव दधिक्राख्यत्वात्। अग्नेस्तद्रूपत्वं ब्राह्मणे समाम्नातं। तानग्निरश्वो भूत्वाभ्यद्रवदिति। पुरुनिष्षिध्वानं पुरूणां बहूनां शत्रूणां निषेद्धारं दधिक्रां। दधदन्यं धारयन् क्रामतीति दधिक्राः। तमेतन्नामकं देवं। उः पूरणः। विश्वकृष्टिं। विश्वाः कृष्टयो रक्षणीयाः सेवका वा मनुष्या यस्य तं। ऋजिप्यं। ऋज्वाप्नोति गच्छतीत्यृजिप्यः। तं श्येनं शंसनीयगमनं प्रुषितप्सुं दीप्तरूपमाशुं व्याप्तं शीघ्रगमनं वार्योऽरेश्चर्कृत्यं कर्तनशीलं शूरं नृपतिं न राजानमिव स्थितं देवं द्यावापृथिव्यौ ददथुः। धारयतः॥

॥ अथ तृतीया ॥

यं सीमनु प्रवतेव द्रवंतं विश्वः पूरुर्मदति हर्षमाणः।

पड्भिर्गृध्यंतं मेधयुं न शूरं रथतुरं वातमिव ध्रजंतं॥३॥

यं। सीं। अनु। प्रवताऽइव। द्रवंतं। विश्वः। पूरुः। मदति। हर्षमाणः।

पट्ऽभिः। गृध्यंतं। मेधऽयुं। न। शूरं। रथऽतुरं। वातंऽइव। ध्रजंतं॥३॥

यं दधिक्रां विश्वः पूरुः सर्वोऽपि मनुष्यो हर्षमाणो हृष्यन् हर्षयन्वा मदति स्तौति। तं देवं द्यावापृथिव्यौ ददथुरिति संबंधः। स देवो विशेष्यते। सीं सर्वतः प्रवता प्रवणवता निम्नेन मार्गेणोदकमिवानुक्रमेण द्रवंतं गच्छंतं पड्भिः पादैर्गृध्यंतमभिकांक्षंतं दिशो लंघितुं। तत्र दृष्टांतः। मेधयुं न शूरं। संग्रामेच्छुं शूरमिव। यद्वा यज्ञक्रमणेच्छुमध्वर्य्वादिकमिव। रथतुरं रथेन गच्छंतं वातमिव ध्रजंतं

शीघ्रगं वायुमिव । उक्तविशेषविशिष्टानुदकपूरवायून्यथा सर्वो जनः स्तौति तथा यं देवं स्तौति तं ददृशुरित्यर्थः ॥

॥ अथ चतुर्थी ॥

यः स्मा॑रुं॒धानो॒ गध्या॑ स॒मत्सु॒ सनु॑तर॒श्चर॑ति॒ गोषु॒ गच्छ॑न् ।

आ॒विर्ऋ॑जीको॒ वि॒दथा॑ नि॒चिक्य॑त्ति॒रो अ॑र॒तिं पर्याप॑ आ॒योः ॥४॥

यः । स्म॒ । आ॒ऽरुं॒धा॒नः । गध्या॑ । स॒मत्ऽसु॑ । सनु॑ऽतरः । चर॑ति । गोषु॑ । गच्छ॑न् ।

आ॒विःऽऋ॑जीकः । वि॒दथा॑ । नि॒ऽचिक्य॑त् । ति॒रः । अ॒र॒तिं । परि॑ । आप॑ः । आ॒योः ॥४॥

यः स्म यः खलु देवो गध्या गध्यानि । गध्यतिर्मिश्रीभावकर्मेति निरुक्तं । मिश्रयितव्यानि फलानि समत्सु संग्रामेष्वारुंधानः सर्वतो निरोधयन् सनुतरः संभक्ततरो गोषु सर्वासु दिक्षु गोषु वा निमित्तभूतेषु गच्छन्नाविर्ऋजीक आविर्भूतसाधन आविर्भूतमुष्को वा विदथानि ज्ञातव्यानि निचिक्यत् । पश्यतिकर्मैतत् । जानन् अरतिमरमणं दुःखमभिगंतारमरिं वा परि सर्वतस्तिरश्चरति तिरस्करोति । कस्यारतिमिति । आपो व्याप्तस्य स्तोतुरायोर्मनुष्यस्य यजमानस्य ॥

॥ अथ पंचमी ॥

उ॒त स्मै॑नं वस्त्र॒मथिं॒ न ता॒युमनु॑ क्रोशंति क्षि॒तयो॒ भरे॑षु ।

नी॒चाय॑मानं॒ जसु॑रिं॒ न श्ये॒नं श्रव॒श्चाच्छा॑ पशु॒मच्च॑ यू॒थं ॥५॥

उ॒त । स्म॒ । ए॒नं॒ । व॒स्त्र॒ऽम॒थिं॒ । न । ता॒युं । अनु॑ । क्रो॒शं॒ति॒ । क्षि॒तयः॑ । भरे॑षु ।

नी॒चा । अ॒यमा॑नं । जसु॑रिं । न । श्ये॒नं । श्रवः॑ । च॒ । अच्छ॑ । प॒शु॒ऽमत् । च॒ । यू॒थं ॥५॥

उत स्म अपि खल्वेनं दधिक्रां भरेषु संग्रामेषु वस्त्रमथिं तायुं न वस्त्रमाथिनं तस्करमिव । तं दृष्ट्वा क्षितयो मनुष्या यथा क्रोशंति तद्वद्वैरिणोऽनुक्रोशंति । किंच नीचा नीचैरयमानं गच्छंतं जसुरिं न श्येनं क्षुधितं श्येनं पक्षिणमिव । तं यथा दृष्ट्वा पक्षिणः पलायंते तद्वत् । श्रवोऽन्नं कीर्तिं वा पशुमद्यूथं चाच्छाभिलक्ष्य गच्छंतमेनमनुक्रोशंतीति संबंधः । अपि स्मैनं वस्त्रमथिमिव वस्त्रमाथिनमित्यादिनिरुक्तमत्रानुसंधेयं । नि° ४. २४. ॥

॥ इति तृतीयस्य सप्तम एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

उत स्मासु प्रथमः सरिष्यन्नि वेवेति श्रेणिभी रथानां ।
स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत्किरणं ददश्वान् ॥ ६ ॥
उत । स्म । आसु । प्रथमः । सरिष्यन् । नि । वेवेति । श्रेणिऽभिः । रथानां ।
स्रजं । कृण्वानः । जन्यः । न । शुभ्वा । रेणुं । रेरिहत् । किरणं । ददश्वान् ॥ ६ ॥

उत स्म अपि च खल्वास्वसुरसेनासु सरिष्यन् सर्तुमिच्छन् प्रथमः प्रतम उत्कृष्टतमो मुख्यः सन् रथानां श्रेणिभी राजिभिर्युक्तः सन् निवेवेति । नितरां गच्छति । इतस्ततो धावति । क इवेति । उच्यते । स्रजं । सृज्यत उत्पाद्यते रूपमनयेति स्रगलंकृतिः । तां कृण्वानो जन्यो न जनेभ्यो हितोऽश्व इव सुभ्वा । सुष्टु भवतीति सुभ्वा शोभमानः । किरणमास्यगतं खलीनं ददश्वान् दशन् रेणुं स्वपादघातजनितं रेरिहत् । भृशं लेढि ॥

॥ अथ सप्तमी ॥

उत स्य वाजी सहुरिर्ऋतावा शुश्रूषमाणस्तन्वा समर्ये ।
तुरं यतीषु तुरयन्नृजिप्योऽधि भ्रुवोः किरते रेणुमृंजन् ॥ ७ ॥
उत । स्यः । वाजी । सहुरिः । ऋतऽवा । शुश्रूषमाणः । तन्वा । सऽमर्ये ।
तुरं । यतीषु । तुरयन् । ऋजिप्यः । अधि । भ्रुवोः । किरते । रेणुं । ऋंजन् ॥ ७ ॥

उत अपि च स्य स उक्तलक्षणो वाजी वेजनवान् गमनवान् समर्ये समरणे सहुरिः सहनशीलः शत्रूणामृतावान्नवान्तन्वा स्वावयवेन खुरादिना स्वतनुं शुश्रूषमाणस्तुरं यतीषु त्वरगामिनीष्वसुरसेनासु तुरयन्त्वरयन् ऋजिप्य ऋजुगामी रेणुं धूलिमृंजन्प्रसाधयन्तमेव रेणुं भ्रुवोरध्युपरि किरते । विक्षिपति ॥

॥ अथाष्टमी ॥

उत स्मास्य तन्यतोरिव द्योर्ऋघायतो अभियुजो भयंते ।
यदा सहस्रमभि षीमयोधीद्दुर्वर्तुः स्मा भवति भीम ऋंजन् ॥ ८ ॥
उत । स्म । अस्य । तन्यतोःऽइव । द्योः । ऋघायतः । अभिऽयुजः । भयंते ।
यदा । सहस्रं । अभि । सीं । अयोधीत् । दुःऽवर्तुः । स्म । भवति । भीमः । ऋंजन् ॥ ८ ॥

उत स्म अपि च खलु द्योर्दीप्यमानात्तन्यतोः शब्दयितुरशनेरिव ऋघायतो हिंसतोऽस्यास्माद्दधिक्रावाख्याद्देवादभियुजोऽभियोक्तारोऽसुरा भयंते। बिभ्यति। किंचायं यदा सीं सर्वतः सहस्रमभ्ययोधीत् संप्रहरेत् तदा ऋंजन् प्रसाधयन्नात्मानं भीमो भयहेतुर्दुर्वर्तुर्दुर्वारश्च भवति ॥

॥ अथ नवमी ॥

उत स्मास्य पनयंति जना जूतिं कृष्टिप्रो अभिभूतिमाशोः ।
उतैनमाहुः समिथे वियंतः परा दधिक्रा असरत्सहस्रैः ॥९॥
उत । स्म । अस्य । पनयंति । जनाः । जूतिं । कृष्टिऽप्रः । अभिऽभूतिं । आशोः ।
उत । एनं । आहुः । संऽइथे । विऽयंतः । परा । दधिऽक्राः । असरत् । सहस्रैः ॥९॥

उत स्म अपि च खल्वस्य दधिक्राव्णोऽभिभूतिमभिभवित्री जूतिं पराभिभूतिमित्युभयं वा जनाः पनयंति । स्तुवंति । कीदृशस्यास्य । कृष्टिप्रः । कृष्टयो मनुष्याः । तेषां पूरकस्याशोर्व्याप्तस्य वेगवतो वा । उतापि चैनं समिथे संग्रामे वियंतो विविधं गच्छंतो जना अयं दधिक्रा देवः सहस्रैरनुचरैः परिवृतः परासरदिति अस्मान्विहायान्यान् हंतुं गत इत्याहुः । यद्वा । एनमेवमाहुः । वियंतः शत्रवः परा । भवंतीति शेषः । दधिक्राः सहस्रैरसरत् गच्छतीति ॥

पविचेष्टावा दधिक्रा इति दधिक्राव्णो याज्या। तथा च सूचितं। दधिक्राव्णो अकारिषमा दधिक्राः शवसा पंच कृष्टीः । आ० २.१०.। इति ॥

॥ सैषा दशमी ॥

आ दधिक्राः शवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्ततान ।
सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि ॥१०॥
आ । दधिऽक्राः । शवसा । पंच । कृष्टीः । सूर्यःऽइव । ज्योतिषा । अपः । ततान ।
सहस्रऽसाः । शतऽसाः । वाजी । अर्वा । पृणक्तु । मध्वा । सं । इमा । वचांसि ॥१०॥

यो दधिक्रा देवः शवसा बलेन पंच कृष्टीः पंच जनान् देवमनुष्यासुररक्षःपितृसंज्ञकान्निषादपंचमान् चतुरो वर्णान्वा सूर्यो ज्योतिषा तेजसा यथा जगदावृणोति तद्वदप उदकान्याततान आतनोति सहस्रसाः शतसाः शतानां

सहस्राणां च दाता वाजी वेजनवानर्वारणकुशलः स देवो मध्वा मधुना मधुरेण फलेनेमेमान्युक्तानि स्तुतिवचांसि संपृणक्तु । संयोजयतु ॥

॥ इति तृतीयस्य सप्तमे द्वादशो वर्गः ॥

आशुं दधिक्रामिति षडृचं सप्तमं सूक्तं । आदितः पंच त्रिष्टुभः षष्ठ्यनुष्टुप् । ऋषिर्वामदेवः । पूर्वसूक्ते हीत्युक्तत्वादेतदपि दाधिक्रं । तथा चानुक्रांतं । आशुं षळंत्यानुष्टुबिति । सूक्तविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

आशुं दधिक्रां तमु नु ष्टवाम दिवस्पृथिव्या उत चर्किराम ।
उच्छंतीर्मामुषसः सूदयंत्वति विश्वानि दुरितानि पर्षन् ॥१॥

आशुं । दधिऽक्रां । तं । ऊं इति । नु । स्तवाम । दिवः । पृथिव्याः । उत । चर्किराम ।
उच्छंतीः । मां । उषसः । सूदयंतु । अति । विश्वानि । दुःऽइतानि । पर्षन् ॥१॥

आशुं शीघ्रगामिनं तमु तमेव दधिक्रां देवं नु क्षिप्रं स्तवाम । उतापि च दिवः पृथिव्याश्च सकाशादस्य घासं चर्किराम । विक्षिपाम । उच्छंतीस्तमो विवासयंतीरुषसो मां प्रति सूदयंतु । रक्षंतु फलानि । विश्वानि दुरिता दुरितान्यतिपर्षन् । अतिपारयंतु । अन्यदेवताकेषु मंत्रेष्वन्यदेवतास्तुतिस्तासां निपातभाक्त्वान्न विरुध्यते ॥

॥ अथ द्वितीया ॥

महश्चर्कर्म्यर्वतः क्रतुप्रा दधिक्राव्णः पुरुवारस्य वृष्णः ।
यं पूरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिं ॥२॥

महः । चर्कर्मि । अर्वतः । क्रतुऽप्राः । दधिऽक्राव्णः । पुरुऽवारस्य । वृष्णः ।
यं । पूरुऽभ्यः । दीदिऽवांसं । न । अग्निं । ददथुः । मित्रावरुणा । ततुरिं ॥२॥

क्रतुप्राः कर्मणां पूरकोऽहं महो महतोऽर्वतोऽरणवतः पुरुवारस्य बहुभिर्वरणीयस्य वृष्णो वर्षकस्य दधिक्राव्णः स्तुतिं चर्कर्मि । अत्यर्थं करोमि । हे मित्रावरुणा मित्रावरुणौ युवां ततुरिं तारकं यं दीदिवांसं नाग्निं दीप्यमानमग्निमिव स्थितं पूरुभ्यो मनुष्येभ्यस्तेषामुपकाराय ददथुः धारयथः ॥

॥ अथ तृतीया ॥

यो अश्वस्य दधिक्राव्णो अकारीत्समिद्धे अग्ना उषसो व्युष्टौ ।
अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ॥३॥

यः । अश्वस्य । दधिऽक्राव्णः । अकारीत् । संऽइद्धे । अग्नौ । उषसः । विऽउष्टौ ।
अनागसं । तं । अदितिः । कृणोतु । सः । मित्रेण । वरुणेन । सऽजोषाः ॥३॥

यो यजमानोऽश्वस्याश्वरूपस्य व्याप्तस्य वा दधिक्राव्णः स्तुतिमुषसो व्युष्टौ प्रभाते सत्यग्नौ समिद्धे सत्यकारीत् अकार्षीत् मित्रेण वरुणेन चाहोरात्राभिमानिदेवाभ्यां सजोषाः समानप्रीतिरदितिरखंडनीयो दधिक्रास्तं यजमानमनागसं कृणोतु । करोतु ॥

॥ अथ चतुर्थी ॥

दधिक्राव्ण इष ऊर्जो महो यदमन्महि मरुतां नाम भद्रं ।
स्वस्तये वरुणं मित्रमग्निं हवामह इंद्रं वज्रबाहुं ॥४॥

दधिऽक्राव्णः । इषः । ऊर्जः । महः । यत् । अमन्महि । मरुतां । नाम । भद्रं ।
स्वस्तये । वरुणं । मित्रं । अग्निं । हवामहे । इंद्रं । वज्रऽबाहुं ॥४॥

इषोऽन्नसाधकस्योर्जो बलसाधकस्य महो महतो दधिक्राव्णो देवस्य मरुतां स्तोतॄणां स्वभूतं भद्रं कल्याणं नाम नामरूपमस्ति यत्तदमन्महि । स्तुमः । किंचात्र निपातभाजो वरुणादींश्च स्वस्तये क्षेमाय हवामहे ॥

॥ अथ पंचमी ॥

इंद्रमिवेदुभये वि ह्वयंत उदीराणा यज्ञमुपप्रयंतः ।
दधिक्रामु सूदनं मर्त्याय ददथुर्मित्रावरुणा नो अश्वं ॥५॥

इंद्रंऽइव । इत् । उभये । वि । ह्वयंते । उत्ऽईराणाः । यज्ञं । उपऽप्रयंतः ।
दधिऽक्रां । ऊं इति । सूदनं । मर्त्याय । ददथुः । मित्रावरुणा । नः । अश्वं ॥५॥

इंद्रमिवैनं दधिक्रामुदीराणा युद्धायोद्योग्यं कुर्वंतो यज्ञमुपप्रयंतो यज्ञमुपक्रम्य प्रवर्तमानाश्चोभये विह्वयंते । आह्वयंति । यं मर्त्याय मर्त्यस्य सूदनं प्रेरकमश्वमश्वरूपं

दधिक्रां देवं हे मित्रावरुणा नोऽस्माकमर्थाय दद्युः धारयथः तं विहृयंते। उभय इत्यत्र स्तोतृशंसितृभेदेन वोभयविधत्वमवगंतव्यं ॥

दधिक्राव्णो अकारिषमिति षष्ठी पवित्रेष्ट्या अनुवाक्या। सूचितं च। दधिक्राव्णो अकारिषमा दधिक्राः शवसा पंच कृष्टीः। आ॰ २.१२.। इति ॥ दधिद्रप्सभक्षणेऽप्येषा। दधिक्राव्णो अकारिषमित्याग्नीध्रीये दधिद्रप्सान् भक्षयंति। आ॰ ६.१२.। इति सूचितत्वात् ॥

॥ सैषा षष्ठी ॥

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः।

सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥ ६॥

दधिऽक्राव्णः। अकारिषं। जिष्णोः। अश्वस्य। वाजिनः।

सुरभि। नः। मुखा। करत्। प्र। नः। आयूंषि। तारिषत् ॥ ६॥

दधिक्राव्णो देवस्य स्तुतिमकारिषं। करवाणि। जिष्णोर्जयशीलस्याश्वस्य व्यापकस्य वाजिनो वेगवतः। स देवोऽस्माकं मुखा मुखानि चक्षुरादींद्रियाणि सुरभि सुरभीणि करत्। करोतु। नोऽस्मभ्यमायूंषि प्रतारिषत्। प्रवर्धयतु। प्रपूर्वस्तिरतिर्वर्धनार्थः ॥

॥ इति तृतीयस्य सप्तमे त्रयोदशो वर्गः ॥

दधिक्राव्ण इदिति पंचर्चमष्टमं सूक्तं वामदेवस्यार्षं दाधिक्रं। आद्या त्रिष्टुप् शिष्टा जगत्यः। हंसः शुचिषदित्येषा सूर्यदेवताका। तथा चानुक्रमणिका। दधिक्राव्णः पंच चतस्रोऽंत्या जगत्योऽंत्या सौरीति। सूक्तविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

दधिक्राव्ण इदु नु चर्किराम विश्वा इन्मामुषसः सूदयंतु।

अपामग्नेरुषसः सूर्यस्य बृहस्पतेरांगिरसस्य जिष्णोः ॥ १॥

दधिऽक्राव्णः। इत्। ऊं इति। नु। चर्किराम। विश्वाः। इत्। मां। उषसः। सूदयंतु।

अपां। अग्नेः। उषसः। सूर्यस्य। बृहस्पतेः। आंगिरसस्य। जिष्णोः ॥ १॥

दधिक्राव्ण इदु एतन्नामकस्य देवस्यैव स्तुतिं नु क्षिप्रं चर्किराम। भृशं करवाम। मां विश्वा इदुषसः सर्वा अपि ताः सूदयंतु। कर्मसु प्रेरयंतु। अहमप्य-

वादिदेवतानां स्तुतिं करवाणीति शेषः । तासामपि निपातभाक्त्वात् स्तुतिरविरुद्धा ॥

॥ अथ द्वितीया ॥

सत्वा भरिषो गविषो दुवन्यसच्छ्रवस्यादिष उषसस्तुरण्यसत् ।

सत्यो द्रवो द्रवरः पतंगरो दधिक्रावेषमूर्जं स्वर्जनत् ॥२॥

सत्वा । भरिषः । गोऽइषः । दुवन्यऽसत् । श्रवस्यात् । इषः । उषसः । तुरण्यऽसत् ।

सत्यः । द्रवः । द्रवरः । पतंगरः । दधिऽक्रावा । इषं । ऊर्जं । स्वः । जनत् ॥२॥

सत्वा गंता भरिषो भरणकुशलो गविषो गवां प्रेरक एष्टा वा दुवन्यसत् । दुवः परिचरणमिच्छंतो दुवन्याः । तेषु सीदतीति दुवन्यसत् । इष इष्यमाणाया उषसः संबंधिनि काल इत्यर्थः । यद्वा इष एष्टा एषणीयो वा । श्रवस्यात् । श्रवस्येत् । अन्नमिच्छेत् । किंच तुरण्यसत् । त्वरया सीदतीति तुरण्यसत् । सत्यः सत्सु तायमानो द्रवो गंता द्रवरः प्रकृष्टवेगवान् पतंगरः । पतनेनोत्प्लवनेन पतनं पतंगः । तद्वान् पतंगरः । उक्तलक्षणो दधिक्रावा देव इषमन्नमूर्जं बलं स्वः स्वर्गं च जनत् । जनयेत् । उत्पादयेत् ॥

॥ अथ तृतीया ॥

उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः ।

श्येनस्येव ध्रजतो अंकसं परि दधिक्राव्णः सहोर्जा तरित्रतः ॥३॥

उत । स्म । अस्य । द्रवतः । तुरण्यतः । पर्णं । न । वेः । अनु । वाति । प्रऽगर्धिनः ।

श्येनस्यऽइव । ध्रजतः । अंकसं । परि । दधिऽक्राव्णः । सह । ऊर्जा । तरित्रतः ॥३॥

उत स्म अपि च खलु द्रवतो गच्छतस्तुरण्यतस्त्वरमाणस्य प्रगर्धिनः प्रकर्षेणाभिकांक्षतोऽस्य देवस्य गतिं वेर्गंतुः पक्षिणः पर्णं न गमनं पक्षं वानुसृत्य यथा वांत्यन्ये पक्षिणस्तद्वदनुवाति सर्वो वेगवान् जनः । सर्वेषामपि शीघ्रगामीत्यर्थः । किंच ध्रजतो गच्छतस्तरित्रतस्तारयतोऽन्यान् ॥ अंतर्भावितण्यर्थोऽयं ॥ श्येनस्येवांकसं पादाधारमुरःप्रदेशं वा परि परित ऊर्जा बलेन निमित्तेनान्नार्थं वा सहैकीभूय । संघेन गच्छंतीति शेषः ॥

॥ अथ चतुर्थी ॥

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।
क्रतुं दधिक्रा अनु संतवीत्वत्पथामंकांस्यन्वापनीफणत् ॥४॥

उत । स्यः । वाजी । क्षिपणिं । तुरण्यति । ग्रीवायां । बद्धः । अपिऽकक्षे । आसनि ।
क्रतुं । दधिऽक्राः । अनु । संऽतवीत्वत् । पथां । अंकांसि । अनु । आऽपनीफणत् ॥४॥

उतापि च स्य स वाजी वेजनवानश्वरूपो देवो ग्रीवायां गरणसाधनायां कंठे बद्धोऽपिकक्षे कक्षप्रदेश आसन्यास्ये च बद्धः । बद्धपल्यंकस्योक्तेषु स्थानेषु पाशबंधाः संभवंति । एवं बद्धः क्षिपणिं क्षेपणमनु तुरण्यति । त्वरयति गंतुं । किंचायं दधिक्रा देवः क्रतुं कर्म प्रज्ञां वान्वनुसृत्य संतवीत्वत् प्रवृद्धबलवान् सन् पथां मार्गाणामंकांसि कुटिलान्यनुसृत्यापनीफणत् । सर्वतो भृशं गच्छति ॥ फणतेर्गत्यर्थस्य यङ्लुकीदं रूपं ॥ अपि स वाजी वेजनवानित्यादिनिरुक्तमनुसंधेयं । नि० २.२८. ॥

दशरात्रे षष्ठेऽहनि तृतीयसवने मैत्रावरुणशस्त्रे हंसः शुचिषदित्येषा । आहूय दूरोहणं रोहेद्धंसः शुचिषदिति पच्छोऽर्धर्चशः । आ० ८.२. । इति सूत्रं ॥ स्मार्तविनियोगमाह शौनकः । हंसः शुचिषदित्यृचा शुचिरीक्षेद्दिवाकरं । अंतकाले अपन्नेति ब्रह्मणः सद्म शाश्वतं । ऋग्वि० २.१३. । इति ॥

॥ सैषा पंचमी ॥

हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं ॥५॥

हंसः । शुचिऽसत् । वसुः । अंतरिक्षऽसत् । होता । वेदिऽसत् । अतिथिः । दुरोणऽसत् ।
नृऽसत् । वरऽसत् । ऋतऽसत् । व्योमऽसत् । अप्ऽजाः । गोऽजाः । ऋतऽजाः ।
अद्रिऽजाः । ऋतं ॥५॥

अनया सौर्यर्चा य एषोऽंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुरित्यादिश्रुत्युक्तो मंडलाभिमानी देवोऽस्ति यश्च सर्वप्राणिचित्तरूपस्थितः परमात्मा यच्च निरस्तसमस्तोपाधिकं परं ब्रह्म तत्सर्वमेकमेवेति प्रतिपाद्यते ॥ हंसः । हंतिर्गत्यर्थः । सर्वत्र सर्वदा गंता योऽहं सोऽसावित्यादिश्रुत्युक्तप्रकारेणैकीकृत्यो-

पाद्यः परमात्ममंत्रप्रतिपाद्य आदित्यः । स च शुचौ दीप्ते द्युलोके सीदतीति शुचिषत् । अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यादिश्रुतेः । अनेन द्युस्थान आदित्यः प्रतिपादितः । स एव मध्यस्थानो वायुरित्याह । वसुः सर्वस्य वासयिता वायुः । स चांतरिक्षसदंतरिक्षसंचारी । अथ तस्यैव क्षितिस्थानवैदिकाग्निरूपतामाह । होता देवानामाह्वाता होमनिष्पादको वा वेदिषद्वेद्यां गार्हपत्यादिरूपेण स्थितः । अतिथिरतिथिवत्सर्वदा पूज्योऽग्निः । दुरोणसत् । दुरोणं गृहनाम । तत्र पाकादिसाधनत्वेन स्थितः । अनेन लौकिकाग्न्यात्मकत्वमुक्तं । नृषत् । नृषु मनुष्येषु चैतन्यरूपेण सीदतीति नृषत् । अनेन परमात्मरूपत्वमुक्तं । पुनरप्यादित्यात्मतामाह । वरसत् । वरे वरणीये मंडले सीदतीति वरसदादित्यः । वरं वा एतत्सद्मनां यस्मिन्नेष आसन्नस्तपतीति हि श्रूयते । ऋतं सत्यं ब्रह्म यज्ञो वा । तत्र सीदतीत्यृतसदग्निः । व्योमांतरिक्षं । तत्र सीदतीति व्योमसद्वायुः । इदानीमादित्यतोच्यते । अब्जा उदकेषु जातः । उदकमध्ये खल्वयं जायते । गोजा गोषु रश्मिषु जातः । ऋतं सत्यं । सर्वैर्दृश्यत्वेन सत्यजातः । न ह्यसाविंद्रादिवत्परोक्षो भवति । यद्वोदकेषु वैद्युतरूपेण वाडवरूपेण वा जातः । अद्रिजा अद्रावुदयाचले जातः । एवं महानुभाव आदित्य ऋतं सत्यमबाध्यं सर्वाधिष्ठानं ब्रह्मतत्त्वं । तद्रूपो ह्यसावेव । आदित्यस्योक्तरूपत्वं हंसः शुचिषदित्येष वै हंसः शुचिषदित्यादिना ब्राह्मणे । ऐ० ब्रा० ४. २०. । समाम्नातं ॥

॥ इति तृतीयस्य सप्तमे चतुर्दशो वर्गः ॥

इंद्रा को वामित्येकादशर्चं नवमं सूक्तं वामदेवस्यार्षं त्रैष्टुभमैंद्रावरुणं । अथानुक्रमणिका । इंद्रा को वामेकादशैंद्रावरुणं त्विति ॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने मैत्रावरुणशस्त्रेषु स्तोमवृद्धावावापार्थमेतदादिसूक्तद्वयमिंद्रा को वामिति सूक्ते । आ० ७. ९. । इति सूचितत्वात् ॥

॥ तत्र प्रथमा ॥

इंद्रा॒ को वां॑ वरुणा सु॒म्नमा॑प॒ स्तोमो॑ ह॒विष्माँ॑ अ॒मृतो॒ न होता॑ ।
यो वां॑ हृ॒दि क्रतु॑माँ अ॒स्मदु॒क्तः प॒स्पर्श॑दिंद्रावरुणा॒ नम॑स्वान् ॥१॥

इंद्रा॑ । कः॒ । वां॒ । व॒रु॒णा॒ । सु॒म्नं । आ॒प॒ । स्तोमः॑ । ह॒विष्मा॑न् । अ॒मृतः॑ । न । होता॑ ।
यः॒ । वां॒ । हृ॒दि । क्रतु॑ऽमान् । अ॒स्मत् । उ॒क्तः । प॒स्पर्श॑त् । इं॒द्रा॒व॒रु॒णा॒ । नम॑स्वान् ॥१॥

हे इंद्रा हे वरुणा हे इंद्रावरुणौ । परस्परापेक्षया द्विवचनं । वां युवयोः सुम्नं सुखं कः स्तोमो हविष्मान् हविर्भिरुपेतः सोमाज्यादिप्रदेयद्रव्योपेतं कतमत् स्तोत्रं सुम्नमाप । फलकत्वेन प्राप्नुयादित्यर्थः । यद्वा हविष्मानित्येतदुत्तरत्र योज्यं । हविष्मान् हविर्युक्तोऽमृतोऽमरणलक्षणः स्वर्गसाधनो होताग्निरिव । स यथा तथायं स्तोमो हे इंद्रावरुणौ वां युवयोर्हृदि हृदये क्रतुमान्प्रज्ञोपेतोऽस्मदस्मात्-काशादुक्त-उदितो नमस्वान्हविष्मान्नमस्कारोपेतो वा पस्पर्शत् । स्पृशेत् । हृदयंगमो भवेत् । स क इति स्तोमप्रशंसा ॥

॥ अथ द्वितीया ॥

इंद्रा ह यो वरुणा चक्र आपी देवौ मर्तः सख्याय प्रयस्वान् ।

स हंति वृत्रा समिथेषु शत्रूनवोभिर्वा महद्भिः स प्र शृण्वे ॥२॥

इंद्रा । ह । यः । वरुणा । चक्रे । आपी इति । देवौ । मर्तः । सख्याय । प्रयस्वान् ।

सः । हंति । वृत्रा । सम्ऽइथेषु । शत्रून् । अवःऽभिः । वा । महत्ऽभिः । सः । प्र । शृण्वे ॥२॥

इंद्रावरुणेंद्रावरुणौ देवौ यो मर्तो मरणधर्मा प्रयस्वान् हविर्लक्षणान्नवान् सन् सख्याय सखित्वायापी बंधू चक्रे करोति स मर्तो वृत्रा आवरकाणि पापानि हंति । तथा समिथेषु संग्रामेषु शत्रून् हंति । वाशब्दश्चार्थे । महद्भिरवोभी रक्षणैः स नरः प्र शृण्वे । प्रकृष्टं श्रूयते । विख्यातो भवति ॥

॥ अथ तृतीया ॥

इंद्रा ह रत्नं वरुणा धेष्ठेत्था नृभ्यः शशमानेभ्यस्ता ।

यदी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते ॥३॥

इंद्रा । ह । रत्नं । वरुणा । धेष्ठा । इत्था । नृऽभ्यः । शशमानेभ्यः । ता ।

यदि । सखाया । सख्याय । सोमैः । सुतेभिः । सुऽप्रयसा । मादयैते इति ॥३॥

हे इंद्रावरुणौ ता । हेति प्रसिद्धौ । तौ खलु देवावित्थेत्थं नृभ्यो मनुष्येभ्यः शशमानेभ्यः शंसमानेभ्यः स्तोतृभ्योऽस्मभ्यं रत्नं रमणीयं धनं धेष्ठा दातृतमौ । भवत इति शेषः । यदि सखाया परस्परं यजमानस्य वा सखिभूतौ सख्याय सखिकर्मणे सखित्वाय सुतेभिरभिषुतैः सोमैः सुप्रयसा शोभनसोमान्नवंतौ मादयैते तर्हि रत्नानां दातारौ भवतः ॥

॥ अथ चतुर्थी ॥

इंद्रा युवं वरुणा दिद्युमस्मिन्नोजिष्ठमुग्रा नि वधिष्टं वज्रं ।
यो नो दुरेवो वृकतिर्दभीतिस्तस्मिन्मिमाथामभिभूत्योजः ॥४॥

इंद्रा । युवं । वरुणा । दिद्युं । अस्मिन् । ओजिष्ठं । उग्रा । नि । वधिष्टं । वज्रं ।
यः । नः । दुःऽएवः । वृकतिः । दभीतिः । तस्मिन् । मिमाथां । अभिऽभूति । ओजः ॥४॥

हे इंद्रा इंद्रौ वरुणा वरुणौ हे उग्रा उग्रौ । अत्र सर्वत्र परस्परापेक्षया द्विवचनं प्र मित्रयोर्वरुणयोः । ऋग्वे० ७. ६६. १. । इतिवत् । यद्वा छांदसत्वाद्व्यवहितस्यानङ् । अस्मिन् शत्रौ दिद्युं दीप्तमोजिष्ठमतिशयेन तेजोवद्वज्रमायुधं निवधिष्टं । वधार्थं प्रेरयतमित्यर्थः । यः शत्रुर्नोऽस्माकं दुरेवो दुःप्रापो वृकतिरतिशयेनादाता दभीतिर्हिंसकस्तस्मिन् शत्रावभिभूत्यभिभावुकमोजो बलं मिमाथां । कुरुतमित्यर्थः ॥

॥ अथ पंचमी ॥

इंद्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृषभेव धेनोः ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥५॥

इंद्रा । युवं । वरुणा । भूतं । अस्याः । धियः । प्रेतारा । वृषभाऽइव । धेनोः ।
सा । नः । दुहीयत् । यवसाऽइव । गत्वी । सहस्रऽधारा । पयसा । मही । गौः ॥५॥

हे इंद्रावरुणा इंद्रावरुणौ युवं युवामस्या धियः स्तुत्याः प्रेतारा प्रीणयितारौ भूतं । भवतं । वृषभा सेक्तारौ वृषभौ धेनोरिव । सा स्तुतिरूपा धेनुर्नोऽस्माकं दुहीयत् । दुह्येत् । कामान् पूरयेत् । यवसा तृणादिघासेन निमित्तेन गत्वी गत्वा पयसा सहस्रधारा मही महती गौरिव ॥

॥ इति तृतीयस्य सप्तमे पंचदशो वर्गः ॥

॥ अथ षष्ठी ॥

तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये ।
इंद्रा नो अत्र वरुणा स्यातामवोभिर्दस्मा परितक्म्यायां ॥६॥

तोके । हिते । तनये । उर्वरासु । सूरः । दृशीके । वृषणः । च । पौंस्ये ।
इंद्रा । नः । अत्र । वरुणा । स्यातां । अवःऽभिः । दस्मा । परिऽतक्म्यायां ॥६॥

इंद्रावरुणौ देवौ नो हिते तोके पुत्रे तनये तत्पुत्रे चोर्वरासु सस्याढ्यासु भूमिषु निमित्तभूतासु सूरः प्रेरकस्य सूर्यस्य दृशीके चिरकालदर्शनाय। चिरजीवनायेत्यर्थः। तथा वृषणः सेक्तुर्मम पौंस्ये च पुंस्त्वाय च पुनरपि प्रजननसामर्थ्याय च दस्रा शत्रूणां हिंसकौ संतौ नोऽस्माकमवोभी रक्षणैः सह परितक्म्यायां परितकने निमित्तभूते सति। यद्वा रात्रिनामैतत्। रात्रौ हिंसकानां वधाय स्यातां। भवेतां॥

॥ अथ सप्तमी ॥

युवामिद्ध्यवसे पूर्व्याय परि प्रभूती गविषः स्वापी।

वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शंभू ॥७॥

युवां। इत्। हि। अवसे। पूर्व्याय। परि। प्रभूती इति प्रऽभूती। गोऽइषः। स्वापी इति सुऽआपी।

वृणीमहे। सख्याय। प्रियाय। शूरा। मंहिष्ठा। पितराऽइव। शंभू इति शंऽभू ॥७॥

हे इंद्रावरुणौ गविषो गा इच्छंतो वयं युवामित्। हीति पादपूरणः। युवामेव पूर्व्याय पुरातनाय युवाभ्यां कृतायावसे रक्षणाय। वृणीमह इति संबंधः। प्रभूती प्रभवंतौ स्वापी शोभनबंधुभूतौ। आपिरिति बंधुः। यद्वा सुष्ठु व्यापनशीलौ शूरा विक्रांतौ मंहिष्ठातिशयेन पूज्यौ युवां सख्याय समानख्यानाय प्रियाय च परि वृणीमहे। परितः प्रार्थयामहे। शंभू सुखस्य भावयितारौ पितरेव पितरौ पुत्राय तद्वत्॥

॥ अथाष्टमी ॥

ता वां धियोऽवसे वाजयंतीराजिं न जग्मुर्युवयूः सुदानू।

श्रिये न गाव उप सोममस्थुरिंद्रं गिरो वरुणं मे मनीषाः ॥८॥

ताः। वां। धियः। अवसे। वाजऽयंतीः। आजिं। न। जग्मुः। युवऽयूः। सुदानू इति सुऽदानू।

श्रिये। न। गावः। उप। सोमं। अस्थुः। इंद्रं। गिरः। वरुणं। मे। मनीषाः ॥८॥

सुदानू शोभनफलदातारौ हे देवौ वां युवां वाजयंती रत्नमिच्छंत्यो धियः स्तुतयो जग्मुः। गच्छंति। युवयूर्युवां कामयमानाः पत्तय आजिं न संग्राममिव। किंच श्रिये दध्यादिश्रयणाय गावः सोमं न सोममिवेंद्रं वरुणं च मे मदीया मनीषा मनस ईश्वरा गिरः स्तुतय उपास्थुः। तिष्ठंति। प्रीणयंतीत्यर्थः॥

॥ अथ नवमी ॥

इमा इंद्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छमानाः ।
उपेमस्थुर्जोष्टार इव वस्वो रघ्वीरिव श्रवसो भिक्षमाणाः ॥९॥

इमाः । इंद्रं । वरुणं । मे । मनीषाः । अग्मन् । उप । द्रविणं । इच्छमानाः ।
उप । ईं । अस्थुः । जोष्टारःऽइव । वस्वः । रघ्वीःऽइव । श्रवसः । भिक्षमाणाः ॥९॥

इंद्रं वरुणं च मे मम मनीषाः स्तुतयो द्रविणमिच्छमानाः सत्य उपाग्मन् । उपगच्छंति । जोष्टारः सेवका वस्वो धनस्य लाभाय धनिकं स्वामिनमिव । रघ्वीरिव लघ्व्य इव श्रवसोऽन्नस्यान्नं भिक्षमाणा एनमिंद्रं वरुणं चोपास्थुः । उपतिष्ठंते ॥

॥ अथ दशमी ॥

अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम ।
ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचंतां ॥१०॥

अश्व्यस्य । त्मना । रथ्यस्य । पुष्टेः । नित्यस्य । रायः । पतयः । स्याम ।
ता । चक्राणौ । ऊतिऽभिः । नव्यसीभिः । अस्मऽत्रा । रायः । निऽयुतः । सचंतां ॥१०॥

अश्व्यस्याश्वसमूहस्य रथ्यस्य रथरूपस्य रथार्हस्य वा पुष्टेः पोषस्य नित्यस्याविचलितस्य रायो धनस्य त्मनात्मना स्वयमेवाप्रयत्नेन पतयः स्याम । ता तौ देवौ चक्राणा चंक्रममाणौ गंतारौ । भवतमिति शेषः । नव्यसीभिर्नूतनाभिरूतिभी रक्षाभिरस्मत्रास्मासु नियुतोऽश्वा रायो धनानि च सचंतां । सेवंतां ॥

॥ अथैकादशी ॥

आ नो बृहंता बृहतीभिरूती इंद्र यातं वरुण वाजसातौ ।
यद्दिद्यवः पृतनासु प्रक्रीळान्तस्य वां स्याम सनितार आजेः ॥११॥

आ । नः । बृहंता । बृहतीभिः । ऊती । इंद्र । यातं । वरुण । वाजऽसातौ ।
यत् । दिद्यवः । पृतनासु । प्रऽक्रीळान् । तस्य । वां । स्याम । सनितारः । आजेः ॥११॥

हे बृहंता महांतौ हे इंद्र हे वरुण बृहतीभिर्महतीभिरूती ऊतिभी रक्षाभिः सहायातं । आगच्छतं । वाजसातौ संग्रामेऽन्नलाभनिमित्तभूते वा यद्यस्मिन्वाजौ

संग्रामे पृतनासु सेनासु दिद्यवः । आयुधनामैतत् । आयुधानि शत्रुसंबंधीनि प्रक्रीळान् प्रक्रीडंते तस्य तादृशस्याजेः सनितारः संभक्तारः स्याम । भवेम वां युवयोरनुग्रहात् ॥

॥ इति तृतीयस्य सप्तमे षोडशो वर्गः ॥

मम द्वितेति दशर्चं दशमं सूक्तं । पुरुकुत्सस्य पुत्रस्त्रसदस्यू राजर्षिः । आद्यासु षट्स्वात्मनः स्तुत्यत्वादात्मा देवता । अवशिष्टानां चतसृणामिंद्रावरुणौ देवता । त्रिष्टुप् छंदः । अथानुक्रमणिका । मम द्विता दश त्रसदस्युः पौरुकुत्स्यः षडाद्या आत्मस्तव इति । उक्तो विनियोगः पूर्वसूक्ते ॥

॥ तत्र प्रथमा ॥

मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वे अमृता यथा नः ।
क्रतुं सचंते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥१॥
मम । द्विता । राष्ट्रं । क्षत्रियस्य । विश्वऽआयोः । विश्वे । अमृताः । यथा । नः ।
क्रतुं । सचंते । वरुणस्य । देवाः । राजामि । कृष्टेः । उपमस्य । वव्रेः ॥१॥

क्षत्रियस्य क्षत्रियजात्युत्पन्नस्य विश्वायोः कृत्स्नमनुष्याधीशस्य । ममेत्यात्मनो निर्देशः । द्विता क्षितिस्वर्गभेदेन द्वित्वापन्नं राष्ट्रं । मम त्रसदस्योर्विश्वे सर्वेऽमृता देवा यथा नोऽस्माकं भवंति तथा राष्ट्रं प्रजाश्चेत्यर्थः । वरुणस्य वारकस्य वरुणात्मनो वा कृष्टेर्मनुष्यस्य तद्वतो वा उपमस्य । अंतिकनामैतत् । सर्वेषामंतिकतमस्य वव्रेः । रूपनामैतत् । रूपवतो मम क्रतुं कर्म सचंते । सेवंते देवाः सर्वेऽपि । अहं च राजामि । राजतिरैश्वर्यकर्मा । सर्वेश्वरो भवामि । यद्वा उपमस्य वव्रेः कृष्टे राजामीति योज्यं ॥

॥ अथ द्वितीया ॥

अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयंत ।
क्रतुं सचंते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥२॥
अहं । राजा । वरुणः । मह्यं । तानि । असुर्याणि । प्रथमा । धारयंत ।
क्रतुं । सचंते । वरुणस्य । देवाः । राजामि । कृष्टेः । उपमस्य । वव्रेः ॥२॥

अहमेव च राजा वरुणो भवामि। मह्यं मदर्थमेव प्रथमा मुख्यानि या तानि प्रसिद्धान्यसुर्याण्यसुरविघातकानि बलानि धारयंत। अधारयन्देवाः। चिदं गतं॥

॥ अथ तृतीया ॥

अहमिंद्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके।
त्वष्टेव विश्वा भुवनानि विद्वान्समैरयं रोदसी धारयं च ॥३॥

अहं। इंद्रः। वरुणः। ते इति। महिऽत्वा। उर्वी इति। गभीरे इति। रजसी इति।
सुमेके इति सुऽमेके।
त्वष्टाऽइव। विश्वा। भुवनानि। विद्वान्। सं। ऐरयं। रोदसी इति। धारयं। च ॥३॥

अहं त्रसदस्युरिंद्र इंद्रोऽप्यस्मि। अहं वरुणश्च। ते महित्वा महित्वेनोर्वी विस्तीर्णे गभीरे दुरवगाहे अवकाशवत्यौ वा सुमेके सुरूपे रजसी द्यावापृथिव्यौ ते अप्यहमेव। विद्वान् जानन्नहं त्वष्टेव प्रजापतिरिव विश्वा भुवनानि सर्वाणि भूतानि समैरयं। संप्रैरयं। रोदसी द्यावापृथिव्यौ धारयं च। धृतवानस्मि ॥

॥ अथ चतुर्थी ॥

अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य।
ऋतेन पुत्रो अदितेर्ऋतावोत त्रिधातु प्रथयद्वि भूम ॥४॥

अहं। अपः। अपिन्वं। उक्षमाणाः। धारयं। दिवं। सदने। ऋतस्य।
ऋतेन। पुत्रः। अदितेः। ऋतऽवा। उत। त्रिऽधातु। प्रथयत्। वि। भूम ॥४॥

अहमेवोक्षमाणाः सिंचतीरपोऽपिन्वं। असेचयं। तथा ऋतस्योदकस्यादित्यस्य वा सदने स्थाने निमित्ते सति दिवं द्युलोकं धारयं। यद्वोदकाधारे स्थाने दिवमादित्यं धारयं। अहमेव ऋतेनोदकेन निमित्तेनादितेः पुत्र ऋतावाभूवं। उतापि च भूम व्याप्तमाकाशं त्रिधातु त्रिप्रकारं वि विशेषेण प्रथयत्। मदर्थमेव क्षित्यादिलोकत्रयमकार्षीत्परमेश्वरः ॥

॥ अथ पंचमी ॥

मां नरः स्वश्वा वाजयंतो मां वृताः समरणे हवंते।
कृणोम्याजिं मघवाहमिंद्र इयर्मि रेणुमभिभूत्योजाः ॥५॥

मां । नरः । सुऽअश्वाः । वाजयंतः । मां । वृताः । संऽअरणे । हवंते ।
कृणोमि । आजिं । मघऽवा । अहं । इंद्रः । इयर्मि । रेणुं । अभिभूतिऽओजाः ॥५॥

मां मामेव स्वश्वाः शोभनाश्वा वाजयंतः संग्राममिच्छंतो नरो नेतारो भटा अनुगच्छंतीति शेषः । मामेव वृताः संतः समरणे संग्रामे हवंते । आह्वयंति युद्धार्थं । मघवा धनवानहमिंद्रः समाजिं कृणोमि । करोमि । अभिभूत्योजाः परेषामभिभाविबलोऽहं रेणुमियर्मि प्रेरयामि ॥

॥ इति तृतीयस्य सप्तमे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतं ।
यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी अपारे ॥६॥

अहं । ता । विश्वा । चकरं । नकिः । मा । दैव्यं । सहः । वरते । अप्रतिऽइतं ।
यत् । मा । सोमासः । ममदन् । यत् । उक्था । उभे इति । भयेते इति । रजसी इति अपारे इति ॥६॥

अहं त्रसदस्युस्ता तानि प्रसिद्धानि विश्वा सर्वाणि चकरं । अकार्षं । अप्रतीतमप्रतिगतं मा मां दैव्यं सहो देवसंबंधि सहो बलं नकिर्वरते । नैव वारयति । यद्यस्मात्सोमासः सोमा मा मां ममदन् अमदयन् यच्चोक्था शस्त्राण्यपि ममदन् तस्मान्मत्तोऽपारे दूरपारे उभे रजसी द्यावापृथिव्यौ भयेते । चलतः ॥

॥ अथ सप्तमी ॥

विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः ।
त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इंद्र सिंधून् ॥७॥

विदुः । ते । विश्वा । भुवनानि । तस्य । ता । प्र । ब्रवीषि । वरुणाय । वेधः ।
त्वं । वृत्राणि । शृण्विषे । जघन्वान् । त्वं । वृतान् । अरिणाः । इंद्र । सिंधून् ॥७॥

इतः परमिंद्रावरुणयोः स्तुतिः । हे वरुण तस्य ते । कर्मणि षष्ठी । तं त्वां विश्वा सर्वाणि ता तानि भुवनानि भूतजातानि विदुः । जानंति । हे वेधः । स्तोतृनामैतत् । हे स्तोतर्वरुणाय प्रब्रवीषि । वरुणं स्तौषि । हे इंद्र त्वं वृत्राणि

वैरिणो जघन्वान् हतवानिति शृण्विषे । श्रूयसे । किंच हे इंद्र त्वं वृतानावृतान् सिंधून् स्यंदनस्वभावानप्संघानरिणाः । अगमयः ॥

॥ अथाष्टमी ॥

अस्माकमत्र पितरस्त आसन्त्सप्त ऋषयो दौर्गहे बध्यमाने ।
त आयजंत त्रसदस्युमस्या इंद्रं न वृत्रतुरमर्धदेवं ॥८॥

अस्माकं । अत्र । पितरः । ते । आसन् । सप्त । ऋषयः । दौःऽगहे । बध्यमाने ।
ते । आ । अयजंत । त्रसदस्युं । अस्याः । इंद्रं । न । वृत्रऽतुरं । अर्धऽदेवं ॥८॥

पुरुकुत्सस्य महिषी दौर्गहे बंधनस्थिते । पत्यावराजकं दृष्ट्वा राष्ट्रं पुत्रस्य लिप्सया ॥ यदृच्छया समायातान् सप्तर्षीन्पर्यपूजयत् । ते च प्रीताः पुनः प्रोचुर्यजेंद्रावरुणौ भृशं ॥ सा चेंद्रावरुणाविष्ट्वा त्रसदस्युमजीजनत् । इतिहासमिमं जानन्नृषिर्ब्रूते ऋचाविह ॥ अथास्माकमत्रास्मिन्नराजके देशेऽस्यां पृथिव्यां वा पितरः पालयितार उत्पादकास्त आसन् । अभवन् । एते सप्तर्षयः प्रसिद्धा दौर्गहे दुर्गहस्य पुत्रे पुरुकुत्से बध्यमाने दृढं पाशैर्यस्मादस्या अस्यै पुरुकुत्सान्यै त्रसदस्युमायजंत प्रादुरिंद्रावरुणयोरनुग्रहात् । कीदृशं तं । वृत्रतुरं वृत्रस्य शत्रोर्हंतारमर्धदेवं देवानामर्धे समीपे वर्तमानं । यद्वा देवानामर्धभूतमिंद्रं न इंद्रमिव स्थितं पुत्रं दत्तवंतः । यत्सर्वेषामर्धमिंद्रः प्रति तस्मादिंद्रो देवतानां भूयिष्ठभाक्तम इति तैत्तिरीयकं ॥

॥ अथ नवमी ॥

पुरुकुत्सानी हि वामदाशद्धव्येभिरिंद्रावरुणा नमोभिः ।
अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवं ॥९॥

पुरुऽकुत्सानी । हि । वां । अदाशत् । हव्येभिः । इंद्रावरुणा । नमःऽभिः ।
अथ । राजानं । त्रसदस्युं । अस्याः । वृत्रऽहनं । ददथुः । अर्धऽदेवं ॥९॥

हे इंद्रावरुणौ पुरुकुत्सानी पुरुकुत्सस्य पत्नी ऋषिप्रेरिता वां युवामदाशद्धि । अप्रीणयत् खलु । हव्येभिर्हविर्भिर्नमोभिः स्तुतिभिश्च । अथ राजानं त्रसदस्युं वृत्रहणमर्धदेवमुक्तलक्षणं पुत्रमस्या अस्यै पुरुकुत्सान्यै ददथुः । दत्तवंताविति ॥

॥ अथ दशमी ॥

राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुमिंद्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरंतीं ॥१०॥

राया । वयं । ससऽवांसः । मदेम । हव्येन । देवाः । यवसेन । गावः ।
तां । धेनुं । इंद्रावरुणा । युवं । नः । विश्वाहा । धत्तं । अनपऽस्फुरंतीं ॥१०॥

राया धनेन मदेम ससवांसो युवां संभक्तारो वयं । हव्येन देवा मोदंतु यवसेन गावः । तां धेनुं प्रीणयित्रीं रयिं हे इंद्रावरुणौ विश्वाहा विश्वस्य हंतारौ युवं युवां नोऽस्माकं धत्तं । कीदृशीं । अनपस्फुरंतीमनवहिंसितां । यद्वा विश्वाहेत्यव्ययं । सर्वदेत्यर्थः ॥

॥ इति तृतीयस्य सप्तमेऽष्टादशो वर्गः ॥

क उ श्रवदिति सप्तर्चमेकादशं सूक्तं । सुहोत्रपुत्रौ पुरुमीळ्हाजमीळ्हावृषी । त्रिष्टुप् छंदः । अश्विनौ देवता । अत्रानुक्रमणिका । क उ श्रवत्सप्त पुरुमीळ्हाजमीळ्हौ सौहोत्रौ त्वाश्विनं हि ॥ प्रातरनुवाकाश्विनशस्त्रयोराश्विने क्रतौ त्रैष्टुभे छंदसीदमादिके द्वे सूक्ते । धेनुः प्रत्नस्य क उ श्रवत् । आ० ४. १५. । इति सूत्रितत्वात् ॥

॥ तत्र प्रथमा ॥

क उं श्रवत्कतमो यज्ञियानां वंदारु देवः कतमो जुषाते ।
कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्यां ॥१॥

कः । ऊं इति । श्रवत् । कतमः । यज्ञियानां । वंदारु । देवः । कतमः । जुषाते ।
कस्य । इमां । देवीं । अमृतेषु । प्रेष्ठां । हृदि । श्रेषाम । सुऽस्तुतिं । सुऽहव्यां ॥१॥

यज्ञियानां यज्ञार्हाणां देवानां मध्ये क उ देवः श्रवत् । शृणुयात्स्तुतिं । कतमो देवो वंदारु वंदनशीलं स्तोत्रं । कतमो देवो जुषाते । सेवते । कस्य हृदीमां प्रेष्ठां प्रियतरां देवीं द्योतमानां सुहव्यां शोभनान्नोपेतां शोभनैर्हविर्भिर्युक्तां वा सुष्टुतिममृतेषु श्रेषाम । श्लेषयेम श्राययेम वा । अश्विनावंतरेण स्तुतेः को देवः स्वामी भवेदिति ॥

॥ अथ द्वितीया ॥

को मृळाति कतम आगमिष्ठो देवानामु कतमः शंभविष्ठः ।
रथं कमाहुर्द्रवदश्वमाशुं यं सूर्यस्य दुहितावृणीत ॥२॥
कः । मृळाति । कतमः । आऽगमिष्ठः । देवानां । ऊं इति । कतमः । शंऽभविष्ठः ।
रथं । कं । आहुः । द्रवत्ऽअश्वं । आशुं । यं । सूर्यस्य । दुहिता । अवृणीत ॥२॥

को मृळाति । को देवो मृडाति । सुखयेदस्मान् । कतमो देव आगमिष्ठ आगंतृतमोऽस्मद्यज्ञं प्रति । देवानामु देवानां मध्ये कतमो देवः शंभविष्ठः सुखस्य भावयितृतमः । एवमुक्तगुणविशिष्टः को भवेत् अश्विनावंतरेणेति भावः । कं रथं द्रवदश्वमाशुमाहुः । ब्रुवते । यं रथं सूर्यस्य दुहिता सूर्यस्य पत्न्यवृणीत समभजत् । तं कं रथं वेगवंतमाहुः ॥

॥ अथ तृतीया ॥

मक्षू हि ष्मा गच्छथ ईवतो द्यूनिंद्रो न शक्तिं परितक्म्यायां ।
दिव आजाता दिव्या सुपर्णा कया शचीनां भवथः शचिष्ठा ॥३॥
मक्षु । हि । स्म । गच्छथः । ईवतः । द्यून् । इंद्रः । न । शक्तिं । परिऽतक्म्यायां ।
दिवः । आऽजाता । दिव्या । सुऽपर्णा । कया । शचीनां । भवथः । शचिष्ठा ॥३॥

मक्षु शीघ्रं । हि स्मेति पूरणौ । ईवतो गमनवत आगामिनो द्यून्दिवसान् सुत्यासंबंधिनः प्रतिगच्छथः । इंद्रः शक्तिं न स्वकीयां शक्तिं यथा परितक्म्यायां रात्रावतीतायां प्रदर्शयतीति शेषः । सुत्याहन्युषःकाल इंद्रो यथा गच्छति तद्वद्युवामपि गच्छतमित्यर्थः । दिवो द्युलोकादाजातागतौ दिव्या दिवि भवौ सुपर्णा शोभनगमनौ युवां शचीनां युष्मत्संबंधिनां कर्मणां शक्तीनां वा मध्ये कया शच्या शचिष्ठा शक्तिमत्तरौ शोभनकर्मवंतौ वा भवथः ॥

॥ अथ चतुर्थी ॥

का वां भूदुपमातिः कया न आश्विना गमथो हूयमाना ।
को वां महश्चित्त्यजसो अभीक उरुष्यतं माध्वी दस्रा न ऊती ॥४॥
का । वां । भूत् । उपऽमातिः । कया । नः । आ । अश्विना । गमथः । हूयमाना ।
कः । वां । महः । चित् । त्यजसः । अभीके । उरुष्यतं । माध्वी इति । दस्रा । नः । ऊती ॥४॥

वां युवयोः कोपमातिः। उप समीपे मातिर्मानं गुणानां परिच्छित्तिर्यस्यां सा स्तुतिः का भूत्। भवेत्। कया स्तुत्या हूयमानावाहूयमानौ संतौ नोऽस्मा-नागमथः। आगच्छथः। वां युवयोरभीक आसन्नप्रदेशे महश्चिन्महतस्त्यजसः। त्यज्यते परित्यज्यते सर्वैरिति त्यजः क्रोधः। तस्य सोढा को भवेत्। हे माध्वी मधुरसस्योदकस्य स्रष्टारौ हे दस्रा शत्रूणामुपक्षपयितारावश्विनौ नोऽस्मानूती ऊत्या रक्षयोरुथतं। रक्षाकर्मैतत्। रक्षतं॥

॥ अथ पंचमी ॥

उरु वां रथः परि नक्षति द्यामा यत्समुद्रादभि वर्तते वां।
मध्वा माध्वी मधु वां प्रुषायन्यत्सीं वां पृक्षो भुरजंत पक्वाः ॥५॥
उरु। वां। रथः। परि। नक्षति। द्यां। आ। यत्। समुद्रात्। अभि। वर्तते। वां।
मध्वा। माध्वी इति। मधु। वां। प्रुषायन्। यत्। सीं। वां। पृक्षः। भुरजंत। पक्वाः ॥५॥

हे अश्विनौ वां रथो द्यां परि द्युलोकस्य परित उरु प्रभूतं नक्षति। गच्छति। यद्यस्मादा अर्वाक् समुद्रात्समुद्रवणसाधनादंतरिक्षाद्वां प्रति अभिवर्तते आभि-मुख्येन गच्छति। हे माध्वी उक्तलक्षणौ मध्वा मधुरेण पयसा मधु मधुरं सोमरसं प्रुषायन्। सिंचंत्यध्वर्यवः। यद्यस्मात्सीं सर्वतो वां पृक्षो युवयोः सोमं पक्वाः पक्वा यवा भुरजंत प्राप्नुवंति तस्मादभिवर्तते वामिति ॥

॥ अथ षष्ठी ॥

सिंधुर्ह वां रसया सिंचदश्वान्घृणा वयोऽरुषासः परि ग्मन्।
तदू षु वामजिरं चेति यानं येन पती भवथः सूर्यायाः ॥६॥
सिंधुः। ह। वां। रसया। सिंचत्। अश्वान्। घृणा। वयः। अरुषासः। परि। ग्मन्।
तत्। ऊं इति। सु। वां। अजिरं। चेति। यानं। येन। पती इति। भवथः। सूर्यायाः ॥६॥

वामश्वान् सिंधुः स्यंदमानो मेघ उदकं वा रसया रसेन सिंचत्। असेचयत्। घृणा दीप्त्या वयः पक्षिसदृशा वेतारो वा अश्वा अरुषास आरोचमानाः संतः परि परितो ग्मन्। गच्छंति। वां यानं गमनसाधनं प्रसिद्धो रथोऽजिरं। क्षिप्र-नामैतत्। सु सुष्ठु चेति। ज्ञायते। येन रथेन सूर्यायाः पती पालयितारौ वोढारौ भवथः स रथश्चेतीति ॥

॥ अथ सप्तमी ॥

इहेह यद्वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥७॥

इहऽइह । यत् । वां । समना । पपृक्षे । सा । इयं । अस्मे इति । सुऽमतिः । वाजऽरत्ना ।
उरुष्यतं । जरितारं । युवं । ह । श्रितः । कामः । नासत्या । युवद्रिक् ॥७॥

हे अश्विनौ यद्यस्मात् । यया वा सुमत्या । इहेहास्मिन्नेव यज्ञे समना समानमनस्कौ । सदृशावित्यर्थः । तौ वां युवां सुमत्या पपृक्षे स्तुत्या संयोजयामि । सेयमिदानीं क्रियमाणा सुमतिः शोभनस्तुतिरस्मे अस्माकमेव फलवती भवत्विति शेषः । हे वाजरत्ना रमणीयान्नौ । अन्नं वै वाज इति श्रुतेः । युवं युवां जरितारं गरितारं स्तोतारं मामुरुष्यतं । रक्षतं । हे नासत्याश्विनौ कामोऽस्मदीयो युवद्रिक् ह युवामेव गच्छन् श्रितः प्राप्तः ॥

॥ इति तृतीयस्य सप्तम एकोनविंशो वर्गः ॥

तं वां रथमिति सप्तर्चं द्वादशं सूक्तं । पुरुमीळ्हाजमीळ्हावेव ऋषी । त्रिष्टुप् छंदः । अश्विनौ देवता । तं वामित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः ।
यः सूर्यां वहति वंधुरायुर्गिर्वाहसं पुरुतमं वसूयुं ॥१॥

तं । वां । रथं । वयं । अद्य । हुवेम । पृथुऽज्रयं । अश्विना । संऽगतिं । गोः ।
यः । सूर्यां । वहति । वंधुरऽयुः । गिर्वाहसं । पुरुऽतमं । वसुऽयुं ॥१॥

हे अश्विनौ वां युवयो रथं स्तोतारोऽद्य सुत्याहनि हुवेम । आह्वयामः । कीदृशं तं । पृथुज्रयं प्रथितवेगं गोः संगतिं संगमयितारं । यो रथः सूर्यां वहति धारयति वंधुरयुः । रथे निवासाधारभूतः काष्ठो वंधुरं तद्वान् । तं गिर्वाहसं गिरां स्तुतीनां वोढारं पुरुतमं प्रभूततमं वसूयुं वसुमंतं ॥

॥ अथ द्वितीया ॥

युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः ।
युवोर्वपुरभि पृक्षः सचंते वहंति यत्ककुहासो रथे वां ॥२॥

युवं । श्रियं । अश्विना । देवता । तां । दिवः । नपाता । वनथः । शचीभिः ।
युवोः । वपुः । अभि । पृक्षः । सचंते । वहंति । यत् । ककुहासः । रथे । वां ॥२॥

हे दिवो नपातादित्यस्य पुत्रस्थानीयौ द्युलोकस्य वा न पातयितारौ हे अश्विनौ युवं युवां देवता देवते ॥ विभक्तिव्यत्ययः ॥ तां प्रसिद्धां श्रियं शचीभिः कर्मभिः शक्तिभिर्वा वनथः । संभजेथे । यद्वा वनतिर्दानार्थः । युवोर्युवयोर्वपुः शरीरं पृक्षोऽन्नानि सोमलक्षणान्यभिसचंते । यद्यदा रथे वां वहंति ककुहासो महांतोऽश्वाः । यद्वा स्तुतयो वां युवां रथे वहंति ॥

॥ अथ तृतीया ॥

को वामद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः ।
ऋतस्य वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत् ॥३॥

कः । वां । अद्य । करते । रातऽहव्यः । ऊतये । वा । सुतऽपेयाय । वा । अर्कैः ।
ऋतस्य । वा । वनुषे । पूर्व्याय । नमः । येमानः । अश्विना । आ । ववर्तत् ॥३॥

को यजमानोऽद्य वां युवयोः करते कुर्यात् स्तुतिमर्कैर्मंत्रै रातहव्यो दत्तसोम ऊतये वा रक्षणाय वा सुतपेयाय सोमपानाय वा । ऋतस्योदकस्य यज्ञस्य वा पूर्व्याय पुराणाय वनुषे संभजनाय हे अश्विना नमो येमानो नमस्कारं कुर्वाणः क आववर्तत् । आवर्तयेद्यज्ञं प्रति ॥

॥ अथ चतुर्थी ॥

हिरण्ययेन पुरुभू रथेनेमं यज्ञं नासत्योप यातं ।
पिबाथ इन्मधुनः सोम्यस्य दधथो रत्नं विधते जनाय ॥४॥

हिरण्ययेन । पुरुभू इति पुरुऽभू । रथेन । इमं । यज्ञं । नासत्या । उप । यातं ।
पिबाथः । इत् । मधुनः । सोम्यस्य । दधथः । रत्नं । विधते । जनाय ॥४॥

हे पुरुभू बहु भवंतौ नासत्याविमं यज्ञं हिरण्ययेन रथेनोपयातं । सोम्यस्य

सोमसंबंधिनो मधुनो मधुररसस्य ॥ कर्मणि षष्ठी ॥ सोमरसं पिबाथः । पिबथः । विदधते परिचरते जनाय मह्यं रत्नं रमणीयं धनं दधथः । धारयथः ॥ दधतेर्दानार्थस्य लेटि रूपं ॥

॥ अथ पंचमी ॥

आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन ।
मा वामन्ये नि यमन्देवयंतः सं यद्दे नाभिः पूर्व्या वां ॥५॥
आ । नः । यातं । दिवः । अच्छ । पृथिव्याः । हिरण्ययेन । सुऽवृता । रथेन ।
मा । वां । अन्ये । नि । यमन् । देवऽयंतः । सं । यत् । ददे । नाभिः । पूर्व्या । वां ॥५॥

नोऽस्मानच्छाभि प्राप्तुं दिवो द्युलोकात्पृथिव्याः सकाशाद्वायातं । केन साधनेन । हिरण्ययेन हितरमणीयेन सुवृता शोभनावर्तनेन रथेन । वां युवामन्ये देवयंतो देवौ युवामिच्छंतो यजमाना मा नियमन् । नियमनं मा कुर्वन् । यद्यस्मात्पूर्व्या पूर्वोर्हैतरयष्टृभ्यः पूर्वभाविनी नाभिर्बंधिका स्तुतिः संददे संबध्नाति तस्मादायातं ॥

॥ अथ षष्ठी ॥

नू नो रयिं पुरुवीरं बृहंतं दस्रा मिमाथामुभयेष्वस्मे ।
नरो यद्वामश्विना स्तोममावन्त्सधस्तुतिमाजमीळ्हासो अग्मन् ॥६॥
नु । नः । रयिं । पुरुऽवीरं । बृहंतं । दस्रा । मिमाथां । उभयेषु । अस्मे इति ।
नरः । यत् । वां । अश्विना । स्तोमं । आवन् । सधऽस्तुतिं । आजऽमीळ्हासः । अग्मन् ॥६॥

नु क्षिप्रं नोऽस्माकं रयिं धनं पुरुवीरं बहुपुत्रोपेतं बृहंतं महांतं हे दस्रावश्विनौ मिमाथां । कुरुतं । उभयेषु पुरुमीळ्हाजमीळ्हेष्वस्मे अस्मासु यद्यदा नरो नेतार ऋत्विजः पुरुमीळ्हसंबंधिनो वां युवयोः स्तोमं स्तोत्रमावन् अगमन् प्राप्ताः । तथा सधस्तुतिं सहस्तुतिमाजमीळ्हासोऽजमीळ्हसंबंधिनोऽपि तैः सहाग्मन् ॥

॥ अथ सप्तमी ॥

इहेह यद्वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥७॥

इहऽइह। यत्। वां। समना। पपृक्षे। सा। इयं। अस्मे इति। सुऽमतिः। वाजऽरत्ना।
उरुष्यतं। जरितारं। युवं। ह। श्रितः। कामः। नासत्या। युवद्रिक् ॥ ७॥

इहेहेति गतं ॥

॥ इति तृतीयस्य सप्तमे विंशो वर्गः ॥

एष स्य भानुरिति सप्तर्चं त्रयोदशं सूक्तं। आदितः षट् जगत्यः सप्तमी त्रिष्टुप्। मंडलद्रष्टा वामदेव ऋषिः। अश्विनौ देवता। एष स्य त्रिष्टुबंतमिति ह्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदसीदं शस्यं। तथा च सूचितं। अबोध्यग्निर्ज्म एष स्य भानुः। आ॰ ४. १५.। इति॥

॥ तत्र प्रथमा ॥

एष स्य भानुरुदियर्ति युज्यते रथः परिज्मा दिवो अस्य सानवि।
पृक्षासो अस्मिन्मिथुना अधि त्रयो हृतिस्तुरीयो मधुनो वि रप्शते ॥ १॥
एषः। स्यः। भानुः। उत्। इयर्ति। युज्यते। रथः। परिऽज्मा। दिवः। अस्य। सानवि।
पृक्षासः। अस्मिन्। मिथुनाः। अधि। त्रयः। हृतिः। तुरीयः। मधुनः। वि। रप्शते ॥ १॥

एष पुरतो दृश्यमानः स्य स भानुर्दीप्तिमानादित्य उदियर्ति। ऊर्ध्वं गच्छति। पुरस्ताद्रथश्च युवयोः संबंधी परिज्मा परितो गंतास्य दिवो द्योतमानस्यादित्यस्य सानवि सानौ समुच्छ्रितप्रदेश उदियर्तीति वा रप्शत इति वा संबंधनीयं। अस्मिन्रथेऽधि उपरिभागे मिथुना मिथुनीभूतास्त्रयस्त्रिविधाः पृक्षासोऽन्नानि। त्रेधा विहितं चान्नं। इदमन्नमशनं पानं खादश्चेति हि श्रुतं। त्रिष्वपि पदार्थेषु मिथुनशब्दस्त्रैविध्येषु दृश्यते। माता पिता पुत्रस्तदेव तन्मिथुनमिति। हृतिस्तुरीयः। रसद्रव्याधारः पदार्थश्चर्ममयो हृतिरित्युच्यते। मधुनः सोमरसस्य संबंधी मधुपूर्णश्चतुर्थो विरप्शते। विविधं राजते ॥

॥ अथ द्वितीया ॥

उद्वां पृक्षासो मधुमंत ईरते रथा अश्वास उषसो व्युष्टिषु।
अपोर्णुवंतस्तम आ परीवृतं स्वर्ण शुक्रं तन्वंत आ रजः ॥ २॥
उत्। वां। पृक्षासः। मधुऽमंतः। ईरते। रथाः। अश्वासः। उषसः। विऽउष्टिषु।
अपऽऊर्णुवंतः। तमः। आ। परिऽवृतं। स्वः। न। शुक्रं। तन्वंतः। आ। रजः ॥ २॥

पृक्षासः पृक्षास्त्रिविधान्नवंतो मधुमंतः सोमरसोपेता अश्वासोऽश्वयुक्ता वां युवयो रथाः। यद्वा मधुमंतः पृक्षा रथा अश्वासोऽश्वा उषसो व्युष्टिषु व्युच्छनेषु सत्सूदीरते। उन्मुखं गच्छंति। किं कुर्वंतः। परीवृतं परितो व्याप्तं तम आ सर्वतोऽपोर्णुवंतोऽपाकुर्वंतः स्वर्न आदित्य इव शुक्रं दीप्तं रजस्तेजश्च तन्वंतः। आकारश्चार्थे। यद्वा रजोऽतरिक्षं शुक्रं दीप्तं तन्वंतः ॥

॥ अथ तृतीया ॥

मध्वः पिबतं मधुपेभिरासभिरुत प्रियं मधुने युंजाथां रथं।
आ वर्तनिं मधुना जिन्वथस्पथो दृतिं वहेथे मधुमंतमश्विना ॥३॥
मध्वः। पिबतं। मधुऽपेभिः। आसऽभिः। उत। प्रियं। मधुने। युंजाथां। रथं।
आ। वर्तनिं। मधुना। जिन्वथः। पथः। दृतिं। वहेथे इति। मधुऽमंतं। अश्विना ॥३॥

मध्वो मधुरं सोमरसं मधुपेभिः सोमपानार्हैरासभिरास्यैः पिबतं। उतापि च प्रियं रथं मधुने मधुलाभाय युंजाथां। अश्वैर्युक्तं कुरुतं। वर्तनिं यजमानगृहमा गच्छतमिति शेषः। पथो गमनमार्गान्मधुना जिन्वथः। प्रीणयतं। यद्वैकं वाक्यं। पथो वर्तनिमाकाशं जिन्वथः। दृतिं मधुमंतं हे अश्विना वहेथे। धारयथः ॥

॥ अथ चतुर्थी ॥

हंसासो ये वां मधुमंतो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः।
उदप्रुतो मंदिनो मंदिनिस्पृशो मध्वो न मक्षः सवनानि गच्छथः ॥४॥
हंसासः। ये। वां। मधुऽमंतः। अस्रिधः। हिरण्यऽपर्णाः। उहुवः। उषःऽबुधः।
उदऽप्रुतः। मंदिनः। मंदिऽनिस्पृशः। मध्वः। न। मक्षः। सवनानि। गच्छथः ॥४॥

हंसासोऽध्वनि शीघ्रं गंतारो मधुमंतो माधुर्योपेता अस्रिधोऽद्रोग्धारो हिरण्यपर्णा हितरमणीयपर्णा उहुवो वोढार उषर्बुध उषसि बुध्यमाना उदप्रुत उदकस्य प्लावयितारो मंदिनो हर्षयितारो मंदिनिस्पृशो मंदिनं सोमं स्पृशंतः। इत्थंलक्षणा अश्वा ये संति तैरश्वैर्मध्वो न मधुमिव मक्षो मक्षिकाः सवनान्यस्मदीयानि गच्छथः ॥

॥ अथ पंचमी ॥

स्वध्वरासो मधुमंतो अग्नय उस्रा जरंते प्रति वस्तोरश्विना ।
यन्निक्तहस्तस्तरणिर्विचक्षणः सोमं सुषाव मधुमंतमद्रिभिः ॥५॥

सुऽअध्वरासः । मधुऽमंतः । अग्नयः । उस्रा । जरंते । प्रति । वस्तोः । अश्विना ।
यत् । निक्तऽहस्तः । तरणिः । विऽचक्षणः । सोमं । सुसाव । मधुऽमंतं । अद्रिऽभिः ॥५॥

स्वध्वरासः शोभनयागसाधना मधुमंतो होतव्यसोमवंतोऽग्नयो गार्हपत्यादय उस्रा सह निवसंतावश्विनौ प्रति वस्तोरन्वहमुषःकाले जरंते । स्तुवंति । यद्यदा निक्तहस्तः समंत्रेणोदकेन शोधितहस्तस्तरणिः कर्मणस्तारयिता विचक्षणो विविधं द्रष्टाध्वर्युः सोमं मधुमंतमद्रिभिर्ग्रावभिः सुषाव अभिषुतवान् तदा तेऽग्नयः स्तुवंति । तस्मादागच्छतमित्यर्थः ॥

॥ अथ षष्ठी ॥

आकेनिपासो अहभिर्दविध्वतः स्वर्१ण शुक्रं तन्वंत आ रजः ।
सूरश्चिदश्वान्युयुजान ईयते विश्वाँ अनु स्वधया चेतथस्पथः ॥६॥

आकेऽनिपासः । अहऽभिः । दविध्वतः । स्वः । न । शुक्रं । तन्वंतः । आ । रजः ।
सूरः । चित् । अश्वान् । युयुजानः । ईयते । विश्वान् । अनु । स्वधया । चेतथः । पथः ॥६॥

आकेनिपासः । आकेऽंतिके निपतंतीत्याकेनिपा रश्मयः । ते चाहभिरहोभिर्दविध्वतः कंपयंतो ध्वंसयंतो वा तमांसि । स्वर्न आदित्य इव शुक्रं दीप्तं रज आतन्वंतो भवंत्यश्विनोरश्वाः । सूरश्चित्सूर्यश्चाश्वान्युयुजानो योजयन्नीयते । गच्छति । हे अश्विनौ युवां विश्वान्पथ आगमनमार्गाननुक्रमेण स्वधयान्नेन सोमलक्षणेन चेतथः । चेतयथः । प्रज्ञापयथः ॥

॥ अथ सप्तमी ॥

प्र वामवोचमश्विना धियंधा रथः स्वश्वो अजरो यो अस्ति ।
येन सद्यः परि रजांसि याथो हविष्मंतं तरणिं भोजमच्छ ॥७॥

प्र । वां । अवोचं । अश्विना । धियंऽधाः । रथः । सुऽअश्वः । अजरः । यः । अस्ति ।
येन । सद्यः । परि । रजांसि । याथः । हविष्मंतं । तरणिं । भोजं । अच्छ ॥७॥

धियंधाः कर्मणां धारकोऽहं हे अश्विना वां प्रवोचं। प्रब्रवीमि। स्तौमि। स्वश्वोऽजरोऽजीर्णो नित्यनूतनोऽजरयिता वा रथो योऽस्ति। येन रथेन सद्यस्त-दानीमेव रजांसि लोकान्परियाथः तेन रथेन हविष्मंतं सोमादिहविर्युक्तं तरुषिं तारकं शीघ्रगामिनं भोजं भोजयितारमस्मद्यागमच्छ प्राप्तुमागच्छतमिति शेषः ॥

॥ इति तृतीयस्य सप्तम एकोनविंशो वर्गः ॥

॥ इति चतुर्थे मंडले चतुर्थोऽनुवाकः ॥

पंचमेऽनुवाके त्रयोदश सूक्तानि। तत्रायं पिबेति सप्तर्चं प्रथमं सूक्तं वामदे-वस्यार्षं गायत्रं। कृत्स्नमिंद्रवायुदेवताकमाद्या केवलवायव्या। तथा चानुक्रांतं। अयं वायव्याद्यैंद्रवायवं तु गायत्रमिति ॥ सूक्तविनियोगो लैंगिकः। आद्ये द्वे ऐंद्रवायवग्रहस्य याज्ये। तथा च सूचितं। अयं पिबा मधूनामिति याज्ये अनवानं। आ॰ ५.५.। इति ॥

॥ तत्र प्रथमा ॥

अयं पिबा मधूनां सुतं वायो दिविष्टिषु। त्वं हि पूर्वपा असि ॥१॥

अयं। पिब। मधूनां। सुतं। वायो इति। दिविष्टिषु। त्वं। हि। पूर्वऽपाः। असि ॥१॥

हे वायो त्वमग्रमिंद्रादिभ्यः पूर्वं मधूनां मधुररसानां सोमानां संबंधिनं सुत-मभिषुतं रसं पिब। कुत्रेति तदुच्यते। दिविष्टिषु दिवः स्वर्गस्य प्रापकेषु यज्ञेषु यद्वास्माकं दिवः स्वर्गस्यैषणेषु निमित्तेषु। त्वं हि त्वं खलु पूर्वपा असि। हिशब्दो देव दधिषे पूर्वपेयं। ऋग्वे॰ ७.९२.१.। इत्यादिमंत्रांतरप्रसिद्धिद्योतनार्थः। वायो-रग्रपानं देवा वै सोमस्य राज्ञोऽग्रपेयेन समपादयन्नहं प्रथमः पिबेयमित्यादि-ब्राह्मणे। ऐ॰ ब्रा॰ २.२५.। स्पष्टमाम्नातं। तत्र हि वायुराजिं प्रथमं धावित्वाग्र-पानं लब्धवान् ॥

॥ अथ द्वितीया ॥

शतेना नो अभिष्टिभिर्नियुत्वाँ इंद्रसारथिः। वायो सुतस्य तृंपतं ॥२॥

शतेन। नः। अभिष्टिऽभिः। नियुत्वान्। इंद्रऽसारथिः। वायो इति। सुतस्य। तृंपतं ॥२॥

हे वायो नियुत्वान्नियुद्भिस्तद्वान् इंद्रसारथिरिंद्रसहायः सन् त्वं शतेनापरिमि-तैरभिष्टिभिरभित एषणीयैः कामैर्निमित्तभूतैरागच्छेति शेषः। आगत्य च सुतस्य सुतमभिषुतं सोमं तृंपतं। पिबतं त्वमिंद्रश्च। इंद्रस्य साहित्यं ब्राह्मण एवोक्तं।

तत्तुरीयभागिंद्रोऽभवत्त्रिभाग्वायुरिति तुरीये हैव संग्रहीतारो वदंतेऽमुनैवानूकाशेन यदद इंद्रः सारथिरिव भूत्वोदजयत्। ऐ० ब्रा० २.२५.। इति वा ॥

॥ अथ तृतीया ॥

आ वां सहस्रं हरय इंद्रवायू अभि प्रयः। वहंतु सोमपीतये ॥३॥

आ। वां। सहस्रं। हरयः। इंद्रवायू इति। अभि। प्रयः। वहंतु। सोमऽपीतये ॥३॥

हे इंद्रवायू वां युवां सहस्रं हरयः सहस्रसंख्याका अश्वाः प्रयोऽन्नं प्रति त्वरयंतः संति। अत्र हरिशब्दोऽश्वसामान्यवचनः। ते सोमपीतय आवहंतु ॥

॥ अथ चतुर्थी ॥

रथं हिरण्यवंधुरमिंद्रवायू स्वध्वरं। आ हि स्थाथो दिविस्पृशं ॥४॥

रथं। हिरण्यऽवंधुरं। इंद्रवायू इति। सुऽअध्वरं। आ। हि। स्थाथः। दिविऽस्पृशं ॥४॥

हे इंद्रवायू हिरण्यवंधुरं हिरण्मयनिवासाधारकाष्ठोपेतं दिविस्पृशं द्युलोकस्पर्शिनं स्वध्वरं शोभनाध्वरवंतं रथमास्थाथो हि। आस्थितौ खलु। यस्मादेवं तस्मादागच्छतमित्यर्थः। स्वध्वरं प्रत्यास्थाथ इति वा व्याख्येयं ॥

रथेन पृथ्वित्यादिकस्तृचो दशरात्रे पंचमेऽहनि प्रउगशस्त्र ऐंद्रवायवो द्वितीयः। सूचितं च। रथेन पृथुपाजसा बहवः सूरचक्षसः। आ० ७.१२.। इति ॥

॥ सैषा तृचे प्रथमा सूक्ते पंचमी ॥

रथेन पृथुपाजसा दाश्वांसमुप गच्छतं। इंद्रवायू इहा गतं ॥५॥

रथेन। पृथुऽपाजसा। दाश्वांसं। उप। गच्छतं। इंद्रवायू इति। इह। आ। गतं ॥५॥

हे इंद्रवायू पृथुपाजसा प्रभूतबलेन रथेन दाश्वांसं दातारं यजमानमुपगच्छतं। तदर्थमिहास्मिन्यज्ञ आगतं। आगच्छतं ॥

॥ अथ षष्ठी ॥

इंद्रवायू अयं सुतस्तं देवेभिः सजोषसा। पिबतं दाशुषो गृहे ॥६॥

इंद्रवायू इति। अयं। सुतः। तं। देवेभिः। सऽजोषसा। पिबतं। दाशुषः। गृहे ॥६॥

हे इंद्रवायू अयं सोमः सुतोऽभिषुतः। तं सोमं देवेभिर्देवैः सजोषसा समानप्रीतौ दाशुषो हविर्दातुर्गृहे यागशालायां पिबतं ॥

॥ अथ सप्तमी ॥

इह प्रयाणमस्तु वामिंद्रवायू विमोचनं । इह वां सोमपीतये ॥७॥

इह । प्रऽयानं । अस्तु । वां । इंद्रवायू इति । विऽमोचनं । इह । वां । सोमऽपीतये ॥७॥

हे इंद्रवायू वां युवयोरिहास्मिन्यज्ञे प्रयाणं गमनमस्तु । इहास्मिन्नेव यज्ञे वां सोमपीतये विमोचनमश्वानामस्तु । पर्यवसानत एकार्थत्वेऽप्यादरार्थत्वादविरोधः ॥

॥ इति तृतीयस्य सप्तमे द्वाविंशो वर्गः ॥

वायो शुक्र इति चतुर्ऋचं द्वितीयं सूक्तमानुष्टुभं वामदेवस्यार्षमैंद्रवायवं । आद्या केवलवायव्या । अथानुक्रमणिका । वायो चतुष्कमाद्या वायव्यानुष्टुभं त्विति ॥ सूक्तविनियोगो लैंगिकः ॥ आद्या दशराचे चतुर्थेऽहनि प्रउगशस्त्रे वायव्यतृचे प्रथमा । वायो शुक्रो अयामि ते विहि होत्रा अवीताः । आ० ७.११. । इति सूचितं ॥

॥ तत्र प्रथमा ॥

वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥१॥

वायो इति । शुक्रः । अयामि । ते । मध्वः । अग्रं । दिविष्टिषु ।
आ । याहि । सोमऽपीतये । स्पार्हः । देव । नियुत्वता ॥१॥

हे वायो ते तुभ्यं शुक्रो व्रतचर्यादिना दीप्तोऽहं मध्वो मधुरं सोमरसं ॥ कर्मणि षष्ठी ॥ अग्रमितरेभ्यः पूर्वमयामि । आययामि ॥ अयतिरंतर्भावितण्यर्थः ॥ किमर्थं । दिविष्टिषु दिवो द्युलोकस्यैषणेषु सत्सु हे देव वायो स्पार्हः स्पृहणीयस्त्वं नियुत्वता । नियुद्वायोः प्रतिनियुतोऽश्वः । तेन साधनेनायाहि सोमपीतये सोमपानाय ॥

इंद्रश्चेत्यादिस्तृचो दशराचे चतुर्थेऽहन्यैंद्रवायवो द्वितीयः । सूचितं च । इंद्रश्च वायवेषां सोमानामा चिकितान सुक्रतू । आ० ७.११. । इति ॥

॥ तत्र प्रथमा सूक्ते द्वितीया ॥

इंद्रश्च वायवेषां सोमानां पीतिमर्हथः ।
युवां हि यंतीदवो निम्नमापो न सध्र्यक् ॥२॥

इंद्रः । च । वायो इति । एषां । सोमानां । पीतिं । अर्हथः ।
युवां । हि । यंति । इंदवः । निम्नं । आपः । न । सध्र्यक् ॥२॥

हे वायो त्वमिंद्रश्चैषां गृहीतानां सोमानां पीतिं पानमर्हथः । युवां हि खल्विंदवः सोमा यंति । प्राप्नुवंति । निम्नं खातप्रदेशमापो न सध्र्यक् उदकानि यथा सहैव गच्छंति तद्वत्सर्वे सोमा युवां हि यंति ॥

॥ अथ तृतीया ॥

वायविंद्रश्च शुष्मिणा सरथं शवसस्पती ।
नियुत्वंता न ऊतय आ यातं सोमपीतये ॥३॥
वायो इति । इंद्रः । च । शुष्मिणा । सऽरथं । शवसः । पती इति ।
नियुत्वंता । नः । ऊतये । आ । यातं । सोमऽपीतये ॥३॥

हे वायो त्वमिंद्रश्च हे शवसस्पती बलस्य पती शुष्मिणा बलवंतौ नियुत्वंता नियुत्संज्ञाश्ववंतौ युवां सरथं समानमेव रथमारुह्येति शेषः । न ऊतये रक्षणाय सोमपीतये सोमपानायाचायातं । आगच्छतं । यद्वा सरथमधितिष्ठतमारुह्य चायातमिति च वाक्यद्वयं ॥

॥ अथ चतुर्थी ॥

या वां संति पुरुस्पृहो नियुतो दाशुषे नरा ।
अस्मे ता यज्ञवाहसेंद्रवायू नि यच्छतं ॥४॥
याः । वां । संति । पुरुऽस्पृहः । निऽयुतः । दाशुषे । नरा ।
अस्मे इति । ताः । यज्ञऽवाहसा । इंद्रवायू इति । नि । यच्छतं ॥४॥

हे नरा नेतारौ हे यज्ञवाहसा यज्ञवाहकाविंद्रवायू याः पुरुस्पृहो बहुभिः स्पृहणीया नियुतो संति अस्मे अस्मभ्यं दाशुषे हविर्दत्तवते यजमानाय मदर्थं ता नियुतो नियच्छतं ॥

॥ इति तृतीयस्य सप्तमे त्रयोविंशो वर्गः ॥

विहि होत्रा इति पंचर्चं तृतीयं सूक्तं वामदेव्यं वायव्यं । अत्रानुक्रमणिका । विहि पंच वायव्यमिति ॥ सूक्तविनियोगो लैंगिकः ॥ आद्या दशरात्रे चतुर्थेऽहनि

प्रउगशस्त्रे वायव्यतृचस्य द्वितीया। तथा च सूचितं। विहि होत्रा अवीता वायो यातं हरीणां। आ० ७.११.। इति ॥

॥ सैषा प्रथमा ॥

विहि होत्रा अवीता विपो न रायो अर्यः।
वायवा चंद्रेण रथेन याहि सुतस्य पीतये ॥१॥
विहि। होत्राः। अवीताः। विपः। न। रायः। अर्यः।
वायो इति। आ। चंद्रेण। रथेन। याहि। सुतस्य। पीतये ॥१॥

हे वायो विहि वीहि भक्षय होत्रा होमसाधिकाः सोमाहुतीरवीता अन्यैः पूर्वमभक्षिता विपो न शत्रूणां वेपयिता राजेव। किंचार्यः स्तोतुर्मम रायो धनानि संपादयेति शेषः। हे वायो चंद्रेणाह्लादकेन रथेनायाहि सुतस्य सोमस्य पीतये पानाय ॥

॥ अथ द्वितीया ॥

निर्युवाणो अशस्तीर्नियुत्वाँ इंद्रसारथिः।
वायवा चंद्रेण रथेन याहि सुतस्य पीतये ॥२॥
निःऽयुवानः। अशस्तीः। नियुत्वान्। इंद्रऽसारथिः।
वायो इति। आ। चंद्रेण। रथेन। याहि। सुतस्य। पीतये ॥२॥

हे वायो त्वमशस्तीरभिशस्तीर्निर्युवाणो निःशेषेण नियोजयन्नियुत्वान्नियुत्संज्ञकाश्ववानिंद्रसारथिरिंद्रसहायः सन् आयाहि ॥

॥ अथ तृतीया ॥

अनु कृष्णे वसुधिती येमाते विश्वपेशसा।
वायवा चंद्रेण रथेन याहि सुतस्य पीतये ॥३॥
अनु। कृष्णे इति। वसुधिती इति वसुऽधिती। येमाते इति। विश्वऽपेशसा।
वायो इति। आ। चंद्रेण। रथेन। याहि। सुतस्य। पीतये ॥३॥

कृष्णे कृष्णवर्णे वसुधिती वसूनां धात्र्यौ विश्वपेशसा विश्वरूपे द्यावापृथिव्यौ त्वामनुयेमाते। अनुगच्छतः ॥

॥ अथ चतुर्थी ॥

वहंतु त्वा मनोयुजो युक्तासो नवतिर्नव ।

वायवा चंद्रेण रथेन याहि सुतस्य पीतये ॥४॥

वहंतु । त्वा । मनःऽयुजः । युक्तासः । नवतिः । नव ।

वायो इति । आ । चंद्रेण । रथेन । याहि । सुतस्य । पीतये ॥४॥

हे वायो त्वा त्वां मनोयुजो मनःसमानगतयो युक्तासः परस्परसंयुक्ता नवतिर्नव नवोत्तरनवतिसंख्याका अश्वा वहंतु । धारयंतु ॥

वायो शतमिति पंचमी पूर्वोक्त एव तृचे तृतीया । सूत्रं पूर्वमेवोक्तं ॥ तत्पाठस्तु ॥

वायो शतं हरीणां युवस्व पोष्याणां ।

उत वा ते सहस्रिणो रथ आ यातु पाजसा ॥५॥

वायो इति । शतं । हरीणां । युवस्व । पोष्याणां ।

उत । वा । ते । सहस्रिणः । रथः । आ । यातु । पाजसा ॥५॥

हे वायो त्वं पोष्याणां पोषणीयानां हरीणां शतं युवस्व । योजय रथे । उत वा अथवा ते सहस्रिणः सहस्रसंख्यापूरका अश्वाः । तैर्युक्तो रथः पाजसा बलेनायातु । आगच्छतु ॥

॥ इति तृतीयस्य सप्तमे चतुर्विंशो वर्गः ॥

इदं वामास्य इति षड्टचं चतुर्थं सूक्तं वामदेवस्यार्षं गायत्रमैंद्रावार्हस्पत्यं। अत्रानुक्रमणिका। इदं वां षळैंद्रावार्हस्पत्यं गायत्रमिति। सूक्तविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

इदं वामास्ये हविः प्रियमिंद्राबृहस्पती । उक्थं मदश्च शस्यते ॥१॥

इदं। वां। आस्ये। हविः। प्रियं। इंद्राबृहस्पती इति। उक्थं। मदः। च। शस्यते॥१॥

हे इंद्राबृहस्पती वामास्य इदं प्रियं हविः सोमरूपं प्रक्षिपामीति शेषः । उक्थं शस्त्रं च मदो मदजनकं शस्यते ॥

॥ अथ द्वितीया ॥

अयं वां परि षिच्यते सोम इंद्राबृहस्पती । चारुर्मदाय पीतये ॥२॥

अयं । वां । परि । सिच्यते । सोमः । इंद्राबृहस्पती इति । चारुः । मदाय । पीतये ॥२॥

हे इंद्राबृहस्पती वामास्ये चारुः शोभनोऽयं सोमः परिषिच्यते । परितो दीयते । मदाय हर्षाय पीतये पानाय च ॥

ऐंद्राबार्हस्पत्यायामिष्टौ प्रधानस्या न इंद्रेति तृतीयानुवाक्योत्तरा याज्या । सूत्रितं च । आ न इंद्राबृहस्पती अस्मे इंद्राबृहस्पती । आ० २. ११. । इति ॥

॥ सैषा सूक्ते तृतीया ॥

आ न इंद्राबृहस्पती गृहमिंद्रश्च गच्छतं । सोमपा सोमपीतये ॥३॥

आ । नः । इंद्राबृहस्पती इति । गृहं । इंद्रः । च । गच्छतं । सोमऽपा । सोमऽपीतये ॥३॥

हे इंद्राबृहस्पती । अथ विविच्योच्यते । हे बृहस्पते त्वं चेंद्रश्च सोमपा सोमपौ युवां सोमपीतये सोमपानाय नो गृहमस्मद्यागसंबंध्यागच्छतं ॥

॥ अथ चतुर्थी ॥

अस्मे इंद्राबृहस्पती रयिं धत्तं शतग्विनं । अश्वावंतं सहस्रिणं ॥४॥

अस्मे इति । इंद्राबृहस्पती इति । रयिं । धत्तं । शतऽग्विनं । अश्वऽवंतं । सहस्रिणं ॥४॥

अस्या विनियोगः पूर्वमंत्रेण सहोक्तः । हे इंद्राबृहस्पती अस्मे अस्मभ्यं रयिं धनं धत्तं । कीदृशं रयिं । शतग्विनं शतसंख्याकाभिर्गोभिर्युक्तमश्वावंतमश्ववंतं सहस्रिणं सहस्रसंख्यायुक्तं ॥

॥ अथ पंचमी ॥

इंद्राबृहस्पती वयं सुते गीर्भिर्हवामहे । अस्य सोमस्य पीतये ॥५॥

इंद्राबृहस्पती इति । वयं । सुते । गीःऽभिः । हवामहे । अस्य । सोमस्य । पीतये ॥५॥

सुते सोमेऽभिषुते गीर्भिः स्तुतिभिः । शिष्टं गतं ॥

॥ अथ षष्ठी ॥

सोममिंद्राबृहस्पती पिबतं दाशुषो गृहे । मादयेथां तदोकसा ॥६॥

सोमं । इंद्राबृहस्पती इति । पिबतं । दाशुषः । गृहे । मादयेथां । तत्ऽओकसा ॥६॥

हे इंद्राबृहस्पती युवां दाशुषो हविर्दातुर्यजमानस्य गृहे तदोकसा। तदेव यजमानगृहमोको निवासस्थानं ययोस्तौ। तादृशौ संतौ सोमं पिबतं। पीत्वा च मादयेथामिति ॥

॥ इति तृतीयस्य सप्तमे पंचविंशो वर्गः ॥

यस्तस्तंभेत्येकादशर्चं पंचमं सूक्तं वामदेवस्यार्षं त्रैष्टुभं। दशमी जगती। दशम्येकादश्याविंद्राबृहस्पतिदेवताके शिष्टा नव बार्हस्पत्यः। अत्रानुक्रमणिका। यस्तस्तंभैकादश बार्हस्पत्यमंत्ये ऐंद्र्यौ चोपांत्या जगती ॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिनः स्तोमवृद्धाविदं सूक्तमावापार्थं। तथा च सूत्रं। यस्तस्तंभ यो अद्रिभित्। आ॰ ७.९.। इति ॥ आद्ये बृहस्पतिसवने मरुत्वतीयनिष्केवल्ययोः सूक्तमुखीये। सूचितं च। यस्तस्तंभ धुनेतय इति सूक्तमुखीये। आ॰ ७.९.। इति ॥

॥ तत्र प्रथमा ॥

यस्तस्तंभ सहसा वि ज्मो अंतान्बृहस्पतिस्त्रिषधस्थो रवेण।
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मंद्रजिह्वं ॥१॥

यः। तस्तंभ। सहसा। वि। ज्मः। अंतान्। बृहस्पतिः। त्रिऽसधस्थः। रवेण।
तं। प्रत्नासः। ऋषयः। दीध्यानाः। पुरः। विप्राः। दधिरे। मंद्रऽजिह्वं ॥१॥

यो बृहस्पतिर्बृहतो देवस्य यज्ञस्य वा पालयिता देवः सहसा बलेन ज्मः पृथिव्या अंतान्। दश दिश इत्यर्थः। तान्वितस्तंभ विविधं स्तंभितवान् नियमितवान् त्रिषधस्थस्त्रिषु स्थानेषु वर्तमानो रवेणैवं तिष्ठतेत्यनेन शब्देन तं देवं प्रत्नासः पुराणा ऋषयोऽतींद्रियद्रष्टारो दीध्याना दीप्यमाना विप्रा मेधाविनो यजमानादयः पुरो दधिरे। पुरस्तात्स्थापितवंतः स्तुत्यादिना। मंद्रजिह्वं मादनजिह्वं मोदनजिह्वं ॥

॥ अथ द्वितीया ॥

धुनेतयः सुप्रकेतं मदंतो बृहस्पते अभि ये नस्ततस्रे।
पृषंतं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिं ॥२॥

धुनऽइतयः। सुऽप्रकेतं। मदंतः। बृहस्पते। अभि। ये। नः। ततस्रे।
पृषंतं। सृप्रं। अदब्धं। ऊर्वं। बृहस्पते। रक्षतात्। अस्य। योनिं ॥२॥

हे बृहस्पते धुनेतयः। धुना शत्रूणां कंपयित्री ईतिर्गतिर्येषां ते। तादृशाः सुप्रकेतं शोभनप्रज्ञं त्वां मदंतो मादयंतो नोऽस्मत्संबंधिनो य ऋत्विजोऽभितस्ते आम्नानमुपक्षिपंति स्तुवंति वा अस्यैषां योनिं कारणं यज्ञं यजमानं वा मां रक्षतात्। रक्ष। योनिर्विशेष्यते। पृषंतं फलानि सिंचंतं सृप्रं सर्पणस्वभावमदब्धमहिंसितमूर्वमुरुं॥

बृहस्पते येत्यादिके द्वे बार्हस्पते पशौ वपापुरोडाशयोरनुवाक्ये। बृहस्पते या परमा परावदिति द्वे। आ० ३. ७.। इति हि सूत्रितं॥

॥ सैषा तृतीया ॥

बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदुः।

तुभ्यं खाता अवता अद्रिदुग्धा मध्वः श्चोतंत्यभितो विरप्शं॥३॥

बृहस्पते। या। परमा। पराऽवत्। अतः। आ। ते। ऋतऽस्पृशः। नि। सेदुः।

तुभ्यं। खाताः। अवताः। अद्रिऽदुग्धाः। मध्वः। श्चोतंति। अभितः। विऽरप्शं॥३॥

हे बृहस्पते या प्रसिद्धा परमोत्कृष्टा परावदत्यंतं दूरभूता वसतिः स्वर्गाख्यास्ति। यद्वा लिंगव्यत्ययः। परमं स्थानमस्ति। अतोऽस्माद्देशादा। आ इत्यर्वागर्थे। अधस्तात्ते तव संबंधिन ऋतस्पृशो यज्ञं स्पृशंतोऽश्वा निषेदुः। निषण्णा भवंति। तुभ्यं खाता अवताः। लुप्तोपमैषा। यथा खाताः कूपा अभितः श्चोतंति तद्वदद्रिदुग्धा ग्रावभिरभिषुताः सोमा विरप्शं विशेषेण शब्देन स्तोत्रं यथा भवति तथा मध्वो मधुररसं श्चोतंति। स्रवंति॥

॥ अथ चतुर्थी ॥

बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन्।

सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि॥४॥

बृहस्पतिः। प्रथमं। जायमानः। महः। ज्योतिषः। परमे। विऽओमन्।

सप्तऽआस्यः। तुविऽजातः। रवेण। वि। सप्तऽरश्मिः। अधमत्। तमांसि॥४॥

अयं बृहस्पतिर्मंत्राभिमानी देवो महो महतो ज्योतिषो दीप्तस्यादित्यस्य परमे निरतिशये व्योमन् व्योमनि प्रथमं जायमानः प्रादुर्भवन् सप्तास्यः सप्तच्छंदोमयमुखस्तुविजातो बहुप्रकारं संभूतो रवेण शब्देन सप्तरश्मिः सर्पणस्वभाव-

तेजोयुक्तस्तमांस्यधमत् । धमतिर्गतिकर्मेति निरुक्तं । विविधं गच्छति । नाशयतीत्यर्थः ॥

॥ अथ पंचमी ॥

स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।
बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥५॥

सः । सुऽस्तुभा । सः । ऋक्वता । गणेन । वलं । रुरोज । फलिऽगं । रवेण ।
बृहस्पतिः । उस्रियाः । हव्यऽसूदः । कनिक्रदत् । वावशतीः । उत् । आजत् ॥५॥

स बृहस्पतिः सुष्टुभा शोभनस्तुतिमतर्क्वता दीप्तिमता गणेनांगिरसां रवेण शब्देन च सह फलिगं ॥ ञिफला विशरणे । फलिर्भेदः ॥ तेन गच्छतीति फलिगं । वलं वलनामानमसुरं रुरोज । बभंज । द्वितीयः सशब्दः पूरणः । स एव देव उस्रिया भोगानामुत्स्राविणीर्हव्यसूदः क्षीरादिहविःप्रेरिका वावशतीर्वावश्यमाना गा कनिक्रदत् शब्दं कुर्वन्नुदाजत् । उद्गाटयति स्म ॥

॥ इति तृतीयस्य सप्तमे षड्विंशो वर्गः ॥

एवा पिच इति बार्हस्पते पशौ हविषो याज्या । एवा पित्रे विश्वदेवाय वृष्णे विश्वे अद्य मरुतो विश्व ऊती । आ० ३.७. । इति सूत्रितत्वात् ॥ अग्निष्टोमे वैश्वदेवशस्त्र एषैव धाय्या । तथा च सूत्रं । एवा पित्रे विश्वदेवाय वृष्ण आ नो भद्राः क्रतवो यंतु विश्वतः । आ० ५.१८. । इति ॥

॥ सैषा षष्ठी ॥

एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवंतो वयं स्याम पतयो रयीणां ॥६॥

एव । पित्रे । विश्वऽदेवाय । वृष्णे । यज्ञैः । विधेम । नमसा । हविःऽभिः ।
बृहस्पते । सुऽप्रजाः । वीरऽवंतः । वयं । स्याम । पतयः । रयीणां ॥६॥

पित्रे पालकाय विश्वदेवाय सर्वदेवतारूपाय । देवानां मंत्रप्रतिपाद्यत्वादस्य च मंत्राभिमानित्वाद्वैश्वदेवत्वं । यद्वात्र देवशब्दः स्तुत्यर्थः । सर्वैः स्तुत्याय वृष्णे वर्षकाय बृहस्पतये देवायैवमुक्तप्रकारेण यज्ञैस्तत्साधनैर्हविर्भिराज्यचर्वादिलक्षणैर्नमसा स्तुत्या च विधेम । परिचरेम । हे बृहस्पते सुप्रजाः शोभनपुत्रा वीरवंतो वीर्योपेता वयं रयीणां धनानां पतयः स्याम ॥

॥ अथ सप्तमी ॥

स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण ।
बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वंदते पूर्वभाजं ॥७॥

सः । इत् । राजा । प्रतिऽजन्यानि । विश्वा । शुष्मेण । तस्थौ । अभि । वीर्येण ।
बृहस्पतिं । यः । सुऽभृतं । बिभर्ति । वल्गुऽयति । वंदते । पूर्वऽभाजं ॥७॥

इदमाद्यृक्त्रयं पुरोहितप्रशंसेति ब्राह्मणं । ऐ० ब्रा० ८.२६. । अथवा सूक्तस्य ऋग्द्वयवर्जितस्य बार्हस्पत्यत्वाद्बृहस्पतेरेव स्तुतिः । स इत्स एव राजा मूर्धाभिषिक्तोऽन्यो वा राजमानः प्रतिजन्यानि । जन्यं युद्धं प्रति बलानीत्यर्थः । प्रत्यर्थिजनपदानि वा तानि विश्वा सर्वाणि शुष्मेण बलेन वीर्येण शरीरसामर्थ्येन वाभि अभिगम्याक्रम्य तस्थौ । तिष्ठति । स इत्युक्तं क इत्याह । यो बृहस्पतिं बृहतां महतां पालयितारं देवमुक्तलक्षणं पुरोहितं वा सुभृतं सुष्ठु हविःस्तोत्रादिनान्नाच्छादनादिना वा बिभर्ति भरति । वल्गूयति स्तौति । वंदते नमस्करोति च पूर्वभाजमितरेभ्यः प्रथमसंभक्तारं कृत्वा । एवं यः करोति स एव तस्थाविति ॥

॥ अथाष्टमी ॥

स इत्क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीं ।
तस्मै विशः स्वयमेवा नमंते यस्मिन्ब्रह्मा राजनि पूर्व एति ॥८॥

सः । इत् । क्षेति । सुऽधितः । ओकसि । स्वे । तस्मै । इळा । पिन्वते । विश्वऽदानीं ।
तस्मै । विशः । स्वयं । एव । नमंते । यस्मिन् । ब्रह्मा । राजनि । पूर्वः । एति ॥८॥

स इत्स एव क्षेति निवसति सुधितः सुष्ठु तृप्तः सन् स्वे स्वकीय एवौकसि सदने । स एव समृद्धो निर्बाधः सन् सुखेनास्ते । तस्मा इळा भूमिर्विश्वदानीं सर्वकालं पिन्वते । वर्धते फलैः । तस्मै विशः प्रजाः स्वयमेव नमंते । प्रणता भवंति । दंडनमंतरेण स्वयमेव दत्तकरा भवंति । यस्मिन्राजनि ब्रह्मा पूर्वः प्रथमं पूज्यः सन्नेति गच्छति । वर्तत इत्यर्थः ॥

॥ अथ नवमी ॥

अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या ।
अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवंति देवाः ॥९॥

अप्रतिऽइतः । जयति । सं । धनानि । प्रतिऽजन्यानि । उत । या । सऽजन्या ।
अवस्यवे । यः । वरिवः । कृणोति । ब्रह्मणे । राजा । तं । अवंति । देवाः ॥९॥

स एवाप्रतीतोऽन्यैरप्रतिगतः सन् यानि धनानि प्रतिजन्यानि प्रतिस्पर्धिजनसंबंधीनि उतापि च सजन्या जनसंबंधीनि धनानि संजयति । यो राजावस्यवेऽवसीयसे धनरहिताय रक्षणमिच्छते ब्रह्मणे ब्राह्मणाय वा प्रीणनमिच्छते बृहस्पतये वा वरिवो धनं कृणोति करोति ददाति स उक्तप्रकारेण महान्भवति । तमेव देवा अवंति । रक्षंति ॥

इंद्रश्च सोममिति दशमी तृतीयसवने ब्राह्मणाच्छंसिनः प्रस्थितयाज्या । सूत्रितं च । इंद्रश्च सोमं पिबतं बृहस्पत आ वो वहंतु सप्तयो रघुष्यद । आ॰ ५.५.। इति ॥ तत्पाठस्तु ॥

इंद्रश्च सोमं पिबतं बृहस्पतेऽस्मिन्यज्ञे मंदसाना वृषण्वसू ।
आ वां विशंत्विंदवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतं ॥१०॥
इंद्रः। च। सोमं। पिबतं। बृहस्पते। अस्मिन्। यज्ञे। मंदसाना। वृषण्वसू इति वृषण्ऽवसू।
आ। वां। विशंतु। इंदवः। सुऽआभुवः। अस्मे इति। रयिं। सर्वऽवीरं। नि। यच्छतं ॥१०॥

हे बृहस्पते त्वमिंद्रश्च सोमं पिबतं । कीदृशौ युवां । अस्मिन्यज्ञे मंदसाना हृष्यंतौ वृषण्वसू वर्षितृधनौ । यजमानेभ्यो दीयमानधनावित्यर्थः । वां युवां स्वाभुवः सुष्ठु सर्वतो भवंतः । कृत्स्नशरीरव्यापनसमर्था इत्यर्थः । तादृशा इंदवः सोमा विशंतु । युवयोः शरीरं प्रविशंतु । अस्मे अस्मभ्यं रयिं धनं सर्ववीरं सर्वपुत्राद्युपेतं नियच्छतं । दत्तं ॥

॥ अथैकादशी ॥

बृहस्पत इंद्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे ।
अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥११॥
बृहस्पते । इंद्र । वर्धतं । नः । सचा । सा । वां । सुऽमतिः । भूतु । अस्मे इति ।
अविष्टं । धियः । जिगृतं । पुरंऽधीः । जजस्तं । अर्यः । वनुषां । अरातीः ॥११॥

हे बृहस्पते हे इंद्र युवां नोऽस्मान्वर्धतं । वर्धयतं । प्रवृद्धान्कुरुतं । सा सुमतिर्युवयोरनुग्रहबुद्धिरस्मे अस्मासु सचा सह भूतु । भवतु । धियः कर्माण्यविष्टं ।

रक्षतं । पारं नयतं । पुरंधीः पुरं शरीरं धीयते स्थाप्यते याभिर्मतिभिस्ताः स्तुतीर्जिगृतं । प्रबुध्यतं । वनुषां संभक्तृणामस्माकमर्यो गंभीरराती । शत्रूनित्यर्थः । जजस्तं । युध्यतं । क्षपयतमित्यर्थः ॥ छंदस्यरातिशब्दः स्त्रीलिंगः ॥ एवं स्तुतिं निगमय्याभीष्टं प्रार्थितवान् ॥

॥ इति तृतीयस्य सप्तमे सप्तविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
श्रीमत्सायणमंत्रीशो दाशतय्यास्तृतीयके ।
अष्टके सप्तमाध्यायं व्याकार्षीदतिपेशलं ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके सप्तमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथाष्टमं व्याख्यातुमारभते । इदमु त्यदित्येकादशर्चं षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभमुषोदेवताकं । इदमुषस्यं त्वित्यनुक्रांतं ॥ प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्र इदं सूक्तं । सूचितं च । उषो वाजेनेदमु त्यत् । आ० ४.१४. । इति ॥

॥ तत्र प्रथमा ॥

इ॒दमु॒ त्यत्पु॑रु॒तमं॑ पु॒रस्ता॒ज्ज्योति॒स्तम॑सो व॒युना॑वदस्थात् ।
नू॒नं दि॒वो दु॑हि॒तरो॑ विभा॒तीर्गा॒तुं कृ॑णवन्नु॒षसो॒ जना॑य ॥१॥

इ॒दं । ऊं॒ इति॑ । त्यत् । पु॒रु॒ऽतम॑म् । पु॒रस्ता॑त् । ज्योतिः॑ । तम॑सः । व॒युन॑ऽवत् । अ॒स्था॒त् ।
नू॒नम् । दि॒वः । दु॒हि॒तरः॑ । वि॒ऽभा॒तीः । गा॒तुम् । कृ॒ण॒व॒न् । उ॒षसः॑ । जना॑य ॥१॥

इदमु पुरतो दृश्यमानमिदं त्यत्तदस्माभिः स्तुत्यं सर्वप्रसिद्धं पुरुतममत्यंतप्रभूतं ज्योतिस्तेजो वयुनावत् ॥ वेतेः कांतिकर्मण इदं ॥ प्रकृष्टकांतिमत् । अथवा वयुनमिति प्रज्ञानाम । प्रज्ञोपेतं । सर्वस्य प्रज्ञापकमित्यर्थः । कीदृक् तेजः । पुरस्तात् पूर्वस्यां दिशि तमसोऽधकारादस्थात् । उदतिष्ठत् । एवं सति नूनं सत्यं दिव आदित्यस्य दुहितरो दुहितृस्थानीया विभातीर्विभानं कुर्वतीरुषसो जनाय यजमानानां गातुं गमनं गमनादिव्यापारसामर्थ्यं कृणवन् । अकुर्वन् ॥

॥ अथ द्वितीया ॥

अस्थुरु चित्रा उषसः पुरस्तान्मिता इव स्वरवोऽध्वरेषु ।
व्यू व्रजस्य तमसो द्वारोच्छंतीरव्रञ्छुचयः पावकाः ॥२॥

अस्थुः । ऊं इति । चित्राः । उषसः । पुरस्तात् । मिताःऽइव । स्वरवः । अध्वरेषु ।
वि । ऊं इति । व्रजस्य । तमसः । द्वारा । उच्छंतीः । अव्रन् । शुचयः । पावकाः ॥२॥

चित्राश्चायनीया उषसः पुरस्तात्पूर्वस्यां दिश्यस्थुः । तिष्ठंति । व्याप्ता इत्यर्थः । तत्र दृष्टांतः । अध्वरेषु मिताः खाताः स्वरवो यूपा इव । ते यथा वेद्याः पुरतो भासंते तद्वत् । यद्यपि स्वरुशब्दो यूपच्छेदपतितप्रथमशकलवाचीयः प्रथमः शकलः परापतेत्स स्वरुः कार्य इत्युक्तत्वात् तथाप्यत्र मितशब्दश्रवणाच्चषालवंतः स्वरव इत्यादौ तथा दर्शनाच्चात्र यूपवचनः । ता व्रजस्य वारकस्य तमसो द्वारा द्वाराणि व्युच्छंतीः शुचयो दीप्ताः पावकाः शोधिका अव्रन् । व्यवृण्वन् ॥

॥ अथ तृतीया ॥

उच्छंतीरद्य चितयंत भोजान्राधोदेयायोषसो मघोनीः ।
अचित्रे अंतः पणयः ससंत्वबुध्यमानास्तमसो विमध्ये ॥३॥

उच्छंतीः । अद्य । चितयंत । भोजान् । राधःऽदेयाय । उषसः । मघोनीः ।
अचित्रे । अंतरिति । पणयः । ससंतु । अबुध्यमानाः । तमसः । विऽमध्ये ॥३॥

अद्यास्मिन्दिन उच्छंतीस्तमो विवासयंत्यो मघोनीर्धनवत्य उषसो भोजान् भोजयितॄन्यजमानान् तेषां राधोदेयाय सोमादिधनदानाय चितयंत । प्रज्ञापयंति । अचित्रेऽचायनीये तमसो विमध्ये । अत्यंतगाढांधकार इत्यर्थः । तत्र पणयो वणिज इवादातारोऽबुध्यमानाः ससंतु । स्वपंतु ॥

॥ अथ चतुर्थी ॥

कुविस्स देवीः सनयो नवो वा यामो बभूयादुषसो वो अद्य ।
येना नवग्वे अंगिरे दशग्वे सप्तास्ये रेवती रेवदूष ॥४॥

कुवित् । सः । देवीः । सनयः । नवः । वा । यामः । बभूयात् । उषसः । वः । अद्य ।
येन । नवऽग्वे । अंगिरे । दशऽग्वे । सप्तऽआस्ये । रेवतीः । रेवत् । ऊष ॥४॥

हे देवीर्द्योतमाना उषसो वो युष्मान् सनयः पुराणो नवो वा यामो गमनसाधनः स रथोऽद्यास्मिन्यागदिने कुविद्बहुवारं बभूयात् । भवेत् । गच्छेदित्यर्थः । येन रथेन हे रेवतीर्धनवत्यो यूयं नवग्वे दशग्वे सप्तास्ये सप्तच्छंदोयुक्तमुखेऽंगिरेऽंगिरोगणे । तौ द्वौ तत्र येऽथंगिरसस्तेषां गणे । तथान्यत्र नवग्वो नु दशग्वो अंगिरस्तमः । ऋग्वे॰ १०. ६२. ६. । इति । रेवद्धनवद्यथा भवति तथोष विभातं कृतवत्यः । वसेर्व्युच्छनकर्मणो लिण्मध्यमबहुवचनस्येदं रूपं ॥

॥ अथ पंचमी ॥

यूयं हि देवीर्ऋतयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः ।
प्रबोधयंतीरुषसः ससंतं द्विपाच्चतुष्पाच्चरथाय जीवं ॥५॥

यूयं । हि । देवीः । ऋतयुक्ऽभिः । अश्वैः । परिऽप्रयाथ । भुवनानि । सद्यः ।
प्रऽबोधयंतीः । उषसः । ससंतं । द्विऽपात् । चतुःऽपात् । चरथाय । जीवं ॥५॥

हे देवीर्द्योतमाना उषसो यूयं हि खलु ऋतयुग्भिर्यज्ञगामिभिरश्वैर्भुवनानि सद्यः परिप्रयाथ । परितः प्रकृष्टं गच्छथ । किं कुर्वत्यः । ससंतं स्वपंतं द्विपाच्चतुष्पान्मनुष्यगवादिलक्षणं जीवं चरथाय चरणाय गमनादिव्यवहाराय प्रबोधयंतीः प्रबोधयंत्यः सत्यः परिप्रयाथ ॥

॥ इति तृतीयस्याष्टमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

क्व स्विदासां कतमा पुराणी यया विधाना विदधुर्ऋभूणां ।
शुभं यच्छुभ्रा उषसश्चरंति न वि ज्ञायंते सदृशीरजुर्याः ॥६॥

क्व । स्वित् । आसां । कतमा । पुराणी । यया । विऽधाना । विऽदधुः । ऋभूणां ।
शुभं । यत् । शुभ्राः । उषसः । चरंति । न । वि । ज्ञायंते । सऽदृशीः । अजुर्याः ॥६॥

आसामुषसां मध्ये क स्विदभूदद्य कतमा पुराणी पुरातनी । यया ऋभूणां संबंधीनि विधाना चमसादिनिर्माणानि विदधुः अकुर्वन्नृभवः । यद्याश्चोषसः शुभा दीप्ताः शुभं चरंति शोभां दीप्तिं कुर्वंति ता अजुर्या अशीर्णा नित्यनूतना न विज्ञायंते । यतः सदृशीः सदृश्यः सर्वेष्वपि दिवसेष्वेकरूपा अतोऽद्यतन्य एता एताः पुराण्य इति न ज्ञायंते। उषासादृश्यं सदृशीरद्य सदृशीरिदु श्वः।ऋग्वे० १.१२३.८.। इत्यत्र प्रतिपादितं ॥

॥ अथ सप्तमी ॥

ता घा ता भद्रा उषसः पुरासुरभिष्टिद्युम्ना ऋतजातसत्याः ।
यास्वीजानः शशमान उक्थैः स्तुवञ्छंसन्द्रविणं सद्य आप ॥७॥

ताः । घ । ताः । भद्राः । उषसः । पुरा । आसुः । अभिष्टिऽद्युम्नाः । ऋतजातऽसत्याः ।
यासु । ईजानः । शशमानः । उक्थैः । स्तुवन् । शंसन् । द्रविणं । सद्यः । आप ॥७॥

ता घ । घेति प्रसिद्धौ । ताः खलूपकारिण्यस्ता भद्राः कल्याण्यः स्तुत्या वा उषसः पुरा पूर्वमासुः । अभवन् । अभिष्टिद्युम्नाः अभिगमनमात्रेण द्युम्नं धनं यासां ताः । ऋतजातसत्याः । ऋतार्थं यज्ञार्थं जाताश्च ताः सत्याः सत्यफलाश्च तादृश्यः । यासूषःस्वीजानो यागं कुर्वाण उक्थैः शस्त्रैः शशमानः शंसमानः स्तुवन् सामभिः स्तोत्रं निष्पादयन् शंसन् शस्त्राणि कुर्वन् द्रविणं धनं सद्य आप प्राप्नोति ता भद्रा इति संबंधः ॥

॥ अथाष्टमी ॥

ता आ चरंति समना पुरस्तात्समानतः समना पप्रथानाः ।
ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरंते ॥८॥

ताः । आ । चरंति । समना । पुरस्तात् । समानतः । समना । पप्रथानाः ।
ऋतस्य । देवीः । सदसः । बुधानाः । गवां । न । सर्गाः । उषसः । जरंते ॥८॥

ता उषस आ सर्वतश्चरंति । समना सर्वतः समानाः पुरस्तात्पूर्वस्यां दिशि समानतः समानाद्देशादंतरिक्षात्समना सर्वतः पप्रथानाः प्रथमाना ऋतस्य यज्ञस्य सदसः सदः । तत्रत्यमृत्विग्घविरादिकमित्यर्थः । बुधाना बोधयंत्यः ॥ अंतर्भावितण्यर्थोऽयं ॥ एवं महानुभावा उषसो जरंते । स्तूयंते । गवां सर्गा न

उदकानां सृष्टय इव। गवां सर्गा न रश्मयः। ऋग्वे॰ ४.५२.५.। इति हि श्रुतं। ता यथा सर्वत्र प्रसंगादुपकारत्वाच्च स्तूयंते तद्वत् ॥

॥ अथ नवमी ॥

ता इन्न्वे३व समना समानीरमीतवर्णा उषसश्चरंति।
गूहंतीरभ्वमसितं रुशद्भिः शुक्रास्तनूभिः शुचयो रुचानाः ॥९॥
ताः। इत्। नु। एव। समना। समानीः। अमीतऽवर्णाः। उषसः। चरंति।
गूहंतीः। अभ्वं। असितं। रुशत्ऽभिः। शुक्राः। तनूभिः। शुचयः। रुचानाः ॥९॥

ता एवोषसः। इदिति पूरणः। नु अद्य समना समानाः। एकधेत्यर्थः। समानीरेकरूपा अमीतवर्णा अहिंसितवर्णा अपरिमितवर्णा वा उषसश्चरंति सर्वतः। किं कुर्वत्यः। अभ्वं। महन्नामैतत्। अतिमहदसितं कृष्णं रूपं गूहंतीर्गोपयंत्यो रुशद्भी रोचमानैस्तनूभिः स्वशरीरैः शुक्रा दीप्ताः शुचयः शुद्धा रुचाना रोचमाना रोचयंत्यो वा ॥

॥ अथ दशमी ॥

रयिं दिवो दुहितरो विभातीः प्रजावंतं यच्छतास्मासु देवीः।
स्योनादा वः प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम ॥१०॥
रयिं। दिवः। दुहितरः। विऽभातीः। प्रजाऽवंतं। यच्छत। अस्मासु। देवीः।
स्योनात्। आ। वः। प्रतिऽबुध्यमानाः। सुऽवीर्यस्य। पतयः। स्याम ॥१०॥

हे दिवो दुहितरो द्योतमानस्यादित्यस्य दुहितृस्थानीया विभातीर्विभात्यो विशेषेण भानं कुर्वत्योऽस्मासु प्रजावंतं रयिं पुत्राद्युपेतं धनं यच्छत। दत्त। हे देवीर्देव्यः स्योनात्सुखान्निमित्तभूताद्वो युष्मान् प्रतिबुध्यमानाः प्रतिबोधयंतो वयं सुवीर्यस्य पतयः स्याम। पुत्रादिसहितस्य धनस्य पालका भवेम ॥

तद्वो दिव इति व्युष्टायां जपेत् ॥

॥ एकादशी ॥

तद्वो दिवो दुहितरो विभातीरुप ब्रुव उषसो यज्ञकेतुः।
वयं स्याम यशसो जनेषु तद्द्यौश्च धत्तां पृथिवी च देवी ॥११॥

तत् । वः । दिवः । दुहितरः । विऽभातीः । उप । ब्रुवे । उषसः । यज्ञऽकेतुः ।
वयं । स्याम । यशसः । जनेषु । तत् । द्यौः । च । धत्तां । पृथिवी । च । देवी ॥११॥

हे दिवो दुहितरो हे उषसो विभातीर्वो युष्मान् तदुत्तरार्द्धप्रथमपादेन वक्ष्यमाणं फलं यज्ञकेतुः । यज्ञ एव केतुः प्रज्ञापको यस्य तादृशोऽहमुप ब्रुवे । उपेत्य ब्रवीमि । अथ बहुवदुच्यते । वयं स्तुवंतो जनेष्वस्मत्समानेषु मध्ये यशसः कीर्त्तेरन्नस्य वा स्वामिनः स्याम । तद्यशो द्यौः पृथिवी च देवी धत्तां । धारयतां ॥

॥ इति तृतीयस्याष्टमे द्वितीयो वर्गः ॥

प्रति ष्येति सप्तर्चं सप्तमं सूक्तं गायत्रमुषोदेवताकं । प्रति ष्या सप्त गायत्रमित्यनुक्रमणिका ॥ प्रातरनुवाक उषस्ये क्रतौ गायत्रच्छंदस्याश्विनशस्त्रे चेदं शस्यं अथोषस्यः प्रति ष्या सूनरी । आ० ४.१४. । इति हि सूत्रितं ॥

॥ तत्र प्रथमा ॥

प्रति ष्या सूनरी जनी व्युच्छंती परि स्वसुः । दिवो अदर्शि दुहिता ॥१॥
प्रति । स्या । सूनरी । जनी । विऽउच्छंती । परि । स्वसुः । दिवः । अदर्शि । दुहिता ॥१॥

स्या सा संस्तूयमाना सूनरी सुष्ठु प्राणिनां नेत्री जनी जनयित्री फलानां स्वसुः स्वसृस्थानीयाया रात्रेः परि उपरिभागे रात्रिपर्यवसानकाले व्युच्छंती तमो विवासयंती । स्वसा स्वस्रे ज्यायस्यै । ऋग्वे० १.१२४.८. । इत्युक्तं । दिवो द्योतमानस्यादित्यस्य दुहितोषाः प्रत्यदर्शि । प्रतिदृश्यते सर्वैः ॥

॥ अथ द्वितीया ॥

अश्वेव चित्रारुषी माता गवामृतावरी । सखाभूदश्विनोरुषाः ॥२॥
अश्वाऽइव । चित्रा । अरुषी । माता । गवां । ऋतऽवरी । सखा । अभूत् । अश्विनोः ।
उषाः ॥२॥

अश्वेव चित्रा चायनीयारुषी रोचमाना गवां रश्मीनां माता निर्मात्री ऋतावरी यज्ञवत्युषा अश्विनोः सखा समानख्याना सह स्तूयमानाभूत् । भवति । अश्विनोरुषसा सह स्तूयमानत्वात्सखित्वं परस्परं ॥

॥ अथ तृतीया ॥

उत सखास्यश्विनोरुत माता गवामसि । उतोषो वस्व ईशिषे ॥३॥

उत । सखा । असि । अश्विनोः । उत । माता । गवां । असि । उत । उषः । वस्वः । ईशिषे ॥३॥

उतापि चाश्विनोः सखासि । उतापि च गवां रश्मीनां मातासि । उतापि च हे उषो वस्वो धनस्येशिषे । ईश्वरा भवसि ॥

॥ अथ चतुर्थी ॥

यावयद्द्वेषसं त्वा चिकित्वित्सूनृतावरि । प्रति स्तोमैरभुत्स्महि ॥४॥

यवयत्ऽद्वेषसं । त्वा । चिकित्वित् । सूनृताऽवरि । प्रति । स्तोमैः । अभुत्स्महि ॥४॥

यावयद्द्वेषसं । यवयंतो वियुज्यमाना द्वेषांसि द्वेष्टारो यस्यास्तादृशी पृथक्क्रियंते द्वेषांस्यनयेति वा । रात्रौ हननायोद्युक्ता द्वेषिण उषःकाले हि पलायंते । तादृशीं चिकित्वित् ज्ञापयंती त्वा त्वां सूनृतावरि । सूनृतेति वाङ्नाम । तद्वति देवि स्तोमैः स्तुतिभिः प्रत्यभुत्स्महि । प्रतिबोधयामः । स्तुम इत्यर्थः ॥

॥ अथ पंचमी ॥

प्रति भद्रा अदृक्षत गवां सर्गा न रश्मयः । ओषा अप्रा उरु ज्रयः ॥५॥

प्रति । भद्राः । अदृक्षत । गवां । सर्गाः । न । रश्मयः । आ । उषाः । अप्राः । उरु । ज्रयः ॥५॥

भद्राः स्तुत्या रश्मयः प्रत्यदृक्षत । प्रतिदृश्यंते । गवामुदकानां सर्गा न वर्षधारा इवेयमुषा उरु ज्रयो महत्तेज आप्राः । आपूरयत् ॥

॥ अथ षष्ठी ॥

आपप्रुषी विभावरि व्यावर्ज्योतिषा तमः । उषो अनु स्वधामव ॥६॥

आऽपप्रुषी । विभाऽवरि । वि । आवः । ज्योतिषा । तमः । उषः । अनु । स्वधां । अव ॥६॥

हे विभावरि विभावत्युषस्त्वमापप्रुष्यापूरयंती तेजसा जगत् ज्योतिषा तेजसा तमोऽधकारं व्यावः । व्यावृणोः । किंच अनु पश्चात् स्वधां हविर्लक्षणमन्नमव । रक्ष ॥

आ द्यां तनोषीत्येषा देवानां हविःषूषसोऽनुवाक्या । सूत्रितं च । आ द्यां तनोषि रश्मिभिरावहंती पोष्या वार्याणि । आ० १.१६. । इति ॥

॥ सैषा सप्तमी ॥

आ द्यां तनोषि रश्मिभिरांतरिक्षमुरु प्रियं। उषः शुक्रेण शोचिषा ॥७॥

आ। द्यां। तनोषि। रश्मिऽभिः। आ। अंतरिक्षं। उरु। प्रियं। उषः। शुक्रेण। शोचिषा ॥७॥

हे उषो रश्मिभिर्द्यो दिवमातनोषि। उरु विस्तीर्णं प्रियमंतरिक्षं रश्मिभिरातनोषि। शुक्रेण दीप्तेन शोचिषा प्रकाशेन युक्ता सत्येवं करोषि ॥

॥ इति तृतीयस्याष्टमे तृतीयो वर्गः ॥

तद्देवस्येति सप्तर्चमष्टमं सूक्तं वामदेवस्यार्षं जागतं सावित्रं। तथा चानुक्रम्यते। तद्देवस्य सावित्रं तु जागतमिति ॥ आभिप्लविके तृतीयेऽहनि वैश्वदेवशस्त्रे सावित्रनिविद्धानमिदं। तथा च सूचितं। तद्देवस्य घृतेन द्यावापृथिवी इति तिस्रः। आ० ७.७.। इति ॥

॥ तत्र प्रथमा ॥

तद्देवस्य सवितुर्वार्यं महद्वृणीमहे असुरस्य प्रचेतसः।

छर्दिर्येन दाशुषे यच्छति त्मना तन्नो महाँ उदयान्देवो अक्तुभिः ॥१॥

तत्। देवस्य। सवितुः। वार्यं। महत्। वृणीमहे। असुरस्य। प्रऽचेतसः।

छर्दिः। येन। दाशुषे। यच्छति। त्मना। तत्। नः। महान्। उत्। अयान्। देवः। अक्तुऽभिः ॥१॥

सवितुः प्रेरकस्य देवस्य वार्यं वरणीयं महत्पूज्यं तद्धनं वृणीमहे। प्रार्थयामः। असुरस्य। असुर्बलं। तद्वतः प्रचेतसः प्रकृष्टमतेः। देवस्येति संबंधः। येन धनेन युक्तः सन् छर्दिः। गृहनामैतत्। गृहोपलक्षितं धनजातं दाशुषे हविर्दत्तवते यजमानाय त्मनात्मनैव यच्छति तच्छर्दिर्महान्देवः सविताक्तुभी रात्रिभिः। एतदह्नामप्युपलक्षणं। सर्वैर्दिवसैः सर्वेषु दिवसेषु नोऽस्माकमुदयान्। उद्यच्छतु। करोत्वित्यर्थः। यद्वा छर्दिरिति तेजोनाम। तत्तेज उद्यच्छत्विति ॥

॥ अथ द्वितीया ॥

दिवो धर्ता भुवनस्य प्रजापतिः पिशंगं द्रापिं प्रति मुंचते कविः।

विचक्षणः प्रथयन्नापृणन्नुर्वजीजनत्सविता सुम्नमुक्थ्यं ॥२॥

दिवः । धर्ता । भुवनस्य । प्रजाऽपतिः । पिशंगं । द्रापिं । प्रति । मुंचते । कविः ।
विऽचक्षणः । प्रथयन् । आऽपृणन् । उरु । अजीजनत् । सविता । सुम्नं । उक्थ्यं ॥२॥

दिवो द्युलोकस्य धर्ता धारकः । न केवलं दिव एव अपि तु भुवनस्य कृत्स्नस्यापि लोकस्य धर्ता प्रजापतिः प्रजानां प्रकाशवृष्ट्यादिना पालयिता कविः प्राज्ञो देवः पिशंगं द्रापिं हिरण्मयं कवचं प्रतिमुंचते । आच्छादयति प्रत्युदयं । विचक्षणो विविधं द्रष्टा स एव देवः प्रथयन् प्रख्यापयन् तेज आपृणन्नापूरयन् परित उरु प्रभूतं सुम्नं सुखमुक्थ्यं स्तुत्यमजीजनत् । उत्पादयति ॥

॥ अथ तृतीया ॥

आप्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे ।
प्र बाहू अस्राक्सविता सवीमनि निवेशयन्प्रसुवन्नक्तुभिर्जगत् ॥३॥

आ । अप्राः । रजांसि । दिव्यानि । पार्थिवा । श्लोकं । देवः । कृणुते । स्वाय । धर्मणे ।
प्र । बाहू इति । अस्राक् । सविता । सवीमनि । निऽवेशयन् । प्रऽसुवन् । अक्तुऽभिः ।
जगत् ॥३॥

अयं देवः सविता दिव्यानि द्युसंबंधीनि पार्थिवा पार्थिवानि रजांसि लोकान् । तिस्रः खलु द्यावः पृथिव्यश्च । तिस्रो भूमीर्धारयन् त्रीरुत द्यून् । ऋग्वे० २. २७.८. । इति हि श्रुतं । आप्राः । आपूरयति स्वाभिर्भाभिर्देवः । स्वाय धर्मणे स्वकीयाय धारणाय श्लोकं प्रशस्तिं कृणुते । करोति । सविता सवीमनि प्रसवेऽनुज्ञायां निमित्तायां बाहू स्वीयौ प्रास्राक् । प्रसृजति । प्रसारयतीत्यर्थः । किं कुर्वन् । अक्तुभिः कांतिभिर्जगन्निवेशयन् स्वस्वकार्ये स्थापयन् प्रसुवन् प्रेरयन् । अथवा अक्तुभिरिति रात्रिनाम । तदुपलक्षितैः सर्वैर्वासरैः सर्वेष्वपि दिनेष्वेवं करोतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

अदाभ्यो भुवनानि प्रचाकशद्व्रतानि देवः सविताभि रक्षते ।
प्रास्राग्बाहू भुवनस्य प्रजाभ्यो धृतव्रतो महो अज्मस्य राजति ॥४॥

अदाभ्यः । भुवनानि । प्रऽचाकशत् । व्रतानि । देवः । सविता । अभि । रक्षते ।
प्र । अस्राक् । बाहू इति । भुवनस्य । प्रऽजाभ्यः । धृतऽव्रतः । महः । अज्मस्य । राजति ॥४॥

सविता देवोऽदाभ्योऽन्यैरहिंसितः सन् भुवनानि प्रचाकशत् दीपयन् व्रतानि कर्माणि प्राणिनामभिरक्षते। भुवनस्य लोकस्य प्रजाभ्यस्तत्स्थाभ्यो बाहू स्वीयौ प्रास्राक्। प्रसारयति। स्वस्वकर्मणेऽनुजानातीत्यर्थः। सर्वव्यापाराणां सूर्याधीनत्वात्। सविता वै प्रसवानामीश इति हि श्रुतिः। धृतव्रतो धृतकर्मा स तथा कुर्वन् महो महतोऽज्मस्य जगतो राजति। ईश्वरो भवति॥

॥ अथ पंचमी ॥

त्रिरंतरिक्षं सविता महित्वना त्री रजांसि परिभूस्त्रीणि रोचना।
तिस्रो दिवः पृथिवीस्तिस्र इन्वति त्रिभिर्व्रतैरभि नो रक्षति त्मना॥५॥
त्रिः। अंतरिक्षं। सविता। महिऽत्वना। त्री। रजांसि। परिऽभूः। त्रीणि। रोचना।
तिस्रः। दिवः। पृथिवीः। तिस्रः। इन्वति। त्रिऽभिः। व्रतैः। अभि। नः। रक्षति। त्मना॥५॥

अयं सविता त्रिस्त्रिभेदमंतरिक्षं। अंतरा क्षांतं भवति जगदित्यंतरिक्षं। परिभूः परिभविता सन् महित्वना महित्वेनेन्वति। व्याप्नोति। वायुविद्युद्वरुणाख्यास्त्रयो लोका अंतरिक्षभेदाः स वायुलोकं स वरुणलोकमित्यादिश्रुतेः। त्री रजांसि रंजनात्मकानि त्रीणि क्षित्यंतरिक्षद्युलक्षणान् त्रीन् लोकानिन्वति। पूर्वमंतरिक्षस्यैवावांतरभेद उक्त इह तु सामान्याकारेणेत्यपुनरुक्तिः। त्रीणि रोचना रोचनानि रोचमानानग्निवाय्वादित्यानुक्तस्थानत्रयस्वामित्वेनेन्वति। पूर्वमंतरिक्षस्यैवावांतरभेद उक्तः। अथ द्युपृथिव्योरवांतरभेद उच्यते। तिस्रो दिव इंद्रप्रजापतिसत्याख्यान् त्रीन् लोकानिन्वति। तथा तिस्रः पृथिवीरिन्वति। क्षित्यवांतरभेदान् लोकानिन्वति। एवं सर्वत्र व्याप्तो देवस्त्रिभिर्व्रतैः कर्मभिरुष्णवर्षहिमाख्यैर्नोऽस्मान् त्मनात्मनैव स्वीयानुग्रहबुद्ध्यैवाभिरक्षति। अभिरक्षतु। परिपालयतु॥

॥ अथ षष्ठी ॥

बृहत्सुम्नः प्रसवीता निवेशनो जगतः स्थातुरुभयस्य यो वशी।
स नो देवः सविता शर्म यच्छत्वस्मे क्षयाय त्रिवरूथमंहसः॥६॥
बृहत्ऽसुम्नः। प्रऽसविता। निऽवेशनः। जगतः। स्थातुः। उभयस्य। यः। वशी।
सः। नः। देवः। सविता। शर्म। यच्छतु। अस्मे इति। क्षयाय। त्रिऽवरूथं। अंहसः॥६॥

यो बृहत्सुम्नः प्रभूतधनः प्रभूतसुखो वा प्रसविता प्रकर्षेणानुज्ञाता कर्मणां निवेशनः सर्वैर्गतव्यः। जगतो जंगमस्य स्थातुः स्थावरस्योभयस्य यो वशी स महान् सविता देवो नोऽस्मभ्यं शर्म सुखं यच्छतु। कीदृशं शर्म। त्रिवरूथं। त्रीणि वरूथानि गृहाणि स्थानानि क्षित्यादीनि यस्य तत्तादृशं। अस्मे अस्माकमंहसः पापस्य क्षयाय भवत्विति शेषः ॥

राजक्रय आगन्देव इत्येषानुवचनीया। सूचितं च। आगन्देव ऋतुभिर्वर्धतु क्षयमित्यर्द्धर्चे आरमेत्। आ० ४.४.। इति ॥

॥ सैषा सप्तमी ॥

आगन्देव ऋतुभिर्वर्धतु क्षयं दधातु नः सविता सुप्रजामिषं।
स नः क्षपाभिरहभिश्च जिन्वतु प्रजावंतं रयिमस्मे समिन्वतु ॥७॥

आ। अगन्। देवः। ऋतुऽभिः। वर्धतु। क्षयं। दधातु। नः। सविता। सुऽप्रजां। इषं।
सः। नः। क्षपाभिः। अहऽभिः। च। जिन्वतु। प्रजाऽवंतं। रयिं। अस्मे इति। सं। इन्वतु ॥७॥

देवः सविता ऋतुभिः सहागन्। आगच्छतु ॥ गमेर्लङि रूपं ॥ किंच क्षयं गृहं वर्धतु। वर्धयतु। नोऽस्माकं सुप्रजां शोभनपुत्राद्युपेतमिषमन्नं दधातु। ददातु। स एव नोऽस्मान् क्षपाभी रात्रिभिरहभिश्च। सर्वेषु दिनेष्वित्यर्थः। जिन्वतु। प्रीणयतु धनानि। अस्मे अस्मासु प्रजावंतं रयिं समिन्वतु। व्याप्नोतु। प्रापयत्वित्यर्थः ॥

॥ इति तृतीयस्याष्टमे चतुर्थो वर्गः ॥

अभूद्देव इति षड़ृचं नवमं सूक्तं वामदेवस्यार्षं सावित्रं। अंत्या त्रिष्टुप् शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः। तथा चानुक्रमणिका। अभूद्देवः षट् त्रिष्टुबंतमिति ॥ अग्निष्टोमे वैश्वदेवशस्त्रे सावित्रनिविद्धानमिदं। तथा च सूत्रं। अभूद्देव एकया च दशभिश्च स्वभूते। आ० ५.१८.। इति ॥ आद्या सावित्रग्रहस्यानुवाक्या। तथा च सूत्रं। सावित्रेण ग्रहेण चरंत्यभूद्देवः सविता वंद्यो नु नः। आ० ५.१८.। इति ॥

॥ सैषा प्रथमा ॥

अभूद्देवः सविता वंद्यो नु न इदानीमह्न उपवाच्यो नृभिः।
वि यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत् ॥१॥

अभूत्। देवः। सविता। वंद्यः। नु। नः। इदानीं। अह्नः। उपऽवाच्यः। नृऽभिः।
वि। यः। रत्ना। भजति। मानवेभ्यः। श्रेष्ठं। नः। अत्र। द्रविणं। यथा। दधत् ॥१॥

स सविता देवोऽभूत्। प्रादुरासीत्। अतो नु क्षिप्रमेव नोऽस्माकं वंद्यो वंदनीयो भवति। इदानीं यागकालेऽह्नस्तृतीयसवने नृभिरस्मदीयैर्होतृभिरुपवाच्यः स्तुत्यो भवति। यो देवो मानवेभ्यो मनोरपत्येभ्यो यजमानेभ्यस्तेषामर्थाय रत्ना रमणीयानि धनानि विभजति स देवः श्रेष्ठं प्रशस्यं द्रविणं गवादिलक्षणं धनं नोऽस्मभ्यमत्रास्मिन्कर्मणि यथा दधत्। दद्यादित्यर्थः। तथा वंद्य उपवाच्यश्चाभूदिति ॥

॥ अथ द्वितीया ॥

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमं।
आदिद्दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥२॥
देवेभ्यः। हि। प्रथमं। यज्ञियेभ्यः। अमृतऽत्वं। सुवसि। भागं। उत्ऽतमं।
आत्। इत्। दामानं। सवितः। वि। ऊर्णुषे। अनूचीना। जीविता। मानुषेभ्यः ॥२॥

प्रथमं देवेभ्यो हि। हिशब्दः प्रसिद्धौ। देवेभ्यो यज्ञियेभ्यो यज्ञार्हेभ्योऽमृतत्वं तत्साधनमुत्तममुत्कृष्टतमं भागं सोमादिलक्षणं सुवसि। अनुजानासि। आदिदनंतरमेव दामानं हविषां दातारं हे सवितर्व्यूर्णुषे। प्रकाशयसि। मानुषेभ्यो यजमानेभ्यो जीविता जीवितान्यनूचीनानुक्रमयुक्तानि। पितृपुत्रपौत्रा इत्यनुक्रमः। ईदृशानि जीवितानि पश्चाद्व्यूर्णुषे ॥

॥ अथ तृतीया ॥

अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता।
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ॥३॥
अचित्ती। यत्। चकृम। दैव्ये। जने। दीनैः। दक्षैः। प्रऽभूती। पुरुषत्वता।
देवेषु। च। सवितः। मानुषेषु। च। त्वं। नः। अत्र। सुवतात्। अनागसः ॥३॥

हे सवितर्वयमचित्ती अप्रज्ञया दैव्ये जने देवे त्वयि दीनैर्दुर्बलैः पुत्रादिभिर्ऋत्विग्भिर्वा तथा दक्षैः प्रवृद्धैर्वा तैः प्रभूती प्रभूत्या। ऐश्वर्यमदेनेति यावत्। पुरुष-

मनसा पुरुषत्वतया च यदागश्चकृम। न केवलं मनुष्येषु कृतमपि तु देवेष्वपि मानुषेषु चाज्ञानादिभिर्यच्चकृम नः कृतवतोऽस्मान् त्वमत्रास्मिन्कर्मण्यनागसः सुवतात्। अनुजानीहि ॥

देवसुवां हविःषु सवितुः सत्यप्रसवस्य न प्रमिय इति याज्या। सूत्रितं च। न प्रमिये सवितुर्दैव्यस्य तद्बृहस्पते प्रथमं। आ० ४.११.। इति ॥

॥ सैषा चतुर्थी ॥

न प्रमिये सवितुर्दैव्यस्य तद्यथा विश्वं भुवनं धारयिष्यति ।

यत्पृथिव्या वरिमन्ना स्वंगुरिर्वर्ष्मन्दिवः सुवति सत्यमस्य तत् ॥४॥

न। प्रऽमिये। सवितुः। दैव्यस्य। तत्। यथा। विश्वं। भुवनं। धारयिष्यति।

यत्। पृथिव्याः। वरिमन्। आ। सुऽअंगुरिः। वर्ष्मन्। दिवः। सुवति। सत्यं।

अस्य। तत् ॥४॥

सवितुर्दैव्यस्य देवस्य तत्कर्म न प्रमिये। न प्रमीयेत। न प्रहिंस्येत। हिंसार्हं न भवतीत्यर्थः ॥ कृत्यार्थे केन्प्रत्ययः ॥ यद्वा दैव्यस्येत्यधिकरणे षष्ठी। सा च कर्मार्था। दैव्यं कर्मेत्यर्थः। कथमहिंस्यमित्यत आह। यथा विश्वं भुवनं धारयिष्यति धारयति। विश्वधारणरूपं यत्कर्मास्ति तन्न प्रमिये। तथा स्वंगुरिः शोभनांगुल्युपलक्षितहस्तो यत् यः पृथिव्या वरिमन्ना। आकारश्चार्थे। भूम्या उरुत्वे च सुवति। तथा दिवो द्युलोकस्य वर्ष्मन्नुरुत्वे च सुवति अस्य देवस्य तदुक्तं कर्म सत्यमबाध्यमिति ॥

॥ अथ पंचमी ॥

इंद्रज्येष्ठान्बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि पस्त्यावतः ।

यथायथा पतयंतो वियेमिर एवैव तस्थुः सवितः सवाय ते ॥५॥

इंद्रऽज्येष्ठान्। बृहत्ऽभ्यः। पर्वतेभ्यः। क्षयान्। एभ्यः। सुवसि। पस्त्यऽवतः।

यथाऽयथा। पतयंतः। विऽयेमिरे। एव। एव। तस्थुः। सवितरिति। सवाय। ते ॥५॥

हे सवितरिंद्रज्येष्ठान्। इंद्रः परमैश्वर्ययुक्तस्त्वमेवेंद्रो वा ज्येष्ठो ज्यायान् पूज्यो येषां ते तादृशाः। तानस्मान्बृहद्भ्यो महद्भ्यः पर्वतेभ्योऽप्यधिकान् सुवसि। प्रेरयसि। किंच एभ्यो यजमानेभ्यः पस्त्यावतो गृहवतः क्षयान्निवासान् ग्रामनगरादीन्

सुवसि। प्रेरयसि। यथा यथा पातयंतो गच्छंतस्त्वां वियेमिरे विनियम्यंते तथा ते तत्र सर्वास्वभूतास्ता एवैवमेव नियमनमनतिक्रम्य तस्थुः। तिष्ठंति ॥

॥ अथ षष्ठी ॥

ये ते त्रिरहंन्त्सवितः सवासो दिवेदिवे सौभगमासुवंति।

इंद्रो द्यावापृथिवी सिंधुरद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥ ६ ॥

ये। ते। त्रिः। अहंन्। सवितरिति। सवासः। दिवेऽदिवे। सौभगं। आऽसुवंति।

इंद्रः। द्यावापृथिवी इति। सिंधुः। अत्ऽभिः। आदित्यैः। नः। अदितिः। शर्म। यंसत् ॥ ६ ॥

ये यजमाना हे सवितस्ते त्वदर्थं सवासः सवाः सोमाः। द्वितीयार्थे प्रथमा। सोमान्। यद्वा सवासः सवनानि प्रातरादीनि प्रति त्रिरहन्नभिषुण्वंति। न केवलमेकस्मिन्नेवाहनि सवनत्रयेषु अपि तु दिवे दिवे प्रतिदिनं सौभगं सौभाग्यजनकमासुवंति अभिषुण्वंति तेभ्यो नोऽस्मभ्यमिंद्रः शर्म यंसत्। यच्छतु। द्यावापृथिव्यौ चाद्भिर्विशिष्टा सिंधुः सिंध्वभिमानिदेवता चादित्यैः सहितादितिश्च शर्म यंसत्। सावित्रे सूक्त इंद्रादीनां निपातमुक्त्वा तेषां प्रार्थना न विरुध्यते ॥

॥ इति तृतीयस्याष्टमे पंचमो वर्गः ॥

को वस्त्रातेति दशर्चं दशमं सूक्तं वामदेवस्यार्षं विश्वदेवदेवताकं। अष्टम्याद्यास्तिस्रो गायत्र्यः शिष्टा अनादेशपरिभाषया त्रिष्टुभः। तथा चानुक्रम्यते। को वो दश वैश्वदेवं त्रिगायत्र्यंतं त्विति। विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

को वस्त्राता वसवः को वरूता द्यावाभूमी अदिते त्रासीथां नः।

सहीयसो वरुण मित्र मर्तात्को वोऽध्वरे वरिवो धाति देवाः ॥ १ ॥

कः। वः। त्राता। वसवः। कः। वरूता। द्यावाभूमी इति। अदिते। त्रासीथां। नः।

सहीयसः। वरुण। मित्र। मर्तात्। कः। वः। अध्वरे। वरिवः। धाति। देवाः ॥ १ ॥

हे वसवः सर्वस्य वासयितारो देवा वो युष्मान् कस्त्रातास्ति। यतो यूयं वसवोऽत इत्यभिप्रायः। कश्च वरूता संभक्तास्ति। यद्वा वो युष्माकं मध्ये कस्त्राता रक्षको देवः कश्च वरूता वारयिता दुःखानां वरणीयो वा भवति। हे द्यावाभूमी नोऽस्मान् त्रासीथां। रक्षतं। हे अदिते अखंडनीये। एतदपि द्यावा-

भूम्नोर्विशेषणं। संख्याव्यत्ययः। यदीदं पृथग्देवतामंत्रणं स्यात् तर्हि [illegible] न स्यात्। आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानवत्त्वेनास्यैव पादादित्वात्। अदिते मित्र वरुणोत मृळ। ऋग्वे० २. २७. १४.। इति आदित्या रुद्रा वसवः सुदानवः। ऋग्वे० १०. ६६. १२.। इतिवत्। तस्यैव विशेषणत्वे समानाधिकरण इति सामानाधिकरण्यात् अग्ने पावक रोचिषा। ऋग्वे० ५. २६. १.। इतिवत् अस्य निघातः सिध्यति। तस्मात् द्यावाभूमी इत्येतस्य विशेषणं। हे वरुण हे मित्र युवां सहीयसो मर्तादभिभवितुर्मनुष्यात् नस्त्रासीथां। हे देवा वो युष्माकमध्वरे यागे को वरिवो धनं धाति। ददाति। यद्वा वो युष्माकं मध्ये को वरिवो धाति। धारयति॥

॥ अथ द्वितीया ॥

प्र ये धामानि पूर्व्याण्यर्चान्वि यदुच्छान्वियोतारो अमूराः।
विधातारो वि ते दधुरजस्रा ऋतधीतयो रुरुचंत दस्माः॥२॥

प्र। ये। धामानि। पूर्व्याणि। अर्चान्। वि। यत्। उच्छान्। विऽयोतारः। अमूराः।
विऽधातारः। वि। ते। दधुः। अजस्राः। ऋतऽधीतयः। रुरुचंत। दस्माः॥२॥

ये देवाः पूर्व्याणि पुरातनानि धामानि स्थानानि वा प्राचीन् अर्चति प्रयच्छंति स्तोतृभ्यः। यत् ये च वियोतारो दुःखानाममिश्रयितारोऽमूरा अमूढा व्युच्छान् व्युच्छंति तमो विवासयंति देवाः ते विधातारः फलानां कर्तारोऽजस्रा नित्या विदधुः। कुर्वंत्यभिमतं। किंच ऋतधीतयः सत्यकर्माणो दस्मा दर्शनीयास्ते रुरुचंत। रोचंते॥

॥ अथ चतुर्थी ॥

प्र पस्त्या३मदितिं सिंधुमर्कैः स्वस्तिमीळे सख्याय देवीं।
उभे यथा नो अहनी निपात उषासानक्ता करतामदब्धे॥३॥

प्र। पस्त्यां। अदितिं। सिंधुं। अर्कैः। स्वस्तिं। ईळे। सख्याय। देवीं।
उभे इति। यथा। नः। अहनी इति। निऽपातः। उषसानक्ता। करतां। अदब्धे इति॥३॥

पस्त्यां सर्वैर्गंतव्यामदितिमदीनां देवमातरं तां देवीं सिंधुं स्यंदनशीलां नद्यभिमानिदेवीं स्वस्तिं सुखनिवासामेतन्नामिकां देवीं सख्यायानुकूल्यायार्कैर्मंत्रै-

ईळे। स्तौमि। अन्ये बृहती द्यावापृथिव्यौ यथा नोऽस्मान्निपातः नितरां पातः तथा स्तौमि। उषासानक्ताहोरात्राभिमानिदेवते अदब्धे अदंभनीये कर्तां। अभिमतमिति शेषः ॥

॥ अथ चतुर्थी ॥

व्यर्यमा वरुणश्चेति पंथामिषस्पतिः सुवितं गातुमग्निः।

इंद्राविष्णू नृवदु षु स्तवाना शर्म नो यंतममवद्वरूथं ॥४॥

वि। अर्यमा। वरुणः। चेति। पंथां। इषः। पतिः। सुवितं। गातुं। अग्निः।

इंद्राविष्णू इति। नृऽवत्। ऊं इति। सु। स्तवाना। शर्म। नः। यंतं। अमंऽवत्। वरूथं ॥४॥

अर्यमा देवोऽस्माकं पंथां यज्ञादिमार्गं विचेति। ज्ञापयति। तथा वरुणो विचेति। इषोऽन्नस्य हविर्लक्षणस्य पतिः पालकोऽग्निः सुवितं सुखकरं गातुं गमनं मार्गं वा स्वर्गादेर्विचेति। इंद्राविष्णू सु सुष्ठु स्तवाना स्तूयमानौ नृवन्मनुष्यवन्मनुष्योपेतं वरूथं वरणीयममवद्बलोपेतं शर्म गृहं सुखं वा नोऽस्माकं यंतं। यच्छतं ॥

॥ अथ पंचमी ॥

आ पर्वतस्य मरुतामवांसि देवस्य त्रातुरव्रि भगस्य।

पात्पतिर्जन्यादंहसो नो मित्रो मित्रियादुत न उरुष्येत् ॥५॥

आ। पर्वतस्य। मरुतां। अवांसि। देवस्य। त्रातुः। अव्रि। भगस्य।

पात्। पतिः। जन्यात्। अंहसः। नः। मित्रः। मित्रियात्। उत। नः। उरुष्येत् ॥५॥

पर्वतस्येंद्रसखस्यैतन्नामकस्य देवस्य मरुतां च त्रातू रक्षकस्य भगस्य देवस्य चावांसि रक्षणान्याव्रि। आवृणे। किंच पतिर्वरुणो देवो जन्याज्जनसंबंधादंहसः पापात् नोऽस्मान्पात्। पातु। रक्षतु। उतापि च मित्रश्च मित्रियात् मित्रभावेन न उरुष्येत्। रक्षतु ॥

॥ इति तृतीयस्याष्टमे षष्ठो वर्गः ॥

॥ अथ षष्ठी ॥

नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः।

समुद्रं न संचरणे सनिष्यवो घर्मस्वरसो नद्यो३ अप व्रन् ॥६॥

नु । रोदसी इति । अहिना । बुध्न्येन । स्तुवीत । देवी इति । अप्येभिः । इष्टैः ।
समुद्रं । न । संऽचरणे । सनिष्यवः । घर्मऽस्वरसः । नद्यः । अप । व्रन् ॥ ६ ॥

हे रोदसी द्यावापृथिव्यौ युवामहिना बुध्न्येनाहिबुध्न्यनामकेन देवेन सह नु क्षिप्रमप्येभिरापनीयैरिष्टैः कामैर्निमित्तभूतैः स्तुवीत । स्तुवे । सनिष्यवो धनानां संभक्तुमिच्छंतः संचरणे संचाराय समुद्रमध्यगमनाय समुद्रमिव । तं यथा स्तुवंति तद्वत् । यस्मादेते देवा घर्मस्वरसो दीप्तध्वनयो नद्यो नदीरपव्रन् अपवृण्वंतीति परोक्ष इव । अथवा ते देवा नदीरपवृण्वंत्वित्याशीः । तस्मात् स्तुव इति संबंधः ॥

॥ अथ सप्तमी ॥

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
नहि मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सान्वग्नेः ॥ ७ ॥

देवैः । नः । देवी । अदितिः । नि । पातु । देवः । त्राता । त्रायतां । अप्रऽयुच्छन् ।
नहि । मित्रस्य । वरुणस्य । धासिं । अर्हामसि । प्रऽमियं । सानु । अग्नेः ॥ ७ ॥

अदितिर्देव्यदीना देवमाता देवैरन्यैर्मित्रादिभिः सह नोऽस्मान्निपातु । पालयतु । तथा त्राता पालको देवः । इंद्र इत्यर्थः । सोऽप्यप्रयुच्छन् अप्रमाद्यन् त्रायतां । वयं च मित्रस्य वरुणस्याग्नेश्च मानुं समुच्छ्रितं धासिमन्नं सोमादिलक्षणं प्रमियं हिंसितुं नह्यर्हामसि । अर्हामः । समर्था भवामः । किंत्वनुष्ठानेन संवर्धितुमर्हाम इत्यर्थः ॥

॥ अथाष्टमी ॥

अग्निरीशे वसव्यस्याग्निर्महः सौभगस्य । तान्यस्मभ्यं रासते ॥ ८ ॥

अग्निः । ईशे । वसव्यस्य । अग्निः । महः । सौभगस्य । तानि । अस्मभ्यं । रासते ॥ ८ ॥

अग्निर्देवो वसव्यस्य धनसमूहस्येशे । ईष्टे दातुं । तथाग्निर्महो महतः सौभगस्य सुभगत्वस्यापीशे । अतस्तानि धनानि सौभाग्यं चास्मभ्यं रासते । ददातु ॥

॥ अथ नवमी ॥

उषो मघोन्या वह सूनृते वार्या पुरु । अस्मभ्यं वाजिनीवति ॥ ९ ॥

उषः । मघोनि । आ । वह । सूनृते । वार्या । पुरु । अस्मभ्यं । वाजिनीऽवति ॥ ९ ॥

हे उषो हे मघोनि धनवति हे सूनृते प्रियसत्यरूपवागभिमानिनि हे वाजिनीवत्यन्नवति देवि अस्मभ्यं वार्या वरणीयानि पुरु बहूनि धनान्यावह। प्रापय॥

॥ अथ दशमी ॥

तत्सु नः सविता भगो वरुणो मित्रो अर्यमा। इंद्रो नो राधसा गमत् ॥१०॥

तत्। सु। नः। सविता। भगः। वरुणः। मित्रः। अर्यमा। इंद्रः। नः। राधसा। आ। गमत्॥१०॥

येन राधसा धनेन सह सविता भगो वरुणो मित्रोऽर्यमेंद्रः प्रत्येकमागमत् आगच्छंति यज्ञं तद्राधो धनं ते देवा नोऽस्मभ्यं सु सुष्ठु प्रयच्छंत्विति शेषः॥

॥ इति तृतीयस्याष्टमे सप्तमो वर्गः॥

मही द्यावापृथिवी इति सप्तर्चमेकादशं सूक्तं वामदेवस्यार्षं द्यावापृथिव्यं। पूर्ववत् त्रिगायत्र्यंतं त्वित्युक्तत्वात्पंचम्याद्यास्तिस्रो गायत्र्यः शिष्टास्त्रिष्टुभः। मही सप्त द्यावापृथिव्यमित्यनुक्रमणिका॥ व्यूढे दशरात्रे पंचमेऽहनि वैश्वदेवशस्त्र आदितश्चतुर्ऋचं द्यावापृथिव्यनिविद्धानीयं। तथा च सूचितं। मही द्यावापृथिवी इति चतस्र ऋभुर्विभ्वा। आ० ८.८.। इति॥

॥ तत्र प्रथमा॥

मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भिरर्कैः।

यत्सीं वरिष्ठे बृहती विमिन्वन्रुवद्धोक्षा पप्रथानेभिरेवैः ॥१॥

मही इति। द्यावापृथिवी इति। इह। ज्येष्ठे इति। रुचा। भवतां। शुचयत्ऽभिः। अर्कैः। यत्। सीं। वरिष्ठे इति। बृहती इति। विऽमिन्वन्। रुवत्। ह। उक्षा। पप्रथानेभिः। एवैः॥१॥

इह यज्ञे मही महत्यौ ज्येष्ठे प्रशस्ये द्यावापृथिवी द्यावापृथिव्यौ रुचा दीप्त्या युक्ते शुचयद्भिर्दीपयद्भिरर्कैर्मंत्रैः सोमादिहविर्भिर्वा युक्ते भवतां। यत् यस्मात् सीं सर्वतो वरिष्ठे उरुतरे बृहती महत्यौ द्यावापृथिव्यौ विमिन्वन् परिच्छिंदन् स्थापयन् उक्षा सेक्ता पर्जन्यः पप्रथानेभिः प्रथमानैरेवैर्गमनशीलैर्मरुद्भिर्मेघैर्वा सह रुवत् रौति शब्दं करोति। हेति पूरणः। तस्माद्रुचा भवतामिति संबंधः॥

॥ अथ द्वितीया॥

देवी देवेभिर्यजते यजत्रैरमिनती तस्थतुरुक्षमाणे।

ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री शुचयद्भिरर्कैः ॥२॥

देवी इति। देवेभिः। यजते इति। यजत्रैः। अमिनती इति। तस्थतुः। उक्षमाणे इति।
ऋतवरी इत्यृतऽवरी। अद्रुहा। देवपुत्रे इति देवऽपुत्रे। यज्ञस्य। नेत्री इति।
शुचयत्ऽभिः। अर्कैः ॥ २ ॥

देवी देव्यौ यजते यष्टव्ये अमिनती प्रजा अहिंसत्यावुक्षमाणे सिंचत्यावृतावरी ऋतवत्यावद्रुहाद्रोग्ध्र्यौ द्रोहमकुर्वत्यौ देवपुत्रे देवोत्पादिक्यौ यज्ञस्य नेत्री निर्वाहयित्र्यौ द्यावापृथिव्यौ देवेभिर्देवैर्यजत्रैर्यष्टव्यैः सहिते शुचयद्भिः शोचयद्भिरर्कैर्मंत्रैर्हविर्भिर्वा युक्ते तस्थतुः। तिष्ठतः। स्यातामित्यर्थः ॥

॥ अथ तृतीया ॥

स इत्स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान।
उर्वी गभीरे रजसी सुमेके अवंशे धीरः शच्या समैरत् ॥ ३ ॥

सः। इत्। सुऽअपाः। भुवनेषु। आस। यः। इमे इति। द्यावापृथिवी इति। जजान।
उर्वी इति। गभीरे इति। रजसी इति। सुमेके इति सुऽमेके। अवंशे। धीरः। शच्या।
सं। ऐरत् ॥ ३ ॥

स इत्स एव स्वपाः शोभनकर्मा सन् भुवनेष्वास। आस्ते। य इमे द्यावापृथिव्यौ जजान उत्पादितवान्। यश्च प्रजापतिरुर्वी उर्व्यौ विस्तीर्णे गभीरे अविचले सुमेके शोभनरूपे अवंशे उत्पत्तिरहिते अनाधारे वांतरिक्षे धीरो धीमान् शच्या कुशलकर्मणा समैरत् सम्यक् प्रेरितवान् स एव स्वपा इति ॥

॥ अथ चतुर्थी ॥

नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भिरिषयंती सजोषाः।
उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदासाः ॥ ४ ॥

नु। रोदसी इति। बृहत्ऽभिः। नः। वरूथैः। पत्नीवत्ऽभिः। इषयंती इति। सऽजोषाः।
उरूची इति। विश्वे इति। यजते इति। नि। पातं। धिया। स्याम। रथ्यः। सदाऽसाः ॥ ४ ॥

हे रोदसी द्यावापृथिव्यौ नु क्षिप्रं पत्नीवद्भिः पत्नीसहितैर्बृहद्भिर्महद्भिर्वरूथैर्गृहैर्धनैर्वा सहेषयंती अस्माकमन्नमिच्छंत्यौ सजोषाः परस्परं संगते उरूची उर्वंचने विश्वे व्याप्ते यजते यष्टव्ये सत्यौ नोऽस्मान् नि पातं। नितरां रक्षतं। धियेत्यादि गतं ॥

प्र वामित्यादिगायत्रस्तृचो व्यूढे दशरात्रे वैश्वदेवशस्त्रे द्यावापृथिव्यनिविद्धानीयत्वेन प्रक्षेप्यः। तथा च सूत्रितं। प्र वां महि द्यवी इति तृचौ। आ॰ ८.११.। इति॥

॥ तत्र तृचे प्रथमा सूक्ते पंचमी॥

प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे। शुची उप प्रशस्तये॥५॥

प्र। वां। महि। द्यवी इति। अभि। उपऽस्तुतिं। भरामहे। शुची इति। उप। प्रऽशस्तये॥५॥

हे द्यावापृथिव्यौ द्यवी द्योतमाने वां युवाभ्यामुपस्तुतिं स्तोत्रं महि महत्प्रभूतमभिप्रभरामहे। प्रकर्षेण संपादयामः। शुची शुद्धे युवां प्रशस्तये प्रशंसितुमुप। उपसर्गश्रुतेरुचितक्रियाध्याहारः। उपगच्छाम इति शेषः॥

॥ अथ षष्ठी॥

पुनाने तन्वा मिथः स्वेन दक्षेण राजथः। ऊह्याथे सनादृतं॥६॥

पुनाने इति। तन्वा। मिथः। स्वेन। दक्षेण। राजथः। ऊह्याथे इति। सनात्। ऋतं॥६॥

हे देव्यौ स्वकीयया तन्वा मूर्त्या स्वेन दक्षेण बलेन च मिथः प्रत्येकं पुनाने शोधयंत्यौ यज्ञं यजमानं वा युवां राजथः। यद्वा तन्वा स्वस्वशरीरैकदेशेन मिथः परस्परं पुनाने शोधयंत्यौ। द्यौः स्वीयेनासारेण भुवं सा च स्वकीयेन कार्श्येन चंद्रमसि स्थितेन दिवमिति विवेकः। सनात्सदाकालमृतं यज्ञमूह्याथे। वहथः॥

॥ अथ सप्तमी॥

मही मित्रस्य साधथस्तरंती पिप्रती ऋतं। परि यज्ञं नि षेदथुः॥७॥

मही इति। मित्रस्य। साधथः। तरंती इति। पिप्रती इति। ऋतं। परि। यज्ञं। नि। सेदथुः॥७॥

मही महत्यौ द्यावापृथिव्यौ मित्रस्य मित्रभूतस्य स्तोतुरभिमतं साधथः। ऋतमन्नं तरंती तारयंत्यौ पिप्रती पूरयंत्यौ यज्ञं परि परितो निषेदथुः। आश्रयथः॥

॥ इति तृतीयस्याष्टमेऽष्टमो वर्गः॥

क्षेत्रस्य पतिनेत्यष्टर्चं द्वादशं सूक्तं वामदेवस्यार्षं। आद्याचतुर्थीषष्ठीसप्तम्योऽनुष्टुभः पंचमी पुरउष्णिक्। आद्यश्चेत्पुरउष्णिगिति हि तल्लक्षणं। शिष्टास्तिस्रस्त्रिष्टुभः। आद्यास्तिस्रः क्षेत्रपतिदेवताकाश्चतुर्थी शुनाख्यदेवताका पंच-

न्यष्टम्यौ शुनासीरदेवताके षष्ठीसप्तम्यौ सीतादेवताके। तथा चानुक्रमणिका। क्षेत्रस्याष्टौ तिस्रः क्षेत्रपत्याः शुनायैका परा पुरउष्णिक् सांत्या च शुनासीराभ्यामुपांत्ये सीतायै ते अनुष्टुभावाद्या च चतुर्थी चेति॥ क्षेत्रस्य कर्षणेऽनेन सूक्तेन प्रत्यृचं जुहुयाज्जपेद्वा। तथा च सूत्रितं। क्षेत्रस्य पतिना वयमिति प्रत्यृचं जुहुयाज्जपेद्वा। गृ॰ सू॰ २.१०.। इति॥ अप्तोर्यामे होतुरतिरिक्तोक्थ्य आश्विनशस्त्रादूर्ध्वं चत्वार्यतिरिक्तोक्थ्यानि। तत्राद्या परिधानीया। सूत्रितं च। क्षेत्रस्य पतिना वयमिति परिधानीया। आ॰ ९.११.। इति॥

॥ तत्र प्रथमा ॥

क्षेत्र॑स्य॒ पति॑ना व॒यं हि॒तेने॑व जयामसि।
गामश्वं॑ पोषयि॒त्न्वा स नो॑ मृळाती॒दृशे॑॥१॥

क्षेत्र॑स्य। पति॑ना। व॒यं। हि॒तेन॑ऽइव। ज॒या॒म॒सि॒।
गां। अश्वं॑। पो॒ष॒यि॒त्नु। आ। सः। नः॒। मृ॒ळा॒ति॒। ई॒दृशे॑॥१॥

वयं यजमानाः क्षेत्रस्य पतिना देवेन। रुद्रं क्षेत्रपतिं प्राहुः केचिदग्निमथापरे। स्वतंत्र एव वा कश्चित्क्षेत्रस्य पतिरुच्यते॥ हितेनेव। इवशब्द एवार्थे। सर्वप्राणिहितेनैव तेन। अथवा मित्रेणेव। यथा सख्युः साहाय्ये सन् स्वकार्यं साधयति तद्वत्। जयामसि। जयामः क्षेत्रं। स देवो गामश्वं च पोषयित्नु पोषयितृ गवाश्वलक्षणं धनमा हरत्विति शेषः। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। स एव देवो नोऽस्मानीदृश उक्तलक्षणे धने दातव्ये सति मृळाति। सुखयति। क्षेत्रस्य पतिनेत्यादिनिरुक्तं। १०.१५.। जानीयात्॥

अप्तोर्यामे मैत्रावरुणस्यातिरिक्तोक्थ्ये परिधानीया। सूत्रितं च। क्षेत्रस्य पते मधुमंतमूर्मिमिति परिधानीया। आ॰ ९.११.। इति॥

॥ सैषा द्वितीया ॥

क्षेत्र॑स्य पते॒ मधु॑मंतमू॒र्मिं धे॒नुरि॑व॒ पयो॑ अ॒स्मासु॑ धुक्ष्व।
म॒धु॒श्चुतं॑ घृ॒तमि॑व॒ सुपू॑तमृ॒तस्य॑ नः॒ पत॑यो मृळयंतु॥२॥

क्षेत्र॑स्य। प॒ते॒। मधु॑ऽमंतं। ऊ॒र्मिं। धे॒नुः॒ऽइ॑व। पयः॑। अ॒स्मासु॑। धु॒क्ष्व॒।
म॒धु॒ऽश्चुतं॑। घृ॒तंऽइ॑व। सु॒ऽपू॑तं। ऋ॒तस्य॑। नः॒। पत॑यः। मृ॒ळ॒यं॒तु॒॥२॥

हे क्षेत्रस्य पते त्वं मधुमंतं माधुर्योपेतमूर्मिं प्रवृद्धमुदकं धेनुः पय इव सा यथा दुग्धे तथास्मासु धुक्ष्व । मधुश्चुतं मधुस्रावि सुपूतं घृतमिवेत्युपमा । तादृश-मुदकमित्यर्थः । ऋतस्य यज्ञस्योदकस्य वा पतयः स्वामिनो नोऽस्मान् मृळयंतु । सुखयंतु । यद्वा ऋतस्यैतत्कर्मणि षष्ठी । ऋतं मृळयंतु । प्रयच्छंतु । मृळतिरत्र दानकर्मा ॥

ब्राह्मणाच्छंसिनोऽतिरिक्तोक्थ्ये परिधानीयैषा । मधुमतीरोषधीर्द्याव आप इति परिधानीया । आ० ९.११. । इति सूत्रितत्वात् ॥

॥ सैषा तृतीया ॥

मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वंतरिक्षं ।
क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यंतो अन्वेनं चरेम ॥३॥
मधुऽमतीः । ओषधीः । द्यावः । आपः । मधुऽमत् । नः । भवतु । अंतरिक्षं ।
क्षेत्रस्य । पतिः । मधुऽमान् । नः । अस्तु । अरिष्यंतः । अनु । एनं । चरेम ॥३॥

ओषधीरोषध्यो व्रीहिप्रियंग्वादयो नोऽस्मभ्यं मधुमतीर्मधुमत्यो भवंतु । तथा द्यावः । तिस्रो दिव इत्युक्तत्वाद्बहुवचनं युक्तं । तथापोऽंतरिक्षं च नो मधुमद्भवतु । किंच क्षेत्रस्य पतिरपि मधुमान्नोऽस्तु । अरिष्यंतोऽन्यैरहिंस्यंतो वयमेनं क्षेत्रप-तिमनु अनुसृत्य चरेम । संचरेम सुखेन ॥

॥ अथ चतुर्थी ॥

शुनं वाहाः शुनं नरः शुनं कृषतु लांगलं ।
शुनं वरत्रा बध्यंतां शुनमष्ट्रामुदिंगय ॥४॥
शुनं । वाहाः । शुनं । नरः । शुनं । कृषतु । लांगलं ।
शुनं । वरत्राः । बध्यंतां । शुनं । अष्ट्रां । उत् । इंगय ॥४॥

वाहा बलीवर्दाः शुनं । सुखनामैतत् । सुखं यथा भवति तथा वहंत्विति शेषः । तथा नरो नेतारो मनुष्याः कर्षकाः शुनं कुर्वंतु । तथा लांगलमपि शुनं कृषतु । वरत्रा वरत्रेण चायमाणाः प्रग्रहाः शुनं बध्यंतां । अष्ट्रां प्रतोदं शुनमु-दिंगय । प्रेरय । शुनाख्यो वाय्विंद्रयोरन्यतमः सुखकृद्देवः । तदनुग्रहादेतत्सर्वं भवत्विति तस्य श्रुतिसामान्येन स्तुतिः ॥

शुनासीरीये पर्वणि शुनासीरदेवताकस्य हविषोऽनुवाक्येषांत्या ऋक् याज्या। सूत्रितं च। शुनासीराविमां वाचं जुषेथां शुनं नः फालाः। आ॰ २.२०.। इति ॥

॥ सैषा पंचमी ॥

शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः ।
तेनेमामुप सिंचतं ॥ ५ ॥

शुनासीरौ । इमां । वाचं । जुषेथां । यत् । दिवि । चक्रथुः । पयः ।
तेन । इमां । उप । सिंचतं ॥ ५ ॥

द्युदेवः शुनदेवतेति शौनकः। अतः शुन इंद्रः सीरो वायुः। शुनो वायुः शु एत्यंतरिक्षे सीर आदित्यः सरणात्। नि॰ ९.४०.। इति यास्कः। हे शुनासीरौ तौ युवामिमां वक्ष्यमाणां मदीयां वाचं जुषेथां। यत्पयो दिवि चक्रथुः तेनेमां भूमिमुपसिंचतं ॥

॥ अथ षष्ठी ॥

अर्वाची सुभगे भव सीते वंदामहे त्वा ।
यथा नः सुभगाससि यथा नः सुफलाससि ॥ ६ ॥

अर्वाची । सुऽभगे । भव । सीते । वंदामहे । त्वा ।
यथा । नः । सुऽभगा । अससि । यथा । नः । सुऽफला । अससि ॥ ६ ॥

हे सुभगे सीते त्वमर्वाच्यर्वागंचना भव। त्वा त्वां वंदामहे। स्तुवीमहि। यथा नः सुभगाससि शोभनधना भवसि यथा नः सुफलाससि तथा वंदामहे ॥

॥ अथ सप्तमी ॥

इंद्रः सीतां नि गृह्णातु तां पूषानु यच्छतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समां ॥ ७ ॥

इंद्रः । सीतां । नि । गृह्णातु । तां । पूषा । अनु । यच्छतु ।
सा । नः । पयस्वती । दुहां । उत्तरांऽउत्तरां । समां ॥ ७ ॥

इंद्रो देवः सीतां सीताधारकाष्ठां निगृह्णातु। तां सीतां पूषा देवोऽनुयच्छतु।

नियमयतु । सा द्यौः पयस्वत्युदकवती दुहां । दुह्यात् । कदेति तदुच्यते । उत्तरामुत्तरां समामुत्तरमुत्तरं संवत्सरं ॥

अस्या अष्टम्या विनियोगः शुनासीराविमामित्यत्रोक्तः ॥

॥ अथाष्टमी ॥

शुनं नः फाला वि कृषंतु भूमिं शुनं कीनाशा अभि यंतु वाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तं ॥८॥

शुनं । नः । फालाः । वि । कृषंतु । भूमिं । शुनं । कीनाशाः । अभि । यंतु । वाहैः ।
शुनं । पर्जन्यः । मधुना । पयःऽभिः । शुनासीरा । शुनं । अस्मासु । धत्तं ॥८॥

नो भूमिं फाला भूमिविदारककाष्ठाः शुनं विकृषंतु । शुनं यथा भवति तथा । कीनाशा बलीवर्दरक्षका वाहैर्बलीवर्दैरभियंतु शुनं यथा भवति तथा । पर्जन्यो मधुना मधुरैः पयोभिरुदकैः सिंचतु । हे शुनासीरा इंद्रवायू वाय्वादित्यौ वा शुनं सुखमस्मासु धत्तं । धारयतं ॥

॥ इति तृतीयस्याष्टमे नवमो वर्गः ॥

समुद्रादूर्मिरित्येकादशर्चं त्रयोदशं सूक्तं । अंत्या जगती शिष्टास्त्रिष्टुभः । अग्निसूर्याब्गोघृतानामन्यतमो देवता । वामदेव ऋषिः । अत्रानुक्रमणिका । समुद्रादूर्मिरेकादशाग्नेयं जगत्यंतं सौर्यं वापं वा गव्यं वा घृतस्तुतिर्वेति ॥ विषुवतीदं सूक्तमाज्यं । तथा च सूत्रं । समुद्रादूर्मिरित्याज्यं त्यं सुमेषं । आ॰ ८.६. । इति ॥ व्यूढे दशरात्रे सप्तमेऽहनीदमेव सूक्तमाज्यं । सूचितं च । अथ छंदोमाः समुद्रादूर्मिरित्याज्यं । आ॰ ८.९. । इति ॥

॥ तत्र प्रथमा ॥

समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥१॥

समुद्रात् । ऊर्मिः । मधुऽमान् । उत् । आरत् । उप । अंशुना । सं । अमृतऽत्वं । आनट् ।
घृतस्य । नाम । गुह्यं । यत् । अस्ति । जिह्वा । देवानां । अमृतस्य । नाभिः ॥१॥

संमोदंतेऽस्मिन्यजमाना इति वा समुद्रोऽग्निः पार्थिवः अथवा समुद्रवंत्या-

योऽस्मादिति व्युत्पत्त्या वैद्युतोऽग्निः । तस्मादूर्मिरूर्मिवदुपर्युपर्युद्भूतो मधुमाना-
पूर्वार्पितफलसमूह उदारत् । उदगच्छति । अथवा वैद्युतादूर्म्युत्पादको रस उदकलक्षण
उद्भूतः । अथवा समुद्रात्समुद्रवणसाधनादादित्यादूर्मी रस उदकलक्षण उदारत् ।
आदित्याज्जायते वृष्टिरिति श्रुतेः । यद्वा समुद्रादुक्तव्युत्पत्तेरंतरिक्षादूर्मिर्मधुमा-
दारत् । अथवा समुद्रादुक्तलक्षणाद्गवामूधसः सकाशादूर्मिरुज्ज्वलः क्षीररसः ।
एतद्घृतपक्षेऽपि समानं । यद्यपि घृतं क्षीराज्जायते तथापि तस्योधस उत्पत्ते-
वमुपचर्यते । शिष्टं वाक्यमग्न्यादिपंचसु पक्षेष्वपि समानं । अंशुना दीप्यमानेन
वामृतत्वं मोक्षमुपसमानट् । उपेति पूरणः । प्राप्नोति नरः । घृतस्य दीप्तस्य
क्षीरद्रव्यरूपस्य वा गुह्यं नाम गोपनीयं नमनसाधनं यदस्ति तद्ब्रवीमि । तद्दे-
वानां जिह्वास्वादजिह्वास्थानीयं भवति । तदेवामृतस्य नाभिर्बंधकं भवति ।
तदुभयं घृतस्य नामेत्यर्थः । एवं सर्वमंत्रेषु तत्तत्पक्षानुसारेण योज्यं ॥

॥ अथ द्वितीया ॥

वयं नाम प्र ब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृंगोऽवमीद्गौर एतत् ॥२॥

वयं । नाम । प्र । ब्रवाम । घृतस्य । अस्मिन् । यज्ञे । धारयाम । नमःऽभिः ।
उप । ब्रह्मा । शृणवत् । शस्यमानं । चतुःऽशृंगः । अवमीत् । गौरः । एतत् ॥२॥

वयं यजमाना घृतस्य नाम प्रब्रवाम । स्तवाम । अस्मिन्यज्ञे नमोभिर्नम-
स्कारैर्हविर्भिर्वा धारयाम च । ब्रह्मा परिवृढो देवः शस्यमानं स्तूयमानमिदमुप
शृणवत् । शृणुयात् । चतुःशृंगः । चत्वारि शृंगाणि वेदचतुष्टयरूपाणि यस्य
सः । आदित्याग्निपक्ष एवं । इतरेष्वपि यास्कोक्तव्युत्पत्त्या शृंगशब्दो व्याख्येयः ।
गौरोऽरुणवर्णस्तादृशो देव एतत्कर्म जगद्वावमीत् । उद्गिरति । निर्वहतीत्यर्थः ॥

॥ अथ तृतीया ॥

चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥३॥

चत्वारि । शृंगा । त्रयः । अस्य । पादाः । द्वे इति । शीर्षे इति । सप्त । हस्तासः । अस्य ।
त्रिधा । बद्धः । वृषभः । रोरवीति । महः । देवः । मर्त्यान् । आ । विवेश ॥३॥

यद्यप्यग्निसूर्यादिपंचदेवताकत्वात्पंचधायं मंत्रो व्याख्येयस्तथापि निरुक्तयुक्तरीत्या यज्ञात्मकाग्नेः सूर्यस्य च प्रकाशकत्वेन तत्परतया व्याख्यायते। अस्य यज्ञात्मकस्याग्नेश्चत्वारि शृंगा चत्वारो वेदाः शृंगस्थानीयाः। यद्यप्यापस्तंबेन यज्ञं व्याख्यास्यामः स त्रिभिर्वेदैर्विधीयते। परिभा० १.३.। इत्युक्तं तथाप्याथर्वणस्येतरानपेक्ष्यैवैकाग्निसाध्यानां कृत्स्नकर्मणामभिधायकत्वात्तदपेक्षया चत्वारि शृंगेत्युक्तं। त्रयो अस्य पादाः सवनानि त्रीण्यस्य पादाः। प्रवृत्तिसाधनत्वात्पादा इत्युच्यंते। द्वे शीर्षे ब्रह्मौदनं प्रवर्ग्यश्च। इष्टिसोमप्राधान्येनेदमुक्तं। सप्त हस्तासः सप्त छंदांसि। हस्ता अनुष्ठानस्य मुख्यसाधनं। छंदांस्यपि देवताप्रीणनस्य मुख्यसाधनमिति हस्तव्यवहारः। त्रिधा बद्धो मंत्रकल्पब्राह्मणैस्त्रिःप्रकारं बद्धः। बंधनमस्य तन्निष्पाद्यत्वं। वृषभः फलानां वर्षिता रोरवीति। भृशं शब्दायते। ऋग्यजुःसामोक्थैः शस्त्रयागस्तुतिरूपैर्होत्राद्युत्पादितैर्ध्वनिभिरसौ रौति। एवं महो देवो मर्त्यानाविवेश। मर्त्यैर्यजमानैर्निष्पाद्यत्वात्प्रवेश उपचर्यते ॥ अत्र यास्कश्चत्वारि शृंगेति वेदा वा एत उक्ताः। नि० १३. ७.। इत्यादिना निरवोचत्। तदत्रानुसंधेयं॥ अथ सूर्यपक्षे व्याख्यायते। अस्यादित्यस्य चत्वारि शृंगाणि चतस्रो दिशः। एताः श्रयणार्थत्वाच्छृंगाणीत्युपचर्यंते। त्रयो अस्य पादाः। त्रयो वेदाः पादस्थानीया भवंति गमनसाधनत्वात्। तथा ह्यृग्भिः पूर्वाह्णे दिवि देव ईयत इत्युपक्रम्य वेदैरशून्यस्त्रिभिरेति सूर्य इति हि वेदत्रयेण गतिराम्नाता। द्वे शीर्षे। अहश्च रात्रिश्चेति द्वे शिरसी। सप्त हस्तासो अस्य। सप्त रश्मयः षड्विलक्षणा ऋतव एकः साधारण इति वा सप्त हस्ता भवंति। त्रिधा बद्धस्त्रिषु स्थानेषु क्षित्यादिष्वग्न्याद्यात्मकत्वेन संबद्धः। ग्रीष्मवर्षाहेमंताख्यैस्त्रिभिस्त्रेधा बद्धो वा। वृषभो वर्षिता रोरवीति। शब्दं करोति वृष्ट्यादिद्वारा। स महो महान् देवो मर्त्यानाविवेश तन्नियंतृतया। सूर्य आत्मा जगतस्तस्थुषश्च। ऋग्वे० १. ११५. १.। इति हि श्रुतं। एवं त्वष्ट्रादिपक्षेऽपि योज्यं। शाब्दिकास्तु शब्दब्रह्मपरतया चत्वारि शृंगेति चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चेत्यादिना व्याचक्षते। अपरे त्वपरथा। तत्सर्वमत्र द्रष्टव्यं ॥

॥ अथ चतुर्थी ॥

त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविंदन्।
इंद्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः ॥४॥

त्रिधा। हितं। पणिऽभिः। गुह्यमानं। गवि। देवासः। घृतं। अनु। अविंदन्।
इंद्रः। एकं। सूर्यः। एकं। जजान। वेनात्। एकं। स्वधया। निः। ततक्षुः ॥४॥

पणिभिरसुरैर्गवि गोषु त्रिधा क्षीरदध्याज्यभेदेन त्रिप्रकारं हितं निहितं गुह्यमानं गोपितं घृतं दीप्तं रसरूपं वा द्रव्यं देवासो देवा अन्वविंदन्। अलभंत। तत्रेंद्र एकं क्षीरं जजान। उदपादयत्। सूर्य एकं जजान। वेनात्कांतिमतोऽग्नेर्गमनवतो वायोर्वैकं घृतं स्वधयान्नेन निमित्तेन द्रव्येण वा साधनेन निष्टतक्षुः। निरपादयन् देवाः ॥

॥ अथ पंचमी ॥

एता अर्षंति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसां ॥५॥
एताः। अर्षंति। हृद्यात्। समुद्रात्। शतऽव्रजाः। रिपुणा। न। अवऽचक्षे।
घृतस्य। धाराः। अभि। चाकशीमि। हिरण्ययः। वेतसः। मध्ये। आसां ॥५॥

एता आपो घृतधारा वार्षंति। अधः पतंति। शतव्रजा अपरिमितगतयः सत्यो हृद्याद्धृदयंगमात्समुद्रादंतरिक्षाद्रिपुणा जलमोक्षप्रतिबंधकारिणा शत्रुणा वृत्रेण नावचक्षे न अवदर्शनाय यथाहष्टं भवति तथार्षंति। ता घृतस्य धारा अभिचाकशीमि। अभिपश्यामि। कुत्रेति तदुच्यते। हिरण्ययो हिरण्मयो वेतसोऽप्संभवोऽग्निर्वैद्युत आसामपां मध्ये वर्तत इति शेषः। अत्र घृतस्य धारा अभिचाकशीमीति। अनेन चरमपादेन होमाधारोऽग्निर्वैद्युतोऽग्निरादित्यो वोक्तः ॥

॥ इति तृतीयस्याष्टमे दशमो वर्गः ॥

॥ अथ षष्ठी ॥

सम्यक्स्रवंति सरितो न धेना अंतर्हृदा मनसा पूयमानाः।
एते अर्षंत्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥६॥
सम्यक्। स्रवंति। सरितः। न। धेनाः। अंतः। हृदा। मनसा। पूयमानाः।
एते। अर्षंति। ऊर्मयः। घृतस्य। मृगाःऽइव। क्षिपणोः। ईषमाणाः ॥६॥

अस्याग्नेरुपरि सम्यक् स्रवंति क्षरंति घृतस्य धाराः। किमिव। सरितो न

धेनाः प्रीणयित्र्यो नद्य इव। अंतर्हृदा मनसा हृदयमध्यगतेन चित्तेन। भावमात्रविवेकेनेति यावत्। तेन पूयमानाः शुद्धीकृताः। तदेवोच्यते। एते घृतस्योर्मयो रसा अर्षंति। गच्छंति। जुह्वाः सकाशादग्नेरुपरि पतंति। किमिव। क्षिपणोः क्षेपकाद्व्याधादीषमाणाः पलायमाना मृगा इव। ते यथा कक्षं प्रविशंति तद्वत्। अनेन शैघ्र्यमुक्तं भवति॥

॥ अथ सप्तमी ॥

सिंधोरिव प्राध्वने शूघनासो वातप्रमियः पतयंति यह्वाः।

घृतस्य धारा अरुषो न वाजी काष्ठा भिंदन्नूर्मिभिः पिन्वमानः॥७॥

सिंधोःऽइव। प्रऽअध्वने। शूघनासः। वातऽप्रमियः। पतयंति। यह्वाः।

घृतस्य। धाराः। अरुषः। न। वाजी। काष्ठाः। भिंदन्। ऊर्मिभिः। पिन्वमानः॥७॥

सिंधोः स्यंदमानाया नद्याः सकाशादिवोदकानीव प्राध्वने प्रवणवति देशे शूघनास आशुगंत्र्यः। आशु इति च शु इति च क्षिप्रनामनी भवत इति निरुक्तं। वातप्रमियो वायुवत्प्रकृष्टवेगा यह्वा महत्यो घृतस्य धाराः पतयंति। गच्छंत्यग्नेरुपरि। घृतमुदकमिति पक्षे सिंधोरिवेत्यत्रेवशब्दोऽनर्थकः। स्यंदनसाधनादंतरिक्षादुक्तलक्षणा घृतधारा उदकधाराः पतयंति। गच्छंति भूमौ। किंच घृतसंस्त्यायः काष्ठा मर्यादाभूतान्परिधीन्भिंदन्नूर्मिभी रसैः पिन्वमानो वर्धमानो भवति। उदकमिति पक्षे काष्ठाः क्रांत्वा स्थिता दिशो भिंदन्नूर्मिभिस्तरंगैः पिन्वमानो भवति। तत्र दृष्टांतः। अरुषो न वाजी आरोचमानो गर्वेण गमनशीलोऽश्व इव। स यथा भिंदन्पिन्वमानश्च भवति तद्वत्॥

॥ अथाष्टमी ॥

अभि प्रवंत समनेव योषाः कल्याण्य१ः स्मयमानासो अग्निं।

घृतस्य धाराः समिधो नसंत ता जुषाणो हर्यति जातवेदाः॥८॥

अभि। प्रवंत। समनाऽइव। योषाः। कल्याण्यः। स्मयमानासः। अग्निं।

घृतस्य। धाराः। संऽइधः। नसंत। ताः। जुषाणः। हर्यति। जातऽवेदाः॥८॥

घृतस्य धारा अमुमग्निं समनेव समानमनस्का योषा योषितः पतिमिवाभिप्रवंत। अभिनमयंति। निमग्नं कुर्वंति। कीदृश्यस्ताः। कल्याण्यो भद्ररूपाः

स्मयमानासो हसंत्यः । किंच ताः समिधः सम्यग्दीपयित्र्यः सत्यो नसंत । व्याप्नुवंति । ता एव धारा जुषाणः प्रीयमाणः सेवमानो वायं जातवेदा हर्यति । कामयते । घृतशब्दस्योदकमिति पक्षेऽग्निर्जातवेदःशब्दाभ्यां वैद्युतोऽग्निरादित्यो वा गृह्यते । तं देवमुदकधारा अभिप्रवंत नसंत च । स ताश्च हर्यति ॥

॥ अथ नवमी ॥

कन्या इव वहतुमेतवा उ अंज्यंजाना अभि चाकशीमि ।

यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवंते ॥९॥

कन्याःऽइव । वहतुं । एतवै । ऊं इति । अंजि । अंजानाः । अभि । चाकशीमि ।

यत्र । सोमः । सूयते । यत्र । यज्ञः । घृतस्य । धाराः । अभि । तत् । पवंते ॥९॥

कन्या इवानूढा बालिका इव । ता यथा वहतुमुद्वाहं प्राप्तुमेतवा उ एतुं पतिं गंतुमंज्यंजकमाभरणं तेजो वांजाना व्यंजयंत्यः । एवंकुर्वत्यः कन्या इव स्वभर्तृभूतमाध्वरं वैद्युतं वाग्निमादित्यं वा वहतुमेतुमंजि व्यंजकं तदीयं रूपमंजाना व्यंजयंतीर्घृतस्य धारा अभिचाकशीमि । अभिपश्यामि । घृतेनोदकेन च भौमस्य वैद्युतस्य चाग्नेः प्रज्वलनं प्रसिद्धं । किंच ता धाराः सोमः सूयते यत्र यत्र वेतरो यज्ञस्तायते तत्तं यज्ञमभिलक्ष्य पवंते । गच्छंति खलु ॥

॥ अथ दशमी ॥

अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।

इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवंते ॥१०॥

अभि । अर्षत । सुऽस्तुतिं । गव्यं । आजिं । अस्मासु । भद्रा । द्रविणानि । धत्त ।

इमं । यज्ञं । नयत । देवता । नः । घृतस्य । धाराः । मधुऽमत् । पवंते ॥१०॥

हे मदीया ऋत्विजो गव्यं गोसमूहरूपं गोसंबंधिनं वाजिं संघातमभ्यर्षत । अभिगच्छत । अभिगमयत वा सुष्टुतिं शोभनां स्तुतिं । अत्र गोशब्देनोदकानि गावो वोच्यंते । तत्संघातोऽभिप्रेतः । अस्मासु यजमानेषु भद्रा स्तुत्यानि द्रविणानि धत्त । धारयत । स्तुत्या खलु फलं लप्स्यते । किंच नोऽस्मदीयमिमं यज्ञं देवता अत्र यष्टव्यान्देवान्नयत । प्रापयत । घृतस्य धारा मधुमद्यथा तथा पवंते । गच्छंति ॥

धामन् त इत्येषोत्तरसूक्तस्याद्या चाध्यायोत्सर्जनोपाकरणयोर्विनियुक्ते। धामन् ते विश्वमिति प्रतीकमुक्त्वा तदंते तृचाः। आ० गृ० ३.५.। इति सूत्रितत्वात् ॥

॥ सैषैकादशी ॥

धामन्ते विश्वं भुवनमधि श्रितमंतः समुद्रे हृद्यं१तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमंतं त ऊर्मिं ॥११॥

धामन्। ते। विश्वं। भुवनं। अधि। श्रितं। अंतरिति। समुद्रे। हृदि। अंतः। आयुषि। अपां। अनीके। संऽइथे। यः। आऽभृतः। तं। अश्याम। मधुऽमंतं। ते। ऊर्मिं ॥११॥

ते त्वदीये धामन्धामनि तेजःस्थाने विश्वं भुवनमधिश्रितं। अंतः समुद्रे वडवाग्नित्वेन हृद्यंतः सर्वप्राणिनां हृदये वैश्वानरत्वेनायुष्यन्ने सर्वप्राण्याहारत्वेन। यद्वा आयुषीत्येतद्धृद्विशेषणं। जठराग्निना खल्वायुर्धार्यते। अपामनीक उदकसंस्त्याये वैद्युताग्नित्वेन समिथे संग्रामे च शौर्याग्निरूपेण। एवं सर्वेषु स्थानेषु वर्तमानं धाम। तस्मिन्धामनि य ऊर्मिर्घृतरूप उदकरूपो वा रस आभृतः स्थापितः ते त्वदीयं तं रसं मधुमंतं माधुर्योपेतमश्याम। व्याप्नुयाम ॥

॥ इति तृतीयस्याष्टम एकादशो वर्गः ॥

इत्थं श्रीबुक्कभूपालसाम्राज्यैकधुरंधरः ।
विद्यातीर्थगुरोर्दृष्ट्या प्राप्तसार्वज्ञ्यवैभवः ॥
श्रीमत्सायणमंत्रीशः सकलागमतत्त्ववित् ।
दाशतय्यां माधवीये वेदार्थस्य प्रकाशने ॥
चतुर्थं मंडलं सम्यक् वामदेवेन वीक्षितं ।
अष्टोत्तरैस्तु पंचाशत्सूक्तैः पंच शतैरपि ॥
एकोनया नवत्या च युक्तैर्मंत्रैश्च संमितं ।
व्याकार्षीत्सुखबोधार्थं पश्यतैतद्विमत्सराः ॥

॥ इति चतुर्थं मंडलं समाप्तं ॥

॥ अथ पंचमं मंडलं ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

आत्रेये पंचमे मंडले षडनुवाकाः। तत्र प्रथमेऽनुवाके चतुर्दश सूक्तानि। तत्राबोध्यग्निरिति द्वादशर्चं प्रथमं सूक्तं। अत्रेयमनुक्रमणिका। अबोधि द्वादश बुधगविष्ठिराविति। पंचमे मंडलेऽनुक्तगोत्रमात्रेयं विद्यादिति परिभाषितत्वादात्रेयौ बुधगविष्ठिरावृषी। अनादेशपरिभाषया त्रिष्टुप्। मंडलादिपरिभाषयाग्निर्देवता॥ आग्नेये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चैतदादिचत्वारि सूक्तानि। तथा सूचितं च। अबोध्यग्निः समिधेति चत्वारि। आ० ४.१३.। इति॥ अध्यायोत्सर्जनोपाकरणयोर्धामन्ते विश्वमिति द्वृचत्वेन विनियोग उक्तः॥

॥ तत्र प्रथमा ॥

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासं।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥१॥
अबोधि। अग्निः। सम्ऽइधा। जनानां। प्रति। धेनुम्ऽइव। आऽयतीं। उषसं।
यह्वाःऽइव। प्र। वयां। उत्ऽजिहानाः। प्र। भानवः। सिस्रते। नाकं। अच्छ ॥१॥

अयमग्निर्जनानामध्वर्य्वादीनां समिधा समिद्भिरबोधि। प्रबुद्धोऽभूत्। धेनुमिव। अग्निहोत्रार्थधेनुं प्रति यथा प्रातर्बुध्यते तद्वदायतीमागच्छंतीमुषसं प्रति। उषःकाल इत्यर्थः। अथ प्रबुद्धस्याग्नेर्भानवो ज्वाला यह्वा महांतो वयां शाखां प्रोज्जिहानाः प्रोन्नमयंतो वृक्षा इव प्रोज्जिहानाः स्वाधिष्ठानं त्यजंतो नाकमंतरिक्षमच्छाभिमुख्येन प्रसिस्रते। प्रसरंति॥

॥ अथ द्वितीया ॥

अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात्।
समिद्धस्य रुशदर्शि पाजो महान्देवस्तमसो निरमोचि ॥२॥

अबोधि। होता। यजथाय। देवान्। ऊर्ध्वः। अग्निः। सुऽमनाः। प्रातः। अस्थात्।
संऽइद्धस्य। रुशत्। अदर्शि। पाजः। महान्। देवः। तमसः। निः। अमोचि ॥२॥

अयं होता होमनिष्पादकोऽग्निर्देवान्यष्टव्यान्यजथाय यष्टुमबोधि। बुध्यते। सोऽग्निः प्रातःकाले सुमनाः शोभनमनस्को यजमानानुग्रहबुद्धिः सन् ऊर्ध्वोऽस्थात्। उत्तिष्ठति। समिद्धस्यास्य रुशद्रोचमानं पाजो बलं ज्वालालक्षणमदर्शि। दृश्यते। अथ तथाभूतो महान्देवस्तमसोऽंधकारान्निरमोचि। निर्मुक्तोऽभूत् ॥

॥ अथ तृतीया ॥

यदीं गणस्य रशनामजीगः शुचिरंक्ते शुचिभिर्गोभिरग्निः।
आद्दक्षिणा युज्यते वाजयंत्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥३॥

यत्। ईं। गणस्य। रशनां। अजीगरिति। शुचिः। अंक्ते। शुचिऽभिः। गोभिः। अग्निः।
आत्। दक्षिणा। युज्यते। वाजऽयंती। उत्तानां। ऊर्ध्वः। अधयत्। जुहूभिः ॥३॥

यद्यदेमयमग्निर्गणस्य संघात्मकस्य जगतो रशनां रज्जुरिव व्यापारप्रतिबंधकं तमोऽजीगर्गिरति गृह्णाति वा। समिद्धो भवतीत्यर्थः। तदा शुचिर्दीप्तोऽग्निः शुचिभिर्गोभिर्दीप्तै रश्मिभिरंक्ते। व्यनक्ति विश्वं जगत्। आदनंतरमेव दक्षिणा प्रवृद्धा वाजयंत्यन्नमिच्छंत्याज्यधारा युज्यते। युक्ता भवति। अथवा दक्षिणा प्रवृद्धाज्यधारा युज्यते। तां च धारामुत्तानामूर्ध्वतानामुपरि विस्तृतामूर्ध्व उन्नतः सन् जुहूभिरधयत्। पिबति ॥

॥ अथ चतुर्थी ॥

अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं चरंति।
यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नां ॥४॥

अग्निं। अच्छ। देवऽयतां। मनांसि। चक्षूंषिऽइव। सूर्ये। सं। चरंति।
यत्। ईं। सुवाते इति। उषसा। विरूपे इति विऽरूपे। श्वेतः। वाजी। जायते।
अग्रे। अह्नां ॥४॥

अग्निं देवमच्छाभिमुख्येन देवयतां देवानात्मन इच्छतां यजमानानां मनांसि संचरंति। देवा यष्टव्यास्तदर्थं कदायं वर्धिष्यतीति ध्यायंतीत्यर्थः। चक्षूंषीव सर्वेषां प्राणिनां यथा सूर्ये संचरंति तद्वत्। यद्यदेमेनमग्निमुषसा सह विरूपे द्यावापृ-

धिष्णी सुवाते जनयतः तदानीं श्वेतः प्रकृष्टवर्णोपेतो वाजी वेजनवानग्निरह्नामग्र उदयकाले जायते। प्रवर्धत इत्यर्थः ॥

॥ अथ पंचमी ॥

जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो वनेषु।

दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् ॥५॥

जनिष्ट। हि। जेन्यः। अग्रे। अह्नां। हितः। हितेषु। अरुषः। वनेषु।

दमेऽदमे। सप्त। रत्ना। दधानः। अग्निः। होता। नि। ससाद। यजीयान् ॥५॥

अयमग्निर्जेन्य उत्पादनीयोऽह्नामग्र उदयकाले जनिष्ट। प्रादुरभूत्। पश्चात् हितेषु वनेषु वनोत्थेषु काष्ठेष्वरुष आरोचमानः सन् हितः। स्थापितः। पश्चाद्दमे दमे तत्तद्यागगृहे सप्त रत्ना रमणीयाः सप्त ज्वाला दधानो धारयमाणः। अथवा यजमानेभ्यः सप्तविधानि रत्नानि दधानोऽग्निर्होता होमनिष्पादकः सन् यजीयान्यष्टव्यः सन् निषसाद। निषण्णो भवति ॥

जीवति यजमाने मृत इति शब्दो यदि स्यात्तदानीं सुरभिमतीष्टिः कार्या। तत्रेयमनुवाक्या। सूचितं च। अग्निर्होता न्यसीदद्यजीयान्त्साध्वीमकर्देववीतिं नो अद्य। ऐ० ब्रा० ७. ९.। इति ॥

॥ सैषा षष्ठी ॥

अग्निर्होता न्यसीदद्यजीयानुपस्थे मातुः सुरभा उ लोके।

युवा कविः पुरुनिःष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ॥६॥

अग्निः। होता। नि। असीदत्। यजीयान्। उपऽस्थे। मातुः। सुरभौ। ऊं इति। लोके।

युवा। कविः। पुरुनिःऽस्थः। ऋतऽवा। धर्ता। कृष्टीनां। उत। मध्ये। इद्धः ॥६॥

अयमग्निर्होता होमनिष्पादकः सन् यजीयान्यष्टव्यश्च सन् न्यसीदत्। निषसाद। कुत्रेति तदुच्यते। मातुः सर्वस्य निर्मातुर्भूम्या उपस्थ उत्संगे तत्रापि सुरभावाज्यादिसौरभ्ययुक्ते लोके सर्वैर्द्रष्टव्ये स्थाने वेदिलक्षणे। उतापि च युवा नित्यतरुणः सर्वत्र मिश्रितो वा कविर्मेधावी पुरुनिःष्ठो बहुस्थान ऋतावा यज्ञवान्धर्ता सर्वस्य धारक एवंभूतः सन् कृष्टीनामृत्विग्यजमानानां मध्य इद्धः समिद्धः सन् वर्तत इति शेषः ॥

॥ इति तृतीयस्याष्टमे द्वादशो वर्गः ॥

॥ अथ सप्तमी ॥

प्र णु त्यं विप्रमध्वरेषु साधुमग्निं होतारमीळते नमोभिः ।
आ यस्ततान रोदसी ऋतेन नित्यं मृजंति वाजिनं घृतेन ॥७॥
प्र । नु । त्यं । विप्रं । अध्वरेषु । साधुं । अग्निं । होतारं । ईळते । नमःऽभिः ।
आ । यः । ततान । रोदसी इति । ऋतेन । नित्यं । मृजंति । वाजिनं । घृतेन ॥७॥

त्यं तमग्निं नमोभिः स्तुतिभिर्नु क्षिप्रमीळते । स्तुवंति । कीदृशं तं । विप्रं मेधाविनमध्वरेषु साधुं फलसाधकं होतारं होमनिष्पादकं । यो देवो रोदसी द्यावापृथिव्यावृतेनोदकेनाततान विस्तारितवान् । अग्नौ प्रास्ताहुतेरादित्यद्वारा वृष्ट्युत्पादकत्वात् । अथवा ऋतेन सत्यभूतेन हविषा दिवं तथाभूतेन वृष्ट्यादिफलेन भुवं चाततान । वाजिनमन्नवंतं देवं यजमाना नित्यं घृतेनोदकेनाज्येन वा मृजंति । परिचरंति ॥

॥ अथाष्टमी ॥

मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः ।
सहस्रशृंगो वृषभस्तदोजा विश्वाँ अग्ने सहसा प्रास्यन्यान् ॥८॥
मार्जाल्यः । मृज्यते । स्वे । दमूनाः । कविऽप्रशस्तः । अतिथिः । शिवः । नः ।
सहस्रऽशृंगः । वृषभः । तत्ऽओजाः । विश्वान् । अग्ने । सहसा । प्र । असि । अन्यान् ॥८॥

मार्जाल्यः संमार्जनीयोऽयमग्निर्मृज्यते परिचर्यते स्वे स्वकीये स्थाने । कीदृशोऽयं । दमूना दानमना दांतमना वा कविप्रशस्तः कविभिर्मेधाविभिः प्रशस्तः प्रकर्षेण स्तुत्यो नोऽस्माकमतिथिरतिथिवत्पूज्यः शिवः सुखकरश्च । सहस्रशृंगोऽपरिमितज्वालो वृषभो वर्षिता फलानां तदोजाः । यत्प्रसिद्धं बलं तेजो वास्ति तदेवौजो यस्य तादृशः । सर्वबलस्वरूप इत्यर्थः । अथ प्रत्यक्षवादः । हे अग्ने विश्वानन्यान् स्वव्यतिरिक्तान् सर्वान् सहसा बलेन प्रासि । प्रेति परेत्यर्थे । पराभवसि । व्याप्तुं वा प्रभवसि ॥

॥ अथ नवमी ॥

प्र सद्यो अग्ने अत्येष्यन्यानाविर्यस्मै चारुतमो बभूथ ।
ईळेन्यो वपुष्यो विभावा प्रियो विशामतिथिर्मानुषीणां ॥९॥

प्र। सद्यः। अग्ने। अति। एषि। अन्यान्। आविः। यस्मै। चारुऽतमः। बभूथ।
ईळेन्यः। वपुष्यः। विभाऽवा। प्रियः। विशां। अतिथिः। मानुषीणां ॥ ९ ॥

हे अग्ने त्वं यज्ञमासाद्य सद्यस्तदानीमेवान्यान् स्वसमानानत्येषि। अतिक्रामसि। यस्मै चारुतमः सन्नाविर्बभूथ। किंच त्वमीळेन्यः स्तुत्यो वपुष्यो वपुष्करो दीप्तिकरो वा विभावा विशिष्टदीप्तिमान् प्रियः प्रियभूतो विशां सर्वेषां प्राणिनां तथातिथिः पूज्यो मानुषीणां प्रजानां भवसि ॥

॥ अथ दशमी ॥

तुभ्यं भरंति क्षितयो यविष्ठ बलिमग्ने अंतित ओत दूरात्।
आ भंदिष्ठस्य सुमतिं चिकिद्धि बृहत्ते अग्ने महि शर्म भद्रं ॥ १० ॥

तुभ्यं। भरंति। क्षितयः। यविष्ठ। बलिं। अग्ने। अंतितः। आ। उत। दूरात्।
आ। भंदिष्ठस्य। सुऽमतिं। चिकिद्धि। बृहत्। ते। अग्ने। महि। शर्म। भद्रं ॥ १० ॥

हे यविष्ठ युवतमाग्ने तुभ्यं क्षितयो मनुष्या भरंति। संपादयंति। किं। बलिं पूजां हविर्लक्षणामंतितोऽतिकादुतापि च दूरात्। आ इति चार्थे। किंच भंदिष्ठस्यातिशयेन स्तोतुः सुमतिं स्तुतिमाचिकिद्धि। आजानीहि। हे अग्ने ते तव शर्म सुखमस्मभ्यं दातव्यं बृहन्महद्भद्रं स्तुत्यं च ॥

॥ अथैकादशी ॥

आद्य रथं भानुमो भानुमंतमग्ने तिष्ठ यजतेभिः समंतं।
विद्वान्पथीनामुर्वं१तरिक्षमेह देवान्हविरद्याय वक्षि ॥ ११ ॥

आ। अद्य। रथं। भानुऽमः। भानुऽमंतं। अग्ने। तिष्ठ। यजतेभिः। संऽअंतं।
विद्वान्। पथीनां। उरु। अंतरिक्षं। आ। इह। देवान्। हविःऽअद्याय। वक्षि ॥ ११ ॥

हे भानुमो दीप्तिमन्नग्ने अद्यास्मिन्यागदिने भानुमंतं दीप्तिमंतं समंतं समीचीनप्रांतोपेतं रथं यजतेभिर्यष्टव्यैर्देवैः सहातिष्ठ। आरोह। विद्वान्यष्टव्यदेवपरिज्ञानवांस्त्वं पथीनां देवयजनमार्गान्प्रति। द्वितीयार्थे षष्ठी। उर्वंतरिक्षं प्रभूतेऽंतरिक्षे देवान्यष्टव्यान्हविरद्याय हविर्भक्षणायेहावक्षि। आवहसि ॥

॥ अथ द्वादशी ॥

अवोचाम कवये मेध्याय वचो वंदारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यंचमश्रेत् ॥१२॥

अवोचाम । कवये । मेध्याय । वचः । वंदारु । वृषभाय । वृष्णे ।
गविष्ठिरः । नमसा । स्तोमं । अग्नौ । दिविऽइव । रुक्मं । उरुऽव्यंचं । अश्रेत् ॥१२॥

वयमात्रेयाः कवये मेधाविने मेध्याय मेधार्हाय वृषभाय वर्षकाय फलानां वृष्णे सेक्त्रे यूने वंदारु वंदनशीलं वचः स्तोत्रमवोचाम । अथ ऋषिरात्मानं परोक्षेणैव निर्दिश्य स्तुतिमुपसंहरति । गविष्ठिरोऽयमृषिर्नमसा नमस्कारेण हविषा वा युक्तं स्तोमं स्तोत्रमग्नावश्रेत् । श्रयति स्म । दिवि रुक्मं रोचमानमुरुव्यंचमुरुगमनमादित्यमिव ॥

॥ इति तृतीयस्याष्टमे त्रयोदशो वर्गः ॥

कुमारं मातेति द्वादशर्चं द्वितीयं सूक्तं । अत्रेः पुत्रः कुमार ऋषिर्जरनाम्नः पुत्रो वृशो वोभौ वाच ऋषी । कमेतं त्वं वि ज्योतिषेत्यनयोस्तु वृश एव नोभौ न कुमारः । अंत्या षट्पंचाशदक्षरा शक्वरी शिष्टास्त्रिष्टुभः । अग्निर्देवता । अत्रानुक्रमणिका । कुमारं कुमारो वृशो वा जार उभौ वा शक्वर्यंतं कं वीत्यृचोस्तु वृश एवेति ॥ प्रातरनुवाकाश्विनशस्त्रयोरस्यापि सूक्तस्य विनियोग उक्तः पूर्वसूक्तेन सह ॥

॥ तत्र प्रथमा ॥

कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे ।
अनीकमस्य न मिनज्जनासः पुरः पश्यंति निहितमरतौ ॥१॥

कुमारं । माता । युवतिः । संऽउब्धं । गुहा । बिभर्ति । न । ददाति । पित्रे ।
अनीकं । अस्य । न । मिनत् । जनासः । पुरः । पश्यंति । निऽहितं । अरतौ ॥१॥

शाट्यायनब्राह्मणोक्त इतिहास इहोच्यते । राजा त्रैवृष्ण इक्ष्वाकुस्त्र्यरुणोऽभवदस्य च ॥ पुरोहितो वृशो जार ऋषिरासीत्तदा खलु । संगृह्णंति रथानाञ्ज्ञां रक्षणाय पुरोहिताः ॥ त्र्यरुणस्य वृशो रश्मिं संजयाह पुरोहितः । कुमारो वर्त्मनि क्रीडन्रथचक्रेण घातितः ॥ छिन्नः कुमारश्चक्रेण ममाराथ पुरोहितः । त्वं हंतास्येति

राजानं राजा चापि पुरोहितं ॥ त्वं हंतास्य कुमारस्य नाहमित्यब्रवीत्तदा । यतस्त्वं रथवेगस्य नियंतातस्त्वया हतः ॥ रथस्वामी यतो राजन् तस्मात्त्वं तस्य घातकः । एवं विवदमानौ ताविक्ष्वाकून्प्रष्टुमागतौ ॥ तौ पप्रच्छतुरिक्ष्वाकून् केनासौ निहतो द्विजाः । तेऽब्रुवन्नथयंतारं हंतारं वृशसंज्ञकं ॥ स वृशो वार्शसाम्ना तं कुमारं समजीवयत् । एवमाख्याय तत्रैव पुनरन्यदुदीरितं ॥ यत इक्ष्वाकवो रागाद्धंतारमृषिमब्रुवन् । तस्मात्तेषां गृहेष्वग्नेस्तेजो निर्गतमेषु च ॥ गृहे पाकादयो नासन् तत्कारणमचिंतयन् । वृशं कुमारहंतारं यदवोचाम तेन नः ॥ अपाक्रमद्धरो वह्नेराह्वयाम वृशं वयं । इति संचिंत्य तमृषिमाह्वयामासुरादरात् ॥ समागत्य ततः शीघ्रं तेषामग्नेर्हरो भवेत् । इति वार्शेन साम्नासावकामयत पूर्ववत् ॥ एवं गायन् स ऋषिर्ब्रह्महत्यां भार्याजातां त्रसदस्योर्नृपस्य । पिशाचवेषां हर आदाय चाग्नेर्गृहान्नीत्वा कशिपौ स्थापयंती ॥ दृष्ट्वा सम्यक् तद्धरस्तोषयित्वा साम्ना पश्चाद्योजयामास चाग्निं । ततः सतेजाः संजातोऽभवत्पाकादिः पूर्ववत् ॥ एवं शाट्यायनेनोक्तं तांडकोक्तमथोच्यते । वृशः पुरोधा अभवत्त्रसदस्योर्महीपतेः ॥ स रथं धावयन्राजा ब्राह्मणस्य कुमारकं । चिच्छेद रथचक्रेण प्रमादात्सोऽब्रवीद्वृशं ॥ पुरोहिते वर्तमाने त्वयि मां हंति रागता । एषा त्वयापनेतव्या ऋषिमित्यब्रवीन्नृपः ॥ स ऋषिर्वार्शसाम्ना तं कुमारमुदजीवयत् ॥

माता कुमारस्योत्पादयित्री युवतिर्यौवनोपेता कुमारं पथि संचरंतं समुब्धं चक्रेण हतं गुहा गुहायां बिभर्ति । धारयति । न ददाति पित्रे तस्य जनकाय । यद्वा माता सर्वस्य निर्मात्री पृथिवी समुब्धं सम्यक् निगूढं गुहा बिभर्ति । न ददाति पित्रे । अस्यानीकं रूपं मिनत् हिंसितं जनासो जना न पश्यंति । किंतु अरतावरमणे देशे निहितं स्थितं पुरः पुरोदेशे पश्यंति । अथवायं वृशेन पुनरुज्जीवितः कुमार आत्मानमपरोक्षतया वक्ति कथयति । जारो वा तं जीवयित्वा वक्ति । अथवा सूक्तस्याग्नेयत्वात्कुमार इत्यग्निरुच्यते । तं मातारणिर्युवतिर्मिथ्नयंती समुब्धं निगूढं गुहायां बिभर्ति । पित्र उत्पादकाय यजमानाय न ददाति । अस्याग्नेर्मिनत् हिंसत् दाहकमनीकं तेजो जना न पश्यंति । किंतु अरतावरण्यां हितं पश्यंति ॥

॥ अथ द्वितीया ॥

कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान ।
पूर्वीर्हि गर्भः शरदो ववर्धापश्यं जातं यदसूत माता ॥२॥

कं। एतं। त्वं। युवते। कुमारं। पेषी। बिभर्षि। महिषी। जजान।
पूर्वीः। हि। गर्भः। शरदः। ववर्ध। अपश्यं। जातं। यत्। असूत। माता ॥२॥

अत्राग्नेरुत्पाद्यमानत्वात्कुमारशब्देन व्यवहारः। हे युवते त्वं कमेतं कुमारं पेषी हिंसिका पिशाचिका सती बिभर्षि। एवं वृशाख्यो महर्षिः कशिपुनाच्छन्नमग्नेर्हरो ब्रूते। त्वयानुत्पादितत्वाद्धारणमनुचितमित्यर्थः। महिषी महती पूजनीयारणिरेनं जजान। अजनयत्। तदेवाह। गर्भः शिशोर्ग्राहकोऽरण्याः संबंधी गर्भो हि यस्मात्पूर्वीः शरदो गताननेकान् संवत्सरान्ववर्ध ववृधे। अहं च ततो जातमपश्यं। यद्यस्मान्मातारणिरसूत उदपादयत्। राजकुमारपक्षे हे युवते भूदेवि कमेतं कुमारं पेषी सती बिभर्षि। अवशिष्टं कुमारजननपरतया योज्यं। एवमुत्तरत्रापि कुमाराग्निहरसोः परत्वेन यथोचितं व्याख्येयं ॥

॥ अथ तृतीया ॥

हिरण्यदंतं शुचिवर्णमारात्क्षेत्रादपश्यमायुधा मिमानं।
ददानो अस्मा अमृतं विपृक्वत्किं मामनिंद्राः कृणवन्ननुक्थाः ॥३॥
हिरण्यऽदंतं। शुचिऽवर्णं। आरात्। क्षेत्रात्। अपश्यं। आयुधा। मिमानं।
ददानः। अस्मै। अमृतं। विपृक्वत्। किं। मां। अनिंद्राः। कृणवन्। अनुक्थाः ॥३॥

हिरण्यदंतं हिरण्यसदृशदंतस्थानीयज्वालोपेतं शुचिवर्णं प्रदीप्तवर्णमायुधायुधान्यायुधस्थानीयान् स्फुलिंगान् ज्वाला वा मिमानं निर्मिमाणमग्निमारात्समीपे क्षेत्रात् क्षेत्रे देशेऽपश्यं। पश्येयं। एवं वृशः कामयते। अहमस्मा अग्नयेऽमृतमविनाश्यममृतत्वसाधनं वा विपृक्वत्सर्वतो व्याप्तं हविः स्तोत्रं वा ददानो दातास्मि। मामनिंद्राः। इंद्रः परमैश्वर्योऽग्निः। तद्रहिता अनिंद्राः। इंद्रमयजंत इत्यर्थः। अनुक्था अस्तुतय इंद्रमस्तुवंतश्च किं कृणवन्। किं कुर्युः ॥

॥ अथ चतुर्थी ॥

क्षेत्रादपश्यं सनुतश्चरंतं सुमद्यूथं न पुरु शोभमानं।
न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवंति ॥४॥
क्षेत्रात्। अपश्यं। सनुतरिति। चरंतं। सुऽमत्। यूथं। न। पुरु। शोभमानं।
न। ताः। अगृभ्रन्। अजनिष्ट। हि। सः। पलिक्नीः। इत्। युवतयः। भवंति ॥४॥

अहं वृश इदानीं क्षेपात् क्षेपे सनुतः। अंतर्हितनामैतत्। निधुकं परिमानं रक्षमानं यूथं न गवां समूहमिव सुमत्स्वयमेव पुरु बहु शोभमानमपश्यं। पश्यामि। पुरा हरसः पिशाच्याक्रमणकाले ता ज्वाला निर्वीर्या नागृभन्। नागृह्णंत नरः। इदानीं सोऽग्निरजनिष्ट हि। हरसा प्रादुरभूत्खलु। अत एव हेतोः पलिक्नीरित्पलिक्न्यः पलिता ज्वाला एवेदानीं युवतयो भवंति ॥

॥ अथ पंचमी ॥

के मे मर्यकं वि यवंत गोभिर्न येषां गोपा अरणश्चिदास।

य ईं जगृभुरव ते सृजंत्वाजाति पश्व उप नश्चिकित्वान् ॥ ५ ॥

के। मे। मर्यकं। वि। यवंत। गोभिः। न। येषां। गोपाः। अरणः। चित्। आस।

ये। ईं। जगृभुः। अव। ते। सृजंतु। आ। अजाति। पश्वः। उप। नः। चिकित्वान् ॥ ५ ॥

के मे मदीयं मर्यकं मर्त्यसंघं राष्ट्रं गोभिः सह वियवंत। वियुक्तमकुर्वन्। गा भृत्यांश्च वियोजयन्। येषां गोपा अस्माकं गोपयितारणश्चिदभिगंता नास बभूव सोऽयमग्निः। ये द्वेषिण ईमेनं जनसंघं राष्ट्रं जगृभुः गृह्णंति तेऽवसृजंतु। नश्यंतु। किंच चिकित्वान् चेतनावानस्मद्विषयज्ञानवानग्निर्नोऽस्माकं पश्वः पशूनुपाजाति। उपागच्छति ॥

॥ अथ षष्ठी ॥

वसां राजानं वसतिं जनानामरातयो नि दधुर्मर्त्येषु।

ब्रह्माण्यत्रेरव तं सृजंतु निंदितारो निंद्यासो भवंतु ॥ ६ ॥

वसां। राजानं। वसतिं। जनानां। अरातयः। नि। दधुः। मर्त्येषु।

ब्रह्माणि। अत्रेः। अव। तं। सृजंतु। निंदितारः। निंद्यासः। भवंतु ॥ ६ ॥

वसां वसतां प्राणिनां राजानं स्वामिनं जनानां प्राणिनां वसतिमावासभूतं श्रुरुणमुक्तलक्षणमग्निं वारातयो निदधुः। अगोपयन् मर्त्येषु लोकेषु मध्ये। अत्रेरत्रिगोत्रस्य वृशस्य ब्रह्माणि मंत्राः स्तोत्राणि वा तं कुमारमग्निं वावसृजंतु। अथवात्रेरत्रिगोत्रस्य कुमारं ब्रह्माणि। यद्वा वृशस्य ब्रह्माण्यत्रेरविसृजंतु। कर्मणि षष्ठी। तं कुमारमवसृजंतु। विसृजंतु। निंदितारोऽस्मन्निंदका निंद्यासोऽस्माभिर्निंद्या भवंतु। अत्रेर्ब्रह्माणीत्येतदुपजीव्य वृशमत्र्यपि वृषं

वदंति । [illegible] कुमारं इति षष्ठे स एव प्राणमयमात्मानमवसृजंतीत्याम्नाते ॥

॥ इति तृतीयस्याष्टमे चतुर्दशो वर्गः ॥

अंजःसव आहवनीयोपस्थाने शुनश्चिच्छेपमित्येषा । अग्निमाहवनीयमुपस्थापयांचकार शुनश्चिच्छेपं निदितं सहस्रात् । ऐ० ब्रा० ७. १७. । इति ब्राह्मणं ॥

॥ सैषा सप्तमी ॥

शुनश्चिच्छेपं निदितं सहस्राद्यूपादमुंचो अशमिष्ट हि षः ।

एवास्मदग्ने वि मुमुग्धि पाशान्होतश्चिकित्व इह तू निषद्य ॥७॥

शुनःऽशेपं । चित् । निऽदितं । सहस्रात् । यूपात् । अमुंचः । अशमिष्ट । हि । सः ।

एव । अस्मत् । अग्ने । वि । मुमुग्धि । पाशान् । होतरिति । चिकित्वः । इह । तु । निऽसद्य ॥७॥

हे अग्ने निदितं नितरां बद्धं शुनःशेपमृषिं सहस्रादनेकरूपाद्यूपादमुंचः । अमोचयः । चिदिति पूरणः । शुनःशेपमिति पदस्य मध्ये पदांतरस्य संहितायां व्यत्ययेनावस्थितिः । स ऋषिरशमिष्ट हि । शांतवान् खलु । यद्वा स हि यस्मादशमिष्ट । स्तुतिकर्मैतत् । अस्तावीत् तस्मादमुंच इति संबंधः । एवैवमस्मदस्मत्तः पाशान्विमुमुग्धि विमोचय हे होतर्हे चिकित्वश्चेतनावन्नग्ने इह तु वेद्यां निषद्यावस्थाय ॥

॥ अथाष्टमी ॥

हृणीयमानो अप हि मदैयेः प्र मे देवानां व्रतपा उवाच ।

इंद्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगां ॥८॥

हृणीयमानः । अप । हि । मत् । ऐयेः । प्र । मे । देवानां । व्रतऽपाः । उवाच ।

इंद्रः । विद्वान् । अनु । हि । त्वा । चचक्ष । तेन । अहं । अग्ने । अनुऽशिष्टः । आ । अगां ॥८॥

हे अग्ने हृणीयमानः क्रुध्यंस्त्वं मत् मत्तोऽपैयेर्हि । अपागाः खलु ॥ ई गतावित्यस्मात् श्यन्विकरणाल्लिङि मध्यमे छांदसे परस्मैपद आडागमे वृद्धौ व्यत्ययेन श्यनोऽकारस्य एकारे च कृते रूपं ॥ मे मह्यं देवानां व्रतपाः कर्मणः पालक इंद्रः प्रोवाच हि । स एव विद्वान् त्वानुचचक्ष । त्वां ददर्श । तेनानुशिष्टोऽहं हे अग्ने त्वामागामिति । एवं वृश आह ॥

॥ तत्र नवमी ॥

वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृंगे रक्षसे विनिक्षे ॥९॥

वि । ज्योतिषा । बृहता । भाति । अग्निः । आविः । विश्वानि । कृणुते । महिऽत्वा ।
प्र । अदेवीः । मायाः । सहते । दुःऽएवाः । शिशीते । शृंगे इति । रक्षसे । विऽनिक्षे ॥९॥

अयमग्निर्ज्योतिषा तेजसा बृहता महता वि भाति । विशेषेण दीप्यते । अथ तथाभूतः सन् महित्वा स्वमहत्त्वेन विश्वानि सर्वाणि पदार्थजातान्याविष्कृणुते । प्रकटीकरोति । एवं प्रवृद्धोऽग्निरदेवीरदेवनशीला आसुरीर्माया दुरेवा दुःखगमनाः प्रसहते । अभिभवति । किंच शिशीते तीक्ष्णीकरोति शृंगे शृंगानि । शृंगसदृशीर्हिंसिका वा ज्वालाः शिशीते । तीक्ष्णीकरोति । किमर्थं । रक्षसे विनिक्षे रक्षसो नाशाय । निश्यति शृंगे रक्षसो विनिक्षणनाय । नि॰ ४.१८. । इति यास्कः ॥

॥ अथ दशमी ॥

उत स्वानासो दिवि षंत्वग्नेस्तिग्मायुधा रक्षसे हंतवा उ ।
मदे चिदस्य प्र रुजंति भामा न वरंते परिबाधो अदेवीः ॥१०॥

उत । स्वानासः । दिवि । संतु । अग्नेः । तिग्मऽआयुधाः । रक्षसे । हंतवै । ऊं इति ।
मदे । चित् । अस्य । प्र । रुजंति । भामाः । न । वरंते । परिऽबाधः । अदेवीः ॥१०॥

उतापिचाग्नेः स्वानासः शब्दं कुर्वाणा ज्वाला दिवि षंतु । द्युलोके प्रादुर्भवंतु । किमर्थं तिग्मायुधास्तीक्ष्णायुधस्थानीया ज्वालाः । रक्षसे हंतवा उ रक्षसो हननाय । उ इति पूरणः । मदे चित् हर्षे सत्यस्याग्नेर्भामाः क्रोधा दीप्तयो वा प्र रुजंति । प्रकर्षेण भंगं गच्छंति पीडयंति वा रक्षांसि । परिबाधः परितो बाधिका अदेवीरदेवना आसुर्यः सेना न वरंते । न वारयंत्येनं ॥

॥ अथैकादशी ॥

एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षं ।
यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना जयेम ॥११॥

एतं । ते । स्तोमं । तुविऽजात । विप्रः । रथं । न । धीरः । सुऽअपाः । अतक्षं ।
यदि । इत् । अग्ने । प्रति । त्वं । देव । हर्याः । स्वःऽवतीः । अपः । एन । जयेम ॥११॥

हे तुविजात बहुभावमापन्नाग्ने ते त्वदर्थमेतं स्तोममेतत्स्तोत्रं विप्रो मेधावी स्तोता रथं न रथमिव धीरः स्वपाः शोभनकर्माहमतक्षं। समपादयं। हे अग्ने देव त्वं यदीदेनं स्तोमं प्रतिहर्याः प्रतिकामयेथाः तर्हि स्वर्वतीः स्वरणवतीर्व्याप्तिमतीरप एनेनेन जयेम। प्राप्नुयाम॥

॥ अथ द्वादशी ॥

तुविग्रीवो वृषभो वावृधानोऽशत्र्व१र्यः समजाति वेदः।
इतीममग्निममृता अवोचन्बर्हिष्मते मनवे शर्म यंसद्धविष्मते मनवे शर्म यंसत्॥१२॥
तुविऽग्रीवः। वृषभः। ववृधानः। अशत्रु। अर्यः। सं। अजाति। वेदः।
इति। इमं। अग्निं। अमृताः। अवोचन्। बर्हिष्मते। मनवे। शर्म। यंसत्।
हविष्मते। मनवे। शर्म। यंसत्॥१२॥

तुविग्रीवो बहुज्वालः प्रभूतग्रीवो वा वृषभो वर्षिता कामानां ववृधानो वर्धमानोऽग्निरर्योऽरेर्वेदो धनमशत्रु कंटकं समजाति। संयोजयति। इतीममर्थमग्निममृता अन्ये देवा अवोचन्। यस्मादेवं तस्माद्बर्हिष्मते यागवते मनवे मनुष्याय यजमानाय शर्म सुखं यंसत्। यच्छतु। हविष्मते च शर्म यंसत्॥

॥ इति तृतीयस्याष्टमे पंचदशो वर्गः॥

त्वमग्ने वरुण इति द्वादशर्चं तृतीयं सूक्तमात्रेयस्य वसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयं। त्वमग्ने वसुश्रुत इत्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगोऽबोध्यग्निरित्युक्तः॥

॥ तत्र प्रथमा ॥

त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः।
त्वे विश्वे सहसस्पुत्र देवास्त्वमिंद्रो दाशुषे मर्त्याय॥१॥
त्वं। अग्ने। वरुणः। जायसे। यत्। त्वं। मित्रः। भवसि। यत्। संऽइद्धः।
त्वे इति। विश्वे। सहसः। पुत्र। देवाः। त्वं। इंद्रः। दाशुषे। मर्त्याय॥१॥

हे अग्ने त्वं वरुणस्तमसां वारको राम्यभिमानी देवोऽपि त्वमेव यद्यदा जायसे। किंच त्वं मित्रोऽहरभिमानी देवः प्रमीतेस्त्राता यद्यदा समिद्धः। त्वमुत्पद्यमानः सन् तमो निवारयसि प्रवृद्धः सन् हितकारी भवसीत्यर्थः। त्वे त्वयि विश्वे

सर्वेऽपि देवा वर्तंते । त्वद्दत्तेन हविषा तेषां जीवनात् । ते देवा विश्वतोऽग्निं प्राविशन्निति हि श्रुतेः । हे सहसस्पुत्र बलेन मथ्यमानत्वात् । किंच त्वमिंद्रः स्वामी दाशुषे हविर्दात्रे मर्त्याय यजमानाय ॥

विवाहे चतुर्थ्यामाज्याहुतौ त्वमर्यमेत्येषा । सूत्रितं च । त्वमर्यमा भवसि यत्कनीनामिति विवाहे चतुर्थी । आ० गृ० १. ४. । इति ॥

॥ सैषा द्वितीया ॥

त्वम॑र्य॒मा भ॑वसि॒ यत्क॒नीनां॒ नाम॑ स्वधाव॒न्गुह्यं॑ बिभर्षि ।
अं॒जंति॑ मि॒त्रं सुधि॑तं॒ न गोभि॒र्यद्दंप॑ती॒ सम॑नसा कृ॒णोषि॑ ॥ २ ॥

त्वं । अ॒र्य॒मा । भ॒व॒सि॒ । यत् । क॒नीना॑म् । नाम॑ । स्व॒धा॒ऽव॒न् । गुह्य॑म् । बि॒भ॒र्षि॒ ।
अं॒जंति॑ । मि॒त्रम् । सु॒ऽधि॑तम् । न । गोभिः॑ । यत् । दंप॑ती॒ इति॒ दंऽप॑ती । सऽम॑नसा । कृ॒णोषि॑ ॥ २ ॥

हे अग्ने त्वमर्यमा भवसि । सर्वेषां नियमितासि । यद्यदा कनीनां कन्यकानां संबंध्यसि । किंच हे स्वधावन् हविर्लक्षणान्नवन् गुह्यं गोपनीयं नाम बिभर्षि वैश्वानर इति तन्नाम । सुधितं सुष्ठु निहितं मित्रं न मित्रमिव गोभिः । विकारे प्रकृतिशब्दः । गोविकारैः क्षीरादिभिरंजंति । यद्यस्माद्दंपती जायापती समनसा समानमनस्कौ कृणोषि करोषि ॥

॥ अथ तृतीया ॥

तव॑ श्रि॒ये म॒रुतो॑ मर्जयंत॒ रुद्र॒ यत्ते॒ जनि॑म॒ चारु॑ चि॒त्रम् ।
प॒दं यद्विष्णो॑रुप॒मं नि॒धायि॒ तेन॑ पासि॒ गुह्यं॒ नाम॒ गोना॑म् ॥ ३ ॥

तव॑ । श्रि॒ये । म॒रुतः॑ । म॒र्ज॒यं॒त॒ । रुद्र॑ । यत् । ते॒ । जनि॑म । चारु॑ । चि॒त्रम् ।
प॒दम् । यत् । विष्णोः॑ । उ॒प॒ऽमम् । नि॒ऽधायि॑ । तेन॑ । पा॒सि॒ । गुह्य॑म् । नाम॑ । गोना॑म् ॥ ३ ॥

अनयाग्नेर्माध्यमिकी मूर्तिरुच्यते । हे अग्ने तव श्रिये श्रयणाय मरुतोऽपोऽंतरिक्ष्या मर्जयंत । मार्जयंति । हे रुद्र वृष्ट्या रुद्रवद्वर्धितरग्ने ते तव यज्जनिम जन्म वैद्युतलक्षणं चारु चरणीयं चित्रं चायनीयं च । तत्कथमिति चेदुच्यते । विष्णोर्व्यापनशीलस्य देवस्योपमं गुह्यमगम्यं यत्पदं निधायि । अनेनांतरिक्षमुक्तं । उपमेयमिव विष्णोर्मध्यमं पदं तस्मादांतरिक्षं पश्यंतीति ब्राह्मणं । तेन गोनामुदकानां गुह्यं नाम नामानि पासि । रक्षसि ॥

॥ अथ चतुर्थी ॥

तव श्रिया सुदृशो देव देवाः पुरू दधाना अमृतं सपंत ।
होतारमग्निं मनुषो नि षेदुर्दशस्यंत उशिजः शंसमायोः ॥४॥

तव । श्रिया । सुऽदृशः । देव । देवाः । पुरु । दधानाः । अमृतं । सपंत ।
होतारं । अग्निं । मनुषः । नि । सेदुः । दशस्यंतः । उशिजः । शंसं । आयोः ॥४॥

हे देवाग्ने सुदृशस्तव श्रिया समृद्ध्या देवा इंद्रादयः पुर्वत्यधिकं दधानास्त्वयि प्रीतिं धारयंतोऽमृतं सपंत । स्पृशंति । होतारं होमनिष्पादकमग्निं मनुषो मनुष्या निषेदुः । परिचरंत्यृत्विजः । किं कुर्वंतः । दशस्यंतो हविर्वितरंतः शंसं फलमुशिजः कामयमानस्यायोर्मनुष्यस्य यजमानस्यार्थं ॥

॥ अथ पंचमी ॥

न त्वद्धोता पूर्वो अग्ने यजीयान्न काव्यैः परो अस्ति स्वधावः ।
विशश्च यस्या अतिथिर्भवासि स यज्ञेन वनवद्देव मर्तान् ॥५॥

न । त्वत् । होता । पूर्वः । अग्ने । यजीयान् । न । काव्यैः । परः । अस्ति । स्वधाऽवः ।
विशः । च । यस्याः । अतिथिः । भवासि । सः । यज्ञेन । वनवत् । देव । मर्तान् ॥५॥

हे अग्ने त्वत्त्वत्तोऽन्यो नास्ति होता पूर्वः पूरकः पुराणो वा यजीयान्यष्टा वा । काव्यैः स्तोत्रैः स्तुत्यः परः परस्तात्परस्मिन्नपि काले नास्ति हे देव हे स्वधावोऽन्नवन् यस्या विशः प्रजाया ऋत्विग्रूपाया अतिथिर्भवासि अतिथिवत्पूज्यो भवसि । स यज्ञेन मर्तानस्मद्द्वेष्टॄन् वनवत् । वृश्चति । हिनस्ति । यद्वा मर्तान्परिचारकान्वनवत् । संभजेत् ॥

॥ अथ षष्ठी ॥

वयमग्ने वनुयाम त्वोता वसूयवो हविषा बुध्यमानाः ।
वयं समर्ये विदथेष्वह्नां वयं राया सहसस्पुत्र मर्तान् ॥६॥

वयं । अग्ने । वनुयाम । त्वाऽऊताः । वसुऽयवः । हविषा । बुध्यमानाः ।
वयं । सऽमर्ये । विदथेषु । अह्नां । वयं । राया । सहसः । पुत्र । मर्तान् ॥६॥

हे अग्ने वयं यजमानास्त्वोतास्त्वया रक्षिताः संतो वनुयाम । शत्रून्पीडयाम

संभजेमहि वा धनं । कीदृशा वयं । वसूयवो वसुकामा हविषा त्वां बुध्यमाना बोधयंतो वयं समर्ये समरणे जयेम शत्रूनिति शेषः । विदथेषु यज्ञेषु प्राप्नुयाम बलं। यद्वा वनुयामेत्येतदनुषज्यते। अह्नां सर्वेष्वहःसु। किंच वयं हे सहसस्पुत्र बलस्य पुत्र पालक वाग्ने राया धनेन सह मर्त्यान्पुत्रभृत्यादीन् लभेमहि ॥

॥ इति तृतीयस्याष्टमे षोडशो वर्गः ॥

॥ अथ सप्तमी ॥

यो न॒ आगो॑ अ॒भ्येनो॒ भरा॒त्यधी॒दघ॑म॒घशं॑से दधात ।

ज॒ही चि॑कित्वो अ॒भिश॑स्ति॒मेताम॑ग्ने॒ यो नो॑ म॒र्चय॑ति द्व॒येन॑ ॥७॥

यः । नः । आगः॑ । अ॒भि । एनः॑ । भरा॑ति । अधि॑ । इत् । अ॒घं । अ॒घऽशं॑से । द॒धा॒त॒ ।

ज॒हि । चि॒कि॒त्वः॒ । अ॒भिऽश॑स्तिं । ए॒तां । अग्ने॑ । यः । नः॒ । म॒र्चय॑ति । द्व॒येन॑ ॥७॥

यो मर्त्य आगोऽपराधमेनः पापं च नोऽस्मभ्यमभि भराति अभितः करोति तस्मिन्नघशंसेऽघं पापमधिदधात। ददात्वग्निः। इदिति पूरणः। आगोऽपराधं यो मह्यमिदं करोति तस्मा एवाग्निस्तत्करोत्वित्यर्थः। अथ प्रत्यक्षेणोच्यते। हे अग्ने एतामभिशस्तिं जहि। उत्तरच यच्छब्दश्रवणात्तदानुगुण्येनैनमभिशंसकमिति व्याख्येयं। योऽभिशस्ता नोऽस्मान्द्वयेनोक्तेनागसैनसा वा मर्चयति बाधते तमिति ॥

॥ अथाष्टमी ॥

त्वाम॒स्या व्यु॑षि देव॒ पूर्वे॑ दू॒तं कृ॑ण्वा॒ना अ॑यजंत ह॒व्यैः ।

सं॒स्थे यद॑ग्न॒ ईय॑से रयी॒णां दे॒वो मर्तै॒र्वसु॑भिरि॒ध्यमा॑नः ॥८॥

त्वां । अ॒स्याः । वि॒ऽउषि॑ । दे॒व॒ । पूर्वे॑ । दू॒तं । कृ॒ण्वा॒नाः । अ॒य॒जं॒त॒ । ह॒व्यैः ।

सं॒ऽस्थे । यत् । अ॒ग्ने॒ । ईय॑से । र॒यी॒णां । दे॒वः । मर्तैः॑ । वसु॑ऽभिः । इ॒ध्यमा॑नः ॥८॥

हे अग्ने त्वामस्या रात्रेर्व्युषि । व्युष्टायामुषसीत्यर्थः । पूर्वे पुरातना यजमाना दूतं देवानां प्रेरकं कृण्वानाः कुर्वाणा अयजंत हव्यैर्हविर्भिः साधनै रयीणां हविर्लक्षणानां संस्थे संस्थान आसादने सति हे अग्ने यद्यदेयसे गच्छसि देवो द्योतमानो मर्तैर्मनुष्यैर्ऋत्विग्भिर्वसुभिर्वासकैरिध्यमानः समिध्यमानः सन् ॥

॥ अथ नवमी ॥

अव स्पृधि पितरं योधि विद्वान्पुत्रो यस्ते सहसः सून ऊहे।
कदा चिकित्वो अभि चक्षसे नोऽग्ने कदा ऋतचिद्यातयासे ॥९॥

अव। स्पृधि। पितरं। योधि। विद्वान्। पुत्रः। यः। ते। सहसः। सूनो इति। ऊहे।
कदा। चिकित्वः। अभि। चक्षसे। नः। अग्ने। कदा। ऋतऽचित्। यातयासे ॥९॥

हे सहसः सूनो बलस्य पुत्राग्ने त्वमवस्पृधि। पारय। योधि। पृथक्कुरु पापात्। यः पुत्रः पुत्रस्थानीयस्तव यो यजमानस्ते त्वां पितरं पालकं पितृभूतं विद्वान् जानन् ऊहे वहति हविः तमेवं कुर्वित्यृषिरात्मानं परोक्षेणाह। हव्यवाळग्निरजरः पिता नः। ऋग्वे० ५.४.२.। इति हि वक्ष्यति। यद्वा पितृपुत्रभावो व्यत्यस्तः। पितरं पितृवद्रक्षकं यजमानमवस्पृधि योधि च यस्त्वं पुत्रः पुत्रवत्सदा रक्षणीयः। त्वं पुत्रो भवसि यस्तेऽविधत्। ऋग्वे० २.१.९.। इति हि श्रुतिः। हे चिकित्वश्चेतनावन्नग्ने कदा नोऽस्मानभिचक्षसे। अभिपश्यसि। कदा च ऋतचिद्यज्ञस्योदकस्य वा चेतयिता यातयासे। प्रेरयसि सन्मार्गेण ॥

॥ अथ दशमी ॥

भूरि नाम वंदमानो दधाति पिता वसो यदि तज्जोषयासे।
कुविद्देवस्य सहसा चकानः सुम्नमग्निर्वनते वावृधानः ॥१०॥

भूरि। नाम। वंदमानः। दधाति। पिता। वसो इति। यदि। तत्। जोषयासे।
कुवित्। देवस्य। सहसा। चकानः। सुम्नं। अग्निः। वनते। ववृधानः ॥१०॥

भूरि प्रभूतं नाम त्वदीयं नाम वंदमानः सन् दधाति। धारयति। सामर्थ्याद्धविः। अथवा नामकं हविः प्रभूतं धारयति दातुं। पिता पालकस्त्वं हे वसो वासकाग्ने यदि तद्धविर्जोषयासे सेवसे। देवस्य व्यवहर्तुर्यजमानस्य कुविद्बहु हविः सहसा बलेन युक्तः सन् चकानः कामयमानः। यद्वा कर्मणि षष्ठी। देवं यजमानं कामयमानोऽग्निर्ववृधानो वर्धमानो यजमानं वर्धयन्वा सुम्नं वनते। प्रयच्छति ॥

॥ अथैकादशी ॥

त्वमंग जरितारं यविष्ठ विश्वान्यग्ने दुरिताति पर्षि।
स्तेना अदृश्रन्रिपवो जनासोऽज्ञातकेता वृजिना अभूवन् ॥११॥

त्वं। अंग। जरितारं। यविष्ठ। विश्वानि। अग्ने। दुःऽइता। अति। पर्षि।
स्तेनाः। अदृश्रन्। रिपवः। जनासः। अज्ञातऽकेताः। वृजिनाः। अभूवन् ॥११॥

हे अंग स्वामिन्यविष्ठ युवतमाग्ने जरितारमनुग्रहीतुं विश्वानि दुरिता दुरितान्यतिपर्षि। अतिपारयसि। स्तेनास्तस्करा अदृश्रन्। दृश्यंते। रिपवो जनासः शत्रुभूता मनुष्या अज्ञातकेता अप्रज्ञातचिह्ना वृजिना अस्माभिर्वर्जिता अभूवन्। भवंति ॥

॥ अथ द्वादशी ॥

इमे यामासस्त्वद्रिगभूवन्वसवे वा तदिदागो अवाचि।
नाहायमग्निरभिशस्तये नो न रीषते वावृधानः परा दात् ॥१२॥

इमे। यामासः। त्वद्रिक्। अभूवन्। वसवे। वा। तत्। इत्। आगः। अवाचि।
न। अह। अयं। अग्निः। अभिऽशस्तये। नः। न। रिषते। ववृधानः। परा। दात् ॥१२॥

इमे यामासो गंतारः स्तोमास्त्वद्रिक् त्वदभिमुखा अभूवन्। भवंति। वा अथवा वसवे वासकाय तदागोऽपराधमाशासनरूपमवाचि। उक्तवानहमग्निं। इदं देहीति याचनमेवापराधः। इदिति पूरणः। यद्वा तदिदं वक्ष्यमाणं शत्रुभिः कृतमागोऽवाचि। किंचायमग्निर्ववृधानः स्तुत्या वर्धमानः सन् नाह नैवाभिशस्तये निंदकाय नोऽस्मान् परादात्। परादद्यात्। तथा रिषते हिंसकाय नैव परादात् ॥

॥ इति तृतीयस्याष्टमे सप्तदशो वर्गः ॥

त्वामग्न इत्येकादशर्चं चतुर्थं सूक्तमाग्नेयस्य वसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयं। अनुक्रांतं च। त्वामग्न एकादशेति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगोऽबोध्यग्निरित्यत्रोक्तः ॥

॥ तत्र प्रथमा ॥

त्वामग्ने वसुपतिं वसूनामभि प्र मंदे अध्वरेषु राजन्।
त्वया वाजं वाजयंतो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानां ॥१॥

त्वां। अग्ने। वसुऽपतिं। वसूनां। अभि। प्र। मंदे। अध्वरेषु। राजन्।
त्वया। वाजं। वाजऽयंतः। जयेम। अभि। स्याम। पृत्सुतीः। मर्त्यानां ॥१॥

हे अग्ने वसूनां वसुपतिं। वृत्त्यवृत्तिभ्यां वसूनां बाहुल्यं तत्स्वामित्वं चोक्तं।

बहूनां धनानां स्वामिनं त्वामध्वरेषु यागेष्वभि प्रमंदे। आभिमुख्येन स्तौमि हे राजन्। किंच त्वयानुकूलेन वाजयंतोऽन्नमिच्छंतो वयं वाजं जयेम। किंच मर्त्यानां मरणधर्मकाणां पृत्सुतीः सेना अभिष्याम। अभिभवेम॥

दर्शपूर्णमासे पत्नीसंयाजे गृहपतेर्याज्यैषा। सूत्रितं च। हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः। आ० १.१०.। इति॥ देवसुवां हविःष्वप्यग्नेरेषैव याज्या। सूत्रितं च। हव्यवाळग्निरजरः पिता नस्त्वं च सोम नो वशः। आ० ४.११.। इति॥

॥ सैषा द्वितीया ॥

हव्यवाळग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे।
सुगार्हपत्याः समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि॥२॥

हव्यऽवाट्। अग्निः। अजरः। पिता। नः। विऽभुः। विभाऽवा। सुऽदृशीकः। अस्मे इति।
सुऽगार्हपत्याः। सं। इषः। दिदीहि। अस्मद्र्यक्। सं। मिमीहि। श्रवांसि॥२॥

अयं हव्यवाडग्निरजरोऽजीर्णः सन् नः पिता भवत्विति शेषः। किंच विभुर्व्याप्तः विभावा दीप्तिमान् सुदृशीकः शोभनदर्शनोऽस्मे अस्माकं भवतु। अथ प्रत्यक्षवादः। सुगार्हपत्याः शोभनगार्हपत्ययुक्तानीषोऽन्नानि सं दिदीहि। सम्यक् प्रकाशय। ददस्व वा। अस्मद्र्यक् अस्मदभिमुखं श्रवांस्यन्नानि सं मिमीहि। सम्यक् प्रयच्छ॥

॥ अथ तृतीया ॥

विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निं।
नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि॥३॥

विशां। कविं। विश्पतिं। मानुषीणां। शुचिं। पावकं। घृतऽपृष्ठं। अग्निं।
नि। होतारं। विश्वऽविदं। दधिध्वे। सः। देवेषु। वनते। वार्याणि॥३॥

मानुषीणां विशां विश्पतिं सर्वासां मनुष्यरूपाणां प्रजानां पालकं स्वामिनं वा कविं मेधाविनं शुचिं शुद्धं दीप्तं वा पावकमन्येषां शोधकं घृतपृष्ठं प्रदीप्तपृष्ठोपलक्षितशरीरं। अथवा उपरितनभागाज्योपेतं होतारं होमनिष्पादकं विश्वविदं विश्वस्य वेत्तारमग्निं निदधिध्वे धारयथ हे ऋत्विजः। स देवो देवेषु मध्ये वार्याणि वरणीयानि धनानि वनते संभजतेऽस्मदर्थं। स्वयं वा वार्याणि हवींषि वनते॥

॥ अथ चतुर्थी ॥

जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य ।
जुषस्व नः समिधं जातवेद आ च देवान्हविरद्याय वक्षि ॥४॥

जुषस्व । अग्ने । इळया । सऽजोषाः । यतमानः । रश्मिऽभिः । सूर्यस्य ।
जुषस्व । नः । सम्ऽइधं । जातऽवेदः । आ । च । देवान् । हविःऽअद्याय । वक्षि ॥४॥

हे अग्ने जुषस्व । सेवस्व स्तुतिं । इळया वेदिलक्षणया भूम्या वाचा वा सजोषाः समानप्रीतिः । तथा सूर्यस्य रश्मिभिर्यतमानः प्रयत्नमुषःकाले कुर्वन् । किंच हे जातवेदो जातस्य वेदितरग्ने नोऽस्मदीयां समिधं जुषस्व । सेवस्व । आवह च देवान्हविरद्याय हविरदनाय । आवाह्य वक्षि । वहसि तद्धविः ॥

अथ पविचेष्ट्यां स्विष्टकृतोऽनुवाक्यैषा । सूचितं च । जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये । आ० २.१२. । इति ॥ मरुद्भ्यः पुरोळाशं सप्तकपालमित्यत्रापि स्विष्टकृतोऽनुवाक्या । अत्यासो न ये मरुतः स्वंचो जुष्टो दमूनाः । आ० २.१८. । इति ॥

॥ सैषा पंचमी ॥

जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ॥५॥

जुष्टः । दमूनाः । अतिथिः । दुरोणे । इमं । नः । यज्ञं । उप । याहि । विद्वान् ।
विश्वाः । अग्ने । अभिऽयुजः । विऽहत्य । शत्रुऽयतां । आ । भर । भोजनानि ॥५॥

जुष्टः पर्याप्तो दमूना दानमना दांतमना वा अतिथिस्तद्वत्पूज्यः सन् इमां नोऽस्मदीयं यज्ञमुपयाहि । उपगच्छ । विद्वान् जानन् हे अग्ने विश्वा अभियुजो सर्वानभियोक्तृन्विहत्य शत्रूयतां तेषां भोजनान्यन्नानि धनान्याभर । आहर । अतिथिरभ्यतितो गृहान्भवतीत्यादिनिरुक्तं । नि० ४.५. । द्रष्टव्यं ॥

॥ इति तृतीयस्याष्टमेऽष्टादशो वर्गः ॥

॥ अथ षष्ठी ॥

वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे३ स्वायै ।
पिपर्षि यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान् ॥६॥

वधेन। दस्युं। प्र। हि। चातयस्व। वयः। कृण्वानः। तन्वे। स्वायै।
पिपर्षि। यत्। सहसः। पुत्र। देवान्। सः। अग्ने। पाहि। नृतम। वाजे। अस्मान् ॥६॥

हे अग्ने वधेनायुधेन दस्युमुपक्षपयितारं प्र हि चातयस्व। प्रणाशय। हीति पूरणः। वयः कृण्वानस्तन्वे शरीराय स्वायै स्वीयाय। अथवा स्वायै तन्वे यजमानादिरूपाय पुत्राय वयोऽन्नं कुर्वानः। यद्यस्मात् सहसस्पुत्राग्ने देवान्पिपर्षि तर्पयसि हे नृतम नेतृतमाग्ने स त्वं वाजे संग्रामेऽस्मान् पाहि। रक्ष॥

॥ अथ सप्तमी ॥

वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे।
अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि ॥७॥
वयं। ते। अग्ने। उक्थैः। विधेम। वयं। हव्यैः। पावक। भद्रऽशोचे।
अस्मे इति। रयिं। विश्वऽवारं। सं। इन्व। अस्मे इति। विश्वानि। द्रविणानि। धेहि ॥७॥

हे अग्ने ते त्वां वयमुक्थैः शस्त्रैर्विधेम। परिचरेम। वयं हव्यैर्हविर्भिर्विधेम। पावक शोधक भद्रशोचे कल्याणदीप्ते अस्मे अस्मभ्यं विश्ववारं विश्वैर्वरणीयं रयिं धनं समिन्व। प्रापय। अस्मे अस्मभ्यं विश्वानि द्रविणानि धेहि। स्थापय॥

॥ अथाष्टमी ॥

अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यं।
वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि ॥८॥
अस्माकं। अग्ने। अध्वरं। जुषस्व। सहसः। सूनो इति। त्रिऽसधस्थ। हव्यं।
वयं। देवेषु। सुऽकृतः। स्याम। शर्मणा। नः। त्रिऽवरूथेन। पाहि ॥८॥

हे अग्ने अस्माकमध्वरं जुषस्व। सेवस्व। हे सहसः सूनो हे बलस्य पुत्र त्रिषधस्थ त्रिषु दिव्यादिषु स्थानेषु स्थित हव्यं हविर्जुषस्व। यद्वा अध्वरं हविरिति योज्यं। अहिंसितं हविरित्यर्थः। वयं यजमाना देवेषु मध्ये सुकृतः शोभनापूर्वकर्तारः स्याम। भवेम। त्रिवरूथेन वाचिकादिभेदेन त्रिधा वरणीयेन शर्मणा सुखेन त्रिच्छदिष्केण गृहेण वा नः पाहि। रक्ष॥

॥ अथ नवमी ॥

विश्वानि नो दुर्गहा जातवेदः सिंधुं न नावा दुरितातिं पर्षि ।
अग्ने अत्रिवन्नमसा गृणानो३ऽस्माकं बोध्यविता तनूनां ॥९॥
विश्वानि । नः । दुःऽगहा । जातऽवेदः । सिंधुं । न । नावा । दुःऽइता । अति । पर्षि ।
अग्ने । अत्रिऽवत् । नमसा । गृणानः । अस्माकं । बोधि । अविता । तनूनां ॥९॥

हे जातवेदो नोऽस्माकं दुर्गहा दुःखेन गाह्यानि दुःखेन भोग्यानि विश्वानि दुरितान्यतिपर्षि । अतिपारय । सिंधुं न नावा नदीं नाविको यथा तद्वत् । हे अग्ने अत्रिवत् अत्रेर्यथा तथा नोऽस्माकं नमसा स्तोत्रेण गृणानः स्तूयमानः सन् नोऽस्माकं तनूनामविता रक्षको बोधि । बुध्यस्व ॥

पुत्रकामेष्ट्यां यस्त्वेत्येषा प्रधानस्य याज्या । सूत्रितं च । यस्त्वा हृदा कीरिणा मन्यमानोऽग्निस्तुविश्रवस्तमं । आ० २. १०. । इति ॥

॥ सैषा दशमी ॥

यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां ॥१०॥
यः । त्वा । हृदा । कीरिणा । मन्यमानः । अमर्त्यं । मर्त्यः । जोहवीमि ।
जातऽवेदः । यशः । अस्मासु । धेहि । प्रऽजाभिः । अग्ने । अमृतऽत्वं । अश्यां ॥१०॥

यो मर्त्यो मरणधर्माहममर्त्यमनाशं त्वा त्वां कीरिणा स्तुत्यादिषु विक्षिप्तेन हृदा हृदयेन युक्तो मन्यमानः स्तुवन् जोहवीमि अत्यर्थमाह्वयामि । यद्वा स्तोतृवाचकेन कीरिणाशब्देन स्तुतिरुपलक्ष्यते । स्तुतियुक्तेन मनसा त्वां मन्यमानो जोहवीमि । हे जातवेदो यशो धनं प्रजां वास्मासु धेहि । प्रजाभिस्त्वद्दत्ताभिर्हे अग्नेऽहममृतत्वं संतत्यविच्छेदलक्षणमश्यां । प्राप्नुयां । प्रजामनु प्रजायते तदु ते मर्त्यामृतमिति हि श्रुतिः ॥

तस्यामेव पुत्रकामेष्ट्यां यस्मै त्वमित्येषाग्नेः पुत्रवतोऽनुवाक्या । यस्मै त्वं सुकृते जातवेदो यस्त्वा हृदा कीरिणा मन्यमानः । आ० २. १०. । इति हि सूत्रितं ॥

॥ सैषैकादशी ॥

यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं ।
अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति ॥११॥

यस्मै । त्वं । सुऽकृते । जातऽवेदः । ऊं इति । लोकं । अग्ने । कृणवः । स्योनं ।
अश्विनं । सः । पुत्रिणं । वीरऽवंतं । गोऽमंतं । रयिं । नशते । स्वस्ति ॥११॥

हे जातवेदोऽग्ने त्वं यस्मै सुकृते सुकर्मणे यजमानाय । उ इति पूरणः । लोकं स्योनं सुखकरं कृणवः अकरोः । यद्वा लोकमालोकेन स्योनं कृणवः । अनुग्रहेण कुर्वित्यर्थः । स यजमानोऽश्विनं बह्वश्वोपेतं पुत्रिणं बहुपुत्रोपेतं वीरवंतं वीरैर्वीर्येण वोपेतं गोमंतं रयिं धनं नशते । प्राप्नोति । स्वस्त्यविनश्वरं ॥

॥ इति तृतीयस्याष्टम एकोनविंशो वर्गः ॥

सुसमिद्धायेत्येकादशर्चं पंचमं सूक्तमात्रेयस्य वसुश्रुतस्यार्षं गायत्रमिध्माद्युक्तदेवताकं । आप्रमित्युक्तत्वात्तनूनपाद्वर्जितं । अनुक्र॰ म॰ १. सू॰ १३.। सुसमिद्धायाप्रं गायत्रमित्यनुक्रमणिका । अत्रीणामिदमाप्रीसूक्तं । समिद्धो अद्येति वा सर्वेषां यथर्षि वा । आ॰ ३. २.। इत्युक्तत्वात् ॥

॥ तत्र प्रथमा ॥

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे ॥१॥

सुऽसमिद्धाय । शोचिषे । घृतं । तीव्रं । जुहोतन । अग्नये । जातऽवेदसे ॥१॥

सुसमिद्धाय सुष्ठु समिद्धायैतन्नामकायाग्नये शोचिषे दीप्तिमते घृतमाज्यं तीव्रं प्रभूतं जुहोतन । अग्नयेऽगनादिगुणयुक्ताय जातवेदसे जातधनाय ॥

॥ अथ द्वितीया ॥

नराशंसः सुषूदतीमं यज्ञमदाभ्यः । कविर्हि मधुहस्त्यः ॥२॥

नराशंसः । सुसूदति । इमं । यज्ञं । अदाभ्यः । कविः । हि । मधुऽहस्त्यः ॥२॥

नराशंसः नरैः शंसनीयोऽयमग्निरिमं यज्ञमिदं हविर्वा सुषूदति । सुष्ठु प्रेरयति । स देवोऽदाभ्योऽहिंस्यः केनापि कविर्मेधावी मधुहस्त्यो मधुरहस्त्यः ॥

॥ अथ तृतीया ॥

ईळितो अग्न आ वहेंद्रं चित्रमिह प्रियं। सुखै रथेभिरूतये ॥३॥

ईळितः। अग्ने। आ। वह। इंद्रं। चित्रं। इह। प्रियं। सुऽखैः। रथेभिः। ऊतये ॥३॥

हे अग्ने ईळितः स्तुतः सन्नावहेंद्रं चित्रं चायनीयं प्रियमिहास्मिन्यज्ञे सुखे रथेभी रथैरूतयेऽस्मद्रक्षणाय ॥

॥ अथ चतुर्थी ॥

ऊर्णम्रदा वि प्रथस्वाभ्य१र्का अनूषत। भवा नः शुभ्र सातये ॥४॥

ऊर्णऽम्रदाः। वि। प्रथस्व। अभि। अर्काः। अनूषत। भव। नः। शुभ्र। सातये ॥४॥

हे ऊर्णम्रदा ऊर्णाकंबलवत् मृदु हे बर्हिर्विप्रथस्व। प्रथय। अर्काः स्तोतारोऽभ्यनूषत। स्तुवंति। हे शुभ्र दीप्त सातये धनाय तद्दानाय वा नोऽस्माकं भव ॥

॥ अथ पंचमी ॥

देवीर्द्वारो वि श्रयध्वं सुप्रायणा न ऊतये। प्रप्र यज्ञं पृणीतन ॥५॥

देवीः। द्वारः। वि। श्रयध्वं। सुप्रऽअयनाः। नः। ऊतये। प्रऽप्र। यज्ञं। पृणीतन ॥५॥

हे द्वारो यज्ञस्य द्वाराभिमानिन्यो हे देवीर्देव्यो विश्रयध्वं। वियुक्ता भवत। सुप्रायणाः शोभनगमनसाधना नोऽस्माकमूतये रक्षायै यज्ञं यजमानं प्रप्र पृणीतन। पूरयत कामैर्यज्ञमेव वा फलैः ॥

॥ इति तृतीयस्याष्टमे विंशो वर्गः ॥

॥ अथ षष्ठी ॥

सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा। दोषामुषासमीमहे ॥६॥

सुप्रतीके इति सुऽप्रतीके। वयःऽवृधा। यह्वी इति। ऋतस्य। मातरा। दोषां। उषसं। ईमहे ॥६॥

हे अह्नो रात्रेश्चाभिमानिदेव्यौ सुप्रतीके सुरूपे शोभनांगे वा वयोवृधावन्नस्य वर्धयित्र्यौ यह्वी महत्यावृतस्य यज्ञस्योदकस्य वा मातरा निर्मात्र्यौ तयोर्मध्ये प्रत्येकं दोषां रात्रिदेवीमुषसमहर्देवीमीमहे। स्तुमः ॥

॥ अथ सप्तमी ॥

वातस्य पत्मन्नीळिता दैव्या होतारा मनुषः । इमं नो यज्ञमा गतं ॥७॥

वातस्य। पत्मन्। ईळिता। दैव्या। होतारा। मनुषः। इमं। नः। यज्ञं। आ। गतं ॥७॥

वातस्य पत्मन् । लुप्तोपमैषा । वायुगमनसदृशगमनार्थमीळितावस्माभिः स्तुतौ । यद्वा वातस्य पतनसाधनेऽतरिक्षे गच्छंतौ दैव्या देवादग्नेरादित्याच्च समुद्भूतौ होतारा देवानामाह्वातारौ युवां मनुषो मनुष्यस्येमं नोऽस्माकं यज्ञमागतं । आगच्छतं । नो मनुषो यज्ञमिति व्यधिकरणे षष्ठ्यौ । अस्माकं यजमानस्य यज्ञमित्यर्थः ॥

॥ अथाष्टमी ॥

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीदंत्वस्रिधः ॥८॥

इळा। सरस्वती। मही। तिस्रः। देवीः। मयःऽभुवः। बर्हिः। सीदंतु। अस्रिधः ॥८॥

इळा पृथिवी सरस्वती । सर उदकं । तस्मात्सरस्वान्वायुः । तस्य स्त्री सरस्वती । मही महती भारती भरतस्यादित्यस्य पत्नी । अत्र यद्यप्येषा नोक्ता तथापि सर्वत्र सहदृष्टत्वात्त्रिसंख्याश्रवणाच्च सा गृह्यते । अथवैताः क्षित्यंतरिक्षद्युस्थाना वाग्देव्यः । एता मयोभुवः सुखस्य भावयित्र्योऽस्रिधोऽहिंसिकाः सत्यो बर्हिर्बर्हिषि सीदंतु । उपविशंतु ॥

॥ अथ नवमी ॥

शिवस्त्वष्टरिहा गहि विभुः पोष उत त्मना । यज्ञेयज्ञे न उदव ॥९॥

शिवः। त्वष्टः। इह। आ। गहि। विऽभुः। पोषे। उत। त्मना। यज्ञेऽयज्ञे। नः। उत्। अव ॥९॥

हे त्वष्टर्देव शिवः सुखकरः सन्निहागहि । अस्मद्यज्ञमागच्छ । विभुर्व्याप्तस्त्वं पोषे करणे । उतागत्य च त्मनात्मना स्वयमेव यज्ञेयज्ञे सर्वेषु यज्ञेषु नोऽस्मानुदव । उत्कृष्टं रक्ष ॥

अग्निहोत्र उत्तराहुतिस्कंदने यत्र वेत्थेत्यनया समिधमादध्यात् । सूत्रितं च । यत्र वेत्थ वनस्पत इत्युत्तरस्या आहुत्याः स्कंदने । आ० ३. ११. । इति ॥

॥ सैषा दशमी ॥

यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामय ॥१०॥

यत्र। वेत्थ। वनस्पते। देवानां। गुह्या। नामानि। तत्र। हव्यानि। गमय ॥१०॥

हे वनस्पते यूपाभिमानिदेव यत्र यस्मिन् स्थाने वेत्थ देवानां गुह्या गुह्यानि नामानि नामकानि रूपाणि तत्र हव्यानि गमय । प्रापय ॥

॥ अथैकादशी ॥

स्वाहाग्नये वरुणाय स्वाहेंद्राय मरुद्भ्यः । स्वाहा देवेभ्यो हविः ॥११॥

स्वाहा । अग्नये । वरुणाय । स्वाहा । इंद्राय । मरुत्ऽभ्यः । स्वाहा । देवेभ्यः । हविः ॥११॥

अग्न्यादि विश्वे देवाः । तेभ्यो देवेभ्य इदं हविः स्वाहा करोमीति शेषः । स्वाहुतं करोमीत्यर्थः । एवं स्वाहाकृतेः स्तुतिः ॥

॥ इति तृतीयस्याष्टम एकविंशो वर्गः ॥

अग्निं तं मन्य इति दशर्चं षष्ठं सूक्तं वसुश्रुतस्यार्षमाग्नेयं पांक्तं । अग्निं तं दश पांक्तमित्यनुक्रमणिका ॥ प्रातरनुवाक आग्नेये क्रतौ पांक्ते छंदस्याश्विनशस्त्रे चेदं सूक्तं । अग्निं तं मन्य इति पांक्तं । आ० ४.१३. । इति हि सूचितं ॥ आश्वमेधिके मध्यमेऽहनीदमेवाज्यशस्त्रं । सूचितं च । अग्निं तं मन्य इत्याज्यं तस्यैकाहिकमुपरिष्टात् । आ० १०.१०. । इति ॥ आद्य आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्यानुरूपस्तृचः । सूचितं च । अग्निं तं मन्ये यो वसुराग्ने स्थूरं रयिं भर । आ० ७.८. । इति ॥

॥ तत्र प्रथमा ॥

अग्निं तं मन्ये यो वसुरस्तं यं यंति धेनवः ।

अस्तमर्वंत आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥१॥

अग्निं । तं । मन्ये । यः । वसुः । अस्तं । यं । यंति । धेनवः ।

अस्तं । अर्वंतः । आशवः । अस्तं । नित्यासः । वाजिनः । इषं । स्तोतृऽभ्यः । आ । भर ॥१॥

तमग्निं मन्ये । स्तौमि । योऽग्निर्वसुर्वासकः । यमस्तं सर्वेषां गृहवदाश्रयभूतं धेनवो यंति गच्छंति प्रीणयितुं । अस्तमुक्तलक्षणमर्वंतोऽरणवंतोऽश्वा आशवः शीघ्रगामिनो यंति । तथा नित्यासो नित्यप्रवृत्तयो वाजिनो हविर्लक्षणान्नवंतो यजमाना यमस्तं यंति तं मन्ये । इषमन्नं स्तोतृभ्योऽस्मभ्यमाभराग्ने ॥

॥ अथ द्वितीया ॥

सो अग्निर्यो वसुर्गृणे सं यमायंति धेनवः ।

समर्वंतो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥२॥

सः। अग्निः। यः। वसुः। गृणे। सं। यं। आऽयंति। धेनवः।

सं। अर्वंतः। रघुऽद्रुवः। सं। सुऽजातासः। सूरयः। इषं। स्तोतृऽभ्यः। आ। भर ॥२॥

सोऽग्निः स खल्वग्निर्यो वसुर्वासको गृणे। स्तूयते। यं धेनवः समायंति होमार्थं। अर्वंतोऽश्वा रघुद्रुवो लघुगमनाः समायंति। सुजातासः सूरयो मेधाविनश्च समायंति स खल्वग्निरिति ॥

॥ अथ तृतीया ॥

अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः।

अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर ॥३॥

अग्निः। हि। वाजिनं। विशे। ददाति। विश्वऽचर्षणिः।

अग्निः। राये। सुऽआभुवं। सः। प्रीतः। याति। वार्यं। इषं। स्तोतृऽभ्यः। आ। भर ॥३॥

अग्निर्ह्ययमग्निः खलु विशे यजमानाय वाजिनमन्नवंतं पुत्रमश्वमन्नं वा ददाति। विश्वचर्षणिः। विश्वे चर्षणयो मनुष्या रक्षणीया अर्चका वा यस्य स तथोक्तः। यद्वा पश्यतिकर्मैतत्। सर्वस्य द्रष्टाग्नी राये धनार्थिने। अथवा द्वितीयार्थे चतुर्थी। धनं स्वाभुवं सुष्ठु सर्वत्र व्याप्तं वार्यं सर्वैर्वरणीयं प्रीतः सन् याति। यमयति। दातुं वा गच्छति। इषमित्यादि गतं ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोत्रियतृचस्या ते अग्न इधीमहीत्यादिके प्रथमाद्वितीये। सूचितं च भवति। आ ते अग्ने इधीमह्युभे सुश्चंद्र सर्पिष इति द्वे एका च। आ॰ ७. ८.। इति ॥

॥ तत्र तृचे प्रथमा सूक्ते चतुर्थी ॥

आ ते अग्न इधीमहि द्युमंतं देवाजरं।

यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥४॥

आ। ते। अग्ने। इधीमहि। द्युऽमंतं। देव। अजरं।

यत्। ह। स्या। ते। पनीयसी। संऽइत्। दीदयति। द्यवि। इषं। स्तोतृऽभ्यः। आ। भर ॥४॥

हे अग्ने देव द्युमंतं दीप्तिमंतमजरमजीर्णं ते त्वामा सर्वत इधीमहि। दीपयामः। यद्ध खलु स्या सा ते तव पनीयसी स्तुत्या समिद्दीप्तिर्दीदयति दीप्यते द्यवि द्युलोके ॥

॥ अथ पंचमी ॥

आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते ।
सुश्चंद्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥५॥

आ । ते । अग्ने । ऋचा । हविः । शुक्रस्य । शोचिषः । पते ।
सुऽचंद्र । दस्म । विश्पते । हव्यऽवाट् । तुभ्यं । हूयते । इषं । स्तोतृऽभ्यः । आ । भर ॥५॥

हे शोचिषो दीप्तेः पते स्वामिन्नग्ने शुक्रस्य दीप्तस्य ते तुभ्यमृचा मंत्रेण सह हविर्हूयते । हे सुश्चंद्र सुष्ठ्वाह्लादक शोभनहिरण्य वा हे दस्म शत्रूणामुपक्षपयितर्विश्पते विशां प्रजानां पालक हव्यवाट् हविषो वोढः । इषमिति गतं ॥

॥ इति तृतीयस्याष्टमे द्वाविंशो वर्गः ॥

॥ अथ षष्ठी ॥

प्रो त्ये अग्नयोऽग्निषु विश्वं पुष्यंति वार्यं ।
ते हिन्विरे त इन्विरे त इषण्यंत्यानुषगिषं स्तोतृभ्य आ भर ॥६॥

प्रो इति । त्ये । अग्नयः । अग्निषु । विश्वं । पुष्यंति । वार्यं ।
ते । हिन्विरे । ते । इन्विरे । ते । इषण्यंति । आनुषक् । इषं । स्तोतृऽभ्यः । आ । भर ॥६॥

प्रो प्रैव पुष्यंति त्ये तेऽग्नयो धिष्ण्या अग्निषु गार्हपत्यादिषु । यद्वा लौकिका अग्नयस्तेजःपदार्थोऽग्निषु वैदिकेषु विश्वं सर्वं वार्यं वरणीयमपेक्षितं धनं पुष्यंति । तेऽग्नयो हिन्विरे । प्रीणयंति । इन्विरे । व्याप्नुवंति च । त इषण्यंति । अन्नमिच्छंति । आनुषक् सर्वत्रानुषक्तं । तच्चाग्निसामान्याभिप्रायेणैकवचनं ॥

॥ अथ सप्तमी ॥

तव त्ये अग्ने अर्चयो महि व्राधंत वाजिनः ।
ये पत्वभिः शफानां व्रजा भुरंत गोनामिषं स्तोतृभ्य आ भर ॥७॥

तव । त्ये । अग्ने । अर्चयः । महि । व्राधंत । वाजिनः ।
ये । पत्वऽभिः । शफानां । व्रजा । भुरंत । गोनां । इषं । स्तोतृऽभ्यः । आ । भर ॥७॥

हे अग्ने तव त्वदीयास्त्ये तेऽर्चयो रश्मयो महि महदत्यधिकं वाजिनोऽन्नवंतो वा व्राधंत । वर्धंते । यद्वा लुप्तोपमा । वाजिनोऽश्वा इव । ये रश्मयः पत्वभिः

पतनैः शफानां गोनां व्रजा यूथानि भुरंत इच्छंति । आयता ज्वाला होमाय कांक्षंत इत्यर्थः । ते वर्धंते ॥

॥ अथाष्टमी ॥

नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीरिषः ।

ते स्याम य आनृचुस्त्वादूतासो दमेदम इषं स्तोतृभ्य आ भर ॥८॥

नवाः । नः । अग्ने । आ । भर । स्तोतृऽभ्यः । सुऽक्षितीः । इषः ।

ते । स्याम । ये । आनृचुः । त्वाऽदूतासः । दमेऽदमे । इषं । स्तोतृऽभ्यं । आ । भर ॥८॥

हे अग्ने स्तोतृभ्यो नोऽस्मभ्यं नवाः स्तुत्या नूत्ना वा सुक्षितीः सुनिवासाः सुप्रजा वा इष उक्तलक्षणान्यन्नान्याभर । प्रयच्छ । ये वयं दमे दमे सर्वेषु यागगृहेषु त्वामानृचुः अर्चयंति ते वयं त्वादूतासस्त्वां दूतं फलसूचकं लब्धवंतः संतः स्याम । समृद्धा भूयास्म । दमे दमे स्यामेति वा योज्यं ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने वैकल्पिकस्तोत्रियतृच उभे सुश्चंद्रेत्येषा तृतीया । सूत्रमुक्तं ॥

॥ सैषा नवमी ॥

उभे सुश्चंद्र सर्पिषो दर्वी श्रीणीष आसनि ।

उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर ॥९॥

उभे इति । सुऽचंद्र । सर्पिषः । दर्वी इति । श्रीणीषे । आसनि ।

उतो इति । नः । उत् । पुपूर्याः । उक्थेषु । शवसः । पते । इषं । स्तोतृऽभ्यः । आ । भर ॥९॥

हे सुश्चंद्र शोभनाह्लादन शोभनहिरण्य वाग्ने उभे सर्पिषः पूर्णे दर्वी जुहूपभृतावासन्यास्ये श्रीणीषे । श्रयसि । पचसि वा । उतो अपि च नोऽस्मानुक्थेषु यागेषूत्पुपूर्याः । उत्पूरय फलैर्हे शवसस्पते बलस्य पालयितः ॥

॥ अथ दशमी ॥

एवाँ अग्निमजुर्यमुर्गीर्भिर्यज्ञेभिरानुषक् ।

दधदस्मे सुवीर्यमुत त्यदाश्वश्व्यमिषं स्तोतृभ्य आ भर ॥१०॥

एव । अग्निं । अजुर्यमुः । गीःऽभिः । यज्ञेभिः । आनुषक् ।

दधत् । अस्मे इति । सुऽवीर्यं । उत । त्यत् । आशुऽअश्व्यं । इषं । स्तोतृऽभ्यः । आ । भर ॥१०॥

एवोक्तरीत्याग्निं गीर्भिः स्तुतिभिर्यज्ञेभिर्यज्ञैर्वा तत्साधनैर्हविर्भिर्वा आनुषक् आनुषक्तमजुः। गच्छंति। तथा कृत्वा यमुः। यमयंति। स्थापयंति। हविर्भिर्यजंतीत्यर्थः। एवमात्रेयाः स्वान्परोक्षतया निर्दिशंति॥ अजुर्यमुरित्यनाख्यातमाख्यातेन क्रियासातत्य इति समासः॥ किंच अस्मे अस्मासु सुवीर्यं शोभनपुत्रादिकमुतापि चाश्व्यं। आशवोऽश्वा यस्य भवंति स आश्वः। तस्य भाव आश्व्यं। तदपि दधत्। धारयति॥

॥ इति तृतीयस्याष्टमे त्रयोविंशो वर्गः॥

सखायः सं व इति दशर्चं सप्तमं सूक्तं। आत्रेय इष ऋषिः। अंत्या पंक्तिः शिष्टाः पंक्त्यंतपरिभाषयानुष्टुभः। तथा चानुक्रांतं। सखाय इषः पंक्त्यंतमिति॥ प्रातरनुवाक आग्नेये क्रतावानुष्टुभे छंदस्याश्विनशस्त्रे चोत्तमावर्जमिदं सूक्तं। सूत्रितं च। सखायः सं वस्त्वामग्ने हविष्मंत इति सूक्ते। आ० ४.१३.। इति॥

॥ तत्र प्रथमा॥

सखायः सं वः सम्यंचमिषं स्तोमं चाग्नये।
वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते॥१॥

सखायः। सं। वः। सम्यंचं। इषं। स्तोमं। च। अग्नये।
वर्षिष्ठाय। क्षितीनां। ऊर्जः। नप्त्रे। सहस्वते॥१॥

हे *सखायः* सखिभूता ऋत्विजो वो यूयं संस्कुरुत। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। *किंच सम्यंचमिषमन्नं स्तोमं स्तोत्रं चाग्नये वर्षिष्ठायातिशयेन प्रवृद्धाय क्षितीनां यजमानानामर्थाय वर्षिष्ठाय प्रवृद्धतमायोर्जो नप्त्रे बलस्य न पातयित्रे तत्पुत्राय वा सहस्वते बलवते संस्कुरुतेति॥*

॥ अथ द्वितीया॥

कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने।
अर्हंतश्चिद्यमिंधते संजनयंति जंतवः॥२॥

कुत्र। चित्। यस्य। संऽऋतौ। रण्वाः। नरः। नृऽसदने।
अर्हंतः। चित्। यं। इंधते। संऽजनयंति। जंतवः॥२॥

सोऽग्निः कुत्र चिद्वर्तत इति शेषः। कुत्रास्ते। यस्याग्नेः समृतौ संप्राप्तौ रण्वा

रममाणा नरो नेतार ऋत्विजः । नृषदने यागगृहेऽर्हंतश्चित् । चिदिति पूजायां । अर्हंतः पूज्याः पूजयंतो वा संतो यमिंधते दीपयंति । तदर्थं संजनयंति चारण्यां जंतवः प्राणिनः । स कृणोति संबंधः ॥

॥ अथ तृतीया ॥

सं यदिषो वनामहे सं हव्या मानुषाणां ।
उत द्युम्नस्य शवस ऋतस्य रश्मिमा ददे ॥३॥
सं । यत् । इषः । वनामहे । सं । हव्या । मानुषाणां ।
उत । द्युम्नस्य । शवसा । ऋतस्य । रश्मिं । आ । ददे ॥३॥

यद्यदेषोऽन्नानि संवनामहे संभजामहे । यदा च मानुषाणामस्माकं हव्या हवींष्यग्निः संसेवते उत तदानीं द्युम्नस्य द्योतमानस्यान्नस्य शवसा बलेन सामर्थ्येन ऋतस्योदकस्य ग्राहकं रश्मिमाददे । आदत्तेऽग्निः । फलजनकं तेजः स्वीकृतवानित्यर्थः । यद्वा ऋतस्य यज्ञस्य रश्मिं रश्मिवद्ग्राहकं स्तवमाददे । स्वीकरोति ॥

॥ अथ चतुर्थी ॥

स स्मा कृणोति केतुमा नक्तं चिद्दूर आ सते ।
पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः ॥४॥
सः । स्म । कृणोति । केतुं । आ । नक्तं । चित् । दूरे । आ । सते ।
पावकः । यत् । वनस्पतीन् । प्र । स्म । मिनाति । अजरः ॥४॥

स स्म स खल्वग्निः कृणोति करोति केतुं प्रज्ञानमा सर्वतः । कस्येत्युच्यते । चिदप्यर्थे । नक्तं चिद्रात्रावपि दूर आ सते । आ इति चार्थे । दूरेऽपि वर्तमानाय मनुष्याय । कदा । यद्यदा पावकोऽयमग्निरजरोऽजीर्णोऽनभिभाव्यः सन् वनस्पतीनेधांसि प्र स्म मिनाति प्रकर्षेण दहति । स्मेति पूरणः ॥

॥ अथ पंचमी ॥

अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति ।
अभीमह स्वजेन्यं भूमा पृष्ठेव रुरुहुः ॥५॥

अव । स्म । यस्य । वेषणे । स्वेदं । पथिषु । जुह्वति ।

अभि । ईं । अह । स्वऽजेन्यं । भूम । पृष्ठाऽइव । रुरुहुः ॥ ५ ॥

यस्याग्नेर्वेषणे परिचर्यायां पथिषु होममार्गेषु रश्मिषु स्वेदं स्रवदाज्यमवाधोमुखं जुह्वत्यध्वर्यवः तदानीमीमेनमग्निमभिरुरुहुररुह । अभ्यारोहंत्येवाज्यधाराः । अह इति विनिग्रहार्थीयः । स्वजेन्यं स्वोत्पन्नं भूम । बहु भवतीति भूमापत्यं । तत्पृष्ठेव पितुः पृष्ठदेशानिव । पुत्रा यथा पितुरंकमारोहंति तद्वत् ॥

॥ इति तृतीयस्याष्टमे चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

यं मर्त्यः पुरुस्पृहं विदद्विश्वस्य धायसे ।

प्र स्वादनं पितूनामस्ततातिं चिदायवे ॥ ६ ॥

यं । मर्त्यः । पुरुऽस्पृहं । विदत् । विश्वस्य । धायसे ।

प्र । स्वादनं । पितूनां । अस्तऽतातिं । चित् । आयवे ॥ ६ ॥

यमग्निं पुरुस्पृहं बहुभिः स्पृहणीयं विदत् वेत्ति मर्त्यो यजमानो विश्वस्य धायसे सर्वस्य व्याप्त्यर्थं पितूनामन्नानां प्र स्वादनं प्रकर्षेण स्वादूकर्तारमस्ततातिमस्ते गृहे निवासकर्तारमायवेऽन्नार्थं यजमानार्थं वा ॥

॥ अथ सप्तमी ॥

स हि ष्मा धन्वाक्षितं दाता न दात्या पशुः ।

हिरिश्मश्रुः शुचिदन्नृभुरनिभृष्टतविषिः ॥ ७ ॥

सः । हि । स्म । धन्व । आऽक्षितं । दाता । न । दाति । आ । पशुः ।

हिरिऽश्मश्रुः । शुचिऽदन् । ऋभुः । अनिभृष्टऽतविषिः ॥ ७ ॥

स हि ष्म स खल्वग्निर्धन्व निरुदकप्रदेशमाक्षितं तृणकाष्ठादिभिराक्षिप्तमा दाति । सर्वतः खंडयति । दहतीत्यर्थः । दाता तृणादिखंडयिता पशुर्न पशुरिव । पशुर्यथा तृणजातं क्रमेण भक्षयति तद्वत् । हिरिश्मश्रुर्हिरण्यश्मश्रुः शुचिदन् दीप्तदंत ऋभुरुरु भवन् । महानित्यर्थः । अनिभृष्टतविषिरपीडितबलः ॥

॥ अथाष्टमी ॥

शुचिः ष्म यस्मा अत्रिवत्प्र स्वधितीव रीयते ।

सुषूरसूत माता क्राणा यदानशे भगं ॥८॥

शुचिः । स्म । यस्मै । अत्रिऽवत् । प्र । स्वधितिःऽइव । रीयते ।

सुऽसूः । असूत । माता । क्राणा । यत् । आनशे । भगं ॥८॥

अयमग्निः शुचिः ष्म दीप्तः खलु । यस्मा अग्नयेऽत्रिवदत्त्रिरिव यजमानो हविर्दातुं प्ररीयते प्रगच्छति । यद्वा स्मेति पूरणः । शुचिर्यस्मै । प्रथमार्थे चतुर्थी । दीप्तो योऽत्रिवत् । अत्ति तृणमित्यत्रिः पशुः । स इव । स यथा तृणानि खादमानो गच्छति तद्वद्दहतीत्यर्थः । स्वधितिरिव परशुरिव छिंदन् । सुषूः सुप्रसवा मातारणिरसूत क्राणा कुर्वाणं जगदुपकारकं । यद्यस्मात् य इति वा । योऽग्निर्भगमन्नमानशे अश्नुते ॥

॥ अथ नवमी ॥

आ यस्ते सर्पिरासुतेऽग्ने शमस्ति धायसे ।

ऐषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः ॥९॥

आ । यः । ते । सर्पिःऽआसुते । अग्ने । शं । अस्ति । धायसे ।

आ । एषु । द्युम्नं । उत । श्रवः । आ । चित्तं । मर्त्येषु । धाः ॥९॥

हे सर्पिरासुते घृताख्यान्नाग्ने यस्त्वमा सर्वतो भवसि तादृशाय धायसे सर्वस्य धात्रे ते तुभ्यं शमस्ति सुखमस्ति स्तुतेः सकाशात् । तथा चेत् एषु मर्त्येषु स्तोतृष्वात्रेयेषु द्युम्नं यश आधाः । आधेहि । उतापि च श्रवोऽन्नमाधाः । चित्तं त्वदीयामनुग्रहबुद्धिमप्याधाः ॥

॥ अथ दशमी ॥

इति चिन्मन्युमध्रिजस्त्वादातमा पशुं ददे ।

आदग्ने अपृणतोऽत्रिः सासह्याद्दस्यूनिषः सासह्यान्नॄन् ॥१०॥

इति । चित् । मन्युं । अध्रिजः । त्वाऽदातं । आ । पशुं । ददे

आत् । अग्ने । अपृणतः । अत्रिः । ससह्यात् । दस्यून् । इषः । ससह्यात् । नॄन् ॥१०॥

इति चित् इत्थं कृतप्रकारेण मन्युं मननसाधनं स्तोत्रमध्रिजः । अधृतमन्यै-रग्निव्यतिरिक्तैरधृष्यं वा जनयिता ऋषिस्त्वादातं त्वया दातव्यं पशुमाददे । आदत्ते । आददीत वा । आदनंतरमेवाग्नेरपृणतोऽददतो दस्यूनचिस्तत्रोच इषः सासह्यात् । भृशमभिभवेत् । इष एष्टॄन्नॄन् विरोधिनः सासह्यात् । पुनरुक्तिरादरार्था ॥

॥ इति तृतीयस्याष्टमे पंचविंशो वर्गः ॥

त्वामग्न इति सप्तर्चमष्टमं सूक्तमात्रेयस्येषस्यार्षं जागतमाग्नेयं । त्वामग्ने सप्त जागतमित्यनुक्रमणिका ॥ प्रातरनुवाक आग्नेये क्रतौ जागते छंदस्याश्विनशस्त्रे चेदं सूक्तं । तथा च सूत्रं । जनस्य गोपास्त्वामग्न ऋतायवः । आ० ४.१३. । इति ॥

॥ तत्र प्रथमा ॥

त्वामग्न ऋतायवः समीधिरे प्रत्नं प्रत्नास ऊतये सहस्कृत ।

पुरुश्चंद्रं यजतं विश्वधायसं दमूनसं गृहपतिं वरेण्यं ॥ १ ॥

त्वां । अग्ने । ऋतऽयवः । सं । ईधिरे । प्रत्नं । प्रत्नासः । ऊतये । सहःऽकृत ।

पुरुऽचंद्रं । यजतं । विश्वऽधायसं । दमूनसं । गृहऽपतिं । वरेण्यं ॥ १ ॥

हे सहस्कृत बलस्य कर्तरग्ने प्रत्नं पुरातनं त्वां प्रत्नासः पुरातना ऋतायवो यज्ञकामा ऋषय ऊतये स्वरक्षणाय समीधिरे । सम्यग्दीपितवंतः । कीदृशं त्वां । पुरुश्चंद्रं बहुधनमतिशयेनाह्लादकं वा यजतं यष्टव्यं विश्वधायसं बह्वन्नं दमूनसं दानमनसं गृहपतिं यजमानगृहस्य पालकं वरेण्यं वरणीयं ॥

॥ अथ द्वितीया ॥

त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि षेदिरे ।

बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषं ॥ २ ॥

त्वां । अग्ने । अतिथिं । पूर्व्यं । विशः । शोचिःऽकेशं । गृहऽपतिं । नि । सेदिरे ।

बृहत्ऽकेतुं । पुरुऽरूपं । धनऽस्पृतं । सुऽशर्माणं । सुऽअवसं । जरत्ऽविषं ॥ २ ॥

हे अग्ने त्वां विशो यजमाना गृहपतिं गृहस्वामिनं निषेदिरे । गार्हपत्यरूपेण स्थापितवंत इत्यर्थः । कीदृशं त्वां । अतिथिमतिथिवत्पूज्यं पूर्व्यं पुरातनं शोचिष्केशं दीप्तज्वालं बृहत्केतुं प्रभूतप्रज्ञानं पुरुरूपमाहवनीयादिरूपेण बहुरूपं धनस्पृतं

धनानां स्पर्तारं सुषर्माणं शोभनसुखं स्ववसं सुरक्षणं जरद्विषं जरतां वृक्षाणां ध्यापकं जीर्णोदकं वा ॥

अग्नीनां परस्परं संसर्गे विविचयेऽग्नये काचिदिष्टिः । तत्र त्वामग्ने मानुषीरिति याज्या । सूचितं च । त्वामग्ने मानुषीरीळते विशोऽग्न आयाहि वीतये । ऐ० ब्रा० ७. ६. । इति ॥

॥ सैषा तृतीया ॥

त्वामग्ने मानुषीरीळते विशो होत्राविदं विविचिं रत्नधातमं ।
गुहा संतं सुभग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियं ॥३॥

त्वां । अग्ने । मानुषीः । ईळते । विशः । होत्राऽविदं । विविचिं । रत्नऽधातमं ।
गुहा । संतं । सुऽभग । विश्वऽदर्शतं । तुविऽस्वनसं । सुऽयजं । घृतऽश्रियं ॥३॥

हे अग्ने सुभग शोभनधन त्वां मानुषीर्विशो मानुषसंबंधिन्यः सर्वाः प्रजा ईळते । स्तुवंति । कीदृशं त्वां । होत्राविदं होमानां सप्तहोत्रकाणां वा वेत्तारं विविचिं विवेचकं सदसतोः रत्नधातमं रमणीयानां धनानां दातृतमं गुहा गुहायामरण्यां हृदयेषु वा संतं सर्वदा वर्तमानं विश्वदर्शतं सर्वैर्द्रष्टव्यं तुविष्वणसं प्रभूतध्वनिं सुयजं सुष्ठु यष्टारं घृतश्रियं घृतं श्रयंतं ॥

॥ अथ चतुर्थी ॥

त्वामग्ने धर्णसिं विश्वधा वयं गीर्भिर्गृणंतो नमसोप सेदिम ।
स नो जुषस्व समिधानो अंगिरो देवो मर्तस्य यशसा सुदीतिभिः ॥४॥

त्वां । अग्ने । धर्णसिं । विश्वधा । वयं । गीःऽभिः । गृणंतः । नमसा । उप । सेदिम ।
सः । नः । जुषस्व । संऽइधानः । अंगिरः । देवः । मर्तस्य । यशसा । सुदीतिऽभिः ॥४॥

हे अग्ने धर्णसिं सर्वस्य धारकं त्वां वयमात्रेया वा विश्वधा बहुप्रकारेण गीर्भिर्गृणंतः स्तुवंतो नमसा नमस्कारेणोपसेदिम । उपसन्ना भवेम । स त्वं नोऽस्मान् जुषस्व । सेवस्व धनादिभिः । समिधानः सम्यग्दीप्तो दीप्यमानोऽस्माभिर्हे अंगिरः सर्वत्र गंतरंगिरसः पुत्र वा देवो दीप्यमानस्त्वं मर्तस्य यजमानस्य यशसा सुदीतिभिर्ज्वालाभिः सह जुषस्व ॥

॥ अथ पंचमी ॥

त्वमग्ने पुरुरूपो विशेविशे वयो दधासि प्रत्नथा पुरुष्टुत ।

पुरूण्यन्ना सहसा वि राजसि त्विषिः सा ते तित्विषाणस्य नाधृषे ॥५॥

त्वं । अग्ने । पुरुऽरूपः । विशेऽविशे । वयः । दधासि । प्रत्नऽथा । पुरुऽस्तुत ।

पुरूणि । अन्ना । सहसा । वि । राजसि । त्विषिः । सा । ते । तित्विषाणस्य । न । आऽधृषे ॥५॥

हे अग्ने त्वं पुरुरूपः सन् विशे विशे सर्वस्मै यजमानाय प्रत्नथा पुराण इव वयोऽन्नं दधासि । धारयसि । हे पुरुष्टुत बहुभिः स्तुत्य पुरूणि बहून्यन्नानि चरुपुरोडाशादीनि सहसा बलेन विराजसि । ईश्वरो भवसि स्वीकर्तुं । तित्विषाणस्य दीप्तस्य ते तव सा प्रसिद्धा त्विषिर्दीप्तिर्नाधृषे । अन्यैरधृष्या भवति ॥

॥ अथ षष्ठी ॥

त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनं ।

उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्मति ॥६॥

त्वां । अग्ने । संऽइधानं । यविष्ठ्य । देवाः । दूतं । चक्रिरे । हव्यऽवाहनं ।

उरुऽज्रयसं । घृतऽयोनिं । आऽहुतं । त्वेषं । चक्षुः । दधिरे । चोदयत्ऽमति ॥६॥

हे यविष्ठ्य युवतमाग्ने समिधानं सम्यगिध्यमानं त्वां हव्यवाहनं हविषां वोढारं दूतं चक्रिरे । कृतवंतो देवाः । त्रयाणामग्नीनां मध्ये हव्यवाहनः खलु पूर्वं देवैर्हविर्वहनाय दूतः कृतः । हव्यवाहनो देवानामिति हि श्रुतिः । किंच उरुज्रयसं प्रभूतवेगं घृतयोनिं । घृतं योनिः कारणं यस्य तं । आहुतं त्वा चोदयन्मति । चोदयंती मतिर्यस्य तच्चोदयन्मति । त्वेषं दीप्तं चक्षुरुक्तलक्षणं सर्वप्रकाशकं चक्षुःस्थानीयं कृत्वा दधिरे देवा मनुष्याश्च । मत्या हि चक्षुषोद्यते ॥

॥ अथ सप्तमी ॥

त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे ।

स वावृधान ओषधीभिरुक्षितोऽभि ज्रयांसि पार्थिवा वि तिष्ठसे ॥७॥

त्वां । अग्ने । प्रऽदिवः । आऽहुतं । घृतैः । सुम्नऽयवः । सुऽसमिधा । सं । ईधिरे ।

सः । ववृधानः । ओषधीभिः । उक्षितः । अभि । ज्रयांसि । पार्थिवा । वि । तिष्ठसे ॥७॥

हे अग्ने घृतैराहुतं त्वां प्रदिवः पुरातनाः सुम्नायवः सुखमिच्छंतो यजमानाः सुषमिधा शोभनेनेध्मेन समीधिरे। सम्यक् दीपितवंतः। स त्वं वावृधानो वर्धमान ओषधीभिरुक्षितः सिक्तो अयांस्यन्नानि पार्थिवा पार्थिवान्वृक्षान्। यद्वा पार्थिवेति अयोविशेषणं। पार्थिवानि चरुपुरोडाशादिकान्यभि वितिष्ठसे। अभिव्यज्य वर्तसे॥

॥ इति तृतीयस्याष्टमे षड्विंशो वर्गः॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टकेऽष्टमोऽध्यायः समाप्तः॥

॥ श्रीरस्तु ॥

॥ कल्याणं भूयात् ॥

ओं

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

पंचमे मंडले प्रथमेऽनुवाके पूर्वमष्टौ सूक्तानि व्याख्यातानि । त्वामग्ने हविष्मंत इति सप्तर्चं नवमं सूक्तमात्रेयस्य गयस्यार्षं । सप्तमीपंचम्यौ पंक्ती शिष्टा अनुष्टुभः । अग्निर्देवता । तथा चानुक्रम्यते । त्वामग्ने गयोऽत्यापंचम्यौ पंक्ती इति ॥ प्रातरनुवाक आश्विनशस्त्रे चैतदादिके द्वे सूक्ते शंसनीये । तथैव सूचितं । त्वामग्ने हविष्मंत इति सूक्ते । आ० ४.१३. । इति ॥

॥ तत्रैषा प्रथमा ॥

त्वामग्ने हविष्मंतो देवं मर्तास ईळते ।
मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ॥१॥
त्वां । अग्ने । हविष्मंतः । देवं । मर्तासः । ईळते ।
मन्ये । त्वा । जातऽवेदसं । सः । हव्या । वक्षि । आनुषक् ॥१॥

हे अग्ने त्वां देवं दीप्यमानं हविष्मंतो होमसाधनद्रव्यसमेता मर्तासो मर्त्या ईळते । स्तुवंति । अहं च जातवेदसं । जातमुत्पन्नं चराचरं भूतजातं वेत्तीति जातवेदाः । अथवा जातानि स्थावरजंगमात्मकान्येनं विदुरिति जातवेदाः । यद्वा वेद इति धननाम । जातं सर्वं वेदो धनं यस्यासौ जातवेदाः । एवंविधं त्वा त्वां

मन्ये। स्तौमि। मनिरत्र स्तुत्यर्थे वर्तते धातूनामनेकार्थत्वात्। स त्वं हव्या हवनसाधनानि हवींष्यानुषक् निरंतरतयानुषक्तं यथा तथा वक्षि। वहसि॥ हविष्मंतः। हविःशब्द औणादिकइस्प्रत्ययांतत्वात्प्रत्ययस्वरेणांतोदात्तः। तदस्यास्तीति मतुप्। पदसंज्ञाया अपवादत्वेन तसौ मत्वर्थे इति भसंज्ञायां रुत्वाभावः। मतुप्जसोरनुदात्तत्वात्प्रत्ययस्वर एव शिष्यते। देवं। अच्प्रत्ययांतत्वाद्देवशब्दोऽंतोदात्तः। मर्तासः। मृङ् प्राणत्यागे। असिहसिमृङित्यादिना तन्। गुणः। मर्तः। जसेरसुक्। मर्तासः। नित्त्वादाद्युदात्तः। ईळते। ईड स्तुतौ। अदादित्वाच्छपो लुक्। आत्मनेपदेष्वनतो झेरत्वं। अत्र डकारस्याध्येतृसंप्रदायप्राप्तो ळकारः। लसार्वधातुकानुदात्तत्वेन धातुस्वरे प्राप्त आष्टमिको निघातः। मन्ये। श्यनो नित्त्वादाद्युदात्तत्वं। त्वा। युषि मिश्रणे। मदिक्प्रत्ययांतो युष्मच्छब्दः प्रत्ययस्वरेणांतोदात्तः। त्वमावेकवचन इति मपर्यंतस्य त्वादेशः। द्वितीयायां च। पा० ७.२.८७.। इत्याकारः। एकादेश उदात्तेनोदात्त इत्येकादेशोऽप्युदात्त एव। त्वामौ द्वितीयाया इति त्वादेशः। स्थानिवद्भावेनांतोदात्तत्वे प्राप्तेऽनुदात्तं सर्वमपादादावित्यनुदात्तत्वं। जातवेदसं। जनी प्रादुर्भावे। क्तः। श्वीदितो निष्ठायामितीट्प्रतिषेधः। जनसनखनां सञ्झलोरित्यात्वं। प्रत्ययस्वरेणांतोदात्तः। वेदस्शब्दोऽप्यसुन्प्रत्ययांतत्वादाद्युदात्तः। कर्मधारयपक्षे समासांतोदात्तापवादत्वेन तत्पुरुषे तुल्यार्थेत्यादिना पूर्वपदप्रकृतिस्वरे प्राप्ते कृदुत्तरपदप्रकृतिस्वरत्वं। तदपवादत्वेन गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति पूर्वपदप्रकृतिस्वरत्वं। बहुव्रीहिपक्षे बहुव्रीहौ प्रकृत्या पूर्वपदमिति। हव्या। हवमर्हतीत्यस्मिन्नर्थे य इत्यनुवर्तमाने छंदसि चेति यः। नपुंसकत्वाच्छिरादेशः। शेश्छंदसि बहुलमिति लोपः। प्रत्ययलक्षणेन नुम्। दीर्घनलोपौ। प्रत्ययस्वरेणांतोदात्तः। वक्षि। वह प्रापणे। सिप्। लुगनुवृत्तौ बहुलं छंदसीति शपो लुक्। ढत्वकत्वषत्वानि। सिपः पित्त्वादनुदात्तत्वेन धातुस्वरेणाद्युदात्तत्वे प्राप्ते निघातः। आनुषक्। अनुपूर्वस्य षञ्जेः क्विप्। नकारलोपः कुत्वं च। धात्वादेः सकारस्योपसर्गात्सुनोतीत्यादिना षत्वं। दीर्घश्छांदसः। कृदुत्तरपदप्रकृतिस्वरत्वं॥

॥ अथ द्वितीया ॥

अग्निर्होता दास्वंतः क्षयस्य वृक्तबर्हिषः।

सं यज्ञासश्चरंति यं सं वाजासः श्रवस्यवः॥२॥

अग्निः । होता । दास्वतः । क्षयस्य । वृक्तऽबर्हिषः ।

सं । यज्ञासः । चरंति । यं । सं । वाजासः । श्रवस्यवः ॥ २ ॥

यमग्निं यज्ञासः सर्वे यज्ञाः संचरंति सहिता गच्छंति । श्रवस्यवो यजमानस्य प्रभूतां कीर्त्तिं संपादयंतो वाजासो हवींषि यमग्निं संचरंति प्राप्नुवंति । एवंविशिष्टोऽग्निर्दास्वतो हविःप्रक्षेपणादिदानवतो वृक्तबर्हिषः । वृक्तानि लूनानि बर्हींषि दर्भा येनासौ वृक्तबर्हिः । तस्य क्षयस्य । क्षियंति निवसंत्यस्मिन् स्वर्गसाधनफलानीति क्षयः । तस्य यजमानस्य यागार्थं होता देवानामाह्वाता भवति ॥ दास्वतः । दा दाने । असुन्प्रत्ययांतः । मतुपोऽदुपधात्वाद्वत्वं । धातुस्वरेणाद्युदात्त एव । क्षयस्य । क्षि निवासगत्योः । क्षयो निवास इत्याद्युदात्तत्वं । वृक्तबर्हिषः । वृजी वर्जने । वर्जनमत्रोपचाराच्छेदनं । निष्ठा । प्रत्ययस्वरेणांतोदात्तः । बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वं । यज्ञासः । यज्ञशब्दो यजयाचेत्यादिना नङ्प्रत्ययांतोऽंतोदात्तः । चरंति । चर गतिभक्षणयोः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वं । यद्वृत्तान्नित्यमिति निघाताभावः । वाजासः । वजेर्घञ् । वाजः । कर्षात्वत इत्यंतोदात्तत्वं । छांदसत्वात् ञ्नित्यादिर्नित्यमित्याद्युदात्तः । श्रवस्यवः । छंदसि परेच्छायामिति क्यच् । क्याच्छंदसीत्युप्रत्ययः । प्रत्ययस्वरेणांतोदात्तः ॥

॥ अथ तृतीया ॥

उत स्म यं शिशुं यथा नवं जनिष्टारणी ।

धर्तारं मानुषीणां विशामग्निं स्वध्वरं ॥ ३ ॥

उत । स्म । यं । शिशुं । यथा । नवं । जनिष्ट । अरणी इति ।

धर्तारं । मानुषीणां । विशां । अग्निं । सुऽअध्वरं ॥ ३ ॥

उत स्म अपि च मानुषीणां मनोर्जातानां विशां । विशंति प्रविशंति गर्भाशयमिति विशः प्रजाः । तासां धर्तारमाहारादिपाकद्वारेण शरीरधातूनां पोषकं स्वध्वरं शोभनयज्ञं यमग्निमरणी द्वे अरणी नवं नूतनं शिशुं यथा अपत्यमिव जनिष्ट अजनिषातां । अरणी प्रजानां पोषणार्थं चैतमग्निमसृजतामित्यर्थः ॥ शिशुं । शो तनूकरणे । आदेचेत्यादिना आत्वं । शः कित्सन्वच्चेत्युप्रत्ययः सन्वद्भावश्च । द्विर्भावोऽभ्यासस्य ह्रस्वश्च । सन्यत इतीत्वं । आतो धातोरित्याकारलोपः । नित्त्वादाद्युदात्तः । यथा । यथेति पदांत इति सर्वानुदात्तः । जनिष्ट । जनी प्रादुर्भावे ।

लुङ् । छांदसत्वाद्वचनव्यत्ययः । अरणी । ऋ गतौ । अर्तिसृभृधृधम्यंश्यवितृ-भ्योऽनिरित्यनिप्रत्यय आद्युदात्तः । आभ्यामर्ति गच्छत्यग्निरित्यरणी । कथमपादा-नार्थे औणादिकोऽनिः । ताभ्यामन्यत्रोणादयः । पा० ३.४.७५. । इति नियमाज्ञी-मादित्वात्सिद्धं । मानुषीणां । मनोर्जातावञ्यतौ षुक्चेत्यञ्प्रत्ययः षुगागमश्च । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं । विशां । विश प्रवेशने । कर्तरि क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं । स्वध्वरं । हिंसार्थस्य ध्वरतेः पचाद्यच् । न विद्यते ध्वरो यागहिंसा यस्मिन्नित्यध्वरः । बहुव्रीहिस्वरापवादत्वेन नञ्सुभ्यामित्यंतोदात्तः ॥

॥ अथ चतुर्थी ॥

उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणां ।
पुरु यो दग्धासि वनाग्ने पशुर्न यवसे ॥४॥

उत । स्म । दुःऽगृभीयसे । पुत्रः । न । ह्वार्याणां ।
पुरु । यः । दग्धा । असि । वना । अग्ने । पशुः । न । यवसे ॥४॥

उत स्म अपि च ह्वार्याणां कुटिलं गच्छतां सर्पाणां । यद्वा आस्कंदितादिग-तिविशेषेण वक्रगमनानामश्वानां पुत्रो न पुत्र इव बालसर्प इव । अशिक्षित-बालाश्व इव वा दुर्गृभीयसे । दुःखेन गृह्यसे । हे अग्ने यस्त्वं पुरु बहूनि वना वनानि दग्धासि दाहको भवसि । कथमिव । यवसे तृणे पशुर्न पशुरिव । अयमर्थः । अत्यं-तक्षुधार्त्तः पशुस्तृणविषये विसृष्टः सन् यथा सर्वं भक्षयति तद्वदित्यर्थः ॥ दुर्गृ-भीयसे । ग्रह उपादाने । यक् । ब्रुव ईडित्यनुवृत्तौ बहुलं छंदसीतीडागमः । ग्रहीत्या-दिना संप्रसारणं । हृग्रहोर्भश्छंदसीति भकारः । निघातः । ह्वार्याणां । ह्वृ कौटिल्ये । ऋहलोर्ण्यत् । आदिवृद्धिः । तित्स्वरितमिति स्वरितत्वं । पुरु । पॄ पालनपूर-णयोः । पॄभिदिव्यधिगृधिधृषिहृशिभ्य इति कुप्रत्ययः । उदोष्ठ्यपूर्वस्येत्युत्वं । प्रत्यय-स्वरेणांतोदात्तत्वं । असि । यद्वृत्तान्नित्यमिति न निघातः ॥

॥ अथ पंचमी ॥

अध स्म यस्यार्चयः सम्यक्संयंति धूमिनः ।
यदीमह त्रितो दिव्युप ध्मातेव धमति शिशीते ध्मातरी यथा ॥५॥

अध । स्म । यस्य । अर्चयः । सम्यक् । संऽयंति । धूमिनः ।
यत् । ईं । अह । त्रितः । दिवि । उप । ध्माताऽइव । धमति । शिशीते । ध्मातरि । यथा ॥५॥

अध स्म अपि च धूमिनो धूमवतो यस्याग्नेरर्चयोऽर्चींषि सम्यक् शोभनं संयंति सर्वतः प्राप्नुवंति चितस्त्रिषु स्थानेषु ततो व्याप्तः चीणि स्थानानि वातीत्य दिव्यंतरिक्षे यद्यदा ईमयमात्मानमुपधमति उपवर्धयति तदा ज्वालाः सर्वतो निर्गच्छंतीत्यर्थः। कथमिव। ध्मातेव। कर्मारो यथा भस्त्रादिभिरग्निं संवर्धयति तद्वत्स्वात्मानं वर्धयतीत्यर्थः। किंच ध्मातरि यथा। यथा ध्मातृसमीपे विद्यमानोऽग्निस्तेन ध्मायमान आत्मानं शिशीते तीक्ष्णीकरोति तद्वत्स्वयमेव स्वात्मानं तीक्ष्णीकरोतीत्यर्थः। अहेति पादपूरणः॥ यंति। इण् गतौ। यच्छब्दयोगान्निघाताभावः। धमति। ध्मा शब्दाग्निसंयोगयोः। पाघ्रादिना धमादेशः। पूर्ववन्निघाताभावः। शिशीते। शो तनूकरणे। व्यत्ययेनात्मनेपदी। श्लावित्यनुवर्तमाने बहुलं छंदसीति विकरणस्य श्लुः। आदेच उपदेशे शितीत्यात्वं। श्लाविति द्विर्वचनं। बहुलं छंदसीत्यभ्यासस्येत्वं। उभे अभ्यस्तसंज्ञायामात ई हल्यघोरितीत्वं। तिङ उत्तरत्वान्निघाताभावः॥

॥ अथ षष्ठी ॥

तवाहमग्न ऊतिभिर्मित्रस्य च प्रशस्तिभिः।
द्वेषोयुतो न दुरिता तुर्याम मर्त्यानां॥६॥
तव। अहं। अग्ने। ऊतिऽभिः। मित्रस्य। च। प्रशस्तिऽभिः।
द्वेषःऽयुतः। न। दुःऽइता। तुर्याम। मर्त्यानां॥६॥

हे अग्ने मित्रस्य सर्वेषां मित्रभूतस्य तवोतिभिर्युष्मत्कर्तृकरक्षणैर्युष्मत्प्रशस्तिभिश्चास्मत्कृतैः स्तोत्रैश्च मर्त्यानां शत्रुभूतानां मनुष्याणां दुरिता दुरितानि तत्कर्तृकानि पापसाधनकर्माणि द्वेषोयुतो न द्वेषयुक्तान् शत्रूनिव तुर्याम। तरेयं। अयमर्थः। त्वद्रक्षणैस्त्वत्संबंधिस्तुतिभिश्च बाह्याभ्यंतरशत्रून् तरेयमित्यर्थः॥ ऊतिभिः। अव रक्षणे। क्तिन्। ज्वरत्वरस्रिव्यविमवामुपधायाश्चेत्यूठ्। ऊतियूतिसातिहेतिकीर्तयश्चेत्यंतोदात्तो निपातितः। प्रशस्तिभिः। शन्सु स्तुतौ। क्तिन्। कृदुत्तरपदप्रकृतिस्वरापवादत्वेन तादौ च निति कृत्यताविति गतेरुदात्तत्वं। द्वेषोयुतः। द्विष अप्रीतौ। भावेऽसुन्प्रत्ययः। यु मिश्रणे। कर्तरि क्विप्। तुक्। कृदुत्तरपदप्रकृतिस्वरत्वं। तुर्याम। तृ प्लवनतरणयोः। प्रार्थनायां लिङ्। यासुट्। लिङः सलोपोऽनंत्यस्येति सकारलोपः। बहुलं छंदसीति शपो लुक्। उदोष्ठ्यपूर्वस्य बहुलं छंदसीत्युत्वं। यासुडागमस्योदात्तत्वाच्छेषनिघातः। अपादादाविति प्रतिषेधान्निघाताभावः॥

॥ अथ सप्तमी ॥

तं नो॑ अग्ने अ॒भी नरो॑ र॒यिं स॑हस्व॒ आ भ॑र ।

स क्षे॑पय॒त्स पो॑षय॒द्भुव॒द्वाज॑स्य सा॒तय॑ उ॒तैधि॒ पृ॒त्सु नो॑ वृ॒धे ॥७॥

तं । नः॒ । अ॒ग्ने॒ । अ॒भि । नरः॑ । र॒यिं । स॒ह॒स्वः॒ । आ । भ॒र॒ ।

सः । क्षे॒प॒य॒त् । सः । पो॒ष॒य॒त् । भुव॑त् । वाज॑स्य । सा॒तये॑ । उ॒त । ए॒धि॒ । पृ॒त्ऽसु । नः॒ । वृ॒धे ॥७॥

हे अग्ने सहस्वो बलवन्नरो हविषां नेतारो नोऽस्माकं तं रयिं लोके प्रसिद्धं पश्वादिलक्षणं धनमभ्याभर । आभिमुख्येनाहर । पूर्वोक्तः सोऽग्निः क्षेपयत् । अस्मदीयान् शत्रून् क्षेपयतु । सोऽग्निः पोषयत् । अस्मान्पोषयतु । वाजस्यान्नस्य सातये लाभाय भुवत् । भवतु । उत अपि च हे अग्ने पृत्सु पृतनासु युद्धेषु नोऽस्माकं वृधे समृद्धय एधि । भव । संग्रामे शत्रुविजयार्थं स त्वं समृद्धिं कुर्विन्त्यर्थः ॥ सहस्वः । षह मर्षणे । असुन् । सहत्यनेन शत्रूनिति सहो बलं । मतुप् । मादुपधाया इति वत्वं । मतुवसो रुः संबुद्धौ छंदसीति रुत्वं । आमंत्रितस्य चेति निघातः । क्षेपयत् । क्षिप प्रेरणे । णिजंताल्लेट् । इतश्च लोपः । लेटोऽडाटावित्यडागमः । शप्गुणायादेशौ पररूपत्वं च । पोषयत् । पुष पुष्टौ । भुवत् । भू सत्तायां । भूसुवोस्तिङीति गुणप्रतिषेधः । उवङ् । एधि । अस भुवि । घ्वसोरेद्धावभ्यासलोपश्चेत्येत्वं । तस्यासिद्धत्वाद्धुझल्भ्यो हेर्धिरिति धिरादेशः । निघातः । पृत्सु । पदादिष्वित्यादिना पृतनाशब्दस्य पृदादेशः । सावेकाचत्वादंतोदात्तत्वं ॥

॥ इति चतुर्थस्य प्रथमे प्रथमो वर्गः ॥

अग्न ओजिष्ठमिति सप्तर्चं दशमं सूक्तं । ऋष्यादि विनियोगश्च पूर्ववत् । चतुर्थीसप्तम्यौ पंक्ती । अग्न ओजिष्ठमंत्याचतुर्थ्यौ चेत्यनुक्रांतं ॥

॥ तत्र प्रथमा ॥

अग्न॒ ओजि॑ष्ठ॒मा भ॑र द्यु॒म्नम॒स्मभ्य॑मध्रिगो ।

प्र नो॑ रा॒या परी॑णसा॒ रत्सि॒ वाजा॑य॒ पंथां॑ ॥१॥

अग्ने॑ । ओजि॑ष्ठं । आ । भ॒र॒ । द्यु॒म्नं । अ॒स्मभ्यं॑ । अ॒ध्रि॒गो॒ इत्य॑ध्रिऽगो ।

प्र । नः॒ । रा॒या । परी॑णसा । रत्सि॑ । वाजा॑य । पंथां॑ ॥१॥

हे अग्ने ओजिष्ठं बलवत्तमं द्युम्नं । द्योतते कटकमुकुटादिरूपेण सर्वत्र प्रकाशत

इति द्युम्नं धनं। अस्मभ्यमाभर। आहर। हे अध्रिगो अधृतगमन। अधृतमप्रतिहतं गमनं यस्येत्यधृता अनिवारिता गावो रश्मयो यस्येति वाधृतगुरध्रिगुः। तस्य संबोधनं। नोऽस्मान् परीणसा परितो व्यापकेन राया धनेन प्रकर्षेण योजय। वाजायान्नलाभाय पंथां पंथानमन्नस्य मत्समीपप्राप्तिसाधनं मार्गं रत्सि। विलिख। कुर्वित्यर्थः॥ ओजिष्ठं। उब्ज आर्जवे। उब्जेर्बलोपश्चेत्यसुन् बलोपश्च। गुणः। ओजः। तदस्यास्तीत्यर्थेऽस्मायामेधेत्यादिना विनिः। अतिशायन इतीष्ठन्। विन्मतोर्लुक्। टेरिति टिलोपः। नित्त्वादाद्युदात्तः। द्युम्नं। द्युत दीप्तावित्यस्माद्धातोः सुम्नद्युम्नेत्यादिना नक्प्रत्ययो मकारश्चांतादेशो निपात्यते। प्रत्ययस्वरेणांतोदात्तः। अध्रिगो। अधृतशब्दस्य अध्यादेशः। गोशब्दस्योपसर्जनहृस्वत्वं। आमंत्रितस्य निघातः। परीणसा। णस कौटिल्येऽत्र व्याप्त्यर्थो धातूनामनेकार्थत्वात्। अस्मात्संपदादिलक्षणो भावे क्विप्। परि प्राप्तं नस् व्यापनं यस्य तत्तथोक्तं। उपसर्गादसमासेऽपीति णत्वं। अत्र प्रापणक्रियया युक्तस्य परेर्णसतिं प्रत्युपसर्गसंज्ञा नास्ति यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञाः। पा० १.४.६०.३.। इति न्यायात्। अतः कथं णत्वं। एवं तर्ह्युपसर्गाद्बहुलमिति वचनात् णसो णत्वं भविष्यति। निपातस्य चेति पूर्वपदस्य दीर्घः। बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरत्वं। रत्सि। रद विलेखने। भौवादिकः। बहुलं छंदसीति शपो लुक्। पादादित्वान्निघाताभावः। पंथां। द्वितीयैकवचन इतोऽत् सर्वनामस्थान इत्यत्। नकारलोपश्छांदसः। पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं॥

॥ अथ द्वितीया ॥

त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना।
त्वे असुर्य१मारुहत्क्राणा मित्रो न यज्ञियः॥२॥
त्वं। नः। अग्ने। अद्भुत। क्रत्वा। दक्षस्य। मंहना।
त्वे इति। असुर्यं। आ। अरुहत्। क्राणा। मित्रः। न। यज्ञियः॥२॥

हे अग्ने अद्भुत सामर्थ्यातिशयेन सर्वेषामाश्चर्यभूत त्वं नोऽस्माकं क्रत्वा कर्मणास्मत्कृतेन यज्ञादिव्यापारेण प्रीतः सन् दक्षस्य बलस्य धनस्य वा मंहना मंहनं नाम दानं कुर्विति शेषः। यतः कारणात्त्वे त्वय्यसुर्यमसुरघ्नं बलमारुहत् आरूढं अतो मित्रो न सूर्य इव यज्ञियो यज्ञार्हस्त्वं क्राणा यज्ञघातकराक्षसापनोदन-

लक्षणानि कर्माणि कुर्वाणो भव ॥ अद्भुत । आमंत्रितस्याद्युदात्तत्वं । क्रत्वा । डुकृञ् करणे । कृञः कतुरिति कतुप्रत्ययः । ककारो गुणवृद्धिप्रतिषेधार्थः । यणादेशः । क्रतुः कर्म । तृतीयैकवचने जसादिषु वावचनमिति वचनान्नाभावाभावः । दक्षस्य । दक्ष गतिहिंसनयोः । दक्ष्यंते हिंस्यंतेऽनेन शत्रव इति दक्षं बलं । करणाधिकरणयोश्चेति घञ् । ञित्वादाद्युदात्तः । मंहना । मंहतिर्दानकर्मा । सुपां सुलुगित्याकारादेशः । त्वे । सुपां सुलुगित्यादिना ङेः शेआदेशः । सुबादेशत्वादनुदात्तः । त्वयच्छब्दः प्रत्ययस्वरेणांतोदात्तः । एकादेश उदात्तेनोदात्त इत्येकादेशस्योदात्तत्वं । आरुहत् । रुहेर्धातोर्लुङि कृमृदृरुहिभ्यश्छंदसीति च्लेरङादेशः । ङित्वाद्गुणाभावः । कृण्वाना । डुकृञ् करणे । शानच् । बहुलं छंदसीति विकरणस्य लुक् । यणादेशः । सुपां सुलुगित्यात्वं । चित इत्यंतोदात्तः । यज्ञियः । यज्ञमर्हतीत्यस्मिन्नर्थे यज्ञर्त्विग्भ्यां घखञाविति घः । प्रत्ययस्वरेणांतोदात्तः ॥

॥ अथ तृतीया ॥

त्वं नो॑ अग्न ए॒षां गयं॑ पु॒ष्टिं च॑ वर्धय ।
ये स्तोमे॑भिः॒ प्र सू॒रयो॒ नरो॑ म॒घान्या॑न॒शुः ॥ ३ ॥

त्वं । नः॒ । अ॒ग्ने॒ । ए॒षां॒ । गय॑ं । पु॒ष्टिं । च॒ । व॒र्ध॒य॒ ।
ये । स्तोमे॑भिः । प्र । सू॒रयः॑ । नरः॑ । म॒घानि॑ । आ॒न॒शुः ॥ ३ ॥

हे अग्ने त्वमेषां नस्त्वत्स्तावकानामस्माकं गयं । गम्यते निवासायेति गयं गृहं गीयते स्तूयत इति वा गयं धनं । पुष्टिं च गवादिविषयां पुष्टिं च वर्धय । प्रापय । वृद्धिं प्रापय । ये लोके प्रसिद्धाः सूरयो लब्धवर्णा नरः स्तोतारो मनुष्याः स्तोमेभिः स्तोमैः स्तोत्रैर्मघानि मंहनीयानि गवादिधनानि यथा प्रानशुः प्राप्नुवन् तद्वद्वयमपीत्यर्थः ॥ गयं । गृहपक्षे गमेरघ्न्यादयश्चेति यत्प्रत्ययांतो मकारलोपश्च निपात्यते । धनपक्षे गा स्तुतौ । अस्माद्यत्प्रत्ययः । ह्रस्वत्वं । यतोऽनाव इत्याद्युदात्तत्वं । पुष्टिं । पुष पुष्टौ । स्त्रियां क्तिन् । छांदसत्वादंतोदात्तत्वं । स्तोमेभिः । ष्टुञ् स्तुतौ । अर्तिस्तुसुहु इत्यादिना मन् । गुणः । नित्वादाद्युदात्तः । आनशुः । अशू व्याप्तौ । लिट् । द्विर्वचनं । हलादिशेषः । अत आदेरित्यात्वं । अश्नोतेश्चेति नुडागमः । निघातः ॥

॥ अथ चतुर्थी ॥

ये अग्ने चंद्र ते गिरः शुंभंत्यश्वराधसः ।

शुष्मेभिः शुष्मिणो नरो दिवश्चिद्येषां बृहत्सुकीर्तिर्बोधति त्मना ॥४॥

ये । अग्ने । चंद्र । ते । गिरः । शुंभंति । अश्वऽराधसः ।

शुष्मेभिः । शुष्मिणः । नरः । दिवः । चित् । येषां । बृहत् । सुऽकीर्तिः । बोधति । त्मना ॥४॥

हे अग्ने चंद्र सर्वेषां प्राणिनामाह्लादकर ये नरस्ते गिरस्त्वत्संबंधिस्तोत्ररूपा वाचः शुंभंति शोभनाः कुर्वंति तेऽश्वराधसोऽश्वधना भवंति । एतेन समृद्धिरुपलक्ष्यते । किंच । शुष्मिणो बलवंतः संतः शुष्मेभिः शुष्मैः स्वकीयैर्बलैः सद्भिः शत्रुशोषका भवंति । येषां त्वत्संबंधिनं स्तवं कुर्वतां दिवश्चिदाकाशादपि बृहन्महती सुकीर्तिर्भवति । सर्वदिगंतरावर्तिनी कीर्तिर्भवतीत्यर्थः । एवंविधं त्वां गयस्त्मना आत्मना स्वयमेव बोधति । बोधयति ॥ शुंभंति । शुभ शुम्भ दीप्तौ । तुदादिः । पादादित्वान्निघाताभावः । लसार्वधातुकानुदात्तत्वे प्राप्ते सति शिष्टत्वाद्विकरणस्वर एव । अश्वराधसः । अशू व्याप्तौ । अशूप्रुषीत्यादिना क्वन् । अश्नुते व्याप्नोत्यध्वानमित्यश्वः । नित्त्वादाद्युदात्तः । राध साध संसिद्धौ । असुन् । राध्नुवंति साधयंत्यनेन धर्मादीनीति राधो धनं । बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वं । बृहत् । बृह बृहि वृद्धौ । शतृ । ङीपो लोपश्छांदसः । प्रत्ययस्वरः । बोधति । बुध अवगमने । ण्यंतात् शपि कृते तस्य छंदस्युभयथेति सार्वधातुकसंज्ञायां णिलोपः । यद्वृत्तान्नित्यमिति निघाताभावः । धातुस्वरेणाद्युदात्तः । त्मना । मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः ॥

॥ अथ पंचमी ॥

तव त्ये अग्ने अर्चयो भ्राजंतो यंति धृष्णुया ।

परिज्मानो न विद्युतः स्वानो रथो न वाजयुः ॥५॥

तव । त्ये । अग्ने । अर्चयः । भ्राजंतः । यंति । धृष्णुऽया ।

परिऽज्मानः । न । विऽद्युतः । स्वानः । रथः । न । वाजऽयुः ॥५॥

हे अग्ने धृष्णुया धृष्णवोऽत्यंतप्रगल्भा भ्राजंतो दीप्यमानास्त्ये ते प्रसिद्धा अर्चयस्त्वदीया रश्मयो यंति । सर्वतो गच्छंति । कथमिव । परिज्मानः परितो

गंध्यः सर्वतो व्याप्ता विद्युतो नाचिरप्रभा इव। अनेन प्रकाशातिशय उक्तः। स्वानः शब्दायमानो रथो न रथ इव। अनेनार्चिषां स्वनाधिक्यमुक्तं। वाजयुर्न अन्नकाम इवान्नार्थं युद्धेषु शत्रुविजयाय यथा प्रवर्तते तद्वदित्यर्थः। अनेनाहुतिविषयोऽभिलाष उक्तः॥ यंति। इण् गतौ। धृष्णुया। ञिधृषा प्रागल्भ्ये। त्रसिगृधिधृषीत्यादिना क्नुप्रत्ययः। आदितश्च। पा० ७. २. १६.। इतीट्प्रतिषेधः। बहुवचने सुपां सुलुगित्यादिना याजादेशः। चित इत्यंतोदात्तत्वं। परिज्मानः। व्रज व्रज गतौ। परिपूर्वाद्धातोरन्येभ्योऽपि दृश्यंत इति मनिन्। अकारलोपश्छांदसः। नित्त्वादाद्युदात्तः। वाजयुः। वाजमात्मन इच्छतीति क्यच्। न छंदस्यपुत्रस्येतीत्वदीर्घयोः प्रतिषेधः। क्याच्छंदसीत्युप्रत्ययः॥

॥ अथ षष्ठी ॥

नू नो अग्न ऊतये सबाधसश्च रातये।
अस्माकासश्च सूरयो विश्वा आशास्तरीषणि ॥ ६॥
नु। नः। अग्ने। ऊतये। सऽबाधसः। च। रातये।
अस्माकासः। च। सूरयः। विश्वाः। आशाः। तरीषणि ॥ ६॥

हे अग्ने नोऽस्माकं नु क्षिप्रमूतये रक्षायै भव। सबाधसश्च दारिद्रनिमित्तबाधसहितस्य च रातये धनानां दानाय भव। किंच अस्माकासोऽस्माकाः पुत्रमित्रादयः सूरयः स्तोतारो विश्वाः सर्वा आशा दिशस्तरीषणि। तासां तरणे क्षमा भवंतु। अथवा आशाः कामाः। अयमर्थः। स्वाभिलषितप्रशस्तसमस्तवस्तुसंपादनं कुर्वित्यर्थः॥ सबाधसः। बाधेरसुन्। बाधसा सह वर्तत इति सबाधाः। वोपसर्जनस्येति सहस्य सभावः। कृदुत्तरपदप्रकृतिस्वरत्वं। रातये। रा दाने। क्तिन्। मंत्रे वृषेषपचमनविदभूवीरा उदात्त इत्यंतोदात्तः। अस्माकासः। तस्मिन्नणि च युष्मास्माकावित्यणि कृतेऽस्माकादेशः। छांदसत्वादणो लोपः। बहुवचनेऽसुगागमः। षष्ठीबहुवचने मध्योदात्तत्वेन दृष्टत्वात्तथाविधमादेशमत्रापि कृतवानाचार्यः। विश्वाः। विशेरशिप्रुषीत्यादिना क्वन्। नित्त्वादाद्युदात्तः। तरीषणि। तॄ प्लवनतरणयोः। कृतॄभ्यामीषन्। उ० ४. २६.। इतीषन्। बहुलवचनत्वेऽल्लोपाभावः। अंतोदात्तश्छांदसः॥

॥ अथ सप्तमी ॥

त्वं नो॑ अग्ने अंगिरः स्तुतः स्तवान आ भर।

होतर्विभ्वासहं र॒यिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे ॥७॥

त्वं। नः। अग्ने। अंगिरः। स्तुतः। स्तवानः। आ। भर।

होतरिति। विभ्वऽसहं। रयिं। स्तोतृऽभ्यः। स्तवसे। च। नः। उत। एधि। पृत्ऽसु। नः। वृधे ॥७॥

हे अग्ने अंगिरः। कार्यकारणयोरभेदोपचारादंगिरसां प्रकृतिभूतोऽप्यग्निरंगिरा इत्युच्यते। हे अंगिरः पूर्वैः पुरातनैर्महर्षिभिः स्तुतः स्तवान इदानींतनैश्च स्तूयमानस्त्वं विभ्वसहं महतामप्यभिभवितारं। अभिभवहेतुत्वादभिभवितृ धनमुच्यते। रयिं धनं नोऽस्माकमाभर। आहर। हे होतर्देवानामाह्वातः स्तोतृभ्यो नोऽस्मभ्यं स्तवसे स्तोतुं सामर्थ्यं च प्रयच्छ। उत अपि च पृत्सु युद्धेषु नोऽस्माकं वृधे समृद्धय एधि। भव॥ स्तवानः। ष्टुञ् स्तुतौ। शानचि कर्मणि व्यत्ययेन शप्प्रत्यय आद्युदात्तश्च। विभ्वासहं। संहितायां विभूनामिति षष्ठीबहुवचनस्य सुपामित्यादिना आकारादेशः। तत्पुरुषे कृति बहुलमिति षष्ठ्या अलुक्। पदकारास्तु विपूर्वाद्भवतेरगागमेऽन्येषामपि दृश्यत इति दीर्घत्वं च मत्वावग्रहं कुर्वंति। कृदुत्तरपदप्रकृतिस्वरत्वं। स्तवसे। ष्टुञ् स्तुतौ। तुमर्थेऽसेन्प्रत्ययः। नित्त्वादाद्युदात्तः॥

॥ इति चतुर्थस्य प्रथमे द्वितीयो वर्गः॥

जनस्य गोपा इति षड्चमेकादशं सूक्तमात्रेयस्य सुतंभरस्यार्षं जागतमाग्नेयं। तथा चानुक्रांतं। जनस्य षट् सुतंभरो जागतमिति॥ प्रातरनुवाक आश्विनशस्त्रे चास्य सूक्तस्य विनियोगः। जनस्य गोपास्त्वामग्न ऋतायवः। आ० ४.१३.। इति॥

॥ तत्र प्रथमा ॥

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे।

घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥१॥

जनस्य। गोपाः। अजनिष्ट। जागृविः। अग्निः। सुऽदक्षः। सुवितायं। नव्यसे।

घृतऽप्रतीकः। बृहता। दिविऽस्पृशा। द्युऽमत्। वि। भाति। भरतेभ्यः। शुचिः ॥१॥

जनस्य गोपा गोपायिता रक्षिता जागृविर्जागरणशीलः सदा प्रबुद्धः सुदक्षः

सुबलः सर्वैः श्लाघनीयबलः सोऽग्निर्नव्यसे नवतराय सुविताय लोकानां कल्याणायाजनिष्ट । जातः । घृतप्रतीको घृतेन प्रज्वलितांगो बृहता महता दिविस्पृशाभ्रंलिहेन तेजसा युक्तः शुचिः शुद्ध एवंविधोऽग्निर्भरतेभ्य ऋत्विग्भ्यस्तदर्थं द्युमद्दीप्तिमद्यथा भवति तथा विभाति । प्रकाशते ॥ गोपाः । गुपू रक्षणे । आयप्रत्ययः । गोपायतेः क्विप् । परत्वादतो लोपः । अथ परत्वादपृक्तलोपे कृते वर्णाश्रयत्वात् प्रत्ययलक्षणाभावेन यलोपो न स्यात् । लोपो व्योर्वलीति प्रथमं लोपग्रहणाज्ज्ञापकाद्यलोप एव भवति । लोपाजादेशस्य यलोपविधिं प्रति न स्थानिवद्भावः । प्रत्ययस्वरः । जागृविः । जागृ निद्राक्षये । जॄशॄस्तृजागृभ्यः क्विनिति क्विन्प्रत्ययः । जाग्रोऽविचिण्णल्ङित्स्विति प्रतिषेधाद्गुणाभावः । नित्त्वादाद्युदात्तः । सुदक्षः । आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं । सुविताय । तन्वादीनां छंदस्युपसंख्यानमिति सोरुवङादेशः । सूपमानात् क्त इत्युत्तरपदांतोदात्तत्वं । नव्यसे । नवशब्दादातिशायनेऽर्थ ईयसुन्प्रत्ययः । ईकारलोपश्छांदसः । अतो लोपः । *आद्युदात्तः । दिविस्पृशा । हृद्द्युभ्यां ङेरुपसंख्यानमित्यलुक् । कृदुत्तरपदप्रकृतिस्वरत्वं । द्युमत् । ह्रस्वनुड्भ्यां मतुबिति ह्रस्वात्परस्य मतुपोऽंतोदात्तत्वं ॥*

॥ अथ द्वितीया ॥

यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समीधिरे ।
इंद्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥२॥

यज्ञस्य । केतुं । प्रथमं । पुरःऽहितं । अग्निं । नरः । त्रिऽसधस्थे । सं । ईधिरे ।
इंद्रेण । देवैः । सऽरथं । सः । बर्हिषि । सीदत् । नि । होता । यजथाय । सुऽक्रतुः ॥२॥

नर ऋत्विजो यज्ञस्य यागस्य केतुं प्रज्ञापकं पुरोहितं यजमानैः पुरस्कृतमिंद्रेण देवैश्च सरथं तेषां मान्यत्वात्समानरथमग्निं त्रिषधस्थे त्रिस्थाने विहारप्रदेशे प्रथमं समीधिरे । समैंधत । सुक्रतुः शोभनकर्मा होता देवानामाह्वाता सोऽग्निर्बर्हिषि बर्हिर्युक्ते तस्मिन् स्थाने यजथाय यज्ञाय निषीदत् । प्रतिष्ठितोऽभवदिति यावत् ॥ केतुं । कित ज्ञाने । औणादिक उप्रत्ययः । अंतोदात्तः । पुरोहितं । पुरोऽव्ययमिति गतिसंज्ञायां गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं । त्रिषधस्थे । आहवनीयादिलक्षणेन त्रिप्रकारेणाग्निना सह तिष्ठतीति त्रिषधस्थः । कप्रत्ययः । सधमादस्थयोश्छंदसीति सधादेशः । कृदुत्तरपदप्रकृतिस्वरत्वं । सीदत् । सदेः पाघ्रादिना

सीदादेशः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । पादादित्वान्निघाताभावः । यवयाय । यजेरौणादिको ऽथप्रत्ययः । प्रत्ययस्वरेणांतोदात्तः ॥

॥ अथ तृतीया ॥

असंमृष्टो जायसे मात्रोः शुचिर्मंद्रः कविरुदतिष्ठो विवस्वतः ।

घृतेन त्वावर्धयन्नग्न आहुत धूमस्ते केतुरभवद्दिवि श्रितः ॥ ३ ॥

असंऽमृष्टः । जायसे । मात्रोः । शुचिः । मंद्रः । कविः । उत् । अतिष्ठः । विवस्वतः ।

घृतेन । त्वा । अवर्धयन् । अग्ने । आऽहुत । धूमः । ते । केतुः । अभवत् । दिवि । श्रितः ॥ ३ ॥

हे अग्ने मात्रोररण्योः । स्वजननिमित्तादरणी मातरावित्युच्येते । ताभ्यामसंमृष्टोऽबाधित एवं जायसे । प्रादुर्भूतो भवसि । मंद्रः सर्वैः स्तुत्यः कविः क्रांतः सर्वत्र व्याप्तः । अथवा मेधावी शुचिस्त्वं विवस्वतोऽग्निहोत्राद्यर्थं गृहे विशेषेण वसतो यजमानादुदतिष्ठः । उदितोऽभवः । पूर्वे महर्षयस्त्वा त्वां घृतेनावर्धयन् । वृद्धिमनयन् । हे आहुत आहुतिभिर्हुत ते तव दिव्यंतरिक्षे श्रितो व्याप्तो धूमः केतुः प्रज्ञापकोऽभवत् । अग्न्यनुमापकत्वाद्धूमस्य ॥ मात्रोः । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं । मंद्रः । मदि स्तुतिमोदमदस्वप्नकांतिगतिषु । अत्र स्तुत्यर्थादस्मात्स्फायितंचीत्यादिना रक् । अंतोदात्तः । कविः । क्रमेरिन् सर्वधातुभ्य इतीन्प्रत्ययः । बाहुलकत्वान्मकारस्य वत्वं रेफलोपश्च । व्यत्ययेनांतोदात्तत्वं । उदतिष्ठः । उत्पूर्वादूर्ध्वकर्मवाचिनस्तिष्ठतेरात्मनेपदाभावः । विवस्वतः । विपूर्वाद्वसतेः संपदादिलक्षणो भावे क्विप् । तदस्यास्तीति मतुप् । मादुपधायाश्चेति वत्वं । मतुपोऽनुदात्तत्वाद्धातुस्वरः ॥

॥ अथ चतुर्थी ॥

अग्निर्नो यज्ञमुप वेतु साधुयाग्निं नरो वि भरंते गृहेगृहे ।

अग्निर्दूतो अभवद्धव्यवाहनोऽग्निं वृणाना वृणते कविक्रतुं ॥ ४ ॥

अग्निः । नः । यज्ञं । उप । वेतु । साधुऽया । अग्निं । नरः । वि । भरंते । गृहेऽगृहे ।

अग्निः । दूतः । अभवत् । हव्यऽवाहनः । अग्निं । वृणानाः । वृणते । कविऽक्रतुं ॥ ४ ॥

साधुया सर्वपुरुषार्थानां साधकोऽग्निर्नो यज्ञमस्मदीयं यागं प्रत्युपवेतु । आगच्छतु । नरो मनुष्या गृहे गृहेऽनुगृहमग्निं विभरंते । विहरंति । विहरणं

कुर्वंतीत्यर्थः । हव्यवाहनो हव्यानां हविषां वोढाग्निर्दूतो देवानां दूतोऽभवत् । वृणानाः संभजमानाः संतः कविक्रतुं क्रांतयज्ञमग्निं वृण्वते । संभजंते ॥ सायुजा । सुपां सुलुगित्यादिना विभक्तेर्यादेशः ॥

॥ अथ पंचमी ॥

तुभ्येदमग्ने मधुमत्तमं वचस्तुभ्यं मनीषा इयमस्तु शं हृदे ।
त्वां गिरः सिंधुमिवावनीर्महीरा पृणंति शवसा वर्धयंति च ॥५॥
तुभ्यं । इदं । अग्ने । मधुमत्ऽतमं । वचः । तुभ्यं । मनीषा । इयं । अस्तु । शं । हृदे ।
त्वां । गिरः । सिंधुंऽइव । अवनीः । महीः । आ । पृणंति । शवसा । वर्धयंति । च ॥५॥

हे अग्ने तुभ्य तुभ्यं त्वदर्थं मधुमत्तममत्यंतमधुरमिदं वचः क्रियते । हृदे हृदि शं सुखं कुर्वतीयं मनीषा स्तुतिस्तुभ्यमस्तु । गिरः स्तुतिरूपा वाचस्त्वामापृणंति । पूरयंति । शवसा बलेन वर्धयंति च । कथमिव । महीर्महत्योऽवनीरवन्यो नद्यः सिंधुमिव समुद्रमिव ॥

॥ अथ षष्ठी ॥

त्वामग्ने अंगिरसो गुहा हितमन्वविंदञ्छिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमंगिरः ॥६॥
त्वां । अग्ने । अंगिरसः । गुहा । हितं । अनु । अविंदन् । शिश्रियाणं । वनेऽवने ।
सः । जायसे । मथ्यमानः । सहः । महत् । त्वां । आहुः । सहसः । पुत्रं । अंगिरः ॥६॥

हे अग्नेऽंगिरस ऋषयो गुहा गुहायां हितं निहितं निगूढं वने वने वृक्षे वृक्षे शिश्रियाणमाश्रितं त्वामन्वविंदन् । अलभंत । महन्महता सहः सहसा बलेन युक्तः स त्वं मथ्यमानो जायसे । हे अंगिरोऽंगिरसां प्रकृतिभूतस्त्वां सहसः पुत्रमाहुः ॥ शिश्रियाणं । श्रिञ् सेवायां । लिटः कानच् । शपः श्लुः । श्लाविति द्विर्वचनं । इयङादेशः । चित्त्वादंतोदात्तः ॥

॥ इति चतुर्थस्य प्रथमे तृतीयो वर्गः ॥

प्राग्नये बृहत इति षडृचं द्वादशं सूक्तं सुतंभरस्यार्षं त्रैष्टुभमाग्नेयं । प्राग्नय इत्यनुक्रांतं ॥ प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चेदं सूक्तं विनियुक्तं । सूत्रितं च । प्राग्नये बृहते प्र वेधसे । आ० ४.१३. । इति ॥

॥ तत्र प्रथमा ॥

प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म ।
घृतं न यज्ञ आस्येऽसुपूतं गिरं भरे वृषभाय प्रतीची ॥१॥
प्र । अग्नये । बृहते । यज्ञियाय । ऋतस्य । वृष्णे । असुराय । मन्म ।
घृतं । न । यज्ञे । आस्ये । सुऽपूतं । गिरं । भरे । वृषभाय । प्रतीची ॥१॥

बृहते सामर्थ्यातिशयेन महते यज्ञियाय यज्ञार्हाय ऋतस्योदकस्य वृष्णे वर्षित्रे । ऋतमित्युदकनामसु पाठात् । असुराय बलवते ॥ असेरौणादिक उरन्प्रत्ययः ॥ वृषभाय कामानां वर्षित्रेऽग्नये मन्म ज्ञानसाधनं प्रतीचीमभिमुखीं गिरं स्तुतिरूपां वाचं प्रभरे । प्रणयामि । कथमिव । सुपूतं सम्यक्संस्कृतमास्ये प्रहुतं यज्ञे घृतं न घृतमिव । आस्ये प्रहुतं घृतं यथा प्रीतिकरं भवति तथा प्रीतिकरीं स्तुतिमित्यर्थः ॥

॥ अथ द्वितीया ॥

ऋतं चिकित्व ऋतमिच्चिकिद्ध्यृतस्य धारा अनु तृंधि पूर्वीः ।
नाहं यातुं सहसा न द्वयेन ऋतं सपाम्यरुषस्य वृष्णः ॥२॥
ऋतं । चिकित्वः । ऋतं । इत् । चिकिद्धि । ऋतस्य । धाराः । अनु । तृंधि । पूर्वीः ।
न । अहं । यातुं । सहसा । न । द्वयेन । ऋतं । सपामि । अरुषस्य । वृष्णः ॥२॥

ऋतं स्तोत्रं हे चिकित्वो जानन्नग्ने त्वं ऋतं मया क्रियमाणमिदं स्तोत्रं चिकिद्धि । जानीहि ॥ कित ज्ञाने । जुहोत्यादिः । लोटि रूपं । इदिति पूरणः । ऋतमिति पदस्य परस्मिन्नामंत्रिते विद्यमानेऽपि छांदसत्वात्परांगवद्भावाभावः ॥ किंच पूर्वीर्बह्वीर्ऋतस्योदकस्य धारास्तस्य पोषणार्थमुत्पादयितुमनुतृंधि । मेघाननुविध्य । सहसा बलेन युक्तोऽहं यातुं कर्मणां नाशकरीं हिंसां न सपामि । न स्पृशामि । न करोमीति यावत् । द्वयेन च सत्यानृताभ्यां यत्किंचिदवैदिकं कृत्यं न सपामि ॥ षप समवाय इति धातुः ॥ किंतु अरुषस्य रोचमानस्य वृष्णः कामानां वर्षितुस्तव ऋतं स्तोत्रमेव सपामि ॥

॥ अथ तृतीया ॥

कया नो अग्न ऋतयन्नृतेन भुवो नवेदा उचथस्य नव्यः ।
वेदा मे देव ऋतुपा ऋतूनां नाहं पतिं सनितुरस्य रायः ॥३॥

कया । नः । अग्ने । ऋतयन् । ऋतेन । भुवः । नवेदाः । उचथस्य । नव्यः ।
वेद । मे । देवः । ऋतुऽपाः । ऋतूनां । न । अहं । पतिं । सनितुः । अस्य । रायः ॥ ३ ॥

हे अग्ने ऋतयन् सर्वप्राणिनां जीवनहेतुकमुदकं कुर्वन् कया केनापृतेन सत्येन क्रियमाणेन कर्मणा न उचथस्यास्मदीयस्य स्तोत्रस्य नवेदा ज्ञाता भुवः । भवेः । नव्यः स्तुत्य ऋतूनां ऋतूपाः । द्वितीय ऋतुशब्दोऽनुवादकः । देवो द्योतमानोऽग्निर्मे मां वेद । वेत्तु । सनितुर्भजमानस्यास्य मम रायः पश्वादिलक्षणस्य पतिं स्वामिनं तमग्निमहं न जानामि ॥ भुवः । भू सत्तायां । लिङर्थे लेट्युडागमः । उवङादेशः । नवेदाः । न न वेत्तीति वेत्तीत्यस्मिन्नर्थे वर्तते । कथमेतल्लभ्यते । निपातनात् । द्विनञ्पूर्वस्यासुन्प्रत्ययांतस्य वेदेरेकस्य नञो लोपोऽन्यस्य प्रकृतिभावश्च स्कंदस्वामिना निपातितः । पाणिनिना तु नभ्राण्नपादिति सूत्रेन वेत्तीत्येतस्मिन्नर्थे निपातितः । अस्यार्थस्यानुपपन्नत्वात् स्कंदस्वामिपक्ष एवाश्रीयते ॥

॥ अथ चतुर्थी ॥

के ते अग्ने रिपवे बंधनासः के पायवः सनिषंत द्युमंतः ।
के धासिमग्ने अनृतस्य पांति क आसतो वचसः संति गोपाः ॥ ४ ॥

के । ते । अग्ने । रिपवे । बंधनासः । के । पायवः । सनिषंत । द्युऽमंतः ।
के । धासिं । अग्ने । अनृतस्य । पांति । के । असतः । वचसः । संति । गोपाः ॥ ४ ॥

हे अग्ने ये रिपवे स्वकीयस्य शत्रोः बंधनासो बंधकाः स्युस्ते त्वत्संबंधिनस्ते पुरुषाः के कीदृशाः । सामर्थ्यातिशयादेवंविधा इति केनापि ज्ञातुं न शक्यंत इत्यर्थः । ये पायवो जनानां रक्षितारो द्युमंतो दीप्तिमंतः सनिषंत दीनेभ्यो धनं प्रयच्छंति त्वदीयाः के कीदृशाः । येऽनृतस्यासत्यस्य धासिं धारकं जनं पांति रक्षंति ते त्वदीया जनाः के संति । न केऽपीत्यर्थः । येऽसतो दुष्टस्याभिशापादिलक्षणस्य वचसो गोपा गोपायितारो रक्षितारस्ते त्वदीयाःके संति । न केऽपीत्यर्थः । अथवा ये के जना रिपोर्बंधकाः । ये के पायवो रक्षितारः सनिषंत धनं प्रयच्छंति द्युमंतः । ये केऽनृतस्यासत्यस्य धासिं धारकं जनं पांति अनृतजनितपापात्परिहृत्य सन्मार्गप्रदानेन रक्षंति । ये केऽसतोऽभिशापादिलक्षणाद्वचसो गोपा गोपायितारः संति ते सर्वे त्वदीयाः । त्वदुपासका इत्यर्थः ॥

॥ अथ पंचमी ॥

सखायस्ते विषुणा अग्न एते शिवासः संतो अशिवा अभूवन्।
अधूर्षत स्वयमेते वचोभिर्ऋजूयते वृजिनानि ब्रुवंतः ॥५॥
सखायः। ते। विषुणाः। अग्ने। एते। शिवासः। संतः। अशिवाः। अभूवन्।
अधूर्षत। स्वयं। एते। वचःऽभिः। ऋजुऽयते। वृजिनानि। ब्रुवंतः ॥५॥

हे अग्ने तव सखायः स्तोतारो विषुणा विप्रकीर्णाः सर्वत्र व्याप्ता एते पूर्वमशिवाः परनिंदादिकुर्वाणास्त्वत्परिचर्यां त्यजंतोऽभद्राः संत इदानीं त्वत्परिचर्यां कुर्वंतः शिवासः शिवा आढ्या अभूवन्। किंच य ऋजूयत ऋजु सम्यगाचरतेऽपि मह्यं वचोभिरसाधूक्तिभिर्वृजिनानि कुटिलानि ब्रुवंतस्त एते मम सपत्नाः स्वयमेवाधूर्षत। अहिंस्यंत ॥ धूर्वतेर्हिंसाकर्मण इदं रूपं ॥

॥ अथ षष्ठी ॥

यस्ते अग्ने नमसा यज्ञमीट्ट ऋतं स पात्यरुषस्य वृष्णः।
तस्य क्षयः पृथुरा साधुरेतु प्रसर्स्राणस्य नहुषस्य शेषः ॥६॥
यः। ते। अग्ने। नमसा। यज्ञं। ईट्टे। ऋतं। सः। पाति। अरुषस्य। वृष्णः।
तस्य। क्षयः। पृथुः। आ। साधुः। एतु। प्रऽसर्स्राणस्य। नहुषस्य। शेषः ॥६॥

हे अग्ने यो मनुष्यो यज्ञं यजनीयं ते त्वां मनसा स्तोत्रेणेट्टे स्तौति। यद्वा ते तुभ्यं यज्ञं यागं नमसान्नरूपेण हविषेट्टे यजति ॥ अस्मिन् पक्षे यजेर्बहुलं छंदसीति शपः श्लुः। श्लाविति द्विर्वचनं। बहुलं छंदसीति संप्रसारणं। सवर्णदीर्घः। जकारस्य टकारः॥ योऽरुषस्य रोचमानस्य वृष्णः कामानां वर्षितुरग्नेर्ऋतं स्तोत्रं पाति रक्षति तस्य यजमानस्य क्षयो गृहं पृथुर्विस्तीर्णं भवति। पश्वादिलक्षणैर्धनैः संपूर्णं भवतीत्यर्थः। प्रसर्स्राणस्य प्रकर्षेण परिचर्यां गच्छतो नहुषस्य मनुष्यस्य साधुः कामानां साधकः शेषः। शिष्यत इति शेषः। पुत्र ऐतु। आगच्छतु। भवत्वित्यर्थः ॥

॥ इति चतुर्थस्य प्रथमे चतुर्थो वर्गः ॥

अर्चंतस्त्वेति षडृचं त्रयोदशं सूक्तं सुतंभरस्यार्षं गायत्रमाग्नेयं। अनुक्रांतं च। अर्चंतो गायत्रं त्विति ॥ प्रातरनुवाक आग्नेयक्रतौ गायत्रछंदस्याश्विनशस्त्र

इदमादिके द्वे सूक्ते। सूचितं च। अर्चंतस्त्वेति सूक्ते। आ० ४.१३.। इति ॥ आहव-नीयोपस्थाने त्वमग्ने सप्रथा असीत्येका। सूचितं च। सं नः सृज सुमत्या वाज-वत्या त्वमग्ने सप्रथा असीति च। आ० ३.१०.। इति ॥ अश्वमेधे पौष्णेष्टौ त्वमग्ने सप्रथा इति प्रथमाज्यभागानुवाक्या। त्वमग्ने सप्रथा असि सोम यास्ते मयोभुव इति सूत्रितौ। आ० १०.६.। इति ॥

॥ तत्र प्रथमा ॥

अर्चंतस्त्वा हवामहेऽर्चंतः समिधीमहि। अग्ने अर्चंत ऊतये ॥१॥

अर्चंतः। त्वा। हवामहे। अर्चंतः। सं। इधीमहि। अग्ने। अर्चंतः। ऊतये ॥१॥

हे अग्ने त्वा त्वामर्चंतः पूजयंतो वयं हवामहे। आह्वयामः। अर्चंतः स्तुवंतो वयमूतये रक्षणाय तर्पणाय वा त्वां समिधीमहि। समिद्भिः संदीपयामः। अर्चंत इति तृतीयं पदमादरातिशयार्थं ॥

॥ अथ द्वितीया ॥

अग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशः। देवस्य द्रविणस्यवः ॥२॥

अग्नेः। स्तोमं। मनामहे। सिध्रं। अद्य। दिविऽस्पृशः। देवस्य। द्रविणस्यवः ॥२॥

द्रविणस्यवो द्रविणं धनमिच्छंतो वयं दिविस्पृशः सूर्ये आकाशं व्याप्नुवतो देवस्य द्योतमानस्याग्नेः सिध्रं पुरुषार्थानां साधकं स्तोमं स्तोत्रमद्यास्मिन्नहनि मनामहे। ब्रूमः ॥

॥ अथ तृतीया ॥

अग्निर्जुषत नो गिरो होता यो मानुषेष्वा। स यक्षद्दैव्यं जनं ॥३॥

अग्निः। जुषत। नः। गिरः। होता। यः। मानुषेषु। आ। सः। यक्षत्। दैव्यं। जनं ॥३॥

होता देवानामाह्वाता योऽग्निर्मानुषेष्वा वसति सोऽग्निर्नोऽस्माकं गिरः स्तुतीर्जुषत। सेवतां। सोऽग्निर्दैव्यं जनं देवसंबंधिनं जनं यक्षत्। यजतु ॥

॥ अथ चतुर्थी ॥

त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः। त्वया यज्ञं वि तन्वते ॥४॥

त्वं। अग्ने। सऽप्रथाः। असि। जुष्टः। होता। वरेण्यः। त्वया। यज्ञं। वि। तन्वते ॥४॥

हे अग्ने जुष्टः सर्वदा प्रीतो वरेण्यः सर्वैर्वरणीयो होता त्वं सप्रथाः सर्वतः

पृथुरसि । भवसि । तथाह यास्कः । सप्रथाः सर्वतः पृथुः । नि० ६.७.। इति । किंच सर्वे यजमानास्त्वया साधनेन यज्ञं वितन्वते ॥

॥ अथ पंचमी ॥

त्वाम॑ग्ने वाज॒सात॑मं॒ विप्रा॑ व॒र्धन्ति॒ सुष्टु॑तं । स नो॑ रास्व सु॒वीर्यं॑ ॥५॥

त्वां । अ॒ग्ने॒ । वा॒ज॒ऽसात॑मं । विप्राः॑ । व॒र्धन्ति॒ । सुऽस्तु॑तं । सः । नः॒ । रा॒स्व॒ । सु॒ऽवीर्यं॑ ॥५॥

हे अग्ने विप्रा मेधाविनः स्तोतारो वाजसातमं । वाजोऽन्नं । तद्दतं सुष्टुतं पूर्वैर्महर्षिभिः सम्यक् स्तुतं तं त्वां वर्धंति । स्तोत्रैर्वर्धयंति । स त्वं नोऽस्मभ्यं सुवीर्यं सर्वैः श्लाघनीयं बलं रास्व । देहि ॥

॥ अथ षष्ठी ॥

अग्ने॑ ने॒मिर॒राँ इ॑व दे॒वाँस्त्वं प॑रि॒भूर॑सि । आ राध॑श्चि॒त्रमृं॑जसे ॥६॥

अग्ने॑ । ने॒मिः । अ॒रान्ऽइ॑व । दे॒वान् । त्वं । प॒रि॒ऽभूः । अ॒सि॒ । आ । राधः॑ । चि॒त्रं । ऋं॒ज॒से॒ ॥६॥

हे अग्ने त्वं देवान् परिभूरसि । स्वतेजसा परिभवसि । कथमिव । नेमिः प्रकाशमानश्चक्रस्य वाह्यो वलयोऽरानिव नाभावर्पितान् सूक्ष्मान् स्थासका-निव । किंच त्वं चित्रं नानाविधं राधः । साधयंत्यनेन पुरुषार्थानिति राधो धनं । आ ऋंजसे । स्तोतृभ्यः प्रसाधय । धननामसु पाठाद्राधो धनमित्युक्तं ॥

॥ इति चतुर्थस्य प्रथमे पंचमो वर्गः ॥

अग्निं स्तोमेनेति षडृचं चतुर्दशं सूक्तं सुतंभरस्यार्षं गायत्रमाग्नेयं । अग्निं स्तो-मेनेत्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

अ॒ग्निं स्तोमे॑न बोधय समिधा॒नो अम॑र्त्यं । ह॒व्या दे॒वेषु॒ नो द॑धत् ॥१॥

अ॒ग्निं । स्तोमे॑न । बो॒ध॒य॒ । स॒म्ऽइ॒धा॒नः । अम॑र्त्यं । ह॒व्या । दे॒वेषु॑ । नः॒ । द॒ध॒त् ॥१॥

हे स्तोतरमर्त्यममरणधर्माणमग्निं स्तोमेन स्तोत्रेण बोधय । स्वाभिलषितार्थ-सिद्धये प्रबोधय । योऽग्निः समिधानः स्तोत्रैः सम्यक् प्रकाशमानः स नो हव्या-स्मदीयानि हव्यानि हवींषि देवेषु दधत् । निदधातु ॥

॥ अथ द्वितीया ॥

तमध्वरेष्वीळते देवं मर्ता अमर्त्यं । यजिष्ठं मानुषे जने ॥ २ ॥

तं । अध्वरेषु । ईळते । देवं । मर्ताः । अमर्त्यं । यजिष्ठं । मानुषे । जने ॥ २ ॥

मर्ता मनुष्या देवं द्योतमानममर्त्यममरणधर्माणं मानुषे मनुष्याणां संबंधिनि जने लोके यजिष्ठं यष्टृतमं तमग्निमध्वरेषु सप्ततंतुष्वीळते । स्तुवंति ॥

॥ अथ तृतीया ॥

तं हि शश्वंत ईळते स्रुचा देवं घृतश्चुता । अग्निं हव्याय वोळ्हवे ॥ ३ ॥

तं । हि । शश्वंतः । ईळते । स्रुचा । देवं । घृतऽश्चुता । अग्निं । हव्याय । वोळ्हवे ॥ ३ ॥

शश्वंतो बहवः स्तोतारस्तं देवमग्निमीळते । स्तुवंति । कीदृशास्ते । घृतश्चुता घृतं क्षरंत्या स्रुचा सहिताः । किमर्थं स्तुवंति । हव्याय हव्यवहनार्थं चरुपुरोडाशादिलक्षणं हविर्वोढवे वोढुं ॥

॥ अथ चतुर्थी ॥

अग्निर्जातो अरोचत घ्नन्दस्यून् ज्योतिषा तमः । अविंदद्गा अपः स्वः ॥ ४ ॥

अग्निः । जातः । अरोचत । घ्नन् । दस्यून् । ज्योतिषा । तमः । अविंदत् । गाः ।
अपः । स्व१रिति स्वः ॥ ४ ॥

जातोऽरण्योर्मंथनेन प्रादुर्भूतोऽग्निर्दस्यून् यज्ञविघ्नकारिणः शत्रून् घ्नन् हिंसन् ज्योतिषा स्वेन तेजसा तमो घ्नन्नरोचत । अदीप्यत । किंच गा अप उदकानि स्वः सूर्यं चाविंदत् । अवेदयत् ॥

॥ अथ पंचमी ॥

अग्निमीळेन्यं कविं घृतपृष्ठं सपर्यत । वेतु मे शृणवद्धवं ॥ ५ ॥

अग्निं । ईळेन्यं । कविं । घृतऽपृष्ठं । सपर्यत । वेतु । मे । शृणवत् । हवं ॥ ५ ॥

हे जना ईळेन्यं स्तुत्यं कविं क्रांतदर्शिनं घृतपृष्ठं दीप्तोपरिभागमग्निं सपर्यत । पूजयत । सोऽग्निर्मे हवं मदीयमाह्वानं वेतु । कामयतां । शृणवत् । शृणोतु च ॥

॥ अथ षष्ठी ॥

अग्निं घृतेन वावृधुः स्तोमेभिर्विश्वचर्षणिं । स्वाधीभिर्वचस्युभिः ॥ ६ ॥

अग्निं । घृतेन । ववृधुः । स्तोमेभिः । विश्वऽचर्षणिं । सुऽआधीभिः । वचस्युऽभिः ॥ ६ ॥

ऋत्विजो विश्वचर्षणिं विश्वस्य द्रष्टारं स्वाधीभिः शोभनाध्यानैर्वचस्युभिः स्तुतिकामैर्देवैः समेतमग्निं घृतेन स्तोमेभिः स्तोमैः स्तोत्रैर्ववृधुः । अवर्धयन् ॥

॥ इति चतुर्थस्य प्रथमे षष्ठो वर्गः ॥

॥ इति पंचमे मंडले प्रथमोऽनुवाकः ॥

द्वितीयेऽनुवाके दश सूक्तानि । तत्र प्र वेधस इति पंचर्चं प्रथमं सूक्तमांगिरसस्य धरुणस्यार्षं त्रैष्टुभमाग्नेयं । अत्रानुक्रमणिका । प्र वेधसे पंचांगिरसो धरुण इति ॥ प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चेदं सूक्तं । सूचितं च । प्र वेधसे कवये त्वं नो अग्ने वरुणस्य विद्वान् । आ० ४.१३. । इति ॥

॥ तत्रेयं प्रथमा ॥

प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्याय ।
घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः ॥१॥
प्र । वेधसे । कवये । वेद्याय । गिरं । भरे । यशसे । पूर्व्याय ।
घृतऽप्रसत्तः । असुरः । सुऽशेवः । रायः । धर्ता । धरुणः । वस्वः । अग्निः ॥१॥

योऽग्निर्घृतप्रसत्तो हवीरूपेण घृतेन प्रसन्नोऽसुरो बलवान् सुशेवः । शोभनं शेवं सुखं यस्यासौ सुशेवः शेवमिति सुखनामसु पाठात् । रायो धनस्य धर्ता पोषको धरुणो हविषां धारको वस्वो वासकोऽग्निर्भवति वेधसे विधात्रे कवये क्रांतदर्शे वेद्याय स्तुत्याय । विदिरयं मनिना समानार्थो मनिश्च स्तुतिकर्मा । यशसे यशस्विने पूर्व्याय मुख्याय तस्मा अग्नये गिरं स्तुतिं प्रभरे । प्रणयामि ॥

॥ अथ द्वितीया ॥

ऋतेन ऋतं धरुणं धारयंत यज्ञस्य शाके परमे व्योमन् ।
दिवो धर्मन्धरुणे सेदुषो नॄञ्जातैरजाताँ अभि ये ननक्षुः ॥२॥
ऋतेन । ऋतं । धरुणं । धारयंत । यज्ञस्य । शाके । परमे । विऽओमन् ।
दिवः । धर्मन् । धरुणे । सेदुषः । नॄन् । जातैः । अजातान् । अभि । ये । ननक्षुः ॥२॥

ये यजमाना दिवो द्युलोकस्य धरुणे धारके धर्मन्यज्ञे सेदुष आसीनान् नॄनजातान्देवान् जातैर्मनुष्यैर्ऋत्विग्भिरभिननक्षुः अभिप्राप्नुवंति ते यजमाना यज्ञस्य

धरुणं धारकमृतं सत्यरूपमग्निं शाके कर्मणि निमित्ते परमे उत्कृष्टे व्योमन् स्थाने उत्तरवेद्यामृतेन स्तोमेन धारयंत । धारयंति ॥

॥ अथ तृतीया ॥

अंहोयुवस्तन्वस्तन्वते वि वयो महद्दुष्टरं पूर्व्याय ।
स संवतो नवजातस्तुतुर्यात्सिंहं न क्रुद्धमभितः परि ष्ठुः ॥३॥

अंहःऽयुवः । तन्वः । तन्वते । वि । वयः । महत् । दुस्तरं । पूर्व्याय ।
सः । संऽवतः । नवऽजातः । तुतुर्यात् । सिंहं । न । क्रुद्धं । अभितः । परि । स्थुः ॥३॥

ये यजमानाः पूर्व्याय मुख्यायास्मा अग्नये महदधिकं दुष्टरं राक्षसैर्दुःप्रापं वयो हवीरूपमन्नं प्रयच्छंति ते यजमानास्तन्वः स्वास्तनूरंहोयुवोऽंहसा वियोजिका वितन्वते । विस्तारयंति । नवजातः सोऽग्निः संवतः संगतान् शत्रून् तुतुर्यात् । तरतु । किंचाभितः सर्वतो वर्तमानाः शत्रवो मां परिवर्जयित्वा स्थुः । तिष्ठेयुः । कथमिव । मृगाः क्रुद्धं सिंहं न सिंहमिव ॥

॥ अथ चतुर्थी ॥

मातेव यद्भरसे पप्रथानो जनंजनं धायसे चक्षसे च ।
वयोवयो जरसे यद्दधानः परि त्मना विषुरूपो जिगासि ॥४॥

माताऽइव । यत् । भरसे । पप्रथानः । जनंऽजनं । धायसे । चक्षसे । च ।
वयःऽवयः । जरसे । यत् । दधानः । परि । त्मना । विषुऽरूपः । जिगासि ॥४॥

पप्रथानः सर्वत्र प्रथमानो यद्यस्त्वं मातेव जननीव जनं जनं सर्वं जनं भरसे बिभर्षि । किंच धायसे धारणाय चक्षसे दर्शनाय च सर्वैः प्रार्थ्यसे । यद्यदा दधानो धार्यमाणो भवसि तदा वयो वयः सर्वमन्नं जरसे । जरयसि । अपि च विषुरूपो नानारूपः सन् त्मनात्मना परिजिगासि । सर्वभूतानि परिगच्छसि ॥

॥ अथ पंचमी ॥

वाजो नु ते शवसस्पात्वंतमुरुं दोघं धरुणं देव रायः ।
पदं न तायुर्गुहा दधानो महो राये चितयन्नत्रिमस्पः ॥५॥

वाजः । नु । ते । शवसः । पातु । अंतं । उरुं । दोघं । धरुणं । देव । रायः ।
पदं । न । तायुः । गुहा । दधानः । महः । राये । चितयन् । अत्रिं । अस्परित्यस्पः ॥५॥

हे देव द्योतमानाग्ने उरुं पृथुं दोघं कामानां दोग्धारं रायो धनस्य धरुणं धारकं वाजो हविर्लक्षणमन्नं ते त्वदीयस्य शवसो बलस्यांतं समाप्तिं संपूर्तिं नु अद्य पातु । रक्षतु । तायुर्न तस्करो यथा गुहायां पदं द्रव्यं दधानो धारयन् रक्षति तद्वत् महो महते राये धनाय धनलाभार्थं चितयन् सन्मार्गे प्रकाशयन् अभिमस्यः । अभिमृषिमप्रीणयः ॥ स्पृ प्रीणनपारणयोरिति धातुः ॥

॥ इति चतुर्थस्य प्रथमे सप्तमो वर्गः ॥

बृहद्वय इति पंचर्चं द्वितीयं सूक्तमात्रेयस्य पूरोरार्षं । अंत्या पंक्तिः शिष्टा अनुष्टुभः । अग्निर्देवता । तथा चानुक्रांतं । बृहत्पूरुः पंक्त्यंतं हीति ॥ प्रातरनुवाक आग्नेये क्रतावानुष्टुभे छंदस्याश्विनशस्त्रे चेदमादीनि दश सूक्तानि चतुर्थनवमवर्जितानि । आदितस्त्रिषु सूक्तेष्वंत्यामुद्धरेत् । तथा च सूत्रितं । बृहद्वय इति दशानां चतुर्थनवमे उद्धरेदुत्तमामुत्तमां चादितस्त्रयाणां । आ० ४.१३. । इति ॥

॥ तत्रेयं प्रथमा ॥

बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।
यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः ॥ १ ॥
बृहत् । वयः । हि । भानवे । अर्च । देवाय । अग्नये ।
यं । मित्रं । न । प्रशस्तिऽभिः । मर्तासः । दधिरे । पुरः ॥ १ ॥

यद्वै भानवे दीप्तिमतेऽग्नये बृहद्वयो हवीरूपमन्नं दीयते हि । अतस्त्वमपि देवाय द्योतमानायाग्नये वयोऽर्च । प्रयच्छ । मर्तासो मनुष्या यमग्निं मित्रं न सखायमिव प्रशस्तिभिः प्रकृष्टाभिः स्तुतिभिः पुरो दधिरे पुरस्कुर्वंति ॥

॥ अथ द्वितीया ॥

स हि द्युभिर्जनानां होता दक्षस्य बाह्वोः ।
वि हव्यमग्निरानुषग्भगो न वारमृण्वति ॥ २ ॥
सः । हि । द्युऽभिः । जनानां । होता । दक्षस्य । बाह्वोः ।
वि । हव्यं । अग्निः । आनुषक् । भगः । न । वारं । ऋण्वति ॥ २ ॥

योऽग्निर्हव्यं हविर्देवेष्वानुषक् देवेष्वनुषक्तं करोति बाह्वोर्भुजयोर्दक्षस्य बलस्य द्युभिर्द्युतिभिर्युक्तः सोऽग्निर्जनानां यजमानानां होता देवानामाह्वाता

भवति । भगो न सूर्य इव वारं वरणीयं धनं व्युणति । विशेषेण प्रयच्छति मनुष्येषु ॥

॥ अथ तृतीया ॥

अस्य स्तोमे मघोनः सख्ये वृद्धशोचिषः ।
विश्वा यस्मिन्तुविष्वणि समर्ये शुष्ममादधुः ॥३॥

अस्य । स्तोमे । मघोनः । सख्ये । वृद्धऽशोचिषः ।
विश्वा । यस्मिन् । तुविऽस्वनि । सं । अर्ये । शुष्मं । आऽदधुः ॥३॥

मघोनो मघवतो धनवतो वृद्धशोचिषः । वृद्धानि शोचींषि तेजांसि यस्यासौ वृद्धशोचिः । तस्यैवंविधस्याग्नेः स्तोमे स्तोत्रे सख्ये च स्याम । तुविष्वणि बहुशब्देऽर्ये स्वामिनि यस्मिन्नग्नौ विश्वा ॥ सुपां सुलुगिति डादेशः ॥ विश्वे सर्वे ऋत्विजः शुष्मं बलं हविर्भिः स्तोत्रैश्च समादधुः सम्यगादधति ॥

॥ अथ चतुर्थी ॥

अधा ह्यग्न एषां सुवीर्यस्य मंहना ।
तमिद्यह्वं न रोदसी परि श्रवो बभूवतुः ॥४॥

अध । हि । अग्ने । एषां । सुऽवीर्यस्य । मंहना ।
तं । इत् । यह्वं । न । रोदसी इति । परि । श्रवः । बभूवतुः ॥४॥

हे अग्ने अध अथैषामस्माकं यजमानानां सुवीर्यस्य सर्वैः स्पृहणीयस्य बलस्य मंहना मंहनायै दानाय भव ॥ मंहतिर्दानकर्मा ॥ रोदसी द्यावापृथिव्यौ यह्वं न महांतं सूर्यमिव श्रवः सर्वैः श्रवणीयं तमित्तमग्निमेव परिबभूवतुः । परिगृह्णीतः ॥

॥ अथ पंचमी ॥

नू न एहि वार्यमग्ने गृणान आ भर ।
ये वयं ये च सूरयः स्वस्ति धामहे सचोतैधि पृत्सु नो वृधे ॥५॥

नु । नः । आ । इहि । वार्यं । अग्ने । गृणानः । आ । भर ।
ये । वयं । ये । च । सूरयः । स्वस्ति । धामहे । सचा । उत । एधि । पृत्ऽसु । नः । वृधे ॥५॥

हे अग्ने गृणानः स्तूयमानः सन् नु क्षिप्रमेहि । यज्ञं प्रत्यागच्छ । आगत्य च

नोऽस्मभ्यं वार्यं वरणीयं धनमाभर। संपादय। ये वयं यजमाना ये च सूरयः स्तोतारः सचा हविर्भिः सहिता उभे ये वयं स्वस्ति स्तोत्रं धामहे। कुर्मः। उत अपि च पृत्सु पृतनासु नोऽस्माकं वृधे समृद्धय एधि। भव॥

॥ इति चतुर्थस्य प्रथमेऽष्टमो वर्गः॥

आ यज्ञैरिति पंचर्चं तृतीयं सूक्तमात्रेयस्य पूरोरार्षमाग्नेयं। अंत्या पंक्तिः शिष्टाः पंक्त्यंतपरिभाषयानुष्टुभः। आ यज्ञैरित्यनुक्रमणिका॥ अंत्यावर्जे प्रातरनुवाकाश्विनशस्त्रयोर्बृहद्वय इत्यादिदशसूक्तमध्ये विनियोग उक्तः॥

॥ तत्रेयं प्रथमा॥

आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये।
अग्निं कृते स्वध्वरे पूरुरीळीतावसे॥१॥
आ। यज्ञैः। देव। मर्त्यः। इत्था। तव्यांसं। ऊतये।
अग्निं। कृते। सुऽअध्वरे। पूरुः। ईळीत। अवसे॥१॥

हे देव मर्त्यो मनुष्य ऋत्विगित्थेत्थं तव्यांसं स्वतेजोभिः प्रवृद्धमग्निमूतये तर्पणाय यज्ञैः स्तोत्रैराह्वयति। किंच पूरुर्मनुष्यः स्तोता कृते स्वध्वरे शोभने क्रतौ तमग्निमवसे रक्षणायेळीत। स्तौति॥

॥ अथ द्वितीया॥

अस्य हि स्वयशस्तर आसा विधर्मन्मन्यसे।
तं नाकं चित्रशोचिषं मंद्रं परो मनीषया॥२॥
अस्य। हि। स्वयशःऽतरः। आसा। विऽधर्मन्। मन्यसे।
तं। नाकं। चित्रऽशोचिषं। मंद्रं। परः। मनीषया॥२॥

हे विधर्मन्। विशिष्टो धर्मो यस्यासौ विधर्मा स्तोता। तस्य संबोधनं। हे स्तोतः स्वयशस्तरः सुयशसां मध्येऽतिशयेन सुयशास्त्वं मनीषया प्रकृष्टबुद्ध्या साधनेन प्रसिद्धमस्यामुं ह्यग्निमासास्येन वाचा मन्यसे। स्तौषि। किंविशिष्टमग्निं। नाकं सुखं। अकं दुःखं। न विद्यतेऽकं यस्य सः। तं चित्रशोचिषं चित्रतेजसं मंद्रं स्तुत्यं परः परस्तात्स्थितं॥

॥ अथ तृतीया ॥

अस्य वासा उ अर्चिषा य आयुक्त तुजा गिरा ।
दिवो न यस्य रेतसा बृहच्छोचंत्यर्चयः ॥३॥
अस्य । वै । असौ । ऊं इति । अर्चिषा । यः । अयुक्त । तुजा । गिरा ।
दिवः । न । यस्य । रेतसा । बृहत् । शोचंति । अर्चयः ॥३॥

योऽग्निस्तुजा जगद्रक्षणसमर्थेन बलेन गिरा स्तुत्यायुक्त संबद्धो भवति दिवो न द्योतमानस्यादित्यस्येव यस्याग्ने रेतसा प्रभया कृत्स्नं जगद्व्याप्तं यस्याग्नेर्बृहद्बृहंतोऽर्चयो दीप्तयः शोचंति प्रकाशंते अस्य वै खल्वग्नेरर्चिषा प्रभयासावादित्योऽर्चिष्मान्भवति । उ इति पूरणः ॥

॥ अथ चतुर्थी ॥

अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ ।
अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते ॥४॥
अस्य । क्रत्वा । विऽचेतसः । दस्मस्य । वसु । रथे । आ ।
अध । विश्वासु । हव्यः । अग्निः । विक्षु । प्र । शस्यते ॥४॥

विचेतसः सुमतय ऋत्विजोऽस्य दस्मस्य दर्शनीयस्यास्याग्नेः क्रत्वा कर्मणा यज्ञादिना वसु वसूनि धनानि रथ आ दधति । हव्यो यज्ञार्थमाह्वातव्यः सोऽग्निरध अथ उत्पत्त्यनंतरमेव विश्वासु सर्वासु विक्षु प्रजासु प्रशस्यते । स्तूयते ॥

॥ अथ पंचमी ॥

नू न इद्धि वार्यमासा सचंत सूरयः ।
ऊर्जो नपादभिष्टये पाहि शग्धि स्वस्तय उतैधि पृत्सु नो वृधे ॥५॥
नु । नः । इत् । हि । वार्यं । आसा । सचंत । सूरयः ।
ऊर्जः । नपात् । अभिष्टये । पाहि । शग्धि । स्वस्तये । उत । एधि । पृत्ऽसु । नः । वृधे ॥५॥

हे अग्ने नोऽस्मभ्यं वार्यं वरणीयं धनं नु क्षिप्रं यच्छ । इद्धीति पूरणौ । यतः सूरयः स्तोतारस्त्वत्तः सकाशादासास्येन स्तोत्रेण सचंत धनं लभंते । किंच हे ऊर्जो नपादन्नस्य न पातयितर्बलस्य पुत्र वा अभीष्टयेऽभीच्छते मह्यमन्नं

प्रयच्छेति शेषः। पाहि। अस्मानापद्भ्यो रक्ष। स्वस्तये क्षेमाय पश्वादिलक्षणस्य धनस्य क्षेमार्थं शग्धि। त्वां याचे॥ व्यत्ययेन मध्यमा॥ शक्तो भवेति वा। हे अग्ने उत अपि च पृत्सु पृतनासु नो वृधे समृद्धय एधि। भव॥

॥ इति चतुर्थस्य प्रथमे नवमो वर्गः॥

प्रातरग्निरिति पंचर्चं चतुर्थं सूक्तं। अत्रेयमनुक्रमणिका। प्रातर्मृक्तवाहा द्वित इति। मृक्तवाहा इति विशेषणविशिष्ट आत्रेयो द्वित ऋषिः। पंक्त्यंतं हीति हिशब्दादस्यापि सूक्तस्य पंचमी पंक्तिः। पंक्त्यंतपरिभाषया शिष्टा अनुष्टुभः॥ उक्तो विनियोगः प्रातरनुवाकाश्विनशस्त्रयोः॥

॥ तत्रेयं प्रथमा॥

प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः।
विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति॥१॥
प्रातः। अग्निः। पुरुऽप्रियः। विशः। स्तवेत। अतिथिः।
विश्वानि। यः। अमर्त्यः। हव्या। मर्तेषु। रण्यति॥१॥

पुरुप्रियो बहुप्रियो विशो यजमाने धनस्य निवेशकोऽतिथिः। यजमानानां गृहान्प्रति तिथिष्वभ्येतीत्यतिथिः। तथाह यास्कः। अतिथिरभ्यतितो गृहान्भवत्यभ्येति तिथिषु परकुलानीति वा परगृहाणीति वेति॥ एवंविधोऽग्निः प्रातः स्तवेत। स्तूयते। अमर्त्योऽमरणधर्मा योऽग्निर्मर्तेषु मनुष्येषु यजमानेषु स्थितानि विश्वानि सर्वाणि हव्या हव्यानि हवींषि रण्यति कामयते॥

॥ अथ द्वितीया॥

द्विताय मृक्तवाहसे स्वस्य दक्षस्य मंहना।
इंदुं स धत्त आनुषक्स्तोता चित्ते अमर्त्य॥२॥
द्विताय। मृक्तऽवाहसे। स्वस्य। दक्षस्य। मंहना।
इंदुं। सः। धत्ते। आनुषक्। स्तोता। चित्। ते। अमर्त्य॥२॥

हे अग्ने द्विताय द्वितपुत्राय मृक्तवाहसे। मृक्तं शुद्धं हविर्देवेभ्यो वहति प्रापयतीति मृक्तवाहाः। तस्मै स्वस्यात्मीयस्य दक्षस्य बलस्य धनस्य वा मंहना

मंहनायै दानाय भव। हे अमर्त्य नित्याग्ने यतः कारणात्ते तुभ्यं स मृक्तवाहा आनुषक् सर्वदानुषक्तमिदं सोमं धत्ते। धारयति। स्तोता चित् स्तोता च भवति॥

॥ अथ तृतीया ॥

तं वो दीर्घायुशोचिषं गिरा हुवे मघोनां।

अरिष्टो येषां रथो व्यश्वदावन्नीयते ॥३॥

तं। वः। दीर्घायुऽशोचिषं। गिरा। हुवे। मघोनां।

अरिष्टः। येषां। रथः। वि। अश्वऽदावन्। ईयते ॥३॥

हे अग्ने दीर्घायुशोचिषं दीर्घगमनदीप्तिं तं वः। पूजायां बहुवचनं। त्वां मघोनां धनिनां कृते गिरा स्तोत्रेण हुवे। आह्वयामि। हे अश्वदावन्नश्वानां दातर्येषां धनिनां रथो युद्धेष्वरिष्टः शत्रुभिरहिंसितो वीयते विगच्छतु॥

॥ अथ चतुर्थी ॥

चित्रा वा येषु दीधितिरासन्नुक्था पांति ये।

स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि ॥४॥

चित्रा। वा। येषु। दीधितिः। आसन्। उक्था। पांति। ये।

स्तीर्णं। बर्हिः। स्वःऽनरे। श्रवांसि। दधिरे। परि ॥४॥

येष्वृत्विक्षु चित्रा नानाविधा दीधितिर्यज्ञविषया क्रिया भवति। ये आसन्नास्य उक्थोक्थानि स्तोत्राणि पांति रक्षंति तैर्ऋत्विग्भिः स्तीर्णं स्तीर्णस्य बर्हिर्बर्हिषः पर्युपरि श्रवांस्यन्नानि हवींषि स्वर्णरे। स्वः स्वर्गं नरं यजमानं नयतीति स्वर्णरो यज्ञः। तस्मिन्निदधिरे। निधीयंते॥

॥ अथ पंचमी ॥

ये मे पंचाशतं ददुरश्वानां सधस्तुति।

द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणां ॥५॥

ये। मे। पंचाशतं। ददुः। अश्वानां। सधऽस्तुति।

द्युऽमत्। अग्ने। महि। श्रवः। बृहत्। कृधि। मघोनां। नृऽवत्। अमृत। नृणां ॥५॥

ये मघवानो दातारो मे मह्यं सधस्तुति स्तुत्या सहितं त्वत्स्तोत्रसमनंतरमश्वानां

पंचाशतं ददुः हे अमृताग्ने त्वं तेषां मघोनां नृणां द्युमत् दीप्तिमन्महि महद्बृहत्प-
रिवृढं नृवत्परिचारकमनुष्ययुक्तं श्रवोऽन्नं कृधि । कुरु । देहीत्यर्थः ॥

॥ इति चतुर्थस्य प्रथमे दशमो वर्गः ॥

अभ्यवस्था इति पंचर्चं पंचमं सूक्तं । अत्रेयमनुक्रमणिका । अभ्यवस्था
वव्रिर्गायत्र्यावनुष्टुभौ विराट्रूपेति । आत्रेयो वव्रिर्ऋषिः । प्रथमाद्वितीये गा-
यत्र्यौ तृतीयाचतुर्थ्यावनुष्टुभौ पंचमी विराट्रूपा एकादशिनस्त्रयोऽष्टकश्च वि-
राट्रूपेत्युक्तलक्षणोपेतत्वात् ॥

॥ तत्रेयं प्रथमा ॥

अभ्यवस्थाः प्र जायंते प्र वव्रेर्वव्रिश्चिकेत । उपस्थे मातुर्वि चष्टे ॥१॥

अभि । अवऽस्थाः । प्र । जायंते । प्र । वव्रेः । वव्रिः । चिकेत । उपऽस्थे । मातुः । वि । चष्टे ॥१॥

वव्रेर्ऋषेरभ्युत्तरोत्तरमवस्था अशोभना दशाः प्रजायंते । तादृशीर्वव्रिर्हविषां
संभक्ता सोऽग्निः प्रचिकेत । प्रजानीयात् । ज्ञात्वा चापनयत्विति भावः । योऽग्निर्मातुः
पृथिव्या उपस्थे समीपे स्थितं पदार्थजातं विचष्टे पश्यति ॥

॥ अथ द्वितीया ॥

जुहुरे वि चितयंतोऽनिमिषं नृम्णं पांति । आ दृळ्हां पुरं विविशुः ॥२॥

जुहुरे । वि । चितयंतः । अनिऽमिषं । नृम्णं । पांति । आ । दृळ्हां । पुरं । विविशुः ॥२॥

ये विचितयंतस्तव प्रभावं जानंतो जनास्त्वा त्वामनिमिषं सर्वदा जुहुरे
यज्ञार्थं त्वामाह्वयंति आहूय च नृम्णं तव बलं हविर्भिः स्तोत्रैश्च पांति रक्षंति
ते दृळ्हां शत्रुभिः साधयितुमशक्यां पुरं पुरीमाविविशुः । प्रविशंति । शतं
पूर्भिरायसीभिर्नि पाहि । ऋग्वे० ७.३.७. । इति निगमः ॥

॥ अथ तृतीया ॥

आ श्वैत्रेयस्य जंतवो द्युमद्वर्धंत कृष्टयः ।
निष्कग्रीवो बृहदुक्थ एना मध्वा न वाजयुः ॥३॥

आ । श्वैत्रेयस्य । जंतवः । द्युऽमत् । वर्धंत । कृष्टयः ।
निष्कऽग्रीवः । बृहत्ऽउक्थः । एना । मध्वा । न । वाजऽयुः ॥३॥

जायंत इति जंतवः । कृष्टयो मनुष्या ऋत्विजो मध्वा न मधुनेव एनेनया

स्नुषा । यद्वा नकारश्चार्थः । मधुना च पीपेयन्त । निधमंतरिक्षं । तत्र भवस्य वैद्युतस्याग्नेर्धुमहीमिमबलमावर्धंत । अभिवर्धयंति । किंविधाः कृष्टयः । निष्कग्रीवो निष्केण सुवर्णेनालंकृतग्रीवाः । व्यत्ययेनैकवचनं । बृहदुक्थो बृहत्स्तोत्रा वाजयुरन्नकामाः ॥

॥ अथ चतुर्थी ॥

प्रियं दुग्धं न काम्यमजामि जाम्योः सचा ।

घर्मो न वाजजठरोऽदब्धः शश्वतो दभः ॥४॥

प्रियं । दुग्धं । न । काम्यं । अजामि । जाम्योः । सचा ।

घर्मः । न । वाजऽजठरः । अदब्धः । शश्वतः । दभः ॥४॥

जाम्योर्द्यावापृथिव्योः सचा सहायभूतोऽग्निर्दुग्धं न पय इव काम्यं कमनीयमजामि दोषरहितं प्रियमस्मदीयं स्तोत्रं शृणोतु । किंविधोऽग्निः । घर्मो न प्रवर्ग्य इव वाजजठरः । वाजोऽन्नं जठरे यस्य सः । घर्मो यथा हव्येनाज्येन पयसासिक्तो वाजजठरस्तद्वत् । हविर्जठर इत्यर्थः । अदब्धः शत्रुभिः स्वयमहिंसितः शश्वतः शाश्वतो नित्यो दभः शत्रूणां हिंसकः ॥

॥ अथ पंचमी ॥

क्रीळन्नो रश्म आ भुवः सं भस्मना वायुना वेविदानः ।

ता अस्य सन्धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः ॥५॥

क्रीळन् । नः । रश्मे । आ । भुवः । सं । भस्मना । वायुना । वेविदानः ।

ताः । अस्य । सन् । धृषजः । न । तिग्माः । सुऽसंशिताः । वक्ष्यः । वक्षणेऽस्थाः ॥५॥

हे रश्मे रश्मिमन्नग्ने क्रीळन् वनेषु क्रीडन् भस्मना स्वकार्येण भसितेन वायुना प्रेरकेण मरुता च संवेविदानः सम्यक् ज्ञायमानस्त्वं नोऽस्माकमाभुवः । अभिमुखो भव । वक्षणेस्था वक्षणे वह्नौ स्थिता वक्ष्यः । हविर्वहंतीति वक्ष्यो ज्वालाः । सुसंशिताः सुतीक्ष्णा धृषजः शत्रूणां धर्षिकास्ता ज्वाला अस्य यजमानस्य मम न तिग्मा न तीक्ष्णाः सन् । संतु ॥ असतेर्लेटि रूपं ॥

॥ इति चतुर्थस्य प्रथम एकादशो वर्गः ॥

यमग्न इति चतुर्ऋचं षष्ठं सूक्तमत्रीणां प्रयस्वतामार्षमाग्नेयं । अंत्या पंक्तिः

त्रिष्टुप् आनुष्टुभः । तथा चानुक्रांतं । यमग्ने चतुष्कं प्रयस्वंतः पंचांतं हेति ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥ अथ चतुर्वीराख्येऽहीने द्वितीयेऽहनीदं सूक्तमाज्यशस्त्रं । सूचितं च । यमग्ने वाजसातमेति द्वितीयेऽहन्याज्यं । आ० १०.२. । इति ॥

॥ तत्र प्रथमा ॥

यमग्ने वाजसातम त्वं चिन्मन्यसे रयिं ।

तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजं ॥१॥

यं । अग्ने । वाजऽसातम । त्वं । चित् । मन्यसे । रयिं ।

तं । नः । गीःऽभिः । श्रवाय्यं । देवऽत्रा । पनय । युजं ॥१॥

हे अग्ने हे वाजसातमात्यंतमन्नद त्वं यं रयिं धनमस्माभिर्दीयमानं हवीरूपं धनं मन्यसे बुध्यसे । चिदिति पादपूरणः । श्रवाय्यं श्रवणीयं शस्यं गीर्भिः स्तुतिभिर्युजं युक्तं नोऽस्मदीयं हविर्लक्षणं धनं तं देवत्रा देवेषु पनय । प्रापयेत्यर्थः ॥

॥ अथ द्वितीया ॥

ये अग्ने नेरयंति ते वृद्धा उग्रस्य शवसः ।

अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिरे ॥२॥

ये । अग्ने । न । ईरयंति । ते । वृद्धाः । उग्रस्य । शवसः ।

अप । द्वेषः । अप । ह्वरः । अन्यऽव्रतस्य । सश्चिरे ॥२॥

हे अग्ने ये जना वृद्धाः पश्वादिलक्षणैर्धनैः समृद्धाः संतस्ते तुभ्यं नेरयंति हवींषि न प्रयच्छंति त उग्रस्याधिकेन शवसो बलेनान्नेन वापनीताः । बलान्नहीना भवंतीत्यर्थः । किंचान्यव्रतस्यान्यद्वैदिकाद्विभक्तं व्रतं कर्म यस्य तस्यासुरस्य द्वेषस्तत्संबंधिनं विरोधं ह्वराऽतिहिंसां चापसश्चिरे । आत्मानं प्रापयंति ॥

॥ अथ तृतीया ॥

होतारं त्वा वृणीमहेऽग्ने दक्षस्य साधनं ।

यज्ञेषु पूर्व्यं गिरा प्रयस्वंतो हवामहे ॥३॥

होतारं । त्वा । वृणीमहे । अग्ने । दक्षस्य । साधनं ।

यज्ञेषु । पूर्व्यं । गिरा । प्रयस्वंतः । हवामहे ॥३॥

हे अग्ने प्रयस्वंतोऽन्नवंत एतन्नामका वयं दक्षस्य बलस्य साधकं साधयितारं त्वां होतारं देवानामाह्वातारं वृणीमहे। किंच यज्ञेषु पूर्व्यं मुख्यं त्वां गिरा स्तुतिरूपया वाचा हवामहे। स्तुमः ॥

॥ अथ चतुर्थी ॥

इत्था यथा त ऊतये सहसावन्दिवेदिवे।

राय ऋताय सुक्रतो गोभिः ष्याम सधमादो वीरैः स्याम सधमादः ॥४॥

इत्था। यथा। ते। ऊतये। सहसाऽवन्। दिवेऽदिवे।

राये। ऋताय। सुक्रतो इति सुऽक्रतो। गोभिः। स्याम। सधऽमादः। वीरैः।

स्याम। सधऽमादः ॥४॥

हे सहसावन् बलवन्नग्ने दिवे दिवेऽन्वहं वयं ते तवोतये रक्षणाय यथा स्याम तथेत्थेत्थं कुरु। हे सुक्रतो राये धनाय ऋताय यज्ञाय च यथा स्याम तथा कुरु। किंच वयं गोभिः सधमादः सह माद्यंतः स्याम। वीरैः पुत्रैश्च सधमादः सह माद्यंतः स्याम। तथा कुरु ॥

॥ इति चतुर्थस्य प्रथमे द्वादशो वर्गः ॥

मनुष्वत्त्वेति चतुर्ऋचं सप्तमं सूक्तमात्रेयस्य सप्तस्यार्षं। मनुष्वत्सप्त इत्यनुक्रमणिका। पंक्त्यंतं हेति पूर्वत्रोक्तत्वादिदमादीनि त्रीणि सूक्तानि पंक्त्यंतानि। शिष्टा अनुष्टुभः। अग्निर्देवता ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्रेयं प्रथमा ॥

मनुष्वत्त्वा नि धीमहि मनुष्वत्समिधीमहि।

अग्ने मनुष्वदंगिरो देवान्देवयते यज ॥१॥

मनुष्वत्। त्वा। नि। धीमहि। मनुष्वत्। सं। इधीमहि।

अग्ने। मनुष्वत्। अंगिरः। देवान्। देवऽयते। यज ॥१॥

हे अग्ने त्वा त्वां मनुष्वन्मनुरिव निधीमहि। मनुःशब्दो मनुपर्यायः ॥ नभोऽंगिरोमनुषां वत्युपसंख्यानमिति भसंज्ञायां रुत्वाभावः ॥ मनुष्वन्मनुरिव त्वा समिधीमहि। समिद्भिः संदीपयामः। हे अंगिरोऽंगारात्मकाग्ने देवयते देवकामाय यजमानाय मनुष्वन्मनवे मनोरपत्याय देवान् यज ॥

॥ अथ द्वितीया ॥

त्वं हि मानुषे जनेऽग्ने सुप्रीत इध्यसे ।
स्रुचस्त्वा यंत्यानुषक्सुजात सर्पिरासुते ॥ २ ॥
त्वं । हि । मानुषे । जने । अग्ने । सुऽप्रीतः । इध्यसे ।
स्रुचः । त्वा । यंति । आनुषक् । सुऽजात । सर्पिःऽआसुते ॥ २ ॥

हे अग्ने त्वं मानुषे जने मनुष्यलोके सुप्रीतः स्तोत्रैः सुष्ठु प्रीतः सन् इध्यसे । दीप्यसे । स्रुचो हविर्भिः संपूर्णा आनुषक् अनुषक्तं यथा भवति तथा त्वा त्वां यंति । प्राप्नुवंति । हे सुजात हे सर्पिरासुते घृतयुक्ताह्वेति ॥

॥ अथ तृतीया ॥

त्वां विश्वे सजोषसो देवासो दूतमक्रत ।
सपर्यंतस्त्वा कवे यज्ञेषु देवमीळते ॥ ३ ॥
त्वां । विश्वे । सऽजोषसः । देवासः । दूतं । अक्रत ।
सपर्यंतः । त्वा । कवे । यज्ञेषु । देवं । ईळते ॥ ३ ॥

सजोषसः सह प्रीयमाणा विश्वे सर्वे देवासो देवास्त्वां दूतमक्रत । अकुर्वन् । अतः कारणात् हे कवे क्रांतदर्शिन् देवं द्योतमानं त्वा त्वां सपर्यंतः परिचरंतो यजमाना यज्ञेष्वीळते । देवानाह्वातुं याचंते ॥

॥ अथ चतुर्थी ॥

देवं वो देवयज्ययाग्निमीळीत मर्त्यः ।
समिद्धः शुक्र दीदिह्यृतस्य योनिमासदः ससस्य योनिमासदः ॥ ४ ॥
देवं । वः । देवऽयज्यया । अग्निं । ईळीत । मर्त्यः ।
संऽइद्धः । शुक्र । दीदिहि । ऋतस्य । योनिं । आ । असदः । ससस्य । योनिं ।
आ । असदः ॥ ४ ॥

मर्त्यो मनुष्यः देवं द्योतमानमग्निमयणं वस्त्वां देवयज्यया देवयज्यायै देवयागार्थमीळीत । स्तोतुमर्हति । हे शुक्र शोचिष्मन् समिद्धो हविर्भिः प्रवृद्धः सन्

दीदिहि। दीप्यस्व। ऋतस्य सत्यभूतस्य ससस्य ऋषेर्मम योनिं योनिकारणं स्वर्गसाधनं यज्ञस्थानमासदः। देवतारूपेणासीद। आदरातिशयद्योतनार्थं पुनर्वचनं॥

॥ इति चतुर्थस्य प्रथमे त्रयोदशो वर्गः ॥

प्र विश्वसामन्निति चतुर्ऋचमष्टमं सूक्तं। आत्रेयो विश्वसामा ऋषिः। चतुर्थी पंक्तिः शिष्टा अनुष्टुभः। अग्निर्देवता। तथा चानुक्रांतं। प्र विश्वसामन्विश्वसामेति॥ उक्तो विनियोगः प्रातरनुवाकाश्विनशस्त्रयोः॥

॥ तत्रेयं प्रथमा ॥

प्र वि॑श्वसामन्नत्रि॒वदर्चा॑ पाव॒कशो॑चिषे।

यो अ॑ध्व॒रेष्वीड्यो॒ होता॑ म॒न्द्रत॑मो वि॒शि॥१॥

प्र। वि॒श्व॒ऽसा॒म॒न्। अ॒त्रि॒ऽवत्। अर्च॑। पा॒व॒कऽशो॑चिषे।

यः। अ॒ध्व॒रेषु॑। ईड्यः॑। होता॑। म॒न्द्रऽत॑मः। वि॒शि॥१॥

हे विश्वसामन्। ऋषेः संबोधनमेतत्। त्वमत्रिवदत्रिरिव पावकशोचिषे शोधकदीप्तये तस्मा अग्नये प्रार्च। प्रगाय। योऽग्निरध्वरेष्वीड्यः सर्वैर्यज्वभिः स्तुत्यो होता देवानामाह्वाता विशि जने मंद्रतमः स्तुत्यतमः॥

॥ अथ द्वितीया ॥

न्य१ग्निं जा॒तवे॑दसं॒ दधा॑ता दे॒वमृ॒त्विज॑म्।

प्र य॒ज्ञ ए॒त्वानु॒षग॒द्या दे॒वव्य॑चस्तमः॥२॥

नि। अ॒ग्निं। जा॒तऽवे॑दसं। दधा॑त। दे॒वं। ऋ॒त्विज॑ं।

प्र। य॒ज्ञः। ए॒तु॒। आ॒नु॒षक्। अ॒द्य। दे॒वव्य॑चःऽतमः॥२॥

हे यजमाना जातवेदसं जातप्रज्ञं जातधनं वा देवं द्योतमानमृत्विजमृतुयष्टारमग्निं निदधात। निधत्त। किंच देवव्यचस्तमो देवानामाप्ततमो यज्ञो यज्ञसाधनमस्माभिर्दीयमानं हविरानुषक् अनुषक्तं यथा भवति तथाद्यास्मिन्नहनि तमग्निं प्रैतु। गच्छतु॥

॥ अथ तृतीया ॥

चि॒कि॒त्विन्म॑नसं त्वा दे॒वं मर्ता॑स ऊ॒तये॑।

वरे॑ण्यस्य॒ तेऽव॑स इया॒नासो॑ अमन्महि॥३॥

चिकित्वित्ऽमनसं । त्वा । देवं । मर्तासः । ऊतये ।

वरेण्यस्य । ते । अवसः । इयानासः । अमन्महि ॥ ३ ॥

हे अग्ने चिकित्विन्मनसं । चिकित्विज्ज्ञानन्मनो यस्यासौ चिकित्विन्मनाः । तं देवं त्वा त्वामियानास उपगच्छंतो मर्तासो मनुष्या वयमूतये रक्षणार्थं वरेण्यस्य संभजनीयस्य ते तवावसोऽवसे तर्पणायामन्महि । स्तुमः ॥

॥ अथ चतुर्थी ॥

अग्ने चिकिद्ध्य१स्य न इदं वचः सहस्य ।

तं त्वा सुशिप्र दंपते स्तोमैर्वर्धंत्यत्रयो गीर्भिः शुंभंत्यत्रयः ॥ ४ ॥

अग्ने । चिकिद्धि । अस्य । नः । इदं । वचः । सहस्य ।

तं । त्वा । सुऽशिप्र । दंऽपते । स्तोमैः । वर्धंति । अत्रयः । गीःऽभिः । शुंभंति । अत्रयः ॥ ४ ॥

हे अग्ने हे सहस्य सहसो बलस्य पुत्र नोऽस्मदीयमस्येदं परिचरणमिदं वचः स्तोत्रं चिकिद्धि । जानीहि । हे सुशिप्र । शोभने शिप्रे हनू नासिके वा यस्यासौ सुशिप्रः । तस्य संबोधनं । सुशिप्र सुहनो दंपते गृहपते तं त्वामत्रयोऽत्रिपुत्राः स्तोमैः स्तोत्रैर्वर्धंति । वर्धयंति । अत्रयो गीर्भिः शुंभंति । अलंकुर्वंति ॥

॥ इति चतुर्थस्य प्रथमे चतुर्दशो वर्गः ॥

अग्ने सहंतमिति चतुर्ऋचं नवमं सूक्तं । अत्रानुक्रमणिका । अग्ने द्युम्नो विश्व-चर्षणिरिति । द्युम्न ऋषिः । चतुर्थी पंक्तिः । आद्यास्तिस्रोऽनुष्टुभः । अग्निर्देवता ॥ प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तांतःपातित्वादुक्तो विनियोगः ॥

॥ तत्रेयं प्रथमा ॥

अग्ने सहंतमा भर द्युम्नस्य प्रासहा रयिं ।

विश्वा यश्चर्षणीरभ्या३सा वाजेषु सासहत् ॥ १ ॥

अग्ने । सहंतं । आ । भर । द्युम्नस्य । प्रऽसहा । रयिं ।

विश्वाः । यः । चर्षणीः । अभि । आसा । वाजेषु । ससहत् ॥ १ ॥

हे अग्ने प्रासहा प्रकृष्टेन बलेन सहंतं शत्रूनभिभवंतं रयिं पुत्रं द्युम्नस्य द्युम्नाय मम ऋषय आभर । आहर ॥ चतुर्थ्यर्थे षष्ठी ॥ एतदेव विवृणोति । यः पुत्र

आसास्येन स्तोत्रेण युक्तः सन् वाजेषु युद्धेष्वभि आभिमुख्येन गतान् विश्वाः सर्वान् चर्षणीर्मनुष्यान् शत्रून् सासहत् अभिभवति ॥

॥ अथ द्वितीया ॥

तमग्ने पृतनाषहं रयिं सहस्व आ भर ।

त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः ॥२॥

तं । अग्ने । पृतनाऽसहं । रयिं । सहस्वः । आ । भर ।

त्वं । हि । सत्यः । अद्भुतः । दाता । वाजस्य । गोऽमतः ॥२॥

हे अग्ने सहस्वी बलवन् पृतनासहं पृतनाः सेना अभिभवितारं रयिं पुत्रं त्वमाभर । आहर । त्वं हि सत्यः सत्यभूतोऽद्भुतो महान् गोमतो गोभिर्युक्तस्य वाजस्यान्नस्य दाता ॥

॥ अथ तृतीया ॥

विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः ।

होतारं सद्मसु प्रियं व्यंति वार्या पुरु ॥३॥

विश्वे । हि । त्वा । सऽजोषसः । जनासः । वृक्तऽबर्हिषः ।

होतारं । सद्मऽसु । प्रियं । व्यंति । वार्या । पुरु ॥३॥

हे अग्ने सजोषसः सह प्रीयमाणा वृक्तबर्हिषो लूनबर्हिषो विश्वे सर्वे जनासो जना ऋत्विजः सद्मसु यज्ञगृहेषु होतारं देवानामाह्वातारं प्रियं सर्वेषां प्रीतिकरं त्वा त्वां पुरु पुरूणि बहूनि वार्या वरणीयानि धनानि व्यंति । याचंते ॥

॥ अथ चतुर्थी ॥

स हि ष्मा विश्वचर्षणिरभिमाति सहो दधे ।

अग्न एषु क्षयेष्वा रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥४॥

सः । हि । स्म । विश्वऽचर्षणिः । अभिऽमाति । सहः । दधे ।

अग्ने । एषु । क्षयेषु । आ । रेवत् । नः । शुक्र । दीदिहि । द्युऽमत् । पावक । दीदिहि ॥४॥

हे अग्ने स लोकेषु प्रसिद्धो विश्वचर्षणिर्व्रर्षिरभिमाति शत्रूणां हिंसकं सहो बलं दधे । धारयतु । हि ष्मेति पूरणौ । हे शुक्र शोचिष्मन् त्वं नोऽस्मदीयेषु क्षयेषु

गृहेषु रेवत् धनयुक्तं यथा भवति तथा दीदिहि । दीप्यस्व । हे पावक पापानां शोधकाग्ने त्वं द्युमद्दीप्तियुक्तं यशोयुक्तं च दीदिहि । दीप्यस्व ॥

॥ इति चतुर्थस्य प्रथमे पंचदशो वर्गः ॥

अग्ने त्वं न इति चतुर्ऋचं दशमं सूक्तं । अत्रानुक्रमणिका । अग्ने त्वं गौपायना लौपायना वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकर्चा द्वैपदमिति । विंशतिका द्विपदा विराज इत्युक्तत्वाच्च । अग्निर्देवता ॥ महापितृयज्ञ आहवनीयं प्रति गच्छंत ऋत्विज इदं सूक्तं जपेयुः । तथा च सूचितं । अथैनमभिसमायंति मा प्रगामाग्ने त्वं न इति जपंतः । आ॰ २.१९. । इति ॥ दशरात्रे षष्ठेऽहनि तृतीयसवने मैत्रावरुणस्याग्ने त्वमिति द्वे तं त्वा शोचिष्ठेत्येका । एवं मिलितो द्वैपदस्तृचः स्तोत्रियः । तथैव सूचितं । अग्ने त्वं नो अंतमोऽग्ने भव सुषमिधा । आ॰ ८.२. । इति ॥

॥ तत्रेमे प्रथमाद्वितीये ॥

अग्ने त्वं नो अंतम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥१॥२॥

अग्ने । त्वं । नः । अंतमः । उत । त्राता । शिवः । भव । वरूथ्यः ।
वसुः । अग्निः । वसुऽश्रवाः । अच्छ । नक्षि । द्युमत्ऽतमं । रयिं । दाः ॥१॥२॥

हे अग्ने वरूथ्यो वरणीयः संभजनीयः । यद्वा वरूथैः परिधिभिर्वृतस्त्वं नोऽस्माकमंतमोऽंतिकतमो भव । उतापि च त्राता रक्षकः शिवः सुखकरश्च भव । वसुर्वासकोऽग्निः सर्वेषामग्रणीर्वसुश्रवा व्याप्तान्नस्त्वमच्छाभिमुख्येन नक्षि । अस्मान्व्याप्नुहि । द्युमत्तममतिशयेन दीप्तिमंतं रयिं पश्वादिलक्षणं धनं दाः । अस्मभ्यं देहि ॥

॥ अथ तृतीयाचतुर्थ्यौ ॥

स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥३॥४॥

सः । नः । बोधि । श्रुधि । हवं । उरुष्य । नः । अघऽयतः । समस्मात् ।
तं । त्वा । शोचिष्ठ । दीदिऽवः । सुम्नाय । नूनं । ईमहे । सखिऽभ्यः ॥३॥४॥

हे अग्ने स त्वं नोऽस्मान् बोधि । बुध्यस्व । हवमस्मदीयमाह्वानं श्रुधि । शृणु । अघायतोऽघमिच्छतः समस्मात्सर्वस्माज्जनान्नोऽस्मानुरुष्य । रक्ष । हे

शोचिष्ठातिशोचिष्मन् दीदिवः स्वतेजोभिर्दीप्ताग्ने तं त्वां सुम्नाय सुखाय । सुम्न-मिति सुखनाम । तदर्थं सखिभ्यः समानख्यातिभ्यः पुत्रेभ्यस्तदर्थं च नूनमीमहे । याचामहे ॥

॥ इति चतुर्थस्य प्रथमे षोडशो वर्गः ॥

अच्छा वोऽग्निमिति नवर्चमेकादशं सूक्तं । अत्रानुक्रमणिका । अच्छा वो नव वसूयव आनुष्टुभमिति । आत्रेया वसूयुनामान ऋषयः । अनुष्टुप् । मंडला-दिपरिभाषयाग्निर्देवता ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥ प्रातःस-वनेऽच्छावाक वदस्वेत्युक्तेऽच्छा वोऽग्निमवस इत्यृचमनुब्रूयात् । तथा च सूत्रितं । अच्छा वोऽग्निमवस इत्यृचमन्वाह । आ० ५. ७. । इति ॥

॥ तत्रेयं प्रथमा ॥

अच्छा वो अग्निमवसे देवं गासि स नो वसुः ।
रासत्पुत्र ऋषूणामृतावा पर्षति द्विषः ॥ १ ॥
अच्छ । वः । अग्निं । अवसे । देवं । गासि । सः । नः । वसुः ।
रासत् । पुत्रः । ऋषूणां । ऋतऽवा । पर्षति । द्विषः ॥ १ ॥

हे वसूयवो वो यूयं देवमग्निमवसे रक्षणायाच्छा॰गासि । अभिप्रगायत । वसुरग्निहोत्रार्थं यजमानानां गृहे वासयिता सोऽग्निर्नोऽस्मभ्यं रासत् । कामान्द-दातु । ऋषूणामृषीणां पुत्रः । ऋषिभिर्मथनेन जनितत्वात्पुत्र इत्युपचर्यते । ऋतावा ऋतावान् सत्यवानुदकवान्वा सोऽग्निर्द्विषोऽस्माकं शत्रून्पर्षति । पारयतु ॥

॥ अथ द्वितीया ॥

स हि सत्यो यं पूर्वे चिद्देवासश्चिद्यमीधिरे ।
होतारं मंद्रजिह्वमित्सुदीतिभिर्विभावसुं ॥ २ ॥
सः । हि । सत्यः । यं । पूर्वे । चित् । देवासः । चित् । यं । ईधिरे ।
होतारं । मंद्रऽजिह्वं । इत् । सुदीतिऽभिः । विभाऽवसुं ॥ २ ॥

पूर्वे चित्पूर्वे महर्षयो होतारं देवानामाह्वातारं मंद्रजिह्वं । हविषां प्रदानेन देवानां मादयित्री जिह्वा यस्य सः । तं । यद्वा मोदनजिह्वं । तथाह यास्कः । मंद्रजिह्वं मंदनजिह्वं मोदनजिह्वमिति वा । नि० ६. २३. । इति । सुदीतिभिः शोभ-

नदीभिरग्निभिर्युक्तं विभावसुं प्रभाधनं यमग्निमीधिरे समैंधत। देवासश्चिद्देवा अपि यमग्निमीधिरे समैंधत। स ह्यग्निः सत्यो भवति। सत्यप्रतिश्रवो भवति। इदिति पूरणः॥

॥ अथ तृतीया ॥

स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या।

अग्ने रायो दिदीहि नः सुवृक्तिभिर्वरेण्य ॥३॥

सः। नः। धीती। वरिष्ठया। श्रेष्ठया। च। सुऽमत्या।

अग्ने। रायः। दिदीहि। नः। सुवृक्तिऽभिः। वरेण्य ॥३॥

सुवृक्तिभिः स्तुतिभिः स्तूयमान वरेण्य वरणीय हे अग्ने स त्वं वरिष्ठया वरतमेन श्रेष्ठयातिशयेन प्रशस्येन नो धीती धीत्याऽस्मदीयेन परिचरणात्मकेन कर्मणा सुमत्या च। सुमतिरिति शस्त्रमुच्यते। शस्त्रेण च प्रीतः सन् रायो धननि नोऽस्मभ्यं दीदिहि। देहि॥

॥ अथ चतुर्थी ॥

अग्निर्देवेषु राजत्यग्निर्मर्तेष्वाविशन्।

अग्निर्नो हव्यवाहनोऽग्निं धीभिः सपर्यत ॥४॥

अग्निः। देवेषु। राजति। अग्निः। मर्तेषु। आऽविशन्।

अग्निः। नः। हव्यऽवाहनः। अग्निं। धीभिः। सपर्यत ॥४॥

योऽग्निर्देवेषु देवानां मध्ये राजति देवतारूपेण प्रकाशते। योऽग्निर्मर्तेषु मनुष्येष्वाविशन् आहवनीयादिरूपेण प्रविष्टो भवति। योऽग्निर्नोऽस्माकं हव्यवाहनो भवति अस्मदीयेषु यज्ञेषु देवतार्थं हव्यानां वोढा भवति हे यजमानास्तमग्निं धीभिः स्तुतिभिः सपर्यत। परिचरत॥

पुत्रकामेष्ट्यामग्निस्तुविश्रवस्तममिति द्वे स्विष्टकृतो याज्यानुवाक्ये। सूचितं च। अग्निस्तुविश्रवस्तममिति द्वे संयाज्ये। आ० २.१०.। इति॥

॥ अथ पंचमी ॥

अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमं।

अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥५॥

अग्निः । तुविश्रवःऽतमं । तुविऽब्रह्माणं । उत्ऽतमं ।

अतूर्तं । श्रवयत्ऽपतिं । पुत्रं । ददाति । दाशुषे ॥ ५ ॥

अग्निस्तुविश्रवस्तममतिशयेन बह्वन्नं तुविब्रह्माणं बहुस्तोत्रमुत्तममुत्कृष्टमतूर्तं शत्रुभिरहिंसितं श्रावयत्पतिं । श्रावयति विश्रुतान् करोति पतीन् पालयितॄन्पितॄनिति स्वकर्मणा पितॄणां प्रख्यापक इति श्रावयत्पतिः । तथाविधं पुत्रं दाशुषे हवींषि दत्तवते यजमानाय ददाति । ददातु ॥

॥ इति चतुर्थस्य प्रथमे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः ।

अग्निरत्यं रघुष्यदं जेतारमपराजितं ॥ ६ ॥

अग्निः । ददाति । सत्ऽपतिं । ससाह । यः । युधा । नृऽभिः ।

अग्निः । अत्यं । रघुऽस्यदं । जेतारं । अपराऽजितं ॥ ६ ॥

यः पुत्रो युधा युद्धेन नृभिः परिजनैः ससाह शत्रूनभिभवति सत्पतिं सतां पालयितारं तथाविधं पुत्रमग्निर्ददाति । अस्मभ्यं ददातु । किंचाग्नी रघुष्यदं । रघुर्लघुः स्यदो जवो यस्य तं । जेतारं शत्रूणामपराजितं शत्रुभिरत्यं । अतति सततं गच्छतीत्यत्योऽश्वः । तं ददातु ॥

अश्वमेधे पौष्णयामिष्टौ यद्वाहिष्ठमिति स्विष्टकृतो याज्या । सूत्रितं च । यद्वाहिष्ठं तदग्नय इति संयाज्ये । आ० १०.६. । इति ॥

॥ सैषा सप्तमी ॥

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।

महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ७ ॥

यत् । वाहिष्ठं । तत् । अग्नये । बृहत् । अर्च । विभावसो इति विभाऽवसो ।

महिषीऽइव । त्वत् । रयिः । त्वत् । वाजाः । उत् । ईरते ॥ ७ ॥

वाहिष्ठं वोढृतमं यत्स्तोत्रं तदग्नये क्रियते । अतो हे विभावसो प्रभाधनाग्ने बृहद्बह्वन्नं धनं वार्च । अस्मभ्यं प्रयच्छ । कथमस्यान्नधनप्रदातृत्वमित्यपेक्षायामाह ।

यतस्त्वत्तः सकाशान्महिषी महती रयिर्धनमुदीरते उद्गच्छति । वाजा अन्नानि च त्वत्त उदीरते उद्गच्छंति । इवेति पूरणः ॥

॥ अथाष्टमी ॥

तर्व द्युमंतो॑ अर्चयो॒ ग्रावे॑वोच्यते बृहत् ।
उतो॑ ते॑ तन्यतुर्यथा स्वानो॒ अर्त॒ त्मना॑ दिवः ॥८॥
तर्व । द्युऽमंतः । अर्चयः । ग्रावा॑ऽइव । उच्यते । बृहत् ।
उतो इति॑ । ते । तन्यतुः । यथा । स्वानः । अर्त । त्मना॑ । दिवः ॥८॥

हे अग्ने तवार्चयो रश्मयो द्युमंतो दीप्तिमंतो भवंति । बृहन्महान् त्वं ग्रावेवाभिषवग्रावेवोच्यते । स्तूयसे । उतापि च त्मनात्मना दिवो द्योतमानस्य ते तव स्वानः शब्दस्तन्यतुर्यथा मेघगर्जितमिवार्त । उद्गच्छति ॥

॥ अथ नवमी ॥

एवाँ अग्निं व॑सूयवः सहसानं ववंदिम ।
स नो॒ विश्वा अति द्विषः पर्ष॑न्नावेव॑ सुक्रतुः ॥९॥
एव । अग्निं । वसुऽयवः । सहसानं । ववंदिम ।
सः । नः । विश्वाः । अति॑ । द्विषः । पर्षत् । नावाऽइव । सुऽक्रतुः ॥९॥

वसूयवो वसुकामा वयं सहसानमस्माकं बलमिवाचरंतमग्निमेवमुक्तप्रकारेण ववंदिम । स्तुमः । सुक्रतुः शोभनकर्मा सोऽग्निर्नोऽस्मान् विश्वा सर्वान् द्विषः शत्रूनतिपर्षत् । अतिपारयतु । कथमिव । नावा साधनेन सिंधुमिव ॥

॥ इति चतुर्थस्य प्रथमेऽष्टादशो वर्गः ॥

अग्ने पावकेति नवर्चं द्वादशं सूक्तं । वसूयव ऋषयः । गायत्री छंदः । अग्निर्देवता । तथा चानुक्रांतं । अग्ने गायत्रमिति ॥ प्रातरनुवाक आग्नेये क्रतौ गायत्रे छंदस्याश्विनशस्त्रे चेदं सूक्तं । सूचितं च । अग्ने पावक दूतं व इति सूक्ते । आ० ४. १३. । इति ॥ आधाने द्वितीयायामिष्टौ प्रथमस्य हविषोऽग्ने पावकेत्येषा याज्या । सूचितं च । स नः पावक दीदिवोऽग्ने पावक रोचिषा । आ० २. १. । इति ॥

॥ तत्रेयं प्रथमा ॥

अग्ने पावक रोचिषा मंद्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ॥१॥

अग्ने । पावक । रोचिषा । मंद्रया । देव । जिह्वया । आ । देवान् । वक्षि । यक्षि । च ॥१॥

हे पावक शोधक रोचिषा स्वदीप्त्या मंद्रया देवानां मादयित्र्या जिह्वया च हे देव द्योतमानाग्ने देवानावक्षि । यज्ञार्थमावह । यक्षि च । तान्यज ॥

॥ अथ द्वितीया ॥

तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशं । देवाँ आ वीतये वह ॥२॥

तं । त्वा । घृतस्नो इति घृतऽस्नो । ईमहे । चित्रभानो इति चित्रऽभानो । स्वःऽदृशं ।
देवान् । आ । वीतये । वह ॥२॥

हे घृतस्नो घृतस्य प्रेरक । यद्वा घृतेन जनित । हे चित्रभानो । चित्रा नानाविधा भानवो रश्मयो यस्यासौ चित्रभानुः । तस्य संबोधनं । स्वर्दृशं सर्वद्रष्टारं तं त्वा त्वामीमहे । याचामहे । अतो वीतये हविषां भक्षणाय देवानावह ॥

॥ अथ तृतीया ॥

वीतिहोत्रं त्वा कवे द्युमंतं समिधीमहि । अग्ने बृहंतमध्वरे ॥३॥

वीतिऽहोत्रं । त्वा । कवे । द्युऽमंतं । सं । इधीमहि । अग्ने । बृहंतं । अध्वरे ॥३॥

हे कवे क्रांतदर्शिन्नग्ने वीतिहोत्रं क्रांतयज्ञं द्युमंतं दीप्तिमंतं बृहंतं महांतं त्वा त्वामध्वरे यज्ञे समिधीमहि । समिद्भिः संदीपयामः ॥

॥ अथ चतुर्थी ॥

अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये । होतारं त्वा वृणीमहे ॥४॥

अग्ने । विश्वेभिः । आ । गहि । देवेभिः । हव्यऽदातये । होतारं । त्वा । वृणीमहे ॥४॥

हे अग्ने विश्वेभिः सर्वैर्देवेभिर्देवैः सह त्वं हव्यदातये हविषां दात्रे यजमानाय तदर्थमागहि । यज्ञं प्रत्यागच्छ । यतो होतारं देवानामाह्वातारं त्वा त्वां वृणीमहे । प्रार्थयामहे ॥

॥ अथ पंचमी ॥

यजमानाय सुन्वत आग्ने सुवीर्यं वह । देवैरा सत्सि बर्हिषि ॥५॥

यजमानाय । सुन्वते । आ । अग्ने । सुऽवीर्यं । वह । देवैः । आ । सत्सि । बर्हिषि ॥५॥

हे अग्ने सुन्वतेऽभिषवं कुर्वते यजमानाय सुवीर्यं शोभनं बलमावह । प्रापय । किंच देवैः सह बर्हिषि यज्ञ आसत्सि । आसीदेति ॥

॥ इति चतुर्थस्य प्रथम एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि । देवानां दूत उक्थ्यः ॥६॥

संऽइधानः । सहस्रऽजित् । अग्ने । धर्माणि । पुष्यसि । देवानां । दूतः । उक्थ्यः ॥६॥

हे सहस्रजित्सहस्रस्य जेतरग्ने समिधानो हविर्भिः समिध्यमान उक्थ्यः प्रशस्यस्त्वं देवानां दूतः सन् धर्माणि नः कर्माणि यज्ञादिक्रियाः पुष्यसि । पोषयसि ॥

॥ अथ सप्तमी ॥

न्य१ग्निं जातवेदसं होत्रवाहं यविष्ठ्यं । दधाता देवमृत्विजं ॥७॥

नि । अग्निं । जातऽवेदसं । होत्रऽवाहं । यविष्ठ्यं । दधात । देवं । ऋत्विजं ॥७॥

हे यजमाना जातवेदसं । जातानि भूतानि वेत्तीति जातवेदाः । तं होत्रवाहं होत्रस्य यज्ञस्य वोढारं यविष्ठ्यं युवतमं देवं द्योतमानमृत्विजमृतौ यष्टारमग्निं निदधात । निधत्त ॥

॥ अथाष्टमी ॥

प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः । स्तृणीत बर्हिरासदे ॥८॥

प्र । यज्ञः । एतु । आनुषक् । अद्य । देवव्यचःऽतमः । स्तृणीत । बर्हिः । आऽसदे ॥८॥

अद्यास्मिन्नहनि देवव्यचस्तमो देवैः प्रकाशमानैः स्तोतृभिर्व्याप्ततमो यज्ञो यज्ञसाधनं हविरानुषगनुषक्तं यथा भवति तथा प्रैतु । देवान् गच्छतु । हे ऋत्विज आसदेऽग्नेरासदनार्थं बर्हिः स्तृणीत ॥

॥ अथ नवमी ॥

एदं मरुतो अश्विना मित्रः सीदंतु वरुणः । देवासः सर्वया विशा ॥९॥

आ । इदं । मरुतः । अश्विना । मित्रः । सीदंतु । वरुणः । देवासः । सर्वया । विशा ॥९॥

मरुतो मरुद्गणा अश्विनाश्विनौ देवानां भिषजौ मित्रः सूर्यो वरुणश्च देवास एते सर्वे देवाः सर्वया विशा समस्तेन स्वीयेन परिजनेन सार्धमिदं बर्हिः सीदंतु । आसीदंतु ॥

॥ इति चतुर्थस्य प्रथमे विंशो वर्गः ॥

अनस्वंतेति षड्टचं त्रयोदशं सूक्तं । अत्रानुक्रमणिका । अनस्वंता षट् त्रैवृष्ण-पौरुकुत्स्यौ द्वौ त्र्यरुणत्रसदस्यू राजानौ भारतश्चाश्वमेधोऽंत्यास्तिस्रोऽनुष्टुभो ना-त्मात्मने दद्यादिति सर्वास्त्वत्रिं केचिदंत्यैंद्राग्नीति । त्रिवृष्णस्य पुत्रस्त्र्यरुणः पुरु-कुत्सस्य पुत्रस्त्रसदस्युर्भरतस्य पुत्रोऽश्वमेध एते त्रयोऽपि राजानः संभूयास्य सूक्तस्य ऋषयः । यद्वात्रिरेव ऋषिः । आद्यास्तिस्रस्त्रिष्टुभश्चतुर्थाद्यास्तिस्रोऽनुष्टुभः । षष्ठींद्राग्निदेवत्या शिष्टाः पंचाग्नेय्यः ॥ विनियोगो लैंगिकः ॥

॥ तत्रेयं प्रथमा ॥

अनस्वंता सत्पतिर्मामहे मे गावा चेतिष्ठो असुरो मघोनः ।
त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर त्र्यरुणश्चिकेत ॥१॥
अनस्वंता । सत्ऽपतिः । ममहे । मे । गावा । चेतिष्ठः । असुरः । मघोनः ।
त्रैवृष्णः । अग्ने । दशऽभिः । सहस्रैः । वैश्वानर । त्रिऽअरुणः । चिकेत ॥१॥

अत्री राजर्षीणां दानमग्नेः पुरतोऽनेन सूक्तेनावर्णयत् । हे वैश्वानर विश्वेषां नराणां नेतरग्ने सत्पतिः सतां साधूनां पालयिता चेतिष्ठो ज्ञातृतमोऽसुरो बल-वान्मघोनो मघवा धनवान् ॥ प्रथमार्थे ङसि ॥ त्रैवृष्णस्त्रिवृष्णपुत्रस्त्र्यरुणस्त्र्यरुण इति नाम राजर्षिरनस्वंतानस्वंतावनसा शकटेन संयुक्तौ गावा गावावनड्वाहौ गवां हिरण्यादीनां दशभिः सहस्रैः सह मे मह्यं ममहे । ददौ ॥ महि दाने ॥ स राजर्षिश्चिकेत । सर्वैर्जनैरनेन दानेन ज्ञायते ॥

॥ अथ द्वितीया ॥

यो मे शता च विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति ।
वैश्वानर सुष्टुतो वावृधानोऽग्ने यच्छ त्र्यरुणाय शर्म ॥२॥
यः । मे । शता । च । विंशतिं । च । गोनां । हरी इति । च । युक्ता । सुऽधुरा । ददाति ।
वैश्वानर । सुऽस्तुतः । ववृधानः । अग्ने । यच्छ । त्रिऽअरुणाय । शर्म ॥२॥

यस्त्र्यरुणः शता च शतानि सुवर्णानां गोनां गवां विंशतिं च युक्ता रथेन युक्तौ सुधुरा सुधुरौ सुष्ठु धुरं वहंतौ हरी अश्वौ च मे मह्यं ददाति अददात् हे वैश्वानराग्ने सुष्टुतोऽस्माभिः सम्यक्स्तुतो ववृधानो हविर्भिर्वर्धमानस्त्वं तस्मै त्र्यरुणाय शर्म सुखं यच्छ । प्रयच्छ ॥

॥ अथ तृतीया ॥

एवा ते अग्ने सुमतिं चकानो नविष्ठाय नवमं त्रसदस्युः ।

यो मे गिरस्तुविजातस्य पूर्वीर्युक्तेनाभि त्र्यरुणो गृणाति ॥३॥

एव । ते । अग्ने । सुऽमतिं । चकानः । नविष्ठाय । नवमं । त्रसदस्युः ।

यः । मे । गिरः । तुविऽजातस्य । पूर्वीः । युक्तेन । अभि । त्रिऽअरुणः । गृणाति ॥३॥

यस्त्र्यरुणस्तुविजातस्य बहुपत्यस्य मे पूर्वीर्बह्वीर्गिरः स्तुतीः श्रुत्वा प्रीतः सन् युक्तेनाभियुक्तेन मनसाभिगृणाति इदं गृहाणेदं गृहाणेति तथा मां ब्रवीति एवैवं हे अग्ने नविष्ठायात्यंतं स्तुत्याय ते तुभ्यं नवमं नवतमां सुमतिं स्तुतिं चकानः कामयमानस्त्रसदस्युरपीदं गृहाणेदं गृहाणेति मां प्रार्थितवान् ॥

॥ अथ चतुर्थी ॥

यो म इति प्रवोचत्यश्वमेधाय सूरये ।

ददहचा सनिं यते ददन्मेधामृतायते ॥४॥

यः । मे । इति । प्रऽवोचति । अश्वऽमेधाय । सूरये ।

ददत् । ऋचा । सनिं । यते । ददत् । मेधां । ऋतऽयते ॥४॥

यो भिक्षमाणोऽर्थी सूरये प्रेरकाय धनानां दात्रे वास्मा अश्वमेधाय राजर्षये मे मह्यं देहीति प्रवोचति प्रब्रवीति । योऽश्वमेधं धनानि भिक्षत इत्यर्थः । ऋचाग्नेः स्तोत्रेण सह यत आत्मनः समीपं गच्छते तस्मा अर्थिनेऽश्वमेधः सनिं धनं ददत् । ददाति । हे अग्ने ऋतायते यज्ञमिच्छते तस्मा अश्वमेधाय मेधां यज्ञविषयां प्रज्ञां ददत् । देहि ॥

॥ अथ पंचमी ॥

यस्य मा परुषाः शतमुद्धर्षयंत्युक्षणः ।

अश्वमेधस्य दानाः सोमा इव त्र्याशिरः ॥५॥

यस्य । मा । परुषाः । शतं । उत्ऽहर्षयंति । उक्षणः ।
अश्वऽमेधस्य । दानाः । सोमाःऽइव । त्रिऽआशिरः ॥ ५ ॥

यस्य येनाश्वमेधस्याश्वमेधेन दाना दत्ताः परुषाः कामानां पूरकाः शतमुक्षण उक्षाणो बलीवर्दा मा मामुद्धर्षयंति उत्कर्षेण हर्षयंति हे अग्ने त उक्षाणस्त्र्याशिरः । दधिसक्तुपयोरूपास्तिस्र आशिरोऽधिश्रपणसाधनभूता येषां ते त्र्याशिरः । सोमा इव तव प्रीणनाय भवंतु ॥

॥ अथ षष्ठी ॥

इंद्राग्नी शतदाव्न्यश्वमेधे सुवीर्यं ।
क्षत्रं धारयतं बृहद्दिवि सूर्यमिवाजरं ॥ ६ ॥
इंद्राग्नी इति । शतदाव्नि । अश्वऽमेधे । सुऽवीर्यं ।
क्षत्रं । धारयतं । बृहत् । दिवि । सूर्यंऽइव । अजरं ॥ ६ ॥

हे इंद्राग्नी शतदाव्नि । शतमपरिमितमर्थिभ्यो धनं ददातीति शतदावा । तस्मिन्नश्वमेधे राजर्षौ सुवीर्यं शोभनवीर्यसहितं बृहन्महदजरं जरारहितं क्षत्रं धनं धारयतं । निधारयतं । कथमिव । दिव्यंतरिक्षे सूर्यमिव ॥

॥ इति चतुर्थस्य प्रथम एकविंशो वर्गः ॥

समिद्धो अग्निरिति षडृचं चतुर्दशं सूक्तं । अत्रेयमनुक्रमणिका । समिद्धो विश्ववाराचेयी त्रिष्टुब्जगती त्रिष्टुबनुष्टुब्गायत्र्याविति । अत्रिगोत्रोत्पन्ना विश्ववारानामिकास्य सूक्तस्य ऋषिः । आद्यातृतीये त्रिष्टुभौ द्वितीया जगती चतुर्थ्यनुष्टुप अंत्ये गायत्र्यौ । अग्निर्देवता ॥ सूक्तविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

समिद्धो अग्निर्दिवि शोचिरश्रेत्प्रत्यङ्ङुषसमुर्विया वि भाति ।
एति प्राची विश्ववारा नमोभिर्देवाँ ईळाना हविषा घृताची ॥ १ ॥
संऽइद्धः । अग्निः । दिवि । शोचिः । अश्रेत् । प्रत्यङ् । उषसं । उर्विया । वि । भाति ।
एति । प्राची । विश्वऽवारा । नमःऽभिः । देवान् । ईळाना । हविषा । घृताची ॥ १ ॥

समिद्धः सम्यग्दीप्तोऽग्निर्दिवि द्योतमानेऽंतरिक्षे शोचिस्तेजोऽश्रेत् । श्रयति ।

तथोषसं प्रत्यङ् उषसमभिमुखः सन् उर्वियोरु विस्तीर्णं विभाति । विशेषेण भ्राजते । नमोभिः स्तोत्रैर्देवानिंद्रादीनीळाना स्तुवती हविषा पुरोडाशादिलक्षणेन युक्तया घृताची घृतघ्न्या स्रुचा सहिता विश्ववारा सर्वमपि पापरूपं शत्रुं वारयिष्येतन्नामिका प्राची प्राङ्मुखी सत्येति । एवंभूतमग्निं प्रतिगच्छति ॥

॥ अथ द्वितीया ॥

समिध्यमानो अमृतस्य राजसि हविष्कृण्वंतं सचसे स्वस्तये ।
विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः ॥२॥

संऽइध्यमानः । अमृतस्य । राजसि । हविः । कृण्वंतं । सचसे । स्वस्तये ।
विश्वं । सः । धत्ते । द्रविणं । यं । इन्वसि । आतिथ्यं । अग्ने । नि । च । धत्ते । इत् । पुरः ॥२॥

हे अग्ने समिध्यमानः सम्यगिध्यमानस्त्वममृतस्योदकस्य राजसि । ईशिषे । तथा हविष्कृण्वंतं पुरोडाशादिहविष्कर्तारं यजमानं स्वस्तयेऽविनाशाय सचसे । सेवसे । किंच यं यजमानमिन्वसि गच्छसि स यजमानो विश्वं समस्तं द्रविणं पश्वादिलक्षणं धनं धत्ते । धारयति । अपि च हे अग्ने आतिथ्यमतिथिरूपस्य तव योग्यं हविः पुर इत् तव पुरस्तादेव निधत्ते च । स्थापयति च ॥

पवित्रेष्ट्यां स्विष्टकृतोऽग्ने शर्धेति याज्या । सूत्र्यते हि । जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये । आ० २.१२. । इति ॥ साकमेधेषु मरुद्भ्यः क्रीडिभ्यः पुरोडाशं सप्तकपालमित्यत्राप्येषैव स्विष्टकृतो याज्या । सूचितं च । जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये । आ० २.१८. । इति ॥

॥ सैषा तृतीया ॥

अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि संतु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥३॥

अग्ने । शर्ध । महते । सौभगाय । तव । द्युम्नानि । उत्ऽतमानि । संतु ।
सं । जाःऽपत्यं । सुऽयमं । आ । कृणुष्व । शत्रुऽयतां । अभि । तिष्ठ । महांसि ॥३॥

हे अग्ने त्वं महते प्रभूताय सौभगायास्माकं शोभनधनत्वाय शर्ध । शत्रून् सहस्व । तथा तव संबंधीनि द्युम्नानि धनानि तेजांसि वा उत्तमान्युत्कृष्टानि संतु । भवंतु । किंच हे अग्ने सं जास्पत्यं । जा जाया च पतिश्च जायापती । तयोः

कर्म जास्यत्यं । तत्सुयमं सुष्ठु नियमनोपेतं । अन्योन्यसंश्लिष्टमित्यर्थः । समाकृणुष्व । सम्यक्कुरुष्व । अपि च शत्रूयतां शत्रुमात्मन इच्छतां सपत्नानां महांसि तेजांस्यभितिष्ठ । आक्रमस्व ॥

॥ अथ चतुर्थी ॥

समिद्धस्य प्रमहसोऽग्ने वंदे तव श्रियं ।

वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे ॥४॥

संऽइद्धस्य । प्रऽमहसः । अग्ने । वंदे । तव । श्रियं ।

वृषभः । द्युम्नऽवान् । असि । सं । अध्वरेषु । इध्यसे ॥४॥

हे *अग्ने समिद्धस्य प्रवृद्धस्य प्रमहसः* प्रकृष्टतेजसस्तव संबंधिनीं *श्रियं* दीप्तिं *वंदे । अहं यजमानः* स्तौमि । *वृषभः* कामानां वर्षिता त्वं *द्युम्नवानसि* । धनवान्भवसि । *अध्वरेषु* यज्ञेषु *समिध्यसे* । सम्यग्दीप्यसे ॥

दर्शपूर्णमासयोः समिद्धो अग्न आहुतेति द्वे सामिधेन्यौ । सूत्रितं च । समिद्धो अग्न आहुतेति द्वे । आ॰ १.२. । इति ॥

॥ सैषा पंचमी ॥

समिद्धो अग्न आहुत देवान्यक्षि स्वध्वर । त्वं हि हव्यवाळसि ॥५॥

संऽइद्धः । अग्ने । आऽहुत । देवान् । यक्षि । सुऽअध्वर । त्वं । हि । हव्यऽवाट् । असि ॥५॥

हे आहुत यजमानैरा समंताद्धुत हे स्वध्वर शोभनयज्ञोपेत हे अग्ने समिद्धः सम्यग्दीप्तस्त्वं देवान्द्योतमानानिंद्रादीन्यक्षि । यजस्व । हि यस्मात्कारणात् हे अग्ने त्वं हव्यवाडसि हव्यानां वोढा भवसि । अतः कारणाद्देवान्यजस्वेति संबंधः ॥

॥ अथ षष्ठी ॥

आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे । वृणीध्वं हव्यवाहनं ॥६॥

आ । जुहोत । दुवस्यत । अग्निं । प्रऽयति । अध्वरे । वृणीध्वं । हव्यऽवाहनं ॥६॥

हे ऋत्विजो यूयमध्वरेऽस्मदीययागे प्रयति प्रवृत्ते सति हव्यवाहनं हविषां वोढारमेतन्नामकमग्निमाजुहोत । आ समंताज्जुहोत । तथा दुवस्यत । परिचरत । वृणीध्वं संभजध्वं च हव्यवाहनं । हव्यवाहननामकस्यैवाग्नेर्देवत्तासंबंधी यजमानैर्वरणीयत्वं च तैत्तिरीये स्पष्टमाम्नातं । त्रयो वा अग्नयो हव्यवाहनो देवानां

कव्यवाहनः पितृणां सहरक्षा असुराणां । त एतर्ह्यग्निं शंसंते मां वरयिष्यते मामिति वृणीध्वं हव्यवाहनमित्याह य एव देवानां तं वृणीते । तै० स० २.५.९. । इति ॥

॥ इति चतुर्थस्य प्रथमे द्वाविंशो वर्गः ॥

अर्यमेति पंचदशर्चं पंचदशं सूक्तं । अत्रानुक्रमणिका । अर्यमा पंचोना गौरिवीतिः शाक्त्य ऐंद्रमुशना यदौशनसो वा पाद इति । शक्तिगोत्रोत्पन्नो गौरिवीतिर्नाम ऋषिः । अनुक्तत्वात्त्रिष्टुप् । इंद्रो देवता मंडलादिपरिभाषाया निवृत्तत्वात् । उशना यत्सहस्यैरिति पाद औशनस ऐंद्रो वा ॥ आभिप्लविके तृतीयेऽहनि मरुत्वतीय एतन्निविद्धानं । सूचितं च । तृतीयस्य अर्यमा यो जात एवेति मध्यंदिनः । आ० ७.७. । इति ॥

॥ तत्र प्रथमा ॥

त्र्य॑र्य॒मा मनु॑षो दे॒वता॑ता त्री रो॑च॒ना दि॒व्या धा॑रयंत ।
अर्चं॑ति त्वा म॒रुतः॑ पू॒तद॑क्षा॒स्त्वमे॑षा॒मृषि॑रिंद्रासि॒ धीरः॑ ॥१॥
त्री । अ॒र्य॒मा । मनु॑षः । दे॒व॒ऽता॑ता । त्री । रो॒च॒ना । दि॒व्या । धा॒र॒यं॒त ।
अर्चं॑ति । त्वा॒ । म॒रुतः॑ । पू॒त॒ऽद॑क्षाः । त्वं । ए॒षां॒ । ऋषिः॑ । इं॒द्र॒ । अ॒सि॒ । धीरः॑ ॥१॥

मनुषो मनोः संबंधिनि देवताता देवतातौ यज्ञे त्री त्रीण्यर्यमार्यमाणि यानि तेजांसि संति । तथा त्री त्रीणि रोचना रोचमानानि वाय्वग्निसूर्यात्मकानि दिव्या दिव्यान्यंतरिक्षे भवानि तानि तेजांसि धारयंत । मरुतो धारयंति । पूतदक्षाः शुद्धबला मरुतस्त्वा त्वामर्चंति । स्तुवंति । हे इंद्र धीरो धीमांस्त्वमेषां मरुतामृषिरसि । द्रष्टा भवसि ॥

॥ अथ द्वितीया ॥

अनु॒ यदीं॑ म॒रुतो॑ मंद॒सा॒नमार्च॒न्निंद्रं॑ पपि॒वांसं॑ सु॒तस्य॑ ।
आद॑त्त॒ वज्र॑म॒भि यदहिं॒ हन्न॒पो य॒ह्वीर॑सृज॒त्सर्त॒वा उ॑ ॥२॥
अनु॑ । यत् । ई॒ । म॒रुतः॑ । मं॒द॒सा॒नं । आर्च॑न् । इंद्रं॑ । प॒पि॒ऽवांसं॑ । सु॒तस्य॑ ।
आ । अ॒द॒त्त॒ । वज्रं॑ । अ॒भि । यत् । अहिं॑ । हन् । अ॒पः । य॒ह्वीः । अ॒सृ॒ज॒त् । सर्त॑वै । ऊं॒ इति॑ ॥२॥

यद्यदा मरुतो मंदसानं तृप्यंतं सुतस्याभिषुतं सोमं पपिवांसं पीतवंतमीमेनमिंद्रमन्वार्चन् अन्वस्तुवन् तदेंद्रो वज्रमादत्त । आददौ । ततो यद्यदाहिं वृत्रम-

भिहन् अभ्यहन् अभिहतवान् तदा यह्वीर्महतीरपो वृत्रेण निरुद्धान्युदकानि सर्तवै स्वैरत्वेन सर्तुं गंतुमसृजत् । निरोधादमुंचत् ॥

॥ अथ तृतीया ॥

उत ब्रह्माणो मरुतो मे अस्येंद्रः सोमस्य सुषुतस्य पेयाः ।
तद्धि हव्यं मनुषे गा अविंददहन्नहिं पपिवाँ इंद्रो अस्य ॥३॥

उत । ब्रह्माणः । मरुतः । मे । अस्य । इंद्रः । सोमस्य । सुऽसुतस्य । पेयाः ।
तत् । हि । हव्यं । मनुषे । गाः । अविंदत् । अहन् । अहिं । पपिऽवान् । इंद्रः । अस्य ॥३॥

उतापि च हे ब्रह्माणो बृहंतो हे मरुतो यूयमिंद्रश्च सुसुतस्य सुष्ठुभिषुतस्य मे मदीयस्यास्य सोमस्येमं सोमं ॥ द्वितीयार्थे षष्ठी ॥ पेयाः । पिबत ॥ पिबतेराशीर्लिङि मध्यमबहुवचनस्यैकवचनं ॥ तद्धि तत्खलु हव्यं युष्माभिः पीतं सोमात्मकं हविर्मनुषे मनुष्याय यजमानाय गा धेनूर्वृष्टिलक्षणान्युदकानि वा अविंदत् । वेदयति । यजमानं गा लंभयतीत्यर्थः । किंचास्येमं सोमं पपिवान् पीतवानिंद्रोऽहिं वृत्रमहन् । अवधीत् ॥

॥ अथ चतुर्थी ॥

आद्रोदसी वितरं वि ष्कभायत्संविव्यानश्चिद्भियसे मृगं कः ।
जिगर्तिमिंद्रो अपजर्गुराणः प्रति श्वसंतमव दानवं हन् ॥४॥

आत् । रोदसी इति । विऽतरं । वि । स्कभायत् । संऽविव्यानः । चित् । भियसे । मृगं । करिति कः ।
जिगर्तिं । इंद्रः । अपऽजर्गुराणः । प्रति । श्वसंतं । अव । दानवं । हन्निति हन् ॥४॥

इंद्रः परमैश्वर्ययुक्त आत्सोमपानानंतरं रोदसी द्यावापृथिव्यौ वितरमतिशयेन ॥ अमु च छंदसीति वेस्तरपि कृतेऽमुप्रत्ययः ॥ विष्कभायत् । व्यस्तभ्नात् । चलनरहिते अकरोत् । संविव्यानश्चित् संवृण्वानः संगच्छमानो वेंद्रः ॥ व्ययतेर्वा संवरणकर्मणो वेतेर्वा गतिकर्मणो रूपं । चिदित्येवेत्यस्यार्थे वर्तते ॥ मृगं मृगवत्पलायमानं वृत्रं भियसे भयाय कः । अकार्षीत् ॥ करोतेर्लुङि मंत्रे घसह्वरेत्यादिना च्लेर्लोपः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः ॥ इंद्रो जिगर्तिं गिरंतमाच्छादयंतं श्वसंतं भयार्थं श्वासं कुर्वंतं दानवं दनोः पुत्रं वृत्रमपजर्गुराण आच्छादनाद्विमोचयन् प्रति प्रतिगत्यावहन् । अवहतवान् ॥

॥ अथ पंचमी ॥

अध क्रत्वा मघवन्तुभ्यं देवा अनु विश्वे अददुः सोमपेयं ।
यत्सूर्यस्य हरितः पतंतीः पुरः सतीरुपरा एतशे कः ॥५॥

अध । क्रत्वा । मघऽवन् । तुभ्यं । देवाः । अनु । विश्वे । अददुः । सोमऽपेयं ।
यत् । सूर्यस्य । हरितः । पतंतीः । पुरः । सतीः । उपराः । एतशे । करिति कः ॥५॥

अधापि च हे मघवन् धनवन्निंद्र क्रत्वा क्रतुना त्वदीयेन कर्मणा विश्वे सर्वे देवा द्योतमाना वह्न्यादयस्तुभ्यं त्वदर्थं सोमपेयं सोमपानमनुददुः । आनुपूर्व्येण दत्तवंतः । ततः प्रभृतींद्रो देवेभ्यः सर्वेभ्योऽधिकोऽभवदित्यर्थः । तथा च श्रूयते । स महान्भूत्वा देवता अब्रवीदुद्धारं म उद्धरतेत्यादि । हे इंद्र यद्यस्त्वं पतंतीरागच्छंतीः पुरः सतीः पुरस्ताद्भवंतीः सूर्यस्य संबंधिनीर्हरितो वडवा उपरा उपरता मंदगतीरेतश एतशाख्याय ऋषये कः अकार्षीः । एतशो हि स्वश्वपुत्रेण सूर्येण सह स्पर्धामकरोदिति यावत् । तथा च निगमांतरे । प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिंद्रः । ऋग्वे० १.६१.१५. । इति ॥

॥ इति चतुर्थस्य प्रथमे त्रयोविंशो वर्गः ॥

॥ अथ षष्ठी ॥

नव यदस्य नवतिं च भोगान्त्साकं वज्रेण मघवा विवृश्चत् ।
अर्चंतींद्रं मरुतः सधस्थे त्रैष्टुभेन वचसा बाधत द्यां ॥६॥

नव । यत् । अस्य । नवतिं । च । भोगान् । साकं । वज्रेण । मघऽवा । विऽवृश्चत् ।
अर्चंति । इंद्रं । मरुतः । सधऽस्थे । त्रैस्तुभेन । वचसा । बाधत । द्यां ॥६॥

यद्यदा मघवा धनवानिंद्रः । अस्येत्यनेन शंबर उच्यते । अस्य शंबरस्य संबंधीनि नव नवसंख्याकानि नवतिं च नवतिसंख्याकानि च भोगान्पुराणि । भोगानित्यंतोदात्तः पुरवचनः । साकं युगपदेव वज्रेण विवृश्चत् व्यवृश्चत् अभिनत् तदा मरुतः सधस्थे सहस्थाने युद्धे वा स्थितमिंद्रं त्रैष्टुभेन त्रिष्टुप्छंदस्केन वचसा वाग्रूपेण स्तोत्रेणार्चंति । अस्तुवन् । इंद्र एवं स्तुतः सन् द्यां मरुद्भिः प्रयुज्यमानेन मंत्रेण दीप्तं शंबराख्यमसुरं बाधत । अबाधत । पिपीडे ॥

॥ अथ सप्तमी ॥

सखा सख्ये अपचत्तूयमग्निरस्य क्रत्वा महिषा त्री शतानि ।
त्री साकमिंद्रो मनुषः सरांसि सुतं पिबद्वृत्रहत्याय सोमं ॥७॥

सखा । सख्ये । अपचत् । तूयं । अग्निः । अस्य । क्रत्वा । महिषा । त्री । शतानि ।
त्री । साकं । इंद्रः । मनुषः । सरांसि । सुतं । पिबत् । वृत्रऽहत्याय । सोमं ॥७॥

सखेंद्रस्य मित्रभूतोऽग्निर्महिषा महिषाणां पशूनां त्री त्रीणि शतानि शतसंख्याकानि सख्ये सख्युर्मित्रभूतस्यास्येंद्रस्य क्रत्वा कर्मणा निमित्तभूतेन तूयं क्षिप्रमपचत् । पपाच । किंच इंद्रः परमैश्वर्ययुक्तो मनुषो मनोः संबंधीनि त्री त्रीणि सरांसि पात्राणि । अत्र सरःशब्देन पूतभृदाधवनीयद्रोणकलशसंज्ञानि पात्राण्युच्यंते । तेषु स्थितं सुतमभिषुतं सोमं साकं युगपदेव वृत्रहत्याय वृत्रहननाय पिबत् । अपिबत् । पपौ ॥

॥ अथाष्टमी ॥

त्री यच्छता महिषाणामघो मास्त्री सरांसि मघवा सोम्यापाः ।
कारं न विश्वे अह्वंत देवा भरमिंद्राय यदहिं जघान ॥८॥

त्री । यत् । शता । महिषाणां । अघः । माः । त्री । सरांसि । मघऽवा । सोम्या । अपाः ।
कारं । न । विश्वे । अह्वंत । देवाः । भरं । इंद्राय । यत् । अहिं । जघान ॥८॥

हे इंद्र त्वं यद्यदा त्री त्रयाणां शता शतसंख्याकानां महिषाणां पशूनां मा मांसान्यघः भक्षितवानसि ॥ घसेरेतद्वै रूपं ॥ यदा च मघवा धनवांस्त्वं सोम्या सोममयानि त्री त्रीणि सरांसि पात्राण्यपाः पीतवानसि । यद्यदेंद्रोऽहिं वृत्रं जघान हतवान् तदा विश्वे सर्वे देवा भरं सोमपानादिना पूर्णमिंद्रायेंद्रं युद्धार्थमह्वंत । आह्वयंत । तत्र दृष्टांतः । कारं न । स्वामिनः कर्मकरमिव तद्वत् ॥

उशनसः स्तोम उशना यत्सहस्यैरिति मरुत्वतीये सूक्तमुखीया । सूत्रितं च । उशनसः स्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजेतोशना यत्सहस्यैरयातं । आ॰ ९. ५. । इति ॥

॥ तत्रैषा नवमी ॥

उशना यत्सहस्यै३रयातं गृहमिंद्र जूजुवानेभिरश्वैः ।
वन्वानो अत्र सरथं ययाथ कुत्सेन देवैरवनोर्ह शुष्णं ॥९॥

उशना। यत्। सहस्यैः। अयातं। गृहं। इंद्र। जूजुवानेभिः। अश्वैः।
वन्वानः। अत्र। सऽरथं। ययाथ। कुत्सेन। देवैः। अवनोः। ह। शुष्णं ॥९॥

यद्यदा हे इंद्र त्वमुशना काव्यश्च सहस्यैरभिभवनशीलैर्जूजुवानेभिर्जूजुवानैर्गच्छद्भिरश्वैः कुत्सस्य गृहमयातं अगच्छतं तदा हे इंद्र त्वमत्रास्मिन्काले वन्वानः शत्रून् हिंसन् कुत्सेन देवैश्च सह सरथं समानमेकं रथं ययाथ। जगंथ। किंच शुष्णमेतन्नामकमसुरमवनोर्ह। अहिंसीः खलु ॥

॥ अथ दशमी ॥

प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्वरिवो यातवेऽकः।
अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ्मृध्रवाचः ॥१०॥

प्र। अन्यत्। चक्रं। अवृहः। सूर्यस्य। कुत्साय। अन्यत्। वरिवः। यातवे। अकरित्यकः।
अनासः। दस्यून्। अमृणः। वधेन। नि। दुर्योणे। अवृणक्। मृध्रऽवाचः ॥१०॥

हे इंद्र पूर्वं द्विचक्रस्य सूर्यस्यान्यदेकं चक्रं प्रावृहः। पृथक् चकर्थ। अन्यदेकं चक्रं कुत्साय कुत्सस्य वरिवो धनं यातवे प्राप्तुमकः। अकार्षीः। किंच अनास आस्यरहितान्। आस्यशब्देन शब्दो लक्ष्यते। अशब्दान्मूकान् दस्यूनसुरान् वधेनायुधेन वज्रेणामृणः। अहिंसीः। दुर्योणे संग्रामे मृध्रवाचो हिंसितवागिंद्रियानसुरान्न्यवृणक्। नितरां छिन्नवानसि। अमृणो न्यवृणगिति द्विरुक्तिरादरार्था ॥

॥ इति चतुर्थस्य प्रथमे चतुर्विंशो वर्गः ॥

॥ अथैकादशी ॥

स्तोमासस्त्वा गौरिवीतेरवर्धन्नरंधयो वैदथिनाय पिप्रुं।
आ त्वामृजिश्वा सख्याय चक्रे पचन्पक्तीरपिबः सोममस्य ॥११॥

स्तोमासः। त्वा। गौरिऽवीतेः। अवर्धन्। अरंधयः। वैदथिनाय। पिप्रुं।
आ। त्वां। ऋजिश्वा। सख्याय। चक्रे। पचन्। पक्तीः। अपिबः। सोमं। अस्य ॥११॥

हे इंद्र गौरिवीतेरेतन्नामकस्य मंत्रद्रष्टुर्मम संबंधीनि स्तोमासः स्तोत्राणि त्वा त्वामवर्धन्। वर्धयंतु। वैदथिनाय विदथिनः पुत्राय ऋजिश्वनाम्ने पिप्रुमेतन्नामकमसुरमरंधयः। वशमनयः। हे इंद्र ऋजिश्वनामा कश्चिद्दषिः सख्याय तव

सखित्वाय पक्तीः पक्तव्यानि पुरोडाशादीनि पचन् पाकं कुर्वन् त्वा त्वामा चक्रे। अभिमुखीचकार। किंच त्वमस्य ऋजिश्वनः संबंधिनं सोमममपिबः। अपाः॥

दशपेयेऽहनि मरुत्वतीये शस्त्रे नवग्वास इति सूक्तमुखीया। सूत्रितं च। नवग्वासः सुतसोमास इंद्रं सखा ह यत्र सखिभिर्नवग्वैरिति निविद्धानयोराद्ये। आ० ९.३.। इति॥

॥ तत्रैषा द्वादशी॥

नवग्वासः सुतसोमास इंद्रं दशग्वासो अभ्यर्चंत्यर्कैः।

गव्यं चिदूर्वमपिधानवंतं तं चिन्नरः शशमाना अप व्रन् ॥१२॥

नवऽग्वासः। सुतऽसोमासः। इंद्रं। दशऽग्वासः। अभि। अर्चंति। अर्कैः।

गव्यं। चित्। ऊर्वं। अपिधानऽवंतं। तं। चित्। नरः। शशमानाः। अप। व्रन्॥१२॥

नवग्वासः। सत्रयागमनुतिष्ठंतो ये नवभिर्मासैः समाप्य गतास्ते नवग्वाः। दशभिर्मासैः समाप्य ये गतास्ते दशग्वाः। एत उभयविधा अंगिरसः सुतसोमासोऽभिषुतसोमाः संत इंद्रमर्कैरर्चनीयैः स्तोत्रैरभ्यर्चंति। अभिष्टुवंति। तथा शशमानाः स्तुवंतो नरो नेतारोऽंगिरसोऽपिधानवंतं वलेनासुरेणाच्छादितवंतं तं चित् बहुषु प्रदेशेषु प्रसिद्धमपि गव्यं चित् गोसंबंधिनमप्यूर्वं समूहमप व्रन्। अपावृण्वन्॥

परिक्रीनाम्न्येकाहे मरुत्वतीयनिष्केवल्ययोः सूक्तमुखीये कथो नु त इत्याद्ये द्वे ऋचौ। सूत्रितं च। कथो नु ते परि चराणि विद्वानिति द्वे। आ० ९.५.। इति॥

॥ तत्रैषा त्रयोदशी॥

कथो नु ते परि चराणि विद्वान्वीर्या मघवन्या चकर्थ।

या चो नु नव्या कृणवः शविष्ठ प्रेदु ता ते विदथेषु ब्रवाम ॥१३॥

कथो इति। नु। ते। परि। चराणि। विद्वान्। वीर्या। मघऽवन्। या। चकर्थ।

या। चो इति। नु। नव्या। कृणवः। शविष्ठ। प्र। इत्। ऊं इति। ता। ते। विदथेषु। ब्रवाम॥१३॥

हे मघवन् धनवन्निंद्र त्वं या यानि वीर्या वीर्याणि चकर्थ चकृषे अहं तानि वीर्याणि विद्वान् जानन् ते तुभ्यं कथो नु कथं नु परिचराणि। परिचर्यां कर-

वाणि। हे शविष्ठ बलवत्तमेंद्र त्वं या चो यानि चैव नव्या नव्यानि नूतनानि वीर्याणि नु क्षिप्रं कृणवः कुर्याः ते त्वदीयानि ता तानि वीर्याणि विदथेषु यज्ञेषु प्रेदु ब्रवाम। प्रैव वदाम॥

॥ अथ चतुर्दशी ॥

एता विश्वा चकृवाँ इंद्र भूर्यपरीतो जनुषा वीर्येण।

या चिन्नु वज्रिन्कृणवो दधृष्वान्न ते वर्ता तविष्या अस्ति तस्याः।

एता। विश्वा। चकृऽवान्। इंद्र। भूरि। अपरिऽइतः। जनुषा। वीर्येण।

या। चित्। नु। वज्रिन्। कृणवः। दधृष्वान्। न। ते। वर्ता। तविष्याः। अस्ति। तस्याः॥१४॥

हे इंद्र अपरीतः शत्रुभिरपरिगतस्त्वं जनुषा जननसिद्धेनात्मीयेन वीर्येण बलेन भूरि भूरीणि बहून्येतैतानि प्रत्यक्षेणोपलभ्यमानानि विश्वा विश्वानि व्याप्तानि भुवनजातानि चकृवान्। कृतवान्। हे वज्रिन् वज्रवन्निंद्र दधृष्वान् सपत्नान्धर्षयंस्त्वं नु क्षिप्रं या चिद्यानि च विश्वानि कृणवः कुर्याः ते त्वदीयस्य तस्यास्तविष्यास्तस्य बलस्य वर्ता निवारयिता न कोऽप्यस्ति॥

॥ अथ पंचदशी ॥

इंद्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म।

वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षं॥१५॥

इंद्र। ब्रह्म। क्रियमाणा। जुषस्व। या। ते। शविष्ठ। नव्याः। अकर्म।

वस्त्राऽइव। भद्रा। सुऽकृता। वसुऽयुः। रथं। न। धीरः। सुऽअपाः। अतक्षं॥१५॥

हे शविष्ठ बलवत्तम शूरतम वेंद्र ते तुभ्यं या यानि स्तोत्राणि नव्या नूतना अद्यतना वयमकर्म अकुर्म हे इंद्र त्वं क्रियमाणास्माभिः क्रियमाणानि ब्रह्म ब्रह्माणि तानि स्तोत्राणि जुषस्व। सेवस्व। धीरो धीमान् स्वपाः शोभनकर्मा वसूयुर्धनकामोऽहं वस्त्रेव वस्त्राणीव भद्रा भद्राणि भजनीयानि सुकृता सुष्ठु कृतानि स्तोत्राणि रथं न रथमिवातक्षं। अकरवं। स्तोत्राण्युपसंहारवग्राह्याणीत्यभिप्रायेण वस्त्रनिदर्शनमुक्तं। रथदृष्टांतस्त्वागमनसाधनत्वप्रतिपादनाय। स्तोत्राणि स्वीकृत्य मह्यं धनं प्रयच्छेत्यर्थः॥

॥ इति चतुर्थस्य प्रथमे पंचविंशो वर्गः ॥

क्व स्य वीर इति पंचदशर्चं षोडशं सूक्तं । अत्रानुक्रमणिका । क्व स्य बभ्रुर्ऋणंचयोऽप्यत्र राजा स्तुत इति । बभ्रुर्ऋषिः । अनुक्तत्वात्त्रिष्टुप् । इंद्रो देवता । ऋणंचयनामा राजापि क्वचित्स्तूयते । अतः सोऽपि देवता ॥ तीव्रसोमाख्य एकाहे मरुत्वतीयशस्त्र इदं सूक्तं निविद्धानं । सूचितं च । तीव्रसोमेनान्नाद्यकामः क्व स्य वीरः । आ० ९.७. । इति ॥

॥ तत्र प्रथमा ॥

क्व१ स्य वीरः को अपश्यदिंद्रं सुखरथमीयमानं हरिभ्यां ।
यो राया वज्री सुतसोममिच्छन्तदोको गंता पुरुहूत ऊती ॥१॥
क्व । स्यः । वीरः । कः । अपश्यत् । इंद्रं । सुखऽरथं । ईयमानं । हरिऽभ्यां ।
यः । राया । वज्री । सुतऽसोमं । इच्छन् । तत् । ओकः । गंता । पुरुऽहूतः । ऊती ॥१॥

वज्री वज्रवान् पुरुहूतो बहुभिराहूतो य इंद्रो राया देयेन धनेन सह सुतसोममिच्छन् अभिषुतसोमं यजमानमन्विच्छन् ऊती ऊत्यै रक्षायै तत्तस्य यजमानस्यौको गृहं गंता प्राप्तो भवति वीरो विक्रांतः स्य स इंद्रः क्व कुत्र विद्यते । सुखरथं शोभनाक्षद्वारो रथो यस्य स सुखरथः । सुष्ठु खनति लिखति भूमिमिति वा सुखं । ताहग्रथं । सुहितं खेभ्यः खं पुनः खनतेरिति यास्कः । नि० ३.१३. । हरिभ्यां स्ववाहनाभ्यामश्वाभ्यामीयमानं गच्छंतमिंद्रं कोऽपश्यत् । कश्च ददृशे ॥

॥ अथ द्वितीया ॥

अवाचचक्षं पदमस्य सस्वरुग्रं निधातुरन्वायमिच्छन् ।
अपृच्छमन्याँ उत ते म आहुरिंद्रं नरो बुबुधाना अशेम ॥२॥
अव । अचचक्षं । पदं । अस्य । सस्वः । उग्रं । निऽधातुः । अनु । आयं । इच्छन् ।
अपृच्छं । अन्यान् । उत । ते । मे । आहुः । इंद्रं । नरः । बुबुधानाः । अशेम ॥२॥

अस्येंद्रस्य पदं स्थानमवाचचक्षं । अहमवाद्राक्षं । कीदृशं । सस्वोऽतर्हितमुग्रमुद्गूर्णं । किंच इच्छन्निंद्रमन्विच्छन्नहं निधातुः स्वस्थापयितुरस्येंद्रस्य पदमन्वायं । अन्वगमं । अन्यानुतान्यान्विदुषोऽपि मार्गं इंद्रमपृच्छं । पृष्टवानस्मि । पृष्टास्ते मे मह्यमिंद्रमाहुः । किमाहुरित्युच्यते । नरो यज्ञानां नेतारो बुबुधाना बुभुत्समाना वयमशेम । इंद्रं प्राप्तवंतः स्मः । यद्यपींद्रो विद्यते तथापि दुर्लभश्चेदनुप-

गंतव्य इति बुभुत्समानःस्वभावमपृच्छत् पृष्टेन्न सुलभ इत्युक्त इंद्रप्राप्त्यर्थं सूक्तशेषमपश्यदित्यर्थः ॥

॥ अथ तृतीया ॥

प्र नु व॒यं सु॒ते या ते॑ कृ॒तानींद्र॒ ब्रवा॑म॒ यानि॑ नो॒ जुजो॑षः ।
वेद॒दवि॑द्वाञ्छृ॒णव॑च्च वि॒द्वान्वह॑ते॒ऽयं म॒घवा॒ सर्व॑सेनः ॥३॥

प्र । नु । व॒यं । सु॒ते । या । ते॒ । कृ॒तानि॑ । इं॒द्र॒ । ब्रवा॑म । यानि॑ । नः॒ । जुजो॑षः ।
वेद॑त् । अवि॑द्वान् । शृ॒णव॑त् । च॒ । वि॒द्वान् । वह॑ते । अ॒यं । म॒घऽवा॑ । सर्व॑ऽसेनः ॥३॥

हे इंद्र ते त्वदीयानि यानि कृतानि कर्माणि संति नु अद्य वयं स्तोतारः सुते सोमेऽभिषुते सति तानि कर्माणि प्र ब्रवाम । प्रकर्षेण वदाम । त्वमपि नोऽस्मदर्थं यानि कर्माणि जुजोषः असेवथाः तानि कर्माण्यविद्वान् इतः पूर्वमजानन् जनो वेदत् । जानातु । विद्वान् शृणवच्च । शृणुयाच्च । यद्वा विद्वान् जानन् पुरुषः शृणवच्च । अजानंतमपि जनं श्रावयेच्च । सर्वसेनः सर्वाभिः सेनाभिर्युक्तो मघवा धनवान् विद्वान् जानन्नयमिंद्रो जानतश्च शृण्वतश्च तान् जनान् प्रति वहते । अभ्विरुह्यते ॥ व्यत्ययेन कर्तृप्रत्ययः ॥ प्रापयति ॥

॥ अथ चतुर्थी ॥

स्थि॒रं मन॑श्चकृषे जा॒त इं॑द्र॒ वेषीदेको॑ यु॒धये॒ भूय॑सश्चित् ।
अश्मा॑नं चि॒च्छव॑सा दिद्यु॒तो॒ वि वि॒दो गवा॑मू॒र्वमु॒स्रिया॑णां ॥४॥

स्थि॒रं । मनः॑ । च॒कृ॒षे॒ । जा॒तः । इं॒द्र॒ । वेषि॑ । इत् । एकः॑ । यु॒धये॑ । भूय॑सः । चि॒त् ।
अश्मा॑नं । चि॒त् । शव॑सा । दि॒द्यु॒तः॒ । वि । वि॒दः । गवां॑ । ऊ॒र्वं । उ॒स्रिया॑णां ॥४॥

हे इंद्र जात उत्पन्नमात्र एव त्वं स्थिरं चलनरहितं मनश्चित्तं चकृषे । चकर्थ । सर्वान् बलिष्ठान् जयेयमितीदृशं । तथा हे इंद्र एक इद्सहाय एव त्वं युधये युद्धाय भूयसश्चित् बहुतरान् राक्षसादीनपि वेषि । अवेः । अगमः । किंच अश्मानं चित् गवामावरकं पर्वतमपि शवसा बलेन विदिद्युतः । व्यभिनः । किंच उस्रियाणां क्षीरमुत्सारयंतीनां गवां धेनूनामूर्वं समूहं विदः । अवेदयः । अलंभयः ॥

॥ अथ पंचमी ॥

परो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम बिभ्रत् ।
अतश्चिदिंद्रादभयंत देवा विश्वा अपो अजयद्दासपत्नीः ॥५॥

परः । यत् । त्वं । परमः । आऽजनिष्ठाः । पराऽवति । श्रुत्यं । नाम । बिभ्रत् ।
अतः । चित् । इंद्रात् । अभयंत । देवाः । विश्वाः । अपः । अजयत् । दासऽपत्नीः ॥५॥

यद्यदा हे इंद्र परः परस्तादुपरिष्टात्स्थितः परम उत्कृष्टतमस्त्वं परावति दूरे श्रुत्यं श्रवणीयं नाम नामधेयं बिभ्रत् धारयन्नाजनिष्ठाः आ समंतादजायथाः । शेषः परोक्षकृतः । अतश्चिदत आरभ्यैव देवा द्योतमाना अग्न्यादय इंद्रादभयंत । बिभ्युः । विश्वा अपः सर्वाण्युदकानींद्रोऽजयत् । वशीचक्रे । कीदृशीः । दासपत्नीः । दासो वृत्रः पतिः पालयिता यासामपां ता इति ॥

॥ इति चतुर्थस्य प्रथमे षड्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

तुभ्येदेते मरुतः सुशेवा अर्चंत्यर्कं सुन्वंत्यंधः ।
अहिमोहानमप आशयानं प्र मायाभिर्मायिनं सक्षदिंद्रः ॥६॥

तुभ्य । इत् । एते । मरुतः । सुऽशेवाः । अर्चंति । अर्कं । सुन्वंति । अंधः ।
अहिं । ओहानं । अपः । आऽशयानं । प्र । मायाभिः । मायिनं । सक्षत् । इंद्रः ॥६॥

एते मरुतः । महद्रवंति वदंतीति मरुतः स्तोतारः । सुशेवाः । शेवमिति सुखनामैतत् । शोभनसुखाः संतः । स्तोत्रेण शोभनं सुखमुत्पादयंत इत्यर्थः । हे इंद्र तुभ्येत्तुभ्यमेवार्कमर्चनीयं स्तोत्रमर्चंति । स्तुवंति । कुर्वंतीत्यर्थः । अंधः सोमलक्षणमन्नं सुन्वंति । अभिषवं कुर्वंति । इंद्रः परमैश्वर्ययुक्तो मायाभिः स्वकीयाभिः शक्तिभिरहिं वृत्रं प्रसक्षत् । अभ्यभवत् । कीदृशं । ओहानं देवान्बाधमानमप उदकान्याशयानमावृत्य शयनं कुर्वंतं मायिनं कपटवंतमिति ॥

॥ अथ सप्तमी ॥

वि षू मृधो जनुषा दानमिन्वन्नहन्गवा मघवन्संचकानः ।
अत्रा दासस्य नमुचेः शिरो यदवर्तयो मनवे गातुमिच्छन् ॥७॥

वि। सु। मृधः। जनुषा। दानं। इन्वन्। अहन्। गवा। मघऽवन्। संऽचकानः।
अत्र। दासस्य। नमुचेः। शिरः। यत्। अवर्तयः। मनवे। गातुं। इच्छन् ॥७॥

हे मघवन्धनवन्निंद्र संचकानोऽस्माभिः स्तूयमानस्त्वं॥ संपूर्वः कायतिः शब्दकर्मा। तस्य लडर्थे लिटि रूपं॥ दानं देवानां बाधकं वृत्रमसुरं गवा वज्रेणेन्वन् प्रेरयन् हिंसन् जनुषा जन्मना मृधस्तदनुचरान्राक्षसादीन् शत्रून् सु सुष्ठु व्यहन्। विजघंथ। इंद्रस्यासुरा जन्मारभ्य शत्रव इत्यर्थः। हे इंद्र त्वमत्रास्मिन्युद्धे मनवे नमुचिनापहृतगोधनाय मह्यं गातुं सुखमिच्छन् अभिलषन् नमुचेरेतन्नामकस्योपक्षपयितुरसुरस्य संबंधि शिरः शीर्षं यद्यदावर्तयः अचूर्णयः तदा शत्रून् विजघंथेति पूर्वेण संबंधः॥

॥ अथाष्टमी ॥

युजं हि मामकृथा आदिदिंद्र शिरो दासस्य नमुचेर्मथायन्।
अश्मानं चित्स्वर्यं१ वर्तमानं प्र चक्रियेव रोदसी मरुद्भ्यः ॥८॥

युजं। हि। मां। अकृथाः। आत्। इत्। इंद्र। शिरः। दासस्य। नमुचेः। मथायन्।
अश्मानं। चित्। स्वर्यं। वर्तमानं। प्र। चक्रियाऽइव। रोदसी इति। मरुत्ऽभ्यः ॥८॥

हे इंद्र त्वं स्वर्यं स्वरेण सहितं वर्तमानं भ्रमंतमश्मानं चित् मेघमिव स्थितं दासस्योपक्षपयितुर्नमुचेरसुरस्य शिरो मथायन् चूर्णयन् आदिदनंतरमेव मां युजं सखायमकृथा हि। चकृषे खलु। तदानीं मरुद्भ्यस्त्वत्सहायेभ्यो रोदसी द्यावापृथिव्यौ चक्रियेव चक्रे इव प्रास्तां॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥

॥ अथ नवमी ॥

स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य सेनाः।
अंतर्ह्यख्यदुभे अस्य धेने अथोप प्रैद्युधये दस्युमिंद्रः ॥९॥

स्त्रियः। हि। दासः। आयुधानि। चक्रे। किं। मा। करन्। अबलाः। अस्य। सेनाः।
अंतः। हि। अख्यत्। उभे इति। अस्य। धेने इति। अथ। उप। प्र। ऐत्। युधये।
दस्युं। इंद्रः ॥९॥

दास उपक्षपयिता नमुचिरसुरः स्त्रियः स्त्रीरायुधानि युद्धसाधनानि चक्रे हि। कृतवान् खलु। इंद्रेण सह योद्धुं प्रतिहितवानित्यर्थः। अस्यासुरस्य संबंधि-

न्योऽबलाः स्त्रीरूपाः सेना मा मां किं करन् किं कुर्युरिति मन्यमान इंद्रस्तासां मध्येऽस्यासुरस्य धेने प्रीणयित्र्यौ सुरूपे उभे द्वे स्त्रियावंतरख्यद्धि । गृहमध्ये निदधे खलु । अथानंतरमिंद्रो दस्युं नमुचिं युधये युद्धायोपप्रैत् । उपप्रागच्छत् ॥

॥ अथ दशमी ॥

समत्र गावोऽभितोऽनवंतेहेह वत्सैर्वियुता यदासन् ।
सं ता इंद्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमंदन् ॥१०॥
सं । अत्र । गावः । अभितः । अनवंत । इहऽइह । वत्सैः । विऽयुताः । यत् । आसन् ।
सं । ताः । इंद्रः । असृजत् । अस्य । शाकैः । यत् । ईं । सोमासः । सुऽसुताः । अमंदन् ॥१०॥

यदा गावो वत्सैर्वियुता आसन् वियुक्ता अभवन् अथास्मिन्कालेऽभितः सर्वतो नमुचिनापहृता गाव इहेह इह चेह च सर्वतः समनवंत । अत्यंतमगच्छन् । यद्यदा सुषुता बभ्रुनाम्ना ऋषिणा सुष्ठभिषुताः सोमासः सोमा ईमेनमिंद्रममंदन् अमादयन् तदेंद्रः शाकैः शक्तैर्मरुद्भिः सहास्य बभ्रोः संबंधिनीर्नमुचिनापहृतास्ता गाः समसृजत् । वत्सैः सह समयोजयत् ॥

॥ इति चतुर्थस्य प्रथमे सप्तविंशो वर्गः ॥

॥ अथैकादशी ॥

यदीं सोमा बभ्रुधूता अमंदन्नरोरवीद्वृषभः सादनेषु ।
पुरंदरः पपिवाँ इंद्रो अस्य पुनर्गवामददादुस्रियाणां ॥११॥
यत् । ईं । सोमाः । बभ्रुऽधूताः । अमंदन् । अरोरवीत् । वृषभः । सदनेषु ।
पुरंऽदरः । पपिऽवान् । इंद्रः । अस्य । पुनः । गवां । अददात् । उस्रियाणां ॥११॥

यद्यदा बभ्रुधूता बभ्रुणाभिषुताः सोमा ईमेनमिंद्रममंदन् अमादयन् तदा वृषभः कामानां वर्षितेंद्रः सदनेषु युद्धेष्वरोरवीत् । अत्यर्थं शब्दमकरोत् । पुरंदरः पुरां दारयितास्येमं सोमं पपिवान् पीतवानिंद्रः पुनरुस्रियाणां क्षीरमुत्स्राविणीर्गवां गा अददात् । बभ्रवे ददौ ॥

॥ अथ द्वादशी ॥

भद्रमिदं रुशमा अग्ने अक्रन्गवां चत्वारि ददतः सहस्रा ।
ऋणंचयस्य प्रयता मघानि प्रत्यग्रभीष्म नृतमस्य नृणां ॥१२॥

भद्रं। इदं। रुशमाः। अग्ने। अक्रन्। गवां। चत्वारि। ददतः। सहस्रा।
ऋणंऽचयस्य। प्रऽयता। मघानि। प्रति। अग्रभीष्म। नृऽतमस्य। नृणां ॥१२॥

रुशम इति कश्चिज्जनपदविशेषः। अत्र रुशमशब्देन तत्रत्या जना उच्यंते। रुशमा ऋणंचयनाम्नो राज्ञः किंकरा हे अग्ने भद्रं कल्याणमिदं कर्माक्रन्। अकुर्वन्। कीदृशाः। गवां धेनूनां चत्वारि चतुःसंख्यायुक्तानि सहस्रा सहस्राणि ददतो मह्यं प्रयच्छंतः। राज्ञा हि दीयमानानि धनानि राजपुरुषा एव प्रयच्छंतीत्यर्थः। नरां नेतॄणां मध्ये नृतमस्यातिशयेन नेतृतमस्य ऋणंचयस्यैतन्नामकेन राज्ञा प्रयता प्रयतानि दत्तानि मघानि गोरूपाणि धनानि वयं प्रत्यग्रभीष्म। प्रतिगृहीतवंतः स्मः। पूजार्थं बहुवचनं ॥

॥ अथ त्रयोदशी ॥

सुपेशसं माव सृजंत्यस्तं गवां सहस्रै रुशमासो अग्ने।
तीव्रा इंद्रममंदुः सुतासोऽक्तोर्व्युष्टौ परितक्म्यायाः ॥१३॥

सुऽपेशसं। मा। अव। सृजंति। अस्तं। गवां। सहस्रैः। रुशमासः। अग्ने।
तीव्राः। इंद्रं। अममंदुः। सुतासः। अक्तोः। विऽउष्टौ। परिऽतक्म्यायाः ॥१३॥

हे अग्ने रुशमासो रुशमा ऋणंचयस्य किंकराः सुपेशसं सुरूपमलंकाराच्छादनादिभिः संस्कृतं मा मामस्तं गृहं गवां धेनूनां सहस्रैः सहावसृजंति। प्रापयंति स्म। तदनंतरमेव तीव्रा रसवंतः सुतासो लब्धबहुधनेन मयाभिषुताः सोमाः परितक्म्यायाः। तमसा भूतानि परितस्तकति गच्छतीति परितक्म्या। तस्या अक्तो रात्रेर्व्युष्टौ व्युच्छने सति। उषःकाल इत्यर्थः। इंद्रममंदुः। अमादयन्। बभ्रुर्गवां प्राप्त्यनंतरमविलंबितमेव सोमेनेज इत्यर्थः ॥

॥ अथ चतुर्दशी ॥

औच्छत्सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानां।
अत्यो न वाजी रघुरज्यमानो बभ्रुश्चत्वार्यसनत्सहस्रा ॥१४॥

औच्छत्। सा। रात्री। परिऽतक्म्या। या। ऋणंऽचये। राजनि। रुशमानां।
अत्यः। न। वाजी। रघुः। अज्यमानः। बभ्रुः। चत्वारि। असनत्। सहस्रा ॥१४॥

रुशमानां रुशमनाम्नां जनानां राजनि प्रभावृणंचय एतत्संज्ञके तत्समीप एव या रात्रिः परितक्म्या परितो गंत्री भवति सा राम्यौच्छत् । व्युष्टाभवत् । अत्यः सततगामी वाजी न अश्व इव रघुः शीघ्रगाम्यज्यमानः प्रेर्यमाणो बभ्रुरेतन्नामक ऋषिश्चत्वारि चतुःसंख्याकानि सहस्रा सहस्राणि गोरूपाणि धनान्यसनत् । अलभत ॥

॥ अथ पंचदशी ॥

चतुःसहस्रं गव्यस्य पश्वः प्रत्यग्रभीष्म रुशमेष्वग्ने ।

घर्मश्चित्तप्तः प्रवृजे य आसीदयस्मयस्तम्वादाम विप्राः ॥१५॥

चतुःऽसहस्रं । गव्यस्य । पश्वः । प्रति । अग्रभीष्म । रुशमेषु । अग्ने ।

घर्मः । चित् । तप्तः । प्रऽवृजे । यः । आसीत् । अयस्मयः । तं । ऊं इति । आदाम । विप्राः ॥१५॥

हे अग्ने वयं रुशमेष्वेतत्संज्ञकेषु जनेषु गव्यस्य गवात्मकस्य पश्वः पशोः पशूनां । जातावेकवचनं । चतुःसहस्रं चत्वारि सहस्राणि प्रत्यग्रभीष्म । प्रतिगृहीतवंतः स्मः । प्रवृजे प्रवृंजनार्थे तप्तः संतप्तः शोभनवर्णो घर्मश्चिन्महावीर इवायस्मयोऽयोमयो हिरण्मयो यः कलश आसीत् अभवत् तमु दोहनार्थं कलशं च विप्रा मेधाविनो वयं रुशमेष्वादाम । आदत्तवंतः ॥

॥ इति चतुर्थस्य प्रथमेऽष्टाविंशो वर्गः ॥

इंद्रो रथायेति त्रयोदशर्चं सप्तदशं सूक्तं । अवस्युर्नामात्रेय ऋषिः । त्रिष्टुप् छंदः । इंद्रो देवता । उग्रमयातं सं ह यन्नामिति पादयोः क्रमेण कुत्सोशनसौ विकल्पेन देवता । इंद्राकुत्सा वहमानेत्यस्या इंद्रः कुत्सश्च । तथा चानुक्रांतं । इंद्रो रथाय सप्तोनावस्युरुग्रमिति कौत्स्यौशनसौ वा पादौ पैंद्राकौत्सीति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

इंद्रो रथाय प्रवतं कृणोति यमध्यस्थान्मघवा वाजयंतं ।

यूथेव पश्वो व्युनोति गोपा अरिष्टो याति प्रथमः सिषासन् ॥१॥

इंद्रः । रथाय । प्रऽवतं । कृणोति । यं । अधिऽअस्थात् । मघऽवा । वाजऽयंतं ।

यूथाऽइव । पश्वः । वि । उनोति । गोपाः । अरिष्टः । याति । प्रथमः । सिसासन् ॥१॥

मघवा धनवानिंद्रो वाजयंतमन्नमिच्छंतं यं रथमध्यस्थात् अधितिष्ठति तस्मै रथाय प्रवतं प्रवणमाजिं कृणोति । करोति । अपि च गोपा गोपालः पश्वो यूथेव पशोः पशूनां यूथानि यथा च्युनोति प्रेरयति तथा शत्रुसैन्यानि प्रेरयति । अरिष्टः शत्रुभिः स्वयमहिंसितः प्रथमो देवानां मुख्य इंद्रः सिषासन् शत्रुधनानीच्छन् याति । गच्छति ॥

॥ अथ द्वितीया ॥

आ प्र द्रव हरिवो मा वि वेनः पिशंगराते अभि नः सचस्व ।
नहि त्वदिंद्र वस्यो अन्यदस्त्यमेनांश्चिज्जनिवतश्चकर्थ ॥२॥

आ । प्र । द्रव । हरिऽवः । मा । वि । वेनः । पिशंगऽराते । अभि । नः । सचस्व ।
नहि । त्वत् । इंद्र । वस्यः । अन्यत् । अस्ति । अमेनान् । चित् । जनिऽवतः । चकर्थ ॥२॥

हे हरिवो हरिवन्निंद्र त्वमास्मानभिमुखं प्र द्रव । प्रकर्षेण गच्छ । किंतु मा विवेनः । वेनतिः कांतिकर्मा । अस्मासु विगतकामो मा भूः । किंच हे पिशंगराते बहुरूपधनेंद्र नोऽस्मानभिसचस्व । अभिसेवस्व । अपि च हे इंद्र वस्यो वसीयः श्रेयस्करं त्वत्त्वत्तोऽन्यन्न ह्यस्ति । अन्यन्नसुजातं नास्ति । अमेनांश्चित् । मेनाशब्दः स्त्रीवाची । अपगतस्त्रीकांश्चित् जनिवतो जायावतश्चकर्थ । करोषि ॥

॥ अथ तृतीया ॥

उद्यत्सहः सहस आजनिष्ट देदिष्ट इंद्र इंद्रियाणि विश्वा ।
प्राचोदयत्सुदुघा वव्रे अंतर्वि ज्योतिषा संववृत्वत्तमोऽवः ॥३॥

उत् । यत् । सहः । सहसः । आ । अजनिष्ट । देदिष्टे । इंद्रः । इंद्रियाणि । विश्वा ।
प्र । अचोदयत् । सुऽदुघाः । वव्रे । अंतः । वि । ज्योतिषा । संऽववृत्वत् । तमः ।
अवरित्यवः ॥३॥

यद्यदा सहः सूर्यसंबंधि तेजः सहस उषःसंबंधिनस्तेजस उदाजनिष्ट उपरिष्टात् प्रादुर्बभूव तदेंद्रो विश्वा विश्वानि सर्वाणींद्रियाणि धनानि । इंद्रियमिति धननामैतत् । देदिष्टे । यजमानेभ्यो दिशति । वव्रे निवारके पर्वतेऽतर्मध्ये बलेन निरुद्धाः सुदुघाः सुष्ठु दोग्ध्रीर्गाः प्राचोदयत् । प्रेरयत् । ज्योतिषा तेजसा संववृत्वत् संवरणशीलं तमो विवः । निवारितवान् ॥

॥ अथ चतुर्थी ॥

अनवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमंतं ।

ब्रह्माण इंद्रं महयंतो अर्कैरवर्धयन्नहये हंतवा उ ॥४॥

अनवः । ते । रथं । अश्वाय । तक्षन् । त्वष्टा । वज्रं । पुरुऽहूत । द्युऽमंतं ।

ब्रह्माणः । इंद्रं । महयंतः । अर्कैः । अवर्धयन् । अहये । हंतवै । ऊं इति ॥४॥

हे पुरुहूत बहुभिराहूतेंद्र ते त्वदीयं रथमश्वायाश्वाभ्यां संयोगार्हमनवः । अनवो मनुष्याः । ऋभवस्तक्षन् । अतक्षन् । अकुर्वन् । त्वष्टा च त्वदीयं वज्रं द्युमंतं दीप्तिमंतमकरोत् । उ अपि च महयंत इंद्रं पूजयंतो ब्रह्माणोऽंगिरसः परिवृढा मरुतो वा अहयेऽहिं वृत्रं हंतवै हंतुमर्कैः स्तोत्रैरवर्धयन् । वर्धितवंतः ॥

॥ अथ पंचमी ॥

वृष्णे यत्ते वृषणो अर्कमर्चानिंद्र ग्रावाणो अदितिः सजोषाः ।

अनश्वासो ये पवयोऽरथा इंद्रेषिता अभ्यवर्तंत दस्यून् ॥५॥

वृष्णे । यत् । ते । वृषणः । अर्कं । अर्चान् । इंद्र । ग्रावाणः । अदितिः । सऽजोषाः ।

अनश्वासः । ये । पवयः । अरथाः । इंद्रऽइषिताः । अभि । अवर्तंत । दस्यून् ॥५॥

हे इंद्र यद्यदा वृषणः सेचनसमर्था मरुतो वृष्णे कामानां वर्षित्रे ते तुभ्यमर्कं स्तोत्रमर्चान् अस्तुवन् । अकुर्वन्नित्यर्थः । तदादितिरदीनाः । वचनव्यत्ययः । ग्रावाणोऽभिषवणपाषाणाः सजोषाः संगता बभूवुरिति शेषः । अनश्वासोऽश्ववर्जिता अरथा रथहीना इंद्रेषिता इंद्रेण प्रेषिताः पवयः पवमाना गच्छंतो ये मरुतो दस्यून् शत्रूनभ्यवर्तंत अभिभूतान् कुर्वंतो वर्तंते स्म ते मरुतोऽर्चानिति संबंधः ॥

॥ इति चतुर्थस्य प्रथम एकोनत्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

प्र ते पूर्वाणि करणानि वोचं प्र नूतना मघवन्या चकर्थ ।

शक्तीवो यद्विभरा रोदसी उभे जयन्नपो मनवे दानुचित्राः ॥६॥

प्र । ते । पूर्वाणि । करणानि । वोचं । प्र । नूतना । मघऽवन् । या । चकर्थ ।

शक्तिऽवः । यत् । विऽभराः । रोदसी इति । उभे इति । जयन् । अपः । मनवे ।

दानुऽचित्राः ॥६॥

हे इंद्र ते त्वदीयानि पूर्वाणि पुरातनानि करणानि कर्माणि प्रवोचं। अहं प्रकर्षेण ब्रवीमि। नूतना नूतनानि नवानि कर्माणि प्रवोचं। प्रब्रवीमि। हे मघवन् धनवन्निंद्र या यानि कर्माणि चकर्थ कृतवानसि तानि प्रवोचमिति संबंधः। हे शचीवः शक्तिमन्। शक्तिर्वज्रं कर्म वा। तद्वन्निंद्र यत् यस्त्वमुभे रोदसी द्यावापृथिव्यौ जयन्वशीकुर्वन् अप उदकानि मनवे मनुष्याय विभराः विविच्य बिभर्षि। कीदृशीः। दानुचित्राः चित्रदानाः॥

॥ अथ सप्तमी ॥

तदिन्नु ते करणं दस्म विप्राहिं यद्घ्नन्नोजो अत्रामिमीथाः।
शुष्णस्य चित्परि माया अगृभ्णाः प्रपित्वं यन्नप दस्यूँरसेधः ॥७॥
तत्। इत्। नु। ते। करणं। दस्म। विप्र। अहिं। यत्। घ्नन्। ओजः। अत्र। अमिमीथाः।
शुष्णस्य। चित्। परि। मायाः। अगृभ्णाः। प्रऽपित्वं। यन्। अप। दस्यून्। असेधः ॥७॥

हे दस्म दर्शनीय विप्र मेधाविन्निंद्र त्वमत्रास्मिंल्लोकेऽहिं वृत्रमसुरं घ्नन् हिंसन् यदोजो यद्बलममिमीथाः प्रकाशितवानसि तदिन्नु तत्खलु ते त्वदीयं करणं कर्म विद्यते। अपि च शुष्णस्य चिदेतन्नामकस्याप्यसुरस्य संबंधिनीर्माया युवतीः पर्यगृभ्णाः। परिगृहीतवानसि। हे इंद्र त्वं प्रपित्वं संग्रामं समीपं वा यन् प्राप्नुवन् दस्यूनसुरानपासेधः। अपाबाधथाः॥

॥ अथाष्टमी ॥

त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इंद्र।
उग्रमयातमवहो ह कुत्सं सं ह यद्वामुशनारंत देवाः ॥८॥
त्वं। अपः। यदवे। तुर्वशाय। अरमयः। सुऽदुघाः। पारः। इंद्र।
उग्रं। अयातं। अवहः। ह। कुत्सं। सं। ह। यत्। वां। उशना। अरंत। देवाः ॥८॥

हे इंद्र त्वं पारे नदीनां तीरे। प्रवृद्ध इति शेषः। सुदुघा ओषधिवनस्पतीन् सुष्ठु दुहतीरप उदकानि यदवे यदुनामकाय राज्ञे तुर्वशायैतन्नामकाय राज्ञे चारमयः। रमितवानसि। हे इंद्र युवां। त्वं कुत्सश्चेति शेषः। उग्रमुद्गूर्णं शुष्णमयातं। आगच्छतं। तदनंतरं त्वं शुष्णं हत्वा कुत्समवहो ह। स्वगृहं प्रापितवानसि खलु। यद्यदा वां युवामिंद्राकुत्सावुशना भार्गवो देवाश्च समरंत ह संभेजिरे खलु॥

॥ अथ नवमी ॥

इंद्राकुत्सा वहमाना रथेना वामत्या अपि कर्णे वहंतु ।
निः षीमद्भ्यो धमथो निः षधस्थान्मघोनो हृदो वरथस्तमांसि ॥९॥

इंद्राकुत्सा । वहमाना । रथेन । आ । वां । अत्याः । अपि । कर्णे । वहंतु ।
निः । सीं । अत्ऽभ्यः । धमथः । निः । सधऽस्थात् । मघोनः । हृदः । वरथः । तमांसि ॥९॥

हे इंद्राकुत्सेंद्राकुत्सौ रथेन वहमाना वहमानावुह्यमानौ वां युवामत्या अश्वाः कर्णेऽपि । स्तोत्राणि कृणोति करोतीति कर्णः स्तोता यजमानो वा । तत्समीपेऽपीति यावत् । आवहंतु । आ समंताद्वाहका भवंतु । युवामप्यद्भ्योऽप्सु प्रविष्टं सीमेनं शुष्णासुरं निर्धमथः । अबाधेथां । सीमिति शुष्णासुरो बुद्धिस्थः परामृश्यते । सधस्थात्स्वकीयात्स्थानान्निरबाधेथां । मघोनो मघवतो हविष्मतो यजमानस्य हृदो हृदयात्तमांस्यज्ञानरूपाणि पापानि वरथः । निवारयथः ॥

॥ अथ दशमी ॥

वातस्य युक्तान्सुयुजश्चिदश्वान्कविश्चिदेषो अजगन्नवस्युः ।
विश्वे ते अत्र मरुतः सखाय इंद्र ब्रह्माणि तविषीमवर्धन् ॥१०॥

वातस्य । युक्तान् । सुऽयुजः । चित् । अश्वान् । कविः । चित् । एषः । अजगन् । अवस्युः ।
विश्वे । ते । अत्र । मरुतः । सखायः । इंद्र । ब्रह्माणि । तविषी । अवर्धन् ॥१०॥

कविश्चित्प्राज्ञोऽप्यवस्युरेतन्नामक एष मंत्रद्रष्टा वातस्य वायोर्वेगेन युक्तान् संयुक्तान् सुयुजश्चित्सुष्ठु योजनीयानश्वानजगन् । प्राप्नोत् । अवस्योः सखायो विश्वे सर्वे मरुतो बहवः स्तोतारो हे इंद्र अत्रास्मिंल्लोके ते त्वदीयां तविषी बलं ब्रह्माणि ब्रह्मभिः स्तोत्रैरवर्धन् । अवर्धयन् ॥

॥ इति चतुर्थस्य प्रथमे त्रिंशो वर्गः ॥

॥ अथैकादशी ॥

सूरश्चिद्रथं परितक्म्यायां पूर्वं करदुपरं जूजुवांसं ।
भरच्चक्रमेतशः सं रिणाति पुरो दधत्सनिष्यति क्रतुं नः ॥११॥

सूरः । चित् । रथं । परिऽतक्म्यायां । पूर्वं । करत् । उपरं । जूजुऽवांसं ।
भरत् । चक्रं । एतशः । सं । रिणाति । पुरः । दधत् । सनिष्यति । क्रतुं । नः ॥११॥

इंद्रः परितक्म्यायां संग्रामे । परितो गच्छंत्यस्यां भय इति परितक्म्या संग्रामः । एतशाख्येन ऋषिणा सह योद्धुः सूरश्चित्सूर्यस्यापि संबंधिनं जूजुवांसं वेगेन गच्छंतं रथमुपरमुपरतव्यापारं पूर्वं करत् । पुरोऽकरोत् । एतश एतशाय ॥ विभक्तिव्यत्ययः ॥ इंद्रः पूर्वं द्विचक्रस्य रथस्यैकं चक्रं भरत् । अहरत् । स इंद्रस्तेन चक्रेणासुरान् संरिणाति । हिनस्ति । अपि च पुरो दधदस्मान्पुरस्कुर्वन् नोऽस्मदीयं क्रतुं यज्ञं सनिष्यति । संभजतु ॥

॥ अथ द्वादशी ॥

आयं जना अभिचक्षे जगामेंद्रः सखायं सुतसोममिच्छन् ।
वदन्ग्रावाव वेदिं भ्रियाते यस्य जीरमध्वर्यवश्चरंति ॥१२॥
आ । अयं । जनाः । अभिऽचक्षे । जगाम । इंद्रः । सखायं । सुतऽसोमं । इच्छन् ।
वदन् । ग्रावा । अव । वेदिं । भ्रियाते । यस्य । जीरं । अध्वर्यवः । चरंति ॥१२॥

हे जना अभिचक्षे युष्मानभिद्रष्टुमयमिंद्रः सखायं स्तोतारं सुतसोममभिषुतसोमं यजमानमिच्छन्नभिलषन्नाजगाम । आगच्छति । अध्वर्यवो यस्य ग्राव्णो जीरं क्षेपणं प्रेरणं चरंति स ग्रावा सोमाभिषवपाषाणो वदन् शब्दं कुर्वन् वेदिमवभ्रियाते । अभिह्रियते ॥

॥ अथ त्रयोदशी ॥

ये चाकनंत चाकनंत नू ते मर्ता अमृत मो ते अंह आरन् ।
वावंधि यज्यूँरुत तेषु धेह्योजो जनेषु येषु ते स्याम ॥१३॥
ये । चाकनंत । चाकनंत । नु । ते । मर्ताः । अमृत । मो इति । ते । अंहः । आ । अरन् ।
ववंधि । यज्यून् । उत । तेषु । धेहि । ओजः । जनेषु । येषु । ते । स्याम ॥१३॥

हे इंद्र धनार्थं ये जनास्त्वां चाकनंत अकामयंत । पुनश्च ते नु क्षिप्रमेव त्वां चाकनंत हे अमृत अमरणशीलेंद्र मर्ता मरणधर्माणस्ते जना अंहोऽनर्थं मो आरन् । मा गमन् ॥ मा उ इति निपातसमुदायो मेत्येकनिपातार्थे वर्तते ॥ उत अपि च यज्यून्यजमानान्ववंधि । संभजस्व । येषु जनेषु येषां जनानां मध्ये वयं स्तोतारस्ते त्वदीयाः स्याम भवाम हे इंद्र त्वं तेषु जनेष्वोजो बलं धेहि ॥

॥ इति चतुर्थस्य प्रथम एकविंशो वर्गः ॥

अदर्दरुत्समिति द्वादशर्चमष्टादशं सूक्तं। गातुर्नामात्रेय ऋषिः। त्रिष्टुप् छंदः। इंद्रो देवता। तथा चानुक्रांतं। अदर्दर्द्वादश गातुरिति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः।
महांतमिंद्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन् ॥१॥
अदर्दः। उत्सं। असृजः। वि। खानि। त्वं। अर्णवान्। बद्बधानान्। अरम्णाः।
महांतं। इंद्र। पर्वतं। वि। यत्। वरिति वः। सृजः। वि। धाराः। अव। दानवं।
हन्निति हन् ॥१॥

हे इंद्र त्वमुत्समुत्स्यंदमानं मेघमदर्दः। विदारितवानसि। तदनंतरं खानि मेघस्योदकानां निर्गमनद्वाराणि व्यसृजः। विशेषेण सृष्टवानसि। किंच बद्बधानान्बाध्यमानानर्णवानुदकवतो मेघानरम्णाः। विसर्जयसि। क्षारयसीत्यर्थः ॥ अत्र रम्णातिर्विसर्जनकर्मा ॥ हे इंद्र यद्यस्त्वं ॥ यदिति लिंगव्यत्ययः ॥ महांतं प्रभूतं पर्वतं मेघं विवः। विवृतवानसि। धारा अपां विसृजः। विसृष्टवानसि। अपि च दानवं दनोः पुत्रं वृत्रमसुरं यद्वोदकस्य दातारं मेघं वावहन्। अभिहतवानसि। अत्र निरुक्तं। अदृणा उत्सं। उत्स उत्सदनाद्वोत्स्यंदनाद्वोनत्तेर्वा स्यात्। व्यसृजोऽस्य खानि त्वमर्णवानर्णस्वत एतानित्यादि। नि० १०.९. ॥

॥ अथ द्वितीया ॥

त्वमुत्साँ ऋतुभिर्बद्बधानाँ अरंह ऊधः पर्वतस्य वज्रिन्।
अहिं चिदुग्र प्रयुतं शयानं जघन्वाँ इंद्र तविषीमधत्थाः ॥२॥
त्वं। उत्सान्। ऋतुऽभिः। बद्बधानान्। अरंहः। ऊधः। पर्वतस्य। वज्रिन्।
अहिं। चित्। उग्र। प्रऽयुतं। शयानं। जघन्वान्। इंद्र। तविषीं। अधत्थाः ॥२॥

हे वज्रिन् वज्रवन्निंद्र त्वमृतुभिर्ऋतुषु वृष्टिकालेषु बद्बधानान्प्रतिबध्यमानानुत्सान्मेघान्प्रतिबंधनादमोचय इति शेषः। अपि च पर्वतस्य मेघस्य संबंध्यूधो बलमरंहः। अगमयः। हे उग्र उद्गूर्णबलेंद्र प्रयुतमुद्युक्तं शयानं जले शयनं कुर्वंतमहिं चिद्वृत्रं च जघन्वान् हतवानसि। हे इंद्र त्वं तविषीं बलमधत्थाः। अधारयः। वृत्रवधानंतरमिंद्रो लोके प्रख्यातो भवतीत्यर्थः ॥

॥ अथ तृतीया ॥

त्यस्य चिन्महतो निर्मृगस्य वधर्जघान तविषीभिरिंद्रः ।
य एक इदप्रतिर्मन्यमान आदस्मादन्यो अजनिष्ट तव्यान् ॥३॥
त्यस्य । चित् । महतः । निः । मृगस्य । वधः । जघान । तविषीभिः । इंद्रः ।
यः । एकः । इत् । अप्रतिः । मन्यमानः । आत् । अस्मात् । अन्यः । अजनिष्ट । तव्यान् ॥३॥

निर्जघानायुधं शक्रो वृत्रेण क्षिप्रमोजसा । वृत्रस्य गात्रादन्यो यः प्रादुर्भूतो महासुरः ॥ वृत्रं पूर्वं निहत्येंद्रो द्वितीयं शुष्णसंज्ञकं । पुनर्जघानेंद्र इति पराभिः कीर्तयत्यृषिरिति ॥ इंद्रो महतः प्रभूतस्य मृगस्य मृगवच्छीघ्रगामिनस्त्यस्य चित् तस्य वृत्रस्य संबंधि वधरायुधं तविषीभिः स्वकीयैर्बलैर्निर्जघान । निःशेषेणावधीत् । एक इदसहाय एवाप्रतिः प्रतिद्वंद्विरहितो मन्यमान आत्मानं योऽस्तीति शेषः । आत्तदानीमस्माद्वृत्रात्तव्यान्प्रवृद्धतरोऽन्योऽसुरोऽजनिष्ट । प्रादुरभूत् ॥

॥ अथ चतुर्थी ॥

त्यं चिदेषां स्वधया मदंतं मिहो नपातं सुवृधं तमोगां ।
वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णं ॥४॥
त्यं । चित् । एषां । स्वधया । मदंतं । मिहः । नपातं । सुऽवृधं । तमःऽगां ।
वृषऽप्रभर्मा । दानवस्य । भामं । वज्रेण । वज्री । नि । जघान । शुष्णं ॥४॥

एषां प्राणिनां स्वधयान्नेन मदंतं मोदमानं सर्वप्राणिनामन्नं स्वयमेव भुंजानं मिहः सेचनसमर्थस्य मेघस्य नपातं पातारं रक्षितारं । अत्र नपाच्छब्दः पातरि वर्तते । प्राणो वै तनूनपात्स हि तन्वः पातीति ब्राह्मणं । सुवृधं प्रवृद्धं तमोगं तमोऽधकारं गच्छंतं त्यं चित्तं च वृत्रं निजघानेति शेषः । वृषप्रभर्मा वर्षणशीलस्य मेघस्य प्रहर्ता वज्री वज्रवानिंद्रो वज्रेण स्वकीयेनायुधेन दानवस्य दनुजस्य भामं । अत्र क्रोधवाचिभामशब्देन क्रोधादुत्पन्नः शुष्णासुरो लक्ष्यते । तं शुष्णासुरं निजघान । हतवान् ॥

॥ अथ पंचमी ॥

त्यं चिदस्य क्रतुभिर्निषत्तममर्मणो विददिदस्य मर्म ।
यदीं सुक्षत्र प्रभृता मदस्य युयुत्संतं तमसि हर्म्ये धाः ॥५॥

त्वं। चित्। अस्य। क्रतुऽभिः। निऽसत्तं। अमर्मणः। विदत्। इत्। अस्य। मर्म।
यत्। ईं। सुऽक्षत्र। प्रऽभृता। मदस्य। युयुत्संतं। तमसि। हर्म्ये। धाः ॥५॥

अमर्मणो मर्महीनमात्मानं मन्यमानस्यास्य वृत्रस्य निषत्तं निषण्णं त्वं चित् त्वमेव ॥ लिंगव्यत्ययः ॥ मर्म प्राणस्थानं। यत्र स्थाने विद्धो म्रियते तन्मर्मेत्युच्यते। अस्य वृत्रस्य क्रतुभिः प्रज्ञानैर्हे इंद्र त्वं विददित्। अज्ञासीरेव। यद्यदा हे सुक्षत्र सुबलेंद्र त्वं मदस्य मादकस्य सोमस्य प्रभृता प्रभृतौ संभरणे सति युयुत्संतं योद्धुमिच्छंतमीमेनं वृत्रं हर्म्ये हारके तमसि धाः न्यदधाः। वृत्र इंद्रस्य भयात्तमसि प्राविशदित्यर्थः ॥

॥ अथ षष्ठी ॥

त्वं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानं।
तं चिन्मंदानो वृषभः सुतस्योच्चैरिंद्रो अपगूर्या जघान ॥६॥
त्वं। चित्। इत्था। कत्पयं। शयानं। असूर्ये। तमसि। ववृधानं।
तं। चित्। मंदानः। वृषभः। सुतस्य। उच्चैः। इंद्रः। अपऽगूर्य। जघान ॥६॥

सुतस्याभिषुतेन सोमेन मंदानो मोदमानो वृषभः कामानां वर्षितेंद्र उच्चैरूर्ध्वमपगूर्य वज्रमुद्यम्य तं चित्तमेव वृत्रासुरं जघान। अवधीत्। कीदृशं। इत्थामुत्रांतरिक्षलोके कत्पयं। कत्सुखकरं पयो यस्य तं। शयानमप्सु शयनं कुर्वंतमसूर्ये सूर्यरहिते तमस्यंधकारे ववृधानं वर्धमानं। त्वं चिदिति पुनर्वचनं पूरणार्थं ॥

॥ इति चतुर्थस्य प्रथमे द्वात्रिंशो वर्गः ॥

॥ अथ सप्तमी ॥

उद्यदिंद्रो महते दानवाय वधर्यमिष्ट सहो अप्रतीतं।
यदीं वज्रस्य प्रभृतौ ददाभ विश्वस्य जंतोरधमं चकार ॥७॥
उत्। यत्। इंद्रः। महते। दानवाय। वधः। यमिष्ट। सहः। अप्रतिऽइतं।
यत्। ईं। वज्रस्य। प्रऽभृतौ। ददाभ। विश्वस्य। जंतोः। अधमं। चकार ॥७॥

यद्यदेंद्रो महते प्रभूताय दानवाय वृत्रासुराय सहः शत्रूणामभिभवितृ अप्रतीतं केनाप्यप्रतिगतं वधर्वज्रमुद्यमिष्ट उदयच्छत्। यद्यदा वज्रस्य प्रभृतौ प्रहृतौ प्रहरणे

सति ॥ हयहोर्भ इति भत्वं ॥ ईमेनं वृषं ददाभ अहिंसीत् तदा विश्वस्य सर्वस्य जंतोः प्राणिनोऽधमं नीचं चकार। अकरोत् ॥

॥ अथाष्टमी ॥

त्यं चिदर्णं मधुपं शयानमसिन्वं वव्रं मह्याददुग्रः।
अपादमत्रं महता वधेन नि दुर्योण आवृणङ्मृध्रवाचं ॥८॥

त्यं। चित्। अर्णं। मधुऽपं। शयानं। असिन्वं। वव्रं। महि। आदत्। उग्रः।
अपादं। अत्रं। महता। वधेन। नि। दुर्योणे। अवृणक्। मृध्रऽवाचं ॥८॥

उग्र उद्गूर्णबल इंद्रो महि महांतं त्यं चित्तमेव वृत्रमादत्। आददौ। प्रत्यग्रहीत्। कीदृशं। अर्णं गंतारं जलं मेघं वावृत्य शयानं शयनं कुर्वंतं। स्थितवंतमित्यर्थः। मधुपं मधुनोऽंभसः पातारं पालयितारमसिन्वं सपत्नानामवक्षेप्तारं ॥ अस्यतेरिदं रूपं ॥ वव्रं वृण्वंतं सर्वमपाच्छादयंतं। स इमांल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वं। तै॰ सं॰ २.५.२.२.। इति तैत्तिरीयकं। तदनंतरमिंद्रो दुर्योणे संग्रामे महता प्रभूतेन वधेन वज्रेणापादं पादरहितममत्रममात्रं परिमाणरहितं मृध्रवाचं हिंसितवागिंद्रियं। जृंभाभिभूतमित्यर्थः। वृत्रं न्यावृणक्। नितरामहिंसीत्। तस्माज्जंजभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहितां। तै॰ सं॰ २.५.२.४.। इति तैत्तिरीयकं ॥

॥ अथ नवमी ॥

को अस्य शुष्मं तविषीं वरात एको धना भरते अप्रतीतः।
इमे चिदस्य ज्रयसो नु देवी इंद्रस्यौजसो भियसा जिहाते ॥९॥

कः। अस्य। शुष्मं। तविषीं। वराते। एकः। धना। भरते। अप्रतिऽइतः।
इमे इति। चित्। अस्य। ज्रयसः। नु। देवी इति। इंद्रस्य। ओजसः। भियसा।
जिहाते इति ॥९॥

अस्येंद्रस्य संबंधिनीं शुष्मं शोषणीं तविषीं बलं को वराते। निवारयेत् ॥ शुष्मशब्दस्य स्त्रीलिंगविशेषणत्वेऽपि नियतलिंगत्वात्पुंल्लिंगत्वमेव ॥ अप्रतीतः केनाप्यप्रतिगत इंद्र एकोऽसहाय एव धना धनानि शत्रूणां वसूनि भरते। बिभर्ति हरते वा। देवी देव्यौ द्योतमाने इमे चिदेव द्यावापृथिव्यौ ज्रयसो

वेगवतोऽस्येंद्रस्य संबंधिन ओजसो बलादुद्भूतेन भियसा भयेन नु क्षिप्रं जिहाते। गच्छतः। चलत इत्यर्थः ॥

॥ अथ दशमी ॥

न्यस्मै देवी स्वधितिर्जिहीत इंद्राय गातुरुशतीव येमे ।
सं यदोजो युवते विश्वमाभिरनु स्वधाव्ने क्षितयो नमंत ॥१०॥
नि। अस्मै। देवी। स्वऽधितिः। जिहीते। इंद्राय। गातुः। उशतीऽइव। येमे।
सं। यत्। ओजः। युवते। विश्वं। आभिः। अनु। स्वधाऽव्ने। क्षितयः। नमंत ॥१०॥

स्वधितिः स्वधृतिः स्वेन धृता देवी द्योतमाना द्यौरस्मा इंद्राय निजिहीते। नीचत्वेन याति। गातुर्भूमिरुशतीव कामयमाना योषिदिवेंद्राय येमे। आत्मानं नियच्छति। यथेष्टमात्मानं विनियोक्तुं योग्या भवतीत्यर्थः। यद्यदेंद्रो विश्वं समस्तमोजो बलमाभिः प्रजाभिः संयुवते संयोजयति। इंद्रः स्वकीयं बलं सर्वासु प्रजासु निहितवानित्यर्थः। अनु आनुकूल्येन वर्तमानाः क्षितयो मनुष्याः। क्षितय इति मनुष्यनामैतत्। स्वधाव्ने बलवत इंद्राय नमंत। संनमंति। प्रह्वीभवंति ॥

॥ अथैकादशी ॥

एकं नु त्वा सत्पतिं पांचजन्यं जातं शृणोमि यशसं जनेषु ।
तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमानास इंद्रं ॥११॥
एकं। नु। त्वा। सत्ऽपतिं। पांचऽजन्यं। जातं। शृणोमि। यशसं। जनेषु।
तं। मे। जगृभ्रे। आऽशसः। नविष्ठं। दोषा। वस्तोः। हवमानासः। इंद्रं ॥११॥

हे इंद्र त्वा त्वामेकं मुख्यमेव जनेषु सर्वेषु मनुष्येषु मध्येऽहं मंत्रद्रष्टा शृणोम्यृषिमुख्येभ्यः। कीदृशं। सत्पतिं सतां साधूनां पालकं पांचजन्यं पंचजनेभ्यो मनुष्येभ्यो हितं जातमुत्पन्नं यशसं यशोयुक्तं। दोषा क्षपायां वस्तोर्वासरे च वहमानासः स्तुवंत आशसः कामानां शंसमाना मे मदीयाः प्रजा नविष्ठमतिशयेन स्तुत्यं तमिंद्रं जगृभ्रे। गृह्णंतु। स्वीकुर्वंतु ॥

॥ अथ द्वादशी ॥

एवा हि त्वामृतुथा यातयंतं मघा विप्रेभ्यो ददतं शृणोमि ।
किं ते ब्रह्माणो गृहते सखायो ये त्वाया निदधुः काममिंद्र ॥१२॥

एव । हि । त्वां । ऋतुऽथा । यातयंतं । मघा । विप्रेभ्यः । ददतं । शृणोमि ।
किं । ते । ब्रह्माणः । गृहते । सखायः । ये । त्वाऽया । निऽदधुः । कामं । इंद्र ॥१२॥

एवैवमुक्तप्रकारेण हि ऋतुथा काले काले यातयंतं जंतून्प्रेरयंतं हे इंद्र त्वां विप्रेभ्यः स्तोतृभ्यो मघा मघानि धनानि ददतं यच्छंतं शृणोमि । निशामयामि । एतन्मृषैव प्रतिभाति । हे इंद्र त्वाया त्वयि ये स्तोतारः कामं स्वकीयाभिलाषं निदधुः न्यक्षिपन् ब्रह्माणो बृहंतस्ते त्वदीयाः सखायः स्तोतारः किं गृहते । त्वत्तः किं गृह्णते । ऋषिः स्वकीयाभिलाषप्राप्तिविलंबनादेवमुक्तवानित्यर्थः ॥

॥ इति चतुर्थस्य प्रथमे त्रयस्त्रिंशो वर्गः ॥
॥ इति पंचमे मंडले द्वितीयोऽनुवाकः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणामात्येन विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके प्रथमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
चतुर्थे प्रथमाध्यायं व्याख्याय व्याकृतिक्षमः ।
सुधीः श्रीसायणाचार्यो द्वितीयं व्याचिकीर्षति ॥

तत्रात्रेः पंचमे मंडले तृतीयेऽनुवाके द्वादश सूक्तानि । तत्र महि मह इति दशर्चं प्रथमं सूक्तं प्रजापतिपुत्रस्य संवरणस्यार्षं । इंद्रो देवता । त्रिष्टुप् छंदः । महि दश प्राजापत्यः संवरण इत्यनुक्रांतं । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

महिं महे तवसे दीध्ये नॄनिंद्रायेत्था तवसे अतव्यान् ।
यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश्चिकेत ॥१॥

महि। महे। तवसे। दीध्ये। नॄन्। इंद्राय। इत्था। तवसे। अतव्यान्।
यः। अस्मै। सुऽमतिं। वाजऽसातौ। स्तुतः। जने। सऽमर्यः। चिकेत ॥१॥

अहं संवरणोऽतव्यानत्यंतमिव दुर्बलः सन् महि महत् प्रभूतं स्तोत्रं महे महते तवसे बलवत इंद्रायेत्थेत्थं वक्ष्यमाणप्रकारेण दीध्ये। दीपयामि। प्रकाशयामि। किमर्थं। नॄन्॥ षष्ठ्यर्थे द्वितीया॥ मनुष्याणामस्मदीयानां तवसे बलाय। यद्वा नॄनस्मद्विरोधिनामभिभवायेति शेषः। तदर्थं तवसेऽस्मद्बलाय। य इंद्रोऽस्मै जने जनाय संवरणाय वाजसातौ संग्रामे वाजस्यान्नस्य वा लाभे निमित्ते सति स्तुतः सन् सुमतिं समर्यो मर्त्यैः स्तोतृभिः सहितो यद्वा सह म्रियमाणैर्युध्यमानैर्मरुदादिभिरथवा समराहश्चिकेत जानाति॥

॥ अथ द्वितीया॥

स त्वं न इंद्र धियसानो अर्कैर्हरीणां वृषन्योक्त्रमश्रेः।
या इत्था मघवन्ननु जोषं वक्षो अभि प्रार्यः सक्षि जनान् ॥२॥
सः। त्वं। नः। इंद्र। धियसानः। अर्कैः। हरीणां। वृषन्। योक्त्रं। अश्रेः।
याः। इत्था। मघऽवन्। अनु। जोषं। वक्षः। अभिः। प्र। अर्यः। सक्षि। जनान् ॥२॥

हे वृषन् वर्षकेंद्र स प्रसिद्धस्त्वं नोऽस्मान्धियसानो ध्यायन् अर्कैरर्चनसाधनैः स्तोत्रैर्निमित्तभूतैर्हरीणां रथे नियोज्यानामश्वानां योक्त्रं नियोजनरज्जुमश्रेः। आश्रयसि। याः॥ *लिंगव्यत्ययः*॥ *यानश्वान् हे मघवन् इत्थेत्थं* जोषं प्रीतिमनु वक्षोऽवहः तैर्निमित्तैर्योक्त्रमश्रेरिति। तथा कृत्वार्योऽस्मदरीन् जनानभि आभिमुख्येन प्र प्रकृष्टं सक्षि। पराभव॥

॥ अथ तृतीया॥

न ते त इंद्राभ्य१स्मदृष्वायुक्तासो अब्रह्मता यदसन्।
तिष्ठा रथमधि तं वज्रहस्ता रश्मिं देव यमसे स्वश्वः ॥३॥
न। ते। ते। इंद्र। अभि। अस्मत्। ऋष्व। अयुक्तासः। अब्रह्मता। यत्। असन्।
तिष्ठ। रथं। अधि। तं। वज्रऽहस्त। आ। रश्मिं। देव। यमसे। सुऽअश्वः ॥३॥

हे ऋष्व महन्निंद्र यत् येऽस्मदस्मत्तस्त्वद्भक्तेभ्योऽन्येऽयुक्तासस्त्वयासंयुक्ता

असन् आसन् अभवन् अब्रह्मता। ब्रह्म परिवृढं कर्म। तद्रहितत्वात् ते नरास्ते त्वदीया न भवंति। अतोऽस्मद्यज्ञमभ्यागंतुं तं प्रसिद्धं रथमधितिष्ठ। हे वज्रहस्तेंद्र देव स्वश्वस्त्वं यं रथमारोढुं रश्मिं प्रग्रहमायमसे नियमयसि तमधितिष्ठ ॥

॥ अथ चतुर्थी ॥

पुरु यत्त इंद्र संत्युक्था गवे चकर्थोर्वरासु युध्यन्।
ततक्षे सूर्याय चिदोकसि स्वे वृषा समत्सु दासस्य नाम चित् ॥४॥

पुरु। यत्। ते। इंद्र। संति। उक्था। गवे। चकर्थ। उर्वरासु। युध्यन्।
ततक्षे। सूर्याय। चित्। ओकसि। स्वे। वृषा। समत्ऽसु। दासस्य। नाम। चित् ॥४॥

हे इंद्र ते तव यद्यदा स्वभूतानि पुरु पुरूणि बहून्युक्थोक्थानि शस्त्राणि संति तदोर्वरासु सस्योपेतासु भूमिषु निमित्तभूतासु गवे वृष्ट्युदकाय युध्यन् जलप्रतिबंधकान् (संहरन् चकर्थ। करोषि भेदनं। कुचेति। सूर्याय सूर्यस्य स्वे स्वकीय ओकसि स्थाने। वृषा वर्षिता सन्) ततक्षे। संपादयसि। समत्सु संग्रामेषु दासस्य वृष्टिप्रतिबंधकर्तुरेतन्नामकस्यासुरस्य नाम चिन्नामापि ततक्षे। नाशयसीत्यर्थः ॥

॥ अथ पंचमी ॥

वयं ते त इंद्र ये च नरः शर्धो जज्ञाना याताश्च रथाः।
आस्माञ्जगम्यादहिशुष्म सत्वा भगो न हव्यः प्रभृथेषु चारुः ॥५॥

वयं। ते। ते। इंद्र। ये। च। नरः। शर्धः। जज्ञानाः। याताः। च। रथाः।
आ। अस्मान्। जगम्यात्। अहिऽशुष्म। सत्वा। भगः। न। हव्यः। प्रऽभृथेषु। चारुः ॥५॥

हे इंद्र ये च नरः कर्मणां नेतार ऋत्विग्यजमाना वयं स्मः ते वयं ते त्वदीयाः। कीदृशा वयं। शर्धो बलं जज्ञाना उत्पादयंतः स्तुतिभिर्याताश्च होतुं त्वां प्राप्ताश्च रथा रंहणशीलाश्च। किंच हे अहिशुष्म। अहिरयनात्। सर्वतो व्याप्तबलेंद्र त्वदनुग्रहाद्धव्यः स्तुत्यः प्रतिभटैराह्वातव्यो वा चारुः संगंता सत्वा भृत्यादिः प्रभृथेषु संग्रामेषु यज्ञेषु वास्मानाजगम्यात्। आगच्छेत्। भगो न भग इव हव्यश्चारुः। भगदेवो यथास्मत्सहाय आगच्छति तथा भृत्यादिरागच्छेदित्यर्थः ॥

॥ इति चतुर्थस्य द्वितीये प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

पपृक्षेण्यमिंद्र त्वे ह्योजो नृम्णानि च नृतमानो अमर्तः ।
स न एनीं वसवानो रयिं दाः प्रार्यः स्तुषे तुविमघस्य दानं ॥६॥
पपृक्षेण्यं । इंद्र । त्वे इति । हि । ओजः । नृम्णानि । च । नृतमानः । अमर्तः ।
सः । नः । एनीं । वसवानः । रयिं । दाः । प्र । अर्यः । स्तुषे । तुविऽमघस्य । दानं ॥६॥

हे इंद्र पपृक्षेण्यं संपर्कार्हं पूज्यं वौजो बलं त्वे हि त्वयि खलु । त्वदधीनमित्यर्थः । नृतमानो नृत्यन् अमर्तोऽमरणधर्मा स त्वं वसवान आच्छादयन् स्वतेजसा जगत् नृम्णानि नृमणानि द्रविणानि । वक्ष्यमाणापेक्षया चशब्दः । एनीमेनवर्णां श्वेतवर्णां रयिं धनं दाः । देहि । अहं च अर्य ईश्वरस्य तुविमघस्य प्रभूतधनस्य च दानं प्रस्तुषे । स्तौमि ॥

॥ अथ सप्तमी ॥

एवा न इंद्रोतिभिरव पाहि गृणतः शूर कारून् ।
उत त्वचं ददतो वाजसातौ पिप्रीहि मध्वः सुषुतस्य चारोः ॥७॥
एव । नः । इंद्र । ऊतिऽभिः । अव । पाहि । गृणतः । शूर । कारून् ।
उत । त्वचं । ददतः । वाजऽसातौ । पिप्रीहि । मध्वः । सुऽसुतस्य । चारोः ॥७॥

हे शूरेंद्र एवैवं नोऽस्मान् गृणतः स्तुवतः कारून् कर्तॄनृत्विज ऊतिभी रक्षणैरव । पालय । उतापि च वाजसातौ संग्रामे त्वचमाच्छादकं रूपं ददतः प्रयच्छतः सुषुतस्य सुष्ठ्वभिषुतस्य चारोर्मनोहरस्य मध्वः सोमस्य पिप्रीहि । प्रीणयात्मानं । द्वितीयार्थे षष्ठी । उक्तलक्षणं सोमं पिबेत्यर्थः । अथवा तृतीयार्थे षष्ठी । उक्तलक्षणेन सोमपानेन प्रीणय ॥

॥ अथाष्टमी ॥

उत त्ये मा पौरुकुत्स्यस्य सूरेस्त्रसदस्योर्हिरणिनो रराणाः ।
वहंतु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर्नु सश्चे ॥८॥
उत । त्ये । मा । पौरुऽकुत्स्यस्य । सूरेः । त्रसदस्योः । हिरणिनः । रराणाः ।
वहंतु । मा । दश । श्येतासः । अस्य । गैरिऽक्षितस्य । क्रतुऽभिः । नु । सश्चे ॥८॥

त्रसदस्युश्च विदथो ध्वन्यश्चेति त्रयो नृपाः । अश्वान्धनानि गाश्चादुर्ऋषये तद्वदत्यृषिः ॥ उतापि च त्ये ते मा । चतुर्थ्यर्थे द्वितीया । मह्यमित्यर्थः । रराणाः ॥ रातेर्दानार्थस्य कर्मणि लिटः कानचि रूपं ॥ दत्ता इत्यर्थः । पौरुकुत्स्यस्य पुरुकुत्सापत्यस्य सूरेः प्रेरकस्य हिरणिनो हिरण्यवतोऽस्य त्रसदस्योरेतन्नामकस्य राजर्षेर्गैरिक्षितस्य गिरिक्षितगोत्रोत्पन्नस्य श्येतासः शुभ्रवर्णा दशाश्वा मा मां वहंतु । प्रापयंतु । अहं च क्रतुभिः कर्मभी रथनियोजनादिभिर्यज्ञादिभिर्वा नु क्षिप्रं सश्चे । गच्छेयं ॥

॥ अथ नवमी ॥

उत त्ये मा मारुताश्वस्य शोणाः क्रत्वामघासो विदथस्य रातौ ।
सहस्रा मे च्यवतानो ददान आनूकमर्यो वपुषे नार्चत् ॥९॥
उत । त्ये । मा । मारुतऽअश्वस्य । शोणाः । क्रत्वाऽमघासः । विदथस्य । रातौ ।
सहस्रा । मे । च्यवतानः । ददानः । आनूकं । अर्यः । वपुषे । न । आर्चत् ॥९॥

उतापि च त्ये तेऽश्वा वक्ष्यमाणा मारुताश्वस्य । मरुत्सदृशवेगाश्ववान्मरुताश्वः । तदपत्यस्य विदथस्यैतन्नामकस्य राज्ञः शोणाः शोणवर्णाः क्रत्वामघासः क्रतुना कर्मणा शीघ्रगमनादिलक्षणेन माहनीया अश्वा रातौ दाने विनियुक्ता मां वहंतीति शेषः । किंच सहस्रा सहस्राण्यपरिमितानि धनान्यर्यः पूज्यस्य मे । चतुर्थ्यर्थे षष्ठी । पूज्याय मह्यं च्यवतानश्चावयन् ददानः प्रयच्छन् स आनूकमाभरणं च वपुषे स्वशरीरालंकारायार्चत् । प्रायच्छत् । नेति चार्थे ॥

॥ अथ दशमी ॥

उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः ।
मह्ना रायः संवरणस्य ऋषेर्व्रजं न गावः प्रयता अपि ग्मन् ॥१०॥
उत । त्ये । मा । ध्वन्यस्य । जुष्टाः । लक्ष्मण्यस्य । सुऽरुचः । यतानाः ।
मह्ना । रायः । संऽवरणस्य । ऋषेः । व्रजं । न । गावः । प्रऽयताः । अपि । ग्मन् ॥१०॥

उतापि च त्ये ते वक्ष्यमाणा रायो ध्वन्यस्य ध्वन्यनामकस्य लक्ष्मण्यस्य लक्ष्मणपुत्रस्य राज्ञः संबंधिनोऽश्वा मा जुष्टा मां प्राप्ताः सुरुचः शोभनदीप्तयो यताना वहमानाय यतमानाः । रायो मह्ना महत्त्वेन युक्ता रायः प्रयता दत्ताः सत्यः

संवरणस्य ऋषेरपिग्मन्। अपिगताः। प्राप्ता मद्गृहमिति शेषः। व्रजं न गावो गोष्ठं गाव इव। यद्वा नेति चार्थे। गावश्च मम व्रजमपिग्मन्। अस्मिन्सूक्ते प्रायेण मरुतो राज्ञां च दानस्तुतयः। अनु० १.२.। इत्युक्तत्वाद्राज्ञां दानस्तुतिरविरुद्धा॥

॥ इति चतुर्थस्य द्वितीये द्वितीयो वर्गः ॥

अजातशत्रुमिति नवर्चं द्वितीयं सूक्तं प्राजापत्यस्य संवरणस्यार्षमैंद्रं। नवमी त्रिष्टुप् शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः। अजातशत्रुं नव त्रिष्टुबंतमित्यनुक्रमणिका॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा ॥

अजातशत्रुमजरा स्वर्वत्यनु स्वधामिता दस्ममीयते।
सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतरं दधातन ॥१॥

अजातऽशत्रुं। अजरा। स्वःऽवती। अनु। स्वधा। अमिता। दस्मं। ईयते।
सुनोतन। पचत। ब्रह्मऽवाहसे। पुरुऽस्तुताय। प्रऽतरं। दधातन ॥१॥

अजातशत्रुं। अनुत्पन्नाः शातयितारो यस्य तं। दस्मं शत्रूणामुपक्षपयितारमजराक्षीणा स्वर्वती स्वरणवत्यमितापरिमिता स्वधान्नं हविरन्वीयते। अनुप्राप्नोति। तदर्थं हे ऋत्विजः सुनोतन। अभिषुणुत। पचत पुरोडाशादिकं। कस्मै। ब्रह्मवाहसे ब्रह्मणः परिवृढस्य स्तोत्रस्य वाहकाय पुरुष्टुताय बहुभिः स्तुतायेंद्राय। प्रतरं प्रकृष्टतरं दधातन। धारयत स्वस्वोचितकर्म॥

॥ अथ द्वितीया ॥

आ यः सोमेन जठरमपिप्रतामंदत मघवा मध्वो अंधसः।
यदीं मृगाय हंतवे महावधः सहस्रभृष्टिमुशना वधं यमत् ॥२॥

आ। यः। सोमेन। जठरं। अपिप्रत। अमंदत। मघऽवा। मध्वः। अंधसः।
यत्। ईं। मृगाय। हंतवे। महाऽवधः। सहस्रऽभृष्टिं। उशना। वधं। यमत् ॥२॥

यो मघवा सोमेन जठरं स्वकीयोदरमा सर्वतोऽपिप्रत अपूरयत् मध्वो मधुरस्यांधसः सोमस्य पानेनामंदत। अतृप्यत्। यद्यदेमयं मृगायैतन्नामकायासुराय हंतवे तं हंतुं महावधो महावज्रः सहस्रभृष्टिरपरिमिततेजा उशना कामयमानः शत्रुं यद्वोशनसा सह वधं वज्रं यमत् उदयच्छत् तदापिप्रत अमंदत॥

॥ अथ तृतीया ॥

यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह ।
अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः ॥३॥

यः। अस्मै। घ्रंसे। उत। वा। यः। ऊधनि। सोमं। सुनोति। भवति। द्युऽमान्। अह।
अपऽअप। शक्रः। ततनुष्टिं। ऊहति। तनूऽशुभ्रं। मघऽवा। यः। कवऽसखः ॥३॥

यो यजमानोऽस्मा इंद्राय घ्रंसे। अहर्नामैतत्। गृह्यंतेऽस्मिन्रसा इति घ्रंसः। तस्मिन्। उत वा अथवा यो यजमान ऊधनि। उद्धततरं भवत्युद्धमिति वोधो रात्रिः। स्नेहप्रदानरसाभ्यामूधसि रात्रौ च समत्वाद्रात्रिरप्यूध उच्यते। अहनि रात्रौ च सोमं सुनोति स भवति द्युमान् दीप्तिमान्। अहेति विनिग्रहार्थीयः। किंच शक्रः शक्तोऽयमिंद्रस्ततनुष्टिं। ततं धर्मसंततिं नुदति वष्टि कामयते कामानिति ततनुष्टिः। तं तनूशुभ्रं। तनूः शुभ्रा शोभनीयालंकारादिभिर्यस्य तं। तादृशं स्वपोषकमयज्वानमपोहति। अपरोऽपशब्दः पूरणार्थः। मघवा धनवान्यः कवासखः कुत्सितपुरुषसहायस्तमपोहतीति ॥

॥ अथ चतुर्थी ॥

यस्यावधीत्पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते ।
वेतीद्वस्य प्रयता यतंकरो न किल्बिषादीषते वस्व आकरः ॥४॥

यस्य। अवधीत्। पितरं। यस्य। मातरं। यस्य। शक्रः। भ्रातरं। न। अतः। ईषते।
वेति। इत्। ऊं इति। अस्य। प्रऽयता। यतंऽकरः। न। किल्बिषात्। ईषते। वस्वः।
आऽकरः ॥४॥

शक्रो शक्तोऽयं यस्यायज्वनः पितरमवधीत् हतवान्। यस्य च मातरमवधीत्। यस्य च भ्रातरं अतोऽस्मादयज्वनः सकाशान्नेषते। न बिभेति न गच्छति वा। किंत्वस्य प्रयता दत्तानि हवींषि वेतीदु। कामयत एव। अयज्वानं शिक्षयित्वा नियोजयतीत्यर्थः। यतंकरो यमनकर्ता वस्वो वसुनो धनस्याकर आभिमुख्यकर्ता यः किल्बिषात्पित्रादिवधयुक्तान्नेषते न चलति न बिभेति वा। इंद्रस्यास्तोतॄणां हतिरिंद्रो यतीन् सालावृकेभ्यः प्रायच्छत् अंतरिक्षे पौलोमान्पृथिव्यां कालकांज्यानरुन्मुखान्यतीन् सालावृकेभ्यः प्रायच्छमित्यादिश्रुतिषु प्रसिद्धा ॥

॥ अथ पंचमी ॥

न पंचभिर्दशभिर्वष्ट्यारभं नासुन्वता सचते पुष्यता चन ।
जिनाति वेदमुया हंति वा धुनिरा देवयुं भजति गोमति व्रजे ॥५॥
न । पंचऽभिः । दशऽभिः । वष्टि । आऽरभं । न । असुन्वता । सचते । पुष्यता । चन ।
जिनाति । वा । इत् । अमुया । हंति । वा । धुनिः । आ । देवऽयुं । भजति । गोऽमति । व्रजे ॥५॥

अयमिंद्रः पंचभिर्दशभिर्वा सहायैरारभमारंभं शत्रुहननायालंबनं न वष्टि । साहाय्यं नापेक्षत इत्यर्थः । यद्वामुमिंद्रं पंचभिर्दशभिर्वा यज्ञादन्यैरुपायैरारभमारब्धुमुद्योगं कर्तुं न वष्टि । न कामयते । असुन्वताभिषवमकुर्वता सह पुष्यता चन बंध्वादीनपोषयतापि न सचते । न संगच्छते । असुन्वंतमभिषवमकुर्वाणमयष्टारमपुष्णंतं च न प्राप्नोतीत्यर्थः । न केवलमप्राप्तिमात्रं किंतु जिनाति वा । वाशब्दश्चार्थे । जिनाति च । बाधते । इदिति पूरणः । हंति वामुयामुमयष्टारं धुनिः कंपकः शत्रूणां । देवयुं देवमिंद्रं कामयमानं यजमानं गोमति व्रज आभजति । योजयतीत्यर्थः ॥

॥ इति चतुर्थस्य द्वितीये तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वृधः ।
इंद्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः ॥६॥
विऽत्वक्षणः । संऽऋतौ । चक्रंऽआसजः । असुन्वतः । विषुणः । सुन्वतः । वृधः ।
इंद्रः । विश्वस्य । दमिता । विऽभीषणः । यथाऽवशं । नयति । दासं । आर्यः ॥६॥

समृतौ संग्रामे वित्वक्षणो विशेषेण तनूकर्ता शत्रूणां तदर्थं चक्रमासजो रथचक्रस्यासंजयितासुन्वतोऽयजमानस्य विषुणः पराङ्मुखः सुन्वतो यजमानस्य वृधो वर्धयितेंद्रो विश्वस्य दमिता शिक्षयिता विभीषणो भयजनक आर्यः स्वामी यथावशं यथेच्छं दासं दासकर्माणं जनं नयति स्ववशं ॥

॥ अथ सप्तमी ॥

समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु ।
दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत् ॥७॥

सं । ई॒ । प॒णेः । अ॒जति॒ । भोज॑नं । मु॒षे । वि । दा॒शुषे॑ । भज॑ति । सू॒नरं॑ । वसु॑ ।
दुः॒ऽगे । च॒न । ध्रि॒यते॒ । विश्वः॑ । आ । पु॒रु । जनः॑ । यः । अ॒स्य । तवि॑षी॒म् । अचु॑क्रुधत् ॥७॥

ईमयमिंद्रः पणेर्वणिज इव लुब्धकस्यादातुर्भोजनं धनमन्नं वा मुषे चोरयितुं समजति । सम्यक् गच्छति । गत्वा चादाय दाशुषे हविर्दात्रे यजमानाय विभजति सूनरं शोभनमनुष्यं वसु धनं । अयष्टुर्धनमाकृष्य यष्ट्रे प्रयच्छतीत्यर्थः । न केवलं वणिग्धनप्रदानमात्रं किंतु पुरु पुरूणि दुर्गे चन दुःखेन गंतव्य आपद्यपि विश्वः सर्वोऽपि दातृजन आध्रियते । आस्थाप्यते । यो जनोऽस्येंद्रस्य तविषी बलमचुक्रुधत् विहिताकरणादिना तस्य पणेरजतीति पूर्वशेषः । यद्वा योऽस्य तविषीमचुक्रुधत् स सर्वोऽपि जनो दुर्गे चनाध्रियत इंद्रेण ॥ चनेत्येकपदमध्येतृसंप्रदायप्राप्तं ॥

॥ अथाष्टमी ॥

सं यज्जनौ॑ सु॒धनौ॑ वि॒श्वश॑र्धसा॒ववे॒दिंद्रो॑ म॒घवा॒ गोषु॑ शु॒भ्रिषु॑ ।
यु॒जं ह्य१॒॑न्यमकृ॑त प्रवेप॒न्युदीं॑ गव्यं॑ सृजते॒ सत्व॑भि॒र्धुनिः॑ ॥८॥

सं । यत् । जनौ॑ । सु॒ऽधनौ॑ । वि॒श्वऽश॑र्धसौ । अवे॑त् । इंद्रः॑ । म॒घऽवा॑ । गोषु॑ । शु॒भ्रिषु॑ ।
यु॒जं॑ । हि । अ॒न्यं । अकृ॑त । प्र॒ऽवे॒प॒नी । उत् । ई॒म् । गव्यं॑ । सृ॒जते॑ । सत्व॑ऽभिः । धुनिः॑ ॥८॥

समवेत्संजानाति यद्यदा जनौ परस्परं प्रतिद्वंद्विनौ सुधनौ शोभनधनौ विश्वशर्धसौ व्याप्तबलौ बहूत्साहौ वा मघवा धनवानिंद्रो गोषु शुभ्रिषु शोभनासु गोषु निमित्तभूतासु अन्यं यष्टारं युजं सहायमकृत कृतवान् प्रवेपनी शत्रूणां प्रवेपनवान् । ईमस्मै गव्यं गोसमूहमुत्सृजते सत्वभिर्मरुद्भिः सह धुनिर्मेघानां कंपयिता । इंद्रो यजमानमयजमानं वा यं जानाति गोनिमित्तं ज्ञात्वा यज्वने गोसमूहं प्रयच्छतीत्यर्थः ॥

॥ अथ नवमी ॥

स॒ह॒स्र॒सामाग्नि॑वेशिं गृणीषे॒ शत्रि॑मग्न उप॒मां के॒तुम॒र्यः ।
तस्मा॒ आपः॑ सं॒यतः॑ पीपयंत॒ तस्मि॑न्क्ष॒त्रमम॑वत्त्वे॒षम॑स्तु ॥९॥

स॒ह॒स्र॒ऽसां । आग्नि॑ऽवेशिं । गृ॒णी॒षे॒ । शत्रिं॑ । अ॒ग्ने॒ । उ॒प॒ऽमां । के॒तुं । अ॒र्यः ।
तस्मै॑ । आपः॑ । सं॒ऽयतः॑ । पी॒प॒यं॒त॒ । तस्मि॑न् । क्ष॒त्रं । अम॑ऽवत् । त्वे॒षं । अ॒स्तु॒ ॥९॥

अग्निवेशसुतं शत्रिमसंख्यातधनप्रदं । आशास्त ऋषिरंत्यर्चो प्रजापतिसुतः

सुधीः ॥ अर्योऽहं सहस्रसामपरिमितधनप्रदमाग्निवेशिमग्निवेशसुतं शचिमेतन्नामकं राजर्षिं गृणीषे। गृणे। स्तौमि। हे अग्ने अंगनादिगुणविशिष्टेंद्र। कीदृशं तं। उपमामुपमानभूतं केतुं प्रज्ञापकं। प्रख्यातमित्यर्थः। तस्मा आपः संयतः सम्यक् गच्छंत्यः पीपयंत। प्यायंतां। तस्मिन्राज्ञि क्षत्रं धनममवद्बलसहितं त्वेषं दीप्तमस्त्विति ॥

॥ इति चतुर्थस्य द्वितीये चतुर्थो वर्गः ॥

यस्ते साधिष्ठ इत्यष्टर्चं तृतीयं सूक्तं। अंगिरोगोत्रः प्रभूवसुर्नाम ऋषिः। अंत्या पंक्तिः। पंक्त्यंतपरिभाषया शिष्टा अनुष्टुभः। इंद्रो देवता। यस्तेऽष्टौ प्रभूवसुरांगिरसः पंक्त्यंतमित्यनुक्रांतं॥ सूक्तविनियोगो लैंगिकः॥ आभिप्लविकेषूक्थ्येषु तृतीयसवन आद्यस्तृचोऽच्छावाकस्य वैकल्पिकोऽनुरूपः। सूचितं च। यस्ते साधिष्ठोऽवसे पुरां भिंदुर्युवा कविः। आ॰ ७.८.। इति ॥ द्वितीयतृतीययोः स्वरसाम्नोश्चाद्यौ तृचावनुरूपौ। यस्ते साधिष्ठोऽवस इति षळनुष्टुभः। आ॰ ८.५.। इति हि सूचितं ॥

॥ तत्र प्रथमा ॥

यस्ते साधिष्ठोऽवस इंद्र क्रतुष्टमा भर।
अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरं ॥१॥
यः। ते। साधिष्ठः। अवसे। इंद्र। क्रतुः। तं। आ। भर।
अस्मभ्यं। चर्षणिऽसहं। सस्निं। वाजेषु। दुस्तरं ॥१॥

हे इंद्र ते तव यः साधिष्ठोऽतिशयेन साधकः क्रतुरुक्तलक्षणं कर्म प्रज्ञा वास्ति तं क्रतुं नोऽवसेऽस्मद्रक्षणायास्मभ्यमाभर। आहर। कीदृशं तं। चर्षणीसहं सर्वेषां मनुष्याणामभिभवितारं सस्निं संस्नातं शुद्धं वाजेषु संग्रामेषु दुष्टरमन्यैरनभिभाव्यं॥

॥ अथ द्वितीया ॥

यदिंद्र ते चतस्रो यच्छूर संति तिस्रः।
यद्वा पंच क्षितीनामवस्तत्सु न आ भर ॥२॥
यत्। इंद्र। ते। चतस्रः। यत्। शूर। संति। तिस्रः।
यत्। वा। पंच। क्षितीनां। अवः। तत्। सु। नः। आ। भर ॥२॥

हे इंद्र ते तव यत् या ऊतयश्चतस्रश्चतसृषु वर्णेषु संश्रिताः संति याश्च हे शूर तिस्रस्त्रिषु लोकेषु वर्तमानाः। यद्वा। वाशब्दश्चार्थे। यद्याश्च पंच क्षितीनां पंचजनसंबंधिन्य ऊतयः संति तत्सर्वमवो रक्षणं सु सुष्ठु नोऽस्मभ्यमाभर। आहरेति॥

॥ अथ तृतीया ॥

आ तेऽवो वरेण्यं वृषन्तमस्य हूमहे।
वृषजूतिर्हि जज्ञिष आभूभिरिंद्र तुर्वणिः॥३॥
आ। ते। अवः। वरेण्यं। वृषन्ऽतमस्य। हूमहे।
वृषऽजूतिः। हि। जज्ञिषे। आऽभूभिः। इंद्र। तुर्वणिः॥३॥

हे इंद्र वृषंतमस्य फलानां वर्षकतमस्य ते तवावो रक्षणं गमनं वा वरेण्यं वरणीयमाहूमहे। आह्वयामः। हे इंद्र वृषजूतिर्वर्षणगमनस्तुर्वणिस्तूर्णवनिर्हिंसको वा त्वमाभूभिः सर्वतो भवद्भिर्व्याप्तैर्मरुद्भिः सहावो हि जज्ञिषे। उत्पादयसि खलु। तेऽव आह्वयाम इति। यद्वा वृषगमनः सन् अद्य यज्ञमागत्य फलं जज्ञिषे तस्मात्तेऽवो हूमह इति॥

॥ अथ चतुर्थी ॥

वृषा ह्यसि राधसे जज्ञिषे वृष्णि ते शवः।
स्वक्षत्रं ते धृषन्मनः सत्राहमिंद्र पौंस्यं॥४॥
वृषा। हि। असि। राधसे। जज्ञिषे। वृष्णि। ते। शवः।
स्वऽक्षत्रं। ते। धृषत्। मनः। सत्राऽहं। इंद्र। पौंस्यं॥४॥

हे इंद्र राधसे यजमानानां समृद्धये वृषा ह्यसि। फलस्य वर्षकोऽसि खलु। यद्वा वृषा खल्वसि। राधसे धनार्थं जज्ञिषे। उत्पद्यसे। ते शवो बलं वृष्णि वर्षितृ। ते मनः स्वक्षत्रं स्वायत्तबलं धृषत् धर्षकं विरोधिनां। हे इंद्र ते पौंस्यं पुंस्त्वं सत्राहं संघहंतृ॥

॥ अथ पंचमी ॥

त्वं तमिंद्र मर्त्यममित्रयंतमद्रिवः।
सर्वरथा शतक्रतो नि याहि शवसस्पते॥५॥

त्वं । तं । इंद्र । मर्त्यं । अमित्रऽयंतं । अद्रिऽवः ।

सर्वऽरथा । शतक्रतो इति शतऽक्रतो । नि । याहि । शवसः । पते ॥५॥

हे इंद्र त्वं तममित्रयंतं शत्रुत्वमाचरंतं शत्रुं वेच्छंतं मर्त्यं हे अद्रिवो वज्रवन्निंद्र सर्वरथा सर्वत्र व्याप्तेन रथेन ॥ सुपां सुलुगित्याकारः ॥ हे शतक्रतो हे शवसस्पते बलस्य पालकेंद्र नि याहि । नितरां गच्छाभिभवितुं ॥

॥ इति चतुर्थस्य द्वितीये पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः ।

उग्रं पूर्वीषु पूर्व्यं हवंते वाजसातये ॥६॥

त्वां । इत् । वृत्रहन्ऽतम । जनासः । वृक्तऽबर्हिषः ।

उग्रं । पूर्वीषु । पूर्व्यं । हवंते । वाजऽसातये ॥६॥

हे वृत्रहंतमातिशयेन वृत्राणां हंतरिंद्र त्वामित्त्वामेव जनासो जना वृक्तबर्हिष आच्छादितदर्भाः । प्रवृत्तयज्ञा इत्यर्थः । उग्रमुद्गूर्णबलं पूर्वीषु बह्वीषु प्रजासु मध्ये पूर्व्यं पुरातनं संतं वाजसातये संग्रामाय हवंते । आह्वयंते ॥

॥ अथ सप्तमी ॥

अस्माकमिंद्र दुष्टरं पुरोयावानमाजिषु ।

सयावानं धनेधने वाजयंतमवा रथं ॥७॥

अस्माकं । इंद्र । दुस्तरं । पुरःऽयावानं । आजिषु ।

सऽयावानं । धनेऽधने । वाजऽयंतं । अव । रथं ॥७॥

हे इंद्र अस्माकं रथं रंहणस्वभावं वा पुत्रमव । रक्ष । कीदृशं रथं । दुष्टरं दुःखेन तरणीयमाजिषु संग्रामेषु पुरोयावानं पुरतो मिश्रयितारं सयावानमनुचरैः सह गंतारं धने धने सर्वेषु धनेषु वाजयंतं संग्रामं धनं वेच्छंतं ॥

॥ अथाष्टमी ॥

अस्माकमिंद्रेहि नो रथमवा पुरंध्या ।

वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे ॥८॥

अस्माकं। इंद्र। आ। इहि। नः। रथं। अव। पुरंऽध्या।

वयं। शविष्ठ। वार्यं। दिवि। श्रवः। दधीमहि। दिवि। स्तोमं। मनामहे ॥ ८॥

हे इंद्र अस्माकमस्मदीय एव सन् एहि। आगच्छ। आगत्य च पुरंध्या शोभनबुद्ध्या नोऽस्माकं रथमव। रक्ष। वयं च हे शविष्ठ अतिशयेन बलवन् त्वदनुग्रहाद्वार्यं वरणीयं श्रवोऽन्नं कीर्तिं वा दिवि द्योतमाने त्वयि दधीमहि। स्थापयामः। तथा दिवि त्वयि स्तोमं स्तोत्रं मनामहे। करवामह इत्यर्थः ॥

॥ इति चतुर्थस्य द्वितीये षष्ठो वर्गः ॥

स आ गमदिति षड़ृचं चतुर्थं सूक्तं। आंगिरसः प्रभूवसुर्ऋषिः। तृतीया जगती शिष्टा अनुक्तत्वात् त्रिष्टुभः। इंद्रो देवता। अनुक्रांतं च। स आ गमत् षट् तृतीया जगतीति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

स आ गमदिंद्रो यो वसूनां चिकेतद्दातुं दामनो रयीणां।

धन्वचरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुं ॥ १॥

सः। आ। गमत्। इंद्रः। यः। वसूनां। चिकेतत्। दातुं। दामनः। रयीणां।

धन्वऽचरः। न। वंसगः। तृषाणः। चकमानः। पिबतु। दुग्धं। अंशुं ॥ १॥

स इंद्रोऽस्मद्यज्ञं प्रत्यागमत्। आगच्छतु। यो देवो वसूनां धनानां। कर्मणि षष्ठी। वसूनि धनानि चिकेतत् जानाति प्रदातुं। स कीदृशः। दामनो दाता दानमना वा रयीणां धनानां। गमने दृष्टांतः। धन्वचरो न धनुषा सह संचरन् धानुष्क इव वंसगो वननीयगमनस्तृषाणोऽत्यंतं तृषितश्चकमानः कामयमानश्च सन् दुग्धमभिषुतमंशुं सोमं पिबतु ॥

॥ अथ द्वितीया ॥

आ ते हनू हरिवः शूर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे।

अनु त्वा राजन्नर्वतो न हिन्वन् गीर्भिर्मदेम पुरुहूत विश्वे ॥ २॥

आ। ते। हनू इति। हरिऽवः। शूर। शिप्रे इति। रुहत्। सोमः। न। पर्वतस्य। पृष्ठे।

अनु। त्वा। राजन्। अर्वतः। न। हिन्वन्। गीःऽभिः। मदेम। पुरुऽहूत। विश्वे ॥ २॥

हे इंद्र हे हरिवो हरिभ्यां तद्वन् शूर ते तव हनू हननसाधने। यद्यप्ययं

शिप्रावचनस्तथापि पुनः शिप्राभिधानाद्गौणोऽवगंतव्यः । उक्तरूपे संहते वा शिप्रे आरुहत् आरोहतु प्राप्नोतु सोमोऽस्मद्दत्तः । पर्वतस्य पृष्ठे न रुहत् । नारोहति । तत्र न तिष्ठतीत्यर्थः । यद्वा नशब्दः पुरस्तात्प्रयुक्तोऽप्यत्रोपमार्थः । पर्वतस्य पृष्ठ उपरिप्रदेशे सोमो न । तत्र यथा विस्रंभेण प्रसरति तद्वत् । हे राजन् राजमानेंद्र त्वा त्वामनु त्वया सह ॥ तृतीयार्थ इत्यनोः कर्मप्रवचनीयत्वं ॥ विश्वे वयमर्वंतो नाश्वानिव तृणादिभिर्गीर्भिः स्तुतिभिर्हिन्वन् हिन्वंतस्त्वां प्रीणयंतः संतो मदेम । हृष्येम । हे पुरुहूत बहुप्रकारं बहुभिर्वाहूतेंद्र ॥

॥ अथ तृतीया ॥

चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः ।

रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरूवसुः ॥३॥

चक्रं । न । वृत्तं । पुरुऽहूत । वेपते । मनः । भिया । मे । अमतेः । इत् । अद्रिऽवः ।

रथात् । अधि । त्वा । जरिता । सदाऽवृध । कुवित् । नु । स्तोषत् । मघऽवन् । पुरुऽवसुः ॥३॥

हे पुरुहूत बहुभिराहूत हे अद्रिवो वज्रवन्निंद्र मे मनोऽमतेरिहारिद्र्यादस्तोतुर्वा सकाशाद्भिया भीत्या वेपते । कंपते । वृत्तं चक्रं न भूमौ वर्तमानं चक्रमिव । यस्मादेवं तस्माद्रथादध्युपरि स्थितं त्वा त्वां हे सदावृध सर्वदा वर्धमान हे मघवन्निंद्र जरिता स्तोता पुरूवसुरहमृषिः कुविद्बहु नु क्षिप्रं स्तोषत् । स्तोष्यति । स्तूयात् ॥ अत्र कुविच्छब्दयोगेऽप्याख्यातस्य बहुलग्रहणान्निघातः ॥

॥ अथ चतुर्थी ॥

एष ग्रावेव जरिता त इंद्रेयर्ति वाचं बृहदाशुषाणः ।

प्र सव्येन मघवन्यंसि रायः प्र दक्षिणिद्धरिवो मा वि वेनः ॥४॥

एषः । ग्रावाऽइव । जरिता । ते । इंद्र । इयर्ति । वाचं । बृहत् । आशुषाणः ।

प्र । सव्येन । मघऽवन् । यंसि । रायः । प्र । दक्षिणित् । हरिऽवः । मा । वि । वेनः ॥४॥

एष जरिता गरिता स्तोता ग्रावेवाभिषवाश्मेव । स यथा रसं जनयति तद्वत् हे इंद्र ते तुभ्यं वाचं स्तुतिमियर्ति । प्रेरयतीत्यर्थः । बृहन्महत्प्रभूतं फलमाशुषाण आशु संभक्ता सन् हे मघवन् सव्येन हस्तेन रायो धनानि प्रयंसि । प्रयच्छसि । दक्षिणिद्दक्षिणेनापि प्रयंसीति शेषः । मा विवेनः । विगतकामं मा कार्षीः ॥

॥ अथ पंचमी ॥

वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्यां ।
स नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन्भरे धाः ॥५॥

वृषा । त्वा । वृषणं । वर्धतु । द्यौः । वृषा । वृषऽभ्यां । वहसे । हरिऽभ्यां ।
सः । नः । वृषा । वृषऽरथः । सुऽशिप्र । वृषक्रतो इति वृषऽक्रतो । वृषा । वज्रिन् ।
भरे । धाः ॥५॥

हे इंद्र त्वा त्वां वृषा वर्षित्री द्यौर्द्योतयित्री स्तुतिः ॥ द्योततेर्दीप्यतेर्वा स्तुत्यर्थस्येदं रूपं ॥ वृषणं कामानां वर्षकं त्वां वर्धतु । वर्धयतु । वृषा त्वं वृषभ्यां सेक्तृभ्यां हरिभ्यां वहसे । यज्ञं प्रत्युह्यसे । हे सुशिप्र शोभनहनो वृषक्रतो वर्षणकर्मन् हे वज्रिन् वज्रयुक्तेंद्र स त्वं वृषा वृषरथश्च सन् नोऽस्मान् भरे संग्रामे भरणवति यज्ञे वा धाः । धारय ॥

॥ अथ षष्ठी ॥

यो रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदिष्ट ।
यूने समस्मै क्षितयो नमंतां श्रुतरथाय मरुतो दुवोया ॥६॥

यः । रोहितौ । वाजिनौ । वाजिनीऽवान् । त्रिऽभिः । शतैः । सचमानौ । अदिष्ट ।
यूने । सं । अस्मै । क्षितयः । नमंतां । श्रुतऽरथाय । मरुतः । दुवःऽया ॥६॥

इयं श्रुतरथस्य राज्ञो दानस्तुतिः । यो राजा वाजिनीवानन्नवान् श्रुतरथो रोहितौ रोहितवर्णौ वाजिनौ वेजनवंतावश्वौ त्रिभिः शतैर्गवां धनानां वा उक्तसंख्याभिः सचमानौ संगच्छमानावदिष्ट ॥ ददातेर्दिशतेर्वा लुङीदं रूपं ॥ यूने सर्वत्र मिश्रयित्रे नित्यतरुणाय वास्मै श्रुतरथाय क्षितयः सर्वा प्रजा दुवोया ॥ तृतीयैकवचनस्य याजादेशः ॥ परिचर्यया संनमंतां । प्रणता भवंतु । सेवंतामित्यर्थः । हे मरुत इतींद्रसहायभूतानां मरुतां संबोधनं ॥

॥ इति चतुर्थस्य द्वितीये सप्तमो वर्गः ॥

सं भानुनेति पंचर्चं पंचमं सूक्तमत्रेरार्षं त्रैष्टुभमैंद्रं । सं भानुना पंचात्रिरित्यनुक्रमणिका ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वंचाः ।
तस्मा अमृध्रा उषसो व्युच्छान्य इंद्राय सुनवामेत्याह ॥१॥
सं । भानुना । यतते । सूर्यस्य । आऽजुह्वानः । घृतऽपृष्ठः । सुऽअंचाः ।
तस्मै । अमृध्राः । उषसः । वि । उच्छान् । यः । इंद्राय । सुनवाम । इति । आह ॥१॥

सूर्यस्य भानुना तेजसा सहाजुह्वानः सर्वैश्च हूयमानः ॥ कर्मणि कर्तृप्रत्ययः ॥ घृतपृष्ठः प्रदीप्तज्वालो घृतयुक्तपृष्ठप्रदेशो वा स्वंचाः स्वंचनोऽग्निः संयतते । सम्यक् प्रयत्नं करोति । उदयकाले ह्यग्नयः प्रज्वाल्यंते । तस्मात्कारणाद्यो यजमान इंद्राय सुनवामेत्याह ब्रूतेऽध्वर्युं प्रति तस्मै यजमानायामृध्रा अहिंसिता उषसो व्युच्छान् । व्युच्छंतु । उदयकालेऽग्निः प्रज्वालितस्तस्मात्सोमयागं कुर्म इति यो ब्रूते तस्य सुदिनानि भवंतीत्यर्थः ॥

॥ अथ द्वितीया ॥

समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो जराते ।
ग्रावाणो यस्येषिरं वदंत्ययदध्वर्युर्हविषाव सिंधुं ॥२॥
समिद्धऽअग्निः । वनवत् । स्तीर्णऽबर्हिः । युक्तऽग्रावा । सुतऽसोमः । जराते ।
ग्रावाणः । यस्य । इषिरं । वदंति । अयत् । अध्वर्युः । हविषा । अव । सिंधुं ॥२॥

समिद्धाग्निर्दीप्ताग्निः स्तीर्णबर्हिः प्रस्तृतदर्भोऽयं यजमानो वनवत् । संभजते । युक्तग्रावा नियुक्ताभिषवपाषाणः सुतसोमोऽभिषुतसोमो जराते । जरति । स्तौति । यस्याध्वर्योर्ग्रावाणोऽभिषवसाधना इषिरमेषणीयं गमनशीलं वा शब्दं वदंति सोऽध्वर्युर्हविषा सहावायत् सिंधुं । पन्नेजनीरवगच्छति ॥

॥ अथ तृतीया ॥

वधूरियं पतिमिच्छंत्येति य ईं वहाते महिषीमिषिरां ।
आस्य श्रवस्याद्रथ आ च घोषात्पुरू सहस्रा परि वर्तयाते ॥३॥
वधूः । इयं । पतिं । इच्छंती । एति । यः । ईं । वहाते । महिषीं । इषिरां ।
आ । अस्य । श्रवस्यात् । रथः । आ । च । घोषात् । पुरु । सहस्रा । परि । वर्तयाते ॥३॥

इयं वधूरिंद्रस्य पत्नी पतिमिच्छंती स्वप्रियं यज्ञगमनाय प्रवृत्तमिच्छंत्येति। अनुगच्छति। य इंद्र ईमेनां महिषीं वहाते वहतीषिरां गमनवतीं अस्येंद्रस्य रथ आ अर्वागस्मदभिमुखं श्रवस्यात्। अन्नमिच्छति। आ च घोषात्। आघुष्यति। शब्दयति। पुर्वत्यधिकं सहस्रा सहस्राणि धनानि परि परितो वर्तयाते। वर्तयति। प्रापयति। श्रवस्यादा च घुष्यादिति वा॥

॥ अथ चतुर्थी ॥

न स राजा व्यथते यस्मिन्निंद्रस्तीव्रं सोमं पिबति गोसखायं।
आ सत्वनैरजति हंति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन् ॥४॥
न। सः। राजा। व्यथते। यस्मिन्। इंद्रः। तीव्रं। सोमं। पिबति। गोऽसखायं।
आ। सत्वनैः। अजति। हंति। वृत्रं। क्षेति। क्षितीः। सुऽभगः। नाम। पुष्यन् ॥४॥

स राजा न व्यथते। व्यथितो न भवति। यस्मिन्राजनि तदीये यज्ञ इंद्रस्तीव्रं मदजनकं सोमं पिबति गोसखायं। विकारे प्रकृतिशब्दः। क्षीरादिमिश्रणवंतं। स राजा सत्वनैः सत्वभिरनुचरैरा सर्वतोऽजति। गच्छति। हंति च वृत्रं पापं वैरिणं वा। क्षेति गच्छति क्षितीः प्रजाः। अथवा क्षितीर्निवासान्निवसते। सुभगः शोभनसुखो नाम नामकं धनमिंद्रस्य स्तोत्रं वा पुष्यन् पोषयन्॥

॥ अथ पंचमी ॥

पुष्यात्क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति।
प्रियः सूर्ये प्रियो अग्ना भवाति य इंद्राय सुतसोमो ददाशत् ॥५॥
पुष्यात्। क्षेमे। अभि। योगे। भवाति। उभे इति। वृतौ। संयती इति संऽयती। सं। जयाति।
प्रियः। सूर्ये। प्रियः। अग्ना। भवाति। यः। इंद्राय। सुतऽसोमः। ददाशत् ॥५॥

पुष्यात् पोषयेद्बंध्वादीन्। क्षेमे प्राप्तस्य धनस्य रक्षणे योगेऽलब्धस्य प्राप्तौ चाभिभवाति। भवति। अभीत्यनर्थको धात्वर्थानुवादी वा। प्रभुर्भवतीत्यर्थः। तथोभे वृतौ वर्तमाने संयती नियते अहोरात्रे सं जयाति। सम्यक् जयति। ते सुखकरे स्यातामित्यर्थः। किंच स प्रियो भवति सूर्ये तथाग्नावग्नौ प्रियो भवति य इंद्राय सुतसोमो ददाशत् सोमं ददाति॥

॥ इति चतुर्थस्य द्वितीयेऽष्टमो वर्गः ॥

उरोष्ट इति पंचर्चं षष्ठं सूक्तमत्रेरार्षमानुष्टुभमैंद्रं। उरोरानुष्टुभमित्यनुक्रांतं॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा॥

उरोष्ट इंद्र राधसो विभ्वी रातिः शतक्रतो।
अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय॥१॥
उरोः। ते। इंद्र। राधसः। विऽभ्वी। रातिः। शतक्रतो इति शतऽक्रतो।
अध। नः। विश्वऽचर्षणे। द्युम्ना। सुऽक्षत्र। मंहय॥१॥

हे इंद्र शतक्रतो बहुकर्मन् ते तवोरोः प्रभूतस्य राधसो धनस्य रातिर्दानं विभ्वी महती। अधातः कारणात् नोऽस्मभ्यं हे विश्वचर्षणे सर्वस्य द्रष्टः सुक्षत्र शोभनधनेंद्र। क्षत्रमिति धननाम। द्युम्ना द्युम्नानि धनानि मंहय। प्रयच्छ॥

॥ अथ द्वितीया॥

यदीमिंद्र श्रवाय्यमिषं शविष्ठ दधिषे।
पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरं॥२॥
यत्। ईं। इंद्र। श्रवाय्यं। इषं। शविष्ठ। दधिषे।
पप्रथे। दीर्घश्रुत्ऽतमं। हिरण्यऽवर्ण। दुस्तरं॥२॥

हे इंद्र शविष्ठ अतिशयेन बलवन् यदिषमन्नं श्रवाय्यं श्रवणीयमीं सर्वतो दधिषे धारयसि ददासि वा॥ इषशब्दो नपुंसकलिंगोऽप्यस्ति॥ हे हिरण्यवर्णेंद्र तदन्नं पप्रथे। प्रथते। कथं। दीर्घश्रुत्तममतिदूरश्रवणीयतमं। सर्वत्र कीर्त्यमित्यर्थः। दुष्टरमनभिभाव्यमुक्तलक्षणं प्रथते॥

॥ अथ तृतीया॥

शुष्मासो ये ते अद्रिवो मेहना केतसापः।
उभा देवावभिष्टये दिवश्च ग्मश्च राजथः॥३॥
शुष्मासः। ये। ते। अद्रिऽवः। मेहना। केतऽसापः।
उभा। देवौ। अभिष्टये। दिवः। च। ग्मः। च। राजथः॥३॥

हे अद्रिवो वज्रवन्निंद्र ते त्वदीया ये शुष्मासो बलभूता मरुतः संति। कीदृ-

शास्ते। मेहना मंहनीयाः केतसापः प्रज्ञापकं कर्मांतरिक्षं वा स्पृशंतः। उभौ देवौ त्वं च मरुत्समूहश्चेत्युभौ युवां दिवश्च द्युलोकात् ग्मश्च भूमेः सकाशादभिष्टयेऽभितो गमनाय राजथः। ईशाथे ॥

॥ अथ चतुर्थी ॥

उतो नो अस्य कस्य चिद्दक्षस्य तव वृत्रहन्।

अस्मभ्यं नृम्णमा भरास्मभ्यं नृमणस्यसे ॥ ४ ॥

उतो इति। नः। अस्य। कस्य। चित्। दक्षस्य। तव। वृत्रऽहन्।

अस्मभ्यं। नृम्णं। आ। भर। अस्मभ्यं। नृऽमनस्यसे ॥ ४ ॥

उतापि च हे वृत्रहन्निंद्र नोऽस्मभ्यं कस्य चिदनिर्देश्यस्य दक्षस्य प्रवृद्धस्य दातुर्वास्य तव स्वभूतेभ्योऽस्मभ्यं। पुनःश्रुतिरादरार्था। नृम्णं नृमणं धनमाभर। आहर। हे इंद्र यतस्त्वमस्मभ्यं नृमणस्यसे धनमिच्छसि ॥

॥ अथ पंचमी ॥

नू त आभिरभिष्टिभिस्तव शर्मंञ्छतक्रतो।

इंद्र स्याम सुगोपाः शूर स्याम सुगोपाः ॥ ५ ॥

नु। ते। आभिः। अभिष्टिऽभिः। तव। शर्मन्। शतक्रतो इति शतऽक्रतो।

इंद्र। स्याम। सुऽगोपाः। शूर। स्याम। सुऽगोपाः ॥ ५ ॥

हे शतक्रतो इंद्र ते तवाभिरभिष्टिभिरभिगमनैर्नु शीघ्रं समृद्धा भवेमेति शेषः हे इंद्र तव शर्मन् शर्मणि सुखे सति सुगोपाः स्याम। भवेम। हे शूर तव शर्मणि सुगोपाः शोभनरक्षणाः स्याम। भवेम। पुनरुक्तिरादरार्था ॥

॥ इति चतुर्थस्य द्वितीये नवमो वर्गः ॥

यदिंद्र चिचेति पंचर्चं सप्तमं सूक्तमत्रेरार्षमैंद्रं। अंत्या पंक्तिः शिष्टाः पंक्त्यंत-परिभाषयानुष्टुभः। यदिंद्र पंक्त्यंतमित्यनुक्रमणिका ॥ आभिप्लविकेषूक्थ्येषु तृतीयसवन आद्यस्तृचोऽच्छावाकस्य वैकल्पिकः स्तोत्रियः। सूचितं च। यदिंद्र चित्र मेहना यस्ते साधिष्ठोऽवसे। आ० ७.८.। इति ॥

॥ तत्र प्रथमा ॥

यदिंद्र चित्र मेहनास्ति त्वादातमद्रिवः ।
राधस्तन्नो विद्वस उभयाहस्त्या भर ॥१॥

यत् । इंद्र । चित्र । मेहना । अस्ति । त्वाऽदातं । अद्रिऽवः ।
राधः । तत् । नः । विद्वसो इति विदत्ऽवसो । उभयाहस्ति । आ । भर ॥१॥

हे इंद्र हे चित्र चायनीय हे अद्रिवो वज्रवन्निंद्र यन्मेहना मंहनीयं त्वादातं त्वया दातव्यं राधो धनमस्ति तद्धनं हे विद्वसो लब्धधनेंद्र नोऽस्मभ्यमुभयाहस्त्युभाभ्यां हस्ताभ्यामाभर । आहर । अत्र यदिंद्र चित्र चायनीय मंहनीयं धनमस्तीत्यादिनिरुक्तं द्रष्टव्यं । नि० ४.४. ॥

॥ अथ द्वितीया ॥

यन्मन्यसे वरेण्यमिंद्र द्युक्षं तदा भर ।
विद्याम तस्य ते वयमकूपारस्य दावने ॥२॥

यत् । मन्यसे । वरेण्यं । इंद्र । द्युक्षं । तत् । आ । भर ।
विद्याम । तस्य । ते । वयं । अकूपारस्य । दावने ॥२॥

हे इंद्र यत् द्युक्षमन्नं वरेण्यं वरणीयं मन्यसे तत् द्युक्षमाभरास्मभ्यं । ते तव संबंधिनो वयं तस्य तादृशस्योक्तलक्षणस्याकूपारस्य । अकुत्सितो पारोऽतो यस्य तादृशस्यान्नस्य दावने दाने विद्याम । स्याम ॥

वाजपेयेऽतिरिक्तोक्थ्ये यत्ते दित्स्वेषा । सूचितं च । यत्ते दित्सु प्रराध्यं त्वामिच्छवसस्पते । आ० ९.९. । इति ॥

॥ सैषा तृतीया ॥

यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
तेन दृळ्हा चिदद्रिव आ वाजं दर्षि सातये ॥३॥

यत् । ते । दित्सु । प्रऽराध्यं । मनः । अस्ति । श्रुतं । बृहत् ।
तेन । दृळ्हा । चित् । अद्रिऽवः । आ । वाजं । दर्षि । सातये ॥३॥

हे इंद्र ते तव यद्दित्सु दानेषु प्रराध्यं प्रकर्षेण स्तुत्यं श्रुतं विश्रुतं बृहन्महन्म-

नोऽस्ति तेन मनसा हे अद्रिवो वज्रवन्निंद्र दृळ्हा चिद्दृढमपि वाजमन्नमादर्षि। आदरयसि सातयेऽस्मत्संभजनाय लाभाय वा ॥

॥ अथ चतुर्थी ॥

मंहिष्ठं वो मघोनां राजानं चर्षणीनां।
इंद्रमुप प्रशस्तये पूर्वीभिर्जुजुषे गिरः ॥४॥
मंहिष्ठं। वः। मघोनां। राजानं। चर्षणीनां।
इंद्रं। उप। प्रऽशस्तये। पूर्वीभिः। जुजुषे। गिरः ॥४॥

मघोनां हविर्लक्षणधनवतां वो युष्माकं मंहिष्ठमतिशयेन पूज्यं चर्षणीनां मनुष्याणां राजानमिंद्रमुपोपेत्य प्रशस्तये प्रशंसितुं पूर्वीभिः पुरातनीभिर्वाग्भिर्गिरः स्तोतारो जुजुषे। सेवंते ॥

॥ अथ पंचमी ॥

अस्मा इत्काव्यं वच उक्थमिंद्राय शंस्यं।
तस्मा उ ब्रह्मवाहसे गिरो वर्धंत्यत्रयो गिरः शुंभंत्यत्रयः ॥५॥
अस्मै। इत्। काव्यं। वचः। उक्थं। इंद्राय। शंस्यं।
तस्मै। ऊं इति। ब्रह्मऽवाहसे। गिरः। वर्धंति। अत्रयः। गिरः। शुंभंति। अत्रयः ॥५॥

अस्मा इदस्मा एवेंद्राय काव्यं कवेः स्तोतुः संबंधि। यद्वा कु शब्दे। शब्दनीयं वचो वाग्रूपमुक्थं शस्त्रं शंस्यं शंसनीयं। यस्मादेवं तस्मात्तस्मा उ तस्मा इंद्रायैव ब्रह्मवाहसे परिवृढस्य स्तोत्रस्य वाहकाय गिरः स्तुतीरत्रयोऽत्रिगोत्रा वर्धंति। वर्धयंति। अत्रयो गिरः शुंभंति। दीपयंति। पुनरुक्तिरादरार्था ॥

॥ इति चतुर्थस्य द्वितीये दशमो वर्गः ॥

आ याह्यद्रिभिरिति नवर्चमष्टमं सूक्तं। अत्रेयमनुक्रमणिका। आ याहि नव त्र्युष्णिगाद्यंत्यानुष्टुप् मध्ये च सा सौरी तदादीतिहासः स्तुतिकर्मत्वादत्रिरेव देव इति। कृत्स्नस्य ऋषिश्चान्यस्मादिति परिभाषयात्रिर्ऋषिः। आद्यास्तिस्र उष्णिहः पंचमीनवम्यावनुष्टुभौ शिष्टाश्चतस्रस्त्रिष्टुभः। अत्रेः स्तूयमानत्वात् षष्ठ्याद्या अत्रिदेवताका अत्र्यार्षेयाश्च पंचमी सूर्यदेवत्या शिष्टा ऐंद्र्यः ॥ दशरात्रे तृतीयेऽहनि

प्रउगशस्त्र आद्यस्तृच ऐंद्रः पंचमः। सूत्रितं च। आ याह्यद्रिभिः सुतं सजूर्विश्वेभिर्देवेभिः। आ० ७.१०। इति॥ महाव्रतेऽप्यौष्णिहतृचाशीतावयं तृचः॥

॥ तत्र प्रथमा ॥

आ याह्यद्रिभिः सुतं सोमं सोमपते पिब।

वृषन्निंद्र वृषभिर्वृत्रहंतम ॥१॥

आ। याहि। अद्रिऽभिः। सुतं। सोमं। सोमऽपते। पिब।

वृषन्। इंद्र। वृषऽभिः। वृत्रहन्ऽतम ॥१॥

हे इंद्र आयाहि। अस्मद्यज्ञमागच्छ। आगत्य च हे सोमपते सोमस्य स्वामिन्निंद्र अद्रिभिर्ग्रावभिः सुतमभिषुतं सोमं पिब। हे वृषन् फलस्य वर्षयितर्वृत्रहंतमातिशयेन शत्रूणां हंतृतम वृषभिर्वर्षकैर्मरुद्भिः सहायाहि पिब च॥

॥ अथ द्वितीया ॥

वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः।

वृषन्निंद्र वृषभिर्वृत्रहंतम ॥२॥

वृषा। ग्रावा। वृषा। मदः। वृषा। सोमः। अयं। सुतः।

वृषन्। इंद्र। वृषऽभिः। वृत्रहन्ऽतम ॥२॥

ग्रावाभिषवसाधनः पाषाणो वृषा वर्षकः सोमरसस्य फलस्य वा। मदः सोमपानेन जनितो वृषा वर्षकः। अयं सुतोऽभिषुतः सोमो वृषा। तं सोमं वृषभिः सह पिब॥

॥ अथ तृतीया ॥

वृषा त्वा वृषणं हुवे वज्रिन् चित्राभिरूतिभिः।

वृषन्निंद्र वृषभिर्वृत्रहंतम ॥३॥

वृषा। त्वा। वृषणं। हुवे। वज्रिन्। चित्राभिः। ऊतिऽभिः।

वृषन्। इंद्र। वृषऽभिः। वृत्रहन्ऽतम ॥३॥

हे वज्रिन् वज्रवन्निंद्र वृषा सोमरसस्य सेक्ताहं वृषणं त्वां हुवे। आह्वयामि। किमर्थं। चित्राभिश्चायनीयाभिरूतिभी रक्षाभिर्निमित्तभूताभिः। शिष्टं गतं॥

ऋजीषी वज्रीत्येषा ब्राह्मणाच्छंसिनः शस्त्रयाज्या । ऋजीषी वज्री वृषभस्तु-राषाळिति याज्या । आ॰ ५. १६. । इति हि सूचितं ॥

॥ सैषा चतुर्थी ॥

ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा ।
युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यंदिने सवने मत्सदिंद्रः ॥४॥

ऋजीषी । वज्री । वृषभः । तुराषाट् । शुष्मी । राजा । वृत्रऽहा । सोमऽपावा ।
युक्त्वा । हरिऽभ्यां । उप । यासत् । अर्वाङ् । माध्यंदिने । सवने । मत्सत् । इंद्रः ॥४॥

ऋजीषी । सवनद्वयेऽभिषुतस्य गतसारस्य सोमरसस्य तृतीयसवन आप्यायाभिषुतो योऽस्ति स ऋजीषः सोमः । सोऽस्यास्तीत्यृजीषी । वज्री वज्रवान् वृषभो वर्षिता तुराषाट् तुराणां त्वरमाणानां शत्रूणां सोढा शुष्मी बलवान् राजेश्वरः सर्वस्य वृत्रहा वृत्रस्य हंता सोमपावा सोमरसस्य पाता एवं महानुभाव इंद्रो हरिभ्यां युक्त्वा रथं योजयित्वोपयासत् । उपगच्छतु । अर्वागस्मदभिमुखमागच्छतु । माध्यंदिने सवने मत्सत् । माद्यतु सोमेनेंद्रः ॥

॥ अथ पंचमी ॥

यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः ।
अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ॥५॥

यत् । त्वा । सूर्य । स्वःऽभानुः । तमसा । अविध्यत् । आसुरः ।
अक्षेत्रऽवित् । यथा । मुग्धः । भुवनानि । अदीधयुः ॥५॥

इदमादिचतुर्भिर्मंत्रैरत्रीणां कर्म कीर्त्यते । हे सूर्य प्रेरक देव त्वा त्वां यद्यदासुरोऽसुरस्य प्राणापहर्तुरसुर्या वा पुत्रः स्वर्भानुः स्वर्भानुसंज्ञकस्तमसा मायानिर्मितेनाविध्यत् । आवृणोदित्यर्थः । तदा भुवनानि सर्वाण्यदीधयुः । दृश्यंते । यथा तत्रत्यः सर्वो जनोऽक्षेत्रवित् स्वस्वस्थानमजानन् मुग्धो मूढो भवति तथा ॥

॥ इति चतुर्थस्य द्वितीय एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

स्वर्भानोरध यदिंद्र माया अवो दिवो वर्तमाना अवाहन् ।
गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविंददत्रिः ॥६॥

स्वःऽभानोः। अध। यत्। इंद्र। मायाः। अवः। दिवः। वर्तमानाः। अवऽअहन्।
गूळ्हं। सूर्यं। तमसा। अपऽव्रतेन। तुरीयेण। ब्रह्मणा। अविंदत्। अत्रिः ॥ ६॥

अधाथ जगन्मौढ्यानंतरं स्वर्भानोरसुरस्य यत् या मायाः संति। कीदृश्यस्ताः।
दिवो द्योतमानादादित्यादवोऽवस्तात्वर्तमानाः। तदुपरितिरोधानासामर्थ्यादिति
भावः। हे इंद्र ताः सर्वा अवाहन्। अवहंसि। अथात्रिरेव परोक्षवादः। तमसां-
धकारेणापव्रतेनापगतकर्मणा गूळ्हं सूर्यं। अंधकारस्यावरणरूपत्वादपव्रतत्वं।
तथाविधं तुरीयेण ब्रह्मणा ग्राव्णो ब्रह्मेत्यनेनात्रिरविंदत्। लब्धवान् आवर-
णापगमोपायं निवारणं शुद्धं वा सूर्यमिति। पूर्वमंत्रापेक्षयास्य तुरीयत्वं। एकैकं
मायांशमेकैकेन मंत्रेणापनोद्य चतुर्थेन मंत्रेण निलीनं तमोऽप्यनुददित्यर्थः॥

॥ अथ सप्तमी ॥

मा मामिमं तव संतमत्र इरस्या द्रुग्धो भियसा नि गारीत्।
त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा ॥७॥

मा। मां। इमं। तव। संतं। अत्रे। इरस्या। द्रुग्धः। भियसा। नि। गारीत्।
त्वं। मित्रः। असि। सत्यऽराधाः। तौ। मा। इह। अवतं। वरुणः। च। राजा ॥७॥

इदं सूर्यवाक्यं। हे अत्रे मामिममीदृगवस्थं मां तव संतं तव स्वभूतमिर-
स्यान्नेच्छया द्रुग्धो द्रोग्धासुरो भियसा भयजनकेन तमसांधकारेण मा निगारीत्।
मा गिरतु। किंच हे मित्र त्वं मित्रोऽसि। प्रमीतेः सकाशात्त्राता भवसि। सत्य-
राधाः सत्यधनश्च। तौ राजा वरुणश्च त्वं च तौ युवां मा मामिहावतं। रक्षतं।
यद्वात्रिरेव मित्र उच्यते। वरुणश्च युवां॥

॥ अथाष्टमी ॥

ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन्।
अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत् ॥८॥

ग्राव्णः। ब्रह्मा। युयुजानः। सपर्यन्। कीरिणा। देवान्। नमसा। उपऽशिक्षन्।
अत्रिः। सूर्यस्य। दिवि। चक्षुः। आ। अधात्। स्वःऽभानोः। अप। मायाः। अघुक्षत् ॥८॥

ब्रह्मा ब्राह्मणोऽत्रिर्मामिहावतमित्युपशिक्षन् ग्राव्णोऽभिषवसाधनाय युयु-

जानो युंजन्। इंद्रार्थं सोममभिषुण्वन्नित्यर्थः। तथा कीरिणा। कीर्यंते विक्षिप्यंत इति कीरि स्तोत्रं। तेन देवान् सपर्यन् पूजयन्नमसा मंत्रैः साधनैः सूर्यस्य सर्वप्रेरकस्य चक्षुः सर्वस्य व्यापकं मंडलं दिव्यंतरिक्ष आधात्। निस्तमस्कं कृतवानित्यर्थः। तदेव स्पष्टयति। स्वर्भानोरेतन्नामकस्यासुरस्य मायाः। स्वाश्रयमयामोहयंती परांस्तथा कुर्वती मायेत्युच्यते। तादृशीर्मायाः। तुरीयेण ब्रह्मणेत्युक्तं। तदेतदुक्तं यत्तुरीयं ब्रह्म। तेनाचिसहाय इंद्रोऽपाघुक्षत्। अपजुगोप। न्यवारयदित्यर्थः। अथवा तृतीयपाद एवं व्याख्येयः। सूर्यस्य दिवि पूर्वमावृते प्रकाशे तदपनोद्य स्वकीयं चक्षुराधात्। निवारणं तेजःसंस्त्यायं दृष्टवानित्यर्थः। स्वर्भानुमायया सूर्यस्यावृतिर्हारिद्रविके समाम्नाता। स्वर्भानुर्वा आसुरः सूर्यं तमसाविध्यत्तस्मै देवाः प्रायश्चित्तमैच्छन् तस्य यत्प्रथमं तमोऽपाघ्नन् सा कृष्णाविरभवत् यद्द्वितीयं सा फाल्गुनी यत्तृतीयं सा वलक्षी यदध्यस्थादपाकृंतन्नित्यादि॥

॥ अथ नवमी ॥

यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः।
अत्रयस्तमन्वविंदन्नह्य१न्ये अशक्नुवन् ॥९॥

यं। वै। सूर्यं। स्वःऽभानुः। तमसा। अविध्यत्। आसुरः।
अत्रयः। तं। अनु। अविंदन्। नहि। अन्ये। अशक्नुवन् ॥९॥

अत्रिकृतं सामर्थ्यमनुवदति यं वै सूर्यमिति। निगतव्याख्यैषा। अत्रयस्तं सूर्यमन्वविंदन्। इंद्रार्थं सोमयागदेवतास्तुतिनमस्कारैरनुक्रमेणापदीपत्तमो विरुध्य लब्धवंत इत्यर्थः। अन्ये नह्यशक्नुवन्। न लब्धवंतः खलु॥

॥ इति चतुर्थस्य द्वितीये द्वादशो वर्गः ॥

को नु वामिति विंशत्यृचं नवमं सूक्तं भौमस्यात्रेरार्षं। षोडशीसप्तदश्याववतिजगत्यौ विंश्येकपदा विराट् शिष्टाः सप्तदश त्रिष्टुभः। विश्वे देवा देवता। तथा चानुक्रांतं। को नु विंशतिर्वैश्वदेवं वै तत् षोडश्याद्यतिजगत्यावंत्यैकपदेति॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा ॥

को नु वां मित्रावरुणावृतायन्दिवो वा महः पार्थिवस्य वा दे।
ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान् ॥१॥

कः। नु। वां। मित्रावरुणौ। ऋतऽयन्। दिवः। वा। महः। पार्थिवस्य। वा। दे।
ऋतस्य। वा। सदसि। त्रासीथां। नः। यज्ञऽयते। वा। पशुऽसः। न। वाजान् ॥१॥

हे मित्रावरुणौ देवौ वां युवां को नु कः खलु यजमान ऋतायन्यज्ञमिच्छन् शक्नुयादिति शेषः। तस्मात्कृतं मयैव। दिवः सदसि द्युलोकसंबंधिनि स्थाने महो महतः पार्थिवस्य सदस्यृतस्योत्पादकस्यांतरिक्षस्य सदसि। तद्वेतुत्वांत्ताच्छब्द्यं। त्रिषु स्थानेषु नोऽस्मान् त्रासीथां। रक्षतं। वाशब्दश्चार्थे। किंच यज्ञायते दे वा हविर्दात्रे च मह्यं पशुषो न वाजान् पशुषु सीदतो वाजानन्नानि क्षीरदध्यादीनीव। तानि यथा प्रयच्छथः तद्वदत्तमिति। यद्वा नशब्दश्चार्थे। पशुषः पशून्वाजांश्च दत्तमित्यर्थः॥

॥ अथ द्वितीया ॥

ते नो मित्रो वरुणो अर्यमायुरिंद्र ऋभुक्षा मरुतो जुषंत।
नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः ॥२॥

ते। नः। मित्रः। वरुणः। अर्यमा। आयुः। इंद्रः। ऋभुक्षाः। मरुतः। जुषंत।
नमःऽभिः। वा। ये। दधते। सुऽवृक्तिं। स्तोमं। रुद्राय। मीळ्हुषे। सऽजोषाः ॥२॥

ते मित्रादयो देवा नोऽस्माकं सुवृक्तिं स्तोमं शोभनपापादिवर्जनवत्स्तोत्रं नमोभिर्वा हविर्भिश्च जुषंत। सेवंतां। ये दधते धारयंत्युक्तलक्षणं स्तोत्रं। देवा द्विविधाः स्तोत्रभाजो हविर्भाजश्च। अत्र स्तोत्रभाज उच्यंते। आयुः सततगतिर्वायुरुच्यते। अथ मरुत एव वियुज्य विशेष्यंते। रुद्राय मीळ्हुषे ॥ तृतीयार्थे चतुर्थी ॥ रुद्रेण सह सजोषाः सजोषसः सह प्रीयमाणाः। तेषां पुत्रत्वादिति भावः। केचन रुद्राय सजोषा इत्येतन्मित्रादिसर्वदेवताविशेषणमिति कथयंति ॥

॥ अथ तृतीया ॥

आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्रथ्यस्य पुष्टौ।
उत वा दिवो असुराय मन्म प्रांधांसीव यज्यवे भरध्वं ॥३॥

आ। वां। येष्ठा। अश्विना। हुवध्यै। वातस्य। पत्मन्। रथ्यस्य। पुष्टौ।
उत। वा। दिवः। असुराय। मन्म। प्र। अंधांसिऽइव। यज्यवे। भरध्वं ॥३॥

अनयाश्विनौ रुद्रश्चोच्यंते। हे अश्विनाश्विनौ येष्ठा कामानां यंतृतमौ वां

युवां वातस्य पत्मन्। धर्मसाम्याद्धर्मिग्रहणं। वायुसमानगतेरश्वस्य गमने प्राप्तौ रथ्यस्य रथस्य पुष्टौ च निमित्ते सति हुवध्यै। हुवे। आह्वयामि। आह्वातुं प्रभवामि। अथवा वायुवद्युवयोः शीघ्रगमनसाधनरथस्य पोषे च निमित्ते सति। उत वा किंचेत्यर्थः। दिवो द्योतमानाय॥ चतुर्थ्यर्थे षष्ठी॥ असुराय प्राणापहर्त्रे रुद्राय। यद्वा द्युलोकसंबंधिनेऽसुराय प्राणदात्रे सूर्याय वायवे वा यज्यवे यागसाधकाय मन्म मननीयं स्तोत्रं प्रभरध्वं। संपादयत हे ऋत्विजः। अंधांसीवान्नानि हविर्लक्षणानि हवींषि स्तोत्रं चेत्यर्थः॥

॥ अथ चतुर्थी ॥

प्र सक्षणो॑ दि॒व्यः कण्व॑होता त्रि॒तो दि॒वः स॒जोषा॒ वातो॑ अ॒ग्निः।
पू॒षा भगः॑ प्रभृ॒थे वि॒श्वभो॑जा आ॒जिं न ज॑ग्मुरा॒श्व॑श्वतमाः॥४॥

प्र। स॒क्षणः॑। दि॒व्यः। कण्व॑ऽहोता। त्रि॒तः। दि॒वः। स॒ऽजोषाः॑। वातः॑। अ॒ग्निः।
पू॒षा। भगः॑। प्र॒ऽभृ॒थे। वि॒श्वऽभो॑जाः। आ॒जिं। न। ज॒ग्मुः॒। आ॒श्व॑श्वऽतमाः॥४॥

अत्र लिंगोक्तदेवताः। प्र जग्मुरिति संबंधः। सक्षणो यज्ञं सेवमानः शत्रूणां सोढा वा दिव्यो दिवि भवः कण्वहोता। कण्वा ऋषयो मेधाविनो वा होतार आह्वातारो यस्य स तथोक्तः। त्रितस्त्रिषु क्षित्यादिस्थानेषु तायमानो दिवः सूर्येण सह सजोषाः समानगतिः समानप्रीतिर्वा वात उक्तलक्षणको वायुरग्निः पूषा पोषक एतन्नामा भगश्च प्रभृथे प्रभरणवत्यस्मिन्यज्ञ उक्ताः सर्वेदेवा विश्वभोजा विश्वरक्षकाः कृत्स्नान्नारो वा आश्वश्वतमाः प्रकृष्टगमनाश्ववतां श्रेष्ठाः संत आजिं न संग्राममिव प्रजग्मुः। प्रगच्छंति॥

॥ अथ पंचमी ॥

प्र वो॑ र॒यिं यु॒क्ताश्वं॑ भरध्वं रा॒य एषेऽव॑से दधीत॒ धीः।
सु॒शेव॒ एवै॑रौशि॒जस्य॒ होता॒ ये व॒ एवा॑ मरुतस्तु॒राणा॑म्॥५॥

प्र। वः॒। र॒यिं। यु॒क्तऽअ॑श्वं। भ॒रध्वं। रा॒यः। एषे॑। अव॑से। द॒धी॒त। धीः।
सु॒ऽशेव॑ः। एवैः॑। औ॒शि॒जस्य॑। होता॑। ये। वः॒। एवाः॑। म॒रु॒तः॒। तु॒राणा॑म्॥५॥

हे मरुतो वो यूयं रयिं धनं युक्ताश्वमश्वसहितमश्वयोग्यं पुत्रं वा प्रभरध्वं। संपादयत। रायो धनानि गवाश्वादिलक्षणान्येषे प्राप्तुं। अवसे। अव इत्यन्ननाम।

अलाय प्राप्तानां धनानां रक्षणाय वा धीः स्तोता दधीत । धारयति स्तुतिं । स चौशिजस्य कक्षीवतो होताभिरेवैर्गंतव्यैः कामैर्गमनसाधनैरश्वैर्वा सुशेवः । शेवमिति सुखनाम । सुसुखो भवतु । हे मरुतस्तुराणां त्वरमाणानां वो युष्माकं य एवाः कामा अश्वा वा संति तैरिति ॥

॥ इति चतुर्थस्य द्वितीये त्रयोदशो वर्गः ॥

प्र वो वायुमिति षष्ठी वायव्ये पशौ हविषो याज्या । प्र वो वायुं रथयुजं कृणुध्वमुत त्वामदिते महि । आ० ३. ८. । इति सूचितं । तत्पाठस्तु ॥

प्र वो॑ वा॒युं रथ॒युजं॑ कृणुध्वं॒ प्र दे॒वं विप्रं॑ पनि॒तार॑म॒र्कैः ।
इ॒षु॒ध्यव॑ ऋत॒सापः॒ पुरं॑धी॒र्वस्वी॑र्नो॒ अत्र॒ पत्नी॒रा धि॒ये धुः॑ ॥६॥
प्र । वः॒ । वा॒युं । र॒थ॒ऽयुजं॑ । कृ॒णु॒ध्वं॒ । प्र । दे॒वं । विप्रं॑ । प॒नि॒तारं॑ । अ॒र्कैः ।
इ॒षु॒ध्यवः॑ । ऋ॒त॒ऽसापः॑ । पुरं॑ऽधीः । वस्वीः॑ । नः॒ । अत्र॑ । पत्नीः॑ । आ । धि॒ये । धुरिति॑ धुः ॥६॥

हे मदीया ऋत्विजो वो यूयं वायुं वायुदेवं रथयुजं यज्ञगमनाय रथसंबद्धं कृणुध्वं । कुरुध्वं । प्र देवं द्योतमानं विप्रं विशेषेण कामानां पूरकं विप्रवत्पूज्यं वा पनितारं ॥ कर्मणि कर्तृप्रत्ययः ॥ स्तुत्यमित्यर्थः फलप्रदातारं वा अर्कैरर्चनसाधनैर्मंत्रैः प्रकृणुध्वं । स्तुत । किंचेषुध्यवो गंत्र्य ऋतसापो यज्ञस्पृशः पुरंधीः पुरंध्यः स्त्रीरूपा रूपवत्यो वा वस्वीः प्रशंस्याः पत्नीर्देवपत्न्योऽत्रास्मिन्यज्ञे नोऽस्मदीयाय धिये कर्मणे तन्निष्पत्तय आधुः । आगतवत्यः ॥

॥ अथ सप्तमी ॥

उप॑ व ए॒षे वंद्ये॑भिः शू॒षैः प्र य॒ह्वी दि॒वश्चि॒तय॑द्भिर॒र्कैः ।
उ॒षासा॒नक्ता॑ वि॒दुषी॑व॒ विश्व॒मा हा॑ वहतो॒ मर्त्या॑य य॒ज्ञं ॥७॥
उप॑ । वः॒ । ए॒षे । वंद्ये॑भिः । शू॒षैः । प्र । य॒ह्वी इति॑ । दि॒वः । चि॒तय॑त्ऽभिः । अ॒र्कैः ।
उ॒षसा॒नक्ता॑ । वि॒दुषी॑ इ॒वेति॑ वि॒दुषी॑ऽइव । विश्वं॑ । आ । ह॒ । व॒ह॒तः॒ । मर्त्या॑य । य॒ज्ञं ॥७॥

हे उषासानक्ता अहोरात्राभिमानिदेवते यह्वी महत्यौ वंद्येभिर्वंदनार्हैरितरैर्देवैः सह दिवोऽंतरिक्षाद्विशेषेण सर्वप्रदेशाद्वा युष्मभ्यमुपप्रैषे । उपप्रापयामि हविः ॥ ईषिः प्रापणकर्मा स्यादुपप्राभिः समन्वितः ॥ शूषैः सुखकरैः चितयद्भिर्ज्ञापयद्भि-

रश्मिभिः सहोपप्रापयामि । हे उक्तदेवते विश्वं सर्वं कर्तव्यजातं विदुषी इव जानंत्याविव मर्त्याय यजमानाय यज्ञमावहतः । अभिमुखं प्रापयतः । हेति पूरणः । यद्वा भूषैरित्यादीनि तृतीयबहुवचनांतानि वंद्योभिरित्यस्य विशेषणानीति केचिदाहुः ॥

॥ अथाष्टमी ॥

अभि वो अर्चे पोष्यावतो नृन्वास्तोष्पतिं त्वष्टारं रराणः ।

धन्या सजोषा धिषणा नमोभिर्वनस्पतीँरोषधी राय एषे ॥ ८ ॥

अभि । वः । अर्चे । पोष्याऽवतः । नृन् । वास्तोः । पतिं । त्वष्टारं । रराणः ।

धन्या । सऽजोषाः । धिषणा । नमःऽभिः । वनस्पतीन् । ओषधीः । रायः । एषे ॥ ८ ॥

अहं पोष्यावतो बहुपोष्यजनयुक्तान्नृन्कर्मनेतॄन् वो युष्मानभ्यर्चे । अभिपूजयामि । स्तौमीत्यर्थः । के पुनस्ते यूयं । उच्यते । वास्तोष्पतिं त्वष्टारं रराणः स्तोत्रादिभिः क्रीडन् हविर्ददद्वाहं । धन्या धनकरी सजोषा इतरदेवैः सह गच्छंती प्रीणयंती वा धिषणा । वाङ्मामैतत् । वाग्देवता ॥ एता द्वितीयार्थे प्रथमाः ॥ उक्तलक्षणां वाणीं वनस्पतीनोषधीश्च नमोभिः सहार्चे इति संबंधः । किमर्थं । राय एषे धनानि प्राप्तुं ॥

॥ अथ नवमी ॥

तुजे नस्तने पर्वताः संतु स्वैतवो ये वसवो न वीराः ।

पनित आप्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ ॥ ९ ॥

तुजे । नः । तने । पर्वताः । संतु । स्वऽएतवः । ये । वसवः । न । वीराः ।

पनितः । आप्त्यः । यजतः । सदा । नः । वर्धात् । नः । शंसं । नर्यः । अभिष्टौ ॥ ९ ॥

पर्वताः पर्ववंतः पूरणवंतो वा मेघास्तने विस्तृते तुजे दाने । यद्वा तनेति पुत्रनाम ॥ षष्ठ्यर्थे चतुर्थी ॥ पुत्रस्य दान इत्यर्थः । अथवा नस्तुजे पुत्रे तने तत्पुत्रे च स्वैतवः शोभनगमनाः संतु । भवंतु । कीदृशास्ते । ये वसवो जगतो वासयितारो वीरा न वीरा इव । किंच पनितः स्तुत आप्त्य आप्तव्यः सर्वैर्यजतो यजनीय आदित्यः सदा सर्वदा नः शंसमस्माकं स्तुतिं नर्यो नरेभ्यो हितो देवोऽभिष्टावभिगत एषणेऽभिगमने वा सति वर्धात् । वर्धयेत् ॥

॥ अथ दशमी ॥

वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति ।
गृणीते अग्निरेतरी न शूषैः शोचिष्केशो नि रिणाति वना ॥१०॥

वृष्णः । अस्तोषि । भूम्यस्य । गर्भं । त्रितः । नपातं । अपां । सुऽवृक्ति ।
गृणीते । अग्निः । एतरि । न । शूषैः । शोचिःऽकेशः । नि । रिणाति । वना ॥१०॥

भूम्यस्य । भूमिरंतरिक्षं । तदर्हस्य । तादृशस्य वृष्णो वर्षकस्य पर्जन्यस्य । अथवा भूम्यो भूमेरेवार्हः । तदुचितवृष्टिप्रदानात् । तादृशस्य मेघस्य गर्भं गर्भस्थानीयमपां नपातं रक्षकं वैद्युतमग्निं सुवृक्ति । स्तोत्रकर्मैतत् । शोभनपापाद्विवर्जनवता स्तोत्रेणास्तोषि । स्तुतवानहं । स त्रितस्तीर्णतमस्त्रिषु स्थानेषु त्रित्वापन्नेषु तायमानोऽग्निरेतरि गंतरि मयि शूषैः सुखकरै रश्मिभिर्न गृणीते । न गरणं कुरुते । न क्रुध्यतीत्यर्थः । किंतु शोचिष्केशः प्रदीप्तरश्मिः सन् वना वनानि निरिणाति । हिनस्ति । दहतीत्यर्थः ॥

॥ इति चतुर्थस्य द्वितीये चतुर्दशो वर्गः ॥

॥ अथैकादशी ॥

कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगाय ।
आप ओषधीरुत नोऽवंतु द्यौर्वना गिरयो वृक्षकेशाः ॥११॥

कथा । महे । रुद्रियाय । ब्रवाम । कत् । राये । चिकितुषे । भगाय ।
आपः । ओषधीः । उत । नः । अवंतु । द्यौः । वना । गिरयः । वृक्षऽकेशाः ॥११॥

वयमत्रयः कथा केन प्रकारेण महे महते रुद्रियाय रुद्रपुत्राय मरुद्गणाय ब्रवाम स्तुतीः । कत् किं च स्तोत्रं राये धनलाभाय चिकितुषे सर्वं जानते भगायेतन्नामकाय देवाय ब्रवाम । उतापि चापोऽब्देवता ओषधीरोषधयो द्यौर्द्युदेवता वना वनानि गिरयो वृक्षकेशाः । वृक्षा एव केशस्थानीया येषां ते । एता उक्ता देवता नोऽस्मानवंतु । रक्षंतु ॥

॥ अथ द्वादशी ॥

शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा ।
शृण्वंत्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः ॥१२॥

शृणोतु। नः। ऊर्जा। पतिः। गिरः। सः। नभः। तरीयान्। इषिरः। परिऽज्मा।
शृण्वंतु। आपः। पुरः। न। शुभ्राः। परि। स्रुचः। बबृहाणस्य। अद्रेः ॥१२॥

नोऽस्माकं गिरः स्तुतीः शृणोतु। कः। ऊर्जा बलानां पतिर्वायुः। अथवा ऊर्जामन्नानां पतिः। प्राणोपाधिकस्य वायोः कृत्स्नान्नत्वं प्रसिद्धं। श्रुतिश्च भवति। प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयदिति। स नभो नभसि चारी तरीयान्तरितव्य इषिरो गमनशीलः परिज्मा परितो गंता। किंचापः शृण्वंतु गिरः। कीदृश्यस्ताः। पुरो न पुराणीव शुभ्रा दीप्ता बबृहाणस्य वर्धमानस्याद्रेर्मेघस्य वा पर्वतस्य वा परि परितः स्रुचः सरणशीलाः॥

॥ अथ त्रयोदशी ॥

विदा चिन्नु महांतो ये व एवा ब्रवाम दस्मा वार्यं दधानाः।
वयश्चन सुभ्व१ आव यंति क्षुभा मर्तमनुयतं वधस्नैः ॥१३॥

विद। चित्। नु। महांतः। ये। वः। एवाः। ब्रवाम। दस्माः। वार्यं। दधानाः।
वयः। चन। सुऽभ्वः। आ। अव। यंति। क्षुभा। मर्तं। अनुऽयतं। वधऽस्नैः ॥१३॥

हे महांतो मरुतो नु क्षिप्रं यूयं विद। जानीथ स्तोत्रं। हे दस्मा दर्शनीया वो युष्मान्य एवा गंतारो युष्मान्भजमाना वार्यं वरणीयं हविर्दधाना ददाना धारयंतो वा वयं ब्रवाम स्तुतिं। यद्वा ये वो यूयमित्यर्थः। ये यूयमेवा अस्मद्यज्ञमभिगंतारस्ते विद। चिदिति पूरणः। वयश्चनागंतारश्चैते मरुतः सुभ्वः सुष्ठु भवंतः प्रवृद्धा आ अस्मदभिमुखमवयंति। गच्छंति। किं कुर्वंतः। क्षुभा क्षोभकेण सहितं मर्तं मरणधर्माणं वैरिणमनुयतमभिगतं वधस्नैरायुधैः परिहरंतोऽवयंति॥

॥ अथ चतुर्दशी ॥

आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमखाय वोचं।
वर्धंतां द्यावो गिरश्चंद्राग्रा उदा वर्धतामभिषाता अर्णाः ॥१४॥

आ। दैव्यानि। पार्थिवानि। जन्म। अपः। च। अच्छ। सुऽमखाय। वोचं।
वर्धंतां। द्यावः। गिरः। चंद्रऽअग्राः। उदा। वर्धतां। अभिऽसाताः। अर्णाः ॥१४॥

दैव्यानि देवसंबंधीनि पार्थिवानि पृथिवीसंबंधीनि च जन्म जन्मान्यपश्चा-

यसाच्छाभिप्राप्तुं सुमखाय शोभनयज्ञाय मरुद्गणाय वोचं। ब्रवीमि। गिरः स्तुतयो वर्धतां। द्यावो द्योतमानाः स्वप्रतिपाद्यार्थप्रकाशिन्यश्चंद्रायाः। आह्लादनं हिरण्यं वाये यासां ताः। तादृश्यः सत्यो वर्धतां। अर्णो नद्यश्चाभिषाता मरुद्भिः संभक्ता उदोदकेन वर्धतां। समृद्धा भवंतु ॥

॥ अथ पंचदशी ॥

पदेपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च।
सिषक्तु माता मही रसा नः स्मत्सूरिभिर्ऋजुहस्त ऋजुवनिः ॥१५॥

पदेऽपदे। मे। जरिमा। नि। धायि। वरूत्री। वा। शक्रा। या। पायुऽभिः। च।
सिसक्तु। माता। मही। रसा। नः। स्मत्। सूरिऽभिः। ऋजुऽहस्ता। ऋजुऽवनिः ॥१५॥

जरिमा स्तुतिर्मे मदीया पदे पदे तदा तदा भूमौ निधायि। निधीयते। स्थाप्यते। क्रियत इत्यर्थः। या च शक्रा शक्ता सती पायुभी रक्षणैर्वरूत्र्यस्मदुपद्रववारयित्री भवति। वाशब्दश्चार्थे। माता सर्वस्य निर्मात्री मही महती पूज्या रसा सारभूता भूमिः सिषक्तु सेवतां नोऽस्माकं स्तुतिं। अथवा स्तुता नोऽस्मान् सिषक्तु। स्मच्छब्दः प्रशस्तवचनः। प्रशस्तैः सूरिभिर्मेधाविभिः स्तोतृभिर्निमित्तैः। तेषां परिचर्यया प्रीतेत्यर्थः। ऋजुहस्तास्मदनुकूलहस्ता ऋजुवनिः कल्याणदाना भवतु ॥

॥ इति चतुर्थस्य द्वितीये पंचदशो वर्गः ॥

॥ अथ षोडशी ॥

कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ।
मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः ॥१६॥

कथा। दाशेम। नमसा। सुऽदानून्। एवऽया। मरुतः। अच्छऽउक्तौ। प्रऽश्रवसः।
मरुतः। अच्छऽउक्तौ।
मा। नः। अहिः। बुध्न्यः। रिषे। धात्। अस्माकं। भूत्। उपमातिऽवनिः ॥१६॥

वयं कथा केन प्रकारेण दाशेम परिचरेम नमसा स्तोत्रेणान्नेन वा सुदानून् शोभनदानान्मरुतः। एवयैवं क्रियमाणप्रकारेणाच्छोक्तावभिमुख्येन वचने निमित्ते सति तान्मरुतः कथं परिचरेम। तेषां दुराराध्यत्वादिति भावः।

कथं। प्रश्रवसः प्रकृष्टान्ना भवंति। अच्छोक्तौ। अभिगंत्र्युक्तिः स्तुतिर्यस्य तादृशे मयि। यद्वा प्रश्रवसः प्रकृष्टान्नस्य ममाच्छोक्तौ स्तोत्रनिमित्ते सति मरुतः कथा केन प्रकारेण दाशेम। पुनरुक्तिरादरार्था। अहिर्बुध्न्यो देवो नोऽस्मान् रिषे हिंसकाय मा धात्। मा स्थापयतु। स देवोऽस्माकं भूत् भवतूपमातिवनिः शत्रूणां हंता॥

॥ अथ सप्तदशी ॥

इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो वनते मर्त्यो वः।
अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निर्ऋतिर्जग्रसीत ॥१७॥

इति। चित्। नु। प्रऽजायै। पशुऽमत्यै। देवासः। वनते। मर्त्यः। वः। आ।
देवासः। वनते। मर्त्यः। वः।
अत्र। शिवां। तन्वः। धासिं। अस्याः। जरां। चित्। मे। निःऽऋतिः। जग्रसीत ॥१७॥

हे देवासो देवा वो युष्मानिति चिदित्यमेव नु क्षिप्रं प्रजायै पशुमत्यै पशुसहितायापत्याय वनते भजते मर्त्यो मनुष्यो यजमानः। आ देवास इति पुनरुक्तिरादरार्था। अत्रास्मिन्यज्ञे शिवां धासिमन्नं मे ममास्यास्तन्वो देवैरनुगृहीतस्य पुत्रस्य करोतु निर्ऋतिर्देवता। जरां चिज्जरां च जग्रसीत। ग्रसतु॥

॥ अथाष्टादशी ॥

तां वो देवाः सुमतिमूर्जयंतीमिषमश्याम वसवः शसा गोः।
सा नः सुदानुर्मृळयंती देवी प्रति द्रवंती सुविताय गम्याः ॥१८॥

तां। वः। देवाः। सुऽमतिं। ऊर्जयंती। इषं। अश्याम। वसवः। शसा। गोः।
सा। नः। सुऽदानुः। मृळयंती। देवी। प्रति। द्रवंती। सुविताय। गम्याः ॥१८॥

हे देवा हे वसवो वासयितारो वो युष्माकं स्वभूतां तां प्रसिद्धां सुमतिं शोभनमननसाधनां। अन्नेन मतिवृद्धिरन्नमयं हि सोम्य मनः। छां० उ० ६.५.४। इत्यादिषु प्रसिद्धा। ऊर्जयंती बलकरीमिषमेषणसाधनमन्नं क्षीरदध्यादिलक्षणं शसा स्तुत्या गोः सकाशादश्याम। प्राप्नुयाम। सा देवी नोऽस्मान् सुविताय सुखाय प्रति गम्याः। गम्यात्। अभिगच्छेत्। सेट् देवता विशेष्यते। सुदानुः शोभनदाना मृळयंती सुखयंती द्रवंत्यस्मदभिमुखं गच्छंती॥

॥ अथैकोनविंशी ॥

अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः ॥१९॥

अभि । नः । इळा । यूथस्य । माता । स्मत् । नदीभिः । उर्वशी । वा । गृणातु ।
उर्वशी । वा । बृहत्ऽदिवा । गृणाना । अभिऽऊर्ण्वाना । प्रऽभृथस्य । आयोः ॥१९॥

अभिगृणातु नोऽस्मानिळा भूमिर्यूथस्य गोसंघस्य माता निर्मात्री । यद्वेळा गोरूपधरा मनोः पुत्रीत्याहुः । यद्वा यूथस्य मरुद्गणस्य निर्मात्रीळा माध्यमिकी वाक् । अथवोर्वशी माध्यमिकी वाक् । नदीभिर्गंगादिभिः सह गृणातु । स्मच्छब्दः प्रशस्तवचन इत्युक्तं । प्राशस्त्यं गृणातु । वाथवोर्वशी बृहद्दिवा प्रभूतदीप्तिर्गृणाना शब्दयंत्यस्मदीयं कर्म प्रशंसंत्यभ्यूर्ण्वानाच्छादयंती । कं । आयोरायुं मनुष्यं यजमानं । केन । प्रभृथस्य तेजसो वोदकस्य वा दानेन । प्रभृथस्य तेजसो वोदकस्येति निरुक्तं । ११.४९. । अथवा प्रभृथस्य प्रभरणवत आयोर्यज्ञमभ्यूर्ण्वानाच्छादयंती ॥

॥ अथ विंशी ॥

सिषक्तु न ऊर्जव्यस्य पुष्टेः ॥२०॥

सिसक्तु । नः । ऊर्जव्यस्य । पुष्टेः ॥२०॥

ऊर्जव्यस्यैतन्नामकस्य राज्ञः पुष्टेः पोषकस्य संबंधिनो नोऽस्मान् सिषक्तु । सेवतां । सामर्थ्याद्देवसंघ इति गम्यते । अथवोर्वशी मरुद्गणो वा गृह्यते प्रकृतत्वादिति ॥

॥ इति चतुर्थस्य द्वितीये षोडशो वर्गः ॥

प्र शंतमेत्यष्टादशर्चं दशमं सूक्तं भौमस्यात्रेरार्षं त्रैष्टुभं। पूर्वसूक्ते वै तदित्युक्तत्वादिदमपि वैश्वदेवं । तमु ष्टुहीत्येकादशी रुद्रदेवत्या । सप्तदश्येकपदैतयोरुपांत्यैकपदेत्यनुक्रमिष्यमाणत्वात् । अत्रानुक्रमणिका । प्र शंतमा ह्यूनैकादशी रौद्रीति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्र शंतमा वरुणं दीधिती गीर्मित्रं भगमदितिं नूनमश्याः ।
पृषद्योनिः पंचहोता शृणोत्वतूर्तपंथा असुरो मयोभुः ॥१॥

प्र। शंऽतमा। वरुणं। दीधिती। गीः। मित्रं। भगं। अदितिं। नूनं। अश्याः।
पृषत्ऽयोनिः। पंचऽहोता। शृणोतु। अतूर्तऽपंथाः। असुरः। मयःऽभुः ॥१॥

प्र शंतमात्यंतं सुखकरी गीः स्तुतिरूपा वाग्वरुणं मित्रं भगमदितिं च दीधिती दीधित्या कर्मणा हविःप्रक्षेपणात्मकेन सह नूनमवितथं प्राश्याः। प्राप्नोतु। किंच पृषद्योनिः पृषद्वर्णांतरिक्षस्थः पंचहोता पंचविधस्य प्राणापानादिहोमस्य साधको वायुः। यद्वा पंचहोतेति वायोर्नाम। वायुः पंचहोता स प्राण इति हि श्रुतेः। स चातूर्तपंथा अहिंसितगतिरसुरः प्राणस्य दाता मयोभुः सुखस्यास्पदभूतः। एवमुक्तलक्षणो वायुः शृणोतु स्तोत्रमिति ॥

॥ अथ द्वितीया ॥

प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवं।
ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु ॥२॥

प्रति। मे। स्तोमं। अदितिः। जगृभ्यात्। सूनुं। न। माता। हृद्यं। सुऽशेवं।
ब्रह्म। प्रियं। देवऽहितं। यत्। अस्ति। अहं। मित्रे। वरुणे। यत्। मयःऽभु ॥२॥

मे मदीयं स्तोमं स्तोत्रमदितिर्देवता प्रतिजगृभ्यात्। प्रतिगृह्णातु। सूनुं न माता स्वतनुजं जननीव। सा यथा प्रतिगृह्यालिंग्य परितुष्यति तद्वदित्यर्थः। कीदृशं तं। हृद्यं हृदयंगमं सुशेवं शोभनसुखकरं। एतद्द्वयं साधारणं। किंच ब्रह्म मंत्रजातं प्रियं प्रियकरं देवहितं देवैः प्राप्यं यदस्ति यद्ब्रह्म मयोभु सुखसाधनं तदहं मित्रे वरुणे च प्रापयामीति शेषः। यद्वा मित्रे वरुणे चाहोरात्राभिमानिदेवयोर्यदुक्तलक्षणं ब्रह्म परिवृढं यज्ञादिरूपं कर्मास्ति तदहं धारयामीति ॥

उदीरयेत्येषैकादशिने सावित्रे पशौ वपायाज्या। सूत्रितं च। उदीरय कवितमं कवीनां भगं धियं वाजयंतः पुरंधिमिति द्वे। आ० ३.७.। इति ॥

॥ सैषा तृतीया ॥

उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन।
स नो वसूनि प्रयता हितानि चंद्राणि देवः सविता सुवाति ॥३॥

उत्। ईरय। कविऽतमं। कवीनां। उनत्त। एनं। अभि। मध्वा। घृतेन।
सः। नः। वसूनि। प्रऽयता। हितानि। चंद्राणि। देवः। सविता। सुवाति ॥३॥

अनया सविता च स्तूयते। हे ऋत्विजः कवीनां कवितमं क्रांतदर्शिनममुं पुरोवर्तिनमग्निं सवितारं वोदीरय। ऊर्ध्वं प्रापयत। हर्षयतेत्यर्थः। एनं देवं मध्वा मधुरेण सोमरसेन घृतेन चाभ्युनत्त। अभिषिंचत। तर्पयतेत्यर्थः। स सविता देवो नोऽस्मभ्यं वसूनि निवासयोग्यानि गवादिधनानि प्रयता प्रयतानि हितानि चंद्राण्याह्लादकानि हिरण्यानि सुवाति। प्रयच्छत्वित्यर्थः॥

॥ अथ चतुर्थी ॥

समिंद्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति।

सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या यज्ञियानां ॥४॥

सं। इंद्र। नः। मनसा। नेषि। गोभिः। सं। सूरिऽभिः। हरिऽवः। सं। स्वस्ति।

सं। ब्रह्मणा। देवऽहितं। यत्। अस्ति। सं। देवानां। सुऽमत्या। यज्ञियानां ॥४॥

हे इंद्र नोऽस्मान्मनसा प्रकृष्टेन चेतसा गोभिः सह संनेषि। नयसि। अस्मभ्यं गा दापयसीत्यर्थः। एवं सर्वत्र। हे हरिवो हरिभ्यां तद्वन्निंद्र सूरिभिर्मेधाविभिः पुत्रैर्ऋत्विग्भिर्वा संनेषि। तथा स्वस्तिभिः क्षेमैः संनेषि। ब्रह्मणा प्रभूतेनान्नेन संनेषि। यदन्नं देवहितमस्ति तेन। किंच यज्ञियानां यज्ञार्हाणां देवानां सुमत्यानुग्रहबुद्ध्या संनेषि॥

॥ अथ पंचमी ॥

देवो भगः सविता रायो अंश इंद्रो वृत्रस्य संजितो धनानां।

ऋभुक्षा वाज उत वा पुरंधिरवंतु नो अमृतासस्तुरासः ॥५॥

देवः। भगः। सविता। रायः। अंशः। इंद्रः। वृत्रस्य। संऽजितः। धनानां।

ऋभुक्षाः। वाजः। उत। वा। पुरंऽधिः। अवंतु। नः। अमृतासः। तुरासः ॥५॥

अत्र लिंगोक्ता देवताः। भगो देवः सविता च रायो धनस्य स्वाम्यंशस्त्वष्टा वृत्रस्य हंतेंद्रश्च एते देवा धनानां संजितः सम्यग्जेतार ऋभुक्षा ऋभुर्वाजश्च उत वापि च पुरंधिः। बहुधीर्विभ्वोच्यते। एते चामृतासोऽमृता अमरणधर्माणो भगादिदेवास्तुरासोऽस्मद्यज्ञं प्रति त्वरमानाः संतो नोऽस्मानवंतु। रक्षंतु॥

॥ इति चतुर्थस्य द्वितीये सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः प्र ब्रवामा कृतानि ।

न ते पूर्वे मघवन्नापरासो न वीर्यं१ नूतनः कश्चनाप ॥६॥

मरुत्वतः । अप्रतिऽइतस्य । जिष्णोः । अजूर्यतः । प्र । ब्रवाम । कृतानि ।

न । ते । पूर्वे । मघऽवन् । न । अपरासः । न । वीर्यं । नूतनः । कः । चन । आप ॥६॥

वयं यजमाना मरुत्वतो मरुद्भिस्तद्वत इंद्रस्य कृतानि कर्माणि प्रब्रवाम । प्रख्यापयाम । कीदृशस्य तस्य । अप्रतीतस्याप्रतिगतस्य युद्धेऽपलायमानस्य । न केवलं तावन्मात्रं । जिष्णोर्जयनशीलस्याजूर्यतोऽजीर्यमाणस्य । सर्वदा यून इत्यर्थः । अथ प्रत्यक्षेणोच्यते । हे मघवन्निंद्र ते तव वीर्यं पराक्रमं पूर्वे पुरातनाः पुरुषा नापुः । नापरासोऽपरेऽपि नापुः । किं बहुना । नूतनः कश्चनाश्चर्यभूतो यः कोऽपि वीर्यं नाप । न प्राप्नोति ॥

॥ अथ सप्तमी ॥

उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनानां ।

यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागमज्जोहुवानं ॥७॥

उप । स्तुहि । प्रथमं । रत्नऽधेयं । बृहस्पतिं । सनितारं । धनानां ।

यः । शंसते । स्तुवते । शंऽभविष्ठः । पुरुऽवसुः । आऽगमत् । जोहुवानं ॥७॥

हे अंतरात्मन् त्वं प्रथमं मुख्यं । प्रकृष्टतममित्यर्थः । रत्नधेयं रमणीयधनदातारं धनानां हविर्लक्षणानां सनितारं संभक्तारं । अथवा रत्नशब्देन मणिमुक्तादयो गृहीता इह धनशब्देन गवादयः । गवादिदातारं बृहस्पतिं बृहतो मंत्रस्य पतिं स्वामिनं देवमुपस्तुहि । यो देवः शंसते शस्त्रैः स्तुवते सामभिर्यजमानाय शंभविष्ठः सुखस्य भावयितृतमो भवति । यश्च जोहुवानमाह्वयंतं यजमानं पुरूवसुः प्रभूतधनः सन्नागमत् आगच्छति तमुपस्तुहि ॥

॥ अथाष्टमी ॥

तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः ।

ये अश्वदा उत वा संति गोदा ये वस्त्रदाः सुभगास्तेषु रायः ॥८॥

तव॑ । ऊ॒तिऽभिः॑ । सच॑माना॒ः । अरि॑ष्टाः । बृह॑स्पते । म॒घऽवा॑नः । सु॒ऽवीराः॑ ।
ये । अ॒श्व॒ऽदाः । उ॒त । वा॒ । संति॑ । गो॒ऽदाः । ये । व॒स्त्र॒ऽदाः । सु॒ऽभगाः॑ । तेषु॑ । रायः॑ ॥ ८ ॥

हे बृहस्पते तवोतिभी रक्षाभिः सचमानाः संगच्छमाना अरिष्टा अहिंसिता मघवानो धनवंतः सुवीराः शोभनपुत्राश्च भवंति । ये त्वदनुगृहीता अश्वदा बहूनामश्वानां दातारः संति । उत वाऽथवा गोदाः संति । ये च वस्त्रदाः सुभगाः शोभनधनाः संति तेषु सर्वेषु रायो धनानि संभवंत्विति शेषः ॥

॥ अथ नवमी ॥

वि॒स॒र्माणं॑ कृणुहि वि॒त्तमे॑षां॒ ये भुं॒जते॒ अपृ॑णंतो॒ न उ॒क्थैः ।
अप॑व्रतान्प्रस॒वे वा॑वृधा॒नान्ब्र॑ह्म॒द्विषः॒ सूर्या॑द्यावयस्व ॥ ९ ॥
वि॒ऽस॒र्माण॑म् । कृ॒णु॒हि॒ । वि॒त्तम् । ए॒षा॒म् । ये । भुं॒जते॑ । अपृ॑णंतः । नः॒ । उ॒क्थैः ।
अप॑ऽव्रतान् । प्र॒ऽस॒वे । व॒वृ॒धा॒नान् । ब्र॒ह्म॒ऽद्विषः॑ । सूर्या॑त् । य॒व॒य॒स्व॒ ॥ ९ ॥

एषां वक्ष्यमाणानां वित्तं धनं विसर्माणं विसरणशीलं कृणुहि । कुरु । हे ब्रह्मणस्पते । एषामित्युक्तं केषामित्याह । ये भुंजतेऽपृणंतोऽप्रयच्छंतः । केभ्यः । उक्थैः स्तुतिप्रतिपादकैः शस्त्रैर्विशिष्टेभ्यो नोऽस्मभ्यं । तानपव्रतानपगतकर्मणः प्रसव उत्पत्तिमति मनुष्यलोके ववृधानान् वर्धमानान्ब्रह्मद्विषो ब्राह्मणद्वेष्टॄन्मंत्रद्वेष्टॄन् वा सूर्याद्यावयस्व । पृथक्कुरु । अंधकारे स्थापयेत्यर्थः ॥

॥ अथ दशमी ॥

य ओह॑ते र॒क्षसो॑ दे॒ववी॑तावच॒क्रेभि॒स्तं म॑रुतो॒ नि या॑त ।
यो वः॒ शमीं॑ शशमा॒नस्य॒ निंदा॑त्तु॒च्छ्यान्कामा॒न्कर॑ते सिष्विदा॒नः ॥ १० ॥
यः । ओह॑ते । र॒क्षसः॑ । दे॒वऽवी॑तौ । अ॒च॒क्रेभिः॑ । तम् । म॒रु॒तः॒ । नि । या॒त॒ ।
यः । वः॒ । शमी॑म् । श॒श॒मा॒नस्य॑ । निंदा॑त् । तु॒च्छ्यान् । कामा॑न् । कर॑ते । सि॒स्वि॒दा॒नः ॥ १० ॥

यो यजमानो रक्षसो बलिनो राक्षसानोहते प्रापयति देववीतौ । देवानां वीतिः प्राप्तिर्भक्षणं वा यत्र स तथोक्तः । तस्मिन्यज्ञे । अन्यथानुष्ठानादिनासुरं करोतीत्यर्थः । तं यजमानमचक्रेभिरचक्रै रथैर्हे मरुतो नि यात । नितरां प्रापयतांधकारं । यद्वाचक्रेभिरिति पूर्वेणान्वयः । चक्रशब्देनांगान्युच्यंते । पुनःपुनरंगरहितैः

केवलैरेव प्रधानैरोहते प्रापयति । सांगं हि कर्म देवानभ्येति । यश्च वो युष्माकं शमी कर्म स्तुतिलक्षणं शशमानस्य मम संबंधि निंदात् निंदेत् वैदिकं ज्योतिष्टोमादिरूपं कर्म निंदति स्वयं च तुच्छ्यान्नश्वरान् कामान् कृष्यादिजनितभोगान् करते कुरुते सिष्विदानः स्विद्यन्नात्मानं क्लेशयन् । अथवा युष्मासु कमनीयान्भोगान् तुच्छ्यान् करोति ॥

॥ इति चतुर्थस्य द्वितीयेऽष्टादशो वर्गः ॥

॥ अथैकादशी ॥

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥११॥

तं । ऊं इति । स्तुहि । यः । सुऽइषुः । सुऽधन्वा । यः । विश्वस्य । क्षयति । भेषजस्य ।
यक्ष्व । महे । सौमनसाय । रुद्रं । नमःऽभिः । देवं । असुरं । दुवस्य ॥११॥

हे आत्मन् तमु तमेव रुद्रं स्तुहि । स्तुतिं कुरु । यः स्विषुः शोभनबाणः सुधन्वा च । विरोधिहंतृत्वात्सुष्टुत्वं । यश्च विश्वस्य भेषजस्यौषधस्य क्षयति ईश्वरो भवति । शारीरस्य सांसारिकस्य वा रिष्टस्य शमनायेश्वरस्य व्यतिरिक्तस्यौषधस्याभावाद्भिषक्तमत्वाच्चास्य भेषजस्वामित्वं । भिषक्तमं त्वा भिषजां शृणोमि । ऋग्वे० २.३३.४. । इत्यादिश्रुतेः । किंच तमेव रुद्रं दुःखात्तत्साधनाद्दुरिताद्वा मोचयितारं देवं यक्ष्व यज च महे महते सौमनसाय सुमनस्त्वाय । ईश्वराराधनाच्चित्तशांतिः प्रसिद्धा । किंच नमोभिर्हविर्भिर्नमस्कारैर्वा देवं द्योतमानमसुरं प्रकृष्टासुं । बलवंतमित्यर्थः । यद्वा प्राणदातारं रुद्रं दुवस्य । परिचरेति ॥

॥ अथ द्वादशी ॥

दमूनसो अपसो ये सुहस्ता वृष्णः पत्नीर्नद्यो विभ्वतष्टाः ।
सरस्वती बृहद्दिवोत राका दशस्यंतीर्वरिवस्यंतु शुभ्राः ॥१२॥

दमूनसः । अपसः । ये । सुऽहस्ताः । वृष्णः । पत्नीः । नद्यः । विभ्वऽतष्टाः ।
सरस्वती । बृहत्ऽदिवा । उत । राका । दशस्यंतीः । वरिवस्यंतु । शुभ्राः ॥१२॥

अत्र लिंगोक्तदेवताः । दमूनसो दानमनसो दांतमनसो वापसश्चमसाश्वरथगवादिशोभनकर्मवंतः ॥ मत्वर्थो लुप्यते ॥ अत एव सुहस्ताः कुशलहस्ता ये

संति त ऋभवो वृष्णो वर्षकस्येंद्रस्य पत्नीः पत्न्यः पालयित्र्यो नद्यो नदनशीला गंगाद्या विभ्वतष्टा ऋभूणां मध्यमेन कृताः सरस्वत्येतन्नामिका नदी वाग्देवी वा बृहद्दिवा प्रभूतदीप्तिरुतापि च राका देवी च दशस्यंतीर्दशस्यंत्यः कामान्प्रयच्छंत्यः शुभ्रा दीप्ताः ताश्च वरिवस्यंतु । अस्मभ्यं धनमिच्छंतु ॥

॥ अथ त्रयोदशी ॥

प्र सू महे सुंशरणाय मेधां गिरं भरे नव्यसीं जायमानां ।
य आंहना दुहितुर्वक्षणांसु रूपा मिनानो अकृणोदिदं नः ॥१३॥
प्र । सु । महे । सुऽशरणाय । मेधां । गिरं । भरे । नव्यसीं । जायमानां ।
यः । आहनाः । दुहितुः । वक्षणासु । रूपा । मिनानः । अकृणोत् । इदं । नः ॥१३॥

सु सुष्ठु प्र भरे प्रकर्षेण संपादयामि महे महते सुशरणाय शोभनरक्षकायेंद्राय पर्जन्याय वा सुसुखाय वा । किं । मेधां मतौ धीयमानां गिरं स्तुतिं । कीदृशीं । नव्यसीं नवतरामतिशयेन स्तुत्यां वा जायमानामिदानीमुत्पद्यमानां । नूतनामित्यर्थः । य इंद्रः पर्जन्यो वा आहना आहंता सेक्ता दुहितुर्दुहितृस्थानीयायाः पृथिव्या हिताय वक्षणासु नदीषु रूपा रूपाणि मिनानः कुर्वाण इदमुदकं नोऽस्मभ्यमकृणोत् करोतु ॥

॥ अथ चतुर्दशी ॥

प्र सुंष्टुतिः स्तनयंतं रुवंतमिळस्पतिं जरितर्नूनमश्याः ।
यो अब्दिमाँ उंदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः ॥१४॥
प्र । सुऽस्तुतिः । स्तनयंतं । रुवंतं । इळः । पतिं । जरितः । नूनं । अश्याः ।
यः । अब्दिऽमान् । उदनिऽमान् । इयर्ति । प्र । विऽद्युता । रोदसी इति । उक्षमाणः ॥१४॥

अत्र पर्जन्यः स्तूयते । सुष्टुतिः शोभना स्तुतिः स्तनयंतं गर्जंतं रुवंतं वर्षणजनितं शब्दं कुर्वाणमिळोऽन्नस्योदकस्य वा पतिं स्वामिनं हे जरितः स्तोतस्त्वदीया स्तुतिर्नूनं प्राश्याः । प्रकर्षेण व्याप्नोतु । यश्च पर्जन्योऽब्दिमान् । अब्दिरपां दानवान्मेघः । तद्वान् । उदनिमानुदकवान्विद्युता तडिता रोदसी द्यावापृथिव्यावुक्षमाणः सिंचन् प्रेयर्ति गच्छति ॥

॥ अथ पंचदशी ॥

एष स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः ।
कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः ॥१५॥
एषः । स्तोमः । मारुतं । शर्धः । अच्छ । रुद्रस्य । सूनून् । युवन्यून् । उत् । अश्याः ।
कामः । राये । हवते । मा । स्वस्ति । उप । स्तुहि । पृषत्ऽअश्वान् । अयासः ॥१५॥

एष मया संपादितः स्तोमः स्तोत्रं मारुतं शर्धो मरुतां बलमच्छाभिमुखमश्याः । प्राप्नोतु । समुदायरूपेण स्तुत्वा समुदायिरूपेणाह । रुद्रस्य सूनून् । एषां रुद्रेण पुत्रत्वेन परिक्लृप्तिरसकृदुक्ता । युवन्यूनो मिश्रणेच्छून्वा उदुन्नतमत्यधिकमश्याः । व्याप्नुहि हे मनः । कामः संकल्पो राये धनार्थं मा मां स्वस्त्यविनश्वरं हवते । आह्वयति । प्रेरयतीत्यर्थः । यस्मादेवं तस्मात्पृषदश्वान्पृषद्वर्णाश्वोपेतानयासो यज्ञगंतॄनुपोपेत्य स्तुहि ॥

॥ अथ षोडशी ॥

प्रैष स्तोमः पृथिवीमंतरिक्षं वनस्पतीँरोषधी राये अश्याः ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥१६॥
प्र । एषः । स्तोमः । पृथिवीं । अंतरिक्षं । वनस्पतीन् । ओषधीः । राये । अश्याः ।
देवःऽदेवः । सुऽहवः । भूतु । मह्यं । मा । नः । माता । पृथिवी । दुःऽमतौ । धात् ॥१६॥

एष स्तोमः स्तुतिः पृथिव्यादिदेवताः प्राश्याः । प्राप्नोतु । किमर्थं । राये धनार्थं । देवो देवः सर्वोऽपि देवो मह्यं मदर्थं सुहवो भूतु । स्वाह्वानो भवतु । नोऽस्मान्दुर्मतौ माता सर्वस्य निर्मात्री । यद्वाचेर्भौमत्वाद्विशेषेण माता । तादृशी पृथिवी मा धात् । मा स्थापयतु ॥

॥ अथ सप्तदशी ॥

उरौ देवा अनिबाधे स्याम ॥१७॥
उरौ । देवाः । अनिऽबाधे । स्याम ॥१७॥

हे देवा युष्माकं संबंधिन्युरौ महत्यनिबाधे नितरां बाधरहिते सुखे स्याम । भवेम वयमनयः ॥

॥ अथाष्टादशी ॥

सम॒श्विनो॒रव॑सा॒ नूत॑नेन मयो॒भुवा॑ सु॒प्रणी॑ती गमेम ।
आ नो॑ र॒यिं व॑हत॒मोत वी॒राना विश्वा॑न्यमृता॒ सौभ॑गानि ॥१८॥

सं । अ॒श्विनोः॑ । अव॑सा । नूत॑नेन । म॒यः॒ऽभुवा॑ । सु॒ऽप्रनी॑ती । ग॒मे॒म॒ ।
आ । नः॒ । र॒यिं । व॒ह॒तं॒ । आ । उ॒त । वी॒रान् । आ । विश्वा॑नि । अ॒मृ॒ता॒ । सौभ॑गानि ॥१८॥

वयमश्विनोर्नूतनेन पूर्वमन्यैरननुभूतेन मयोभुवा सुखस्य भावयित्रा सुप्रणीती शोभनप्रणयनवतावसा रक्षणेन संगमेम । संगच्छेमहि । हे अमृतामरणावश्विनौ नोऽस्मभ्यं रयिं धनमावहतं । प्रापयतं । ओत वीरान् सुवीर्यवतः पुत्रानप्यावहतं । विश्वानि सौभगान्यप्यावहतं ॥

॥ इति चतुर्थस्य द्वितीय एकोनविंशो वर्गः ॥

आ धेनव इति सप्तदशर्चमेकादशं सूक्तमत्रेरार्षं त्रैष्टुभं वैश्वदेवं । अत्रानुक्रमणिका । आ धेनवस्त्र्यूनैतयोरुपांत्यैकपदेति ॥ विनियोगो लैंगिकः ॥ अपोनप्त्रीय एकधनासु हविर्धानं प्रति नीयमानास्वाद्यानुवचनीया । सूत्रितं च । आ धेनवः पयसा तूर्ण्यर्था: समन्या यंत्युप यंत्यन्याः । आ० ५.१. । इति ॥

॥ तत्र प्रथमा ॥

आ धे॒नवः॒ पय॑सा॒ तूर्ण्य॑र्था॒ अम॑र्धन्ती॒रुप॑ नो यंतु॒ मध्वा॑ ।
म॒हो रा॒ये बृ॑ह॒तीः स॒प्त विप्रो॑ मयो॒भुवो॑ जरि॒ता जो॑हवीति ॥१॥

आ । धे॒नवः॑ । पय॑सा । तूर्णि॑ऽअर्थाः । अम॑र्धन्तीः । उप॑ । नः॒ । य॒न्तु॒ । मध्वा॑ ।
म॒हः । रा॒ये । बृ॒ह॒तीः । स॒प्त । विप्रः॑ । म॒यः॒ऽभुवः॑ । ज॒रि॒ता । जो॒ह॒वी॒ति॒ ॥१॥

धेनवः प्रीणयित्र्यो नद्यो मध्वा मधुरेण पयसा रसेन सहितास्तूर्ण्यर्थास्त्वरमाणगमनाः । अर्थोऽर्तेरिति यास्कः । अमर्धन्तीरहिंसंत्यः सत्यो नोऽस्मानुपायंतु । उपागच्छंतु । तदर्थं महे महते राये धनाय बृहतीर्महतीः सप्त सर्पणस्वभावाः सप्तसंख्याका इमं मे गंगे । ऋग्वे० १०.७५.५. । इति मंत्रोक्ता गंगाद्या वा । तत्र हि प्राधान्येन सप्तैवोक्ताः । मयोभुवः सुखस्य भावयित्रीर्विप्रो विशेषेण प्रीणयिता जरिता स्तोता जोहवीति । आह्वयति ॥

॥ अथ द्वितीया ॥

आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।
पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टां ॥२॥

आ । सुऽस्तुती । नमसा । वर्तयध्यै । द्यावा । वाजाय । पृथिवी इति । अमृध्रे इति ।
पिता । माता । मधुऽवचाः । सुऽहस्ता । भरेऽभरे । नः । यशसौ । अविष्टां ॥२॥

अहं सुष्टुती सुष्टुत्या शोभनस्तोत्रेण नमसा हविषा चामृध्रे हिंसारहिते द्यावापृथिवी द्यावापृथिव्यावावर्तयध्यै । आवर्तयितुमिच्छामि वाजायान्नार्थं । अन्नं वै वाज इति हि श्रुतिः । पिता पालयित्री द्यौर्माता निर्मात्री पृथिवी मधुवचाः प्रियवचना सुहस्ताभिमतदानेन शोभनहस्ता । एते उभयविशेषणे । यशसौ यशोयुक्तौ द्यावापृथिव्यौ भरे भरे सर्वेषु संग्रामेषु यज्ञेषु वा नोऽस्मानविष्टां । रक्षतां ॥

॥ अथ तृतीया ॥

अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रं ।
होतेव नः प्रथमः पाह्यस्य देव मध्वो ररिमा ते मदाय ॥३॥

अध्वर्यवः । चकृऽवांसः । मधूनि । प्र । वायवे । भरत । चारु । शुक्रं ।
होताऽइव । नः । प्रथमः । पाहि । अस्य । देव । मध्वः । ररिम । ते । मदाय ॥३॥

हे अध्वर्यवोऽध्वरं युंजाना मधूनि मधुररसानि सोमाज्यादीनि चकृवांसः कुर्वाणा यूयं वायवे प्रथमं प्र भरत प्रकर्षेण संपादयत चारु चरणीयं शुक्रं दीप्तं सोमं । हे वायो त्वं च होतेव होता यथा प्रथमं पिबति तद्वन्नोऽस्मदर्थमस्यामुं सोमं प्रथम इतरदेवेभ्यः पूर्वं पाहि । पिब । हे देव वायो मध्वो मधुरं सोमरसं ते मदाय ररिम । ददाम । वायोः पूर्वपानमसकृत्प्रपंचितं ॥

॥ अथ चतुर्थी ॥

दश क्षिपो युंजते बाहू अद्रिं सोमस्य या शमितारा सुहस्ता ।
मध्वो रसं सुगभस्तिर्गिरिष्ठां चनिश्चदद्दुदुहे शुक्रमंशुः ॥४॥

दश । क्षिपः । युंजते । बाहू इति । अद्रिं । सोमस्य । या । शमितारा । सुऽहस्ता ।
मध्वः । रसं । सुऽगभस्तिः । गिरिऽस्थां । चनिश्चदत् । दुदुहे । शुक्रं । अंशुः ॥४॥

अथाभिषवस्य प्रतिपाद्यमानत्वात्सौमी देवता । यद्वा ऐंद्री । अद्रिमभिषवग्रावाणं दश क्षिपो दशसंख्याकाः क्षेप्त्र्योऽगुलयो युंजते । गृह्णंति । यद्वा परस्परं युक्ता भवंति । बाहू अध्वर्युसंबंधिनावद्रिं युंजाते । या यौ सुहस्ता शोभनहननौ सोमस्य शमितारावभिषोतारौ तौ बाहू युंजाते । मध्वो मधुरस्य सोमस्य रसं गिरिष्ठां गिरिस्थायिनं गिरिवदुन्नतप्रदेशस्थितं वा सुगभस्तिः शोभनांगुलिरध्वर्युरनिषदद्दाह्लादयन् ॥ चदि आह्लादन इत्यस्माद्यङ्लुकि छांदसं रूपं ॥ दुदुहे । दोग्धि । स चांशुः शुक्रं निर्मलं रसं दुदुहे । दुग्धे । यद्वैकं वाक्यं । अंशुर्ग्रावा सुगभस्तिः सुहस्तोऽध्वर्युर्मध्वो रसं दुदुहे । दोग्धि ॥

॥ अथ पंचमी ॥

असावि ते जुजुषाणाय सोमः क्रत्वे दक्षाय बृहते मदाय ।
हरी रथे सुधुरा योगे अर्वागिंद्र प्रिया कृणुहि हूयमानः ॥५॥

असावि । ते । जुजुषाणाय । सोमः । क्रत्वे । दक्षाय । बृहते । मदाय ।
हरी इति । रथे । सुऽधुरा । योगे । अर्वाक् । इंद्र । प्रिया । कृणुहि । हूयमानः ॥५॥

हे इंद्र ते तुभ्यं जुजुषाणाय सेवमानाय सोमोऽसावि । अभिषुतः । किमर्थं । क्रत्वे क्रतवे वृत्रवधादिकर्मणे दक्षाय बलाय बृहते मदाय च । यस्मादेवं तस्मात् हे इंद्र त्वं हूयमानः सन् सुधुरा शोभनायां धुरि नियुक्तौ प्रिया प्रियौ हरी अश्वौ योगे योगार्हे युक्ते वा रथे योजयित्वा तं रथमर्वागस्मदभिमुखं कृणुहि । कुरु ॥

॥ इति चतुर्थस्य द्वितीये विंशो वर्गः ॥

॥ अथ षष्ठी ॥

आ नो महीमरमतिं सजोषा ग्नां देवीं नमसा रातहव्यां ।
मधोर्मदाय बृहतीमृतज्ञामाग्ने वह पथिभिर्देवयानैः ॥६॥

आ । नः । महीं । अरमतिं । सऽजोषाः । ग्नां । देवीं । नमसा । रातऽहव्यां ।
मधोः । मदाय । बृहतीं । ऋतऽज्ञां । आ । अग्ने । वह । पथिऽभिः । देवऽयानैः ॥६॥

अत्राग्निं संबोध्य ग्नादेवताया आवाह्यत्वादस्याग्निर्ग्ना वा देवता । हे अग्ने सजोषा अस्माभिः सह प्रीयमाणस्त्वं ग्नां देवीं सर्वैर्गंतव्यामेतन्नामिकां देवतां । मेना ग्ना इति स्त्रीणामिति यास्कः । नोऽस्मदर्थं देवयानैर्देवैर्गंतव्यैः पथिभिर्मार्गैरा

अभिमुखमावह । कीदृशीं । महीं महतीमरमतिमा समंताद्रममाणां सर्वत्र गंत्रीं वा नमसा स्तोत्रेण सह रातहव्यां । रातं दत्तं दानाय संकल्पितं हव्यं यस्यास्तां । दत्तहविष्कामित्यर्थः । किमर्थं । मध्वो मधुरस्य सोमस्य मदाय । पुनः कीदृशीं । बृहतीं प्रवृद्धामृतज्ञां यज्ञमभिजानतीं ॥

प्रवर्ग्ये महावीरेऽज्यमानेऽंजंति यमित्येषा । सूचितं च । अंजंति यं प्रथयंतो न विप्रा इत्यज्यमाने । आ॰ ४. ६. । इति ॥

॥ सैषा सप्तमी ॥

अंजंति यं प्रथयंतो न विप्रा वपावंतं नाग्निना तपंतः ।
पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादि ॥ ७ ॥
अंजंति । यं । प्रथयंतः । न । विप्राः । वपाऽवंतं । न । अग्निना । तपंतः ।
पितुः । न । पुत्रः । उपसि । प्रेष्ठः । आ । घर्मः । अग्निं । ऋतयन् । असादि ॥ ७ ॥

यं घर्मं महावीरं प्रथयंतो न ॥ नेति संप्रत्यर्थीयः । अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोगः ॥ इदानीं प्रथयंतो विप्रा मेधाविन ऋत्विजोऽध्वर्य्वादयो वपावंतं न । वपावंतं प्रवृद्धं पशुं यथाग्नौ तपंति तद्वदग्निना तपंतोऽंजंति । पितुर्न पुत्र उपसि प्रेष्ठः पितुरुपस्थे प्रियतमः पुत्र इव घर्मो महावीरः । यद्घ्र इत्यतपत्तद्घर्मस्य घर्मत्वमिति हि श्रुतिः । स ऋतयन्यज्ञमिच्छन्नग्निमग्नावसादि । आसादितः । अत्र पितृपुत्रदृष्टांतः स्फोटादिराहित्येन सुखवासप्रख्यापनार्थः ॥

॥ अथाष्टमी ॥

अच्छा मही बृहती शंतमा गीर्दूतो न गंत्वश्विना हुवध्यै ।
मयोभुवा सरथा यातमर्वाग्गंतं निधिं धुरमाणिर्न नाभिं ॥ ८ ॥
अच्छ । मही । बृहती । शंऽतमा । गीः । दूतः । न । गंतु । अश्विना । हुवध्यै ।
मयःऽभुवा । सऽरथा । आ । यातं । अर्वाक् । गंतं । निऽधिं । धुरं । आणिः । न । नाभिं ॥ ८ ॥

अच्छाभिमुखमश्विनाश्विनौ हुवध्या आह्वातुं गीरस्मदीया स्तुतिर्दूतो न दूत इवाह्वातेव गंतु । गच्छतु । गीर्विशेष्यते । मही पूज्या बृहती महती शंतमा सुखतमा । हे अश्विनौ मयोभुवा सुखस्य भावयितारौ सरथैकरथौ संतौ निधिं निहितं सोममर्वागभिमुखं यातं । गच्छतं । धुरं भारवाहिकां नाभिमाणिर्न कील

इव। यथा निष्कीला नाभी रथं न निर्वहति तद्वत् युवाभ्यां वियुक्तः सोमो यागं न निर्वहतीति ज्ञापयितुमेवं दृष्टांतितं ॥

॥ अथ नवमी ॥

प्र तव्यसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि ।
या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन् ॥९॥

प्र। तव्यसः। नमःऽउक्तिं। तुरस्य। अहं। पूष्णः। उत। वायोः। अदिक्षि।
या। राधसा। चोदितारा। मतीनां। या। वाजस्य। द्रविणःऽदा। उत। त्मन् ॥९॥

अहमृषिस्तव्यसः प्रकृष्टबलस्य तुरस्य त्वरमाणस्य पूष्णः पोषकस्य देवस्य। उक्तगुणकाय देवाय उतापि च वायोरुक्तलक्षणाय च नमउक्तिं। नम इति वचनं। स्तोत्रं प्रादिक्षि। प्रदिशामि। या यौ पूषवायू राधसा हविर्लक्षणेन निमित्तेन मतीनां चोदितारा प्रेरयितारौ। यद्वा राधसेति षष्ठ्यर्थे तृतीया। राधसो धनस्य मतीनां च चोदयितारौ। यौ च वाजस्यान्नस्य संग्रामस्य वा चोदयितारौ तौ देवावुतापि च त्मन्नात्मन्यनन्यप्रेरणायैव द्रविणोदौ भवतमिति शेषः ॥

॥ अथ दशमी ॥

आ नामभिर्मरुतो वक्षि विश्वाना रूपेभिर्जातवेदो हुवानः ।
यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गंत मरुतो विश्व ऊती ॥१०॥

आ। नामऽभिः। मरुतः। वक्षि। विश्वान्। आ। रूपेभिः। जातऽवेदः। हुवानः।
यज्ञं। गिरः। जरितुः। सुऽस्तुतिं। च। विश्वे। गंत। मरुतः। विश्वे। ऊती ॥१०॥

हे जातवेदो जातप्रज्ञाग्ने हुवानोऽस्माभिराहूयमानः सन् विश्वान्मरुतः सर्वानपि स्तोत्रभाजो हविर्भाजश्च देवान् नामभिरिंद्रवरुणेत्यादिलक्षणैरावक्षि। आवहसि। रूपेभिः सहस्राक्षवज्रहस्तत्वादिलक्षणै रूपैरावक्षि। वहसि यज्ञं। किंच हे मरुतो विश्वे सर्वे यूयं यज्ञमस्मदीयं यज्ञसंबंधि हविर्वा जरितुः स्तोतुः संबंधिनीर्गिरः स्तुतिवचांसि सुष्टुतिं तत्साध्यां शोभनफलां स्तुतिं च ॥ अवयविन्याः स्तुतेरेकत्वादेकवचनं। अवयवानां बहुत्वाद्बहुवचनं ॥ उक्ते यज्ञस्तुती अभिलक्ष्य गंत। आगच्छत। विश्वे च यूयमूती ऊत्या रक्षया च सह गंत ॥

॥ इति चतुर्थस्य द्वितीय एकविंशो वर्गः ॥

आ नो दिव इत्येकादशी व्यूढे दशरात्रे नवमेऽहनि प्रउगशस्त्रे सारस्वततृचे द्वितीया । सूचितं च । आ नो दिव बृहतः पर्वतादा सरस्वत्यभि नो नेषि वस्यः । आ० ७.११. । इति ॥ तत्पाठस्तु ॥

आ नो॑ दि॒वो बृ॑ह॒तः पर्व॑ता॒दा सर॑स्वती यज॒ता गं॑तु य॒ज्ञं ।
हवं॑ दे॒वी जु॑जुषा॒णा घृ॒ताची॒ शग्मां॑ नो॒ वाच॑मुश॒ती शृ॑णोतु ॥११॥
आ । नः॒ । दि॒वः । बृ॒ह॒तः । पर्व॑तात् । आ । सर॑स्वती । य॒ज॒ता । गं॒तु॒ । य॒ज्ञं ।
हवं॑ । दे॒वी । जु॒जु॒षा॒णा । घृ॒ताची॑ । शग्मां॑ । नः॒ । वाचं॑ । उ॒श॒ती । शृ॒णो॒तु॒ ॥११॥

नोऽस्माकं यज्ञं यजता यष्टव्या देवी सरस्वती दिवो द्योतमानाद्युलोकादागंतु । आगच्छतु । तथा बृहतो महतः पर्वतात्पर्ववतः पूरणवतः प्रीणनवतो वांतरिक्षान्मेघाद्वा सरस्वत्यागंतु । आगच्छतु । अनेन माध्यमिकी वागुच्यते । यद्वैतद्दिव इत्यस्य विशेषणं । संति हि द्युलोकस्य त्रीणि पर्वाणि तिस्रो दिवः पृथिवीरित्यादि श्रुतेः । अस्मिन्पक्षे द्वितीय आकारः पूरणः । तदर्थं हवमस्मदीयमाह्वानं देवी सरस्वती जुजुषाणा स्तुतिं सेवमाना घृताची घृतमुदकमंचती नोऽस्मदीयां शग्मां सुखकरीं वाचं स्तुतिमुशती कामयमाना सती शृणोतु ॥

॥ अथ द्वादशी ॥

आ वे॒धसं॒ नील॑पृष्ठं बृ॒हंतं॒ बृह॒स्पतिं॒ सद॑ने सादयध्वं ।
सा॒दद्यो॑निं॒ दम॒ आ दी॑दि॒वांसं॒ हिर॑ण्यवर्णमरु॒षं स॑पेम ॥१२॥
आ । वे॒धसं॑ । नील॑ऽपृष्ठं । बृ॒हंतं॑ । बृह॒स्पतिं॑ । सद॑ने । सा॒द॒य॒ध्वं॒ ।
सा॒दत्ऽयो॑निं । दमे॑ । आ । दीदि॒ऽवांसं॑ । हिर॑ण्यऽवर्णं । अ॒रु॒षं । स॒पे॒म॒ ॥१२॥

एषा बार्हस्पत्या । हे ऋत्विजो यूयं बृहस्पतिं बृहतो मंत्रस्य स्वामिनं देवं सदनेऽस्मद्यागगृह आसादयध्वं । स्थापयध्वं । कीदृशं देवं । वेधसं विविधकर्तारं नीलपृष्ठं स्निग्धांगं बृहंतं महांतं । तथा संतं वयमृत्विग्यजमानाः सपेम । परिचरेम । स एव विशेष्यते । सादद्योनिं योनौ सीदंतं दमे यागगृह आ सर्वतो दीदिवांसं दीप्यमानं हिरण्यवर्णमरुषमारोचमानं । अथवेयमाग्नेयी । बृहतः परिवृढस्य कर्मणः स्वामीति बृहस्पतिरग्निरुच्यते । तथा नीलवर्णधूमपृष्ठत्वसदनसादनहिरण्यवर्णत्वादिलिंगैरप्यग्निरेव बृहस्पतिः ॥

॥ अथ त्रयोदशी ॥

आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गंत्वोमभिर्हुवानः ।
ग्ना वसान ओषधीरमृध्रस्त्रिधातुशृंगो वृषभो वयोधाः ॥१३॥

आ । धर्णसिः । बृहत्ऽदिवः । रराणः । विश्वेभिः । गंतु । ओमऽभिः । हुवानः ।
ग्नाः । वसानः । ओषधीः । अमृध्रः । त्रिधातुऽशृंगः । वृषभः । वयःऽधाः ॥१३॥

इदमाद्यृक्त्रयमाग्नेयं । अग्निरागंतु आगच्छत्वस्मद्यज्ञं धर्णसिः सर्वस्य धारको बृहद्दिवः प्रभूतदीप्ती रराणो रममाणः कामान् प्रयच्छन् आ विश्वेभिः सर्वैरोमभी रक्षणैः सह हुवान आहूयमानः । ग्ना गंत्रीर्ज्वाला ओषधीश्च वसानोऽमृध्रोऽहिंसितस्त्रिधातुशृंगस्त्रिप्रकारशृंगवदुन्नतलोहितशुक्लकृष्णवर्णज्वालो वृषभो वर्षिता वयोधा अन्नस्य दाता हविषो वा धारकः ॥

॥ अथ चतुर्दशी ॥

मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन् ।
सुशेव्यं नमसा रातहव्याः शिशुं मृजंत्यायवो न वासे ॥१४॥

मातुः । पदे । परमे । शुक्रे । आयोः । विपन्यवः । रास्पिरासः । अग्मन् ।
सुऽशेव्यं । नमसा । रातऽहव्याः । शिशुं । मृजंति । आयवः । न । वासे ॥१४॥

आयोर्मनुष्यस्य यजमानस्य विपन्यवः । स्तोतृनामैतत् । स्तोतारो होत्रादयो रास्पिरासः ॥ राधनं हविर्लक्षणं । तत्स्पृशंति रास्पा जुह्वादयः । तद्वान् रास्पी । तद्वंतो रास्पिराः ॥ उक्तविधा ऋत्विजो मातुर्निर्मातुः पृथिव्याः शुक्रे दीप्ते परमे पद उत्तरवेद्यां स्थितमग्मन् । अगमन् । भजंते । तदर्थं सुशेव्यं सुखाय हितं शिशुमुत्पन्नमात्रं वासे वासाय नमसा स्तोत्रेण रातहव्या दत्तहव्याः । हविष्का इत्यर्थः । तादृशास्ते मृजंति संमार्जयंति । तत्र दृष्टांतः । आयवो न लौकिका मनुष्या इव । ते यथा शिशुं वासाय मृजंति तद्वत् ॥

॥ अथ पंचदशी ॥

बृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनासः सचंत ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥१५॥

बृहत् । वयः । बृहते । तुभ्यं । अग्ने । धियाऽजुरः । मिथुनासः । सचंत ।
देवःऽदेवः । सुऽहवः । भूतु । मह्यं । मा । नः । माता । पृथिवी । दुःऽमतौ । धात् ॥ १५ ॥

बृहत्प्रभूतं वयोऽन्नं हे अग्ने बृहते तुभ्यं धियाजुरः कर्मणा जीर्णा मिथुनासो पत्नीभिः सहिताः सचंत । सेवंते । जायापती अग्निमादधीयातामित्यादिश्रुतेः । अधिकाराध्याये षष्ठे स्त्रिया अग्न्यधिकारः स च पत्या सहेति हि प्रतिपादितं । अवशिष्टं गतं ॥

॥ अथ षोडशी ॥

उरौ देवा अनिबाधे स्याम ॥ १६ ॥

उरौ । देवाः । अनिऽबाधे । स्याम ॥ १६ ॥

॥ अथ सप्तदशी ॥

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥ १७ ॥

सं । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती । गमेम ।
आ । नः । रयिं । वहतं । आ । उत । वीरान् । आ । विश्वानि । अमृता । सौभगानि ॥ १७ ॥

व्याख्याते द्वे ॥

॥ इति चतुर्थस्य द्वितीये द्वाविंशो वर्गः ॥

तं प्रत्नथेति पंचदशर्चं द्वादशं सूक्तं । अवत्सारो नाम ऋषिः स च काश्यपगोत्रः । यास्वृक्षु सदापृणबाहुवृक्तादयः श्रुतास्तासु तेऽपि समुच्चीयंते । चतुर्दशीपंचदश्यौ त्रिष्टुभौ शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः । विश्वे देवा देवता । अनुक्रांतं च । तं प्रत्नथा पंचोना काश्यपोऽवत्सारोऽन्ये च ऋषयोऽत्र दृष्टलिंगा द्वित्रिष्टुबंतमिति ॥ वाजपेयेऽतिरिक्तोक्थ्य आदितस्त्रयोदशर्चः शंसनीयाः । सूचितं च । तं प्रत्नथेति त्रयोदशानामेकां शिष्ट्वाहूय दूरोहणं रोहेत् । आ॰ ९. ९. । इति ॥

॥ तत्र प्रथमा ॥

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदं ।
प्रतीचीनं वृजनं दोहसे गिराशुं जयंतमनु यासु वर्धसे ॥ १ ॥

तं। प्रत्नऽथा। पूर्वऽथा। विश्वऽथा। इमऽथा। ज्येष्ठऽतातिं। बर्हिऽसदं। स्वःऽविदं। प्रतीचीनं। वृजनं। दोहसे। गिरा। आशुं। जयंतं। अनु। यासु। वर्धसे ॥१॥

इयमुत्तरा च द्वे ऐंद्राविल्याहुः। तत्रोपपत्तिमेवाहुः। तं प्रत्नथेत्येषा शुक्रामंथिग्रहणे विनियुक्ता। ऐंद्री च शुक्रामंथिनी। यदेंद्रं शंसति तेन शुक्रामंथिनावुक्थवंतौ। ऐ॰ ब्रा॰ ३.१.। इति हि ब्राह्मणं। अध्वर्युसंप्रैषोऽपि भवति। प्रातः प्रातः सवस्य शुक्रवतो मधुश्चुत इंद्राय सोमान्प्रस्थितान्प्रेष्य। शतप॰ ब्रा॰ ४.२.१.२३.। इति। प्रशास्तृप्रैषश्च भवति। होता यक्षदिंद्रं प्रातः प्रातः सावस्य। आ॰ ५.५.। इत्यादि। प्रस्थिता इंद्राय सोमा इति याज्या चैंद्री। इदं ते सोम्यं मधु। आ॰ ५.५.। इति। तस्मादैंद्र्यौ ॥ तमिंद्रं प्रत्नथा पुरातना यजमाना इव पूर्वथास्मदीयाः पूर्वे यथा विश्वथा विश्वे सर्वे प्राणिनो यथेमथेम इदानीं वर्तमाना यजमानाः। ते यथेंद्रस्य स्तुत्या फलमलभंत तद्वदयमपि हे अंतरात्मन् त्वमपि ज्येष्ठतातिं ज्येष्ठं बर्हिषदं बर्हिषि सीदंतं स्वर्विदं सर्वज्ञं सर्वस्य लंभयितारं वा प्रतीचीनं प्रत्यस्मदभिमुखमंचंतं वृजनं। बलनामैतद्बलवति वर्तते। बलवंतमाशुं शीघ्रगामिनं व्याप्तं वा जयंतं सर्वमभिभवंतमिंद्रं गिरा स्तुत्या साधनेन दोहसे। धुक्ष्व सर्वदा सर्वान् कामान्। इत्यंतरात्मनः प्रैषः। यासु स्तुतिषु वर्धसे प्रवृद्धो भवसि वर्धयसि वेंद्रं यया स्तुत्येति। यास्विति व्यत्ययेन बहुवचनं ॥

॥ अथ द्वितीया ॥

श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते।
सुगोपा असि न दभाय सुक्रतो परो मायाभिर्ऋत आस नाम ते ॥२॥

श्रिये। सुऽदृशीः। उपरस्य। याः। स्वः। विऽरोचमानः। ककुभां। अचोदते। सुऽगोपाः। असि। न। दभाय। सुक्रतो इति सुऽक्रतो। परः। मायाभिः। ऋते। आस। नाम। ते ॥२॥

हे इंद्र स्वः स्वर्गे विरोचमानस्त्वमचोदतेऽप्रेरयितुः ॥ षष्ठ्यर्थे चतुर्थी ॥ उपरस्य मेघस्य संबंधिन्यः सुदृशीः सुरोचमाना या आपः संति तासामपां ककुभां सर्वासां दिशां मध्ये श्रिये प्राणिनां श्रयणाय प्रेरको भवेति शेषः। हे सुक्रतो शोभनवृष्टिप्रदानादिकर्मेंद्र त्वं सुगोपाः प्राणिनां सुष्ठु गोपायितासि। अतो न दभाय

न दंभनाय वधाय प्राणिनां नासि। न प्रभवसि। त्वं च मायाभिरासुरीभिः परो मायाभ्यः परस्ताद्वर्तमानः। यस्मात्ते त्वदीयं नाम नामकं रूपमृते सत्यलोक आस आस्ते ॥

॥ अथ तृतीया ॥

अत्यं हविः सचते सच्च धातु चारिष्टगातुः स होता सहोभरिः।
प्रसर्स्राणो अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः ॥३॥

अत्यं। हविः। सचते। सत्। च। धातु। च। अरिष्टऽगातुः। सः। होता। सहःऽभरिः।
प्रऽसर्स्राणः। अनु। बर्हिः। वृषा। शिशुः। मध्ये। युवा। अजरः। विऽस्रुहा। हितः ॥३॥

इयमाग्नेयी होतृत्वयुवत्वादिलिंगैः। अयमग्निरत्यं सततमतनार्हं हविराज्यादिकं सचते। सेवते। कीदृशं हविः। सत्। सत्फलसाधनत्वाद्धविरपि सत्। धातु च धारकं सर्वस्य। हूयमानस्य हविष आदित्यद्वारा वृष्टिसाधनत्वात् तया च वृष्ट्या प्रजोत्पत्तेर्धारकत्वं। तथा हि। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति। अरिष्टगातुरहिंसितगमनः। सति तस्य गमने यज्ञनिष्पत्त्या फलसिद्धेरिष्टगमनत्वं। तदेवाह। स खलु होता होमनिष्पादकः सहोभरिर्बलस्य भर्ता बर्हिरनु प्रसर्स्राणः प्रकर्षेण सरन् वृषा वर्षकः फलस्य शिशुः स इव रक्षणीयोऽप्रौढो वा युवा सर्वत्र मिश्रयिताजरो जरारहितो विस्रुहा विस्रुहाणामोषधीनां मध्ये हितो निहितः स्थापितः। एवंभूतः सचते ॥

॥ अथ चतुर्थी ॥

प्र व एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः।
सुयंतुभिः सर्वशासैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति ॥४॥

प्र। वः। एते। सुऽयुजः। यामन्। इष्टये। नीचीः। अमुष्मै। यम्यः। ऋतऽवृधः।
सुयंतुऽभिः। सर्वऽशासैः। अभीशुऽभिः। क्रिविः। नामानि। प्रवणे। मुषायति ॥४॥

एषा सौरी वा। एते रश्मयः सुयुजः सुष्ठु परस्परं संयुक्ता यामन्यज्ञगमन इष्टय एषणाय नीचीः। नीचं गच्छंतीति शेषः। अमुष्मै यजमानाय यम्यो यम्या गमनार्हाः। अथवा यमो नियमितादित्यः। तस्य संबंधिनः। ऋतावृधो यज्ञस्य वर्धयितारश्च। अयमादित्यः सुयंतुभिः सुगमनैः सर्वशासैः सर्वस्य शासकैरभीशुभी

रश्मिभिः क्रिविः कर्ता नामानि नामकान्युदकानि प्रवणे निम्ने भूप्रदेशे मुषायति। मुष्णाति। आदत्त इत्यर्थः। अथवाग्निनावाश्वस्याग्नेरेत्तेऽश्वा इष्टये यज्ञगमनाय यामनि रथे सुयुजः प्रगच्छंति। शिष्टं समानं। क्रिविः क्रिविसहशोऽग्निः प्रवणे नामानि हवींषुक्तलक्षणाभिर्ज्वालाभिर्मुषायति। आदत्ते॥

॥ अथ पंचमी ॥

संजर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः।
धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे॥५॥
सम्ऽजर्भुराणः। तरुऽभिः। सुतेऽगृभं। वयाकिनं। चित्तऽगर्भासु। सुऽस्वरुः।
धारऽवाकेषु। ऋजुऽगाथ। शोभसे। वर्धस्व। पत्नीः। अभि। जीवः। अध्वरे॥५॥

हे ऋजुगाथ शोभनस्तुतिकाम्ये तरुभिस्तरुविकारैर्यूपैः सुतेगृभमभिषुतेन रसेन गृहीतं वयाकिनं। कुत्सिता वयाः शाखा वयाका लताः। तद्वंतं सोमं चित्तगर्भासु चित्तग्राहिणीषु स्तुतिषु स्तुतिभिः सह संजर्भुराणो गृभ्णन् गृह्णन् सुस्वरुः शोभनगमनः शोभनस्तुतिको वा त्वं धारवाकेषु। धारयंति वाकान् स्तोत्राणीति धारवाका ऋत्विग्यजमानाः। तेषु मध्ये शोभसे। किंचाध्वरे जीवः सर्वस्य जीवयिता पत्नीः पालयित्रीरोषधीर्ज्वाला वा अभि अभिमुखं वर्धस्व। अभिवर्धय॥

॥ इति चतुर्थस्य द्वितीये त्रयोविंशो वर्गः ॥

॥ अथ षष्ठी ॥

यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा।
महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः॥६॥
यादृक्। एव। ददृशे। तादृक्। उच्यते। सं। छायया। दधिरे। सिध्रया। अप्ऽसु। आ।
महीं। अस्मभ्यं। उरुऽसां। उरु। ज्रयः। बृहत्। सुऽवीरं। अनपऽच्युतं। सहः॥६॥

एषा वैश्वदेवी। यादृगेव ददृशे यादृग्रूपमेव दृश्यते तादृगुच्यते। तादृग्रूपमेवोच्यते। यथादृष्टमेव स्तूयते न तु परवचनप्रत्ययेन। यस्माच्छायया दीप्त्या सिध्रया साधिकया सहाप्सु व्यापकासु स्तुतिषु अप्स्वेव वासंदधिरे। सम्यग्धारयंति स्वीयं रूपं स्तुतिं वा। ते देवा महीं महतीं पूज्यामुरुषां बहुदात्रीं रयिमुरु

प्रभूतं जयो वेगं बृहन्महांतसुवीरं शोभनवीर्यमपत्यमनपच्युतमनुपक्षीणं सहो बलं चाभिभावुकमस्मभ्यं प्रयच्छंत्वित्यर्थः ॥

॥ अथ सप्तमी ॥

वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः ।
घ्रंसं रक्षंतं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः ॥७॥

वेति । अग्रुः । जनिऽवान् । वै । अति । स्पृधः । सऽमर्यता । मनसा । सूर्यः । कविः ।
घ्रंसं । रक्षंतं । परि । विश्वतः । गयं । अस्माकं । शर्म । वनवत् । स्वऽवसुः ॥७॥

इयं सौरी । सूर्यो देवोऽग्रुरग्रगामी जनिवान्वै जन्मवान् जायावान्वा । उषा ह्यस्य जाया । वा इति प्रसिद्धौ । कविः क्रांतदर्शी समर्यता समरमिच्छता मनसा स्पृधः संग्रामानतिवेति । अतिगच्छति मंदेहानसुरान्योद्धुं । घ्रंसं दीप्तं गयं गृहमंतरिक्षं वा विश्वतः सर्वतो रक्षंतं । परिचरेमेत्यर्थः । स देवोऽस्माकं शर्म सुखं परि सम्यग्वनवत् । दद्यात् । स्वावसुः स्वायत्तधनः सन् ॥

॥ अथाष्टमी ॥

ज्यायांसमस्य यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते ।
यादृश्मिन्धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत् ॥८॥

ज्यायांसं । अस्य । यतुनस्य । केतुना । ऋषिऽस्वरं । चरति । यासु । नाम । ते ।
यादृश्मिन् । धायि । तं । अपस्यया । विदत् । यः । ऊं इति । स्वयं । वहते । सः ।
अरं । करत् ॥८॥

इयमाग्नेयी सौरी वा । हे देव ज्यायांसमतिशयेन प्रवृद्धमस्य यतुनस्य ॥ यततिर्गतिकर्मा ॥ गंतुरस्य सूर्यस्य ॥ कर्मणि षष्ठ्यौ ॥ अमुं गंतारं केतुना प्रज्ञापकेन कर्मणोदयादिलक्षणेन विशिष्टमृषिस्वरमृषिभिः स्तुत्यं त्वां चरति । गच्छति । भजते यजमानः । केन साधनेन । यासु स्तुतिषु ते त्वदीयं नाम नमनं नामकं वा रूपं वर्तते ताभिरित्यर्थः । यद्वास्य यतुनस्य गमनशीलस्य तव केतुना तमोनिर्हरणादिकर्मणा विशिष्टं त्वां चरति । यादृश्मिन्यादृशे कामे धायि धत्ते ॥ कर्तरि चिण् ॥ सामर्थ्यान्मनो गम्यते । तं । यथानिर्देशं प्रतिनिर्दिष्टव्यत्वात्तादृशमित्यर्थो ज्ञातव्यः । तादृशं काममपस्यया कर्मणा हविःस्तुत्यादिलक्षणेन विदत् ।

विंदते। य उ य एव स्वयमनन्यप्रेरितः सन् स्वमनीषयैव वहते धारयति फलं सोऽरमलमत्यर्थं करत्। करोतीति शेषः। अथवा य उ य एव स्वयं वहते स्वयमेवानुतिष्ठति सोऽत्यर्थं कुर्यात्। न ह्यन्येन कारितं फलवद्भवति ॥

॥ अथ नवमी ॥

समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता।
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबंधनी ॥९॥

समुद्रं। आसां। अव। तस्थे। अग्रिमा। न। रिष्यति। सवनं। यस्मिन्। आऽयता।
अत्र। न। हार्दि। क्रवणस्य। रेजते। यत्र। मतिः। विद्यते। पूतऽबंधनी ॥९॥

इयमपि सौरी। आसां स्तुतीनां समुद्रं समुद्रवत्पर्यवसानभूतं सूर्यमग्रिमात्यंतं श्रेष्ठास्मदीया स्तुतिरवतस्थे। अवगच्छति। यद्वा आसां प्रजानामृत्विजां स्तुतिरिति संबंधः। सवनं। सूयते सोमोऽत्रेति सवनं यज्ञगृहं। न रिष्यति। न हिंस्यते। किंतु प्रवर्धत इत्यर्थः। यस्मिन्नायता विस्तीर्णानि स्तोत्राणि तत्सवनमिति। अत्रास्मिन्यजमानगृहे क्रवणस्य स्तुतिकर्तुर्हार्दि हृदयसंबंधि हृदयगतं काम्यं फलं न रेजते। न विचलति। न मृषा भवति। यत्र यस्मिन् स्तोतृगृहे मतिः पूतबंधनी पूतं सूर्यमनुबध्नंती विद्यते अत्र न रेजत इति ॥

॥ अथ दशमी ॥

स हि क्षयस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः।
अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यं ॥१०॥

सः। हि। क्षयस्य। मनसस्य। चित्तिऽभिः। एवऽवदस्य। यजतस्य। सध्रेः।
अवऽत्सारस्य। स्पृणवाम। रण्वऽभिः। शविष्ठं। वाजं। विदुषा। चित्। अर्ध्यं ॥१०॥

इयमपि सौरी। स हि स खलु सविता देवः सर्वैः स्तुत्यः। सर्वकामपूरक इत्यर्थः। हिशब्दो लोकवेदयोः प्रसिद्धिद्योतकः। तस्मात्सकाशात्। अत्रान्ये च ऋषयोऽत्र दृष्टलिंगा इत्युक्तत्वात् क्षयादय ऋषयः। क्षयस्य मनसस्यैवावदस्य यजतस्य सध्रेरवत्सारस्य चैषामृषीणामस्माकं रण्वभी रमणीयाभिश्चित्तिभिः स्पृणवाम। पूरयाम। किं। शविष्ठं वाजमतिशयेन बलवदन्नं। अन्नं वै वाज इति श्रुतेः। विदुषा चिद्विपश्चिताप्यर्ध्यं समर्धनीयं स्पृणवाम। क्षयादयो वयमिति संबंधः ॥

॥ इति चतुर्थस्य द्वितीये चतुर्विंशो वर्गः ॥

॥ अथैकादशी ॥

श्येन आसामदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य मायिनः ।
समन्यमन्यमर्थयंत्येतवे विदुर्विषाणं परिपानमंति ते ॥११॥

श्येनः । आसां । अदितिः । कक्ष्यः । मदः । विश्वऽवारस्य । यजतस्य । मायिनः ।
सं । अन्यंऽअन्यं । अर्थयंति । एतवे । विदुः । विऽसानं । परिऽपानं । अंति । ते ॥११॥

मदद्देवत्येयं । विश्ववारादीनां त्रयाणामृषीणां स्वभूत आसामपां सोमरसलक्षणानां मदः श्येनः शंसनीयगमनः शीघ्रं पातृसकाशं गंतादितिरदीनोऽतिसमृद्धः कक्ष्यः कक्ष्यपूरकश्च भवतीति शेषः । ते विश्ववारादयः सखे प्रवृत्ता एतवे सोमं प्राप्तुं तत्पानायान्यमन्यं परस्परं समर्थयंति । याचंतेऽनुज्ञां । ते विषाणं विशेषेण मदस्य दातारं परिपानमंत्यंतिके विदुः । जानंति लभंते वा ॥

॥ अथ द्वादशी ॥

सदापृणो यजतो वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तर्यो वः सचा ।
उभा स वरा प्रत्येति भाति च यदीं गणं भजते सुप्रयावभिः ॥१२॥

सदाऽपृणः । यजतः । वि । द्विषः । वधीत् । बाहुऽवृक्तः । श्रुतऽवित् । तर्यः । वः । सचा ।
उभा । सः । वरा । प्रति । एति । भाति । च । यत् । ईं । गणं । भजते । सुप्रयावऽभिः ॥१२॥

सदापृणः सर्वदा दानशील एतन्नामा यजतो यष्टा च बाहुवृक्तो बाहुभ्यां वृक्तदर्भश्च श्रुतवित् श्रुतस्य वेत्ता च तर्यश्च । एतेषां पंचानां परस्परापेक्षया प्रत्येकमेकवचनं । स स ऋषिर्वि द्विष शत्रून्वधीत् हिंस्यात् वो युष्माकं सचा सहितः । युष्माभिः सहित इत्यर्थः । स ऋषिर्वरा श्रेष्ठावुभोभाविहलोकपरलोकविषयौ कामौ प्रत्येति । अभिगच्छति । भाति च । यद्यस्मादीमेनं गणं देवसंघं सुप्रयावभिः सुष्ठु प्रकर्षेण मिश्रयद्भिः स्तोत्रैर्भजते तस्मादेवं भातीति ॥

॥ अथ त्रयोदशी ॥

सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदंचनः ।
भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन् ॥१३॥

सुतंऽभरः । यजमानस्य । सत्ऽपतिः । विश्वासां । ऊधः । सः । धियां । उत्ऽअंचनः ।
भरत् । धेनुः । रसऽवत् । शिश्रिये । पयः । अनुऽब्रुवाणः । अधि । एति । न । स्वपन् ॥१३॥

यजमानस्यावत्सारस्य मम सुतंभरो यागनिर्वाहक एतन्नामा ऋषिः सत्पतिः सतां विद्यमानानां फलानां पालयिता होता भवतीत्यर्थः । स च विश्वासां धियां सर्वेषां कर्मणामूध उद्धततरं फलमुदंचन ऊर्ध्वमुन्नमयिता । फलप्रापक इत्यर्थः । धेनुर्गौ रसवत्सारवत्पयो भरत् । अहरत् । तत्र पयः शिश्रिये । श्रयति चास्य सामर्थ्यात् । तत्सर्वमनुब्रुवाणोऽनुक्रमेण संकीर्तयन् न स्वपन् स्वापमकुर्वन् अनवरतमध्येति । स्मरत्यवत्सारः । सुतंभरस्तादृश इति ॥

॥ अथ चतुर्दशी ॥

यो जागार तमृचः कामयंते यो जागार तमु सामानि यंति ।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥ १४ ॥

यः । जागार । तं । ऋचः । कामयंते । यः । जागार । तं । ऊं इति । सामानि । यंति ।
यः । जागार । तं । अयं । सोमः । आह । तव । अहं । अस्मि । सख्ये । निऽओकाः ॥ १४ ॥

यो देवो जागार सर्वदा विनिद्रो जागरूको गृहे वर्तते तमृचः सर्वशास्त्रात्मिकाः कामयंते । यश्च जागार तमु तमेव सामानि स्तोत्ररूपाणि यंति । प्राप्नुवंति । यो जागार तमयमभिषुतः सोम आह वक्ति मां स्वीकुर्विति । हे अग्ने तादृशस्य तव सख्ये समानख्याने हितकरणे न्योका नियतस्थानोऽहमस्मि । भवामि ॥

॥ अथ पंचदशी ॥

अग्निर्जागार तमृचः कामयंतेऽग्निर्जागार तमु सामानि यंति ।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥ १५ ॥

अग्निः । जागार । तं । ऋचः । कामयंते । अग्निः । जागार । तं । ऊं इति । सामानि । यंति ।
अग्निः । जागार । तं । अयं । सोमः । आह । तव । अहं । अस्मि । सख्ये । निऽओकाः ॥ १५ ॥

पूर्ववैव निगदितव्याख्या । य इत्यस्य स्थानेऽग्निरिति विशेषः ॥

॥ इति चतुर्थस्य द्वितीये पंचविंशो वर्गः ॥

॥ इति पंचमे मंडले तृतीयोऽनुवाकः ॥

अथ चतुर्थेऽनुवाके द्वादश सूक्तानि । तत्र विदा दिव इत्येकादशर्चं प्रथमं सूक्तं । सदापृणो नामाधेय ऋषिः । त्रिष्टुप् छंदः । वै तदित्युक्तत्वादिदमपि वैश्वदेवं । विदा एकादश सदापृण इत्यनुक्रमणिका । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः ।
अपावृत व्रजिनीरुत्स्वर्गाद्वि दुरो मानुषीर्देव आवः ॥१॥

विदाः । दिवः । विऽस्यन् । अद्रिं । उक्थैः । आऽयत्याः । उषसः । अर्चिनः । गुः ।
अप । अवृत । व्रजिनीः । उत् । स्वः । गात् । वि । दुरः । मानुषीः । देवः । आवरित्यावः ॥१॥

अत्रेंद्रादयो लिंगोक्तदेवताः । अत्रांगिरसां पणिभिरपहृत्य गिरेरधः स्थापितानां गवामिंद्रेण विमोकः प्रतिपाद्यते । विदाः । अवेदयदिंद्रः । किं । गा निगूढा इति संबंधः । किं कुर्वन् । उक्थैरंगिरसां स्तुतिभिर्निमित्तभूताभिरद्रिं वज्रं विष्यन् प्रक्षिपन् । रक्षकाणामुपरि गिरिभेदनाय च विष्यन् । आयत्या आगामिन्या उषसः संबंधिनोऽर्चिनो रश्मयो गुः । अगच्छन् । सर्वत्र प्रसृता अभवन् । अपावृत अपावृणोद्व्रजिनीस्तमःपुंजवतीर्निशाः । स्वः स्वरणशील आदित्य उद्गात् । उदगात् । तथा कृत्वा मानुषीर्मनुष्यसंबंधिनीर्दुरो द्वाराणि देवः सूर्यो व्यावः । व्यवृणोत् । अंधकारापनयनेन मनुष्यादिव्यवहारायाकरोदित्यर्थः ॥

॥ अथ द्वितीया ॥

वि सूर्यो अमतिं न श्रियं सादोर्वाद्गवां माता जानती गात् ।
धन्वर्णसो नद्य१ः खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः ॥२॥

वि । सूर्यः । अमतिं । न । श्रियं । सात् । आ । ऊर्वात् । गवां । माता । जानती । गात् ।
धन्वऽअर्णसः । नद्यः । खादःऽअर्णाः । स्थूणाऽइव । सुऽमिता । दृंहत । द्यौः ॥२॥

सूर्यो देवः श्रियं दीप्तिं विसात् । विभजते । प्रकाशयतीत्यर्थः । अमतिं न । रूपनामैतत् । रूपमिव द्रव्यं । यथा द्रव्याणि घटपटादीनि नीलपीतादिरूपं लभंते तद्वत् । तथा गवां रश्मीनां मातोषा जानती सूर्य उदेष्यति मया च व्युच्छनं कर्तव्यमिति जानत्यूर्वान्महतोऽंतरिक्षादागात् । आगच्छति । तथा नद्यश्च धन्वर्णसः ॥ धन्वतिर्गतिकर्मा । धन्वंति गच्छंत्यर्णांसि यासु तास्तथोक्ताः । दीर्घाभावश्छांदसः ॥ खादोअर्णा भक्षितकूलोदकाः । कूलंकषा इत्यर्थः । नद्यश्चैवंरूपा भवंति । किंच द्यौश्च सुमिता सुष्ठु गृहे स्थापिता स्थूणेव गृहाधारस्तंभ इव दृंहत । दृढाभवत् । एतत्सर्वं सूर्यस्याज्ञयेति भावः ॥

॥ अथ तृतीया ॥

अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ।
वि पर्वतो जिहीत साधत द्यौराविवासंतो दसयंत भूम ॥३॥
अस्मै । उक्थाय । पर्वतस्य । गर्भः । महीनां । जनुषे । पूर्व्याय ।
वि । पर्वतः । जिहीत । साधत । द्यौः । आऽविवासंतः । दसयंत । भूम ॥३॥

अस्मै मह्यमुक्थाय स्तोत्रे पर्वतस्य पर्ववतो मेघस्य गर्भो गर्भस्थानीयमुदकं जिहीत । चलति । चालयति वेंद्रः । कीदृशायास्मै । महीनां महतीनां स्तुतीनां जनुष उत्पादयित्रे पूर्व्याय प्रत्नाय । तदेव पुनरुच्यते । पर्वतो मेघो विजिहीत । द्यौश्च साधत । साधयति वृष्टिं । आविवासंतः सर्वतः परिचरंतोऽगिरसो भूमात्यधिकं दसयंत । उपक्षपयंत्यात्मानं कर्मभिः ॥

॥ अथ चतुर्थी ॥

सूक्तेभिर्वो वचोभिर्देवजुष्टैरिंद्रा न्व१ग्नी अवसे हुवध्यै ।
उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासंतो मरुतो यजंति ॥४॥
सुऽउक्तेभिः । वः । वचःऽभिः । देवऽजुष्टैः । इंद्रा । नु । अग्नी इति । अवसे । हुवध्यै ।
उक्थेभिः । हि । स्म । कवयः । सुऽयज्ञाः । आऽविवासंतः । मरुतः । यजंति ॥४॥

हे इंद्रा हे अग्नी ॥ परस्परापेक्षया प्रत्येकं द्विवचनं । यद्यप्येकमेव पदं मध्ये व्यवधानं छांदसं ॥ हे इंद्राग्नी वो युवां ॥ व्यत्ययेन बहुवचनं ॥ देवजुष्टैर्देवैः सेवनीयैः सूक्तेभिः सूक्तैः सुवचनैः शोभनगुणप्रकाशनप्रवणैर्वचोभिरवसेऽस्मद्रक्षणाय हुवध्यै । आह्वयामि । नु क्षिप्रं युवामुक्थेभिः स्तोत्रैः कवयोऽनूचानाः पूर्वं ऋषयः सुयज्ञाः शोभनयागा आविवासंतः स्तुत्यादिना परिचरंतो मरुतो मरुत्सदृशाः कर्मसु शीघ्रा यजंति । पूजयंति ॥ हि स्मेति पूरणौ ॥

॥ अथ पंचमी ॥

एतो न्व१द्य सुध्यो३भवाम प्र दुच्छुना मिनवामा वरीयः ।
आरे द्वेषांसि सनुतर्दधामायाम प्रांचो यजमानमच्छ ॥५॥
एतो इति । नु । अद्य । सुऽध्यः । भवाम । प्र । दुच्छुनाः । मिनवाम । वरीयः ।
आरे । द्वेषांसि । सनुतः । दधाम । अयाम । प्रांचः । यजमानं । अच्छ ॥५॥

अयमंगिरसां वादः। अद्यास्मिन्यागदिने नु क्षिप्रमेत। गच्छत। सुध्यः शोभनकर्माणो भवाम। दुच्छुना द्विषः प्र मिनवाम। प्रकर्षेण हिंसाम वरीयः। अत्यंतमित्यर्थः। तदेवोच्यते। सनुतः संभक्षणे द्वेषांसि यजमानस्य द्वेष्टृनारे दूरे दधाम। स्थापयाम। यद्वा सनुतरित्यंतर्हितनाम। पूर्वं प्रकाशवैरिणां वध उक्त इदानीं प्रच्छन्नानामिति विवेकः। तदर्थं यजमानं प्रांचः सदापृणमवत्सारं चाच्छाभिमुखमयाम। गच्छाम॥

॥ इति चतुर्थस्य द्वितीये षड्विंशो वर्गः॥

॥ अथ षष्ठी॥

एता धियं कृणवाम सखायोऽप या माताँ ऋणुत व्रजं गोः।
यया मनुर्विशिशिप्रं जिगाय यया वणिग्वंकुरापा पुरीषं॥६॥

आ। इत। धियं। कृणवाम। सखायः। अप। या। माता। ऋणुत। व्रजं। गोः।
यया। मनुः। विशिऽशिप्रं। जिगाय। यया। वणिक्। वंकुः। आप। पुरीषं॥६॥

इदमप्यंगिरसां वाक्यं। एत। आगच्छत। आगत्य च धियं स्तुतिं कृणवाम। करवाम। हे सखायः परस्परं सखिभूता अंगिरस इत्यंगिरसां वचनं। या धीर्माता गवां निर्मात्री गोर्गवां व्रजं पणिभिरपहृतमप ऋणुत अपावृणोत्। यया च मनुर्विशिशिप्रं विगतहनुं शत्रुं जिगाय जितवान्। यद्वा मनुः सर्वस्य मंतेंद्रो विशिशिप्रो वृत्रः। स तमस्माभिः कृतया स्तोमलक्षणया धिया जिगाय। यया च वणिक् वणिगिवाल्पेन कर्मणा बहुफलाकांक्षी कक्षीवान् वंकुर्जलेच्छया वनगामी पुरीषं पूरकमुदकमाप। याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशः। ऋग्वे० १.११२.११.। इति हि श्रुतं॥

॥ अथ सप्तमी॥

अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश मासो नवग्वाः।
ऋतं यती सरमा गा अविंदद्विश्वानि सत्यांगिराश्चकार॥७॥

अनूनोत्। अत्र। हस्तऽयतः। अद्रिः। आर्चन्। येन। दश। मासः। नवऽग्वाः।
ऋतं। यती। सरमा। गाः। अविंदत्। विश्वानि। सत्या। अंगिराः। चकार॥७॥

अत्रास्मिन्यज्ञेऽद्रिरभिषवग्रावा हस्तयतो हस्तेन संहतः सन् अनूनोत्। नौति-

रवशब्दमात्रे वर्तते। अशब्दयत्। येन ग्राव्णा तदभिषवेण दश मासो मासान् दशमासपर्यंतं नवग्वाः। नवमासपर्यंतं गवार्थमनुतिष्ठंतोऽंगिरसो नवग्वाः। नवगोयुक्ता वार्चन् अपूजयन्निंद्रं। यद्वा दशसंख्याकमासोपेता दशमासानुष्ठाना अंगिरसोऽपरे नवग्वाश्चैते सर्वेऽपि येनार्चेति। नवग्वासः सुतसोमास इंद्रं। ऋग्वे० ५.२९.१२.। इति हि निगमः। ऋतं सत्यं यज्ञं वा यती प्राप्नुवती सरमा सरणशीला स्तुतिरूपा वागंगिरसां गवार्थमिंद्रेण प्रहिता देवशुनी वा गा अविंदत् पणिभिरपहृताः। विश्वानि सर्वाणि स्तुत्यादिलक्षणानि सत्या सत्यानि चकारांगिराः॥

॥ अथाष्टमी ॥

विश्वे॑ अ॒स्या व्यु॑षि॒ माहि॑नायाः॒ सं यद्गोभि॒रंगि॑रसो॒ नवं॑त।

उत्सं॑ आसां पर॒मे स॒धस्थे॑ ऋ॒तस्य॑ प॒था स॒रमा॑ विद॒द्गाः॥८॥

विश्वे॑। अ॒स्याः। वि॒ऽउ॑षि। माहि॑नायाः। सं। यत्। गोभिः॑। अंगि॑रसः। नवं॑त।

उत्सः॑। आ॒सां। प॒र॒मे। स॒धऽस्थे॑। ऋ॒तस्य॑। प॒था। स॒रमा॑। वि॒द॒त्। गाः॥८॥

विश्वे सर्वेऽंगिरसो माहिनाया मंहनीयाया अस्या उषसो व्युषि व्युच्छने सति गवामावरकेऽंधकारेऽपवृत्ते सति यद्यदा गोभिः संनवंत संजग्मिरे तदासां गवामुत्सः क्षीराद्युत्स्रावः परम उत्कृष्टे सधस्थे सहस्थाने यज्ञ उपयुक्तोऽभवदित्यर्थः। ऋतस्य सत्यस्य पथा मार्गेण सरमा वाक् देवशुनी वा गा निगूढ विदत्। अलभत्। यद्वासां गवां परमे सधस्थे सहस्थाने व्रजस्य निगूढनप्रदेश उत्स उदकस्य प्रस्रवणो वर्तते। बिलमित्यर्थः। तेन ऋतस्योदकस्य पथा मार्गेण सरमा गा विदत्॥

॥ अथ नवमी ॥

आ सूर्यो॑ यातु स॒प्ताश्वः॒ क्षेत्रं॒ यद॑स्योर्वि॒या दी॑र्घया॒थे।

र॒घुः श्ये॒नः प॑तयदंधो॒ अच्छा॒ युवा॑ क॒विर्दी॑दय॒द्गोषु॒ गच्छ॑न्॥९॥

आ। सूर्यः॑। या॒तु। स॒प्तऽअ॑श्वः। क्षेत्रं॑। यत्। अ॒स्य॒। उ॒र्वि॒या। दी॒र्घ॒ऽया॒थे।

र॒घुः। श्ये॒नः। प॒त॒यत्। अंधः॑। अच्छ॑। युवा॑। क॒विः। दी॒द॒यत्। गोषु॑। गच्छ॑न्॥९॥

सूर्यः सर्वस्य प्रेरको देवः सप्ताश्वः सर्पणस्वभावाश्वोपेतः सप्तसंख्याकाश्वो वा आयातु। अस्मदभिमुखमागच्छतु। यद्यस्मादस्य सूर्यस्य दीर्घयाथे दीर्घगमने क्षेत्रं

गंतव्यप्रदेश उर्वियोरु अतिप्रभूतायामः। स एव देवो रघुर्लघुगमनः स श्येनः शंसनीयगमनोऽधो दीयमानं हविरच्छाभिलक्ष्य पतयत्। आगच्छति। युवा सर्वत्र मिश्रयिता कविः क्रांतदर्शी सन् गोषु रश्मिषु गच्छन्मध्ये वर्तयन् दीदयत्। दीप्यते। यद्वा श्येनः सुपर्णोऽधोऽच्छ पतयत्। द्युलोकस्थं सोमलक्षणं देवानामन्नमस्मद्यागार्थमानेतुं तदभिमुखमगात्। युवेत्यादि शिष्टं समानं॥

॥ अथ दशमी ॥

आ सूर्यो॑ अरुहच्छु॒क्रमर्णोऽयु॑क्त यद्ध॒रितो॑ वी॒तपृ॑ष्ठाः।

उ॒द्ना न ना॒वम॑नयंत॒ धीरा॑ आशृ॒ण्वती॒रापो॑ अ॒र्वाग॑तिष्ठन्॥१०॥

आ। सूर्यः॑। अ॒रु॒ह॒त्। शु॒क्रं। अर्णः॑। अयु॑क्त। यत्। ह॒रितः॑। वी॒त॒ऽपृ॑ष्ठाः।

उ॒द्ना। न। नाव॑। अ॒न॒यं॒त॒। धीराः॑। आ॒ऽशृ॒ण्वतीः॑। आपः॑। अ॒र्वाक्। अ॒ति॒ष्ठ॒न्॥१०॥

सूर्यो देवः शुक्रं दीप्तमर्ण उदकं प्रत्यारुहत्। सर्वतः प्रादुर्भवति। यद्यस्माद्यदा वा हरितोऽश्वान्वीतपृष्ठाः कांतपृष्ठानयुक्त रथेऽयोजयत् तदा तं सूर्यं धीरा धीमंतो यजमानादय उद्नोदकेन नावं न नावमिवानयंत। तदाशृण्वतीः सर्वतोऽनुज्ञां कुर्वाणा आपोऽर्वागवाङ्मुखा अतिष्ठन्। अभवन्॥

॥ अथैकादशी ॥

धियं॑ वो अ॒प्सु द॑धिषे स्व॒र्षां य॒याते॑र॒न्दश॑ मा॒सो नव॑ग्वाः।

अ॒या धि॒या स्या॑म दे॒वगो॑पा अ॒या धि॒या तु॑तु॒र्यामात्यंहः॑॥११॥

धियं॑। वः॒। अ॒प्ऽसु। द॒धि॒षे॒। स्वः॒ऽसां। यया॑। अ॒तर॑न्। दश॑। मासः॑। नव॑ऽग्वाः।

अ॒या। धि॒या। स्या॒म॒। दे॒वऽगो॑पाः। अ॒या। धि॒या। तु॒तु॒र्या॒म॒। अति॑। अंहः॑॥११॥

हे देवा वो युष्माकं धियं स्तुतिमप्स्वप्निमित्तां स्वर्षां सर्वस्य दात्रीं दधिषे। धारयामि॥ व्यत्ययेन मध्यमः॥ यया धिया कर्मणा नवग्वा अंगिरसो दश मासोऽतरन् समनुतिष्ठंत अयानया धिया देवगोपा देवैर्गुप्ताः स्याम। भवेम। अया धियांहः पापमतितुतुर्याम। अतितरेम॥

॥ इति चतुर्थस्य द्वितीये सप्तविंशो वर्गः॥

हयो नेत्यष्टर्चं द्वितीयं सूक्तं प्रतिक्षत्रस्यार्षं। अष्टमी द्वितीया च त्रिष्टुभौ शिष्टाः षट् जगत्यः। आदितः षड्विश्वदेव्यः सप्तम्यष्टम्योर्देवपत्न्यो देवता। तथा

चानुक्रांतं । हयोऽष्टौ प्रतिक्षत्रोऽंत्यो द्वृचो देवपत्नीस्तवोऽंत्या त्रिष्टुप् द्वितीया चेति ॥ सूक्तविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवं ।

नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति ॥१॥

हयः । न । विद्वान् । अयुजि । स्वयं । धुरि । तां । वहामि । प्रऽतरणीं । अवस्युवं ।

न । अस्याः । वश्मि । विऽमुचं । न । आऽवृतं । पुनः । विद्वान् । पथः । पुरःऽएता ।

ऋजु । नेषति ॥१॥

हयो न अश्व इव विद्वान् सर्वज्ञः प्रतिक्षत्रः स्वयमनन्यप्रेरितः सन् धुरि यज्ञात्मिकायामयुजि । युक्तोऽभवत् । तां धुरं प्रतरणीं प्रकर्षेण तारयित्रीमवस्युवं रक्षयित्रीं वहामि । धारयाम्यहमध्वर्युर्होता वा । अस्या धुरो विमुचं विमोचनं परित्यागं न वश्मि । न कामये । नावृतं पुनः पुनरावरणं धारणमपि न च वश्मि । मम को भार इति तदेवोच्यते । विद्वान्मार्गाभिज्ञोऽंतर्यामी देवः पुरएता पुरतो गंता सन् पथो यज्ञमार्गानृज्वकुटिलं नेषति । प्रापयति ॥

॥ अथ द्वितीया ॥

अग्न इंद्र वरुण मित्र देवाः शर्धः प्र यंत मारुतोत विष्णो ।

उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषंत ॥२॥

अग्ने । इंद्र । वरुण । मित्र । देवाः । शर्धः । प्र । यंत । मारुत । उत । विष्णो इति ।

उभा । नासत्या । रुद्रः । अध । ग्नाः । पूषा । भगः । सरस्वती । जुषंत ॥२॥

हे अग्न इंद्र वरुण मित्र देवा यूयं शर्धो बलमस्माकं प्रयंत । प्रापयत ॥ अत्र सर्वत्र पूर्वस्याविद्यमानत्वेनोत्तरस्य पादादित्वादनिघातः । प्रथमस्य तु स्वत एव पादादित्वं ॥ उतापि च हे मारुत मारुतानि मरुतां बलानि हे विष्णो यूयं शर्धः प्रयंत ॥ विष्णोरित्यस्योतेत्यनेन व्यवधानान्निघातः ॥ किंचोभोभौ नासत्या सत्यभूतौ रुद्रोऽध अथ ग्ना एतेषां देवानां स्त्रियश्च पूषा भगः सरस्वती च जुषंत । सेवंतामस्मदीयं यज्ञं स्तुतिं वा ॥

॥ अथ तृतीया ॥

इंद्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वताँ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ॥३॥

इंद्राग्नी इति । मित्रावरुणा । अदितिं । स्व१रिति स्वः । पृथिवीं । द्यां । मरुतः । पर्वतान् । अपः ।
हुवे । विष्णुं । पूषणं । ब्रह्मणः । पतिं । भगं । नु । शंसं । सवितारं । ऊतये ॥३॥

इंद्रादिसवित्रंतान् चतुर्दश देवानूतयेऽस्मद्रक्षणाय हुवे । आह्वयामि स्तौमि वा ॥ स्वरित्यादित्य उच्यते स्वरणात् ॥

॥ अथ चतुर्थी ॥

उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत् ।
उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु मंसते ॥४॥

उत । नः । विष्णुः । उत । वातः । अस्रिधः । द्रविणःऽदाः । उत । सोमः । मयः । करत् ।
उत । ऋभवः । उत । राये । नः । अश्विना । उत । त्वष्टा । उत । विऽभ्वा । अनु । मंसते ॥४॥

उतापि च नोऽस्माकं विष्णुर्व्यापको देवो मयस्करत् । मय इति सुखनाम । सुखं करोतु । उतापि च वातो वायुरस्रिधोऽहिंसकः सन् मयस्करत् । किंच द्रविणोदा धनस्य दाता सोमोऽपि मयस्करत् । उतापि च ऋभवो नोऽस्मभ्यं राये धनायानुमंसते । अनुमन्यंतां । उताश्विनाश्विनौ च उत त्वष्टा देव उत विभ्वा ऋभूणामन्यतमो देवः । एते सर्वेऽप्यनुमंसते । यद्वा अनुमंस्त इति प्रत्येकं संबंधनीयं ॥

॥ अथ पंचमी ॥

उत त्यन्नो मारुतं शर्ध आ गमद्दिविक्षयं यजतं बर्हिरासदे ।
बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं१ वरुणो मित्रो अर्यमा ॥५॥

उत । त्यत् । नः । मारुतं । शर्धः । आ । गमत् । दिविऽक्षयं । यजतं । बर्हिः । आऽसदे ।
बृहस्पतिः । शर्म । पूषा । उत । नः । यमत् । वरूथ्यं । वरुणः । मित्रः । अर्यमा ॥५॥

उतापि च त्यत्तन्मारुतं शर्धो मरुतां बलं संघो नोऽस्मानागमत् । आगच्छतु ।

कीदृशं तच्छर्धः । दिविक्षयं द्युलोके वर्तमानं यजतं पूज्यं । किमर्थमागमनमिति तदुच्यते । बर्हिर्बर्हिष्यासद उपवेष्टुं । उपविश्य हविःस्वीकारायेत्यर्थः । किंच बृहस्पतिर्देवः शर्म सुखं यमत् । यच्छतु । उत नोऽस्मभ्यं पूषापि यमत् । कीदृशं शर्म । वरूथ्यं । वारयति शीतवातादिकमिति वरूथं गृहं । तदर्हं वरूथ्यं । किंच वरुणादयस्त्रयोऽपि प्रत्येकं शर्म यच्छंतु ॥

॥ अथ षष्ठी ॥

उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्य१स्त्रामणे भुवन् ।
भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु मे हवं ॥ ६ ॥
उत । त्ये । नः । पर्वतासः । सुऽशस्तयः । सुऽदीतयः । नद्यः । त्रामणे । भुवन् ।
भगः । विऽभक्ता । शवसा । अवसा । आ । गमत् । उरुऽव्यचाः । अदितिः । श्रोतु ।
मे । हवं ॥ ६ ॥

उतापि च त्ये ते पर्वतासः पर्ववंतोऽद्रयः सुशस्तयः शोभनस्तुतयः किंच सुदीतयः सुदाना नद्यश्च त्रामणे पालनेऽस्माकं भुवन् । भवंतु । भगो देवो विभक्ता धनानां विभागकर्ता दाता सन् शवसान्नेनावसा रक्षणेन च सहागमत् । आगच्छतु । उरुव्यचाः प्रभूतव्याप्तिरदितिरदीना देवमाता मे हवं स्तुतिमाह्वानं वा श्रोतु । शृणोतु ॥

पत्नीसंयाजेषु देवपत्नीनां देवानां पत्नीरित्यादिके द्वे याज्यानुवाक्ये । सूचितं च । देवानां पत्नीरुशतीरवंतु न इति द्वे । आ॰ १.१०. । इति ॥ आग्निमारुतशस्त्रेऽप्येते देवानां पत्नीरुशतीरवंतु न इति द्वे राकामहमिति द्वे । आ॰ ५.२०. । इति ॥

॥ तयोर्मध्ये प्रथमा सूक्ते सप्तमी ॥

देवानां पत्नीरुशतीरवंतु नः प्रावंतु नस्तुजये वाजसातये ।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ॥ ७ ॥
देवानां । पत्नीः । उशतीः । अवंतु । नः । प्र । अवंतु । नः । तुजये । वाजऽसातये ।
याः । पार्थिवासः । याः । अपां । अपि । व्रते । ताः । नः । देवीः । सुऽहवाः ।
शर्म । यच्छत ॥ ७ ॥

देवानामिंद्रादीनां पत्नीः पत्न्य उशतीरुशत्योऽस्मदीयां स्तुतिं कर्म वा काम-

यमाना नोऽस्मानवंतु । रक्षंतु । तथा नोऽस्माकं तुजये बलवते पुत्राय वाजसातयेऽन्नलाभाय संग्रामाय वा प्रावंतु । प्रकर्षेण रक्षंतु गच्छंतु वा । याः पार्थिवासः पृथिवीसंबंधिन्यो याश्चापामुदकानां व्रते कर्मण्यंतरिक्षे वर्तंते ता हे देवीर्देव्यो हे सुहवाः शोभनाह्वाना यूयं नोऽस्मभ्यं शर्म यच्छत ॥

॥ अथाष्टमी ॥

उत ग्ना व्यंतु देवपत्नीरिंद्राण्य१ग्नाय्यश्विनी राट् ।
आ रोदसी वरुणानी शृणोतु व्यंतु देवीर्य ऋतुर्जनीनां ॥८॥

उत । ग्नाः । व्यंतु । देवऽपत्नीः । इंद्राणी । अग्नायी । अश्विनी । राट् ।
आ । रोदसी इति । वरुणानी । शृणोतु । व्यंतु । देवीः । यः । ऋतुः । जनीनां ॥८॥

उतापि च ग्नाः स्त्रियो देवपत्नीर्देवपत्न्यो देवाः पतयो यासां ताः । तादृश्यो व्यंतु । हविर्भक्षयंतु । ता विविच्योच्यंते । इंद्राणींद्रस्य पत्न्यग्नाय्यग्नेः पत्न्यश्विन्यश्विनोः पत्नी राट् राजमाना । किंच रोदसी । रुद्रस्य पत्नीति यास्केनोक्तं । एवं सति विषितस्तुका रोदसी । ऋग्वे॰ १.१६७.५. । इत्यत्र यथाद्युदात्तप्रगृह्यते न स्तस्तद्वदत्रापि भाव्यं । तथापि शाकल्येन महर्षिणैवमुक्तत्वात्तथैव द्रष्टव्यं । वरुणानी वरुणस्य पत्न्या सर्वतः प्रत्येकं शृणोतु । किंच देवीः पत्नीसंयाजदेव्यो व्यंतु । खादंतु हविः । यो जनीनां देवजायानामृतुः कालस्तदभिमाना देव्योऽपि शृण्वंतु व्यंतु च । अत्रापि च ग्ना व्यंतु देवपत्न्यः । नि॰ १२.४६. । इत्यादि निरुक्तं द्रष्टव्यं ॥

॥ इति चतुर्थस्य द्वितीयेऽष्टाविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणामात्येन विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके द्वितीयोऽध्यायः समाप्तः ॥

॥ श्रीभारत्यै नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ तृतीयोऽध्याय आरभ्यते । तत्र प्रयुंजतीति सप्तर्चं तृतीयं सूक्तं प्रतिरथस्यार्षं त्रैष्टुभं । पूर्वत्र वैश्वदेवं वै तदित्युक्तत्वादिदमपि वैश्वदेवं । प्रयुंजती सप्त प्रतिरथ इत्यनुक्रमणिका ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्रयुंजती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयंती ।
आविवासंती युवतिर्मनीषा पितृभ्य आ सदने जोहुवाना ॥१॥

प्रऽयुंजती । दिवः । एति । ब्रुवाणा । मही । माता । दुहितुः । बोधयंती ।
आऽविवासंती । युवतिः । मनीषा । पितृऽभ्यः । आ । सदने । जोहुवाना ॥१॥

एषोषस्या । प्रयुंजती प्राणिनः प्रस्तुतेषु कर्मसु दिवो द्युलोकादेति । आगच्छति ब्रुवाणा स्तूयमाना ॥ कर्मणि कर्तृप्रत्ययः ॥ मही महती माता प्रकाशस्य देवानां वा निर्मात्री दुहितुर्भूम्या बोधयंती बोधं कुर्वाणा । तदुपजीव्यत्वात् दुहितृत्वमुपचर्यते । यद्वा दुहितुर्दिव इति संबंधः ॥ उषसो दिवो दुहितृत्वं व्युच्छा दुहितर्दिव इत्यादिषु प्रसिद्धं । अन्यत्र च दिवो दुहिता भुवनस्य पत्नी । ऋग्वे० ७. ७५. ४. । इत्युषसो द्युदुहितृत्वमाम्नातं । अत इदमधिगम्यते । कदाचिद्द्यौरुषसो जायत उषाश्च दिव इति । प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषसमित्यन्ये । ऐ० ब्रा० ३. ३३. । इति हि श्रूयते । लिंगं च दृश्यते कार्यकारणभावव्यत्ययेऽदितेर्दक्षोऽजायत दक्षाद्वदितिरिति ॥ किंच आविवासंती परिचरंती युवतिर्मिश्रयंती सर्वत्र नित्यतरुणी वा मनीषा स्तुतिमती पितृभ्यः ॥ तृतीयार्थे पंचमी ॥ पितृभिः पालकैर्देवैः सह सदने यागगृह आ सर्वतो जोहुवानाहूयमाना । यद्वा पितृभ्यः कर्मणां पालकेभ्यो यजमानेभ्य इष्टप्रापणेन पालकेभ्यो वा तेषामर्थाय जोहुवाना ॥

॥ अथ द्वितीया ॥

अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिं ।
अनंतास उरवो विश्वतः सीं परि द्यावापृथिवी यंति पंथाः ॥२॥

अजिरासः । तत्ऽअपः । ईयमानाः । आतस्थिऽवांसः । अमृतस्य । नाभिं ।
अनंतासः । उरवः । विश्वतः । सीं । परि । द्यावापृथिवी इति । यंति । पंथाः ॥२॥

अजिरासो गमनशीलाः ॥ अजिरिरच्प्रत्ययांतोऽजिरशिशिरेत्यादिना निपातितः ॥ तदपस्तदेव प्रकाशनरूपं कर्म यस्य तत्ताहशमहरीयमाना गच्छंतोऽमृतस्य सूर्यस्य नाभिं संनाहकं मंडलं अमृतस्योदकस्य वा नाभिमंतरिक्षमातस्थिवांस आतिष्ठंतोऽनंतासोऽपरिमिता उरवो व्याप्ताः पंथाः पतनशीला रश्मयो द्यावापृथिवी परि दिवं च पृथिवीं चांतरिक्षं च विश्वतः परितो यंति । गच्छंति । सीमिति पूरणः ।

॥ अथ तृतीया ॥

उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यंतौ ॥३॥

उक्षा । समुद्रः । अरुषः । सुऽपर्णः । पूर्वस्य । योनिं । पितुः । आ । विवेश ।
मध्ये । दिवः । निऽहितः । पृश्निः । अश्मा । वि । चक्रमे । रजसः । पाति । अंतौ ॥३॥

सौर्योऽयं तृचः । उक्षोदकस्य कामानां वा सेक्ता समुद्रः समुंदनः । यद्वा संमोदंते तस्मिन्देवा इति समुद्रः । अरुष आरोचमानः सुपर्णः सुगमनः पूर्वस्य । अवयवलक्षणेयं । पूर्वदिगवयवस्य पितुः पालकस्यांतरिक्षस्य योनिमुत्पादकमवयवमाविवेश । आविष्टवान् । पश्चाद्दिवो मध्ये निहितः पृश्निः । प्राश्नुत एनं वर्ण इति पृश्निरादित्यः । अश्मा सर्वत्र व्याप्तः । लुप्तोपमा वा । अश्मसदृशो रजसोऽंतरिक्षस्यांतौ पूर्वापरभागौ विचक्रमे । विक्रमते । पाति च जगत् । जगद्रक्षार्थं क्रमत इत्यर्थः ॥

॥ अथ चतुर्थी ॥

चत्वार ईं बिभ्रति क्षेमयंतो दश गर्भं चरसे धापयंते ।
त्रिधातवः परमा अस्य गावो दिवश्चरंति परि सद्यो अंतान् ॥४॥

चत्वारः। ई॒म्। बि॒भ॒र्ति॒। क्षे॒म॒ऽयन्तः॑। दश॑। गर्भ॑म्। च॒रसे॑। धा॒प॒य॒न्ते॒।
त्रिऽधा॑तवः। प॒र॒माः। अ॒स्य॒। गावः॑। दि॒वः। च॒र॒न्ति॒। परि॑। स॒द्यः। अन्ता॑न् ॥४॥

चत्वार ऋत्विज ईमेनमादित्यं क्षेमयंतः क्षेममात्मन इच्छंतो बिभर्ति। धारयंति हविर्भिः स्तुतिभिश्च। किंच दश दिशो गर्भं गर्भवन्मध्य उत्पन्नमेनं चरसे चरणायोदयास्तमयव्यवहाराय धापयंते। गमयंति। त्रिधातवस्त्रिप्रकाराः शीतोष्णवर्षभेदेन त्रिविधा अस्यादित्यस्य परमा उत्कृष्टा गावो रश्मयो दिवोऽंतरिक्षस्यांतान् परि परितः सद्य उदयानंतरमेव चरंति। गच्छंति॥

॥ अथ पंचमी ॥

इ॒दं वपु॒र्निव॑चनं जनास॒श्चर॑न्ति॒ यन्न॒द्य॑स्त॒स्थुरापः॑।
द्वे यदीं॑ बिभृ॒तो मा॒तुर॒न्ये इ॒हेह॑ जा॒ते य॒म्या॒३॒॑ सब॑न्धू ॥५॥
इ॒दम्। वपुः॑। नि॒ऽवच॑नम्। ज॒नासः॑। चर॑न्ति। यत्। न॒द्यः॑। त॒स्थुः। आपः॑।
द्वे इति॑। यत्। ई॒म्। बि॒भृ॒तः। मा॒तुः। अ॒न्ये इति॑। इ॒ह॒ऽइ॑ह। जा॒ते इति॑। य॒म्या॑।
स॒ब॑न्धू इति॒ सऽब॑न्धू ॥५॥

जनासो हे जना ऋत्विज इदं पुरतो दृश्यमानं वपुः शरीरं मंडलं निवचनं स्तुत्यं भवतीति शेषः। यन्मंडलमुपजीव्य नद्यश्चरंति प्रवहंति। आपश्च यन्मंडलमधितस्थुः। मंडलाधीनत्वात्तासां। ईमेतदुक्तलक्षणं यन्मंडलं द्वे अहोरात्रे मातुर्निर्मातुर्मातृस्थानीयादंतरिक्षादन्ये इहेह जाते इह चेह च सूर्ये जाते निष्पन्ने यम्या यम्ये नियमनीये युग्मभूते वा सबंधू समानबले समानबंधने उभयोरप्येक एव सूर्यो बंधकोऽसौ ययोस्तादृश्यौ बिभृतः धारयतः॥

॥ अथ षष्ठी ॥

वि त॑न्वते॒ धियो॑ अस्मा॒ अपां॑सि॒ वस्त्रा॑ पु॒त्राय॑ मा॒तरो॑ वयन्ति।
उ॒प॒प्र॒क्षे वृष॑णो॒ मोद॑माना दि॒वस्प॒था व॒ध्वो॑ यन्त्यच्छ॑ ॥६॥
वि। त॒न्व॒ते॒। धियः॑। अ॒स्मै॒। अपां॑सि। वस्त्रा॑। पु॒त्राय॑। मा॒तरः॑। व॒य॒न्ति॒।
उ॒प॒ऽप्र॒क्षे। वृष॑णः। मोद॑मानाः। दि॒वः। प॒था। व॒ध्वः॑। य॒न्ति॒। अच्छ॑ ॥६॥

अस्मै सूर्याय धियः स्तुतीरपांसि कर्माणि च वितन्वते। विस्तारयंति

यजमानाः । पुत्राय पुत्रस्थानीयाय मातरो निर्मोघ्य उषसो दिशो वा वस्त्रा वस्त्राणि वयंति । निष्पादयंति । वस्त्रसदृशानि तेजांसि निविडानि संपादयंतीत्यर्थः । वृषणः सेक्तुः सूर्यस्योपप्रक्षे उपपर्चने संपर्के सति मोदमाना हृष्यंतो वध्वो वधूस्थानीया रश्मयो दिवस्पथा सूर्यसंबंधिना मार्गेणाच्छास्मदभिमुखं यंति । गच्छंति । प्रसरंति ॥

॥ अथ सप्तमी ॥

तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तं ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥७॥

तत् । अस्तु । मित्रावरुणा । तत् । अग्ने । शं । योः । अस्मभ्यं । इदं । अस्तु । शस्तं ।
अशीमहि । गाधं । उत । प्रतिऽस्थां । नमः । दिवे । बृहते । सदनाय ॥७॥

अत्र लिंगसिद्धा देवताः । हे मित्रावरुणा मित्रावरुणौ तदिदं सूक्तं शस्तं स्तुतमस्तु । भवतु । हे अग्ने तत्सूक्तं शस्तमस्तु । अस्मभ्यं शं सुखाय योर्दुःखानाममिश्रणायेदं शस्तमस्तु । वयं चाशीमहि प्राप्नुयाम गाधं स्थितिं । उतापि च प्रतिष्ठां स्थितेरविच्छित्तिं चाशीमहि । नमो नमस्करोमि दिवे द्योतमानाय सूर्याय बृहते महते सादनायाश्रयाय विश्वस्य ॥

॥ इति चतुर्थस्य तृतीये प्रथमो वर्गः ॥

कदु प्रियायेति पंचर्चं चतुर्थं सूक्तं । प्रतिभानुर्नामात्रेय ऋषिः । जगती छंदः । विश्वे देवा देवताः । अत्रानुक्रमणिका । कदु पंच प्रतिभानुर्जागतमिति ॥ आभिप्लविके पंचमेऽहनि वैश्वदेवशस्त्र इदं सूक्तं निविद्धानं । सूचितं च । कदु प्रियायेति वैश्वदेवं । आ॰ ७. ७. । इति ॥

॥ तत्र प्रथमा ॥

कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयं ।
आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ॥१॥

कत् । ऊं इति । प्रियाय । धाम्ने । मनामहे । स्वऽक्षत्राय । स्वऽयशसे । महे । वयं ।
आऽमेन्यस्य । रजसः । यत् । अभ्रे । आ । अपः । वृणाना । विऽतनोति । मायिनी ॥१॥

अत्र वैद्युताग्निसंस्तवः । कदु कदा । उ इति पूरणः । प्रियाय सर्वेषां प्रियभूताय ।

वृष्टिद्वारा हविरादिप्रयोजकत्वात्सर्वप्रियत्वमस्य प्रसिद्धं । तादृशाय धाम्ने तेजसे वैद्युताय। उत्तरवाक्येऽभ्रेऽपो वितनोतीति वक्ष्यमाणत्वादिदं लभ्यते। कीदृशाय। स्वक्षत्राय स्वभूतबलाय किंच स्वयशसे स्वभूतान्नाय । सर्वमप्यन्नं ह्यस्य स्वं । महे महते पूज्याय वयं कदा मनामहे । स्तवाम । यत् ॥ उत्तरत्र स्त्रीलिंगनिर्देशाद्येति विपरिणामयितव्यं ॥ याग्नेयी शक्तिरग्नेरस्य समंतान्मातथ्यस्य रजसोऽंतरिक्षस्य । अपरिमितमपि नभ इयदिति सर्वैर्मीयते । संबंधिन्यभ्रे मेघ आ अधि मेघस्योपर्यप उदकानि वृष्टिलक्षणानि वितनोति विस्तारयति वृणानाच्छादयंती सेव्यमाना वा मायिनी । मायेति प्रज्ञानाम । प्रज्ञावती सती । यद्वास्य संबंधिनी माध्यमिकी वागिति वा योज्यं ॥

॥ अथ द्वितीया ॥

ता अ॑त्नत व॒युनं॑ वी॒रव॑क्षणं समा॒न्या वृ॒तया॒ विश्व॒मा रजः॑ ।

अपो॒ अपा॑ची॒रप॑रा॒ अपे॑जते॒ प्र पूर्वा॑भिस्तिरते देव॒युर्जनः॑ ॥२॥

ताः । अ॒त्न॒त । व॒युनं॑ । वी॒रऽव॑क्षणं । स॒मा॒न्या । वृ॒तया॑ । विश्वं॑ । आ । रजः॑ ।

अपो॒ इति॑ । अपा॑चीः । अप॑राः । अप॑ । ई॒ज॒ते॒ । प्र । पूर्वा॑भिः । ति॒र॒ते॒ । दे॒व॒ऽयुः । जनः॑ ॥२॥

इयमुषस्या । ता उषसोऽत्नत । वितन्वंति । किं । वयुनं प्रज्ञानं । कीदृशं । वीरवक्षणं वीरैर्ऋत्विग्भिर्वहनीयं । यद्वा वक्षणाः कार्यवोढारो येन प्रेर्यंते तत्तादृशं । किंच समान्यैकरूपया वृतयावरकया दीप्त्या विश्वमा सर्वमपि रजो जगदत्नत । एवं सति देवयुर्देवकामो जनोऽपाचीरपांचनाः प्रतिनिवृत्तमुखीरपरा अन्या आगामिनीरुषसोऽपेजते। अपचालयति। अपरोऽपशब्दः पूरणः । पूर्वाभिस्ताभिः प्रतिरते। प्रपूर्वस्तिरतिर्वर्धनार्थः । वर्धयति स्वमनीषां वर्धते वा स्वयं॥

॥ अथ तृतीया ॥

आ ग्राव॑भिरह॒न्ये॑भिर॒क्तुभि॒र्वरि॑ष्ठं॒ वज्र॒मा जि॑घर्ति मा॒यिनि॑ ।

श॒तं वा॒ यस्य॑ प्र॒चर॒न्स्वे दमे॑ संव॒र्तय॑न्तो॒ वि च॑ व॒र्तय॒न्नहा॑ ॥३॥

आ । ग्राव॑ऽभिः । अ॒ह॒न्ये॑भिः । अ॒क्तुऽभिः॑ । वरि॑ष्ठं । वज्रं॑ । आ । जि॒घ॒र्ति॒ । मा॒यिनि॑ ।

श॒तं । वा॒ । यस्य॑ । प्र॒ऽचर॑न् । स्वे । दमे॑ । सं॒ऽव॒र्तय॑न्तः । वि । च॒ । व॒र्तय॑न् । अहा॑ ॥३॥

अत्र पूर्वार्द्ध इंद्र उच्यत उत्तरार्द्ध इंद्रात्मा सूर्यः । आ हूयत इति शेषः । कैः ।

अहन्येभिरहनि संपादितैरक्तुभी रात्रिभिः । तत्र निष्पन्नैरित्यर्थः । तथाविधैर्यो- वभिः । साध्ये साधनशब्दः । ग्रावसाध्यैरभिषवैर्निमित्तभूतैः । आगत्याच सोमी सन् मायिनि वृत्रे निमित्ते सति वरिष्ठमुत्तरं वज्रमा सर्वतो जिघर्ति । दीपयति । वा किंच । वाशब्दश्चार्थे । यस्येंद्रात्मकस्यादित्यस्य शतं शतसंख्याका रश्मयः स्वे दमे स्वकीये गृह आकाशे प्रचरन् प्रचरंति । किं कुर्वंतः । संवर्तयंतः प्राणिनो नाशयंतः । यद्वा अहाहानि दिवसान् संवर्तयंतः सम्यक् प्रवर्तयंतो वि च वर्तयन् अहाहानि निवर्तयंति गतान्येव पुनः प्रापयंति च । तपनपरिस्पंदाधीनत्वात्प्रा- णिनामायुःक्षयस्याहोरात्रादिव्यवहारस्य ॥

॥ अथ चतुर्थी ॥

तामस्य रीतिं परशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः ।
सचा यदि पितुमंतमिव क्षयं रत्नं दधाति भरहूतये विशे ॥४॥
तां । अस्य । रीतिं । परशोःऽइव । प्रति । अनीकं । अख्यं । भुजे । अस्य । वर्पसः ।
सचा । यदि । पितुमंतंऽइव । क्षयं । रत्नं । दधाति । भरऽहूतये । विशे ॥४॥

इयमाग्नेयी । तां प्रसिद्धामस्याग्ने रीतिं स्वभावं गतिं वा परशोरिव प्रति परशोः प्रतिनिधिमिव पश्यामि । परशुर्यथा स्वस्वामिन्यभिमतं साधयति तद्व- दित्यर्थः । अस्य वर्पसो रूपवतोऽस्यादित्यस्यानीकं रश्मिसमूहं भुजे भोगायाख्यं । कथयाम्यहं । यदि यस्मात्स च देवः सचास्मत्सहायः सन् पितुमंतमन्नवंतं क्षय- मिव निवासमिव भरहूतये संग्रामे यज्ञे वाह्वानयुक्ताय विशे यजमानाय रत्नं रमणीयं धनं दधाति धारयति । उभयमपि ददातीत्यर्थः ॥

॥ अथ पंचमी ॥

स जिह्वया चतुरनीक ऋंजते चारु वसानो वरुणो यतन्नरिं ।
न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यं ॥५॥
सः । जिह्वया । चतुःऽअनीकः । ऋंजते । चारु । वसानः । वरुणः । यतन् । अरिं ।
न । तस्य । विद्म । पुरुषत्वता । वयं । यतः । भगः । सविता । दाति । वार्यं ॥५॥

सोऽग्निश्चतुरनीकश्चतुर्दिक्षु प्रसृतज्वालः सन् जिह्वया ऋंजते । गच्छति घृता- दिकं । यद्वा जिह्वया चतुरनीकः सन् ऋंजते । अलंकरोति स्वात्मानं । किं कुर्वन् ।

चारु रमणीयं तेजो वसान आच्छादयन् वरुणस्तमोवारकः सन् अरिममिथं यतन् उद्धरन्। तस्य। तमित्यर्थः। तं न विद्म। न जानीमो वयं पुरुषत्वता पुरुषत्वेन कामानां पूरकत्वेन वा युक्तं॥ अपरो भावप्रत्ययः पूरणः॥ यतोऽयं भगो महान् भजनीयः सविता प्रेरको देवो दाति यच्छति वार्यं वरणीयं धनं॥

॥ इति चतुर्थस्य तृतीये द्वितीयो वर्गः ॥

देवं व इति पंचर्चं पंचमं सूक्तमात्रेयस्य प्रतिप्रभस्यार्षं त्रैष्टुभं वैश्वदेवं। देवं वः प्रतिप्रभोऽंत्या तृणपाणिरित्यनुक्रमणिका॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा ॥

देवं वो अद्य सवितारमेषे भगं च रत्नं विभजंतमायोः।
आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन्॥१॥
देवं। वः। अद्य। सवितारं। आ। ईषे। भगं। च। रत्नं। विऽभजंतं। आयोः।
आ। वां। नरा। पुरुऽभुजा। ववृत्यां। दिवेऽदिवे। चित्। अश्विना। सखिऽयन्॥१॥

देवं द्योतमानं सवितारं सर्वस्याभ्यनुज्ञातारं वः। त्वामित्यर्थः। यद्वा होतुरिदं वाक्यं। वो यजमानेभ्यो युष्मभ्यमर्थायाद्येदानीमेषे। उपगच्छामि। भगं च भजनीयं देवमायोर्मनुष्यस्य यजमानस्य रत्नं रमणीयं हविर्विभजंतं। भगो वां विभजत्विति हि भगस्य विभजनं प्रसिद्धं। रायो विभक्ता संभरश्च वस्वः। ऋग्वे॰ ४.१७.११। भगो विभक्ता शवसा। ऋग्वे॰ ५.४६.६.। इति च श्रुतिः। यद्वा चतुर्थ्यर्थे षष्ठी। यजमानार्थं रत्नं रमणीयं धनं विभजंतं। हे नरा नेतारौ हे पुरुभुजा। पुरु भुंजाते इति पुरुभुजौ। हे अश्विनाश्विनौ वां युवां दिवे दिवे प्रतिदिनमाववृत्यां। आवर्तयाम्यस्मदभिमुखं। सखीयन् युवयोः सखित्वमिच्छन्। चिदिति पूरणः॥

॥ अथ द्वितीया ॥

प्रति प्रयाणमसुरस्य विद्वान्सूक्तैर्देवं सवितारं दुवस्य।
उप ब्रुवीत नमसा विजानन् ज्येष्ठं च रत्नं विभजंतमायोः॥२॥
प्रति। प्रऽयानं। असुरस्य। विद्वान्। सुऽउक्तैः। देवं। सवितारं। दुवस्य।
उप। ब्रुवीत। नमसा। विऽजानन्। ज्येष्ठं। च। रत्नं। विऽभजंतं। आयोः॥२॥

असुरस्य शत्रूणां निरसितुः सवितुः प्रति प्रयाणं प्रत्यागतिं विद्वान् जानन् सूक्तैः सवितारं देवं दुवस्य। परिचर हे अंतरात्मन्। किंचायोर्मनुष्याय ज्येष्ठं रत्नं धनं च विभजंतं। ददतमित्यर्थः। नमसा नमस्कारेण हविषा वा विजानन्। विशेषेण भावयन्नित्यर्थः॥ यद्वांतर्णीतण्यर्थोऽयं॥ ज्ञापयन् उपब्रुवीत। स्तौतु भवान्॥

॥ अथ तृतीया ॥

अदत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उस्रः।

इंद्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयंत दस्माः॥३॥

अदत्रऽया। दयते। वार्याणि। पूषा। भगः। अदितिः। वस्ते। उस्रः।

इंद्रः। विष्णुः। वरुणः। मित्रः। अग्निः। अहानि। भद्रा। जनयंत। दस्माः॥३॥

अयमग्निरदत्रयादनीयानि॥ अदेरौणादिकस्त्रप्रत्ययः। सुपां सुलुगिति याजादेशः॥ अथवात्तीत्यदत्रा जिह्वा। तया वार्याणि वरणीयानि काष्ठानि दयते। दयतिरनेककर्मात्र दहने वर्तते। दहतीत्यर्थः। सामर्थ्यादग्निरिति गम्यते। यद्वादनीयानि वरणीयान्यन्नानि दयते। ददाति यजमानाय॥ दय दानगतिहिंसाबलाख्यानेषु॥ कीदृशोऽग्निः। पूषा पोषको भगो भजनीयोऽदितिरखंडनीयः। यद्वा पूषादयस्त्रयोऽपि प्रत्येकमदनीयानि वार्याणि चान्नानि दयते। उस्रः सूर्यो वस्ते। आच्छादयति। सामर्थ्यात्तेजांसि। इंद्रादयः पंचापि देवा दस्मा दर्शनीया अहानि सर्वाण्यागंतॄणि भद्रा शोभनीयानि जनयंत। जनयंति। दिवसानां यागदानादिविशिष्टत्वमेव भद्रत्वं॥

॥ अथ चतुर्थी ॥

तन्नो अनर्वा सविता वरूथं तत्सिंधव इषयंतो अनु ग्मन्।

उप यद्वोचे अध्वरस्य होता रायः स्याम पतयो वाजरत्नाः॥४॥

तत्। नः। अनर्वा। सविता। वरूथं। तत्। सिंधवः। इषयंतः। अनु। ग्मन्।

उप। यत्। वोचे। अध्वरस्य। होता। रायः। स्याम। पतयः। वाजऽरत्नाः॥४॥

तत्प्रसिद्धं वरूथं वरणीयमस्मदभिमतं धनं नोऽस्मभ्यमनर्वाप्रत्यृतः केनाप्यतिरस्कृतः सविता देवः प्रयच्छत्विति शेषः। तद्धनं सिंधवः स्यंदनशीला इषयंतो गच्छंत्यो नद्योऽनु अनुसृत्य ग्मन्। गच्छंतु। धनं दातुं गच्छंत्वित्यर्थः।

यद्यस्मादध्वरस्य यागस्य होता होमनिष्पादकोऽहमुपवोचे उपेत्य ब्रवीमि तस्मात्तत्प्रयच्छंत्विति शेषः । वयं चावयो रायो धनस्य बहुविधस्य पतयः स्वामिनः स्याम । भवेम । वाजरत्ना अन्नेन बलेन वा रमणीयाः । अथवा यद्यस्माद्वोचे स्तौमि तस्मात्सविता नो वरूथमागच्छतु । तस्माद्यद्य नो वरूथं यज्ञमनुग्मन् अनुगच्छंत्विति वा योज्यं ॥

॥ अथ पंचमी ॥

प्र ये वसुभ्य ईवदा नमो दुर्ये मित्रे वरुणे सूक्तवाचः ।
अवैत्वभ्वं कृणुता वरीयो दिवस्पृथिव्योरवसा मदेम ॥ ५ ॥

प्र । ये । वसुऽभ्यः । ईवत् । आ । नमः । दुः । ये । मित्रे । वरुणे । सूक्तऽवाचः ।
अव । एतु । अभ्वं । कृणुत । वरीयः । दिवः । पृथिव्योः । अवसा । मदेम ॥ ५ ॥

ये यजमाना वसुभ्यो यज्ञनिवासेभ्यो देवेभ्य ईवद्गमनवन्नमोऽन्नं पश्वात्मकं प्र दुः प्रादुः । ये च मित्रे देवे वरुणे च सूक्तवाचः सूक्तवचसो भवंति तानस्मानभ्वं महद्धनं तेजो वावैतु । अवगच्छतु । हे देवाः कृणुत कुरुत च एतेभ्यो वरीय उरुतरं सुखं । दिवस्पृथिव्योर्द्यावापृथिव्योरवसा रक्षणेन मदेम । हृष्येम ॥

॥ इति चतुर्थस्य तृतीये तृतीयो वर्गः ॥

विश्वो देवस्येति पंचर्चं षष्ठं सूक्तं स्वस्त्यात्रेयमुनेरार्षं वैश्वदेवं । पंचमी पंक्तिराद्याश्चतस्रोऽनुष्टुभः । तदुक्तमनुक्रमण्यां । विश्वः स्वस्त्यात्रेयः पंक्त्यंतमिति ॥ पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि वैश्वदेवशस्त्रे विश्वो देवस्येति प्रतिपत्तृचस्याद्यः । सूचितं च । विश्वो देवस्य नेतुरित्येका । आ० ७. ६. । इति ॥ आभिप्लविकेषु द्वितीयचतुर्थषष्ठेष्वहःस्वेषैव वैश्वदेवस्य शस्त्रस्य प्रतिपत् । युग्मेष्वेवमभिप्लवे । आ० ७. ६. । इति सूचितत्वात् ॥

॥ तत्र प्रथमा ॥

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यं ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ॥ १ ॥

विश्वः । देवस्य । नेतुः । मर्तः । वुरीत । सख्यं ।
विश्वः । राये । इषुध्यति । द्युम्नं । वृणीत । पुष्यसे ॥ १ ॥

विश्वः सर्वो मर्तो नेतुर्देवस्य। सवितुरित्यर्थः। तस्य सख्यं वुरीत। वृणीत। विश्वो जनो राये धनस्येषुध्यति ॥ पंचमलकारः ॥ ईशीत। तस्यानुग्रहात् सर्वो जनो द्युम्नं धनं वृणीत सवितारं पुष्यसे पुष्ट्यै पर्याप्तं धनं ॥

॥ अथ द्वितीया ॥

ते ते देव नेतर्ये चेमाँ अनुशसे।

ते राया ते ह्याऽ३पृचे सचेमहि सचथ्यैः ॥२॥

ते। ते। देव। नेतः। ये। च। इमान्। अनुऽशसे।

ते। राया। ते। हि। आऽपृचे। सचेमहि। सचथ्यैः ॥२॥

हे नेतर्देव ते तव स्वभूतास्ते वयं यजमाना ये चान्य इमान्॥ विभक्तिव्यत्ययः॥ इमे होत्रादयोऽनुशसे शंसितुं प्रभवंति तेऽपि त्वदीयाः। यद्वेमानन्यानिंद्रादीननुशसे क्रमेण शंसितुं प्रभवंति। एकैव वा महानात्मा देवता स सूर्यः स हि सर्वभूतात्मेत्युक्तत्वादितरासां देवतानां तदंतर्भावादिति भावः। न केवलं त्वच्छंसका एवेत्यर्थः। त उभये वयं राया धनेन सचेमहीति संबंधः। ते हि ते खल्वापृच आपर्चनीयाः॥ कृत्यार्थे केन्प्रत्ययः। कृन्मेजंत इत्यव्ययत्वाद्विभक्तेरदर्शनं॥ सचथ्यैः सर्वैः कामैः सचेमहि। संगच्छेमहि ॥

॥ अथ तृतीया ॥

अतो न आ नॄनतिथीनतः पत्नीर्दशस्यत।

आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः ॥३॥

अतः। नः। आ। नॄन्। अतिथीन्। अतः। पत्नीः। दशस्यत।

आरे। विश्वं। पथेऽस्थां। द्विषः। युयोतु। युयुविः ॥३॥

अतोऽस्मिन्यज्ञे ॥ सार्वविभक्तिकस्तसिः ॥ नोऽस्माकमृत्विजां नॄन्नेतॄनतिथीन् तद्वत्पूज्यान्देवाना दशस्यत। सर्वतः परिचरत। अतोऽस्मिन्यज्ञे पत्नीर्देवानां पत्नीरप्यादशस्यत हविःप्रदानादिना। यद्वा नोऽस्मभ्यं नॄन् पुत्रभृत्यादीनतिथीन् पत्नीश्चैतत्त्रयमत्र दशस्यत। हे देवाः प्रयच्छत। आरे दूरे विश्वं सर्वं पथेष्ठां मार्गे वर्तमानं वैरिणं द्विषोऽन्यानपि द्विषो द्वेष्टॄन्युयोतु पृथक्करोतु देवसंघः सविता वा यूयुविः सर्वस्यामिश्रयिता पृथक्कर्ता ॥

॥ अथ चतुर्थी ॥

यत्र वह्निरभिहितो दुद्रवद्द्रोण्यः पशुः ।
नृमणा वीरपस्त्योऽर्णा धीरेव सनिता ॥४॥

यत्र । वह्निः । अभिऽहितः । दुद्रवत् । द्रोण्यः । पशुः ।
नृऽमनाः । वीरऽपस्त्यः । अर्णा । धीराऽइव । सनिता ॥४॥

यत्र यस्मिन्यज्ञे वह्निर्यज्ञस्य वोढाभिहितो यूपं प्रापितो द्रोण्यो यूपार्हः पशुर्दुद्रवत् गच्छति यूपं प्रति तत्र नृमणा यजमानमनाः सविता वीरपस्त्यः । वीरा ऋत्विग्यजमानाः पुत्रभृत्यादयो वा तद्वत्पस्त्यं गृहं यस्य स तादृशः । प्रेरितगृहो वा । पुत्राद्युपेतगृहप्रद इत्यर्थः । सनिता संभक्ता भवति । अर्णारणकुशला धीरेव योषिदिव । यद्वार्णानि हवींष्यभिलक्ष्य सनिता भवति ॥

॥ अथ पंचमी ॥

एष ते देव नेता रथस्पतिः शं रयिः ।
शं राये शं स्वस्तय इषःस्तुतो मनामहे देवस्तुतो मनामहे ॥५॥

एषः । ते । देव । नेतरिति । रथःपतिः । शं । रयिः ।
शं । राये । शं । स्वस्तये । इषःऽस्तुतः । मनामहे । देवऽस्तुतः । मनामहे ॥५॥

हे नेतर्देव सवितस्ते तवैष रथःपतिः सर्वस्य पालको रयिर्दातव्यधनवान् ॥ मत्वर्थो लुप्यते ॥ शं करोत्विति शेषः । वयं च राये धनस्य शं सुखाय । यद्वा राये धनाय शं सुखाय च स्वस्तयेऽविनाशायेषःस्तुत एषणीयस्य सवितुः स्तोतारो वयं मनामहे । स्तुमः । देवस्तुतो देवानां देवस्य वा सवितुः स्तोतारो मनामहे । स्तुमः ॥

॥ इति चतुर्थस्य तृतीये चतुर्थो वर्गः ॥

अग्ने सुतस्येति पंचदशर्चं सप्तमं सूक्तं । अत्रेयमनुक्रमणिका । अग्ने पंचोना चतस्रो गायत्र्यः षळुष्णिहस्तिस्रो जगत्यस्त्रिष्टुभो वांत्येऽनुष्टुभाविति । ऋषिश्चान्यस्मादिति परिभाषया स्वस्त्यात्रेय ऋषिः । आदितश्चतस्रो गायत्र्यः पंचम्याद्याः षडुष्णिह एकादश्याद्यास्तिस्रो जगत्यस्त्रिष्टुभो वा चतुर्दशी पंचदश्याव-नुष्टुभौ । विश्वे देवा देवता ॥

॥ तत्र प्रथमा ॥

अग्ने॑ सु॒तस्य॑ पी॒तये॒ विश्वै॒रूमे॑भि॒रा ग॑हि । दे॒वेभि॑र्ह॒व्यदा॑तये ॥१॥

अग्ने॑ । सु॒तस्य॑ । पी॒तये॑ । विश्वैः॑ । ऊमे॑भिः । आ । ग॒हि॒ । दे॒वेभिः॑ । ह॒व्यऽदा॑तये ॥१॥

हे अग्ने त्वं सुतस्य पीतये सोमपानाय विश्वैरूमेभिरूमैः सर्वैरपि रक्षकैर्देवेभिर्देवैरिंद्रादिभिः सह हव्यादातयेऽस्माकं हविर्दानाय तद्दात्रे यजमानाय वा आगहि । आगच्छ ॥

॥ अथ द्वितीया ॥

ऋ॒तधी॑तय॒ आ ग॑त॒ सत्य॑धर्माणो अध्व॒रं । अ॒ग्नेः पि॑बत जि॒ह्वया॑ ॥२॥

ऋत॑ऽधीतयः । आ । ग॒त॒ । सत्य॑ऽधर्माणः । अ॒ध्व॒रं । अ॒ग्नेः । पि॒ब॒त॒ । जि॒ह्वया॑ ॥२॥

हे ऋतधीतयः सत्यस्तुतयोऽबाध्यकर्माणो वा देवा अध्वरमस्मद्यज्ञमागत । आगच्छत । आगत्य च हे सत्यधर्माणः सत्यस्य धारयितारो यूयमग्नेर्जिह्वया पिबताज्यसोमादिकं ॥

॥ अथ तृतीया ॥

विप्रे॑भिर्विप्र संत्य प्रात॒र्याव॑भि॒रा ग॑हि । दे॒वेभिः॒ सोम॑पीतये ॥३॥

विप्रे॑भिः । वि॒प्र॒ । सं॒त्य॒ । प्रा॒त॒र्याव॑ऽभिः । आ । ग॒हि॒ । दे॒वेभिः॑ । सोम॑ऽपीतये ॥३॥

हे विप्र मेधाविन् विविधकामानां वा पूरक हे संत्य संभजनीयाग्ने विप्रेभिरुक्तलक्षणैः प्रातर्यावभिः प्रातःकाल आगंतृभिर्देवेभिर्देवैः सार्द्धमागहि। आगच्छ। किमर्थं । सोमपीतये सोमपानाय ॥

॥ अथ चतुर्थी ॥

अ॒यं सोम॑श्च॒मू सु॒तोऽम॑त्रे॒ परि॑ षिच्यते । प्रि॒य इं॒द्राय॑ वा॒यवे॑ ॥४॥

अ॒यं । सोमः॑ । च॒मू इति॑ । सु॒तः । अम॑त्रे । परि॑ । सि॒च्य॒ते॒ । प्रि॒यः । इं॒द्राय॑ । वा॒यवे॑ ॥४॥

अयं पुरतो वर्तमानः सोमश्चमू चम्वोरच्योरधिषवणफलकयोः सुतोऽभिषुतः सन् अमत्रे पात्रे परिषिच्यते । पूर्यते । स चेंद्राय वायवे च प्रियः । तं पातुं हे इंद्रवायू आगच्छतमिति शेषः ॥

वायवा याहीत्येषा पृष्ठ्यस्य तृतीयेऽहनि प्रउगशस्त्रे वायव्यतृचस्याद्या। सूचितं च। वायवा याहि वीतय इत्येका वायो याहि शिवा दिव इति द्वे। आ॰ ७.१०.। इति॥

॥ सैषा पंचमी ॥

वायवा याहि वीतये जुषाणो हव्यदातये ।
पिबा सुतस्यांधसो अभि प्रयः ॥ ५ ॥

वायो इति । आ । याहि । वीतये । जुषाणः । हव्यऽदातये ।
पिब । सुतस्य । अंधसः । अभि । प्रयः ॥ ५ ॥

हे वायो प्रयोऽन्नं सोमाख्यमभि अभिलक्ष्यायाहि वीतये भक्षनाय जुषाणः प्रीयमाणो हव्यदातये हविर्दात्रे यजमानाय तदर्थं । आगत्य च सुतस्यांधसोऽभिषुतमंधोऽन्नं सोमलक्षणं पिब ॥

॥ इति चतुर्थस्य तृतीये पंचमो वर्गः ॥

पृष्ठ्यस्य तृतीयेऽहनि प्रउगशस्त्र ऐंद्रवायवतृच इंद्रश्चेत्यादिके द्वे ऋचौ शंसेत् । तयोः प्रथमां द्वितीयां वावर्त्य तृचं संपादयेत् । तथा च सूचितं । इंद्रश्च वायवेषां सुतानामिति द्वयोरन्यतरां द्विः । आ॰ ७.१०. । इति ॥

॥ द्वचे प्रथमा सूक्ते षष्ठी ॥

इंद्रश्च वायवेषां सुतानां पीतिमर्हथः ।
तान् जुषेथामरेपसावभि प्रयः ॥ ६ ॥

इंद्रः । च । वायो इति । एषां । सुतानां । पीतिं । अर्हथः ।
तान् । जुषेथां । अरेपसौ । अभि । प्रयः ॥ ६ ॥

हे वायो त्वं चेंद्रश्चैषां पुरतो गृहीतानां सुतानामभिषुतानां सोमानां पीतिं पानमर्हथः । यस्मादेवं तस्मात्तान् सोमरसान् जुषेथां सेवेथामरेपसावहिंसकौ । तदर्थं प्रयः सोमाख्यमन्नमभिलक्ष्यागच्छतमिति शेषः । यद्वा प्रयोऽन्नरूपान् ॥

॥ अथ सप्तमी ॥

सुता इंद्राय वायवे सोमासो दध्याशिरः ।
निम्नं न यंति सिंधवोऽभि प्रयः ॥ ७ ॥

सुताः । इंद्राय । वायवे । सोमासः । दधिऽआशिरः ।
निम्नं । न । यंति । सिंधवः । अभि । प्रयः ॥ ७ ॥

इंद्राय वायवे च सोमासः सोमा दध्याशिरो दध्याश्रयणाः सुताः। अभिषुताः। संपादिताः। ते च निम्नं गर्तं सिंधवो न नद्य इव हे इंद्रवायू युवामभियंति प्रयोऽन्नरूपाः॥

तृतीयेऽहनि प्रउगशस्त्रे सजूर्विश्वेभिरिति वैश्वदेवस्तृचः। सूचितं च। सजूर्विश्वेभिर्देवेभिरुत नः प्रिया प्रियासु। आ० ७.१०.। इति॥

॥ सैषा तृचे प्रथमा सूक्तेऽष्टमी॥

सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः।
आ याह्यग्ने अत्रिवत्सुते रण॥८॥

सऽजूः। विश्वेभिः। देवेभिः। अश्विऽभ्यां। उषसा। सऽजूः।
आ। याहि। अग्ने। अत्रिऽवत्। सुते। रण॥८॥

हे अग्ने विश्वेभिः सर्वैर्देवेभिर्देवैः सजूः संगतः सन् अश्विभ्यामुषसा च सजूः समानप्रीतिः सन् आयाहि। आगहि। अत्रिवदत्रिरिव। अत्रेर्यज्ञे यथा तथेत्यर्थः। यज्ञात्रिर्यथा यज्ञे रमते तद्वत्सुतेऽभिषुते सोमे रण। रमस्व॥

॥ अथ नवमी॥

सजूर्मित्रावरुणाभ्यां सजूः सोमेन विष्णुना।
आ याह्यग्ने अत्रिवत्सुते रण॥९॥

सऽजूः। मित्रावरुणाभ्यां। सऽजूः। सोमेन। विष्णुना।
आ। याहि। अग्ने। अत्रिऽवत्। सुते। रण॥९॥

॥ अथ दशमी॥

सजूरादित्यैर्वसुभिः सजूरिंद्रेण वायुना।
आ याह्यग्ने अत्रिवत्सुते रण॥१०॥

सऽजूः। आदित्यैः। वसुऽभिः। सऽजूः। इंद्रेण। वायुना।
आ। याहि। अग्ने। अत्रिऽवत्। सुते। रण॥१०॥

उत्तरे द्वे नवमीदशम्यौ स्पष्टे॥

॥ इति चतुर्थस्य तृतीये षष्ठो वर्गः॥

पृष्ठ्यस्य षष्ठेऽहनि वैश्वदेवशस्त्रे स्वस्ति न इति तृचः। सूचितं च। स्वस्ति नो मिमीतामश्विना भग इति तृच इति वैश्वदेवं। आ० ८.१.। इति ॥ तथा बृहस्पतिसवे वैश्वदेवनिविद्धानार्थोऽयं तृचः। स्वस्ति नो मिमीतामश्विना भग इति वैश्वदेवं। आ० ९.५.। इति सूचितत्वात् ॥

॥ तृचे प्रथमा सूक्त एकादशी ॥

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥११॥

स्वस्ति। नः। मिमीतां। अश्विना। भगः। स्वस्ति। देवी। अदितिः। अनर्वणः।
स्वस्ति। पूषा। असुरः। दधातु। नः। स्वस्ति। द्यावापृथिवी इति। सुऽचेतुना ॥११॥

नोऽस्मभ्यमश्विनाश्विनौ स्वस्त्यविनाशं क्षेमं मिमीतां। कुरुतां। भगश्च स्वस्ति क्षेमं मिमीतां। तथा देव्यदितिश्च स्वस्ति मिमीतां। अनर्वणोऽप्रत्यृतः पूषा असुरः शत्रूणां निरसिता प्राणानां बलानां दाता वा नः स्वस्ति दधातु। नोऽस्मभ्यं द्यावापृथिवी द्यावापृथिव्यावपि सुचेतुना शोभनेन प्रज्ञानेन विशिष्टे स्वस्ति मिमीतां ॥

॥ अथ द्वादशी ॥

स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः ॥१२॥

स्वस्तये। वायुं। उप। ब्रवामहै। सोमं। स्वस्ति। भुवनस्य। यः। पतिः।
बृहस्पतिं। सर्वऽगणं। स्वस्तये। स्वस्तये। आदित्यासः। भवंतु। नः ॥१२॥

स्वस्तये क्षेमाय वायुमुपब्रवामहै। स्तुम इत्यर्थः। सोमं चोपब्रवामहै। यश्च सोमो भुवनस्य पतिः पालकः। सर्वलोकजीवनस्य सोमायत्तत्वात्। तथा सर्वगणं सर्वदेवगणोपेतं बृहस्पतिं बृहतः कर्मणो मंत्रस्य पालयितारं स्वस्तये स्तुमः। आदित्यास आदित्या अदितेः पुत्राः सर्वे देवा अरुणादयो द्वादश वा नोऽस्माकं स्वस्तये भवंतु ॥

सत्रमध्ये दीक्षिते व्याधिते सति तस्मिन्नहनि वैश्वदेवशस्त्रेऽयं तृचो निविद्धानार्थः। सूचितं च। स्वस्त्यात्रेये निविदं दध्यात्। आ० ६.९.। इति। स्वस्त्यात्रेयशब्देनायं तृचो विवक्षित इति तत्र व्याख्यातं। तथा रूपादिके सत्ययं तृचो जपः ॥

॥ अथ त्रयोदशी ॥

विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवंत्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥१३॥
विश्वे । देवाः । नः । अद्य । स्वस्तये । वैश्वानरः । वसुः । अग्निः । स्वस्तये ।
देवाः । अवंतु । ऋभवः । स्वस्तये । स्वस्ति । नः । रुद्रः । पातु । अंहसः ॥१३॥

विश्वे सर्वेऽपि देवा नोऽस्मानद्यास्मिन्यागदिने स्वस्तये क्षेमायावंतु । वैश्वानरः । विश्व एनं नरा नयंतीति वैश्वानरः । वसुः सर्वस्य वासयिताग्निर्देवः । अयमेवाग्निर्वैश्वानर इति शाकपूणिः । नि० ७.२३. । इति यास्कः । सोऽपि स्वस्तयेऽवतु । देवा ऋभवोऽपि स्वस्तयेऽवंतु । रुद्रो दुःखाद्द्रावयिता देवोऽप्यंहसः पापात् स्वस्ति पातु नोऽस्मान् ॥

॥ अथ चतुर्दशी ॥

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इंद्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥१४॥
स्वस्ति । मित्रावरुणा । स्वस्ति । पथ्ये । रेवति ।
स्वस्ति । नः । इंद्रः । च । अग्निः । च । स्वस्ति । नः । अदिते । कृधि ॥१४॥

हे मित्रावरुणा अहोरात्राभिमानिदेवौ स्वस्ति कुरुतं । हे पथ्ये हे पथ्यास्वस्तिदेवि । पंथा अंतरिक्षमार्गः । तत्र हिता मार्गाभिमानिनी देवी । हे तादृशि रेवति धनवति देवि स्वस्ति कृधि । इंद्रश्चाग्निश्च प्रत्येकं नोऽस्मभ्यं स्वस्ति कृधि । हे अदिते देवि नः स्वस्ति कृधि । कुरु ॥

॥ अथ पंचदशी ॥

स्वस्ति पंथामनु चरेम सूर्याचंद्रमसाविव ।
पुनर्ददताघ्नता जानता सं गमेमहि ॥१५॥
स्वस्ति । पंथां । अनु । चरेम । सूर्याचंद्रमसौऽइव ।
पुनः । ददता । अघ्नता । जानता । सं । गमेमहि ॥१५॥

पंथां पंथानं स्वस्ति क्षेमेणानुचरेम सूर्याचंद्रमसाविव । तौ यथा निरालंबे

मार्गे राक्षसादिभिरनुपद्रुतौ संचरतस्तद्वत्। किंच वयं प्रवसंतः पुनर्ददताभिमतमघ्नता चिरकालविलंबकोपेनाहिंसता जानताविस्मरता मदीयश्चिरकालं गतः कोऽयमिति संदेहमकुर्वता। मदीयोऽयमिति बुध्यमानेनेत्यर्थः। उक्तलक्षणेन बंधुजनेन संगमेमहि। यद्वा पूर्वार्धं प्रवसतां वाक्यमुत्तरार्धं बंधूनां। वयं बंधवो ददताभिमतमुपार्जितं यच्छताघ्नता प्रयामकोपेनाहिंसता जानता सस्नेहमधिगच्छता प्रवसता संगमेमहि ॥

॥ इति चतुर्थस्य तृतीये सप्तमो वर्गः ॥

प्र श्यावाश्वेति सप्तदशर्चमष्टमं सूक्तं। अत्रेयमनुक्रमणिका। प्र श्यावाश्व ऊना श्यावाश्वो मारुतं ह तत्पंक्तिः षष्ठ्यंत्या चेति। आत्रेयः श्यावाश्व ऋषिः। ह तदिति प्रयोगादिदमादीनि दश सूक्तानि मरुद्देवत्यानि। षष्ठी सप्तदशी च पंक्त्यौ शिष्टाः पंक्त्यंतपरिभाषयानुष्टुभः ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः।
ये अद्रोघमनुष्वधं श्रवो मदंति यज्ञियाः ॥१॥

प्र। श्यावऽअश्व। धृष्णुऽया। अर्च। मरुत्ऽभिः। ऋक्वऽभिः।
ये। अद्रोघं। अनुऽस्वधं। श्रवः। मदंति। यज्ञियाः ॥१॥

हे श्यावाश्व एतन्नामक ऋषे धृष्णुया धृष्णुस्त्वमृक्वभिः स्तुत्यान्मरुद्भिर्मरुतः प्रार्च ॥ द्वितीयार्थे तृतीया ॥ एवं स्वयमेव संप्रेष्यति। यद्वा यजमानो होतारं श्यावाश्वं ब्रूते। यद्वा मरुद्भिर्मरुत्सदृशैर्ऋक्वभिः स्तोतृभिः सह स्तोत्रैर्वार्च। स्तुहीत्यर्थः। ये मरुतो यज्ञिया यज्ञार्हा अनुष्वधं प्रत्यहं। हविर्लक्षणान्नप्रदानं स्वधा। अनु पश्चाद्वा। अद्रोघमहिंसकं श्रवोऽन्नं लब्ध्वा मदंति हृष्यंति ॥

॥ अथ द्वितीया ॥

ते हि स्थिरस्य शवसः सखायः संति धृष्णुया।
ते यामन्ना धृषद्विनस्त्मना पांति शश्वतः ॥२॥

ते। हि। स्थिरस्य। शवसः। सखायः। संति। धृष्णुऽया।
ते। यामन्। आ। धृषत्ऽविनः। त्मना। पांति। शश्वतः ॥२॥

ते हि ते खलु स्थिरस्याविचलितस्य शवसो बलस्य सखायः संति। भवंति मह्यं। धृष्णुया धृष्णवः। ते च यामन्ना। आ इति चार्थे। गमनेऽपि धृषद्विनो धर्षणवंतस्त्मनात्मनानुग्रहेणैवास्मदुपकारमनपेक्ष्यैव शश्वतो बहूनस्मान्पुत्रभृत्यादीन्पांति। रक्षंति ॥

॥ अथ तृतीया ॥

ते स्यंद्रासो नोक्षणोऽति ष्कंदंति शर्वरीः।
मरुतामधा महो दिवि क्षमा च मन्महे ॥३॥
ते। स्यंद्रासः। न। उक्षणः। अति। स्कंदंति। शर्वरीः।
मरुतां। अध। महः। दिवि। क्षमा। च। मन्महे ॥३॥

ते मरुतः स्यंद्रासः स्यंदनशीला उक्षणो जलस्य सेक्तारश्च। नेति चार्थे। यस्मात्स्यंद्रा अन्येषां तस्मात् शर्वरीः। शर्वर्यो रात्रयः। कालावयवानित्यर्थः। तानति स्कंदंति। अतिक्रम्य गच्छंति। नित्या इत्यर्थः। यस्मादेत एवंविधास्तस्मान्मरुतामधाधुना महस्तेजो दिवि द्युलोके क्षमा क्षमायां भूमौ च वर्तमानं मन्महे। स्तुमः ॥

॥ अथ चतुर्थी ॥

मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया।
विश्वे ये मानुषा युगा पांति मर्त्यं रिषः ॥४॥
मरुत्ऽसु। वः। दधीमहि। स्तोमं। यज्ञं। च। धृष्णुऽया।
विश्वे। ये। मानुषा। युगा। पांति। मर्त्यं। रिषः ॥४॥

हे अध्वर्युहोत्रादयो वो यूयं मरुत्सु धृष्णुया धर्षकेषु दधीमहि॥ व्यत्ययेनोत्तमः॥ धत्त। किं। स्तोमं स्तोत्रं यज्ञं च। इज्यतेऽनेनेति यज्ञं हविः। तदुभयं किमर्थं दीयत इति। ये मरुतो विश्वे सर्वेऽपि मानुषा मानुषाणि युगा युगानि। सर्वेषु कालेष्वित्यर्थः। मर्त्यं मरणधर्माणं यजमानं रिषो हिंसकात्सकाशात्पांति रक्षंति ॥

॥ अथ पंचमी ॥

अर्हंतो ये सुदानवो नरो असामिशवसः।
प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः ॥५॥

अर्हंतः । ये । सुऽदानवः । नरः । असामिऽशवसः ।

प्र । यज्ञं । यज्ञियेभ्यः । दिवः । अर्च । मरुत्ऽभ्यः ॥५॥

हे होतः हे आत्मन्वा येऽर्हंतः पूज्याः सुदानवः शोभनदाना नरो नेतारः कर्मणामसामिशवसोऽनल्पबलाः संति तेभ्यो यज्ञियेभ्यो यज्ञार्हेभ्यो दिवो द्योतमानेभ्यो मरुद्भ्यः ॥ विभक्तिवचनयोर्व्यत्ययः ॥ यद्वा कर्मणि षष्ठी ॥ दीप्तं यज्ञं यज्ञसाधनं हविः प्रार्च । पूजय । प्रयच्छेत्यर्थः । अथवा दिवोऽंतरिक्षादागतेभ्य इति संबंधः ॥

॥ इति चतुर्थस्य तृतीयेऽष्टमो वर्गः ॥

॥ अथ षष्ठी ॥

आ रुक्मैरा युधा नर ऋष्वा ऋष्टीरसृक्षत ।

अन्वेनाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः ॥६॥

आ । रुक्मैः । आ । युधा । नरः । ऋष्वाः । ऋष्टीः । असृक्षत ।

अनु । एनान् । अह । विऽद्युतः । मरुतः । जज्झतीःऽइव । भानुः । अर्त । त्मना । दिवः ॥६॥

नरो वृष्टेर्नेतार ऋष्वा महांतो मरुतो रुक्मै रोचमानैराभरणविशेषैरा रोचंत इति शेषः ॥ उपसर्गश्रुतेः संगतक्रियाध्याहारः ॥ तथा युधा प्रहरणसाधनेनायुधेनारोचंते । एते मरुत ऋष्टीरायुधविशेषानसृक्षत । प्रक्षिपंति मेघभेदार्थं । एनान्मरुतो विद्युतोऽपि जज्झतीरिव शब्दकारिण्य आप इव । जज्झतीरापो भवंति शब्दकारिण्यः । नि० ६. १६. । इति निरुक्तं । अन्वह अनुगच्छंत्येव । दिवो द्योतमानस्य मरुद्गणस्य भानुर्दीप्तिस्त्मना स्वयमेवार्त । निरगात् ॥

॥ अथ सप्तमी ॥

ये वावृधंत पार्थिवा य उरावंतरिक्ष आ ।

वृजने वा नदीनां सधस्थे वा महो दिवः ॥७॥

ये । ववृधंत । पार्थिवाः । ये । उरौ । अंतरिक्षे । आ ।

वृजने । वा । नदीनां । सधऽस्थे । वा । महः । दिवः ॥७॥

ये मरुतः पार्थिवाः पृथिवीसंबद्धाः संतो ववृधंत वर्धंते । ये चोरौ महत्यंतरिक्षे च ववृधंत । आ इति चार्थे । नदीनां नदनवतीनां वृजने वा बले ववृधंत ।

महो महतो दिवो द्युलोकस्य सधस्थे सहस्थाने च ववृधंत। उभयत्र वाशब्दश्चार्थे। एवं सर्वत्र वर्धमाना मरुतो वृष्ट्यर्थमृष्टीरसृक्षतेति पूर्वत्र संबंधः ॥

॥ अथाष्टमी ॥

शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसं।
उत स्म ते शुभे नरः प्र स्यंद्रा युजत त्मना ॥ ८ ॥
शर्धः। मारुतं। उत्। शंस। सत्यऽशवसं। ऋभ्वसं।
उत। स्म। ते। शुभे। नरः। प्र। स्यंद्राः। युजत। त्मना ॥ ८ ॥

हे स्तोतर्मारुतं शर्धो बलमुत् उत्कृष्टं शंस। स्तुहि। कीदृशं शर्धः। सत्यशवसं सत्यवेगमृभ्वसं महदतिप्रवृद्धं। उत स्मापि च नरो वृष्टेर्नेतारस्ते मरुतः शुभ उदकार्थं प्रयुजत प्रायुंजत समयोजयन् त्मनात्मनैव जगद्रक्षाबुद्ध्यैव स्यंद्राश्चलनस्वभावाः पृषतीरित्यर्थः ॥

॥ अथ नवमी ॥

उत स्म ते परुष्ण्यामूर्णा वसत शुंध्यवः।
उत पव्या रथानामद्रिं भिंदंत्योजसा ॥ ९ ॥
उत। स्म। ते। परुष्ण्यां। ऊर्णाः। वसत। शुंध्यवः।
उत। पव्या। रथानां। अद्रिं। भिंदंति। ओजसा ॥ ९ ॥

उत स्मापि च ते मरुतः परुष्ण्यामेतन्नामिकायां नद्यां वर्तंते। य ऊर्णा दीप्तीः शुंध्यवः शोधिका वसत आच्छादयंति ते। उतापि च पव्या नेम्या रथानां स्वकीयानां रथचक्रेणोजसा बलेन चाद्रिं भिंदंति। मेघं गिरिं वा विदारयंति ॥

॥ अथ दशमी ॥

आपथयो विपथयोऽंतस्पथा अनुपथाः।
एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते ॥ १० ॥
आऽपथयः। विऽपथयः। अंतःऽपथाः। अनुऽपथाः।
एतेभिः। मह्यं। नामऽभिः। यज्ञं। विऽस्तारः। ओहते ॥ १० ॥

आपथयः। अस्मदभिमुखा मार्गा येषां ते तादृशाः। विपथयो विष्वङ्मार्गा

अंतस्पथा दरीसुषिरादिमार्गा अनुपथा अनुकूलमार्गाश्च ये मरुतः संति त एते- भिरेतैश्चतुर्विधैर्नामभिर्नामकैः स्वरूपैर्मह्यं मदर्थं यज्ञं विस्तारो विस्तृताः संत ओहते। वहंति। यद्वैतैर्नामभिरुदकैः सार्धं यज्ञमोहते॥

॥ इति चतुर्थस्य तृतीये नवमो वर्गः॥

॥ अथैकादशी॥

अधा नरो न्योहतेऽधा नियुत ओहते।

अधा पारावता इति चित्रा रूपाणि दर्श्या॥११॥

अध। नरः। नि। ओहते। अध। निऽयुतः। ओहते।

अध। पारावताः। इति। चित्रा। रूपाणि। दर्श्या॥११॥

अधाथ नरोऽभिमतवृष्ट्यादिनेतारो न्योहते। नितरां वहंति जगत्। अध नियुतः स्वयमेव मिश्रयितारः संत ओहते। अधाथ पारावताः। परावद्दूरदेशः। तत्संबंधिनश्चांतरिक्षादिदूरदेशे ग्रहतारामेघादिधारकाः संत ओहत इत्यर्थः। इत्युक्तप्रकारेण तेषां रूपाणि चित्रा नानाविधानि चायनीयानि वा दर्श्या स्वव्यापारैर्दर्शनीयानि भवंत्विति शेषः॥

॥ अथ द्वादशी॥

छंदःस्तुभः कुभन्यव उत्समा कीरिणो नृतुः।

ते मे के चिन्न तायव ऊमा आसन्दृशि त्विषे॥१२॥

छंदःऽस्तुभः। कुभन्यवः। उत्सं। आ। कीरिणः। नृतुः।

ते। मे। के। चित्। न। तायवः। ऊमाः। आसन्। दृशि। त्विषे॥१२॥

छंदःस्तुभश्छंदोभिः स्तोतारः कुभन्यव उदकेच्छवः कीरिणः स्तोतार उत्सं कूपमपेक्ष्य तृषिताय गोतमाय यान्मरुत आनृतुः सर्वतोऽकुर्वन् अनयन्वा स्तोत्रं। यद्वा ये छंदःस्तुभश्छंदोभिः स्तुत्याः॥ स्तोभतिः स्तुतिकर्मा॥ कुभन्यवः सेक्तारो वृष्ट्युदकस्य॥ कुभिरुंदनकर्मा॥ कीरिणः स्तोतुर्गोतमस्य पानार्थमुत्सं कूपमानृतुः आनीतवंतः। असिंचन्नुत्सं गोतमाय तृष्णजे। ऋग्वे० १. ८५. ११। इति ह्युक्तं॥ नृ नय इत्यस्य वा नर्ततेर्वा विक्षेपमाचार्यस्येदं रूपं॥ ते मरुतः के चिन्मे मह्यं तायवो न कदाचिदप्यदृश्यास्तस्करा इव स्थिता ऊमा रक्षका

हशि दर्शन आसन् । विषयभूता अभवन् । केचिद्विषे शरीरदीप्त्यै बलाय वासन्। प्राणरूपेणेति भावः ॥

॥ अथ त्रयोदशी ॥

य ऋष्वा ऋष्टिविद्युतः कवयः संति वेधसः ।
तमृषे मारुतं गणं नमस्या रमया गिरा ॥ १३ ॥
ये । ऋष्वाः । ऋष्टिऽविद्युतः । कवयः । संति । वेधसः ।
तं । ऋषे । मारुतं । गणं । नमस्य । रमय । गिरा ॥ १३ ॥

ये मरुत ऋष्वा दर्शनीया ऋष्टिविद्युत आयुधैर्विद्योतमानाः कवयो मेधाविनो वेधसः सर्वस्य विधातारः संति तं तेषां मारुतं गणं रमया रमणीयया गिरा स्तुत्या हे ऋषे श्यावाश्व नमस्य । परिचर । स्तुहि ॥

॥ अथ चतुर्दशी ॥

अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणा ।
दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत ॥ १४ ॥
अच्छ । ऋषे । मारुतं । गणं । दाना । मित्रं । न । योषणा ।
दिवः । वा । धृष्णवः । ओजसा । स्तुताः । धीभिः । इषण्यत ॥ १४ ॥

हे ऋषे मारुतं गणं मरुत्संघं मित्रं न आदित्यमिव दाना हविर्दानेन योषणा ॥ यौतेरिदं रूपं। यौतीति योषा स्तुतिः॥ तया चाच्छ आ गच्छेति शेषः। ऋषेरुत्तरार्द्धः प्रत्यक्षवादः। ओजसा बलेन हे धृष्णवो धर्षका मरुतो दिवो वा द्युलोकाद्वा। वाशब्दश्रुतेरितरलोकद्वयाद्वा । धीभिरस्मदीयाभिः स्तुतिभिः स्तुता इषण्यत । गच्छत यज्ञं ॥

॥ अथ पंचदशी ॥

नू मन्वान एषां देवाँ अच्छा न वक्षणा ।
दाना सचेत सूरिभिर्यामश्रुतेभिरंजिभिः ॥ १५ ॥
नु । मन्वानः । एषां । देवान् । अच्छ । न । वक्षणा ।
दाना । सचेत । सूरिऽभिः । यामऽश्रुतेभिः । अंजिऽभिः ॥ १५ ॥

नु क्षिप्रमेषां मरुतां । एतान्मरुत इत्यर्थः । मन्वानः स्तुवन् देवान्मरुद्यतिरिक्तान्वक्षणा वहनेन निमित्तेनाच्छ अभिप्राप्तुं न मनुते । स स्तोता सूरिभिर्मेधाविभिर्यामश्रुतेभिः शीघ्रगमनेन विश्रुतैरंजिभिः फलस्य व्यंजकैर्मरुद्भिः ॥ सर्वाः पंचम्यर्थे तृतीयाः ॥ उक्तलक्षणेभ्यो मरुद्भ्यो दानाभिमतदानानि सचेत । संगच्छते ॥

॥ अथ षोडशी ॥

प्र ये मे बंध्वेषे गां वोचंत सूरयः पृश्निं वोचंत मातरं ।
अधा पितरमिष्मिणं रुद्रं वोचंत शिक्कसः ॥ १६ ॥

प्र । ये । मे । बंधुऽएषे । गां । वोचंत । सूरयः । पृश्निं । वोचंत । मातरं ।
अध । पितरं । इष्मिणं । रुद्रं । वोचंत । शिक्कसः ॥ १६ ॥

ये मरुतो मे मह्यं बंध्वेषे स्वेषां बंधूनामन्वेषणे सति सूरयः प्रेरका गां माध्यमिकां वाचं गोदेवतां वा प्रवोचंत प्रावोचन् ॥ अविशिष्टमृषेर्वाक्यं । ऋषिर्मरुद्वाक्यमनुवदति । तस्मादुत्तरयोराख्यातयोर्यच्छब्दानन्वयान्निघातः ॥ ते पृश्निं द्युदेवतां पृश्निवर्णां गां वा मातरं वोचंत । अब्रुवन् । पृश्निये वै पयसो मरुतो जाता इति श्रुतेः । अधाथ पितरं स्वकीयमिष्मिणं गमनवंतमन्नवंतं वा रुद्रं वोचंत शिक्कसः शक्तास्ते । मरुतां रुद्रेण पुत्रत्वपरिग्रहो बहुकृत्व उपपादितः ॥

॥ अथ सप्तदशी ॥

सप्त मे सप्त शाकिन एकमेका शता ददुः ।
यमुनायामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे ॥ १७ ॥

सप्त । मे । सप्त । शाकिनः । एकंऽएका । शता । ददुः ।
यमुनायां । अधि । श्रुतं । उत् । राधः । गव्यं । मृजे । नि । राधः । अश्व्यं । मृजे ॥ १७ ॥

सप्त सप्तसंख्याकाः संघाः । सप्तगणा वै मरुत इति श्रुतेः । अदितिगर्भे वर्तमानं वायुमिंद्रः प्रविश्य सप्तधा विदार्य पुनरेकैकं सप्तधा व्यदारयत् त एकोनपंचाशन्मरुद्गणा अभवन्निति पुराणेषु प्रसिद्धं । ते च सप्तसंख्याकाः शाकिनः सर्वमपि कर्तुं शक्ताः । ते चैकमेकैकैको गणो मे मह्यं शता शतसंख्यकानि गवाश्वयूथानि ददुः । दत्तवंतः । प्रयच्छंत्विति वाशीः । तैर्दत्तं यमुनायां नद्यामधि ।

अयं सप्तम्यर्थानुवादी । तत्र श्रुतं प्रसिद्धं गव्यं गोसमूहात्मकं गोसंबंधि वा राधो धनमुन्मृजे । उन्मार्जयामि । तथा तैर्दत्तमश्व्यमश्वसमूहात्मकं तत्संबंधि वा राधो धनं निमृजे । निमार्ज्मि ॥

॥ इति चतुर्थस्य तृतीये दशमो वर्गः ॥

को वेद जानमिति षोडशर्चं नवमं सूक्तं । श्यावाश्व ऋषिः । आद्यापंचमीदशम्येकादशीपंचदश्यः ककुभः षष्ठीसप्तमीनवमीत्रयोदशीचतुर्दशीषोडश्यः सतोबृहत्योऽष्टमी द्वादशी च गायत्र्यौ द्वितीया बृहती तृतीयानुष्टुप् चतुर्थी पुरउष्णिक्। मरुतो देवता । तथा चानुक्रांतं । को वेद षोळश ककुब्बृहत्यनुष्टुप् पुरउष्णिक् ककुप्सतोबृहत्यौ गायत्री सतोबृहती ककुभौ गायत्री सतोबृहत्यौ ककुप्सतोबृहतीति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुतां ।
यद्युयुज्रे किलास्यः ॥१॥
कः । वेद । जानं । एषां । कः । वा । पुरा । सुम्नेषु । आस । मरुतां ।
यत् । युयुज्रे । किलास्यः ॥१॥

एषां ॥ मरुतां पूर्वसूक्ते प्रस्तुतत्वादन्वादेशविषयत्वादेषामित्यस्य निघातता ॥ जानमुत्पत्तिं को वेद । जानाति कः पुमान् । को वा पुरा पूर्वमप्येषां मरुतां सुम्नेषु सुखेष्वास । भवति । यद्यदैते किलास्यः किलासीः । पृषतीरित्यर्थः । ता युयुज्रे रथे योजितवंतः तदैषां स्थितिं बललक्षणानि सुखानि च को जानातीत्यर्थः । वेगविषये सर्वत्र वायोरुपमास्पदत्वादिति भावः ॥

॥ अथ द्वितीया ॥

ऐतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः ।
कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह ॥२॥
आ । एतान् । रथेषु । तस्थुषः । कः । शुश्राव । कथा । ययुः ।
कस्मै । सस्रुः । सुऽदासे । अनु । आपयः । इळाभिः । वृष्टयः । सह ॥२॥

एतान्मरुतो रथेषु तस्थुषः स्थितवतः क आशुश्राव । श्रावयेदित्यर्थः । यद्वैतेषां

क्रोशध्वनिं रथध्वनिं च कः शृणुयात्। कथा कथं ययुर्गच्छंति तदपि को जानाति। यद्वा तान् कथमन्ये देवादयोऽनुगच्छेयुः। कस्मै सुदासे सुदानायापयो बंधुभूता व्याप्ता वृष्टयो वर्षकाः॥ अयं कर्तरि क्विच्॥ इळाभिर्बहुविधैरन्नैः सह सहिता अनुसस्रुः। अनुक्रमेणावतरेयुः॥

॥ अथ तृतीया ॥

ते म आहुर्य आययुरुप द्युभिर्विभिर्मदे।

नरो मर्या अरेपस इमान्पश्यन्निति ष्टुहि ॥३॥

ते। मे। आहुः। ये। आऽययुः। उप। द्युऽभिः। विऽभिः। मदे।

नरः। मर्याः। अरेपसः। इमान्। पश्यन्। इति। स्तुहि ॥३॥

ऋषिर्ऋग्द्वयाभ्यां मरुत्प्रादुर्भावमाख्यास्यन्ननया प्रादुर्भूतान्पश्यन्नाह। ते मरुत इत्थं लपते मे मह्यमाहुः य उपाययुः ये मरुतो मां प्राप्ताः। कैः साधनैः। द्युभिर्द्योतमानैर्विभिर्गंतृभिरश्वैः। किमर्थं। मदे मदाय सोमपानजनिताय। किमाहुरिति तदनुब्रूते। नरो नेतारो मर्या मनुष्येभ्यो हिता अरेपसोऽलेपास्ते। हे ऋषे इमानस्मान् पश्यन् तथा स्थितान् चक्षुषावलोकयन् स्तुहीत्याहुः। यद्वेतीत्थं पश्यन् स्तुहीति॥

॥ अथ चतुर्थी ॥

ये अंजिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु।

श्राया रथेषु धन्वसु ॥४॥

ये। अंजिषु। ये। वाशीषु। स्वऽभानवः। स्रक्षु। रुक्मेषु। खादिषु।

श्रायाः। रथेषु। धन्वऽसु ॥४॥

अनया मरुतां स्वरूपं निरूपयति। हे मरुतो युष्माकं ये प्रसिद्धाः स्वभानवः स्वदीप्तयोऽजिष्वाभरणेषु श्राया आश्रयभूताः संति। ये च वाशीष्वायुधेषु। ये च स्रक्षु माल्येषु। ये रुक्मेषूरोभूषणेषु। ये च खादिषु हस्तपादस्थितकटकेषु। हस्तेषु खादिश्च कृतिश्च। ऋग्वे० १.१६८.३.। पत्सु खादयः। ऋग्वे० ५.५४.११.। इति हि श्रुती भवतः। रथेषु धन्वसु च ये च स्वभानवः श्रायाः संति। सुधन्वान इषुमंतः सरथाः पृश्निमातरः। ऋग्वे० ५.५७.२.। इति च निगमः। तान् सर्वान्

स्तुम इति शेषः। यद्वा ये स्वभानवः स्वायत्तदीप्तयो मरुतोऽंजिष्वाभरणेषु निमित्तेषु श्राया आश्रया भविष्यामः। ये च वाशीषु निमित्तेषु। एवं सर्वत्र योज्यं। तादृग्विधानिमान्पश्यन् स्तुहीति पूर्वत्र संबंधः। तेषामेवेदं वाक्यं ॥

॥ अथ पंचमी ॥

युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः।
वृष्टी द्यावो यतीरिव ॥५॥
युष्माकं। स्म। रथान्। अनु। मुदे। दधे। मरुतः। जीरऽदानवः।
वृष्टी। द्यावः। यतीःऽइव ॥५॥

हे जीरदानवः शीघ्रदाना हे मरुतो युष्माकं रथाननूद्दिश्य मुदे मोदाय दधे। धारयामि। करोमीत्यर्थः। सामर्थ्यात्स्तुतीरिति लभ्यते ॥ स्मेति पूरणः ॥ वृष्टी वृष्ट्यां यतीः सर्वत्र गच्छंतीर्द्यावो दीप्तीरिव दृश्यमानान् रथानिति संबंधः ॥

॥ इति चतुर्थस्य तृतीय एकादशो वर्गः ॥

कारीर्यां तिस्रः पिंड्यो होतव्याः। तत्र द्वितीयाया आ यं नर इत्यनुवाक्या। सूचितं च। आ यं नरः सुदानवो ददाशुषे विद्युन्महसो नरो अश्मदिद्यवः। आ० २.१३.। इति ॥

॥ सैषा षष्ठी ॥

आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः।
वि पर्जन्यं सृजंति रोदसी अनु धन्वना यंति वृष्टयः ॥६॥
आ। यं। नरः। सुऽदानवः। ददाशुषे। दिवः। कोशं। अचुच्यवुः।
वि। पर्जन्यं। सृजंति। रोदसी इति। अनु। धन्वना। यंति। वृष्टयः ॥६॥

नरो नेतारः सुदानवः शोभनदाना मरुतो यं कोशं। मेघनामैतत्। अपां कोशवद्धारकं मेघं ददाशुषे हविर्दत्तवते यजमानाय दिवोऽंतरिक्षादाचुच्यवुः आच्यावयंति पर्जन्यं मेघं रोदसी अनु द्यावापृथिव्यावनुसृत्य विसृजंति। विमोचयंति। पश्चात् धन्वना सर्वत्र गच्छतोदकेन सह वृष्टयो वृष्टिप्रदा मरुतो यंति। सर्वत्र व्याप्नुवंति ॥

॥ अथ सप्तमी ॥

ततृदानाः सिंधवः क्षोदसा रजः प्र ससुर्धेनवो यथा ।
स्यन्ना अश्वा इवाध्वनो विमोचने वि यद्वर्तंत एन्यः ॥७॥

ततृदानाः । सिंधवः । क्षोदसा । रजः । प्र । ससुः । धेनवः । यथा ।
स्यन्नाः । अश्वाःऽइव । अध्वनः । विऽमोचने । वि । यत् । वर्तंते । एन्यः ॥७॥

सिंधवः स्यंदमाना अपस्ततृदाना निर्भिंदंतो मेघात् मरुतः क्षोदसोदकेन सह रजोऽंतरिक्षं प्रससुः । प्रसरंति । धेनवो यथा पयः सिंचंत्यो नवप्रसूता गाव इव । किंच दृष्टांतांतरं । स्यन्ना आशुगतयोऽश्वा इव यथाध्वनो विमोचने मनुष्याणामध्वविमोकाय संचरंति तथेत्यर्थः । यद्यदैन्यः । नदीनामैतत् । नद्यो वि वर्तंते विविधं संचरंति । अथवा प्रतिनिवृत्य वर्तंते । प्रवर्धंत इत्यर्थः । तदेवं कुर्वंतीति पूर्वत्रान्वयः ॥

॥ अथाष्टमी ॥

आ यात मरुतो दिव आंतरिक्षादमादुत ।
माव स्थात परावतः ॥८॥

आ । यात । मरुतः । दिवः । आ । अंतरिक्षात् । अमात् । उत ।
मा । अव । स्थात । पराऽवतः ॥८॥

हे मरुतः परावतोऽत्यंतदूरदेशात् दिवो द्युलोकादायात । तथांतरिक्षादायात । उतापि चामादस्माल्लोकादायात । परावत इत्यत्र वा योज्यं । परावतो दूरदेशे तत्र तत्र द्युलोकादौ मावस्थात । अवस्थितिं मा कुरुत ॥

॥ अथ नवमी ॥

मा वो रसानितभा कुभा क्रुमुर्मा वः सिंधुर्नि रीरमत् ।
मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ॥९॥

मा । वः । रसा । अनितभा । कुभा । क्रुमुः । मा । वः । सिंधुः । नि । रीरमत् ।
मा । वः । परि । स्थात् । सरयुः । पुरीषिणी । अस्मे इति । इत् । सुम्नं । अस्तु । वः ॥९॥

हे मरुतो वो युष्मान् रसा । नदीनामैतत् । रसा नदी भवति । नि॰ ११.२५ ।

इति निरुक्तं। रसनवती शब्दवती। अनितभा। इता प्राप्ता भा यस्याः सेतभा। न तादृश्यनितभा। कुभा कुत्सितदीप्तिश्च मा नि रीरमत्। मा निकृष्टं रमतु। क्रुमुः सर्वचक्रमणः सिंधुः समुद्रश्च मा नि रीरमत्। तथा पुरीषिणी। पुरीषमुदकं। तद्वती सरयुरपि मा परि ष्ठात्। परितस्तिष्ठतु। मा निरुणद्धु। अस्मे इत् अस्मास्वेवास्तु सुम्नं त्वदागमनजनितं सुखं वो युष्माकं संबंधि युष्मत्स्वभूतं॥

॥ अथ दशमी ॥

तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनां।

अनु प्र यंति वृष्टयः॥१०॥

तं। वः। शर्धं। रथानां। त्वेषं। गणं। मारुतं। नव्यसीनां।

अनु। प्र। यंति। वृष्टयः॥१०॥

तं मारुतमित्यनेन संबध्यते। वो युष्माकं प्रेरकं नव्यसीनां नूतनानां रथानां शर्धं बलं त्वेषं दीप्तं तं मारुतं गणं च स्तौमीत्यर्थः। यद्वा रथानां रंहणशीलानां वो युष्माकं शर्धं परेषामभिभावुकं गणं स्तौमीत्येकमेव वाक्यं। अथ परोक्षकृतः। वृष्टयो युष्माननु प्र यंति। प्रकर्षेण गच्छंति। यद्वा वर्षका मरुतोऽनु अनुकूलं प्रकृष्टं यंति। गच्छंति॥

॥ इति चतुर्थस्य तृतीये द्वादशो वर्गः॥

॥ अथैकादशी ॥

शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः।

अनु क्रामेम धीतिभिः॥११॥

शर्धंऽशर्धं। वः। एषां। व्रातंऽव्रातं। गणंऽगणं। सुशस्तिऽभिः।

अनु। क्रामेम। धीतिऽभिः॥११॥

हे मरुत एषां वो युष्माकं शर्धं शर्धं तत्तद्बलं व्रातं व्रातं। अविवक्षितगणो व्रातः। तं तं व्रातं वो गणं गणं तं तं सप्तसप्तसमुदायात्मकं गणं गणं च सुशस्तिभिः शोभनस्तुतिभिर्धीतिभिः कर्मभिर्हविःप्रदानादिलक्षणैरनुक्रामेम। अनुगच्छेम॥

॥ अथ द्वादशी ॥

कस्मा अद्य सुजाताय रातहव्याय प्र ययुः ।
एना यामेन मरुतः ॥१२॥

कस्मै । अद्य । सुऽजाताय । रातऽहव्याय । प्र । ययुः ।
एना । यामेन । मरुतः ॥१२॥

अद्यास्मिन्दिने कस्मै सुजाताय रातहव्याय दत्तहविष्काय प्र ययुः प्रकर्षेण गच्छेयुरेनानेन यामेन रथेन मरुतः ॥

॥ अथ त्रयोदशी ॥

येन तोकाय तनयाय धान्यं बीजं वहध्वे अक्षितं ।
अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगं ॥१३॥

येन । तोकाय । तनयाय । धान्यं । बीजं । वहध्वे । अक्षितं ।
अस्मभ्यं । तत् । धत्तन । यत् । वः । ईमहे । राधः । विश्वऽआयु । सौभगं ॥१३॥

हे मरुतो येन सदयेन मनसा तोकाय पुत्राय तनयाय तत्पुत्राय धनाय वा धान्यं बीजमक्षितमक्षीणं वहध्वे धारयध्वे तेन चित्तेनास्मभ्यं तद्धान्यं बीजं धत्तन। यच्च वो युष्मानीमहे याचामहे राधो धनं विश्वायु सर्वान्नोपेतं कृत्स्नायुष्योपेतं वा सौभगं सौभाग्यं च तद्धत्तनेति समन्वयः ॥

॥ अथ चतुर्दशी ॥

अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः ।
वृष्ट्वी शं योराप उस्रि भेषजं स्याम मरुतः सह ॥१४॥

अति । इयाम । निदः । तिरः । स्वस्तिऽभिः । हित्वा । अवद्यं । अरातीः ।
वृष्ट्वी । शं । योः । आपः । उस्रि । भेषजं । स्याम । मरुतः । सह ॥१४॥

हे मरुतो वयं स्वस्तिभिः क्षेमैरवद्यं पापं हित्वा परित्यज्य निदो निंदकानरातीः शत्रून् तिरः प्राप्तान्। यद्वा तिरोऽन्तर्हितं। अतीयाम। अतिक्रम्य गच्छेम। तिरस्कुर्म इत्यर्थः। अनेनानिष्टपरिहारः प्रार्थित उत्तरेणेष्टप्राप्तिरुच्यते। वृष्ट्वी वृष्टिषु युष्मत्प्रेरितासु सतीषु शं सुखं योः पापानां यावनं चाप उदकानि ॥

शसः स्थाने जस् ॥ उस्रि गोमुक्तं भेषजं । यद्यप्येतदुदकनाम तथापि पृथगपामभिधानादत्र तद्धेतुकार्यमन्नमुच्यते । तत् सर्वं सह स्याम । लभेमहि हे मरुतो वयं । यद्वापो युष्मत्प्रेरिता उक्तं सर्वं कुर्वंतु । वयं सर्वे सहैव स्याम । भवेम युष्मत्स्वभूताः ॥

॥ अथ पंचदशी ॥

सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः ।
यं त्रायध्वे स्याम ते ॥१५॥
सुऽदेवः । समह । असति । सुऽवीरः । नरः । मरुतः । सः । मर्त्यः ।
यं । त्रायध्वे । स्याम । ते ॥ १५ ॥

हे समह । प्रशस्तवचनः समहशब्दः । हे पूजित मरुतां गण सुदेवः कल्याणमरुत्संज्ञकदेवोपेतोऽसति । भवति । हे नरो नेतारो हे मरुतः स मर्त्यः सुवीरः शोभनपुत्राद्युपेतश्चासति । भवति । यं मर्त्यं त्रायध्वे पालयध्वे । य एवं भवति ते वयं स्याम युष्मदीयाः ॥

॥ अथ षोडशी ॥

स्तुहि भोजान्स्तुवतो अस्य यामनि रणन्गावो न यवसे ।
यतः पूर्वाँ इव सखीँरनु ह्वय गिरा गृणीहि कामिनः ॥१६॥
स्तुहि । भोजान् । स्तुवतः । अस्य । यामनि । रणन् । गावः । न । यवसे ।
यतः । पूर्वान्ऽइव । सखीन् । अनु । ह्वय । गिरा । गृणीहि । कामिनः ॥ १६ ॥

हे ऋषे स्तुवतः स्तुतिं कुर्वतोऽस्य यजमानस्य यामनि यज्ञे भोजान् दातॄन्मरुतः स्तुहि । गावो न यवसे । तृणादिभक्षणाय गच्छंत्यो गावो यथा रमंते तद्वन्मरुतोऽपि रणन् । रमंतां । यतो गच्छतो मरुतः पूर्वान् पुरातनान् सखीनिवानुह्वय । आह्वय । कामिनः स्तुतीच्छावतो मरुतो गिरा स्तुत्या गृणीहि । स्तुहि ॥

॥ इति चतुर्थस्य तृतीये त्रयोदशो वर्गः ॥

प्र शर्धायेति पंचदशर्चं दशमं सूक्तं श्यावाश्वस्यार्षं मरुद्देवताकं । चतुर्दशी त्रिष्टुप् शिष्टा जगत्यः । प्र शर्धाय पंचोना जागतमुपांत्या त्रिष्टुबित्यनुक्रांतं ॥ सूक्तविनियोगो लैंगिकः ॥ आग्नेंद्रामारुत्यां प्रधानस्य याज्या । सूत्रितं च । प्र शर्धाय मारुताय स्वभानव इत्यैंद्रीमनूच्य मारुत्या यजेत् । आ० २.११. । इति ॥

॥ सैषा सूक्ते प्रथमा ॥

प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते ।
घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत ॥१॥
प्र । शर्धाय । मारुताय । स्वऽभानवे । इमां । वाचं । अनज । पर्वतऽच्युते ।
घर्मऽस्तुभे । दिवः । आ । पृष्ठऽयज्वने । द्युम्नऽश्रवसे । महि । नृम्णं । अर्चत ॥१॥

प्र अनजेति संबंधः । मारुताय मरुत्संबंधिने शर्धाय बलायेमां क्रियमाणां वाचं स्तुतिं प्रानज । प्रापय । स्वभानवे स्वायत्ततेजसे पर्वतच्युते पर्वतस्य च्यावयित्रे घर्मस्तुभे घर्मस्य स्तोभयित्रे दिव आ द्युलोकादागच्छते पृष्ठयज्वने षट् पृष्ठे रथंतरबृहदादिभिरीजानाय द्युम्नश्रवसे द्योतमानान्नाय महि महत् प्रभूतं द्युम्नं धनं हविर्लक्षणमर्चत । ददतेत्यर्थः ॥

कारीर्यां प्रथमस्याः पिंड्याः प्र वो मरुत इति याज्या । सूचितं च । प्र वो मरुतस्तविषा आ यं नरः । आ० २. १३. । इति ॥

॥ सैषा द्वितीया ॥

प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्वयुजः परिज्रयः ।
सं विद्युता दधति वाशति त्रितः स्वरंत्यापोऽवना परिज्रयः ॥२॥
प्र । वः । मरुतः । तविषाः । उदन्यवः । वयःऽवृधः । अश्वऽयुजः । परिऽज्रयः ।
सं । विऽद्युता । दधति । वाशति । त्रितः । स्वरंति । आपः । अवना । परिऽज्रयः ॥२॥

हे मरुतो वो युष्माकं गणाः प्र प्रादुर्भवंति । कीदृशा गणाः । तविषा दीप्ता महांतो वा उदन्यव उदकेच्छवो जगद्रक्षणार्थं वयोवृधोऽन्नस्य वर्धयितारोऽश्वयुजो गमनाय रथेऽश्वानां योक्तारः परिज्रयः परितो गंतारो विद्युता संदधति । संगच्छंते । तदानीं त्रितस्त्रिषु स्थानेषु तायमानो मेघो मरुद्गणो वा वाशति । शब्दयति । अस्मिन्पक्षे संघवादोऽयं । तदापो परिज्रयः परितो गंत्र्य आपोऽवनावनौ भूमौ स्वरंति । अधः पतंति ॥

विद्युन्महस इति तृतीया कारीर्यामेव द्वितीयस्याः पिंड्या याज्या । सूचितं च । विद्युन्महसो नरोऽश्मदिद्यवः कृष्णं नियानं हरयः सुपर्णाः । आ० २. १३. । इति ॥
तत्पाठस्तु ॥

विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुतः पर्वतच्युतः ।
अब्दया चिन्मुहुरा ह्रादुनीवृतः स्तनयदमा रभसा उदोजसः ॥३॥

विद्युत्ऽमहसः । नरः । अश्मऽदिद्यवः । वातऽत्विषः । मरुतः । पर्वतऽच्युतः ।
अब्दऽया । चित् । मुहुः । आ । ह्रादुनिऽवृतः । स्तनयत्ऽअमाः । रभसाः ।
उत्ऽओजसः ॥३॥

विद्युन्महसो विद्योतमानतेजसो नरो वृष्ट्यादेर्नेतारोऽश्मदिद्यवो व्याप्तायुधा अश्मसारमयायुधा वा वातत्विषः प्राप्तदीप्तयः पर्वतच्युतः पर्वतानां मेघानां वा च्यावयितारोऽब्दया चिन्मुहुरुदकानां दातारः ॥ शसो याजादेशः । चिदिति पूरणः ॥ ह्रादुनीवृतो ह्रादुन्या अशनेः प्रवर्तकाः स्तनयदमाः । अमाशब्दः साहित्यवाची । शब्दोपेतगणा इत्यर्थः । रभसा वृष्ट्यर्थमुद्युंजाना उदोजस उद्गतबला मरुतो वृष्ट्यर्थं प्रादुर्भवंतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

व्य१क्तून्रुद्रा व्यहानि शिक्वसो व्यं१तरिक्षं वि रजांसि धूतयः ।
वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ॥४॥

वि । अक्तून् । रुद्राः । वि । अहानि । शिक्वसः । वि । अंतरिक्षं । वि । रजांसि । धूतयः ।
वि । यत् । अज्रान् । अजथ । नावः । ईं । यथा । वि । दुःऽगानि । मरुतः । न । अह ।
रिष्यथ ॥४॥

हे रुद्रा रुद्रपुत्रा मरुतः अक्तून् रात्रीर्व्यजथेत्युत्तरार्द्धगतेन संबध्यते । एवं सर्वत्रेति । क्षिपथेति तस्यार्थः । अहाहान्यपि व्यजथ । हे शिक्वसः शक्ताः सर्वमपि कर्तुमंतरिक्षं व्यजथ । तथा रजांसि व्यजथ । हे धूतयः कंपका यद्यदाज्रान्मेघान् व्यजथ गमयथ नाव ईं ता यथा समुद्रं तद्वत् दुर्गाणि शत्रुनगराणि वि व्यजथ हे मरुतो नाह रिष्यथ । नैव हिंसथ ॥

॥ अथ पंचमी ॥

तद्वीर्यं वो मरुतो महित्वनं दीर्घं ततान सूर्यो न योजनं ।
एता न यामे अगृभीतशोचिषोऽनश्वदां यन्न्ययातना गिरिं ॥५॥

तत्। वीर्यं। वः। मरुतः। महिऽत्वनं। दीर्घं। ततान। सूर्यः। न। योजनं।
एताः। न। यामे। अगृभीतऽशोचिषः। अनश्वऽदां। यत्। नि। अयातन। गिरिं ॥५॥

हे मरुतो वो युष्माकं तद्वीर्यं प्रसिद्धं सामर्थ्यं महित्वनं महत्त्वं दीर्घमत्यंतमायतं ततान। तनोति। लोके सूर्यो न योजनं सूर्यस्तेज इव। एता न एतवर्णा देवानामश्वा इव। ते यथा यामे गमने योजनं दीर्घं तन्वंति तद्वदित्यपरो दृष्टांतः। ते चागृभीतशोचिषोऽगृहीततेजस्काः। यद्वैतन्मरुतां विशेषणं। हे मरुतो यूयमगृभीतशोचिषः संतो यद्यदानश्वदां व्यापकोदकादातारं पणिभिरपहृतानामश्वानामप्रदातारं वा गिरिं मेघं पर्वतं वा न्ययातन निहतवंतः॥

॥ इति चतुर्थस्य तृतीये चतुर्दशो वर्गः॥

॥ अथ षष्ठी॥

अभ्राजि शर्धो मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः।
अध स्मा नो अरमतिं सजोषसश्चक्षुरिव यंतमनु नेषथा सुगं ॥६॥

अभ्राजि। शर्धः। मरुतः। यत्। अर्णसं। मोषथ। वृक्षं। कपनाऽइव। वेधसः।
अध। स्म। नः। अरमतिं। सऽजोषसः। चक्षुःऽइव। यंतं। अनु। नेषथ। सुऽगं ॥६॥

हे वेधसो वृष्टेर्विधातारो हे मरुतः शर्धो भवतां गणमभ्राजि। भ्राजते। यद्यस्मादर्णसमुदकवंतं वृक्षं। वृश्च्यते विदार्यत इति वृक्षो मेघः। तं मोषथ ताडयथेत्यर्थः। कपनेव। इवेत्यनर्थकः। कंपनाः संतः। यद्वा कंपनाः क्रिमयो वृक्षं घुणादयः। ते यथा मुष्णंति तद्वत्। अधापि च। स्मेति पूरणः। नोऽस्मान्। मामित्यर्थः। हे सजोषसो युष्मासु परस्परं समानप्रीतयो यूयमरमतिमारमणं धनादिकं प्रति यंतं गच्छंतमनुनेषथ अनुक्रमेण नयथ सुगं सुगमनं मार्गं। तत्र दृष्टांतः। चक्षुरिव। तद्यथा मार्गप्रदर्शनेन नायकं भवति तद्वत्॥

॥ अथ सप्तमी॥

न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति।
नास्य राय उप दस्यंति नोतय ऋषिं वा यं राजानं वा सुषूदथ ॥७॥

न। सः। जीयते। मरुतः। न। हन्यते। न। स्रेधति। न। व्यथते। न। रिष्यति।
न। अस्य। रायः। उप। दस्यंति। न। ऊतयः। ऋषिं। वा। यं। राजानं। वा। सुसूदथ ॥७॥

हे मरुतो यूयं यमृषिं मंत्रद्रष्टारं ब्राह्मणं राजानं वा सुषूदथ क्षारयथ प्रेरयथ सत्कर्मसु स ऋषी राजा वा न जीयते। अन्यैर्न पराभाव्यते॥ जि जये ज्या वयोहानावित्यस्य वा रूपं॥ हे मरुतो न हन्यते। न हिंस्यते। अत्यर्थं प्राणैर्न वियुज्यते। न स्रेधति। न क्षीयते। न व्यथते। न पीड्यते। न रिष्यति। न हिंस्यते। अत्र हिंसा बाधमात्रं। अस्य रायो धनानि नोपदस्यंति। नोपक्षीयंते। तथा नोतयो रक्षा अप्युपदस्यंति॥

कारीर्यामेव तृतीयस्याः पिंड्या याज्या नियुत्वंत इत्येषा। सूचितं च। नियुत्वंतो ग्रामजितो यथा नरोऽग्ने बाधस्व वि मृधो वि दुर्गहा। आ० २.१३.। इति॥

॥ सैषाष्टमी ॥

नियुत्वंतो ग्रामजितो यथा नरोऽर्यमणो न मरुतः कबंधिनः।
पिन्वंत्युत्सं यदिनासो अस्वरन्व्युंदंति पृथिवीं मध्वो अंधसा॥८॥

नियुत्वंतः। ग्रामऽजितः। यथा। नरः। अर्यमणः। न। मरुतः। कबंधिनः।
पिन्वंति। उत्सं। यत्। इनासः। अस्वरन्। वि। उंदंति। पृथिवीं। मध्वः। अंधसा॥८॥

नियुत्वंतो नियुत्संज्ञकैरश्वैस्तद्वंतो मरुतो ग्रामजितः संघात्मकस्य पदार्थस्य विश्लेषयितारो नरो नराकारा नेतारो वा। मरुतो नियुत्वंतः। अयं शब्दोऽश्वसामान्ये वर्तते। नितरां यवनवंतोऽश्ववंतो ग्रामजितो ग्रामस्य जेतारो नर इव मनुष्या इव तथा भवंति। अर्यमणो न अर्यमप्रभृतय आदित्या इव। दीप्ता इति शेषः। तादृशा मरुतः कबंधिन उदकवंतो भवंति। यद्यदेनास ईश्वरा उत्सं कूपादिनिम्नप्रदेशं मेघं वा पिन्वंति प्याययंत्युदकेन। यदास्वरन् शब्दयंति यदा व्युंदंति पृथिवीं मध्वो मधुरस्योदकस्यांधसा सारेण तदैवं भवंति। यद्वा यदास्वरन् तदा पिन्वंत्युत्समिनासः तदांधसः पृथिवीं व्युंदंतीति॥

॥ अथ नवमी ॥

प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः।
प्रवत्वतीः पथ्या अंतरिक्ष्याः प्रवत्वंतः पर्वता जीरदानवः॥९॥

प्रवत्वती। इयं। पृथिवी। मरुत्ऽभ्यः। प्रवत्वती। द्यौः। भवति। प्रयत्ऽभ्यः।
प्रवत्वतीः। पथ्याः। अंतरिक्ष्याः। प्रवत्वंतः। पर्वताः। जीरऽदानवः॥९॥

इयं पृथिवी मरुद्भ्यो मरुतामर्थाय प्रवत्वती। प्रवंतः प्रकर्षवंतो विस्तीर्णाः प्रदेशा यस्यां सा प्रवत्वती। तादृशी भवति। कृत्स्नापि भूमिर्मरुत्परा भवतीत्यर्थः। तां सर्वामपि व्याप्नुवंतीति यावत्। तथा द्यौरपि प्रवद्भ्यः प्रकर्षेण गच्छद्भ्यस्तेभ्यः प्रवत्वती भवति। सापि मरुतां संचाराय। तथांतरिक्ष्या अंतरिक्षे भवाः पथ्याः सुगतयोऽपि प्रवत्वतीः प्रवत्वत्यो मरुद्भ्यो भवंति। पर्वता अद्रयो मेघा वा प्रवत्वंतो भवंति जीरदानवः क्षिप्रदाना मरुद्भ्यः॥

॥ अथ दशमी ॥

यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः।
न वोऽश्वाः श्रथयंताह सिस्रतः सद्यो अस्याध्वनः पारमश्नुथ ॥१०॥

यत्। मरुतः। सऽभरसः। स्वःऽनरः। सूर्ये। उत्ऽइते। मदथ। दिवः। नरः।
न। वः। अश्वाः। श्रथयंत। अह। सिस्रतः। सद्यः। अस्य। अध्वनः। पारं। अश्नुथ ॥१०॥

हे मरुतः सभरसः सहबलाः स्वर्णरः सर्वस्य नेतारो यूयं यद्यदा सूर्ये उदित उन्नते मध्याह्ने मदथ सोमेन हे दिवो द्युलोकस्य नरो नेतारः। यदा सोमं पातुमिच्छथेत्यर्थः। तदा वोऽश्वाः सिस्रतः सरंतो नाह श्रथयंत। नैव श्लथयंति। सद्यस्तदानीमेवास्याध्वनो देवयजनमार्गस्य पारमश्नुथ। व्याप्नुथ। यद्वा यदा सोमेन मदथ तदा त्वदीया अश्वा न शिथिला भवंति। यूयं च कृत्स्नस्य लोकत्रयमार्गस्य पारमश्नुथ॥

॥ इति चतुर्थस्य तृतीये पंचदशो वर्गः॥

॥ अथैकादशी ॥

अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे शुभः।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ॥११॥

अंसेषु। वः। ऋष्टयः। पत्ऽसु। खादयः। वक्षःऽसु। रुक्माः। मरुतः। रथे। शुभः।
अग्निऽभ्राजसः। विऽद्युतः। गभस्त्योः। शिप्राः। शीर्षऽसु। विऽतताः। हिरण्ययीः ॥११॥

हे मरुतो वो युष्माकमंसेष्वृष्टय आयुधानि भासंत इति शेषः। पत्सु खादयः कटकाः। वक्षःसु रुक्मा हाराः। रथे शुभो मधुराग्नुषा आपः। अग्निभ्राजसोऽग्निदीप्ता

विद्युतो गभस्त्योर्हस्तयोर्भासंत इत्यर्थः । शीर्षसु शिरःसु हिरण्ययीर्हिरण्मय्यः शिप्रा उष्णीषमय्यो वितता विस्तृताः । प्रतिवाक्यं वितता इति वा संबंधनीयं ॥

॥ अथ द्वादशी ॥

तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ ।
समच्यंत वृजनातित्विषंत यत्स्वरंति घोषं विततमृतायवः ॥१२॥

तं । नाकं । अर्यः । अगृभीतऽशोचिषं । रुशत् । पिप्पलं । मरुतः । वि । धूनुथ ।
सं । अच्यंत । वृजना । अतित्विषंत । यत् । स्वरंति । घोषं । विऽततं । ऋतऽयवः ॥१२॥

हे मरुतोऽर्यो गंतारो यूयं तं प्रसिद्धं नाकमादित्यं । नास्मिन्नकमस्तीति नाकः । अगृभीतशोचिषमसुरैरनपहततेजस्कं तं रुशच्छुभ्रवर्णं पिप्पलमुदकं वि धूनुथ । विविधं चालयथ ॥ अयं द्विकर्मकः ॥ यद्यदा वृजना बलानि समच्यंत संगता बलिनो भवथ । हविर्भिरसहन्नैरिति भावः । पश्चादतित्विषंत दीप्ता भवथ ॥ उभयत्र पुरुषव्यत्ययः ॥ यद्वा यदासुरा वृजना बलैः समच्यंत अतित्विषंत तदा घोषं भयजनकं शब्दं विततं विस्तृतं स्वरंति । कुरुतेत्यर्थः । ऋतायव उदकमिच्छंतो यूयं । यद्वोत्तरार्द्ध ऋत्विग्यजमानपरतया व्याख्येयः । यद्यदा ऋतायवो यज्ञकामा यजमानादयो यदा समच्यंत संगता वृजना बलान्यतित्विषंत च स्वरंति घोषं स्तोत्रं विततं तदानीं पिप्पलं विधूनुथेति संबंधः ॥

॥ अथ त्रयोदशी ॥

युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः ।
न यो युच्छति तिष्यो३ यथा दिवो३स्मे रारंत मरुतः सहस्रिणं ॥१३॥

युष्माऽदत्तस्य । मरुतः । विऽचेतसः । रायः । स्याम । रथ्यः । वयस्वतः ।
न । यः । युच्छति । तिष्यः । यथा । दिवः । अस्मे इति । ररंत । मरुतः । सहस्रिणं ॥१३॥

हे विचेतसो विविधप्रज्ञा हे मरुतो युष्मादत्तस्य युष्माभिर्दत्तस्य वयस्वतोऽन्नवतो रायो धनस्य स्याम । भवेम स्वामिनः । के । रथ्यो रथस्वामिनो वयं । यो युष्माभिर्दत्तो रा न युच्छति न च्यवते । यथा दिवः सकाशात्तिष्य आदित्यो न युच्छति । तथास्मे अस्मासु सहस्रिणमपरिमितं रारंत । रमयत हे मरुतः ॥

॥ अथ चतुर्दशी ॥

यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रं ।
यूयमर्वंतं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमंतं ॥१४॥
यूयं । रयिं । मरुतः । स्पार्हऽवीरं । यूयं । ऋषिं । अवथ । सामऽविप्रं ।
यूयं । अर्वंतं । भरताय । वाजं । यूयं । धत्थ । राजानं । श्रुष्टिऽमंतं ॥१४॥

हे मरुतो यूयं रयिं धनं स्पार्हवीरं स्पृहणीयैर्वीरैः पुत्रभृत्यादिभिरुपेतं धत्थ। दत्थ। हे मरुतो यूयं सामविप्रं साम्नां विविधं प्रेरयितारं यद्वा सामसहिता विप्रा यस्य तादृशमृषिमवथ। रक्षथ। हे यूयमर्वंतमश्वं वाजमन्नं च भरताय देवान् बिभ्रते श्यावाश्वाय धत्थ। हे मरुतो यूयं राजानं दीप्तं स्वामिनं वा श्रुष्टिमंतं सुखवंतं। पुत्रमित्यर्थः। धत्थ ॥

॥ अथ पंचदशी ॥

तद्वो यामि द्रविणं सद्यऊतयो येना स्व१र्ण ततनाम नॄँरभि ।
इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ॥१५॥
तत् । वः । यामि । द्रविणं । सद्यःऽऊतयः । येन । स्वः । न । ततनाम । नॄन् । अभि ।
इदं । सु । मे । मरुतः । हर्यत । वचः । यस्य । तरेम । तरसा । शतं । हिमाः ॥१५॥

हे सद्यऊतयः। तदानीमेव रक्षा येषां ते तादृशाः। सद्योगमना वा वो युष्मान् तद्द्रविणं धनं यामि। याचामहे। येन धनेन नॄनस्मत्पुत्रभृत्यादीनभिततनाम स्वर्ण आदित्य इव रश्मीन्। हे मरुतो मे मम स्वभूतमिदमिदानीं क्रियमाणं वचः स्तोत्रं सु सुष्ठु हर्यत। कामयध्वं। यस्य स्तोत्रवचसस्तरसा बलेन शतं शतसंख्याकान् हिमा हेमंतान् तरेम। शतसंवत्सरं जीवेमेत्यर्थः ॥

॥ इति चतुर्थस्य तृतीये षोडशो वर्गः ॥

प्रयज्यव इति दशर्चमेकादशं सूक्तं श्यावाश्वस्यार्षं मारुतं। दशमी त्रिष्टुप् शिष्टा जगत्यः। प्रयज्यवो दशांत्या त्रिष्टुबित्यनुक्रमणिका ॥ आभिप्लविके षष्ठेऽहन्याग्निमारुत इदं सूक्तं मारुतनिविद्धानीयं। सूचितं च। प्रयज्यव इमं स्तोममित्याग्निमारुतं। आ० ७. ७.। इति ॥

॥ तत्र प्रथमा ॥

प्रयंज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः ।
ईयंते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत ॥१॥
प्रऽयंज्यवः । मरुतः । भ्राजत्ऽऋष्टयः । बृहत् । वयः । दधिरे । रुक्मऽवक्षसः ।
ईयंते । अश्वैः । सुऽयमेभिः । आशुऽभिः । शुभं । यातां । अनु । रथाः । अवृत्सत ॥१॥

प्रयज्यवः प्रकर्षेण यष्टारो भ्राजदृष्टयो दीप्तायुधा मरुतो बृहत् प्रभूतं वयो यौवनलक्षणं प्रभूतमन्नं वा दधिरे । धारयंति । रुक्मवक्षसो हारायतवक्षस्काः । ते मरुतः सुयमेभिः सुखेन नियमितुं शक्यैराशुभिः शीघ्रगैरश्वैरीयंते । प्राप्यंते । शुभं शोभनं यथा भवति तथा । यद्वोदकमभिलक्ष्य यातां गच्छतां मरुतां रथा अप्यन्ववृत्सत । अनुवर्तंते ॥

॥ अथ द्वितीया ॥

स्वयं दधिध्वे तविषीं यथा विद बृहन्महांत उर्विया वि राजथ ।
उतांतरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत ॥२॥
स्वयं । दधिध्वे । तविषीं । यथा । विद । बृहत् । महांतः । उर्विया । वि । राजथ ।
उत । अंतरिक्षं । ममिरे । वि । ओजसा । शुभं । यातां । अनु । रथाः । अवृत्सत ॥२॥

हे मरुतो यूयं स्वयमसहायेनैव दधिध्वे । धारयध्वे । कुरुध्व इत्यर्थः । किं । तविषीं बलं सामर्थ्यं । यथा विद जानीथ । अप्रतिबद्धसामर्थ्या इत्यर्थः । हे महांतो यूयमुर्वियोरवः संतो विराजथ । उतापि चांतरिक्षमोजसा बलेन विममिरे । व्याप्नुथ । शुभमित्यादि गतं ॥

॥ अथ तृतीया ॥

साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः ।
विरोकिणः सूर्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत ॥३॥
साकं । जाताः । सुऽभ्वः । साकं । उक्षिताः । श्रिये । चित् । आ । प्रऽतरं । ववृधुः । नरः ।
विऽरोकिणः । सूर्यस्यऽइव । रश्मयः । शुभं । यातां । अनु । रथाः । अवृत्सत ॥३॥

साकं सहैव जाता उत्पन्ना सुभ्वः सुष्ठु भवंतः । महांत इत्यर्थः । तथैव साकं

सहैवोक्षिताः सेक्तारो वर्षकाः श्रिये चित् शोभाया एव प्रतरं प्रकृष्टतरमा सर्वतो ववृधुः । अवर्धयन् । नरः कर्मणां नेतारो विरोकिणः विरोचमानाः सूर्यस्येव रश्मयः सूर्यरश्मय इव । शुभमित्यादि गतं ॥

॥ अथ चतुर्थी ॥

आभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणं ।

उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सत ॥४॥

आऽभूषेण्यं । वः । मरुतः । महिऽत्वनं । दिदृक्षेण्यं । सूर्यस्यऽइव । चक्षणं ।

उतो इति । अस्मान् । अमृतऽत्वे । दधातन । शुभं । यातां । अनु । रथाः । अवृत्सत ॥४॥

हे मरुतो वो युष्माकं महित्वनं महत्त्वमाभूषेण्यं स्तुत्यं । किंच सूर्यस्येव चक्षणं रूपमिव दिदृक्षेण्यं दर्शनीयं । उतो अपि चास्मानमृतत्वे मोक्षे । स्वर्ग इत्यर्थः । तत्र दधातन । धारयत । शिष्टं गतं ॥

कारीर्यां प्रथमस्याः पिंड्या उदीरयथेत्यनुवाक्या । सूत्रितं च । उदीरयथा मरुतः समुद्रतः प्र वो मरुतस्तविषा उदन्यवः । आ° २.१३. । इति ॥

॥ सैषा पंचमी ॥

उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।

न वो दस्रा उप दस्यंति धेनवः शुभं यातामनु रथा अवृत्सत ॥५॥

उत् । ईरयथ । मरुतः । समुद्रतः । यूयं । वृष्टिं । वर्षयथ । पुरीषिणः ।

न । वः । दस्राः । उप । दस्यंति । धेनवः । शुभं । यातां । अनु । रथाः । अवृत्सत ॥५॥

हे मरुतो यूयं समुद्रतः समुद्रवणसाधनादंतरिक्षादुदीरयथ । प्रेरयथ वृष्टिं । अयमेवार्थः पुनरुच्यते । हे पुरीषिणः । पृणातेः प्रीणातेर्वा पुरीषमुदकं । हे तद्वंतो यूयं वृष्टिं वर्षयथ । हे दस्रा दर्शनीयाः शत्रूणामुपक्षपयितारो वा वो युष्माकं धेनवः प्रीणयितारो मेघा नोपदस्यंति । न शुष्यंति ॥

॥ इति चतुर्थस्य तृतीये सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

यदश्वान्धूर्षु पृषतीरयुग्ध्वं हिरण्ययान्प्रत्यत्काँ अमुग्ध्वं ।

विश्वा इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत ॥६॥

यत्। अश्वान्। धूःऽसु। पृषतीः। अयुग्ध्वं। हिरण्ययान्। प्रति। अत्कान्। अमुग्ध्वं।
विश्वाः। इत्। स्पृधः। मरुतः। वि। अस्यथ। शुभं। याताः। अनु। रथाः। अवृत्सत ॥६॥

हे मरुतो यूयं यद्यदाश्वान् धूर्षु रथसंबंधिनीष्वयुग्ध्वं योजितवंतः स्थ। कीदृशा-नश्वान्। पृषतीः। पृषत्यो मरुतामित्युक्तत्वात्। पृषद्वर्णा वडवाः। सारंगी वाचा-श्वशब्दवाच्या। हिरण्ययान्हिरण्यवर्णानत्कान्कवचान् प्रत्यमुग्ध्वं प्रत्यमुंचत। एवं कृत्वा विश्वा इत् स्पृधः सर्वानपि संग्रामान् हे मरुतो व्यस्यथ। विक्षिपथ। शुभमित्यादि गतं ॥

॥ अथ सप्तमी ॥

न पर्वता न नद्यो वरंत वो यत्राचिध्वं मरुतो गच्छथेदु तत्।
उत द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सत ॥७॥

न। पर्वताः। न। नद्यः। वरंत। वः। यत्र। अचिध्वं। मरुतः। गच्छथ। इत्। ऊं इति। तत्।
उत। द्यावापृथिवी इति। याथन। परि। शुभं। याताः। अनु। रथाः। अवृत्सत ॥७॥

हे मरुतो वो युष्मान् पर्वताः शिलोच्चया न वरंत। न वारयंतु। तथा नद्यश्च न वारयंतु। किंतु यत्र यस्मिन्यज्ञादिस्थानेऽचिध्वं जानीथ संकल्पयथ तत्स्थानं गच्छथेदु। गच्छथैव। उतापि च द्यावापृथिवी च परि परितो याथन। याथ वृष्ट्यर्थमिति ॥

॥ अथाष्टमी ॥

यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते।
विश्वस्य तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत ॥८॥

यत्। पूर्व्यं। मरुतः। यत्। च। नूतनं। यत्। उद्यते। वसवः। यत्। च। शस्यते।
विश्वस्य। तस्य। भवथ। नवेदसः। शुभं। याताः। अनु। रथाः। अवृत्सत ॥८॥

हे मरुतो यूयं यत्पूर्व्यं पूर्वतनं पूर्वमनुष्ठितं यत्कर्मास्ति तदित्यर्थः। यच्च नूतनं कर्मास्ति। यच्चोद्यत ऊर्ध्वं प्राप्यते। स्तूयत इत्यर्थः। हे वसवो वासका यच्च शस्यते शंसनं क्रियते तस्य विश्वस्योत्कृष्टस्य नवेदसो जानंतो भवथ ॥

॥ अथ नवमी ॥

मृळत नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यंतन ।

अधि स्तोत्रस्य सख्यस्य गातन शुभं यातामनु रथा अवृत्सत ॥९॥

मृळत । नः । मरुतः । मा । वधिष्टन । अस्मभ्यं । शर्म । बहुलं । वि । यंतन ।

अधि । स्तोत्रस्य । सख्यस्य । गातन । शुभं । यातां । अनु । रथाः । अवृत्सत ॥९॥

हे मरुतो नोऽस्मान् मृळत । सुखयत । मा वधिष्टन । असम्यक्करणादिजनितेन कोपेन मा वधिध्वं । किंत्वस्मभ्यं शर्म सुखं बहुलमत्यधिकं वियंतन । कुरुत । किंच स्तोत्रस्य स्तोत्रं सख्यस्य सख्यमधिगातन । अधिगच्छत । स्तुतिमनुभूयास्मासु सख्यं कुरुतेत्यर्थः ॥

॥ अथ दशमी ॥

यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः ।

जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणां ॥१०॥

यूयं । अस्मान् । नयत । वस्यः । अच्छ । निः । अंहतिऽभ्यः । मरुतः । गृणानाः ।

जुषध्वं । नः । हव्यऽदातिं । यजत्राः । वयं । स्याम । पतयः । रयीणां ॥१०॥

हे मरुतो यूयमस्मान्वस्यो वसीयो धनं स्वर्गादिलक्षणं स्थानं वाच्छाभिलक्ष्य नयत । प्रापयत । किंचांहतिभ्यः पापेभ्यो निर्णयत । निर्गमयत गृणानाः स्तूयमानाः ॥ कर्मणि कर्तृप्रत्ययः ॥ जुषध्वं सेवध्वं नोऽस्माकं हव्यदातिं हविर्दानवंतं यज्ञं हे यजत्रा यष्टव्या यूयं । वयं च रयीणां बहुविधानां धनानां पतयः स्याम । भवेम ॥

॥ इति चतुर्थस्य तृतीयेऽष्टादशो वर्गः ॥

अग्ने शर्धंतमिति नवर्चं द्वादशं सूक्तं श्यावाश्वस्यार्षं मारुतं । तृतीयासप्तम्यौ सतोबृहत्यौ शिष्टा बृहत्यः । अग्ने नव बार्हतं तृतीयासप्तम्यौ सतोबृहत्यावित्यनुक्रमणिका ॥

॥ तत्र प्रथमा ॥

अग्ने शर्धंतमा गणं पिष्टं रुक्मेभिरंजिभिः ।

विशो अद्य मरुतामव ह्वये दिवश्चिद्रोचनादधि ॥१॥

अग्ने । शर्धंतं । आ । गणं । पिष्टं । रुक्मेभिः । अंजिऽभिः ।

विशः । अद्य । मरुतां । अव । ह्वये । दिवः । चित् । रोचनात् । अधि ॥१॥

हे अग्ने शर्धंतं शत्रूनभिभवंतं यज्ञायोत्सहमानं वा गणं मरुतां गणमाह्वयेति शेषः । कीदृशं गणं । रुक्मेभी रुक्मै रोचमानैरंजिभिराभरणैश्च पिष्टमवयवितं । युक्तमित्यर्थः । अद्यास्मिन्यागदिने मरुतां विशः प्रजाः । गणानित्यर्थः । तान्रोचनाद्रोचमानात् दिवो द्युलोकात् । अधीति पंचम्यर्थानुवादी । चित्पूरणः । अवावस्तादस्मदभिमुखं ह्वये । आह्वयामि ॥

॥ अथ द्वितीया ॥

यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः ।

ये ते नेदिष्ठं हवनान्यागमन्तान्वर्ध भीमसंदृशः ॥२॥

यथा । चित् । मन्यसे । हृदा । तत् । इत् । मे । जग्मुः । आऽशसः ।

ये । ते । नेदिष्ठं । हवनानि । आऽगमन् । तान् । वर्ध । भीमऽसंदृशः ॥२॥

हे अग्ने त्वं हृदा हृदयेन मरुतो यथा चिन्मन्यसे । चिदिति पूजायां । येन प्रकारेणातिपूजितं जानासि । तेष्वादरं करोषीत्यर्थः । तदित्तथैव मे मदर्थं जग्मुर्गच्छंत्वाशस आशंसितार इच्छंतः शत्रून् हिंसंतो वा । अनंतरं ये मरुतो नेदिष्ठमत्यंतांतिकं संनिधावेव ते तव हवनान्याह्वानानि श्रुत्वागमन् आगच्छंति तान् भीमसंदृशः कालविलंबासहनेन भयंकरदर्शनान्वर्ध । वर्धय हविःप्रापणेन ॥

॥ अथ तृतीया ॥

मीळ्हुष्मतीव पृथिवी पराहता मदंत्येत्यस्मदा ।

ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुः ॥३॥

मीळ्हुष्मतीऽइव । पृथिवी । पराऽहता । मदंती । एति । अस्मत् । आ ।

ऋक्षः । न । वः । मरुतः । शिमीऽवान् । अमः । दुध्रः । गौःऽइव । भीमऽयुः ॥३॥

मीळ्हुष्मती प्रबलस्वामिका पराहतान्यैरभिभूता पृथिवीव । अत्र पृथिवीशब्दस्तदधिष्ठितां प्रजां लक्षयति । सा यथा स्वस्वामिनमुपद्रुताभिगच्छति तद्वदिति । मरुतां साकल्येन सर्वथा प्राप्तेर्दृष्टांतः । एवं मदंती हृष्यंती मरुत्सेनास्मत् । अस्मानित्यर्थः । ऐति । आगच्छति । हे मरुतो वो युष्माकममो बलं गण ऋक्षो

न अग्निरिव शिमीवान् कर्मवान् दुध्रो दुर्धरो गौरिव भीमयुर्भीमैर्वृषभैर्युक्तो गौरिव । स यथा शिमीवान् कर्मवान् ॥

॥ अथ चतुर्थी ॥

नि ये रिणंत्योजसा वृथा गावो न दुर्धुरः ।

अश्मानं चित्स्वर्यं१ पर्वतं गिरिं प्र च्यावयंति यामभिः ॥४॥

नि । ये । रिणंति । ओजसा । वृथा । गावः । न । दुःऽधुरः ।

अश्मानं । चित् । स्वर्यं । पर्वतं । गिरिं । प्र । च्यवयंति । यामऽभिः ॥४॥

ये मरुत ओजसा स्वीयेन बलेन निरिणंति हिंसंति शत्रून् वृथानायासेन स्वसंचारमात्रेण गावो न दुर्धुरो दुःखेन हिंस्या अश्वा इव । ते मरुतः स्वर्यं शब्दयंतमश्मानं व्याप्तं पर्वतं जगत्पूरकोदकवंतं । पर्ववान्पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वा । नि० १.२०. । इति निरुक्तं । तादृशं गिरिं मेघं । यद्वा पर्वतमिति विशेष्यं गिरिमिति विशेषणं । निगिरत्युदकमिति गिरिः । तं यामभिर्गमनैः प्रच्यावयंत्युदकनिर्गमनार्थं ॥

॥ अथ पंचमी ॥

उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानां ।

मरुतां पुरुतममपूर्व्यं गवां सर्गमिव ह्वये ॥५॥

उत् । तिष्ठ । नूनं । एषां । स्तोमैः । संऽउक्षितानां ।

मरुतां । पुरुऽतमं । अपूर्व्यं । गवां । सर्गंऽइव । ह्वये ॥५॥

हे मरुतो यूयमुत्तिष्ठ । उत्तिष्ठत ॥ व्यत्ययेनैकवचनं ॥ नूनं निश्चयमेषां स्तोमैः स्तोत्रैः समुक्षितानां वर्धितानां मरुतां । यद्वा स्तोमैरुपह्वय इति संबंधः । तादृशां मरुतां पुरुतमं प्रभूततममपूर्व्यं । न विद्यते पूर्वो येभ्यस्तमपूर्व्यं सर्गं संघं गवामुदकानां प्रसिद्धानां गवां वा सर्गं संघमिव ह्वये । आह्वये ॥

॥ इति चतुर्थस्य तृतीय एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

युंग्ध्वं ह्यरुषी रथे युंग्ध्वं रथेषु रोहितः ।

युंग्ध्वं हरी अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ॥६॥

युंग्ध्वं । हि । अरुषीः । रथे । युंग्ध्वं । रथेषु । रोहितः ।

युंग्ध्वं । हरी इति । अजिरा । धुरि । वोळ्हवे । वहिष्ठा । धुरि । वोळ्हवे ॥ ६॥

हे मरुतो यूयं रथे युष्मदीये सर्वेषां साधारणभूतेऽरुषीरारोचमाना वडवा युंग्ध्वं । योजयध्वं । तथा रथेषु युष्मदीयेषु रोहितो रोहितवर्णा युंग्ध्वं । हरी अश्वावजिराजिरावाशुगमनौ धुरि वोळ्हवे वहनाय युंग्ध्वं । आदरार्थं पुनर्वचनं । वहिष्ठा वोढृतमावश्वौ धुरि वोळ्हवे ॥

॥ अथ सप्तमी ॥

उत स्य वाज्यरुषस्तुविष्वणिरिह स्म धायि दर्शतः ।

मा वो यामेषु मरुतश्चिरं करत्प्र तं रथेषु चोदत ॥७॥

उत । स्यः । वाजी । अरुषः । तुविऽस्वनिः । इह । स्म । धायि । दर्शतः ।

मा । वः । यामेषु । मरुतः । चिरं । करत् । प्र । तं । रथेषु । चोदत ॥७॥

उतापि च स्य स वाजी वेजनवानरुष आरोचमानस्तुविष्वणिः प्रभूतध्वनिरश्वः । अरुष इत्यनेन रोहित इत्युक्तं भवति । प्रष्टिर्वहति रोहितः । ऋग्वे० १.३९.६. । इति ह्युक्तं । इहेदानीं दर्शतो दर्शनीयः सन् धायि । रथे नियोजितः । स्मेति पूरणः । हे मरुतो वो यामेषु गमनेषु सोऽश्वश्चिरं विलंबं मा करत् । मा करोतु । तं रथेषु । रथे युक्तमिति शेषः । प्रचोदत । प्रेरयत । यथा विलंबं न कुर्यात्तथा प्रेरयत ॥

॥ अथाष्टमी ॥

रथं नु मारुतं वयं श्रवस्युमा हुवामहे ।

आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥८॥

रथं । नु । मारुतं । वयं । श्रवस्युं । आ । हुवामहे ।

आ । यस्मिन् । तस्थौ । सुऽरणानि । बिभ्रती । सचा । मरुत्ऽसु । रोदसी ॥८॥

वयमात्रेया रथं रंहनस्वभावं मारुतं मरुतां संबंधिनं रथं श्रवस्युमन्नेच्छुं नु अद्याहुवामहे । आह्वयामः । यस्मिन्नथे सुरणानि सुरमणानि जलानि बिभ्रती धारयंती रोदसी रुद्रस्य पत्नी मरुतां माता । यद्वा रुद्रो वायुः । तत्पत्नी माध्यमिका देवी मरुत्सु सचा सहितातस्थौ आस्थितवती तं रथमाहुवे ॥

॥ अथ नवमी ॥

तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे ।
यस्मिन्त्सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी ॥ ९ ॥
तं । वः । शर्धं । रथेऽशुभं । त्वेषं । पनस्युं । आ । हुवे ।
यस्मिन् । सुऽजाता । सुऽभगा । महीयते । सचा । मरुत्ऽसु । मीळ्हुषी ॥ ९ ॥

हे मरुतो वः शर्धं युष्मदीयं बलं गणं रथेशुभं रथे शोभनं त्वेषं दीप्तं पनस्युं स्तुत्यमाहुवे । आह्वये । यस्मिन् शर्धे सुजाता सुष्ठु प्रवृद्धा सुभगा शोभनभाग्यातिमहती मीळ्हुषी । मीळ्हुष्टम शिवतमेत्यादौ दर्शनान्मीढ्वान्रुद्रः । तत्पत्नी मीळ्हुषी । मरुत्सु सचा सह महीयते पूज्यते तं शर्धमाहुवे । आपस्तंबोऽपि रुद्रपत्नीं मीळ्हुषीसंज्ञया व्यवजहार । उत्तरया दक्षिणस्यामीशानमावाहयति लौकिक्या वाचोत्तरस्यां मीळ्हुषीं मध्ये जयंतमिति ॥

॥ इति चतुर्थस्य तृतीये विंशो वर्गः ॥

॥ इति पंचमे मंडले चतुर्थोऽनुवाकः ॥

पंचमेऽनुवाके षोडश सूक्तानि । तत्रा रुद्रास इत्यष्टर्चं प्रथमं सूक्तं श्यावाश्वस्यार्षं मारुतं । सप्तम्यष्टम्यौ त्रिष्टुभौ शिष्टाः षट् जगत्यः । आ रुद्रासोऽष्टौ द्वित्रिष्टुबंतमित्यनुक्रमणिका ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

आ रुद्रास इंद्रवंतः सजोषसो हिरण्यरथाः सुविताय गंतन ।
इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे ॥ १ ॥
आ । रुद्रासः । इंद्रऽवंतः । सऽजोषसः । हिरण्यऽरथाः । सुविताय । गंतन ।
इयं । वः । अस्मत् । प्रति । हर्यते । मतिः । तृष्णऽजे । न । दिवः । उत्साः । उदन्यवे ॥ १ ॥

हे रुद्रासो रुद्रपुत्रा इंद्रवंत इंद्रेण युष्मत्स्वामिना तद्वंतः सजोषसः परस्परं समानप्रीतयो हिरण्यरथा हिरण्यमयरथाः संतः सुविताय सुगमनाय तत्साधनाय सुष्ठु सर्वैर्गंतव्याय यज्ञाय तदर्थमागंतन । आगच्छत । किमत्र विद्यत इति तदुच्यते । इयमस्मदस्मदीया मतिः स्तुतिर्वो युष्मान् प्रतिहर्यते । कामयते । तस्मादागच्छत ।

उदन्यव उदकेच्छवे तृष्णजे गोतमाय दिवो द्युलोकसकाशादुत्सा उदकनिष्यंदा यथा युष्माभिः प्रेरितास्तद्वदस्मदर्थमप्यागत्याभिमतं ददतेत्यर्थः ॥

॥ अथ द्वितीया ॥

वाशीमंत ऋष्टिमंतो मनीषिणः सुधन्वान इषुमंतो निषंगिणः ।
स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभं ॥२॥

वाशीऽमंतः । ऋष्टिऽमंतः । मनीषिणः । सुऽधन्वानः । इषुऽमंतः । निषंगिणः ।
सुऽअश्वाः । स्थ । सुऽरथाः । पृश्निऽमातरः । सुऽआयुधाः । मरुतः । याथन । शुभं ॥२॥

हे मरुतो यूयं वाशीमंतः । वाशीति तक्षणसाधनमायुधं । तद्वंतः स्थ । ऋष्टिमंतः । ऋष्टिर्नाम छुरिका । तद्वंतः स्थ । एवं सर्वत्र योज्यं । मनीषिणो मनस ईश्वरा मनस्विनः सुधन्वानः शोभनधनुष्का इषुमंतो बाणवंतो निषंगिणो निषंगवंतः स्वश्वाः स्थ । शोभनाश्वा भवथ । सुरथाः शोभनरथाः पृश्निमातरः पृश्नेः पुत्राः स्वायुधाः खड्गपरश्वादिसकलायुधोपेताः । एवं महात्मानः संतः शुभं शोभनं यथा भवति तथा शुभमुदकाय वा रथेन याथन । गच्छथ ॥

॥ अथ तृतीया ॥

धूनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जिहते यामनो भिया ।
कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वं ॥३॥

धूनुथ । द्यां । पर्वतान् । दाशुषे । वसु । नि । वः । वना । जिहते । यामनः । भिया ।
कोपयथ । पृथिवीं । पृश्निऽमातरः । शुभे । यत् । उग्राः । पृषतीः । अयुग्ध्वं ॥३॥

हे मरुतो द्यां । दिवीत्यर्थः । पर्वतान्मेघान्दाशुषे हविर्दात्रे यजमानाय वसु धनानि च धूनुथ । प्रापयथ । वो युष्माकं यामनो गमनस्य भिया भीत्या वना वनानि वृक्षादिसमूहा नि जिहते । नितरां कंपंते । अवनता भृशं शंसंतीत्यर्थः । हे पृश्निमातरः पृश्नेः पुत्राः । पृश्नियै वै पयसो मरुतो जाता इति हि श्रुतिः । हे मरुतः पृथिवीं कोपयथ । अभिवृष्ट्या क्षोभयथ । हे उग्रा उद्गूर्णबला यूयं यद्यदा शुभ उदकार्थं पृषतीर्युष्मदीया अश्वा अयुग्ध्वं योजयथ तदा कोपयथ पृथिवीं ॥

॥ अथ चतुर्थी ॥

वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ।
पिशंगाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥४॥

वातऽत्विषः । मरुतः । वर्षऽनिर्निजः । यमाःऽइव । सुऽसदृशः । सुऽपेशसः ।
पिशंगऽअश्वाः । अरुणऽअश्वाः । अरेपसः । प्रऽत्वक्षसः । महिना । द्यौःऽइव । उरवः ॥४॥

वातत्विषः सर्वदा संप्राप्तदीप्तयो वर्षनिर्णिजो वृष्टेः शोधयितारः । अथवा निर्णिगिति रूपनाम । वर्षमेव रूपं येषां ते तादृशाः । वृष्टिप्रदा इत्यर्थः । यमा इव युगलोत्पन्ना इव सुसदृशाः परस्परं बलरूपादिभिरत्यंतं सरूपाः सुपेशसः शोभनरूपाः पिशंगाश्वाः पिशंगवर्णाश्वोपेतास्तथारुणाश्वा अरेपसोऽपापाः प्रत्वक्षसः प्रकृष्टं तनूकर्तारो द्वेष्टॄणां महिना महत्त्वेन द्यौरिवांतरिक्षमिवोरवो विस्तीर्णाः । उक्तलक्षणा नाम भेजिर इत्युत्तरेण संबंधः ॥

॥ अथ पंचमी ॥

पुरुद्रप्सा अंजिमंतः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः ।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥५॥

पुरुऽद्रप्साः । अंजिऽमंतः । सुऽदानवः । त्वेषऽसंदृशः । अनवभ्रऽराधसः ।
सुऽजातासः । जनुषा । रुक्मऽवक्षसः । दिवः । अर्काः । अमृतं । नाम । भेजिरे ॥५॥

पुरुद्रप्साः प्रभूतोदका अंजिमंत आभरणवंतः सुदानवः शोभनदानास्त्वेषसंदृशो दीप्तरूपा अनवभ्रराधसोऽनवभ्रष्टधनाः सुजातासः शोभनजनना जनुषा जन्मनैवोक्तरूपा रुक्मवक्षसो हारवक्षस्का अर्काः पूज्या मरुतो दिवो द्युलोकादागत्यामृतममरणसाधनं नामोदकं नमनहेतुकमुक्तलक्षणं हविर्वा भेजिरे । लब्धवंतः ॥

॥ इति चतुर्थस्य तृतीय एकविंशो वर्गः ॥

॥ अथ षष्ठी ॥

ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितं ।
नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ॥६॥

ऋष्टयः। वः। मरुतः। अंसयोः। अधि। सहः। ओजः। बाह्वोः। वः। बलं। हितं।
नृम्णा। शीर्षऽसु। आयुधा। रथेषु। वः। विश्वा। वः। श्रीः। अधि। तनूषु। पिपिशे॥६॥

हे मरुतो वो युष्माकमंसयोरध्यृष्टय आयुधविशेषा हिताः। आश्रिताः। वक्ष्यमाणहितशब्दो विपरिणतव्यः। अधीति सप्तम्यर्थानुवादी। तथा वो बाह्वोरधि सहः शत्रूणामभिभावुकमोजः। ओज नामाष्टमो धातुः। तद्रूपं बलं हितं। निहितं। शीर्षसु शिरःसु नृम्णानि हिरण्मयानि पट्टोष्णीषादीनि निहितानि। रथेष्वायुधायुधानि युद्धसाधनानि निहितानि। वः श्रीर्युष्माकं कांतिस्तनूषु तदीयेष्वधिपिपिशे। अधिष्ठिता। आश्रिता॥

॥ अथ सप्तमी ॥

गोमदश्वावद्रथवत्सुवीरं चंद्रवद्राधो मरुतो ददा नः।
प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य॥७॥

गोऽमत्। अश्वऽवत्। रथऽवत्। सुऽवीरं। चंद्रऽवत्। राधः। मरुतः। दद। नः।
प्रऽशस्तिं। नः। कृणुत। रुद्रियासः। भक्षीय। वः। अवसः। दैव्यस्य॥७॥

हे मरुतो नोऽस्मभ्यं गोमद्बहुभिर्गोभिरुपेतमश्वावद्बहुभिरश्वैरुपेतं रथवद्रथोपेतं सुवीरं सुष्ठु पुत्रोपेतं चंद्रवद्धिरण्योपेतं राधोऽन्नं दद। ददत॥ व्यत्ययेनैकवचनं। अथवा लोडर्थस्य लिटो मध्यमबहुवचनं॥ हे रुद्रियासो रुद्रपुत्रा मरुतो नोऽस्मदीयां प्रशस्तिं। समृद्धिमित्यर्थः। तां कृणुत। कुरुत। वो युष्माकं स्वभूतमवसोऽवो रक्षणं दैव्यस्य दैव्यं देवार्हं भक्षीय। भजेय॥

॥ अथाष्टमी ॥

हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः॥८॥

हये। नरः। मरुतः। मृळत। नः। तुविऽमघासः। अमृताः। ऋतऽज्ञाः।
सत्यऽश्रुतः। कवयः। युवानः। बृहत्ऽगिरयः। बृहत्। उक्षमाणाः॥८॥

हये हे नरो नेतारो मरुतो नोऽस्मान्मृळत। सुखयत। अस्मभ्यं हिताय वा सुखिनो भवत। हे तुवीमघासः प्रभूतधना अमृता अमरणस्वभावा ऋतज्ञा

उदकस्य यज्ञस्य वा ज्ञातारः । कर्तार इत्यर्थः । सत्यश्रुतः सत्येन सत्यफलत्वेन प्रसिद्धाः कवयो मेधाविनो युवानो नित्यतरुणा बृहद्गिरयः प्रभूतस्तुतयो बृहदत्यधिकमुक्षमाणा हविर्भिः सेविता उदकं वा सिंचंतो यूयं मृळत ॥

॥ इति चतुर्थस्य तृतीये द्वाविंशो वर्गः ॥

तमु नूनमित्यष्टर्चं द्वितीयं सूक्तं श्यावाश्वस्यार्षं त्रैष्टुभं मारुतं । तम्वित्यनुक्रमणिका । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

तमु नूनं तविषीमंतमेषां स्तुषे गणं मारुतं नव्यसीनां ।

य आश्वश्वा अमवद्वहंत उतेशिरे अमृतस्य स्वराजः ॥१॥

तं । ऊं इति । नूनं । तविषीऽमंतं । एषां । स्तुषे । गणं । मारुतं । नव्यसीनां ।

ये । आशुऽअश्वाः । अमऽवत् । वहंते । उत । ईशिरे । अमृतस्य । स्वऽराजः ॥१॥

तमु तमेव पूर्वं स्तुतमेव मारुतं मरुतां संबंधिनं तं गणं तविषीमंतं दीप्तिमंतं नूनमद्य स्तुषे । कीदृशां मरुतां । नव्यसीनां ॥ लिंगव्यत्ययः ॥ नवतराणां स्तुत्यानां वा । एषां मारुतं गणं । गणावयवभूता मरुतः । कीदृशा इत्युच्यते । ये मरुत आश्वश्वाः शीघ्रगाम्यश्वोपेता अमवत् बलवंतो यथा भवंति तथा वहंते गच्छंति । उतापि चेशिरे ईश्वरा भवंत्यमृतस्योदकस्य स्वराजः स्वायत्तदीप्तयः स्वयमेव राजमानाः तेषां गणं स्तुषे ॥

॥ अथ द्वितीया ॥

त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारं ।

मयोभुवो ये अमिता महित्वा वंदस्व विप्र तुविराधसो नॄन् ॥२॥

त्वेषं । गणं । तवसं । खादिऽहस्तं । धुनिऽव्रतं । मायिनं । दातिऽवारं ।

मयःऽभुवः । ये । अमिताः । महिऽत्वा । वंदस्व । विप्र । तुविऽराधसः । नॄन् ॥२॥

त्वेषं दीप्तं गणं मारुतं तवसं बलवंतं खादिहस्तं कटकहस्तं धुनिव्रतं कंपयितृकर्माणं मायिनं प्रज्ञावंतं दातिवारं दत्तधनं हे विप्र होतर्वंदस्व । स्तुहीति संबंधः । ये मरुतो मयोभुवः सुखस्य भावयितारो महित्वा महत्त्वेनामिता अपरिच्छिन्नाः । तान् तुविराधसः प्रभूतधनान् नॄन् नेतॄन् वंदस्व ॥

॥ अथ तृतीया ॥

आ वो यंतूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनंति ।
अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥३॥
आ । वः । यंतु । उदऽवाहासः । अद्य । वृष्टिं । ये । विश्वे । मरुतः । जुनंति ।
अयं । यः । अग्निः । मरुतः । संऽइद्धः । एतं । जुषध्वं । कवयः । युवानः ॥३॥

ये विश्वे व्याप्ता मरुतो वृष्टिं जुनंति प्रेरयंति त उदवाहास उदकस्य वोढारो मरुतोऽद्येदानीं वो युष्मानायंतु । आगच्छंतु ऋत्विग्यजमानाः । अथ प्रत्यक्षवादः । हे मरुतो यः प्रसिद्धोऽयमग्निः समिद्धः सम्यक् दीपित एतमग्निं जुषध्वं सेवध्वं हे कवयो मेधाविनो हे युवानो नित्यतरुणाः सर्वत्र व्याप्ता वा ॥

॥ अथ चतुर्थी ॥

यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः ।
युष्मदेति मुष्टिहा बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः ॥४॥
यूयं । राजानं । इर्यं । जनाय । विभ्वऽतष्टं । जनयथ । यजत्राः ।
युष्मत् । एति । मुष्टिऽहा । बाहुऽजूतः । युष्मत् । सत्ऽअश्वः । मरुतः । सुऽवीरः ॥४॥

हे मरुतो यूयं जनाय यजमानाय राजानं स्वामिनं राजमानं वेर्यं शत्रूणां प्रेरकं च्यावयितारं विभ्वतष्टं । विभ्वा नाम ऋभूणां मध्यमः । स कुशली । तेन निर्मितं । अत्यंतरूपवंतमित्यर्थः । तादृशं पुत्रं जनयथ । उत्पादयथ हे यजत्रा यष्टव्याः । हे मरुतो युष्मद्युष्मत्त एति गच्छति पुत्रः । कीदृशः । मुष्टिहा । मुष्टिशब्दो बाहूपलक्षकः । स्वभुजबलेनैव हंता शत्रूणां । तदेवोच्यते । बाहुजूतः । बाहुः प्रेरकः शत्रूणां यस्य तादृशः पुत्र एति । तथा युष्मद्युष्मत्तः सदश्वो विद्यमानाश्वः । बह्वश्व इत्यर्थः । सुवीरः शोभनवीर्यः पुत्र एति । जायत इत्यर्थः ॥

वरुणप्रघासे मारुत्या आमिक्षाया अरा इवेति याज्या । सूचितं च । अरा इवेदचरमा अहेवेमं मे वरुण श्रुधि । आ० २.१७. । इति ॥ एकादशिने मारुते पशावेषैव पशुपुरोडाशस्य याज्या । सूचितं च । अरा इवेदचरमा अहेव या वः शर्म शशमानाय संति । आ० ३.७. । इति ॥

॥ सैषा पंचमी ॥

अरा इवेदचरमा अहेव प्रप्र जायंते अकवा महोभिः ।
पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः ॥५॥

अराःऽइव । इत् । अचरमाः । अहाऽइव । प्रऽप्र । जायंते । अकवाः । महःऽभिः ।
पृश्नेः । पुत्राः । उपऽमासः । रभिष्ठाः । स्वया । मत्या । मरुतः । सं । मिमिक्षुः ॥५॥

अरा इवेत् रथशंकव इवाचरमा अनिकृष्टाः । सर्वसमाः सहैवोत्पन्नाश्चेत्यर्थः । अहेवाहानीव । दिवसा यथा सर्वेऽपि षष्टिघटिकात्मकास्तद्वत्सप्तसंख्योपेतसप्तगणरूपेण समा इत्यर्थः । अनेन दृष्टांतद्वयने वैसदृश्याभावः प्रतिपादितः । एवमुक्तलक्षणा महोभिस्तेजोभिः प्र प्र जायंते । प्रकर्षेण प्रादुर्भवंति ॥ एकः प्रसमुपोदः पादपूरण इत्युपसर्गाभ्यासः स च पूरणः ॥ ते चाकवा अनल्पाः । यद्वा महोभिरित्यस्य विशेषणं । पृश्नेर्माध्यमिकाया वाचो गोरूपाया अंतरिक्षस्य वा पुत्रस्थानीया उपमासः प्रत्येकं समाना रभिष्ठा प्रकृष्टवेगाः । एवं महानुभावा मरुतः स्वया मत्या स्वकीययैवानुग्रहबुद्ध्या संमिमिक्षुः । वृष्ट्या सम्यक् सिंचंति ॥

॥ अथ षष्ठी ॥

यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभिः ।
क्षोदंत आपो रिणते वनान्यवोस्रियो वृषभः क्रंदतु द्यौः ॥६॥

यत् । प्र । अयासिष्ट । पृषतीभिः । अश्वैः । वीळुपविऽभिः । मरुतः । रथेभिः ।
क्षोदंते । आपः । रिणते । वनानि । अव । उस्रियः । वृषभः । क्रंदतु । द्यौः ॥६॥

हे मरुतो यद्यदा प्रायासिष्ट प्रगच्छथ पृषतीभिः पृषत्संज्ञकैरश्वैर्वाहनसाधनैरश्वैः । अश्वशब्दोऽच वाहनसामान्यवचनः । अतः पुल्लिंगता । तथान्यच । यदश्वान्धूर्षु पृषतीरयुग्ध्वं । ऋग्वे० ५.५५.६. । रोहिदश्वोऽजाश्व इति समानाधिकरण्यप्रयोगः । एवंभूताश्वयुक्तैर्वीळुपविभिर्दृढरथनेमिभी रथेभिः प्रायासिष्ट । यद्वाश्वै रथैश्च सह मरुतो यदा प्रायासिष्ट तदापः क्षोदंते । क्षरंति । वनानि वृक्षसमूहा रिणते । हिंस्यंते । वेगेन भज्यंते । उस्रियः । उस्राः सूर्यरश्मयः । तत्संबंधी पर्जन्यो वृषभोऽपां वर्षिता द्यौर्द्योतमानोऽव क्रंदतु । अवाङ्मुखं शब्दयतु वृष्ट्यर्थं ॥

॥ अथ सप्तमी ॥

प्रथिष्ट यामन्पृथिवी चिदेषां भर्तेव गर्भं स्वमिच्छवो धुः ।
वातान्ह्यश्वान्धुर्यायुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः ॥७॥

प्रथिष्ट । यामन् । पृथिवी । चित् । एषां । भर्ताऽइव । गर्भं । स्वं । इत् । शवः । धुः ।
वातान् । हि । अश्वान् । धुरि । आऽयुयुज्रे । वर्षं । स्वेदं । चक्रिरे । रुद्रियासः ॥७॥

एषां मरुतां यामन्यामनि गमने पृथिवी चित् भूमिः । चिदिति पूरणः । प्रथिष्ट । प्रख्याताभवत् । गर्भयोग्याभवदित्यर्थः । ते च मरुतो भर्ता लौकिकः पतिर्गर्भमिव भार्यायास्तथा भूम्याः स्वमित्स्वभूतं गर्भं गर्भस्थानीयं शव उदकं धुः । स्थापितवंतः । हि यस्माद्वातान् गंतृनश्वान् धुरि रथसंबंधिन्यामायुयुज्रे आयोजितवंतः तस्माद्वर्षं स्वेदं स्वेदस्थानीयं वृष्टिसंस्त्यायं चक्रिरे कुर्वंति रुद्रियासो रुद्रपुत्राः ॥

॥ अथाष्टमी ॥

हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥८॥

हये । नरः । मरुतः । मृळत । नः । तुविऽमघासः । अमृताः । ऋतऽज्ञाः ।
सत्यऽश्रुतः । कवयः । युवानः । बृहत्ऽगिरयः । बृहत् । उक्षमाणाः ॥८॥

हये नर इत्यष्टमी गता ॥

॥ इति चतुर्थस्य तृतीये त्रयोविंशो वर्गः ॥

प्र वः स्पळित्यष्टर्चं तृतीयं सूक्तं श्यावाश्वस्यार्षं मारुतं । अष्टमी त्रिष्टुप् शिष्टाः सप्त जगत्यः । प्र वः स्पट् त्रिष्टुबंतमित्यनुक्रमणिका ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्र वः स्पळक्रन्त्सुविताय दावनेऽर्चा दिवे प्र पृथिव्या ऋतं भरे ।
उक्षंते अश्वान्तरुषंत आ रजोऽनु स्वं भानुं श्रथयंते अर्णवैः ॥१॥

प्र । वः । स्पट् । अक्रन् । सुविताय । दावने । अर्च । दिवे । प्र । पृथिव्यै । ऋतं । भरे ।
उक्षंते । अश्वान् । तरुषंते । आ । रजः । अनु । स्वं । भानुं । श्रथयंते । अर्णवैः ॥१॥

हे मरुतो वो युष्मभ्यं सुविताय सुष्ठु प्राप्तव्याय दावने हविःप्रदानाय स्पट् स्प्रष्टा होता प्र प्रकर्षेणाक्रन्। क्रंदति। स्तौति। वो युष्मान् वा सुष्ठु प्राप्तव्याय दानायाक्रन्॥ क्रंदतेः शब्दकर्मणो लडर्थे लुङि तिपि रूपं॥ हे होतर्दिवे द्योतमानाय द्युदेवाय प्रार्च। प्रकर्षेण स्तुहि हे आत्मन्। तथा पृथिव्याश्च ऋतं स्तोत्रं भरे। संपादयामि। द्यावापृथिव्यावपि मरुतामाधारत्वादच्च निपातभाजौ भवतः। किंच ते मरुतोऽश्वान् व्यापकानुदकसंघानुक्षंते। सिंचंति। रज आ अंतरिक्षमा सर्वतस्तरुषंते। तरंति। संचरंति। स्वं भानुं स्वकीयं तेजोऽर्णवैर्मेघैः सहानुश्रथयंते। अनुश्लेषयंति। अनुकूलं प्रापयंतीत्यर्थः॥

॥ अथ द्वितीया ॥

अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती।
दूरेदृशो ये चितयंत एमभिरंतर्महे विदथे येतिरे नरः ॥२॥

अमात्। एषां। भियसा। भूमिः। एजति। नौः। न। पूर्णा। क्षरति। व्यथिः। यती।
दूरेऽदृशः। ये। चितयंते। एमऽभिः। अंतः। महे। विदथे। येतिरे। नरः ॥२॥

एषां॥ अन्वादेशविषयत्वादनुदात्तः॥ एषां मरुतां भियसा भयेन भूमिरेजति। कंपते नौर्न पूर्णा प्राणिभिः। सा यथोदकमध्ये क्षरति चलति व्यथिर्व्यथिता यती गच्छंती। एतदुभयं नौविशेषणं। दूरेदृशो दूरे दृश्यमाना अपि ये मरुत एमभिर्गमनैश्चितयंते ज्ञायंते ते महांतो मरुतो विदथे यज्ञे महे महते हविषे हविर्भक्षणायांतर्द्यावापृथिव्योर्मध्ये येतिरे। यतंते। नरो नेतारो मरुतः॥

॥ अथ तृतीया ॥

गवामिव श्रियसे शृंगमुत्तमं सूर्यो न चक्षू रजसो विसर्जने।
अत्या इव सुभ्व१श्चारवः स्थन मर्या इव श्रियसे चेतथा नरः ॥३॥

गवांऽइव। श्रियसे। शृंगं। उत्ऽतमं। सूर्यः। न। चक्षुः। रजसः। विऽसर्जने।
अत्याःऽइव। सुऽभ्वः। चारवः। स्थन। मर्याःऽइव। श्रियसे। चेतथ। नरः ॥३॥

हे मरुतो यूयं गवां शृंगमिवोत्तममुत्कृष्टमुष्णीषपट्टादिकं श्रियसे श्रियै धारयथेति शेषः। सूर्यो न सूर्य इव। स यथा रजसस्तेजसो विसर्जने चक्षुर्दर्शनसाधनं मंडलं धत्ते तद्वद्रजसो वृष्टेर्विसर्जने विसर्जनाय चक्षुः सर्वस्य प्रकाशकं तेजो

धारयथ। अत्या इवाश्वा इव सुभ्वः सुष्ठु सर्वत्र भवंतो वेगवंतश्चारवो दर्शनीयाः स्थन। भवथ। मर्या मर्त्या यजमाना इव। ते यथा श्रियसे जानंति यज्ञादिकं तद्वच्छ्रिये चेतथ हे नरो नेतारो मरुतः ॥

॥ अथ चतुर्थी ॥

को वो महांति महतामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या।
यूयं ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय दावने ॥४॥
कः। वः। महांति। महतां। उत्। अश्नवत्। कः। काव्या। मरुतः। कः। ह। पौंस्या।
यूयं। ह। भूमिं। किरणं। न। रेजथ। प्र। यत्। भरध्वे। सुविताय। दावने ॥४॥

हे मरुतो वो युष्माकं महतां पूज्यानां को यजमानो महांति श्रेयांस्युदश्नवत्। उत्कृष्टं प्राप्नुयात्। कश्च तदर्थं काव्या काव्यानि कवीनां युष्माकं संबंधीनि स्तोत्राण्युदश्नवत्। को ह कश्च पौंस्या पौंस्यानि पराक्रमानुदश्नवत्। आदरार्थं पुनर्वचनं। यूयं ह यूयं खलु भूमिं किरणं न किरणमिव रेजथ। किरणं यथा वृष्ट्यर्थं चालयथ तद्वद्भूमिं रेजथ। यद्यस्मात् सुविताय सुष्ठु प्राप्तव्याय। प्राप्तव्यस्येत्यर्थः। तादृशस्य धनस्य वृष्ट्युदकस्य वा दावने दानाय प्र भरध्वे प्रकर्षेण संपादयथ वृष्टिं। यस्माद्यूयमेवं कुरुथ तस्मात्क एवं करोतीत्यर्थः ॥

॥ अथ पंचमी ॥

अश्वा इवेदरुषासः सबंधवः शूरा इव प्रयुधः प्रोत युयुधुः।
मर्या इव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनंति वृष्टिभिः ॥५॥
अश्वाःऽइव। इत्। अरुषासः। सऽबंधवः। शूराःऽइव। प्रऽयुधः। प्र। उत। युयुधुः।
मर्याःऽइव। सुऽवृधः। ववृधुः। नरः। सूर्यस्य। चक्षुः। प्र। मिनंति। वृष्टिऽभिः ॥५॥

मरुत एतेऽश्वा इव शीघ्रगंतारोऽरुषास आरोचमानाः सबंधवः। समान एक एव बंधुर्बंधको रुद्रो येषां ते तादृशाः। परस्परं बंधवः स्नेहयुक्ता वा शूरा भटा इव प्रयुधः प्रयोद्धारो वैरिभिः सह तादृशा उतापि च प्र युयुधुः। प्रकर्षेण युध्यंते। मर्या इव मनुष्या यथा वर्धंते तथा सुवृधः सुष्ठु वर्धयितारो वर्धमाना वा नरो नेतारो ववृधुः। वर्धंते। एवं महात्मानः सूर्यस्य चक्षुस्तेजःसमूहं मंडलं वा वृष्टिभिः प्र मिनंति। प्रकर्षेण हिंसंति। आवृण्वंतीत्यर्थः ॥

॥ अथ षष्ठी ॥

ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः ।
सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन ॥ ६ ॥
ते । अज्येष्ठाः । अकनिष्ठासः । उत्ऽभिदः । अमध्यमासः । महसा । वि । ववृधुः ।
सुऽजातासः । जनुषा । पृश्निऽमातरः । दिवः । मर्याः । आ । नः । अच्छ । जिगातन ॥ ६ ॥

ते मरुतोऽज्येष्ठा अकनिष्ठासोऽकनिष्ठा उद्भिद उद्भेदयितारः शत्रूणाममध्यमासोऽमध्यमाः सर्वप्रकारैः समा महसा तेजसा विववृधुः । विवर्धंते । सुजातासः सुष्ठु संभूता जनुषा जन्मना पृश्निमातरः पृश्नेः पुत्रा मर्या मनुष्येभ्यो हिता यूयं दिवः सकाशान्नोऽस्मानच्छाभिमुखमा जिगातन । सर्वतः प्रशंसत साध्वनुष्ठितमिति । उत्तरार्द्धः प्रत्यक्षकृतः । यद्वा ये सुजाता जनुषा पृश्निमातरश्च तान् दिव आगतान् हे ऋत्विजो मर्या यूयमाजिगातन आगच्छत ते नोऽच्छ । आगच्छतास्मदभिमुखं ॥

॥ अथ सप्तमी ॥

वयो न ये श्रेणीः पप्तुरोजसांतान्दिवो बृहतः सानुनस्परि ।
अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ॥ ७ ॥
वयः । न । ये । श्रेणीः । पप्तुः । ओजसा । अंतान् । दिवः । बृहतः । सानुनः । परि ।
अश्वासः । एषां । उभये । यथा । विदुः । प्र । पर्वतस्य । नभनून् । अचुच्यवुः ॥ ७ ॥

ये मरुतो वयो न पक्षिण इव श्रेणीः पंक्तयः संत ओजसा बलेन दिवोऽंतरिक्षस्यादित्यस्य वांतान् पर्यंतान् बृहतो महतः सानुनः समुन्नतस्याकाशवलयस्य परि परितः पप्तुः पतंति एषामश्वासोऽश्वाः पर्वतस्य मेघस्य नभनून् ॥ भनतेः शब्दकर्मणो नभ्राडितिवत् नभनवः ॥ उदकानि प्राचुच्यवुः । च्यावयंति । उभये देवामनुष्याश्च यथा विदुर्जानंति तथा । मनुष्याणां ज्ञानं प्रसिद्धं । देवाश्च वृष्टौ सत्यामाग्रायणादौ हविःप्रदानेन जानंति । देवानां वृष्टिसंपूर्तिपरिज्ञानमाश्वलायनेनोक्तं । यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेतेत्युपक्रम्यापि हि देवा आहुस्तृप्तो नूनं वर्षस्याग्रयणेन हि यजते । आ० २.९. । इति ॥

॥ अथाष्टमी ॥

मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतंतां ।
आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ॥८॥

मिमातु । द्यौः । अदितिः । वीतये । नः । सं । दानुऽचित्राः । उषसः । यतंतां ।
आ । अचुच्यवुः । दिव्यं । कोशं । एते । ऋषे । रुद्रस्य । मरुतः । गृणानाः ॥८॥

नोऽस्मदर्थं द्यौरंतरिक्षं मिमातु । निर्मिमातु वृष्टिं । तदनुकूलं करोत्वित्यर्थः । कीदृशी । अदितिरदीना । यद्वा द्यौर्मिमात्वदितिर्भूमिश्च मिमातु सुखं । किमर्थं । वीतय उत्पत्तये प्रजननाय वा । दानुचित्रा विचित्रप्रकाशाद्दाना उषसः संयतंतां । हे ऋषे त्वया गृणानाः स्तूयमाना मरुतः । रुद्रस्य पुत्रा इत्यर्थः । एते दिव्यं कोशं मेघमुदकमाचुच्यवुः । आच्यावयंति ॥ द्विकर्मकोऽयं ॥

॥ इति चतुर्थस्य तृतीये चतुर्विंशो वर्गः ॥

ईळे अग्निं स्ववसमित्यष्टर्चं चतुर्थं सूक्तं श्यावाश्वस्यार्षं । सप्तम्यष्टम्यौ जगत्यौ शिष्टाः षट् त्रिष्टुभः । मरुद्देवताकमग्निमरुद्देवताकं वा । ईळे द्विजगत्यंतमाग्नेयं च वेति ॥ सूक्तविनियोगो लैंगिकः ॥ आद्या कारीर्यां सामिधेनीषु याज्या । सूचितं च । ईळे अग्निं स्ववसं नमोभिरिति धाय्ये । आ० २.१३. । इति ॥

॥ सैषा प्रथमा ॥

ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्यां ॥१॥

ईळे । अग्निं । सुऽअवसं । नमःऽभिः । इह । प्रऽसत्तः । वि । चयत् । कृतं । नः ।
रथैःऽइव । प्र । भरे । वाजयत्ऽभिः । प्रऽदक्षिणित् । मरुतां । स्तोमं । ऋध्यां ॥१॥

अहं श्यावाश्वोऽग्निं स्ववसं स्वायत्तरक्षणं नमोभिः स्तोत्रैरीळे । स्तौमि । तत्स्तोत्रं कृतमिहेदानीं प्रसत्तः प्रसन्नः प्रकर्षेण यज्ञं प्राप्तो वा सन् नोऽस्मदर्थं विचयत् । विजानातु । वाजयद्भिरन्नमिच्छद्भिः स्तोत्रै रथैरिव रथैर्यथाभिमतं प्राप्नुवंति तद्वद्बृंहणसाधनैः प्र भरे । प्रकर्षेण संपादयाम्यभिमतं । प्रदक्षिणित् प्रादक्षिण्येन गच्छन् मरुतां स्तोमं स्तोत्रमृध्यां । वर्धयेयं ॥

॥ अथ द्वितीया ॥

आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु ।
वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वतश्चित् ॥२॥

आ । ये । तस्थुः । पृषतीषु । श्रुतासु । सुऽखेषु । रुद्राः । मरुतः । रथेषु ।
वना । चित् । उग्राः । जिहते । नि । वः । भिया । पृथिवी । चित् । रेजते । पर्वतः । चित् ॥२॥

ये मरुतो रुद्रा रुद्रपुत्रा आतस्थुः आतिष्ठंति पृषतीषु मरुतां वाहनेषु श्रुतासु श्रांतासु प्रसिद्धासु वा सुखेषु । खमाकाशं छिद्रं । शोभनरथाक्षद्वारेषु रथेषु रथानातस्थुः आतिष्ठंति । हे उग्रा उद्गूर्णबला मरुतो यूयं यदा रथमारूढाः स्थ तदानीं वना चित् वनान्यपि नि जिहते न्यग्गच्छंति वो युष्माकं भिया भीत्या । पृथिवी चित् पृथिव्यपि रेजते । पर्वतश्चित् पर्वतोऽपि रेजते । कंपते । उत्तरार्द्धः प्रत्यक्षकृतः । पूर्वार्द्धे य एवमकुर्वन् तेषां स्तोममृध्यामिति पूर्वत्रान्वयः ॥

कारीर्यां मारुतस्य सप्तकपालस्य पर्वतश्चिदित्येषा याज्या । सूचितं च । पर्वतश्चिन्महि वृद्धो बिभाय सृजंति रश्मिमोजसा । आ० २.१३. । इति ॥

॥ सैषा तृतीया ॥

पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत स्वने वः ।
यत्क्रीळथ मरुत ऋष्टिमंत आप इव सध्र्यंचो धवध्वे ॥३॥

पर्वतः । चित् । महि । वृद्धः । बिभाय । दिवः । चित् । सानु । रेजत । स्वने । वः ।
यत् । क्रीळथ । मरुतः । ऋष्टिऽमंतः । आपःऽइव । सध्र्यंचः । धवध्वे ॥३॥

हे मरुतो वो युष्माकं स्वने भयंकरशब्दे सति पर्वतश्चित् पर्वतोऽपि महि महान्वृद्धः सन्नपि बिभाय । बिभेति । दिवश्चित् अंतरिक्षस्यापि सानु समुच्छ्रितः प्रदेशोरेजत । कंपते । यद्यदा क्रीळथ हे मरुतो यूयमृष्टिमंत आयुधवंतः संतस्तदाप इवोदकानीव सध्र्यंचः सहांचना धवध्वे । धावध्वे । गच्छथ ॥

॥ अथ चतुर्थी ॥

वरा इवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे ।
श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु ॥४॥

वराःऽईव । इत् । रैवतासः । हिरण्यैः । अभि । स्वधाभिः । तन्वः । पिपिश्रे ।
श्रिये । श्रेयांसः । तवसः । रथेषु । सत्रा । महांसि । चक्रिरे । तनूषु ॥४॥

वरा इव विवाहयोग्या युवान इव । ते यथा रैवतासो धनवंतो हिरण्यैर्हिरण्मयैराभरणविशेषैः स्वधाभिरुदकैश्च तन्वः स्वीयानि शरीराण्यभिपिपिश्रे संयोजयंति अलंकुर्वंति तद्वदेते मरुतोऽपि रैवतासो धनवंतो हिरण्यैर्हिरण्यस्थानीयैर्विद्युदाख्यैराभरणैः स्वधाभिश्च तन्वः स्वीयानि शरीराणि पिपिश्रे । श्रिये शोभायै श्रेयांसः श्रेष्ठास्तवसो बलवंतो मरुतो रथेषु सत्रा सत्यं सह वा तनूषु महांसि चक्रिरे । कृतवंतः । सर्वाभरणैरुदकैश्चोपेता रथानधिष्ठाय शरीरेषु तेजांस्यधारयन्नित्यर्थः ॥

॥ अथ पंचमी ॥

अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥५॥
अज्येष्ठासः । अकनिष्ठासः । एते । सं । भ्रातरः । ववृधुः । सौभगाय ।
युवा । पिता । सुऽअपाः । रुद्रः । एषां । सुऽदुघा । पृश्निः । सुऽदिना । मरुत्ऽभ्यः ॥५॥

अज्येष्ठासोऽकनिष्ठासः परस्परं ज्येष्ठकनिष्ठभावरहिताः सहैवोत्पन्नाः समानबला एते मरुतो भ्रातरः परस्परं भ्रातृभूताः संतः सौभगाय सुभगत्वाय संववृधुः । वर्धंते । युवा नित्यतरुणः स्वपाः शोभनकर्मैषां मरुतां रुद्रः पिता सुदुघा सुष्ठु दोग्ध्री पृश्निर्गोर्देवता मातृभूता मरुद्भ्यो मरुदर्थं सुदिना शोभनदिनानि । अकुरुतामिति शेषः ॥

॥ अथ षष्ठी ॥

यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ ।
अतो नो रुद्रा उत वा न्व१स्याग्ने वित्ताद्धविषो यद्यजाम ॥६॥
यत् । उत्ऽतमे । मरुतः । मध्यमे । वा । यत् । वा । अवमे । सुऽभगासः । दिवि । स्थ ।
अतः । नः । रुद्राः । उत । वा । नु । अस्य । अग्ने । वित्तात् । हविषः । यत् । यजाम ॥६॥

हे मरुतो यूयं यदुत्तम उत्कृष्ट उत्तमे चरमे वा दिवि द्युलोके मध्यमे वा दिवि यद्वावमे दिवि हे सुभगासः स्थ भवथ । त्रयो वा इमे त्रिवृतो लोका-

स्तिस्रो दिवः पृथिवीरित्यादिश्रुतेर्द्युलोकस्य त्रैविध्यं । अतोऽस्मात् स्थानत्र-यान्नोऽस्मदर्थं हे रुद्रा आगच्छतेति शेषः । उत वा अथवा नु अद्य यद्यजाम यज्ञविः प्रक्षिपामः हे अग्ने त्वमस्य हविष एतद्धविर्विद्वात् । विद्धि ॥

॥ अथ सप्तमी ॥

अग्निश्च यन्मरुतो विश्ववेदसो दिवो वहध्व उत्तरादधि ष्णुभिः ।

ते मंदसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते ॥७॥

अग्निः । च । यत् । मरुतः । विश्वऽवेदसः । दिवः । वहध्वे । उत्ऽतरात् । अधि । स्नुऽभिः ।

ते । मंदसानाः । धुनयः । रिशादसः । वामं । धत्त । यजमानाय । सुन्वते ॥७॥

हे विश्ववेदसः सर्वस्य ज्ञातारो विश्वधना वा हे मरुतो यद्यूयमग्निश्च दिवो द्युलोकादुत्तरादुत्कृष्टतरादधि उपरि स्नुभिः सानुभिरुपरिप्रदेशे वहध्वे उह्यध्वे । तत्र निवसथेत्यर्थः । यद्वा स्नुशब्देन तत्सदृशा अश्वा उच्यंते । तैर्वोह्यध्वे । ते यूयं मंदसाना मोदमाना अस्मदीयैः स्तोत्रैर्हविर्भिश्च धुनयः शत्रूणां कंपयितारो रि-शादसोऽस्मद्धिंसकानामत्तारः संतो वामं वननीयं धनं धत्त । दत्त यजमानाय सुन्वतेऽभिषवं कुर्वते ॥

अग्ने मरुद्भिरित्यष्टम्याग्निमारुतस्य याज्या । अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः । आ° ५.२०. । इति सूचितत्वात् ॥

॥ सैषाष्टमी ॥

अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब मंदसानो गणश्रिभिः ।

पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना सजूः ॥८॥

अग्ने । मरुत्ऽभिः । शुभयत्ऽभिः । ऋक्वऽभिः । सोमं । पिब । मंदसानः । गणश्रिऽभिः ।

पावकेभिः । विश्वंऽइन्वेभिः । आयुऽभिः । वैश्वानर । प्रऽदिवा । केतुना । सऽजूः ॥८॥

हे अग्ने मरुद्भिः सह मंदसानः सन् सोमं पिब । कीदृशैर्मरुद्भिः । शुभयद्भिः शोभमानैरन्यान् शोभयद्भिर्वा ऋक्वभिः स्तुत्यैर्गणश्रिभिर्गणभावमाश्रयद्भिः पाव-केभिः शोधकैर्विश्वमिन्वेभिर्विश्वं वृष्ट्या प्रीणयद्भिरायुभिरायुष्मद्भिः । हे वैश्वानर विश्वनरहिताग्ने प्रदिवा पुराणेन केतुना ज्वालापुंजेन सजूः सहितः ॥

॥ इति चतुर्थस्य तृतीये पंचविंशो वर्गः ॥

के ष्ठा नर इत्येकोनविंशत्यृचं पंचमं सूक्तं। अत्रानुक्रमणिका। के ष्ठैकोना गायत्रं श्यावाश्वोऽत्र वैददश्वी तरंतपुरुमीळ्हौ दाल्भ्यं रथवीतिं मरुतश्च दानतुष्टः प्रशशंस बुद्ध्वा च तरंतमहिषीं शशीयसीं पंचम्यनुष्टुप् नवमी सतोबृहतीति। श्यावाश्व ऋषिः। पंचम्यनुष्टुप् नवमी सतोबृहती शिष्टा गायत्र्यः। आद्याश्चतस्रो मरुद्देवताकाः। सनत्सेत्यादीनां चतसृणां शशीयसी नाम तरंतस्य राज्ञो भार्या देवता। उत मे रपदित्यस्या वैददश्विः पुरुमीळ्हो देवता। यो मे धेनूनामित्यस्या वैददश्विस्तरंतो राजा देवता। य ईं वहंत इत्याद्याः षण्मारुत्यः। एतं म इत्यस्य तृचस्य दाल्भ्यो रथवीतिर्नाम राजा देवता॥ विनियोगो लैंगिकः॥

अत्राश्चर्यं पुरावृत्तमाहुरागमपारगाः। अर्चनानाः पुरात्रेयो दाल्भ्येन रथवीतिना॥ आर्त्विज्याय वृतो यज्ञे वितते हौत्र आस्थितः। रथवीतिसुतां कन्यां ददर्श पितुरंतिके॥ ययाचे स्वकुमाराय श्यावाश्वाय च तां सुतां। स प्रदानमना भार्यामपृच्छत्किं प्रयच्छसि॥ इति पृष्टा पुनः प्राह कथमस्मै प्रदास्यसि। इतः पूर्वं सुता दत्ता नासीदनृषये क्वचित्॥ तत्तथैवेति निश्चित्य प्रत्याचष्टार्चनानसं। श्यावाश्वः संस्थिते यज्ञे तेन राज्ञा निराकृतः॥ तत्प्रत्याशान्वितो विप्रस्तपस्तेपे सुदारुणं। ब्रह्मचर्यरतः शांतो भिक्षार्थं पर्यटन् द्विजः॥ तरंतमहिषी साध्वी बिभिक्षेऽसौ शशीयसीं। सा संप्राप्यांतिकं पत्युः प्रोवाचागतवानृषिः॥ इत्युक्तो नृपतिर्भार्यां प्रत्याहैनं प्रपूजय। सानुज्ञाता गवां यूथं प्रादादाभरणानि च॥ तरंतोऽपि पुनस्तस्मै प्रादाद्धनमपेक्षितं। दत्त्वा च पुरुमीळ्हस्य स्वानुजस्यांतिकं प्रति॥ प्रेरयामास तमृषिं सोऽपि त्वां मानयिष्यति॥ तथेति राज्ञो वचनं निशम्य तद्भार्यया दर्शितसर्वमार्गः। गच्छन् शनैरर्द्धपथे मरुद्गणान् समानरूपान् स्वदिदृक्षयागतान्॥ विलोक्य विप्रः सभयः प्रणम्य कृतांजलिः कंटकितांगसंघः। तुष्टाव दृष्टान्मरुतो विशिष्टैर्यथैर्वचोभिः परितुष्टचित्तः॥ संप्राप्य सर्वं स्वमनीषितं तदा मरुद्गणेभ्यो मुदितात्मवद्भः॥ तदाभवदृषिः सूक्तद्रष्टा श्यावाश्वनामकः। पश्चात्पुनर्गृहं गत्वा भूयो लब्ध्वा गवां शतं॥ दाल्भ्यो मंत्रदृशे राज्या चोदितः स्वसुतां ददौ। पुरुमीळ्हस्तरंतश्च तद्भार्या च शशीयसी॥ दाल्भ्यो यो रथवीत्याख्यः सप्त ये मरुतां गणाः। ते तस्मै यद्ददुस्तुष्टास्तत्के ष्ठेत्यत्र वर्ण्यते॥

॥ तत्र सूक्ते प्रथमा ॥

के ष्ठा नरः श्रेष्ठतमा य एकएक आयय। परमस्याः परावतः॥१॥

के। स्थ। नरः। श्रेष्ठऽतमाः। ये। एकःऽएकः। आऽयय। परमस्याः। पराऽवतः॥१॥

हे नरो नेतारो मरुतः श्रेष्ठतमा अत्यंतं श्रेष्ठा यूयं के ष्ठ। के स्थ। के भवथ। एवं स्वरूपानिश्चयात्संदिह्य ब्रवीति। ये यूयमेक एकः प्रत्येकमायय आगच्छथ। कस्मादित्युच्यते। परमस्याः परावतोऽत्यंतदूरदेशात्। अंतरिक्षादित्यर्थः ॥

॥ अथ द्वितीया ॥

क्व१ वोऽश्वाः क्वा३भीशवः कथं शेक कथा यय। पृष्ठे सदो नसोर्यमः ॥२॥

क्व। वः। अश्वाः। क्व। अभीशवः। कथं। शेक। कथा। यय। पृष्ठे। सदः। नसोः। यमः ॥२॥

हे मरुतो वो युष्माकमश्वाः क्व कुत्रत्याः। क्व चाभीशवो बंधनरज्जवः। कथं च शेक। *शीघ्रं गंतुं शक्ता भवथ।* कथा कथं यय। याताः स्थ। पृष्ठेऽश्वानां पृष्ठदेशे सदः। *सीदति तिष्ठत्यत्रेति* सदः पर्याणं। तत्र दृश्यते। तथा नसोर्नासिकयोर्यमो नियमिता पलायनप्रतिबंधकारी पशोर्नासिकयोर्दृश्यते। तस्मादश्वादिलिंगैः कुत्रापि त्वरितगमना इव प्रतिभांति के यूयमिति देवत्वमनवधार्याह ॥

॥ अथ तृतीया ॥

जघने चोद एषां वि सक्थानि नरो यमुः। पुत्रकृथे न जनयः ॥३॥

जघने। चोदः। एषां। वि। सक्थानि। नरः। यमुः। पुत्रऽकृथे। न। जनयः ॥३॥

एषामश्वानां जघने हंतव्यप्रदेशे चोदः प्रेरिका कशा अरायका३विशेषो वा वर्तते। शीघ्रगमनाय ताडयन्वर्तत इत्यर्थः। सक्थान्यूरुप्रदेशान्नरो नेतारो मरुतो वि विविच्य यमुः। नियच्छंति। आशुधावनेन विवृता भवंतीत्यर्थः। विवृतौ दृष्टांतः। पुत्रकृथे पुत्रकरण उत्पादने जनयोऽपत्योत्पादयित्र्यो योषित इव। ता यथा पुत्रोत्पादनकाले संगमसमय ऊरू विवृतौ कुर्वंति तद्वदित्यर्थः ॥

॥ अथ चतुर्थी ॥

परा वीरास एतन मर्यासो भद्रजानयः। अग्नितपो यथासथ ॥४॥

परा। वीरासः। इतन। मर्यासः। भद्रऽजानयः। अग्निऽतपः। यथा। असथ ॥४॥

कशाताडनादिलिंगेन जिगमिषून्मत्वा ब्रूते। हे वीरासो वीरा अमित्राणामीरयितारो हे मर्यासो मर्त्येभ्यो हिता हे भद्रजानयः। भद्रः स्तुत्यो जानिर्जन्म येषां ते तथोक्ताः। रुद्रपुत्रा इत्यर्थः। अग्नितपोऽग्निना तप्तास्ताम्रादयो यथा दीप्तास्तद्वत् प्रदीप्ता असथ। भवथ। अथवाग्नितप्ता दग्धदेहा यथा पलायंते तथा भवथेति ॥

॥ अथ पंचमी ॥

सनत्साश्व्यं पशुमुत गव्यं शतावयं ।

श्यावाश्वस्तुताय या दोर्वीरायोपबर्बृहत् ॥ ५ ॥

सनत् । सा । अश्व्यं । पशुं । उत । गव्यं । शतऽअवयं ।

श्यावाश्वऽस्तुताय । या । दोः । वीराय । उपऽबर्बृहत् ॥ ५ ॥

सा तरंतमहिषी मह्यं सनत् । प्रादात् । किं । अश्व्यमश्वात्मकं तत्समूहात्मकं वा पशुं । जातावेकवचनं । उतापि च गव्यं गोसमूहात्मकं पशुं शतावयमनेकैरविभिर्युक्तं सनदिति । सेत्युक्तं केत्याह । या श्यावाश्वस्तुताय श्यावाश्वेन मया स्तुताय वीराय तरंताय दोः स्वकीयं भुजमुपबर्बृहत् उपोदयच्छदालिंगनाय सा सनदिति । यतो भर्तृप्रेमास्पदा तस्मादेव बहुधनं दातुं शक्तेत्यर्थः ॥

॥ इति चतुर्थस्य तृतीये षड्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी । अदेवत्रादराधसः ॥ ६ ॥

उत । त्वा । स्त्री । शशीयसी । पुंसः । भवति । वस्यसी । अदेवऽत्रात् । अराधसः ॥ ६ ॥

उतापि च त्वैका शशीयसी । शशीयसीत्येतन्महिष्या नाम । सैव स्त्री । यद्वा उतेत्ययमेवकारार्थे । स्त्रीषु सैव प्रशस्येत्यर्थः ॥ त्वसमसिमनेमेत्यनुच्चानीति वचनात् त्वेति निघातः ॥ सैव पुंसः पुरुषाद्वस्यसी वसीयसी भवति । कस्मात्पुंस इत्युच्यते । अदेवत्रात् । देवा न येन त्रायंते स्तुत्यादिना सोऽदेवत्रः । तस्मादराधसः । राधो धनं । दानार्हधनरहितात् । लुब्धकादित्यर्थः ॥

॥ अथ सप्तमी ॥

वि या जानाति जसुरिं वि तृष्यंतं वि कामिनं । देवत्रा कृणुते मनः ॥ ७ ॥

वि । या । जानाति । जसुरिं । वि । तृष्यंतं । वि । कामिनं । देवऽत्रा । कृणुते । मनः ॥ ७ ॥

या शशीयसी जसुरिं व्यथितं ॥ जसिस्ताडनकर्मोपक्षेपणकर्मा वा ॥ तं विजानाति । तथा तृष्यंतं विजानाति । कामिनं धनाद्यभिलाषवंतं विजानाति । अनुकंपयाभिमतं दत्तवतीत्यर्थः । देवत्रा देवेषु मनः कृणुते कुरुते देवप्रीत्यर्थं प्रदानबुद्धिं करोति या सैव स्त्रीति पूर्वत्र संबंधः ॥

॥ अथाष्टमी ॥

उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः । स वैरदेय इत्समः ॥ ८ ॥

उत । घ । नेमः । अस्तुतः । पुमान् । इति । ब्रुवे । पणिः । सः । वैरऽदेये । इत् । समः ॥ ८ ॥

उत घापि च । घेति पूरणः । नेमः । त्वो नेम इत्यर्द्धस्येति निरुक्तं । नेमोऽर्द्धः । जायापत्योर्मिलित्वैककार्यकर्तृत्वादेक एव पदार्थः । अर्द्धं शरीरस्य भार्येत्यादि स्मृतेः । शशीयस्या अर्द्धभूतस्तरंतः पुमानस्तुत इति ब्रूवे । बहुधा स्तुतोऽपि गुणस्यातिबाहुल्यादस्तुत एवेति ब्रुवे पणिः स्तोताहं । स च तरंतो वैरदेये । वीरा धनानां प्रेरयितारो दानशीलाः । तैर्दातव्यं धनं देयं । तस्मिन्धने समः । सर्वेभ्यो दातेत्यर्थः । इदिति पूरणः ॥

॥ अथ नवमी ॥

उत मेऽरपद्युवतिर्ममंदुषी प्रति श्यावाय वर्तनिं ।
वि रोहिता पुरुमीळ्हाय येमतुर्विप्राय दीर्घयशसे ॥ ९ ॥

उत । मे । अरपत् । युवतिः । ममंदुषी । प्रति । श्यावाय । वर्तनिं ।
वि । रोहिता । पुरुऽमीळ्हाय । येमतुः । विप्राय । दीर्घऽयशसे ॥ ९ ॥

उतापि च श्यावाय श्यावाश्वाय मे मह्यमरपत् । अलपत् । स्पष्टमाचष्ट । किं । वर्तनिं मार्गं । कीदृशी सा । युवतिः प्रवृत्तयौवना प्रतिममंदुषी प्रतिमोदमाना । कस्मै । दीर्घयशसे प्रभूतान्नाय प्रभूतकीर्त्तये वा पुरुमीळ्हायैतन्नामकाय प्रभूतगृहाय ॥ क्रियार्थोपपदस्य च कर्मणि स्थानिनः । पा॰ २.३.१४. । इति चतुर्थी ॥ पुरुमीळ्हं प्राप्तुमित्यर्थः । तदर्थं रोहिता रोहितवर्णावश्वौ शशीयस्या दत्तौ वियेमतुः । धृतवंतावित्यर्थः । याश्वाभ्यां युक्ते रथे स्थापयित्वा पुरुमीळ्हगृहस्य मार्गं प्रदर्शयंती पुरतो गता सैव पुंसो भवति वस्यसीति पूर्वत्र संबंधः ॥

॥ अथ दशमी ॥

यो मे धेनूनां शतं वैददश्विर्यथा ददत् । तरंत इव मंहना ॥ १० ॥

यः । मे । धेनूनां । शतं । वैदत्ऽअश्विः । यथा । ददत् । तरंतःऽइव । मंहना ॥ १० ॥

इयं पुरुमीळ्हस्तुतिः । वैददश्विः पुरुमीळ्होऽपि यो मे मह्यं धेनूनां शतं यथा येन प्रकारेण ददत् दत्तवान् । तथा मंहना मंहनीयानि धनान्यपि ददत्

तरंत इव। स यथा धेनुशतं बहुविधं धनं च दत्तवान् तद्वदेवदृश्विः पुरुमीळ्होऽपि ददत् तं स्तुव इति शेषः ॥

॥ इति चतुर्थस्य तृतीये सप्तविंशो वर्गः ॥

॥ अथैकादशी ॥

य ईं वहंत आशुभिः पिबंतो मदिरं मधु। अत्र श्रवांसि दधिरे ॥११॥

ये। ईं। वहंते। आशुऽभिः। पिबंतः। मदिरं। मधु। अत्र। श्रवांसि। दधिरे ॥११॥

इदानीं मरुत एवैत इति निश्चित्य जनप्रसिद्धैर्माहात्म्यैः स्तौति। ये मरुत ईमिदानीमाशुभिः शीघ्रगामिभिरश्वैर्वहंते उह्यंते। किं कुर्वंतः। मदिरं मदकरं मधु सोमरसं पिबंतः। पाथेयत्वेन धृतं सोममित्यर्थः। ते मरुतोऽत्रास्मिन्देशे श्रवांसि स्तुतिजनितानि यशांसि दधिरे। धारयंति ॥

॥ अथ द्वादशी ॥

येषां श्रियाधि रोदसी विभ्राजंते रथेष्वा। दिवि रुक्म इवोपरि ॥१२॥

येषां। श्रिया। अधि। रोदसी इति। विऽभ्राजंते। रथेषु। आ। दिवि। रुक्मःऽइव। उपरि ॥१२॥

येषां मरुतां श्रिया कांत्या रोदसी द्यावापृथिव्यावधि। अधिष्ठिते भवत इति शेषः। यस्मादेते मरुतो रथेषु विभ्राजंते विशेषेण दीप्यंते। आ इति चार्थे। तत्र दृष्टांतः। उपर्युपरिभूते दिवि द्युलोके रुक्मो रोचमान आदित्य इव। यद्वोपरि रथस्योपरीति वा योज्यं ॥

॥ अथ त्रयोदशी ॥

युवा स मारुतो गणस्त्वेषरथो अनेद्यः। शुभंयावाप्रतिष्कुतः ॥१३॥

युवा। सः। मारुतः। गणः। त्वेषऽरथः। अनेद्यः। शुभंऽयावा। अप्रतिऽस्कुतः ॥१३॥

स मारुतो गणो युवा सर्वत्र मिश्रयिता नित्यतरुणो वा त्वेषरथो दीप्तरथोऽनेद्योऽनिंद्यः शुभंयावा शोभनं गंताप्रतिष्कुतोऽप्रतिगतोऽप्रतिशब्दितो वा। एवं महानुभावो गणो दीप्यत इति ॥

॥ अथ चतुर्दशी ॥

को वेद नूनमेषां यत्रा मदंति धूतयः । ऋतजाता अरेपसः ॥१४॥

कः । वेद । नूनं । एषां । यत्र । मदंति । धूतयः । ऋतऽजाताः । अरेपसः ॥१४॥

एषां मरुतां स्थानं को वेद । को जानाति । यत्र स्थाने धूतयः शत्रूणां कंपका मदंति हृष्यंति ऋतजाता जलार्थमुत्पन्ना यज्ञे वा प्रादुर्भूता अरेपसोऽपापाः ॥

॥ अथ पंचदशी ॥

यूयं मर्तं विपन्यवः प्रणेतार इत्था धिया । श्रोतारो यामहूतिषु ॥१५॥

यूयं । मर्तं । विपन्यवः । प्रऽनेतारः । इत्था । धिया । श्रोतारः । यामऽहूतिषु ॥१५॥

हे विपन्यवः स्तुतिकामा मरुतो यूयं मर्तं मरणस्वभावं यजमानमित्थानया धियेदानीं कृतप्रकारयानुग्रहबुद्ध्या ईदृशेन स्तुतिकर्मणा वा निमित्तेन प्रणेतारः प्रकर्षेण प्रापयितारोऽभिमतं स्वर्गादिकं । यामहूतिषु । यामो गमनं । तदर्था हूतयो यस्मिन्निति यामहूतयो यज्ञाः । तेषु श्रोतार आह्वानानां ॥

॥ इति चतुर्थस्य तृतीयेऽष्टाविंशो वर्गः ॥

॥ अथ षोडशी ॥

ते नो वसूनि काम्या पुरुश्चंद्रा रिशादसः । आ यज्ञियासो ववृत्तन ॥१६॥

ते । नः । वसूनि । काम्या । पुरुऽचंद्राः । रिशादसः । आ । यज्ञियासः । ववृत्तन ॥१६॥

हे रिशादसो हिंसकानां शत्रूणामत्तारो हे यज्ञियासो यज्ञार्हाः पुरुश्चंद्राः प्रभूताह्लादकधनास्ते यूयं नोऽस्मभ्यं वसूनि निवासयोग्यानि धनानि काम्या स्पृहणीयान्याववृत्तन । आवर्तयथेत्यर्थः । मरुतां दानप्रशंसाया अपेक्षितत्वान्न प्रार्थनोचिता ॥

॥ अथ सप्तदशी ॥

एतं मे स्तोममूर्म्ये दार्भ्याय परा वह । गिरो देवि रथीरिव ॥१७॥

एतं । मे । स्तोमं । ऊर्म्ये । दार्भ्याय । परा । वह । गिरः । देवि । रथीःऽइव ॥१७॥

संपन्नऋषिभावस्य श्यावाश्वस्यार्चनानसः । रथवीतिसुतायाश्च विवाहं शौनकोऽब्रवीत् ॥ कथं । मरुत्सु तु प्रयातेषु श्यावाश्वः सुमहायशाः । प्रादुर्भूतार्षमात्मानं ज्ञात्वा चिकुलनंदनः ॥ रथवीतेर्दुहितरमगच्छन्मनसा तदा । स सत्यमृ-

षिमात्मानं प्रवक्ष्यन्रथवीतये ॥ एतं मे स्तोममित्याभ्यां दौत्ये रात्रिं न्यवेदयत् । ऋषेर्नियोगमाज्ञाय देव्या राज्ञ्या प्रचोदितः ॥ आदाय कन्यकां दातुमुपेयायार्चनानसं । पादौ तस्योपसंगृह्य स्थित्वा प्रह्वः कृतांजलिः ॥ रथवीतिरहं दार्भ्य इति नाम शशंस सः । मया संयोगमिच्छंतं त्वां प्रत्याचक्षि यत्पुरा ॥ तत्क्षमस्व नमस्तेऽस्तु मे मा स्म भगवन् क्रुधीः ॥ ऋषेः पुत्रः स्वयमृषिः पितासि भगवानृषेः । हंत प्रतिगृहाणेमां स्नुषामित्येनमब्रवीत् ॥ तस्मै ददावश्वशतं स राजा स्वलंकृतां चापि सुतां स्नुषार्थं । विवाहकालेऽपि ददौ नरेंद्रः शतं हयानां दुहितुः सहस्रं ॥ गवां सहस्रं वसु च प्रभूतं तप्तुं तपोऽंतेऽथ वनं जगामेति ॥ हे ऊर्म्ये रात्रि देवि । ऊर्म्येति रात्रिनाम । मे मदीयमेतं स्तोमं मरुद्भ्यः कृतं स्तोत्रमहं मंत्रदृक् भूत्वा मरुतः स्तुतवानित्येवं दार्भ्याय श्यावाश्वाय परा पराङ्मुखी दार्भ्याभिमुखी सती वह । प्रापयेत्यर्थः । तदेवादरार्थमुच्यते । हे रात्रि देवि गिरः स्तुतीर्मरुद्विषयाः परावह रथीरिव । रथी यथा रथेऽभिप्रेतं वसु स्थापयित्वाभिमतं देशं प्रापयति तद्वत् ॥

॥ अथाष्टादशी ॥

उत मे वोचतादिति सुतसोमे रथवीतौ । न कामो अप वेति मे ॥१८॥

उत । मे । वोचतात् । इति । सुतऽसोमे । रथऽवीतौ । न । कामः । अप । वेति । मे ॥१८॥

हे ऊर्म्ये उतापि च मे मां वोचतात् । ब्रूहि । किमित्युच्यते । इतीत्थं । कथमिति । सुतसोमे कृतसोमयागे रथवीतौ राज्ञि मे कामस्तत्पुत्रीविषयो नापवेति । नापगच्छति न विरमत इतीत्थं वोचतात् ॥

॥ अथैकोनविंशी ॥

एष क्षेति रथवीतिर्मघवा गोमतीरनु । पर्वतेष्वपश्रितः ॥१९॥

एषः । क्षेति । रथऽवीतिः । मघऽवा । गोऽमतीः । अनु । पर्वतेषु । अपऽश्रितः ॥१९॥

कन्यां दत्त्वा कृतार्थं तं श्यावाश्वोऽथ वनं गतं । रथवीतिं तपस्यंतं संप्रेक्ष्यार्षेण चक्षुषा । रम्ये हिमवतः पृष्ठ एष क्षेतीति सोऽब्रवीत् ॥ एष रथवीतिर्मघवा धनवान् गोमतीरनूदकवतीर्नदीरनु अनुसृत्य नदीनां तीरे क्षेति निवसति पर्वतेषु हिमवत्पर्वतप्रांतेष्वपश्रित आश्रितः ॥

॥ इति चतुर्थस्य तृतीय एकोनविंशो वर्गः ॥

ऋतेन ऋतमिति नवर्चं षष्ठं सूक्तमात्रेयस्य श्रुतविद आर्षं त्रैष्टुभं मैत्रावरुणं। तथा चानुक्रम्यते। ऋतेन नव श्रुतविन्मैत्रावरुणं वै तदिति। वै तदित्युभयोः प्रयोगात्तुह्यादिपरिभाषयैतदादीन्येकादश सूक्तानि मित्रावरुणदेवत्यानि ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

ऋतेन॑ ऋ॒तमपि॑हितं ध्रु॒वं वां॒ सूर्य॑स्य॒ यत्र॑ वि॒मु॒चंत्यश्वा॑न्।
दश॑ श॒ता स॒ह त॑स्थु॒स्तदेकं॑ दे॒वानां॒ श्रेष्ठं॒ वपु॑षामपश्यं ॥१॥

ऋतेन॑। ऋ॒तं। अपि॑ऽहितं। ध्रु॒वं। वां॒। सूर्य॑स्य। यत्र॑। वि॒ऽमु॒चंति॑। अश्वा॑न्।
दश॑। श॒ता। स॒ह। त॒स्थुः॒। तत्। एक॑। दे॒वानां॑। श्रेष्ठं॑। वपु॑षां। अ॒प॒श्यं॒ ॥१॥

सूर्यस्य ऋतं सत्यभूतं मंडलमृतेनोदकेनापिहितमाच्छादितं ध्रुवं शाश्वतमपश्यमिति संबंधः। यत्र वां युवाभ्यां स्थितिस्तदित्यर्थः। सूर्यमंडले मित्रावरुणयोः स्थितिश्चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। ऋग्वे॰ १. ११५. १.। उद्वां चक्षुर्वरुण सुप्रतीकं देवयोः। ऋग्वे॰ ७. ६१. १.। इति चक्षुर्मित्रस्य वरुणस्य। ऋग्वे॰ ७. ६३. १.। इत्यादिषु प्रसिद्धा। यत्र यस्मिन्मंडले स्थितानश्वान् विमुचंति विमोचयंति स्तोतारः। मंदेहादिभिर्निरुद्धानित्यर्थः। अथवा शीघ्रधावनाय स्तुत्या प्रेरयंति। यस्मिंश्च मंडले दश शता शतानि सहस्रसंख्याका रश्मयस्तस्थुः तिष्ठंति तादृशं देवानां वपुषां वपुष्मतां तेजोवतामग्न्यादीनां श्रेष्ठं प्रशस्यं॥ मत्वर्थलक्षणा। अथवा व्यधिकरणषष्ठी ॥ देवानां वपुषां शरीराणां श्रेष्ठं। मंडलं हि सूर्यस्य वपुःस्थानीयं। तन्मंडलमपश्यं। अथवा वां युवयोर्मध्ये सूर्यस्य मंडलमपश्यमिति व्याख्येयं मैत्रं वा अहरिति श्रुतेर्मित्रस्यैव सूर्यत्वादित्याशयेन ॥

॥ अथ द्वितीया ॥

तत्सु वां॑ मित्रावरुणा महि॒त्वमी॒र्मा त॒स्थुषी॒रह॑भिर्दुदुह्रे।
विश्वाः॑ पिन्वथः॒ स्वस॑रस्य॒ धेना॒ अनु॒ वामेकः॑ प॒विरा व॑वर्त ॥२॥

तत्। सु। वां॒। मि॒त्रा॒व॒रु॒णा॒। म॒हि॒ऽत्वं। ईर्मा। त॒स्थुषीः॑। अह॑ऽभिः। दु॒दु॒ह्रे।
विश्वाः॑। पि॒न्व॒थः॒। स्वस॑रस्य। धेनाः॑। अनु॑। वां॒। एकः॑। प॒विः। आ। व॒व॒र्त॒ ॥२॥

हे मित्रावरुणा वां युवयोस्तन्महित्वं महत्त्वं सु सुष्ठु। अतिप्रशस्तमित्यर्थः।

किं तदित्युच्यते । ईर्मा सततगंता सर्वस्य प्रेरको वादित्योऽहभिरहोभिर्वर्षर्तुसंबंधिभिस्तस्थुषीः स्थावरभूता अपो दुदुहे । दुग्धे । किंच स्वसरस्य स्वयं सर्तुरादित्यस्य विश्वाः सर्वा धेना लोकानां प्रीणयित्रीर्धुतीः पिन्वथः । वर्धयथः । वां युवयोरेकोऽप्रतियोगी पविः । पविरिति रथस्य नेमिः पवी रथनेमिर्भवतीति यास्कवचनात् । तथाप्यत्र लक्षितलक्षणया रथे वर्तते केवलचक्रस्यावर्तनायोगात् । युवयोरेको रथोऽन्वाववर्त । अनुक्रमेण प्ररिभ्रमते ॥

॥ अथ तृतीया ॥

अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः ।
वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ॥३॥

अधारयतं । पृथिवीं । उत । द्यां । मित्रऽराजाना । वरुणा । महःऽभिः ।
वर्धयतं । ओषधीः । पिन्वतं । गाः । अव । वृष्टिं । सृजतं । जीरदानू इति जीरऽदानू ॥३॥

हे मित्रराजाना । मित्रभूताः स्तोतारो राजानः स्वामिन ईश्वरा भवंति ययोः सकाशात्तौ मित्रराजानौ । हे वरुणा ॥ प्रतियोग्यपेक्षया द्विवचनं । अत्र पादादित्वादाद्यं पदं न निहन्यते । वरुणेत्येतस्य त्वामंत्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानवत्त्वेनास्यैव पादादित्वादनिघातत्वं युक्तं । नैवं भवति । नामंत्रिते समानाधिकरणे सामान्यवचनमिति वरुणेत्येतस्यामंत्रितसमानाधिकरणत्वादस्य च सामान्यवचनत्वादविद्यमानवत्त्वाभावेन पादादित्वाभावादुत्तरस्य निघातत्वं युक्तं ॥ हे देवौ महोभिस्तेजोभिः स्वसामर्थ्यैः पृथिवीमुतापि च द्यामधारयतं । हे देवौ युवामोषधीर्वर्धयतं वृष्टिप्रेरणेन । गाः पिन्वतं । गवाश्वादीन्वर्धयतं । तदर्थं वृष्टिमवसृजतं । अवाङ्मुखं प्रेरयतं हे जीरदानू क्षिप्रदानौ ॥

॥ अथ चतुर्थी ॥

आ वामश्वासः सुयुजो वहंतु यतरश्मय उप यंत्वर्वाक् ।
घृतस्य निर्णिगनु वर्तते वामुप सिंधवः प्रदिवि क्षरंति ॥४॥

आ । वां । अश्वासः । सुऽयुजः । वहंतु । यतऽरश्मयः । उप । यंतु । अर्वाक् ।
घृतस्य । निःऽनिक् । अनु । वर्तते । वां । उप । सिंधवः । प्रऽदिवि । क्षरंति ॥४॥

हे मित्रावरुणौ वां युवामश्वासोऽश्वाः सुयुजः सुष्ठु रथे युक्ताः संत आवहंतु ।

यतरश्मयः सारथिनियतप्रग्रहास्तेऽर्वागुपयंतु। घृतस्योदकस्य निर्णियूपं वामनुवर्तते। अनुगच्छति। किंच प्रदिवि। पुराणनामैतत्। पुराणाः सिंधव उपक्षरंति। उपगच्छंति युवयोरनुग्रहात् ॥

॥ अथ पंचमी ॥

अनु श्रुताममतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा।
नमस्वंता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वंतः ॥५॥

अनु। श्रुतां। अमतिं। वर्धत्। उर्वीं। बर्हिःऽइव। यजुषा। रक्षमाणा।
नमस्वंता। धृतऽदक्षा। अधि। गर्ते। मित्र। आसाथे इति। वरुण। इळासु। अंतरिति ॥५॥

श्रुतां विश्रुताममतिं। रूपनामैतत्। शरीरदीप्तिमित्यर्थः। तामनुवर्धदनुवर्धयंतौ। बर्हिर्यज्ञः। स इव स यथा यजुषा मंत्रेण रक्ष्यते तद्वदुर्वीं रक्षमाना पालयंतौ नमस्वंतान्नवंतौ हे धृतदक्षात्तबलौ हे मित्र हे वरुण हे मित्रावरुणौ युवामुक्तलक्षणौ संताविळासु यागभूमिष्वंतर्मध्ये गर्तेऽधि रथ आसाथे। उपविशथः। रथोऽपि गर्त उच्यते। नि॰ ३.५.। इति यास्कः। आ रोहथो वरुण मित्र गर्तं। ऋग्वे॰ ५. ६२. ८.। इति ॥

॥ इति चतुर्थस्य तृतीये त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वंतः।
राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ ॥६॥

अक्रविऽहस्ता। सुऽकृते। परःऽपा। यं। त्रासाथे इति। वरुणा। इळासु। अंतरिति।
राजाना। क्षत्रं। अहृणीयमाना। सहस्रऽस्थूणं। बिभृथः। सह। द्वौ ॥६॥

अक्रविहस्ता अकृपणहस्तौ। दानशूरावित्यर्थः। कस्मै। सुकृते शोभनस्तुतिकर्त्रे परस्पा परस्तात्पातारौ रक्षितारौ हे वरुणा मित्रवरुणौ युवां यं यजमानमिळासु यागभूमिष्वंतर्मध्ये त्रासाथे रक्षथः तस्मै सुकृतेऽक्रविहस्ता परस्पा च भवथ इति संबंधः। किंच युवां राजाना राजमानावहृणीयमानाक्रुध्यंतौ द्वौ परस्परं सह साहित्येन क्षत्रं धनं सहस्रस्थूणमनेकावष्टंभकस्तंभोपेतं सौधादिरूपं गृहं च

बिभृथः। धारयथः सुकृते यजमानाय। अथवा क्षत्रं बलमपरिमिताभिः स्थूणाभिरुपेतं रथं चागमनार्थं सह धारयथः ॥

॥ अथ सप्तमी ॥

हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्य१श्वाजनीव ।
भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य ॥७॥

हिरण्यऽनिर्निक्। अयः। अस्य। स्थूणा। वि। भ्राजते। दिवि। अश्वाजनीऽइव।
भद्रे। क्षेत्रे। निऽमिता। तिल्विले। वा। सनेम। मध्वः। अधिऽगर्त्यस्य ॥७॥

अनयो रथो हिरण्यनिर्णिक् हिरण्यरूपः। निर्णिगिति रूपनाम। अस्य रथस्य स्थूणा कीलकादयोऽयः। हिरण्यनामैतत्। अयोविकारा इत्यर्थः। अयोमया वा। तादृशो रथो दिव्यंतरिक्षे विभ्राजते। किमिव। अश्वाजनीव। अश्वा व्यापनशीला मेघाः। तानजति गच्छतीत्यश्वाजनी विद्युत्। सेव दिवि भ्राजते। किंच भद्रे कल्याणे स्तुत्ये वा क्षेत्रे देवयजने तिल्विले वा॥ तिल स्नेहने॥ तिलुः स्निग्धा इला भूमिर्यस्य तत् क्षेत्रं तिल्विलं देवयजनं। घृतसोमादिना स्निग्धे भद्रे च क्षेत्रे निमिता स्थूणा यूपयष्टिरवस्थितः। मध्वो मधुपूर्णे गर्तस्य गर्ते रथं सनेम। संभजेम ॥ कर्मणि षष्ठ्यौ। अधीति पूरणः॥ अथवा गर्तस्याधि रथस्योपरि मध्वो मधु सोमरसं सनेम। स्थापयेमेत्यर्थः ॥

॥ अथाष्टमी ॥

हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य ।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ॥८॥

हिरण्यऽरूपं। उषसः। विऽउष्टौ। अयःऽस्थूणं। उत्ऽइता। सूर्यस्य।
आ। रोहथः। वरुण। मित्र। गर्तं। अतः। चक्षाथे इति। अदितिं। दितिं। च ॥८॥

उषसो व्युष्टौ। प्रातःकाल इत्यर्थः। सूर्यस्योदितोदितावुदये। स एव कालः प्रकारांतरेणोक्तः। तस्मिन् काले हिरण्यरूपमयःस्थूणमयोमयशंकुं गर्तं रथं हे वरुण हे मित्र युवां गर्तमारोहथो यज्ञं प्राप्तुं। अतोऽस्माद्धेतोरदितिमखंडनीयां भूमिं दितिं खंडितां प्रजादिकां च चक्षाथे। पश्यथः ॥

दाक्षायणयज्ञे यज्ञंहिष्ठमिति नवमी द्वितीयस्याममावस्यायां मैत्रावरुणस्य हविषो याज्या। सूचितं च। आ नो मित्रावरुणा यज्ञंहिष्ठं नातिविधे सुदानू। आ०

२.१४.। इति ॥ मैत्रावरुणे पशौ हविष एषैव याज्या । सूचितं च । यद्बंहिष्ठं नातिविधे सुदानू हिरण्यगर्भः समवर्ततात्ये । आ° ३.८.। इति ॥ तत्पाठस्तु ॥

यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा ।
तेन नो मित्रावरुणावविष्टं सिषासंतो जिगीवांसः स्याम ॥९॥

यत् । बंहिष्ठं । न । अतिऽविधे । सुदानू इति सुऽदानू । अच्छिद्रं । शर्म । भुवनस्य । गोपा ।
तेन । नः । मित्रावरुणौ । अविष्टं । सिसासंतः । जिगीवांसः । स्याम ॥९॥

हे सुदानू शोभनदानौ हे भुवनस्य गोपा युवां बंहिष्ठं बहुतमं यदच्छिद्रमनवच्छिन्नं शर्म सुखं गृहं वा नातिविधेऽतिवेद्धुमशक्यं शर्मेति शर्मविशेषणं ॥ व्यध ताडन इत्यस्मादत्युपपदे कृत्यार्थे केन् संप्रसारणं च ॥ तादृशं शर्म धारयथः तेन शर्मणा नोऽस्मानविष्टं । रक्षतं । हे मित्रावरुणौ सिषासंतो धनानि संभक्तुमिच्छंतो वयं जिगीवांसः शत्रूणां धनानि जेतुमिच्छंतः स्याम । भवेम ॥

॥ इति चतुर्थस्य तृतीय एकत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणामात्येन विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके तृतीयोऽध्यायः समाप्तः ॥

॥ श्रीभारत्यै नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
अष्टकस्य चतुर्थस्य तृतीयो व्याकृतः स्फुटं ।
अध्यायः सायणार्येण चतुर्थो व्याकरिष्यते ॥

ऋतस्य गोपाविति सप्तर्चं सप्तमं सूक्तं । अत्रेयमनुक्रमणिका । ऋतस्य सप्तार्चनाना जागतमिति । आत्रेयोऽर्चनाना नाम ऋषिः । जगती छंदः । तुह्यादिपरिभाषया मित्रावरुणौ देवता ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि ।
यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ॥१॥
ऋतस्य । गोपौ । अधि । तिष्ठथः । रथं । सत्यऽधर्माणा । परमे । विऽओमनि ।
यं । अत्र । मित्रावरुणा । अवथः । युवं । तस्मै । वृष्टिः । मधुऽमत् । पिन्वते । दिवः ॥१॥

हे ऋतस्योदकस्य गोपौ रक्षितारौ सत्यधर्माणा सत्यधर्माणौ युवां रथमधितिष्ठथः । आरोहथोऽस्मद्यज्ञमागमनार्थं । कुत्र । परमे व्योमनि निरतिशय आकाशे । हे मित्रावरुणौ युवं युवामत्रास्मिन्यज्ञे यं यजमानमवथो रक्षथः तस्मै यजमानाय वृष्टिः पर्जन्यो मधुमदुदकं दिवो द्युलोकात्पिन्वते । सिंचति । वर्धयति ॥

॥ अथ द्वितीया ॥

सम्राजावस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशा ।
वृष्टिं वां राधो अमृतत्वमीमहे द्यावापृथिवी वि चरंति तन्यवः ॥२॥
संऽराजौ । अस्य । भुवनस्य । राजथः । मित्रावरुणा । विदथे । स्वःऽदृशा ।
वृष्टिं । वां । राधः । अमृतऽत्वं । ईमहे । द्यावापृथिवी इति । वि । चरंति । तन्यवः ॥२॥

हे मित्रावरुणौ सम्राजौ सम्यग्राजमानौ युवामस्य भुवनस्य राजथः । ईशाथे । स्वर्दृशा स्वर्गस्य द्रष्टारौ युवां विदथेऽस्मद्यज्ञे सम्राजाविति संबंधः । वां युवां वृष्टिं राधो धनं वृष्ट्याख्यं धनममृतत्वं स्वर्गं चेमहे । प्रार्थयामहे । युवयोस्तन्यवो विस्तृता रश्मयो द्यावापृथिवी वि चरंति । विविधं प्राप्नुवंति । अथवा वृष्टिं धनममृतत्वं चेमहे ॥

॥ अथ तृतीया ॥

सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी ।
चित्रेभिरभ्रैरुप तिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ॥३॥
संऽराजौ । उग्रा । वृषभा । दिवः । पती इति । पृथिव्याः । मित्रावरुणा । विचर्षणी इति विऽचर्षणी ।
चित्रेभिः । अभ्रैः । उप । तिष्ठथः । रवं । द्यां । वर्षयथः । असुरस्य । मायया ॥३॥

सम्राजौ सम्यग्राजमानावुयोद्भूर्णबलौ वृषभा वर्षितारौ दिवो द्युलोकस्य पती स्वामिनौ पृथिव्याश्च पती विचर्षणी सर्वस्य द्रष्टारौ मित्रावरुणौ। एवं महानुभावौ चित्रेभिश्चायनीयैरभ्रैर्मेघैः सह रवं स्तोत्रमुपतिष्ठथः। पश्चात् द्यां च वर्षयथोऽसुरस्योदकनिरसितुः पर्जन्यस्य मायया प्रज्ञया सामर्थ्येन ॥

॥ अथ चतुर्थी ॥

माया वां मित्रावरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधं।
तमभ्रेण वृष्ट्या गूहथो दिवि पर्जन्य द्रप्सा मधुमंत ईरते ॥४॥

माया। वां। मित्रावरुणा। दिवि। श्रिता। सूर्यः। ज्योतिः। चरति। चित्रं। आयुधं।
तं। अभ्रेण। वृष्ट्या। गूहथः। दिवि। पर्जन्य। द्रप्साः। मधुऽमंतः। ईरते ॥४॥

हे मित्रावरुणा वां युवयोर्माया दिवि श्रिता। आश्रिता। कैषा युवयोर्मायोच्यते। सूर्यः सर्वस्य प्रेरको ज्योतिर्दीप्यमानश्चित्रं चायनीयमायुधमुक्तलक्षणायुधरूपश्चरति। परिभ्रमत्यंतरिक्षे। शत्रुमारकत्वादायुधमुच्यते। तं सूर्यमभ्रेण मेघेन वृष्ट्या दिवि गूहथः। गोपायथः। हे पर्जन्य देव त्वया मित्रावरुणाभ्यां प्रेरितेन मधुमंतो द्रप्सा ईरते। ईर्यंते। त्वत्सृष्टा वा गच्छंति ॥

॥ अथ पंचमी ॥

रथं युंजते मरुतः शुभे सुखं शूरो न मित्रावरुणा गविष्टिषु।
रजांसि चित्रा वि चरंति तन्यवो दिवः सम्राजा पयसा न उक्षतं ॥५॥

रथं। युंजते। मरुतः। शुभे। सुऽखं। शूरः। न। मित्रावरुणा। गोऽइष्टिषु।
रजांसि। चित्रा। वि। चरंति। तन्यवः। दिवः। संऽराजा। पयसा। नः। उक्षतं ॥५॥

हे मित्रावरुणौ युवयोरनुग्रहात् मरुतः शुभ उदकार्थं सुखं शोभनाक्षद्वारं रथं युंजते। अश्वैर्योजयंति। शूरो न शूर इव। स यथा युद्धार्थं रथं युनक्ति तद्वत्। गविष्टिषु गवामुदकानामेषणेषु निमित्तेषु चित्रा चायनीयानि रजांसि लोकान् तन्यवस्ततास्ते मरुतो वि चरंति। विविधं चरंति। तस्मात्तैः सहितौ हे सम्राजा युवां दिवो द्युलोकात्पयसोदकेन नोऽस्मानुक्षतं। सिंचतं ॥

॥ अथ षष्ठी ॥

वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीं ।
अभ्रा वसत मरुतः सु मायया द्यां वर्षयतमरुणामरेपसं ॥६॥
वाचं । सु । मित्रावरुणौ । इराऽवतीं । पर्जन्यः । चित्रां । वदति । त्विषिऽमतीं ।
अभ्रा । वसत । मरुतः । सु । मायया । द्यां । वर्षयतं । अरुणां । अरेपसं ॥६॥

हे मित्रावरुणौ युवयोरनुग्रहात् पर्जन्यो मेघः सु सुष्ठिरावतीमन्नवतीमन्नसाधिकां चित्रां चायनीयां त्विषीमतीं दीप्तिमतीं वाचं गर्जनशब्दं वदति । शब्दयति वृष्ट्यर्थं । मरुतश्चाभ्राभ्राणि मेघान् सु सुष्ठु वसत आच्छादयंति मायया स्वप्रज्ञया । युवां च पर्जन्येन मरुद्भिश्च सहारुणामरुणवर्णामरेपसमपापां वृष्ट्यविघातिनीं द्यां वर्षयतं ॥

॥ अथ सप्तमी ॥

धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया ।
ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथं ॥७॥
धर्मणा । मित्रावरुणा । विपःऽचिता । व्रता । रक्षेथे इति । असुरस्य । मायया ।
ऋतेन । विश्वं । भुवनं । वि । राजथः । सूर्यं । आ । धत्थः । दिवि । चित्र्यं । रथं ॥७॥

हे मित्रावरुणा विपश्चिता प्राज्ञौ युवां धर्मणा जगद्धारकेण वृष्ट्यादिलक्षणेन कर्मणा व्रता यज्ञादिकर्माणि रक्षेथे । पालयथः । असुरस्य मेघानां निरसितुः पर्जन्यस्य मायया प्रज्ञया च ऋतेनोदकेन यज्ञेन वा निमित्तेन विश्वं भुवनं सर्वं भूतजातं विराजथः । विदीपयथ इत्यर्थः । सूर्यमा सूर्यं च चित्र्यं पूज्यं रथं रंहणस्वभावं दिवि द्युलोके धत्थः । धारयथो जगदुपकारार्थं ॥

॥ इति चतुर्थस्य चतुर्थे प्रथमो वर्गः ॥

वरुणं व इति सप्तर्चमष्टमं सूक्तमर्चनानस आर्षं मैत्रावरुणं । पंक्त्यंतपरिभाषयानुष्टुभं । अंत्या पंक्तिः । वरुणं पंक्त्यंतं त्वित्यनुक्रमणिका । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

वरुणं वो रिशादसमृचा मित्रं हवामहे ।
परि व्रजेव बाह्वोर्जगन्वांसा स्वर्णरं ॥१॥
वरुणं । वः । रिशादसं । ऋचा । मित्रं । हवामहे ।
परि । व्रजाऽइव । बाह्वोः । जगन्वांसा । स्वः॰ऽनरं ॥१॥

वो युवयोर्मध्ये ॥ व्यत्ययेन बहुवचनं ॥ रिशादसं । रिशंति हिंसंतीति रिशाः शत्रवः । तेषां प्रेरकं स्वर्णरं स्वर्गस्य नेतारं । एतद्व्यवहितमप्युभयत्र संबध्यते । एवंविधं वरुणमुक्तलक्षणं मित्रं च ऋचा मंत्रेण हवामहे । आह्वयामः । अथावयुत्योच्यते । व्रजेव गोयूथानीव बाह्वोर्बलेन परिजगन्वांसा परिगच्छंतौ ॥

॥ अथ द्वितीया ॥

ता बाहवा सुचेतुना प्र यंतमस्मा अर्चते ।
क्षेत्रं हि जार्ये वां विश्वासु क्षासु जोगुवे ॥२॥
ता । बाहवा । सुऽचेतुना । प्र । यंतं । अस्मै । अर्चते ।
क्षेत्रं । हि । जार्ये । वां । विश्वासु । क्षासु । जोगुवे ॥२॥

ता तौ युवां बाहवा बाहुना सुचेतुना सुष्ठु प्रज्ञात्रा । प्रयासभूयस्त्वं जानतेत्यर्थः । यद्यप्यात्मेव ज्ञाता न हस्तस्तथापि तद्धर्ममत्रारोप्य स्तूयते । यद्वैतत्तावित्यस्य विशेषणं । सुज्ञानावित्यर्थः । शोभनहस्तेनास्मा अर्चते स्तुवते मह्यं प्रयंतं । अभिमतं सुखं गमयतं ॥ अंतर्भावितण्यर्थो द्रष्टव्यः । यमिर्दानकर्मा वा द्रष्टव्यः ॥ प्रयच्छतमित्यर्थः । जार्ये स्तुत्यं क्षेत्रं सुखं वां युवयोः संबंधि युवाभ्यां कृत वा विश्वासु सर्वासु क्षासु भूमिषु जोगुवे । गच्छति । व्याप्नोति । अवते गवत इति गतिकर्मसु पाठादयमपि गतिकर्मा । अथवा जोगुवे सर्वत्र शब्दयामीत्यर्थः ॥

॥ अथ तृतीया ॥

यन्नूनमश्यां गतिं मित्रस्य यायां पथा ।
अस्य प्रियस्य शर्मण्यहिंसानस्य सश्चिरे ॥३॥
यत् । नूनं । अश्यां । गतिं । मित्रस्य । यायां । पथा ।
अस्य । प्रियस्य । शर्मणि । अहिंसानस्य । सश्चिरे ॥३॥

यद्यदा नूनमिदानीं गतिं गमनमश्यां प्राप्नुयां ॥ यद्योगादनिघातः ॥ तदा मित्रस्य मित्रभूतस्य पथा मार्गेण मित्रप्रापकेण मार्गेण यायां। गच्छेयं। मित्रो नयतु विद्वान्। ऋग्वे॰ १.९०.१.। इत्यादिषु मित्रस्येष्टदेशगमयितृत्वं प्रसिद्धं। न केवलमहमेक एवं गंता किंतु सर्वेऽपि तथागमन्नित्याह। अस्य प्रियस्य। मित्रस्येत्यर्थः। अहिंसानस्याहिंसतः। यतोऽयमहंतातः प्रिय इत्यर्थः। तस्य शर्मणि सुखे गृहे स्थाने वा सश्चिरे। संगताः ॥

॥ अथ चतुर्थी ॥

युवाभ्यां मित्रावरुणोपमं धेयामृचा।
यद्ध क्षये मघोनां स्तोतॄणां च स्पूर्धसे ॥४॥

युवाभ्यां। मित्रावरुणा। उपऽमं। धेयां। ऋचा।
यत्। ह। क्षये। मघोनां। स्तोतॄणां। च। स्पूर्धसे ॥४॥

हे मित्रावरुणा युवाभ्यां दातव्यमुपममुप समीपे मीयमानं धनमृचा स्तुत्या साधनेन धेयां। धारयामि। यद्ध यत्खलु युवाभ्यां सकाशादाप्तं धनं मघोनां धनवतामदातॄणां स्तोतॄणां च क्षये गृहे स्पूर्धसे स्पर्धनाय भवति। धनिकानां स्तोतॄणां च धनाधिक्यविषये स्पर्धा भवतीत्यर्थः। अपरिमितं धनं भवतीति भावः ॥

॥ अथ पंचमी ॥

आ नो मित्र सुदीतिभिर्वरुणश्च सधस्थ आ।
स्वे क्षये मघोनां सखीनां च वृधसे ॥५॥

आ। नः। मित्र। सुदीतिऽभिः। वरुणः। च। सधऽस्थे। आ।
स्वे। क्षये। मघोनां। सखीनां। च। वृधसे ॥५॥

हे मित्र त्वं च वरुणश्च सुदीतिभिः सुदीप्तियुक्तौ युवां नोऽस्मभ्यं सधस्थे सहस्थाने यज्ञ आगच्छतं। द्वितीय आकारोऽनर्थक आदरार्थो वा। किमर्थमित्युच्यते। मघोनां धनवतां हविष्मतां सखीनां च युवयोः सखीभूतानामस्माकं क्षये गृहे स्वे स्वकीये वृधसे वर्धनाय ॥

॥ अथ षष्ठी ॥

युवं नो येषु वरुणा क्षत्रं बृहच्च बिभृथः ।
उरु णो वाजसातये कृतं राये स्वस्तये ॥६॥
युवं । नः । येषु । वरुणा । क्षत्रं । बृहत् । च । बिभृथः ।
उरु । नः । वाजऽसातये । कृतं । राये । स्वस्तये ॥६॥

हे वरुणा मित्रावरुणौ युवं युवां नोऽस्माकं क्षत्रं बलं बृहत् ब्रह्म परिवृढमन्नं च येषु स्तोत्रेषु निमित्तेषु बिभृथः धारयथः युवाभ्यां धृतमन्नं च नोऽस्मभ्यं वाजसातयेऽन्नस्य लाभाय यज्ञाय वा राये धनाय स्वस्तये क्षेमाय चोरु विस्तीर्णं कृतं । कुरुतं ॥

॥ अथ सप्तमी ॥

उच्छंत्यां मे यजता देवक्षत्रे रुशद्गवि ।
सुतं सोमं न हस्तिभिरा पड्भिर्धावतं नरा बिभ्रतावर्चनानसं ॥७॥
उच्छंत्यां । मे । यजता । देवऽक्षत्रे । रुशत्ऽगवि ।
सुतं । सोमं । न । हस्तिऽभिः । आ । पट्ऽभिः । धावतं । नरा । बिभ्रतौ । अर्चनानसं ॥७॥

उच्छंत्यामुषसि । मे सोममिति संबंधः । यजता यष्टव्यौ रुशद्गवि रोचमानरश्मौ प्रातःसवने देवक्षत्रे । देवानां क्षत्रं बलं यस्मिन् यज्ञे तद्देवक्षत्रं । तस्मिन्मे मदीयं सुतमभिषुतं सोमं न । नेति संप्रत्यर्थे । इदानीं हस्तिभिर्हस्तवद्भिः ॥ हंतेर्गतिकर्मणो हस्तशब्दः ॥ गमनसाधनपादवद्भिरित्यर्थः । पड्भिः पादवद्भिश्च पादचतुष्टयोपेतैरश्वैराधावतं । आगच्छतं नरा हे नेतारौ मित्रावरुणौ ॥

॥ इति चतुर्थस्य चतुर्थे द्वितीयो वर्गः ॥

यश्चिकेतेति षडृचं नवमं सूक्तं रातहव्यस्यात्रेयस्यार्षं मैत्रावरुणं । यश्चिकेत षड्रातहव्य इत्यनुक्रमणिका । पंक्त्यंतं त्वित्युक्तत्वात् पंक्त्यंतपरिभाषयानुष्टुभं । अंत्या पंक्तिः ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

यश्चिकेत स सुक्रतुर्देवत्रा स ब्रवीतु नः ।
वरुणो यस्य दर्शतो मित्रो वा वनते गिरः ॥१॥

यः । चिकेत । सः । सुऽक्रतुः । देवऽत्रा । सः । ब्रवीतु । नः ।
वरुणः । यस्य । दर्शतः । मित्रः । वा । वनते । गिरः ॥१॥

यः स्तोता चिकेत जानाति स्तुतिं युवयोः स सुक्रतुः स एव शोभनकर्मा देवत्रा देवेषु स्तोतृमध्ये। यद्वा देवेषु मध्ये युवयोरेव स्तुतिं यश्चिकेत स सुक्रतुरिति। स सुकर्मा नोऽस्माकं ब्रवीतु। स्तुतिं परमुपदिशतु। यस्य दर्शतो दर्शनीयो वरुणो दर्शनीयो मित्रो वा मित्रश्च। वा शब्दश्चार्थे। गिरोऽस्मदीयाः स्तुतीर्वनते संभजते ॥

॥ अथ द्वितीया ॥

ता हि श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा ।
ता सत्पती ऋतावृध ऋतावाना जनेजने ॥२॥
ता । हि । श्रेष्ठऽवर्चसा । राजाना । दीर्घश्रुत्ऽतमा ।
ता । सत्पती इति सत्ऽपती । ऋतऽवृधा । ऋतऽवाना । जनेऽजने ॥२॥

ता हि तौ खलु मित्रावरुणौ श्रेष्ठवर्चसा प्रशस्ततेजस्कौ राजानेश्वरौ दीर्घश्रुत्तमा दूरदेशादाह्वानश्रोतृतमौ । ता तौ सत्पती सतां यजमानानां स्वामिनावृतावृधा यज्ञस्योदकस्य वा वर्धयितारौ जने जने सर्वेषु स्तोतृषु निमित्तेष्वृतावाना गमनवंतौ ॥

॥ अथ तृतीया ॥

ता वामियानोऽवसे पूर्वा उप ब्रुवे सचा ।
स्वश्वासः सुचेतुना वाजाँ अभि प्र दावने ॥३॥
ता । वां । इयानः । अवसे । पूर्वौ । उप । ब्रुवे । सचा ।
सुऽअश्वासः । सुऽचेतुना । वाजान् । अभि । प्र । दावने ॥३॥

ता तौ पूर्वौ पुरातनौ वां युवामियानो गच्छन् अवसे रक्षणाय सचा सहोपब्रुवे । उपेत्य स्तौमि । स्वश्वासः स्वश्वा वयमात्रेयाः सुचेतुना शोभनप्रज्ञानौ युवां वाजानभि अन्नान्यभिलक्ष्य प्र प्रकर्षेण दावने दानाय स्तुम इति शेषः । यद्वा स्वश्वासः स्वश्वौ ॥ द्वितीयाद्विवचनस्य शसादेशः ॥ उपब्रुव इति संबंधः ॥

॥ अथ चतुर्थी ॥

मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते ।
मित्रस्य हि प्रतूर्वतः सुमतिरस्ति विधतः ॥ ४ ॥
मित्रः । अंहोः । चित् । आत् । उरु । क्षयाय । गातुं । वनते ।
मित्रस्य । हि । प्रऽतूर्वतः । सुऽमतिः । अस्ति । विधतः ॥ ४ ॥

मित्रो देवोऽंहोश्चित् अंहस्वतोऽपि स्तोतुरादनंतरमेवोरूरवे क्षयाय गृहाय निवासाय वा गातुमुपायं वनते । प्रयच्छति । मित्रस्य हि मित्रस्य खलु देवस्य सुमतिः शोभनबुद्धिः प्रतूर्वतः प्रकर्षेण हिंसतोऽपि विधतः परिचरतः शुश्रूषकस्यास्ति हि । भवति खलु ॥

॥ अथ पंचमी ॥

वयं मित्रस्यावसि स्याम सप्रथस्तमे ।
अनेहसस्त्वोतयः सत्रा वरुणशेषसः ॥ ५ ॥
वयं । मित्रस्य । अवसि । स्याम । सप्रथःऽतमे ।
अनेहसः । त्वाऽऊतयः । सत्रा । वरुणऽशेषसः ॥ ५ ॥

वयं यजमाना मित्रस्य दुःखनिवारकस्य देवस्य सप्रथस्तमे सर्वतः पृथुतमेऽवसि रक्षणे वयं स्याम । भवेम । किंचानेहसोऽपापास्त्वोतयस्त्वया रक्षिता वरुणशेषसः । शेष इत्यपत्यनाम । वारकाः पुत्रा येषां ते । तादृशाः सत्रा वयं सर्वे सहैव भवेम ॥

॥ अथ षष्ठी ॥

युवं मित्रेमं जनं यतथः सं च नयथः ।
मा मघोनः परि ख्यतं मो अस्माकमृषीणां गोपीथे न उरुष्यतं ॥ ६ ॥
युवं । मित्रा । इमं । जनं । यतथः । सं । च । नयथः ।
मा । मघोनः । परि । ख्यतं । मो इति । अस्माकं । ऋषीणां । गोऽपीथे । नः । उरुष्यतं ॥ ६ ॥

हे मित्रा मित्रावरुणौ युवं युवामिमं जनं स्तोतारं मां प्रति यतथः । गच्छथः । आगत्य च सं च नयथः । संनयथश्च । कामान् प्रापयथः । यद्वा यतथ इत्यंतर्णी-

तदयमर्थोऽयं । अहनि यतथः । व्यापारेषु गमयथः । रात्रौ च संनयथः । निर्व्यापारं कारयथः । मघोनो हविर्लक्षणान्नवतोऽस्मान्मा परिख्यतं । मा परित्यजतं । मो मैव ऋषीणामस्माकं पुत्रानपि परिख्यतं । किंतु गोपीथे । गौः सोमरसः । तस्य पानं यस्मिन् स गोपीथो यज्ञः । तस्मिन्न उरुष्यतं । रक्षतं ॥

॥ इति चतुर्थस्य चतुर्थे तृतीयो वर्गः ॥

आ चिकितानेति षडृचं दशमं सूक्तं रातहव्यस्यार्षमानुष्टुभं मैत्रावरुणं । अत्रानुक्रमणिका । आ चिकितानानुष्टुभं त्विति ॥ आद्यस्तृचो दशरात्रे चतुर्थेऽहनि प्रउगशस्त्रे मैत्रावरुणस्य । सूचितं च । आ चिकितान सुक्रतू त्यमु वो अप्रहणं । आ० ७. ११. । इति ॥

॥ तत्र प्रथमा ॥

आ चिकितान सुक्रतू देवौ मर्त रिशादसा ।
वरुणाय ऋतपेशसे दधीत प्रयसे महे ॥ १ ॥

आ । चिकितान । सुक्रतू इति सुऽक्रतू । देवौ । मर्त । रिशादसा ।
वरुणाय । ऋतऽपेशसे । दधीत । प्रयसे । महे ॥ १ ॥

हे चिकितान जानन् स्तुतिं हे मर्त मनुष्य रातहव्य त्वमिति तस्यैव संबोधनं । सुक्रतू शोभनकर्माणौ रिशादसा हिंसकानां हिंसकौ देवावा । आकारयेति शेषः । आहूय च ऋतपेशसे । पेश इति रूपनाम । ऋतमुदकं । उदकमेव रूपं यस्य तादृशाय वरुणाय प्रयसे ॥ मत्वर्थो लुप्यते ॥ हविर्लक्षणान्नवते महे महते पूज्याय दधीत । दद्याः । हविरिति शेषः । द्वितीयार्थे वा चतुर्थी । महद्धविर्दधीत । महतोऽन्नस्य लाभायेति वा योज्यं ॥

॥ अथ द्वितीया ॥

ता हि क्षत्रमविह्रुतं सम्यगसुर्य१मार्शाते ।
अर्ध व्रतेव मानुषं स्व१र्ण धायि दर्शतं ॥ २ ॥

ता । हि । क्षत्रं । अविऽह्रुतं । सम्यक् । असुर्यं । आशाते इति ।
अर्ध । व्रताऽइव । मानुषं । स्वः । न । धायि । दर्शतं ॥ २ ॥

ता हि । हीति हेतौ । यस्मात्ता तौ क्षत्रं बलमविह्रुतमहिंस्यमसुर्यमसुरवि-

धाति महद्बलं सम्यगाशाते व्याप्नुतः अथ अतो हेतोर्मानुषं मनुष्येषु प्रवृत्तं व्रतेव कर्मेव तद्यथा मनुष्येषु नियतं स्वर्ण सूर्य इव स यथा दिवि दृश्यते तद्वद्दर्शतं दर्शनीयं बलं धाथि। यज्ञे निहितं ॥

॥ अथ तृतीया ॥

ता वामेषे रथानामुर्वीं गव्यूतिमेषां।
रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥३॥
ता। वां। एषे। रथानां। उर्वीं। गव्यूतिं। एषां।
रातऽहव्यस्य। सुऽस्तुतिं। दधृक्। स्तोमैः। मनामहे ॥३॥

हे मित्रावरुणौ ता तौ प्रसिद्धौ वां युवां रथानामस्मदीयानामेषां पुरतो वर्तमानानामुर्वीं प्रभूतां गव्यूतिमतिविस्तृतं मार्गमेषे गंतुं। मार्गरक्षणायेत्यर्थः॥ तुमर्थेऽसेन्प्रत्ययः॥ तदर्थं वां मनामहे स्तुमो रातहव्यस्य ऋषे रातहव्यसंबंधिभिः सुष्टुतिं सुष्टुतिभिः शोभनस्तुतिसाधनैः स्तोमैः दधृक् धर्षकौ युवां॥

॥ अथ चतुर्थी ॥

अधा हि काव्या युवं दक्षस्य पूर्भिरद्भुता।
नि केतुना जनानां चिकेथे पूतदक्षसा ॥४॥
अध। हि। काव्या। युवं। दक्षस्य। पूःऽभिः। अद्भुता।
नि। केतुना। जनानां। चिकेथे इति। पूतऽदक्षसा ॥४॥

अध अपि च। हि प्रसिद्धौ। काव्या स्तुत्यौ युवं युवां दक्षस्य प्रवृद्धस्य मम पूर्भिः पूरकैः स्तवैर्हे अद्भूता महांतावाश्चर्यभूतौ संतौ केतुना प्रज्ञानेनानुकूलेन मनसा जनानां। यजमानानामित्यर्थः। स्तोत्रं नि चिकेथे। नितरां जानीथः। हे पूतदक्षसा शुद्धबलौ युवां॥

॥ अथ पंचमी ॥

तदृतं पृथिवि बृहच्छ्रवएष ऋषीणां।
ज्रयसानावरं पृथ्वति क्षरंति यामभिः ॥५॥
तत्। ऋतं। पृथिवि। बृहत्। श्रवःऽएषे। ऋषीणां।
ज्रयसानौ। अरं। पृथु। अति। क्षरंति। यामऽभिः ॥५॥

हे पृथिवि देवि त्वयि तत्सर्वैरर्थ्यमानत्वेन प्रसिद्धं बृहत् प्रभूतमृतमुदकमृषीणां स्तोतृणामस्माकं श्रवएषेऽन्नस्येषणे सति जयसानौ गच्छंतौ ॥ छंदस्यसानच् भृजूभ्यां। उ॰ २.८३.। इत्यसानच् जयतेरपि भवति। चित इत्यंतोदात्तः ॥ अरमलमत्यर्थं पृथु यथा भवति तथा यामभिर्गमनैरति क्षरंति। अत्यर्थं वर्षतः ॥ व्यत्ययेन बहुवचनं ॥

॥ अथ षष्ठी ॥

आ यद्वामीयचक्षसा मित्र वयं च सूरयः।
व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये ॥ ६ ॥
आ। यत्। वां। ईयऽचक्षसा। मित्रा। वयं। च। सूरयः।
व्यचिष्ठे। बहुऽपाय्ये। यतेमहि। स्वऽराज्ये ॥ ६ ॥

हे ईयचक्षसा व्याप्तदर्शनौ हे मित्रा मित्रावरुणौ वां युवां यत् ये वयं च सूरयः स्तोतार आ आह्वयामः। व्यचिष्ठेऽत्यंतविस्तृते बहुपाय्ये बहुभिर्गंतव्ये बहुभी रक्षितव्ये वा स्वराज्ये स्वराट्त्वाय एवंविधराज्यार्थं यतेमहि। गच्छेम ॥

॥ इति चतुर्थस्य चतुर्थे चतुर्थो वर्गः ॥

बळित्था देवेति पंचर्चमेकादशं सूक्तं। अत्रेयमनुक्रमणिका। बळित्था पंच यजत इति। यजतो नामात्रेय ऋषिः। मित्रावरुणौ देवता। आनुष्टुभं त्वित्युक्तत्वादिदमप्यानुष्टुभं। विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

बळित्था देवा निष्कृतमादित्या यजतं बृहत्।
वरुण मित्रार्यमन्वर्षिष्ठं क्षत्रमाशाथे ॥ १ ॥
बट्। इत्था। देवा। निःऽकृतं। आदित्या। यजतं। बृहत्।
वरुण। मित्र। अर्यमन्। वर्षिष्ठं। क्षत्रं। आशाथे इति ॥ १ ॥

हे देवा द्योतमानौ हे आदित्यादितेः पुत्रौ हे वरुण हे अर्यमन् अरीणां नियमितर्मित्र देव युवां बट् सत्यमबाध्यमित्थेत्थमिदानीं वर्तमानप्रकारेण यजतं यष्टव्यं बृहदतिप्रवृद्धं वर्षिष्ठं प्रवृद्धतमं क्षत्रं बलमाशाथे। अश्नुवाथे। यद्वार्यमा पृथगेव निर्देष्टव्यः। द्विवचनं बहुवचनीकर्तव्यं ॥

॥ अथ द्वितीया ॥

आ यद्योनिं हिरण्ययं वरुण मित्र सदथः ।
धर्तारा चर्षणीनां यंतं सुम्नं रिशादसा ॥२॥

आ । यत् । योनिं । हिरण्ययं । वरुण । मित्र । सदथः ।
धर्तारा । चर्षणीनां । यंतं । सुम्नं । रिशादसा ॥२॥

यद्यस्माद्धिरण्ययं हितरमणीयं योनिं यज्ञभूमिं हे वरुण हे मित्र आसदथः आगच्छथः तस्माच्चर्षणीनां मनुष्याणां धर्तारा धारकौ च हे रिशादसा हिंसकानां क्षेप्तारौ युवामस्मभ्यं सुम्नं सुखं यंतं । कुरुतमित्यर्थः ॥

॥ अथ तृतीया ॥

विश्वे हि विश्ववेदसो वरुणो मित्रो अर्यमा ।
व्रता पदेव सश्चिरे पांति मर्त्यं रिषः ॥३॥

विश्वे । हि । विश्वऽवेदसः । वरुणः । मित्रः । अर्यमा ।
व्रता । पदाऽइव । सश्चिरे । पांति । मर्त्यं । रिषः ॥३॥

विश्वे हि सर्वेऽपि । हीति चार्थे । विश्ववेदसः सर्वविदः सर्वधना वा वरुणो मित्रोऽर्यमा चैते त्रयः सर्वे व्रतास्मदीयानि कर्माणि पदेव स्थानानीव सश्चिरे । संगता भवंति । आगत्य च मां मर्त्यं रिषो हिंसकात्पांति । रक्षंति ॥

॥ अथ चतुर्थी ॥

ते हि सत्या ऋतस्पृश ऋतावानो जनेजने ।
सुनीथासः सुदानवोऽंहोश्चिदुरुचक्रयः ॥४॥

ते । हि । सत्याः । ऋतऽस्पृशः । ऋतऽवानः । जनेऽजने ।
सुऽनीथासः । सुऽदानवः । अंहोः । चित् । उरुऽचक्रयः ॥४॥

ते हि खलु सत्याः सत्यभूताः सत्यफला वा ऋतस्पृश उदकस्पर्शत्वस्य कर्तार ऋतावानो यज्ञवंतो जने जने सर्वेषु यजमानेषु सुनीथासः सुनयनाः सुदानवः सुदानाः । हीति प्रसिद्धवाची सर्वत्र संबंधनीयः । एवं महानुभावा वरुणादयोऽंहोश्चित् । चिदप्यर्थे । पापिनोऽपि स्वस्तोतुरुरुचक्रयः प्रभूतधनादिकर्तारः ॥

॥ अथ पंचमी ॥

को नु वां मित्रास्तुतो वरुणो वा तनूनां ।

तत्सु वामेषते मतिरत्रिभ्य एषते मतिः ॥५॥

कः । नु । वां । मित्र । अस्तुतः । वरुणः । वा । तनूनां ।

तत् । सु । वां । आ । ईषते । मतिः । अत्रिऽभ्यः । आ । ईषते । मतिः ॥५॥

हे मित्र वां युवयोर्मध्ये त्वं च वरुणो वा को नु अस्तुतः । सर्वैरस्तूयमानः कोऽस्ति । उभावपि स्तुत्यावित्यर्थः । तनूनामिति तृतीयार्थे षष्ठी । तनुभिः स्तुतिभिरस्तुत इति संबंधः ॥ अत्र मित्रशब्देन मित्रस्यैकस्यैव संबोधनं वरुणेऽक्तास्वंतः । ऋग्वे॰ ५. ६२. ६. । इत्यत्रेवात्र द्विवचनसूचकस्याकारस्यानाम्नानात् । लोकेषु बहुषु संनिहितेष्वेकमेव संबोध्य युवयोरिदं युष्माकमिदमिति प्रयुंजते ॥ तत्तस्मात् यस्मात्सर्वे स्तुवंति तस्मात् । तनूनामित्येतद्व्यवहितमप्युत्तरत्र वा योज्यं । तनूनामल्पमतीनामस्माकं मतिः स्तुतिर्वा युवामेषते । अभिगच्छति । अत्रिभ्योऽत्रिगोत्रेभ्योऽस्मभ्यमस्मदीयमतिरेषते । आदरार्थं पुनर्वचनं ॥

॥ इति चतुर्थस्य चतुर्थे पंचमो वर्गः ॥

प्र वो मित्रायेति पंचर्चं द्वादशं सूक्तमात्रेयस्य यजतस्यार्षं गायत्रं मैत्रावरुणं । तथा चानुक्रम्यते । प्र वो गायत्रमिति ॥ अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्र एतत्सूक्तं । सूचितं च । प्र वो मित्राय प्र मित्रयोर्वरुणयोः । आ॰ ५. १०. । इति ॥ अभिप्लवषडहे पृष्ठ्यषडहे च स्तोमनिमित्तावापार्थमिदमादीनि द्वितीयवर्जितानि चत्वारि सूक्तानि । तथैव सूचितं । प्र वो मित्रायेति चतुर्णां द्वितीयमुद्धरेत् । आ॰ ७. ५. । इति ॥

॥ तत्र प्रथमा ॥

प्र वो मित्राय गायत वरुणाय विपा गिरा । महिक्षत्रावृतं बृहत् ॥१॥

प्र । वः । मित्राय । गायत । वरुणाय । विपा । गिरा । महिऽक्षत्रौ । ऋतं । बृहत् ॥१॥

हे मदीया ऋत्विजो वो । यूयमित्यर्थः । मित्राय वरुणाय च विपा व्याप्तया गिरा स्तुत्या प्रगायत । स्तुतिं कुरुत । स्तुत्या स्तुवतेत्येतत्पाकं पचतीतिवत् । हे महिक्षत्रौ प्रभूतबलौ युवामृतं यज्ञं बृहन्महदतिप्रशस्तं । स्तुत्यर्थमागच्छतमिति शेषः । अथवा महत् प्रभूतं स्तोत्रं शृणुतमिति शेषः ॥

॥ अथ द्वितीया ॥

सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च । देवा देवेषु प्रशस्ता ॥२॥

संऽराजा । या । घृतयोनी इति घृतऽयोनी । मित्रः । च । उभा । वरुणः । च । देवा । देवेषु । प्रऽशस्ता ॥२॥

या यौ मित्रश्च वरुणश्च । परस्परापेक्षया चशब्दः । उभोभौ सम्राजा सर्वस्य स्वामिनौ घृतयोनी उदकस्योत्पादकौ देवौ द्योतमानौ देवेषु मध्ये प्रशस्ता प्रकर्षेण स्तुत्यौ । तौ गायतेति पूर्वत्रान्वयः ॥

॥ अथ तृतीया ॥

ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य । महि वां क्षत्रं देवेषु ॥३॥

ता । नः । शक्तं । पार्थिवस्य । महः । रायः । दिव्यस्य । महि । वां । क्षत्रं । देवेषु ॥३॥

ता तौ देवौ नोऽस्मदर्थं पार्थिवस्य पृथिवीसंबद्धस्य दिव्यस्य दिवि भवस्य च महो महतो रायो धनस्य शक्तं । समर्थौ भवतं । दातुमिति शेषः । हे देवौ वां युवयोर्महि महत्पूज्यं क्षत्रं बलं देवेषु प्रसिद्धं स्तुम इति शेषः ॥

॥ अथ चतुर्थी ॥

ऋतमृतेन सपंतेषिरं दक्षमाशाते । अद्रुहा देवौ वर्धते ॥४॥

ऋतं । ऋतेन । सपंता । इषिरं । दक्षं । आशाते इति । अद्रुहा । देवौ । वर्धते इति ॥४॥

ऋतेनोदकेन निमित्तेन ऋतं यज्ञं सपंता स्पृशंताविषिरमेषणवंतं दक्षं प्रवृद्धं यजमानं हविर्वाशाते । व्याप्नुतः । अद्रुहाद्रोग्धारौ देवौ मित्रावरुणौ युवां वर्धते । प्रवृद्धौ भवतः ॥

॥ अथ पंचमी ॥

वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः । बृहंतं गर्तमाशाते ॥५॥

वृष्टिऽद्यावा । रीतिऽआपा । इषः । पती इति । दानुऽमत्याः । बृहंतं । गर्तं । आशाते इति ॥५॥

वृष्टिद्यावा । वृष्ट्यर्था द्यौः स्तुतिर्ययोस्तौ वृष्टिद्यावा । अथवा वृष्टिर्वर्षिका द्यौरंतरिक्षं याभ्यां तौ तादृशौ । रीत्यापा ॥ री गतिरेषणयोः ॥ रीतिः प्राप्तिः ।

सैवापाप्तिरभिमतप्राप्तिर्ययोस्तौ तादृशौ । इषोऽन्नस्य पती स्वामिनौ । वृष्टिप्रदत्वात् स्वामित्वं । दानुमत्या दानवत्याः । दातृसूचिताया इत्यर्थः । एतद्विशेषणं । एवं महानुभावौ बृहंतं महांतं गर्तं रथमाशाते । व्याप्नुतः । अधितिष्ठतो यागार्थं ॥

॥ इति चतुर्थस्य चतुर्थे षष्ठो वर्गः ॥

त्री रोचनेति चतुर्ऋचं त्रयोदशं सूक्तं । उरुचक्रिर्नामात्रेय ऋषिः । त्रिष्टुप् छंदः । मित्रावरुणौ देवता । अनुक्रम्यते च । त्री रोचना चतुष्कमुरुचक्रिरिति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

त्री रोचना वरुण त्रीँरुत द्यून्त्रीणि मित्र धारयथो रजांसि ।
वावृधानावमतिं क्षत्रियस्यानु व्रतं रक्षमाणावजुर्यं ॥१॥

त्री । रोचना । वरुण । त्रीन् । उत । द्यून् । त्रीणि । मित्र । धारयथः । रजांसि ।
ववृधानौ । अमतिं । क्षत्रियस्य । अनु । व्रतं । रक्षमाणौ । अजुर्यं ॥१॥

हे वरुण हे मित्र युवां त्री त्रीणि रोचना रोचनानि द्युलोकान् धारयथ इति संबंधः । उतापि च त्रीन्द्यून् द्योतमानानंतरिक्षलोकान्धारयथः । तथा त्रीणि रजांसि भूलोकान् । कीदृशौ युवां । वावृधाना वर्धमानौ क्षत्रियस्य । क्षत्रं बलं । तद्वत इंद्रस्य । यद्वा क्षत्रियजातीयस्य यजमानस्यामतिं । रूपनामैतत् । रूपं व्रतं कर्म चाजुर्यमजीर्णमविरतं वा रक्षमाणौ ॥

॥ अथ द्वितीया ॥

इरावतीर्वरुण धेनवो वां मधुमद्वां सिंधवो मित्र दुह्रे ।
त्रयस्तस्थुर्वृषभासस्तिसृणां धिषणानां रेतोधा वि द्युमंतः ॥२॥

इरावतीः । वरुण । धेनवः । वां । मधुऽमत् । वां । सिंधवः । मित्र । दुह्रे ।
त्रयः । तस्थुः । वृषभासः । तिसृणां । धिषणानां । रेतःऽधाः । वि । द्युऽमंतः ॥२॥

हे वरुण हे मित्र वां युवयोराज्ञया धेनवो गाव इरावतीः । इरा क्षीरलक्षणा । तद्वत्यो भवंति । तथा सिंधवः स्यंदनशीला मेघा नद्यो वा मधुमन्मधुररसमुदकं दुह्रे । दुहंति । तथा त्रयस्त्रिसंख्याका वृषभासो वर्षितारो रेतोधा उदकस्य धारका

द्युमंतो दीप्तिमंतोऽग्निवाय्वादित्यास्तिसृणां त्रिसंख्याकानां धिषणानां स्थानानां पृथिव्यंतरिक्षद्युलोकानां स्वामिनः संतो वि विविधं प्रत्येकं तस्थुः । तिष्ठंति । युवयोरनुग्रहात् त्रयोऽपि देवास्त्रिषु स्थानेषु वर्तंत इत्यर्थः ॥

॥ अथ तृतीया ॥

प्रातर्देवीमदितिं जोहवीमि मध्यंदिन उदिता सूर्यस्य ।
राये मित्रावरुणा सर्वतातेळे तोकाय तनयाय शं योः ॥३॥

प्रातः । देवीं । अदितिं । जोहवीमि । मध्यंदिने । उत्ऽइता । सूर्यस्य ।
राये । मित्रावरुणा । सर्वऽताता । ईळे । तोकाय । तनयाय । शं । योः ॥३॥

अहमृषिः प्रातः प्रातःकालेऽदितिमखंडनीयां देवानां जननीं देवीं द्योतमानां जोहवीमि । आह्वयामि । तथा मध्यंदिने सूर्यस्योदितोदितौ तत्समृद्धिकाले माध्यंदिने सवने जोहवीमि । हे मित्रावरुणा युवां राये धनप्राप्तये सर्वतातौ यज्ञ इळे । स्तौमि । पुनः किमर्थं । तोकाय पुत्राय तनयाय तत्पुत्राय च शमरिष्टशमनाय योः सुखस्य मिश्रणाय चेळ इति ॥

॥ अथ चतुर्थी ॥

या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य ।
न वां देवा अमृता आ मिनंति व्रतानि मित्रावरुणा ध्रुवाणि ॥४॥

या । धर्तारा । रजसः । रोचनस्य । उत । आदित्या । दिव्या । पार्थिवस्य ।
न । वां । देवाः । अमृताः । आ । मिनंति । व्रतानि । मित्रावरुणा । ध्रुवाणि ॥४॥

या यौ रोचनस्य रोचमानस्य रजसो लोकस्य । स्वर्गाख्यस्येत्यर्थः । उतापि च पार्थिवस्य रजसो या यौ धर्तारावादित्यादितेः पुत्रौ दिव्या दिवि भवौ तौ युवामीळ इति पूर्वत्र संबंधः । हे मित्रावरुणा वां युवयोर्ध्रुवाणि व्रतानि कर्माणि देवा अन्य इंद्रादयोऽमृता अमरणधर्माणोऽपि नामिनंति । न हिंसंति । यतो ध्रुवाण्यत इत्यभिप्रायः ॥

॥ इति चतुर्थस्य चतुर्थे सप्तमो वर्गः ॥

पुरूरुणेति चतुर्ऋचं चतुर्दशं सूक्तमुरुचक्रेरार्षं गायत्रं मैत्रावरुणं । पुरूरुणा गायत्रं त्वित्यनुक्रमणिका ॥ पृष्ठ्याभिप्लवषडहयोः प्रातःसवन आवापार्थत्वेनेदमपि

सूक्तं पूर्वसूक्तेन सह प्र वो मित्रायेति चतुर्णां द्वितीयमुद्धरेदिति ह्युक्तं ॥ चातुर्विंशिकेऽहनि प्रातःसवने मैत्रावरुणशस्त्र आद्यस्तृचः षडहस्तोत्रियसंज्ञकः। सूचितं च। पुरूरुणा चिद्ध्यस्ति प्रति वां सूर उदिते। आ० ७.२.। इति ॥

॥ तत्र प्रथमा ॥

पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण। मित्र वंसि वां सुमतिं ॥१॥

पुरुऽउरुणा। चित्। हि। अस्ति। अवः। नूनं। वां। वरुण। मित्र। वंसि। वां। सुऽमतिं ॥१॥

हे मित्रावरुणौ वां युवयोः पुरूरुणा चित् ॥ अत्र सोः सुपां सुलुगित्याकारः ॥ पुरोरपि बहु उरु बहुतरं। अथवा पुरु च तदुरु च पुरूरु। अत्यंतमुरुतरमित्यर्थः। तादृगवो रक्षणं नूनं निश्चयेनास्ति। हि प्रसिद्धौ। चिदिति पूरणः। हे वरुण हे मित्र वां युवयोः सुमतिमनुग्रहबुद्धिं वंसि। संभजेय। यस्माद्वोऽस्ति तस्माद्वंसीति भावः ॥

॥ अथ द्वितीया ॥

ता वां सम्यगद्रुह्वाणेषमश्याम धायसे। वयं ते रुद्रा स्याम ॥२॥

ता। वां। सम्यक्। अद्रुह्वाणा। इषं। अश्याम। धायसे। वयं। ते। रुद्रा। स्याम ॥२॥

हे अद्रुह्वाणा हे अद्रोग्धारौ ता तौ प्रसिद्धौ वां युवां सम्यक् स्तुम इति शेषः। स्तोतारो वयमिषमन्नं धायसे पानाय भोजनायाश्याम। प्राप्नुयाम। हे रुद्रा दुःखात् द्रावयितारौ रुद्भिर्द्रवणीयौ वा ते स्तोतारो वयं स्याम। भवेम। समृद्धा इति शेषः। युवाभ्यां स्वभूता वा स्याम ॥

॥ अथ तृतीया ॥

पातं नो रुद्रा पायुभिरुत त्रायेथां सुत्रात्रा। तुर्याम दस्यून्तनूभिः ॥३॥

पातं। नः। रुद्रा। पायुऽभिः। उत। त्रायेथां। सुऽत्रात्रा। तुर्याम। दस्यून्। तनूभिः ॥३॥

हे रुद्रोक्तरूपौ देवौ युवां नोऽस्मान् पायुभी रक्षणैः पातं। रक्षतं। उतापि च सुत्रात्रा शोभनेन त्राणेन त्रायेथां। पालयेथां। इष्टप्राप्त्यनिष्टपरिहारभेदेन भेदः। स्तोत्रादिवैकल्याच्छत्रोर्वा त्रायेथां अभिमतप्रापणेन रक्षतमित्यर्थः। वयं च तनूभिः पुत्रादिभिः सहिताः स्वीयैरंगैर्वा दस्यून् शत्रून् तुर्याम। हिंस्याम तरेम वा ॥

॥ अथ चतुर्थी ॥

मा कस्याद्भुतक्रतू यक्षं भुजेमा तनूभिः । मा शेषसा मा तनसा ॥४॥

मा । कस्य । अद्भुतक्रतू इत्यद्भुतऽक्रतू । यक्षं । भुजेम । तनूभिः । मा । शेषसा । मा । तनसा ॥४॥

हे अद्भुतक्रतू आश्चर्यकर्माणौ वयं कस्यान्यस्य कस्यचन यक्षं पूजितं धनं मा भुजेम । मा भुंजीमहि तनूभिरस्मदीयैरवयवैः । युवयोरनुग्रहात्समृद्धा वयं । अन्यथा वयं कस्यचिद्धनेन शरीरपोषं न कुर्म इत्यर्थः । तथा शेषसापत्येन सहिता मा भुजेम । तनसा पौत्रादिना सहिता मा भुजेम । अस्मत्कुले न कोऽपि भुंजीमहीत्यर्थः ॥

॥ इति चतुर्थस्य चतुर्थेऽष्टमो वर्गः ॥

आ नो गंतमिति तृचात्मकं पंचदशं सूक्तं बाहुवृक्तस्यात्रेयस्यार्षं गायत्रं मैत्रावरुणं । आ नस्तृचं बाहुवृक्त इत्यनुक्रमणिका ॥ उक्तः सूक्तविनियोगः ॥ अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्रेऽयमनुरूपस्तृचः । सूचितं च । आ नो मित्रावरुणा नो गंतं रिशादसा । आ॰ ५. १०. । इति ॥

॥ तत्र प्रथमा ॥

आ नो गंतं रिशादसा वरुण मित्र बर्हणा । उपेमं चारुमध्वरं ॥१॥

आ । नः । गंतं । रिशादसा । वरुण । मित्र । बर्हणा । उप । इमं । चारुं । अध्वरं ॥१॥

हे वरुण हे मित्र हे रिशादसा शत्रूणां प्रेरकौ युवां नोऽस्माकमिमं चारुं चरणीयमध्वरमहिंसकं यज्ञमुपागंतं । उपागच्छतं । कीदृशौ । बर्हणा परिबर्हणौ निबर्हणौ हंतारौ शत्रूणां ॥

॥ अथ द्वितीया ॥

विश्वस्य हि प्रचेतसा वरुण मित्र राजथः । ईशाना पिप्यतं धियः ॥२॥

विश्वस्य । हि । प्रऽचेतसा । वरुण । मित्र । राजथः । ईशाना । पिप्यतं । धियः ॥२॥

हे मित्र हे वरुण प्रचेतसा प्रकृष्टज्ञानौ युवां विश्वस्य राजथः । सर्वस्य स्वामिनौ भवथः । हीति प्रसिद्धौ । हे ईशाना अस्माकमीश्वरौ युवां धियोऽस्मदीयानि कर्माणि पिप्यतं । प्याययतं फलैः ॥

॥ अथ तृतीया ॥

उप नः सुतमा गतं वरुण मित्र दाशुषः । अस्य सोमस्य पीतये ॥३॥

उप । नः । सुतं । आ । गतं । वरुण । मित्र । दाशुषः । अस्य । सोमस्य । पीतये ॥३॥

नोऽस्माकं सुतमभिषुतं सोमं प्रति हे वरुण हे मित्र युवामुपागतं । उपागच्छतं दाशुषो हविर्दातुर्ममास्य सोमस्य पीतये पानाय ॥

॥ इति चतुर्थस्य चतुर्थे नवमो वर्गः ॥

आ मित्रे वरुण इति तृचात्मकं षोडशं सूक्तं बाहुवृक्तस्यार्षमौष्णिहं मैत्रावरुणं । आ मित्र औष्णिहमित्यनुक्रमणिका ॥ दशरात्रे तृतीयेऽहनि प्रउगशस्त्रेऽयं मैत्रावरुणस्य तृचः । सूचितं च । आ मित्रे वरुणे वयमश्विनावेह गच्छतं । आ० ७. १०. । इति ॥

॥ तत्र प्रथमा ॥

आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत् ।
नि बर्हिषि सदतं सोमपीतये ॥१॥

आ । मित्रे । वरुणे । वयं । गीःऽभिः । जुहुमः । अत्रिऽवत् ।
नि । बर्हिषि । सदतं । सोमऽपीतये ॥१॥

वयमात्रेया मित्रे वरुणे मित्रावरुणयोरर्थाय गीर्भिर्मंत्रैराजुहुमः अत्रिवत् अस्मद्गोत्रप्रवर्तकोऽत्रिरिव । तस्मात् मित्रावरुणौ सोमपीतये बर्हिषि निषदतं । निषीदतं ॥

॥ अथ द्वितीया ॥

व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना ।
नि बर्हिषि सदतं सोमपीतये ॥२॥

व्रतेन । स्थः । ध्रुवऽक्षेमा । धर्मणा । यातयत्ऽजना ।
नि । बर्हिषि । सदतं । सोमऽपीतये ॥२॥

हे मित्रावरुणौ युवां धर्मणा जगद्धारकेण व्रतेन कर्मणा योगेन ध्रुवक्षेमा स्थः । अविचलितस्थानौ भवथः । यातयज्जना । यातयंतः कर्मसु प्रवर्तयंतो

जना ऋत्विजो ययोस्तौ यातयज्जनौ। अथवा यातयंतौ शत्रून् हिंसंतो जना भृत्या ययोस्तौ। शिष्टं गतं ॥

॥ अथ तृतीया ॥

मित्रश्च नो वरुणश्च जुषेतां यज्ञमिष्टये।
नि बर्हिषि सदतं सोमपीतये ॥३॥

मित्रः। च। नः। वरुणः। च। जुषेतां। यज्ञं। इष्टये।
नि। बर्हिषि। सदतं। सोमऽपीतये ॥३॥

मित्रश्च वरुणश्चोभौ नोऽस्माकं यज्ञमिष्टयेऽभीष्टाय जुषेतां। आगत्य च बर्हिषि निषदतं निषीदतं सोमपानाय ॥

॥ इति चतुर्थस्य चतुर्थे दशमो वर्गः ॥

॥ इति पंचमे मंडले पंचमोऽनुवाकः ॥

षष्ठेऽनुवाके पंचदश सूक्तानि। तत्र यदद्य स्थ इति दशर्चं प्रथमं सूक्तमात्रेयस्य पौरनाम्न आर्षमानुष्टुभमाश्विनं। अनुक्रांतं च। यदद्य दश पौर आश्विनं तदानुष्टुभं त्विति। तदित्युक्तत्वादिदमादीनि षट् सूक्तान्याश्विनानि। आनुष्टुभं त्विति तुशब्दादिदमुत्तरं च द्वे आनुष्टुभे ॥ प्रातरनुवाक आश्विने क्रतावानुष्टुभे छंदस्याश्विनशस्त्रे चेदमादिके द्वे सूक्ते। यदद्य स्थ इति सूक्ते। आ॰ ४.१५.। इति सूत्रितं ॥

॥ तत्र प्रथमा ॥

यदद्य स्थः परावति यदर्वावत्यश्विना।
यद्वा पुरू पुरुभुजा यदंतरिक्ष आ गतं ॥१॥

यत्। अद्य। स्थः। पराऽवति। यत्। अर्वाऽवति। अश्विना।
यत्। वा। पुरु। पुरुऽभुजा। यत्। अंतरिक्षे। आ। गतं ॥१॥

हे पुरुभुजा बहुषु यज्ञेषु भोक्तारावधिकं रक्षितारौ वा हे अश्विना यद्यद्यास्मिन् काले परावत्यत्यंतं दूरदेशे द्युलोके स्थो भवथः। यद्वा अर्वावत्यरणवति गंतुं शक्ये प्रदेशेऽतिके स्थः। यद्यदि वा अथवा पुरु बहुप्रदेशेषु स्थः। यद्यंतरिक्षे स्थः तस्मात्सर्वस्मादद्यागतं। आगच्छतं ॥

॥ अथ द्वितीया ॥

इह त्या पुरुभूतमा पुरू दंसांसि बिभ्रता ।

वरस्या याम्यध्रिगू हुवे तुविष्टमा भुजे ॥२॥

इह । त्या । पुरुऽभूतमा । पुरु । दंसांसि । बिभ्रता ।

वरस्या । यामि । अध्रिगू इत्यध्रिऽगू । हुवे । तुविःऽतमा । भुजे ॥२॥

इहास्मिन्यज्ञे त्या तौ पुरुभूतमा पुरूणां बहूनां यजमानानां भावयितृतमौ पुरु पुरूणि दंसांसि कर्माणि बिभ्रता धारयंतौ वरस्या वरणीयावध्रिगू अन्यैरधृतगमनकर्माणौ यामि । उपागच्छामि । तुविष्टमा प्रभूततमौ भुजे भोगाय पालनाय वा हुवे । आह्वयामि ॥

॥ अथ तृतीया ॥

ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः ।

पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः ॥३॥

ईर्मा । अन्यत् । वपुषे । वपुः । चक्रं । रथस्य । येमथुः ।

परि । अन्या । नाहुषा । युगा । मह्ना । रजांसि । दीयथः ॥३॥

हे अश्विनौ युवां रथस्य युष्मदीयस्यान्यच्चक्रमीर्मा ॥ अर्तेरीर्मेति रूपं ॥ गंतर्यादित्ये वपुषे तस्य शोभायै वपुर्वपुष्मत् तेजोवत् चक्रं येमथुः । नियमितवंतौ स्थः । अन्यान्येन चक्रेण मह्ना महत्त्वेन स्वसामर्थ्येन नाहुषा युगा । नहुषा मनुष्याः । तेषां युगा युगोपलक्षितान् कालान् प्रातरादिसवनान् अहोराचादिकालान्वा रजांसि लोकांश्च परिदीयथः । परिगच्छथः । न्य१घ्न्यस्य मूर्द्धनि चक्रं रथस्य येमथुः । ऋग्वे० १. ३०. १९. । इत्युक्तं ॥

॥ अथ चतुर्थी ॥

तदू षु वामेना कृतं विश्वा यद्वामनु ष्टवे ।

नाना जातावरेपसा समस्मे बंधुमेयथुः ॥४॥

तत् । ऊं इति । सु । वां । एना । कृतं । विश्वा । यत् । वां । अनु । स्तवे ।

नाना । जातौ । अरेपसा । सं । अस्मे इति । बंधुं । आ । ईयथुः ॥४॥

हे विश्वा व्याप्तौ यत् येन स्तोत्रेण वां युवामनुष्टवे अनुस्तुवे तदु। उ इति पूरणः। एनानेन पौरेण सु सुष्ठु वां युवाभ्यां कृतं संपादितं भवतु। नाना पृथगेव जातौ समृद्धावरेपसापापावस्मे अस्मभ्यं बंधुमन्नं धनं वा समेयथुः। सम्यक् गमयथः। सम्यक् प्रयच्छतमित्यर्थः॥

॥ अथ पंचमी ॥

आ यद्वां सूर्या रथं तिष्ठद्रघुष्यदं सदा।
परि वामरुषा वयो घृणा वरंत आतपः॥५॥
आ। यत्। वां। सूर्या। रथं। तिष्ठत्। रघुऽस्यदं। सदा।
परि। वां। अरुषाः। वयः। घृणा। वरंते। आऽतपः॥५॥

हे अश्विनौ वां युवयोः सदा सर्वदा रघुष्यदं शीघ्रगं रथं सूर्या युवयोः पत्नी यत् यदातिष्ठत् आस्थितवती तदा वां परि वरंते। परितो वृण्वंति। के। अरुषा आरोचमाना घृणा दीप्ता आतप आतापनाः शत्रूणां वयोऽश्वाः। अथवातप इति विशेष्यं। वयो गंतार उक्तलक्षणा आतपः सर्वतस्तापयित्र्यो दीप्तयः परिवरंते॥

॥ इति चतुर्थस्य चतुर्थ एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा।
घर्मं यद्वामरेपसं नासत्यास्ना भुरण्यति॥६॥
युवोः। अत्रिः। चिकेतति। नरा। सुम्नेन। चेतसा।
घर्मं। यत्। वां। अरेपसं। नासत्या। आस्ना। भुरण्यति॥६॥

हे नरा नेतारावश्विनौ युवोर्युवयोः। युवामित्यर्थः। अत्रिरस्मत्पिता ऋषिः सुम्नेन सुखेनाग्निदाहोपशमरूपेण हेतुना चेतसादरयुक्तेन मनसा चिकेतति। जानाति। स्तुतवानित्यर्थः। सति दुःखे सुखमुख्यते। दुःखस्य कः प्रसंग इत्यत आह। यद्यस्मात् हे नासत्यौ वां युवयोरास्नास्येन तन्निष्पन्नेन स्तोत्रेण घर्मं दीप्तं दहंतमग्निमसुरैः स्वदाहाय प्रक्षिप्तमरेपसमपापं सुखकरं भुरण्यति प्राप्तवान्॥ भुरण्यतिर्गतिकर्मा॥ अत्रेरग्नेः सकाशाद्रक्षणं हिमेनाग्निं घ्रंसं। ऋग्वे॰ १.११६.८.। युवमृबीसमुत तप्तमत्रये। ऋग्वे॰ १०.३९.९.। इत्यादिभिः स्पष्टं प्रदर्शितं॥

॥ अथ सप्तमी ॥

उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः ।
यद्वां दंसोभिरश्विनात्रिर्नरावववर्तति ॥७॥

उग्रः । वां । ककुहः । ययिः । शृण्वे । यामेषु । संऽतनिः ।
यत् । वां । दंसःऽभिः । अश्विना । अत्रिः । नरा । आऽववर्तति ॥७॥

उग्र उद्गूर्णबलो वां युवयोः ककुह उच्छ्रितो महान् ययिर्गंता संतनिः सततं गच्छन् रथो यामेषु गमनेषु यज्ञेषु वा शृण्वे। श्रूयते। हे अश्विना हे नरा यद्य-स्माद्वां युवां दंसोभिः कर्मभिरत्रिरस्मत्पितावववर्तति आवर्तयति ॥

॥ अथाष्टमी ॥

मध्व ऊ षु मधूयुवा रुद्रा सिषक्ति पिप्युषी ।
यत्समुद्राति पर्षथः पक्वाः पृक्षो भरंत वां ॥८॥

मध्वः । ऊं इति । सु । मधुऽयुवा । रुद्रा । सिसक्ति । पिप्युषी ।
यत् । समुद्रा । अति । पर्षथः । पक्वाः । पृक्षः । भरंत । वां ॥८॥

हे मधूयुवा मधुरस्य सोमादेर्मिश्रयितारौ हे रुद्रा । रुत् स्तुतिः । तया द्रव-णीयौ रुद्रपुत्रौ वा वां मध्वो मधुररसेन सु पिप्युषी सुष्ठु प्याययंती स्तुतिरस्मत्कृता सिषक्ति । सेवते । यद्यदा समुद्रा समुद्रवणसाधनान्यंतरिक्षाण्यतिपर्षथः अति-पारयथः । यज्ञं प्राप्नुथ इत्यर्थः । पक्वाः पृक्षोऽन्नादीनि हविर्लक्षणानि वां भरंत । भ्रियंते यजमानैः ॥

॥ अथ नवमी ॥

सत्यमिद्वा उ अश्विना युवामाहुर्मयोभुवा ।
ता यामन्यामहूतमा यामन्ना मृळयत्तमा ॥९॥

सत्यं । इत् । वै । ऊं इति । अश्विना । युवां । आहुः । मयःऽभुवा ।
ता । यामन् । यामऽहूतमा । यामन् । आ । मृळयत्ऽतमा ॥९॥

हे अश्विना युवां सत्यमित् सत्यमेव। वा इति पादपूरणः। मयोभुवा सुखस्य भावयितारावाहुः पुराविदः। ता तौ सुखकरत्वेन प्रसिद्धौ युवां यामन्यज्ञे याम-

हूतमा गमनार्थं भृशमाह्वातव्यौ भवतमिति शेषः । यामन्नस्मद्यज्ञेऽस्मदर्थागमने वा मृळयत्तमा चातिशयेन सुखयितारौ भवतं ॥

॥ अथ दशमी ॥

इमा ब्रह्माणि वर्धनाश्विभ्यां संतु शंतमा ।

या तक्षाम रथाँ इवावोचाम बृहन्नमः ॥१०॥

इमा । ब्रह्माणि । वर्धना । अश्विऽभ्यां । संतु । शंऽतमा ।

या । तक्षाम । रथान्ऽइव । अवोचाम । बृहत् । नमः ॥१०॥

अथ स्तुतिं निगमयति । इमेमानीदानीं कृतानि ब्रह्माणि परिवृढाणि स्तोत्राण्यश्विभ्यां वर्धना वर्धनानि समर्धकानि शंतमा सुखतमानि संतु । या यानि तक्षाम संपादयाम रथानिव शिल्पी तद्वत्तक्षाम तानि संतु । वयं बृहत् प्रभूतं प्रभूतफलप्रदं नमो नमस्कारोक्तिमवोचाम ॥

॥ इति चतुर्थस्य चतुर्थे द्वादशो वर्गः ॥

कूष्ठ इति दशर्चं द्वितीयं सूक्तं पौरस्यार्षं । कूष्ठ इत्यनुक्रमणिका । पूर्वेच तुशब्दादिदमप्यानुष्टुभं । आश्विनं तदिति पूर्वोक्तत्वात् ॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

कूष्ठो देवावश्विनाद्या दिवो मनावसू ।

तच्छ्रवथो वृषण्वसू अत्रिर्वामा विवासति ॥१॥

कूऽस्थः । देवौ । अश्विना । अद्य । दिवः । मनावसू इति ।

तत् । श्रवथः । वृषण्वसू इति वृषण्ऽवसू । अत्रिः । वां । आ । विवासति ॥१॥

हे देवौ हे मनावसू स्तुतिधनावश्विनाद्यास्मिन्यागदिने दिवो द्युलोकादागत्य कूष्ठः ॥ व्यत्ययेनैकवचनं ॥ कौ भूमौ तिष्ठंतौ संतौ तत्स्तोत्रं श्रवथः । शृणुथः । हे वृषण्वसू वर्षकधनौ वामत्रिरत्रेः पुत्र आ विवासति । सर्वतः परिचरति ॥ अथवा कू इत्यस्य निपातस्य स्थ इत्याख्यातेन सहेति योगविभागात्समासः । ऐकस्वर्यं चाध्येतृसमयप्राप्तं । अरा इव । ऋग्वे० ५. ५८. ५. । इत्यत्र यथेवशब्दः कूचिज्जायते । ऋग्वे० १०. ४. ५. । कूचित्संतं । ऋग्वे० १०. ९३. ११. । इत्यादिवद्वापि द्रष्टव्यं ॥ क्व स्थितौ भवथः । अत्रिर्युवां स्तौति तं शृणुथ इत्यर्थः ॥

॥ अथ द्वितीया ॥

कुह त्या कुह नु श्रुता दिवि देवा नासत्या ।
कस्मिन्ना यतथो जने को वां नदीनां सचा ॥२॥
कुह । त्या । कुह । नु । श्रुता । दिवि । देवा । नासत्या ।
कस्मिन् । आ । यतथः । जने । कः । वां । नदीनां । सचा ॥२॥

त्या तौ देवा देवौ नासत्याश्विनौ कुह कुत्र तिष्ठतः । नु अद्य कुह श्रुता कुत्र श्रुतौ दिवि द्युलोके निवसत इति शेषः । अथ प्रत्यक्षकृतः । हे देवौ युवां कस्मिन् जने यजमान आयतथः । आगच्छथः । कः स्तोता वां युवयोर्नदीनां स्तुतीनां सचा सहायः स्यात् ॥

॥ अथ तृतीया ॥

कं याथः कं ह गच्छथः कमच्छा युंजाथे रथं ।
कस्य ब्रह्माणि रण्यथो वयं वामुश्मसीष्टये ॥३॥
कं । याथः । कं । ह । गच्छथः । कं । अच्छ । युंजाथे इति । रथं ।
कस्य । ब्रह्माणि । रण्यथः । वयं । वां । उश्मसि । इष्टये ॥३॥

हे अश्विनौ युवां कं यजमानं यज्ञं वा प्रति याथः । अध्वानमुल्लंघ्य याथः । कं ह कं च प्रति गच्छथः । गत्वा च केन सह संगतौ भवथः । कं चाच्छाभिप्राप्तुं युंजाथे योजयथो रथमश्वैः । कस्य ब्रह्माणि परिवृढाणि स्तोत्राणि रण्यथः । रमेथे । वयं च वां युवामिष्टये गमनायैषणाय वोश्मसि । कामयामहे । तस्मात् कस्य च यागं प्रति न गंतव्यमित्यर्थः ॥

॥ अथ चतुर्थी ॥

पौरं चिद्ध्युदप्रुतं पौर पौराय जिन्वथः ।
यदीं गृभीततातये सिंहमिव द्रुहस्पदे ॥४॥
पौरं । चित् । हि । उदऽप्रुतं । पौर । पौराय । जिन्वथः ।
यत् । ईं । गृभीतऽतातये । सिंहंऽइव । द्रुहः । पदे ॥४॥

हे पौर । इदमश्विनोः संबोधनं । पौरेण स्तुत्यत्वेन संबंधादश्विनावपि पौरौ ।

उभयोश्छांदसमेकवचनं। हे पौरसंबंधिनावश्विनौ युवां पौरं। चिदिति पूरणः। पौरेण वृष्ट्यर्थं प्रार्थ्यमानत्वेन संबंधान्मेघोऽपि पौरः। तमुदप्रुतमुदकप्रावकं मेघं पौराय ऋषये मह्यं जिन्वथः। प्रेरयथः। यद्वौ युवां। ईमिति पूरणः। गृभीततातये गृहीतयज्ञसंतानाय पौरायेमेनं मेघं प्रतिगच्छथो द्रुहो द्रोहस्य पदे स्थानेऽरण्यदेशे सिंहमिव। गर्जंतं प्रबलं सिंहं यथा बलाद्भ्यावयंति शूराः तद्वज्जिन्वथ इति ॥

॥ अथ पंचमी ॥

प्र च्यवा॑नाज्जुजु॒रुषो॑ व॒व्रिमत्कं॒ न मुं॑चथः।

युवा॒ यदी॑ कृ॒थः पुन॒रा काम॑मृण्वे व॒ध्वः॑ ॥५॥

प्र। च्यवा॑नात्। जु॒जु॒रुषः॑। व॒व्रिं। अत्कं॑। न। मुं॒च॒थः॒।

युवा॑। यदि॑। कृ॒थः। पुन॑ः। आ। काम॑म्। ऋ॒ण्वे॒। व॒ध्वः॑ ॥५॥

च्यवानादृषेर्जुजुरुषो जरसा जीर्णात्सकाशाद्वव्रिं हेयं पुराणं रूपमत्कं न कवचमिव प्रमुंचथः। प्रमुंचतं। प्रामुंचतं द्रापिमिव च्यवानादित्यादि मंत्रांतरं। ऋग्वे° १. ११६. १०.। यदि यदा पुनर्युवा कृथः युवानं कुरुथ इत्यर्थः तदा वध्वः सुरूपायाः स्त्रियः कामं कमनीयं रूपमा ऋण्वे। प्राप्नवान् ॥

॥ इति चतुर्थस्य चतुर्थे त्रयोदशो वर्गः ॥

॥ अथ षष्ठी ॥

अस्ति॒ हि वा॑मि॒ह स्तो॒ता स्मसि॒ वां सं॒दृशि॑ श्रि॒ये।

नू श्रु॒तं म॒ आ ग॑तमवो॑भिर्वाजिनीवसू ॥६॥

अस्ति॑। हि। वा॒म्। इ॒ह। स्तो॒ता। स्मसि॑। वा॒म्। सं॒ऽदृशि॑। श्रि॒ये।

नु। श्रु॒तं। मे॒। आ। ग॒त॒म्। अवः॑ऽभिः। वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू ॥६॥

हे अश्विनौ वां स्तोता पौरोऽस्ति हि। वर्तते खलु। हे देवौ वां संदृशि संदर्शने संनिधाने स्मसि। स्मः। भवेम। किमर्थं। श्रिये। नु अद्य मे मदीयमाह्वानं श्रुतं। शृणुतं। श्रुत्वागतं। आगच्छतं। किं तूष्णीं नेत्याह। अवोभी रक्षणैः सह वाजिनीवसू अन्नवसू ॥

॥ अथ सप्तमी ॥

को वा॑म॒द्य पु॑रू॒णामा व॑व्ने॒ मर्त्या॑नां ।
को विप्रो॑ विप्रवाहसा॒ को य॒ज्ञैर्वा॑जिनीवसू ॥७॥
कः । वा॒म् । अ॒द्य । पु॒रू॒णाम् । आ । व॒व्ने॒ । मर्त्या॑नां ।
कः । विप्रः॑ । वि॒प्र॒ऽवा॒ह॒सा॒ । कः । य॒ज्ञैः । वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू ॥७॥

हे वाजिनीवसू अन्नवसू वां युवामद्यास्मिन्दिने पुरूणां मर्त्यानां मध्ये क आ वव्ने । सर्वतो भजति । हे विप्रवाहसा विप्रैर्मेधाविभिर्वहनीयौ को विप्रो मेधावी वव्ने । को यजमानो यज्ञैर्वव्ने । अत्यंतविलंबमसहमानः पुनः पुनर्ब्रूते ॥

॥ अथाष्टमी ॥

आ वां॒ रथो॒ रथा॑नां॒ येष्ठो॑ यात्वश्विना ।
पु॒रू चि॑दस्म॒युस्ति॒र आ॑ङ्गू॒षो मर्त्ये॒ष्वा ॥८॥
आ । वा॒म् । रथः॑ । रथा॑नाम् । येष्ठः॑ । या॒तु॒ । अ॒श्वि॒ना॒ ।
पु॒रु । चि॒त् । अ॒स्म॒ऽयुः । ति॒रः । आ॒ङ्गू॒षः । मर्त्ये॑षु । आ ॥८॥

हे अश्विनाश्विनौ वां युवयो रथ एको रथो रथानां येष्ठ इतरदेवरथानां मध्येऽतिशयेन गंता सन् आयातु । कीदृशः सन् । पुरू चिद्बहून्यप्यस्मद्विरोधिनस्तिरो हिंसकस्तिरस्कर्ता वास्मयुरस्मान् कामयमानो मर्त्येषु सर्वेषु यजमानेषु मध्य आंगूषः स्तुत्यः । आकारः पूरणः । अथवा आंगूषः स्तोमः । स्तवोऽस्मयुरस्मान् बलैर्योक्तुं कामयमानो मर्त्येषु मर्त्यैरस्मदीयैर्ऋत्विग्भिः प्रेरितः सन् । उक्तलक्षणाश्विनो रथस्य वा स्तुतिरा सर्वतः पुरू चित् पुरूण्यपि शत्रुबलानि तिरः । तिरस्करोति ॥

॥ अथ नवमी ॥

शमू॒ षु वां॑ मधूयुवा॒स्माक॑मस्तु च॒र्कृतिः॑ ।
अ॒र्वा॒ची॒ना वि॑चेतसा॒ विभिः॑ श्ये॒नेव॑ दीयतं ॥९॥
शम् । ऊं॒ इति॑ । सु । वा॒म् । म॒धु॒ऽयु॒वा॒ । अ॒स्माक॑म् । अ॒स्तु॒ । च॒र्कृतिः॑ ।
अ॒र्वा॒ची॒ना । वि॒ऽचे॒त॒सा॒ । विऽभिः॑ । श्ये॒नाऽइ॑व । दी॒य॒त॒म् ॥९॥

हे मधूयुवा मधुमंतौ वां युवाभ्यां चर्कृतिः पुनःपुनः करणं युवाभ्यामर्थाय पुनःपुनः क्रियमाणं स्तोत्रं युवयोरागमनस्याभ्यासो वास्माकं सु सुष्ठु शमु सुखकरमेव भवतु । हे अर्वाचीनावर्वागस्मदभिमुखांचनौ हे विचेतसा विशिष्टप्रज्ञौ श्येनेव श्येनाविव विभिर्गंतृभिरभीशुभिर्दीयतं । गच्छतं ॥

॥ अथ दशमी ॥

अश्विना यद्ध कर्हि चिच्छुश्रूयातमिमं हवं ।

वस्वीरू षु वां भुजः पृंचंति सु वां पृचः ॥१०॥

अश्विना । यत् । ह । कर्हि । चित् । शुश्रुयातं । इमं । हवं ।

वस्वीः । ऊं इति । सु । वां । भुजः । पृंचंति । सु । वां । पृचः ॥१०॥

हे अश्विना युवां यद्ध यत्र कर्हिचित् स्थितवंतौ भवथः तत्र मे हवमाह्वानं शुश्रुयातं । शृणुतं । श्रुत्वागच्छतमित्यर्थः । किमर्थमित्युच्यते । वस्वीः प्रशस्या भुजो धनानि हविर्लक्षणानि सु सुष्ठु वां युवां पृंचंति । मिश्रयंति । प्राप्नुवंति । उ इति पूरणः । कीदृश्यो भुजः । वां युवां सु सुष्ठु पृचः संपर्चनाः । युवां प्राप्तुं कामयमाना इत्यर्थः । अथवा सु पृचः सु संपर्चनाः स्तोतारो वस्वीर्भुजो वां सुष्ठु पृंचंति । संपर्चयंति ॥

॥ इति चतुर्थस्य चतुर्थे चतुर्दशो वर्गः ॥

प्रति प्रियतममिति नवर्चं तृतीयं सूक्तं । अवस्युर्नामात्रेय ऋषिः । पंक्तिश्छंदः । अश्विनौ देवता । अनुक्रांतं च । प्रति नवावस्युः पांक्तमिति ॥ प्रातरनुवाक आश्विने क्रतौ पांक्ते छंदस्याश्विनशस्त्रे चेदं सूक्तं । प्रति प्रियतममिति पांक्त । आ० ४.१५. । इति हि सूचितं ॥

॥ तत्र प्रथमा ॥

प्रति प्रियतमं रथं वृषणं वसुवाहनं ।

स्तोता वामश्विनावृषिः स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवं ॥१॥

प्रति । प्रियऽतमं । रथं । वृषणं । वसुऽवाहनं ।

स्तोता । वां । अश्विनौ । ऋषिः । स्तोमेन । प्रति । भूषति । माध्वी इति । मम । श्रुतं । हवं ॥१॥

हे अश्विना । एकः प्रतिशब्दोऽनुवादः । वां युवयोः प्रियतमं रथं स्तोता

ऋषिरवस्युः स्तोमेन प्रतिभूषति । अलंकरोति । कीदृशं रथं । वृषणं वर्षितारं फलानां वसुवाहनं धनानां वाहकं । ईदृशं रथमागमनाय करोतीत्यर्थः । तस्मात् हे माध्वी मधुविद्यावेदितारौ मम हवमाह्वानं श्रुतं । शृणुतं ॥

॥ अथ द्वितीया ॥

अत्यायातमश्विना तिरो विश्वा अहं सना ।
दस्रा हिरण्यवर्तनी सुषुम्ना सिंधुवाहसा माध्वी मम श्रुतं हवं ॥२॥
अतिऽआयातं । अश्विना । तिरः । विश्वाः । अहं । सना ।
दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । सुऽसुम्ना । सिंधुऽवाहसा । माध्वी इति । मम । श्रुतं । हवं ॥२॥

हे अश्विना अत्यायातं । सर्वान्यजमानानतिक्रम्यागच्छतं । यथाहमृषिर्विश्वाः सर्वा अस्मद्विरोधिप्रजाः सना सदा तिरस्करोमि । अथवाहं तिरः । तिरः सत इति प्राप्तस्येति निरुक्तं । प्राप्ता विश्वाः सर्वाः क्रिया युष्मदीया अनुतिष्ठेयमित्यर्थः । सना सनातनौ दस्रा शत्रूणामुपक्षपयितारौ हिरण्यवर्तनी हिरण्यरथौ सुषुम्ना सुधनौ सिंधुवाहसा नदीनां प्रवाहयितारौ वृष्टिप्रेरणेन । तादृशौ युवामत्यायातं ॥

॥ अथ तृतीया ॥

आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवं ।
रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवं ॥३॥
आ । नः । रत्नानि । बिभ्रतौ । अश्विना । गच्छतं । युवं ।
रुद्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । जुषाणा । वाजिनीवसू इति वाजिनीऽवसू । माध्वी इति । मम । श्रुतं । हवं ॥३॥

हे अश्विना नोऽस्मभ्यं रत्नानि रमणीयानि धनानि बिभ्रतौ धारयंतौ युवं युवां नोऽस्मान्वागच्छतं । हे रुद्रा रुद्रपुत्रौ स्तुत्यौ वा हे वाजिनीवसू वाजिनधनौ युवां हिरण्यवर्तनी हिरण्यरथौ जुषाणा यज्ञं सेवमानौ संतावागच्छतमिति । माध्वी इत्यादि गतं ॥

॥ अथ चतुर्थी ॥

सुष्टुभो वां वृषण्वसू रथे वाणीच्याहिता ।
उत वां ककुहो मृगः पृक्षः कृणोति वापुषो माध्वी मम श्रुतं हवं ॥४॥
सुऽस्तुभः । वां । वृषण्वसू इति वृषण्ऽवसू । रथे । वाणीची । आऽहिता ।
उत । वां । ककुहः । मृगः । पृक्षः । कृणोति । वापुषः । माध्वी इति । मम । श्रुतं । हवं ॥४॥

हे वृषण्वसू वर्षधनौ वर्षितारौ वा वसूनां हे अश्विनौ सुष्टुभः सुस्तोतुर्मम वाणीची वाग्रूपा स्तुतिर्वां युवयो रथ आहिता । स्थापिता । अस्माभिः कृतेत्यर्थः । उतापि च वां युवाभ्यां ककुहो महान् मृगो मृगयिता वापुषो वपुष्मान्यजमानः पृक्षोऽन्नं हविः कृणोति । करोति । तस्मान्मम हवं श्रुतमिति ॥

॥ अथ पंचमी ॥

बोधिन्मनसा रथ्येषिरा हवनश्रुता ।
विभिश्च्यवानमश्विना नि याथो अद्वयाविनं माध्वी मम श्रुतं हवं ॥५॥
बोधित्ऽमनसा । रथ्या । इषिरा । हवनऽश्रुता ।
विऽभिः । च्यवानं । अश्विना । नि । याथः । अद्वयाविनं । माध्वी इति । मम ।
श्रुतं । हवं ॥५॥

हे अश्विना बोधिन्मनसा बुध्यमानमनस्कौ रथ्या रथस्वामिनाविषिरा शीघ्रगंतारौ सर्वगंतव्यौ वा हवनश्रुता हवनस्य स्तुतेः श्रोतारौ युवां विभिरश्वैश्च्यवानमृषिमद्वयाविनं मायारहितं नियाथः । यथा तमृषिं प्राप्नवंतौ तद्वन्मां प्रति पथि नियाथः । नितरामागच्छतं । प्र च्यवानाज्जुजुरुषो वव्रिं । ऋग्वे० ५.७४.५. । इति ह्युक्तं ॥

॥ इति चतुर्थस्य चतुर्थे पंचदशो वर्गः ॥

॥ अथ षष्ठी ॥

आ वां नरा मनोयुजोऽश्वासः प्रुषितप्सवः ।
वयो वहंतु पीतये सह सुम्नेभिरश्विना माध्वी मम श्रुतं हवं ॥६॥
आ । वां । नरा । मनःऽयुजः । अश्वासः । प्रुषितऽप्सवः ।
वयः । वहंतु । पीतये । सह । सुम्नेभिः । अश्विना । माध्वी इति । मम । श्रुतं । हवं ॥६॥

हे नरा कर्मणां नेतारौ हे अश्विनौ वां युवां मनोयुजो मनोमात्रेण युज्यमानाः । सुशिक्षिता इत्यर्थः । प्रुषितप्सवो विचित्ररूपा वयः शीघ्रगंतारोऽश्वासोऽश्वा आवहंतु पीतये सोमपानाय । सुम्नेभिः सह अस्मभ्यं देयैः सुखैस्तत्साधनैर्धनादिभिर्वा सह वहंतु ॥

॥ अथ सप्तमी ॥

अश्विनावेह गच्छतं नासत्या मा वि वेनतं ।

तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या माध्वी मम श्रुतं हवं ॥७॥

अश्विनौ । आ । इह । गच्छतं । नासत्या । मा । वि । वेनतं ।

तिरः । चित् । अर्यऽया । परि । वर्तिः । यातं । अदाभ्या । माध्वी इति । मम । श्रुतं । हवं ॥७॥

हे अश्विनाविहास्मिन्यज्ञ आगच्छतं । हे नासत्या मा विवेनतं । विगतकामौ मा भवतं ॥ वेनतिः कांतिकर्मा ॥ हे अदाभ्याहिंस्यौ पूज्यौ अर्ययार्यौ स्वामिनौ युवां ॥ सुपां सुलुगित्यादिना सुपो याजादेशः ॥ तिरश्चित् अंतर्हितादूरदेशादपि युवां वर्तिरस्मद्यज्ञगृहं परियातं । आगच्छतं ॥

॥ अथाष्टमी ॥

अस्मिन्यज्ञे अदाभ्या जरितारं शुभस्पती ।

अवस्युमश्विना युवं गृणंतमुप भूषथो माध्वी मम श्रुतं हवं ॥८॥

अस्मिन् । यज्ञे । अदाभ्या । जरितारं । शुभः । पती इति ।

अवस्युं । अश्विना । युवं । गृणंतं । उप । भूषथः । माध्वी इति । मम । श्रुतं । हवं ॥८॥

हे अदाभ्या अहिंस्यौ हे शुभस्पती उदकस्य स्वामिनावश्विना युवं युवामस्मिन्यज्ञे जरितारं स्तोतारमवस्युं गृणंतं स्तुवंतं मामुपभूषथः । उपप्राप्नुतं ॥

॥ अथ नवमी ॥

अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः ।

अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवं ॥९॥

अभूत् । उषाः । रुशत्ऽपशुः । आ । अग्निः । अधायि । ऋत्वियः ।

अयोजि । वां । वृषण्वसू इति वृषण्ऽवसू । रथः । दस्रौ । अमर्त्यः । माध्वी इति ।

मम । श्रुतं । हवं ॥९॥

उषा व्युष्टिरभूत् । अग्निश्च रुशत्पशुर्दीप्तपशुमान् । प्रकाशितहविरित्यर्थः । अथवा पशवः किरणाः । रुशद्रश्मिः सन् अधायि । वेद्यामधीयत । हे वृषण्वसू प्रदत्तधनौ हे दस्रौ वां युवयोरमर्त्योऽमरणधर्मा ध्रुवो रथोऽयोजि । अश्वैर्युक्तो भवत्वित्यर्थः ॥ छंदसि लुङ्लङ्लिट इत्यनेकेष्वर्थेषु लुङ् भवति । इह प्रार्थनायां ॥ माध्वी इत्यादि गतं ॥

॥ इति चतुर्थस्य चतुर्थे षोडशो वर्गः ॥

आ भात्यग्निरिति पंचर्चं चतुर्थं सूक्तं भौमस्यात्रेरार्षं त्रैष्टुभमाश्विनं । अत्रानुक्रमणिका । आ भाति पंचात्रिरिति ॥ प्रवर्ग्येऽभिष्टवार्थमिदं सूक्तं । सूचितं च । आ भात्यग्निर्यावाणेव । आ॰ ४.६. । इति ॥ प्रातरनुवाक आश्विने क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चेदमादिके द्वे सूक्ते । सूत्र्यते हि । आ भात्यग्निरिति सूक्ते । आ॰ ४.१५. । इति ॥ अप्तोर्यामे होतुरतिरिक्तोक्थ्य इदं सूक्तं । सूचितं च । आ भात्यग्निः क्षेत्रस्य पतिना वयमिति परिधानीया । आ॰ ९.११. । इति ॥

॥ तत्र प्रथमा ॥

आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।
अर्वाञ्चा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ ॥१॥

आ । भाति । अग्निः । उषसां । अनीकं । उत् । विप्राणां । देवऽयाः । वाचः । अस्थुः ।
अर्वाञ्चा । नूनं । रथ्या । इह । यातं । पीपिऽवांसं । अश्विना । घर्मं । अच्छ ॥१॥

उषसामनीकमनीकभूतः । अनीकं मुखं । उषसि प्रबुध्यमान इत्यर्थः । तादृशोऽग्निराभाति । दीप्यते । यद्वा उषसां मुखमाभाति । दीपयति । उषःकाले ह्यग्नयः प्रतिबोध्यंते । किंच विप्राणां मेधाविनां स्तोतॄणां देवया देवकामा वाचः स्तोत्राण्युदस्थुः । उत्तिष्ठंति । यस्मादेवं तस्मात् हे रथ्या रथस्वामिनावश्विनावर्वाञ्चास्मदभिमुखांचनौ नूनमद्यास्मिन्यागदिन इहायातं । कं प्रति । पीपिवांसं स्वांगैः परिवृढं घर्मं प्रदीप्तं यज्ञं । यद्वा पीपिवांसमाप्यायितं वसतीवरीभिः क्षरद्रूपं सोमरसं । अथवा घृतादिना पीपिवांसं घर्मं प्रवर्ग्यमच्छाभिलक्ष्येह यातं । प्रवर्ग्येऽस्य सूक्तस्य विनियोगः ॥

॥ अथ द्वितीया ॥

न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह ।
दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शंभविष्ठा ॥२॥

न । संस्कृतं । प्र । मिमीतः । गमिष्ठा । अंति । नूनं । अश्विना । उपऽस्तुता । इह ।
दिवा । अभिऽपित्वे । अवसा । आऽगमिष्ठा । प्रति । अवर्तिं । दाशुषे । शंऽभविष्ठा ॥२॥

अश्विनौ संस्कृतं घर्मं न प्रमिमीतः । न हिंस्तः । किंतु अंत्यंतिके घर्मसमीपे नूनमिदानीमिह यज्ञे गमिष्ठा गंतृतमावश्विनाश्विनावुपस्तुतोपस्तुतौ भवतः । दिवाभिपित्वे दिवसस्याभिपतने प्रातःकालेऽवसा रक्षणेन सहागमिष्ठागंतृतमौ । अवर्तिं प्रति द्वंद्वभूतौ । वर्तिर्जीवनं । तदभावोऽवर्तिः । तद्रहितमन्नं यथा भवति तथागंतृतमौ । आगत्य च दाशुषे हविर्दत्तवते यजमानाय शंभविष्ठा सुखस्य भावयितारौ भवतां ॥

॥ अथ तृतीया ॥

उता यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य ।
दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततान ॥३॥

उत । आ । यातं । संऽगवे । प्रातः । अह्नः । मध्यंदिने । उत्ऽइता । सूर्यस्य ।
दिवा । नक्तं । अवसा । शंऽतमेन । न । इदानीं । पीतिः । अश्विना । आ । ततान ॥३॥

अह्नो द्वेधा त्रेधा पंचधा पंचदशधा समाना विभागाः संति । इह पंचधा विभाग आन्नः ॥ उतापि चायातं । आगच्छतं । कदा । संगवे संगवकाले । संगच्छंते गावो दोहनभूमिं यस्मिन्काले स संगवः । रात्र्यपरकाले हि गावो वने हिमतृणानि भक्षयित्वा पुनर्दोहाय संगवे प्रतिनिवर्तंते । तथा प्रातः प्रातःकालेऽपि । तथा मध्यंदिनेऽह्नो मध्यकाले सूर्यस्योदितोदितावभ्युदयेऽत्यंतप्रवृद्धसमये । अपराह्ण इत्यर्थः । एतत्सायाह्नस्याप्युपलक्षणं । न केवलमुक्तेष्वेव कालेषु किंतर्हि दिवा नक्तं सर्वदा शंतमेन सुखतमेनावसा रक्षणेन हविषा वा निमित्तेनायातं । किमर्थमागम्यते पूर्वमेवान्यैर्देवैः स्वीकृतत्वात् नेत्याह । इदानीमपि पीतिरितरदेवानां पानं नाततान न तनोत्यश्विनाश्विनौ विहायेति शेषः ॥

॥ अथ चतुर्थी ॥

इदं हि वां प्रदिवि स्थानमोक इमे गृहा अश्विनेदं दुरोणं ।
आ नो दिवो बृहतः पर्वतादाद्भ्यो यातमिषमूर्जं वहंता ॥४॥
इदं । हि । वां । प्रऽदिवि । स्थानं । ओकः । इमे । गृहाः । अश्विना । इदं । दुरोणं ।
आ । नः । दिवः । बृहतः । पर्वतात् । आ । अत्ऽभ्यः । यातं । इषं । ऊर्जं । वहंता ॥४॥

हे अश्विना वां युवयोः प्रदिवि पुराणमिदं ह्योको निवासयोग्यं स्थानमुत्तरवेद्याख्यं । अथ सौमिकवेद्यभिप्रायेणाह । इमे गृहाः प्राचीनवंशादयः । इदं दुरोणं देवयजनगृहं । नोऽस्मदर्थं दिवो द्युलोकाद्बृहतः पर्वतात् पर्ववतो मेघादद्भ्योऽपां कारणादंतरिक्षादायातं । आगच्छतं । किं तूष्णीं । न । इषमूर्जं चान्नं बलं च । बलसाधनमन्नं सारभूतमित्यर्थः । तादृशं वहंता वहंतौ ॥

॥ अथ पंचमी ॥

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥५॥
सं । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती । गमेम ।
आ । नः । रयिं । वहतं । आ । उत । वीरान् । आ । विश्वानि । अमृता । सौभगानि ॥५॥

वयं संगमेम संगच्छेमाश्विनोर्नूतनेनावसानन्यकृतेन रक्षणेन मयोभुवा सुखस्य भावयित्र्या सुप्रणीती सुप्रणीत्या सुष्ठ्वागमनेन च । अपि वैते उभे अवसो विशेषणे । उक्तलक्षणेन संगमेम । नोऽस्मभ्यं रयिमावहतं । उत वीरान् पुत्रादीनावहतं । हे अमृतामरणधर्माणौ विश्वा विश्वानि सौभगा सुभगत्वान्यावहतं ॥

॥ इति चतुर्थस्य चतुर्थे सप्तदशो वर्गः ॥

प्रातर्यावाणेति पंचर्चं पंचमं सूक्तमात्रेयं त्रैष्टुभमाश्विनं । प्रातर्यावाणेति ह्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥ अप्तोर्यामे मैत्रावरुणातिरिक्तोक्थ्य इदमेव शस्यं । तथा च सूचितं । प्रातर्यावाणा क्षेत्रस्य पते मधुमंतमूर्मिं । आ॰ ९. ११. । इति ॥

॥ तत्र प्रथमा ॥

प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबातः ।
प्रातर्हि यज्ञमश्विना दधाते प्र शंसंति कवयः पूर्वभाजः ॥१॥
प्रातःऽयावाना । प्रथमा । यजध्वं । पुरा । गृध्रात् । अररुषः । पिबातः ।
प्रातः । हि । यज्ञं । अश्विना । दधाते इति । प्र । शंसंति । कवयः । पूर्वऽभाजः ॥१॥

हे मदीया ऋत्विजः प्रातर्यावाणा प्रातरेव यज्ञगंतारौ प्रथमात एवेतरेभ्यो देवेभ्यः पूर्वभाविनौ प्रकृष्टतमौ वाश्विनौ यजध्वं । किमर्थं । प्रथमयागनियोग उच्यते । गृध्रादभिकांक्षतोऽररुषोऽदातू रक्षःप्रभृतेः पुरा पूर्वं पिबातः । पिबतां । अनागतौ कथं यष्टुं शक्यावित्यत आह । अश्विनाश्विनौ प्रातर्हि यज्ञं दधाते । धारयतः । संभजतः । पूर्वभाजः पूर्वकालीनाः कवयोऽनूचाना ऋषयः प्रातरेवैतौ प्रशंसंति । ये वा अनूचानास्ते कवयः । ऐ० ब्रा० २. ३८. । इति हि निगमः ॥

॥ अथ द्वितीया ॥

प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टं ।
उतान्यो अस्मद्यजते वि चावः पूर्वःपूर्वो यजमानो वनीयान् ॥२॥
प्रातः । यजध्वं । अश्विना । हिनोत । न । सायं । अस्ति । देवऽयाः । अजुष्टं ।
उत । अन्यः । अस्मत् । यजते । वि । च । आवः । पूर्वःऽपूर्वः । यजमानः । वनीयान् ॥२॥

हे मदीयाः पुरुषा अश्विनाश्विनौ प्रातः प्रातरेव यजध्वं । पूजयध्वं । स्तुध्वं । हिनोत । प्रहिणुत हवींषि । सायं सायंकाले हविर्देवया देवगामि नास्ति । न विद्यते । देवा न स्वीकुर्वंतीत्यर्थः । अजुष्टमसेव्यं तद्भवति । पूर्वाह्णो वै देवानामिति हि श्रुतिः । उतास्मदस्मत्तोऽन्यः कोऽपि यजते यजेत सोमेन वि चावः वितर्पयेच्च हविषा । अतोऽस्मास्वन्येषु च मध्ये पूर्वःपूर्वो यजमानो यः पूर्वःपूर्वो यष्टा भवति स वनीयान् देवानां संभजनीयः संभाव्यो भवति ॥

हिरण्यत्वगित्येषाश्विने पशौ हविषो याज्या । हिरण्यत्वङ्मधुवर्णो घृतस्नुरभि क्रत्वेंद्र भूरध ज्मन् । आ० ३.८. । इति हि सूचितं ॥

॥ सैषा तृतीया ॥

हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते वां ।
मनोजवा अश्विना वातरंहा येनातियाथो दुरितानि विश्वा ॥३॥
हिरण्यऽत्वक् । मधुऽवर्णः । घृतऽस्नुः । पृक्षः । वहन् । आ । रथः । वर्तते । वां ।
मनःऽजवाः । अश्विना । वातऽरंहाः । येन । अतिऽयाथः । दुःऽइतानि । विश्वा ॥ ३ ॥

वां युवयो रथः पृक्षोऽन्नममृतं वहन्नावर्तते । अस्मदभिमुखमागच्छति । कीदृशो रथः । हिरण्यत्वक् हिरण्याच्छादितरूपो हिरण्यावृतो मधुवर्णो मनोहरवर्णो घृतस्नुरुदकस्य प्रस्रवनो मनोजवा मनोवेगो वातरंहा वातसदृशवेगः । हे अश्विना येन रथेन विश्वा सर्वाणि दुरितानि दुर्गमनान्मार्गान्वातियाथः अतिक्रम्य गच्छथः ॥

॥ अथ चतुर्थी ॥

यो भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे ।
स तोकमस्य पीपरच्छमीभिरनूर्ध्वभासः सदमित्तुतुर्यात् ॥४॥
यः । भूयिष्ठं । नासत्याभ्यां । विवेष । चनिष्ठं । पित्वः । ररते । विऽभागे ।
सः । तोकं । अस्य । पीपरत् । शमीभिः । अनूर्ध्वऽभासः । सदं । इत् । तुतुर्यात् ॥ ४ ॥

यो यजमानो विभागे हविर्विभागवति यागे नासत्याभ्यामश्विभ्यां भूयिष्ठं चनिष्ठं । चन इत्यन्ननाम । बह्वन्नं कर्म विवेष करोति । पित्वः ॥ कर्मणि षष्ठी ॥ अन्नं च ररते ददाति स यजमानोऽस्यात्मन एव तोकं पुत्रं पीपरत् पालयेत शमीभिः कर्मभिः । अनूर्ध्वभासोऽनुन्नततेजस्कान् । यद्वोर्ध्वभासोऽग्नयः । अग्निरहितानयष्टॄन् सदमित् सदैव तुतुर्यात् । हिंस्यात् ॥

॥ अथ पंचमी ॥

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥५॥
सं । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती । गमेम ।
आ । नः । रयिं । वहतं । आ । उत । वीरान् । आ । विश्वानि । अमृता । सौभगानि ॥५॥

समश्विनोरिति पंचमी गता ॥

॥ इति चतुर्थस्य चतुर्थेऽष्टादशो वर्गः ॥

अश्विनावेहेति नवर्चं षष्ठं सूक्तं। अत्रानुक्रमणिका। अश्विनौ नव सप्तवध्रिस्त्र्युष्णिगादि चतुर्थी त्रिष्टुप् पंचानुष्टुभ इति। सप्तवध्रिर्नामात्रेय ऋषिः। आदितस्तिस्र उष्णिहश्चतुर्थी त्रिष्टुप् शिष्टाः पंचानुष्टुभः ॥ प्रातरनुवाक आश्विने क्रतावौष्णिहे छंदस्याश्विने शस्त्रे चाद्यस्तृचो विनियुक्तः। सूचितं च। अश्विना वर्तिरस्मदाश्विनावेह गच्छतमिति तृचौ। आ० ४.१५.। इति ॥ दशरात्रे तृतीयेऽहनि प्रउगशस्त्रेऽयमाश्विनस्तृचः। सूचितं च। अश्विनावेह गच्छतमा याह्यद्रिभिः सुतं। आ० ७.१०.। इति ॥

॥ तत्र प्रथमा ॥

अश्विनावेह गच्छतं नासत्या मा वि वेनतं।
हंसाविव पततमा सुताँ उप ॥१॥
अश्विनौ। आ। इह। गच्छतं। नासत्या। मा। वि। वेनतं।
हंसौऽइव। पततं। आ। सुतान्। उप ॥१॥

हे अश्विनाविहास्मिन्याग आगच्छतं। हे नासत्या मा विवेनतं। वेनतिः कांतिकर्मा। मा विकामौ भवतं। निःस्पृहावकामौ वा न भवतमित्यर्थः। हंसाविव तौ यथा निर्मलोदकमागच्छतस्तद्वत् सुतानभिषुतान् सोमानुपापततं। उपागच्छतं ॥

॥ अथ द्वितीया ॥

अश्विना हरिणाविव गौराविवानु यवसं।
हंसाविव पततमा सुताँ उप ॥२॥
अश्विना। हरिणौऽइव। गौरौऽइव। अनु। यवसं।
हंसौऽइव। पततं। आ। सुतान्। उप ॥२॥

हे अश्विनौ हरिणाविव गौराविव गौरमृगाविव च। तौ यथा यवसं घासमनुधावतः ताविव हंसाविव च सोममागच्छतं ॥

॥ अथ तृतीया ॥

अश्विना वाजिनीवसू जुषेथां यज्ञमिष्टये ।
हंसाविव पततमा सुताँ उप ॥३॥
अश्विना । वाजिनीवसू इति वाजिनीऽवसू । जुषेथां । यज्ञं । इष्टये ।
हंसौऽइव । पततं । आ । सुतान् । उप ॥३॥

हे वाजिनीवसू अन्नार्थं वासयितारावश्विना यज्ञमस्मदीयमिष्टयेऽभीष्टायैषणाय वा जुषेथां । सेवेथां ॥

॥ अथ चतुर्थी ॥

अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेव योषा ।
श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन ॥४॥
अत्रिः । यत् । वां । अवऽरोहन् । ऋबीसं । अजोहवीत् । नाधमानाऽइव । योषा ।
श्येनस्य । चित् । जवसा । नूतनेन । आ । अगच्छतं । अश्विना । शंऽतमेन ॥४॥

अत्रिरस्मत्पिता यद्यदा वां युवामजोहवीत् अस्तौषीत् नाधमाना याचमाना योषा योषिदिव । सा यथा पतिं प्रीणयति तद्वत्कुर्वन् ऋबीसं तुषाग्निमग्निकुंडे क्षिप्तः सन् अवरोहन् विमुंचन् अजोहवीत् । श्येनस्य चिज्जवसा श्येनस्य गरुत्मत इव वेगेन । चिदित्युपमार्थे । अथवा श्येनस्य जवसा वेगेन नूतनेन प्रथमोत्पन्नेन सततं गच्छतः श्येनस्य प्रथमजवेन शंतमेनास्माकं सुखतमेन च रथेन तं रक्षितुमागच्छतं हे अश्विना ॥

॥ इति चतुर्थस्य चतुर्थे एकोनविंशो वर्गः ॥

अत्र ब्रुवंतीतिहासं सप्तवध्रेः पुराविदः ॥ भ्रातृव्याः पेटिकायां तमृषिं प्रक्षिप्य यत्नतः । मुद्रां कृत्वा गृहे स्वीये रक्षयित्वा न्यवेशयन् ॥ न संगच्छेत भार्यां स्वां यथा रात्रौ तथा कृतं । प्रातः प्रातः समुद्घाट्य निर्मेषिष्यंति तं मुनिं ॥ एवं स्थित्वा चिरं कालं पेटायां दुःखितः कृशः । उपायं चिंतयामास निर्गमस्य चिरं मुनिः ॥ हृदि निश्चित्य नासत्यावस्तौषीद्धृष्टमानसः । तमश्विनौ समागत्य समुद्घाट्य च पेटिकां ॥ उद्धृत्य तमृषिं शीघ्रं तावदृष्टौ बभूवतुः । स ऋषिर्भार्यया सार्द्धं रमित्वाथ पुनर्भयात् ॥ प्रातरेत्य पुनः पेटां प्रविश्य प्रागिव स्थितः । पेटानिवाससमये हृष्टवानृग्द्वयं तदा ॥

तत्र द्वृचे प्रथमा सूक्ते पंचमी ॥

वि जिंहीष्व वनस्पते योनिः सूष्यंत्या इव ।
श्रुतं मे अश्विना हवं सप्तवंध्रिं च मुंचतं ॥५॥

वि । जिहीष्व । वनस्पते । योनिः । सूष्यंत्याःऽइव ।
श्रुतं । मे । अश्विना । हवं । सप्तऽवंध्रिं । च । मुंचतं ॥५॥

हे वनस्पते वनस्पतिविकाररूपे पेटिके विजिहीष्व । विगच्छ । विवृता भव । सूष्यंत्या इव प्रसवोन्मुख्याः स्त्रिया योनिरिव भगो यथा विव्रियते तथा त्वमपि विवृता भव । तदर्थं हे अश्विनाश्विनौ मे हवमाह्वानं श्रुतं । शृणुतं । श्रुत्वा च सप्तवध्रिं च मामृषिं मुंचतं । मोचयतं ॥

॥ अथ षष्ठी ॥

भीताय नाधंमानाय ऋषंये सप्तवंध्रये ।
मायाभिंरश्विना युवं वृक्षं सं च वि चांचथः ॥६॥

भीतायं । नाधंमानाय । ऋषंये । सप्तऽवंध्रये ।
मायाभिंः । अश्विना । युवं । वृक्षं । सं । च । वि । च । अचथः ॥६॥

भीताय निर्गमाद्बिभ्युषे नाधमानाय विमोक्षं याचमानाय सप्तवध्रय ऋषये हे अश्विनाश्विनौ युवं युवां मायाभिर्वृक्षं वृक्षविकारां पेटिकां सं चाचथः । मम निर्गमार्थं संगच्छथः । वि चाचथः । विभक्तं कुरुथः ॥ •

॥ अथ सप्तमी ॥

यथा वार्तः पुष्करिंणीं समिंगयंति सर्वतः ।
एवा ते गर्भं एजतु निरैतु दर्शमास्यः ॥७॥

यथां । वार्तः । पुष्करिंणीं । संऽइंगयंति । सर्वतः ।
एव । ते । गर्भः । एजतु । निःऽऐतु । दर्शऽमास्यः ॥७॥

एतदाद्यृक्त्रयं गर्भस्राविण्युपनिषत् ॥ एतदाद्यृक्त्रयेणासौ सप्तवध्रिः स्वयोषितः । गर्भिण्याः प्रसवायाशु स्तुतवानश्विनावृषिः ॥ यथा वातः पुष्करिणीं सरआदिकं

सर्वतः समिंगयति सम्यक् चालयति एवैवं तव गर्भ एजतु । कंपतां । इतस्ततः संचरतु । दशमास्यो दश मासान् गर्भे स्थितो निरैतु । निर्गच्छतु ॥

॥ अथाष्टमी ॥

यथा वातो यथा वनं यथा समुद्र एजति ।
एवा त्वं दशमास्य सहावेहि जरायुणा ॥ ८ ॥
यथा । वातः । यथा । वनं । यथा । समुद्रः । एजति ।
एव । त्वं । दशऽमास्य । सह । अव । इहि । जरायुणा ॥ ८ ॥

वातो यथा कंपमानो वनं कंपयति स्वयं । यथा समुद्रश्चलति चाल्यते वाथ वायुना ॥ स्थित्वा दशैव मासांस्त्वं गर्भोल्बेन सुवेष्टितः । निर्गच्छ जठरान्मातुर्जरायुजस्ततः पतेत् ॥

॥ अथ नवमी ॥

दश मासाञ्छशयानः कुमारो अधि मातरि ।
निरैतु जीवो अक्षतो जीवो जीवंत्या अधि ॥ ९ ॥
दश । मासान् । शशयानः । कुमारः । अधि । मातरि ।
निःऽऐतु । जीवः । अक्षतः । जीवः । जीवंत्याः । अधि ॥ ९ ॥

दशमासानुषित्वासौ जननीजठरे सुखं । निर्गच्छतु सुखं जीवो जननी चापि जीवतु ॥

॥ इति चतुर्थस्य चतुर्थे विंशो वर्गः ॥

महे नो अद्येति दशर्चं सप्तमं सूक्तमात्रेयस्य सत्यश्रवस आर्षं पांक्तमुषस्यं । अनुक्रम्यते च । महे दश सत्यश्रवा उषस्यं तु पांक्तमिति ॥ प्रातरनुवाक उषस्ये क्रतौ पांक्ते छंदस्याश्विनशस्त्रे चेदं सूक्तं । सूत्र्यते हि । महे नो अद्येति पांक्तं । आ॰ ४.१४. । इति ॥

॥ तत्र प्रथमा ॥

महे नो अद्य बोधयोषो राये दिवित्मती ।
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ १ ॥

महे। नः। अद्य। बोधय। उषः। राये। दिविऽमती।

यथा। चित्। नः। अबोधयः। सत्यऽश्रवसि। वाय्ये। सुऽजाते। अश्वऽसूनृते ॥१॥

अद्यास्मिन्यागदिने हे उष उषो देवि दिवित्मती दीप्तिमती त्वं नोऽस्मान्महे महते राये धनप्राप्तये बोधय। प्रज्ञापय। प्रकाशयेत्यर्थः। सति प्रकाशे ऋतुद्वारा द्रव्यस्योपार्जयितुं शक्यत्वात्। यथा चित् यथैव पूर्वं नोऽस्मानबोधयः अतीतेषु दिवसेषु यथा बोधितवती तद्वदद्यापीत्यर्थः। हे सुजाते शोभनप्रादुर्भूते अश्वसूनृते। अश्वार्था प्रियसत्यात्मिका स्तुतिवाग्यस्याः सा। हे तादृशि देवि वाय्ये वय्यपुत्रे सत्यश्रवसि मय्यनुगृहाणेत्यर्थः ॥

॥ अथ द्वितीया ॥

या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः।

सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥२॥

या। सुऽनीथे। शौचत्ऽरथे। वि। औच्छः। दुहितः। दिवः।

सा। वि। उच्छ। सहीयसि। सत्यऽश्रवसि। वाय्ये। सुऽजाते। अश्वऽसूनृते ॥२॥

हे दिवो दुहितर्दिवः सूर्यस्य पुत्र्युषो या त्वं सुनीथ एतन्नामके शौचद्रथे शुचद्रथस्यापत्ये पूर्वं व्यौच्छः व्यवासयस्तमांसि सा त्वं सहीयस्यतिशयेन बलवति वाय्ये वय्यपुत्रे सत्यश्रवसि मयि व्युच्छ। तमो विवासय। उच्छी विवासे। विवासो वर्जनं। शिष्टमुक्तं ॥

॥ अथ तृतीया ॥

सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः।

यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥३॥

सा। नः। अद्य। आभरत्ऽवसुः। वि। उच्छ। दुहितः। दिवः।

यो इति। वि। औच्छः। सहीयसि। सत्यऽश्रवसि। वाय्ये। सुऽजाते। अश्वऽसूनृते ॥३॥

हे दुहितर्दिव उष आभरद्वसुराहृतधना सा प्रसिद्धा त्वं नोऽस्माकमद्यास्मिन्दिने व्युच्छ। तमो विवासय। हे सहीयसि यो या। उकारोऽनर्थकः। या त्वं पूर्वं व्यौच्छः साद्यापीति ॥

॥ अथ चतुर्थी ॥

अभि ये त्वा विभावरि स्तोमैर्गृणंति वह्नयः ।
मघैर्मघोनि सुश्रियो दामन्वंतः सुरातयः सुजाते अश्वसूनृते ॥४॥

अभि । ये । त्वा । विभाऽवरि । स्तोमैः । गृणंति । वह्नयः ।
मघैः । मघोनि । सुऽश्रियः । दामन्ऽवंतः । सुऽरातयः । सुऽजाते । अश्वऽसूनृते ॥४॥

हे विभावरि प्रकाशोपेते ॥ विभाशब्दाच्छंदसीवनिपाविति वनिप् । भातेर्वा कर्तरि वनिप् ॥ उषस्त्वा त्वामभि प्रति ये वह्नयो वोढार ऋत्विजः स्तोतारः स्तोमैः स्तोत्रैर्गृणंति स्तुवंति ते स्तोतारो मघैर्हे मघोनि धनैर्धनवति त्वदनुग्रहात् सुश्रियो भवंति । सुष्ठुर्थिभिराश्रयणीया भवंति । दामन्वंतो दानवंतो भवंति । सुरातयः । रातिर्दानं । सुदानाश्च भवंति ॥

॥ अथ पंचमी ॥

यच्चिद्धि ते गणा इमे छदयंति मघत्तये ।
परि चिद्वष्टयो दधुर्ददतो राधो अह्रयं सुजाते अश्वसूनृते ॥५॥

यत् । चित् । हि । ते । गणाः । इमे । छदयंति । मघत्तये ।
परि । चित् । वष्टयः । दधुः । ददतः । राधः । अह्रयं । सुऽजाते । अश्वऽसूनृते ॥५॥

हे उषो यच्चिद्धि । हीति पूरणः । यत् ये केचन ते तव स्वभूता इमे पुरतो वर्तमाना गणाः संघभूता मघत्तये धनदातये धनदानाय धनवत्त्वाय वा छदयंति उपच्छंदयंति ते सर्वेऽप्यस्मान् परिदधुः परितो धारयंति वष्टयोऽस्मानेव कामयमानाः । किं कुर्वंतः । अह्रयमह्रियमाणमक्षीणमलज्जावहं वा राधो धनं हविर्लक्षणं ददतो यजंत इत्यर्थः । अर्थिभ्योऽक्षीणं ददतो वा । ये त्वां हविर्ददतः स्तुवंति ते सर्वेऽप्यस्मदर्थमेव फलं धारयंति । स्तुवंतीत्यर्थः । अथवा यच्चीत्यत्र यद्यपीति व्याख्येयं । तस्मिन् पक्ष उत्तरवाक्ये तथापीत्यध्याहार्यं । अवशिष्टं समानं ॥

॥ इति चतुर्थस्य चतुर्थे एकविंशो वर्गः ॥

॥ अथ षष्ठी ॥

ऐषु धा वीरवद्यश उषो मघोनि सूरिषु ।
ये नो राधांस्यह्रया मघवानो अरासत सुजाते अश्वसूनृते ॥६॥

आ। एषु। धाः। वीरऽवत्। यशः। उषः। मघोनि। सूरिषु।
ये। नः। राधांसि। अह्रया। मघऽवानः। अरासत। सुऽजाते। अश्वऽसूनृते ॥६॥

हे उषो देवि मघोनि मघवति त्वं सूरिषु स्तोतृषु वा वीरवद्यशो वीरैः पुत्रादिभिरुपेतमन्नं यशो वाधाः। आधेहि। आदेहि। आनय। ये मघवानो धनवंतो सूरयो नोऽस्मभ्यं तव स्तोतृभ्यो राधांसि धनान्यह्रयाक्षीणान्यरासत ददुः तेष्वित्यर्थः ॥

॥ अथ सप्तमी ॥

तेभ्यो द्युम्नं बृहद्यश उषो मघोन्या वह।
ये नो राधांस्यश्व्या गव्या भजंत सूरयः सुजाते अश्वसूनृते ॥७॥
तेभ्यः। द्युम्नं। बृहत्। यशः। उषः। मघोनि। आ। वह।
ये। नः। राधांसि। अश्व्या। गव्या। भजंत। सूरयः। सुऽजाते। अश्वऽसूनृते ॥७॥

हे उषो मघोनि त्वं तेभ्यो द्युम्नं द्योतमानं हिरण्यादिरूपं धनं बृहद्यशो महदन्नं महतीं कीर्त्तिं वा तेभ्यो यजमानेभ्य आवह। य आढ्या नोऽस्मभ्यं राधांसि धनान्यश्व्याश्वैर्युक्तानि गव्या गोभिर्युक्तानि गोसमूहानश्वसमूहान् च भजंत भजेरन् ददुः सूरयो दातारः ॥

॥ अथाष्टमी ॥

उत नो गोमतीरिष आ वहा दुहितर्दिवः।
साकं सूर्यस्य रश्मिभिः शुक्रैः शोचद्भिरर्चिभिः सुजाते अश्वसूनृते ॥८॥
उत। नः। गोऽमतीः। इषः। आ। वह। दुहितः। दिवः।
साकं। सूर्यस्य। रश्मिऽभिः। शुक्रैः। शोचत्ऽभिः। अर्चिऽभिः। सुऽजाते। अश्वऽसूनृते ॥८॥

उतापि च नोऽस्मभ्यं गोमतीर्गोभिरुपेतानीषोऽन्नान्यावह आनय हे दिवो दुहितरुषः। कदा। सूर्यस्य रश्मिभिः साकं शोचद्भिर्दीपयद्भिः शुक्रैर्निर्मलैरर्चिभिरग्नेस्तेजोभिश्च साकं सूर्योदयकालेऽग्नीधनकाले चेत्यर्थः ॥

॥ अथ नवमी ॥

व्युच्छा दुहितर्दिवो मा चिरं तनुथा अपः।
नेत्त्वा स्तेनं यथा रिपुं तपाति सूरो अर्चिषा सुजाते अश्वसूनृते ॥९॥

वि । उच्छ । दुहितः । दिवः । मा । चिरं । तनुथाः । अपः ।
न । इत् । त्वा । स्तेनं । यथा । रिपुं । तपाति । सूरः । अर्चिषा । सुऽजाते । अश्वऽसूनृते ॥ ९ ॥

हे दिवो दुहितरुषः त्वं व्युच्छ । विभातं कुरु । अपोऽस्मदीयं कर्म प्रति चिरं विलंबं मा तनुथाः । त्वा त्वां रिपुं स्तेनं यथा संतापयति राजादिस्तद्वत्सूरः सूर्योऽर्चिषा तेजसा नेत् नैव तपाति । तप्यात् । शीघ्रं नोदेत्वित्यर्थः ॥

॥ अथ दशमी ॥

एतावद्वेदुषस्त्वं भूयो वा दातुमर्हसि ।
या स्तोतृभ्यो विभावर्युच्छंती न प्रमीयसे सुजाते अश्वसूनृते ॥ १० ॥
एतावत् । वा । इत् । उषः । त्वं । भूयः । वा । दातुं । अर्हसि ।
या । स्तोतृऽभ्यः । विभाऽवरि । उच्छंती । न । प्रऽमीयसे । सुऽजाते । अश्वऽसूनृते ॥ १० ॥

हे उषस्त्वमस्मभ्यं वाथवा दित्सितं किमेतावदेव । इच्छब्द एवकारार्थः । अस्मिन् सूक्ते प्रार्थितमेवेत्यर्थः । अथवा भूयो दातुमर्हसि । अप्रार्थितमपि । यद्यातव्यमस्ति तत्सर्वं देहीत्यर्थः । हे विभावर्युषो या त्वं स्तोतृभ्यस्तेषां लौकिकवैदिकव्यवहारार्थं व्युच्छंती तमो विवासयंती न प्रमीयसे । न हंसि । न क्रुध्यसीत्यर्थः । सा त्वं दातुमर्हसीति ॥ मीञ् हिंसायामित्यस्मात् श्नास्थाने व्यत्ययेन श्यन् ॥

॥ इति चतुर्थस्य चतुर्थे द्वाविंशो वर्गः ॥

द्युतद्यामानमिति षडृचमष्टमं सूक्तं । तत्रानुक्रमणिका । द्युतद्यामानं षडिति । सत्यश्रवा ऋषिः । अनुक्तत्वात् त्रिष्टुप् । उषस्यं त्वित्युक्तत्वादुषा देवता ॥ प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चेदं सूक्तं । सूत्रितं च । द्युतद्यामानमुषो वाजेन । आ॰ ४. १४. । इति ॥

॥ तत्र प्रथमा ॥

द्युतद्यामानं बृहतीमृतेन ऋतावरीमरुणप्सुं विभातीं ।
देवीमुषसं स्वरावहंतीं प्रति विप्रासो मतिभिर्जरंते ॥ १ ॥
द्युतत्ऽयामानं । बृहतीं । ऋतेन । ऋतऽवरीं । अरुणऽप्सुं । विऽभातीं ।
देवीं । उषसं । स्वः । आऽवहंतीं । प्रति । विप्रासः । मतिऽभिः । जरंते ॥ १ ॥

द्युतद्यामानं दीप्तरथां बृहतीं महतीमृतेन सत्येन यज्ञेन वर्तावरीमृतवतीमरुणप्सुमरुणरूपां विभातीं व्युच्छंतीं देवीं द्योतमानामुषसं स्वरावहंतीं सूर्यं गच्छंतीं। एवं महानुभावामुषसं विप्रासो मेधाविन ऋत्विजो मतिभिः स्तुतिभिः प्रतिजरंते। स्तुवंति ॥

॥ अथ द्वितीया ॥

एषा जनं दर्शता बोधयंती सुगान्पथः कृण्वती यात्यग्रे ।
बृहद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नां ॥२॥
एषा। जनं। दर्शता। बोधयंती। सुऽगान्। पथः। कृण्वती। याति। अग्रे।
बृहत्ऽरथा। बृहती। विश्वंऽइन्वा। उषाः। ज्योतिः। यच्छति। अग्रे। अह्नां ॥२॥

दर्शता दर्शनीयैषोषा बोधयंती। कं। जनं। प्रसुप्तमित्यर्थः। पथः सुगान् सुगमनान् कृण्वत्यग्रे सूर्यस्य पुरस्ताद्याति। गच्छति। कीदृश्युषाः। बृहद्रथा प्रभूतरथा बृहती महती विश्वमिन्वा विश्वं व्याप्नुवाना विश्वतर्पणा वा। ईदृश्युषा अह्नामग्रे ज्योतिस्तेजो यच्छति ॥

॥ अथ तृतीया ॥

एषा गोभिररुणेभिर्युजानास्रेधंती रयिमप्रायु चक्रे ।
पथो रदंती सुविताय देवी पुरुष्टुता विश्ववारा वि भाति ॥३॥
एषा। गोभिः। अरुणेभिः। युजाना। अस्रेधंती। रयिं। अप्रऽआयु। चक्रे।
पथः। रदंती। सुविताय। देवी। पुरुऽस्तुता। विश्वऽवारा। वि। भाति ॥३॥

एषोषा अरुणेभिररुणवर्णैर्गोभिर्बलीवर्दै रथं युजाना योजयंत्यस्रेधंत्यशुष्यंत्यक्षीणा वा। किं। रयिं धनमप्रायुप्रगंतृ अविचलितं चक्रे। करोति। किं कुर्वंती। पथो मार्गान् रदंती प्रकाशयंती। किमर्थं। सुविताय सुष्ठु गमनाय देवी द्योतमाना पुरुष्टुता बहुभिः स्तुता विश्ववारा सर्वैर्वरणीया विभाति। प्रकाशं करोति ॥

॥ अथ चतुर्थी ॥

एषा व्येनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात् ।
ऋतस्य पंथामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥४॥

एषा । विऽएनी । भवति । द्विऽबर्हाः । आविःऽकृण्वाना । तन्वं । पुरस्तात् ।
ऋतस्य । पंथां । अनु । एति । साधु । प्रजानती ऽइव । न । दिशः । मिनाति ॥४॥

एषोषा व्येनी भवति विशेषेण श्वेता भवति द्विबर्हा द्वयोः प्रथममध्यमयोः परिवृढोषाः पश्चात्तन्वं स्वीयां तनूमाविष्कृण्वाना प्रकटीकुर्वती । कुत्र । पुरस्तात् पूर्वस्यां दिशि । किंच ऋतस्यादित्यस्य पंथां पंथानं साधु सम्यगन्वेति । किंच प्रजानतीव विश्वं प्रज्ञापयंती । इवेति संप्रत्यर्थे । न दिशो मिनाति । न हिनस्ति । प्रत्युत दिशः प्रकाशयति । अथवा प्रजानतीवानुगंतव्यमिति प्रकर्षेणावगच्छंती चर्तस्य पंथामन्वेति ॥

॥ अथ पंचमी ॥

एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात् ।
अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात् ॥५॥
एषा । शुभ्रा । न । तन्वः । विदाना । ऊर्ध्वाऽइव । स्नाती । दृशये । नः । अस्थात् ।
अप । द्वेषः । बाधमाना । तमांसि । उषाः । दिवः । दुहिता । ज्योतिषा । आ । अगात् ॥५॥

एषोषाः शुभ्रा न शुभ्रवर्णा निर्मला स्वलंकृता योषिदिव तन्वोऽंगानि विदाना प्रज्ञापयंती स्नाती स्नानं कुर्वाणोर्ध्वेवोन्नतेव स्नानादुत्तिष्ठंतीव नोऽस्मदर्थमस्माकं पुरतो वा दृशये सर्वेषां दर्शनायोदस्थात् । पूर्वस्यां दिश्युत्तिष्ठति । किं कुर्वती । द्वेषो द्वेष्याणि तमांस्यपबाधमाना दिवो दुहितोषा ज्योतिषा तेजसा सहागात् । आगच्छति ॥

॥ अथ षष्ठी ॥

एषा प्रतीची दुहिता दिवो नॄन्योषेव भद्रा नि रिणीते अप्सः ।
व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः ॥६॥
एषा । प्रतीची । दुहिता । दिवः । नॄन् । योषाऽइव । भद्रा । नि । रिणीते । अप्सः ।
विऽऊर्ण्वती । दाशुषे । वार्याणि । पुनः । ज्योतिः । युवतिः । पूर्वऽथा । अकरित्यकः ॥६॥

एषोषाः प्रतीच्यभिमुखा सती दिवो दुहिता नॄन् सर्वान् प्राणिनः प्रति भद्रा योषेव कल्याणवेषा योषिदिवाप्सो रूपं निरिणीते । प्रेरयति । किंच दाशुषे हविर्दात्रे यजमानाय वार्याणि वरणीयाणि धनानि व्यूर्ण्वती प्रयच्छंती

युवतिर्नित्ययौवना सर्वत्र मिश्रयंती वा पुनरद्यापि पूर्वथा पूर्वमिव ज्योतिस्तेजोऽकः। करोति ॥

॥ इति चतुर्थस्य चतुर्थे त्रयोविंशो वर्गः ॥

युंजते मन इति पंचर्चं नवमं सूक्तं। अत्रेयमनुक्रमणिका। युंजते पंच श्यावाश्वः सावित्रं तु जागतमिति। श्यावाश्वो नामात्रेय ऋषिः। जगती छंदः। सविता देवता ॥ पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि वैश्वदेवशस्त्रे सावित्रनिविद्धानमिदं। सूत्रितं च। युंजते मन इहेह व इति चतस्रः। आ० ७.५.। इति ॥ आद्या ग्रावस्तोत्रेऽपि। सूत्रितं च। युंजते मन उत युंजते धिय आ तू न इंद्र क्षुमंतं। आ० ५.१२.। इति ॥

॥ तत्र प्रथमा ॥

युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥१॥
युंजते। मनः। उत। युंजते। धियः। विप्राः। विप्रस्य। बृहतः। विपःऽचितः।
वि। होत्राः। दधे। वयुनऽवित्। एकः। इत्। मही। देवस्य। सवितुः। परिऽस्तुतिः ॥१॥

विप्रा मेधाविन ऋत्विग्यजमाना मनः स्वीयं सर्वेषु कर्मसु युंजते। योजयंति। सवित्रनुग्रहाय संकल्पं कुर्वंतीत्यर्थः। उतापि च धियः कर्माण्यपि युंजते। प्राप्नुवंति। कस्यानुज्ञयेत्युच्यते। विप्रस्य मेधाविनो बृहतो महतो विपश्चितः स्तुत्यस्य ज्ञानवतो वा सवितुरनुज्ञयेति। सविता वै प्रसवानामीश इति हि श्रुतिः। स एव सविता होत्राः सप्त होत्रकानामुचिताः क्रिया वयुनावित्। वयुनमिति प्रज्ञानाम। तत्तदनुष्ठानविषयप्रज्ञावेत्तैक इत् एक एव विदधे। करोति। पृथक् पृथगवधारयति। किंच तस्य सवितुर्देवस्य परिष्टुतिः स्तुतिर्मही महत्यतिप्रभूता। स्तुत्यगोचरेत्यर्थः ॥

हविर्धानप्रवर्तने रराट्यामवनद्धायां विश्वा रूपाणीत्येषानुवचनीया। सूत्रितं च। विश्वा रूपाणि प्रति मुंचते कविरिति व्यवस्तायां। आ० ४.९.। इति ॥

॥ सैषा द्वितीया ॥

विश्वा रूपाणि प्रति मुंचते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे।
वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥२॥

विश्वा । रूपाणि । प्रति । मुंचते । कविः । प्र । असावीत् । भद्रं । द्विऽपदे । चतुःऽपदे ।
वि । नाकं । अख्यत् । सविता । वरेण्यः । अनु । प्रऽयानं । उषसः । वि । राजति ॥ २ ॥

कविर्मेधावी सविता विश्वा सर्वाणि रूपाण्यात्मनि प्रतिमुंचते । बध्नाति । धारयति । किंच भद्रं कल्याणं गमनादिविषयं प्रासावीत् । अनुजानाति । कस्मै । द्विपदे मनुष्याय चतुष्पदे गवाश्वादिकाय । किंच सविता सर्वस्य प्रेरको देवो वरेण्यो वरणीयः सन् व्यख्यत् । ख्यापयति । प्रकाशयति । किं । नाकं । नास्मिन्नकं दुःखमस्तीति नाकः स्वर्गः । यजमानार्थं स्वर्गं प्रकाशयतीत्यर्थः । स देव उषसः प्रयाणमुदयमनु विराजति । प्रकाशते । सवितुरुदयात्पूर्वं ह्युषा उदेति ॥

॥ अथ तृतीया ॥

यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ॥ ३ ॥
यस्य । प्रऽयानं । अनु । अन्ये । इत् । ययुः । देवाः । देवस्य । महिमानं । ओजसा ।
यः । पार्थिवानि । विऽममे । सः । एतशः । रजांसि । देवः । सविता । महिऽत्वना ॥ ३ ॥

अन्य इद्देवा अन्येऽप्यग्न्यादयो देवा देवस्य द्योतमानस्य सवितुः प्रयाणमनु ययुः । गच्छंति । प्राप्नुवंति । किं । महिमानं महत्त्वं । सवितुरुदयाभावेऽग्निहोत्राद्यनिष्पत्तेस्तेषां हविःस्तुत्याद्यभावात् । ओजसा बलेन च युक्ता भवंति । यः सविता पार्थिवानि रजांसि पृथिव्यादिलोकान्महित्वना स्वमहत्त्वेन विममे परिच्छिनत्ति स देव एतश एतवर्णः शुभ्रः शोभमानः सन् । राजत इति शेषः ॥ युवशा ताकृणोतनेत्यादिवदेतश इत्यादिशकारोपजनश्छांदसः ॥

॥ अथ चतुर्थी ॥

उत यासि सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि ।
उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः ॥ ४ ॥
उत । यासि । सवितरिति । त्रीणि । रोचना । उत । सूर्यस्य । रश्मिऽभिः । सं । उच्यसि ।
उत । रात्रीं । उभयतः । परि । ईयसे । उत । मित्रः । भवसि । देव । धर्मऽभिः ॥ ४ ॥

हे सवितर्देव उतापि च त्रीणि रोचना रोचमानान् द्युलोकान्यासि । गच्छसि । तिस्रो दिवः पृथिवीरित्युक्तं । उतापि च सूर्यस्य रश्मिभिः समुच्यसि । संगच्छसि ॥

उच समवाय इत्यस्येदं रूपं ॥ उदयात्पूर्वभावी सवितोदयास्तमयवर्ती सूर्य इति। उतापि च रात्रीमुभयत उभयपार्श्वे परीयसे। परिगच्छसि। उतापि च हे देव सवितस्त्वं धर्मभिर्जगद्धारकैः कर्मभिर्मित्रो भवसि। मित्राख्यो देवो भवसि। अथवा प्रकाशादिप्रदानेन सखा भवसि सर्वजगतां ॥

॥ अथ पंचमी ॥

उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः।
उतेदं विश्वं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तोममानशे ॥५॥

उत। ईशिषे। प्रऽसवस्य। त्वं। एकः। इत्। उत। पूषा। भवसि। देव। यामऽभिः।
उत। इदं। विश्वं। भुवनं। वि। राजसि। श्यावऽअश्वः। ते। सवितरिति। स्तोमं। आनशे ॥५॥

हे सवितस्त्वमेक इत् एक एव प्रसवस्य सर्वकर्मानुज्ञाकरणस्येशिषे। समर्थो भवसि। ये लौकिकं गमनादिरूपं वैदिकमग्निहोत्रादिरूपं कर्मानुतिष्ठंते तेषां सर्वेषामनुज्ञातुमेक एव प्रभवसि। उतापि च पूषा पोषको भवसि हे देव यामभिर्गमनैः। उतापि चेदं विश्वं भुवनं भूतजातं विराजसि। ईशिषे धारयितुं। यस्मादेवं महानुभावस्तस्मात् हे सवितस्ते तुभ्यं श्यावाश्व ऋषिः स्तोमं स्तोत्रमानशे। व्याप्नोति। करोतीत्येवमात्मानं परोक्षतया निर्दिशन्नाह ॥

॥ इति चतुर्थस्य चतुर्थे चतुर्विंशो वर्गः ॥

तत्सवितुरिति नवर्चं दशमं सूक्तं श्यावाश्वस्यार्षं। अत्रेयमनुक्रमणिका। तत्सवितुर्नव गायत्रमाद्यानुष्टुबिति। प्रथमानुष्टुप् शिष्टा गायत्र्यः। सावित्रं त्वित्युक्तत्वात्सावित्रं॥ अग्निष्टोमे वैश्वदेवशस्त्रस्याद्यस्तृचः प्रतिपत् अद्या नो देवेत्यनुचरः। सूचितं च। तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ। आ॰ ५.१८.। इति ॥

॥ तत्र प्रथमा ॥

तत्सवितुर्वृणीमहे वयं देवस्य भोजनं।
श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि ॥१॥

तत्। सवितुः। वृणीमहे। वयं। देवस्य। भोजनं।
श्रेष्ठं। सर्वऽधातमं। तुरं। भगस्य। धीमहि ॥१॥

तत् प्राप्यत्वेन प्रसिद्धं भोजनं भोग्यं धनं वयं स्तोतारो वृणीमहे। प्रार्थयामः।

कस्य धनं। सवितुः प्रेरकस्य देवस्य स्वभूतं। लब्धा च श्रेष्ठं प्रशस्यं सर्वधातमं। सर्वधातृतमं। सर्वभोगप्रदमित्यर्थः। तुरं शत्रूणां हिंसकं। धनेन शत्रून्हंतुं शक्यत्वात्। तादृशं धनं भगस्य भजनीयस्य सवितुरनुग्रहाद्धीमहि। धारयाम। उपभोगं करवामेत्यर्थः। अथवा धनं वृणीमहेऽर्थित्वाच्च लभेमहीति ॥

॥ अथ द्वितीया ॥

अस्य हि स्वयशस्तरं सवितुः कच्चन प्रियं। न मिनंति स्वराज्यं ॥२॥

अस्यं। हि। स्वयशःऽतरं। सवितुः। कत्। चन। प्रियं। न। मिनंति। स्वऽराज्यं ॥२॥

अस्य सवितुः स्वयशस्तरं स्वयमसाधारणं यशो यस्यातिशयेन भवति तत्तादृशं प्रियं सर्वेषां प्रियभूतं स्वराज्यं स्वयमेव राजमानत्वमैश्वर्यं कच्चन केचिदप्यसुरादयो न मिनंति। न हिंसंति ॥

॥ अथ तृतीया ॥

स हि रत्नानि दाशुषे सुवाति सविता भगः। तं भागं चित्रमीमहे ॥३॥

सः। हि। रत्नानि। दाशुषे। सुवाति। सविता। भगः। तं। भागं। चित्रं। ईमहे ॥३॥

स हि स खलु सविता भगो भजनीयो देवो दाशुषे हविर्दात्रे मह्यं रत्नानि रमणीयानि धनानि सुवाति। प्रेरयति। प्रयच्छति। तं देवं भागं भजनीयं चित्रं चायनीयं धनमीमहे। याचामहे ॥

अद्या न इति चतुर्थीपंचमीभ्याममनोज्ञस्वप्नदर्शने प्रत्यृचं जुहुयात्। अद्या नो देव सवितरिति द्वाभ्यां। गृ० सू० ३. ६.। इति हि सूचितं ॥

॥ अथ चतुर्थी ॥

अद्या नो देव सवितः प्रजावत्सावीः सौभगं। परा दुःष्वप्न्यं सुव ॥४॥

अद्य। नः। देव। सवितरिति। प्रजाऽवत्। सावीः। सौभगं। परा। दुःऽस्वप्न्यं। सुव ॥४॥

हे सवितर्देव नोऽस्मभ्यमद्यास्मिन्यागदिने प्रजावत्पुत्राद्युपेतं सौभगं धनं सावीः। प्रेरय। दुःष्वप्न्यं दुःस्वप्नं दुःस्वप्नवदुःखकरं दारिद्र्यं परासुव। दूरे प्रेरय ॥

॥ अथ पंचमी ॥

विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न आ सुव ॥५॥

विश्वानि। देव। सवितः। दुःऽइतानि। परा। सुव। यत्। भद्रं। तत्। नः। आ। सुव ॥५॥

हे सवितर्देव त्वं विश्वानि दुरितानि परासुव । यद्भद्रं प्रजापशुगृहादिकं तन्नोऽस्मभ्यमासुव । अस्मदभिमुखं प्रेरय । प्रजा वै भद्रं पशवो भद्रं गृहं भद्रमिति हि श्रुतिः ॥

॥ इति चतुर्थस्य चतुर्थे पंचविंशो वर्गः ॥

॥ अथ षष्ठी ॥

अनागसो अदितये देवस्य सवितुः सवे । विश्वा वामानि धीमहि ॥६॥

अनागसः । अदितये । देवस्य । सवितुः । सवे । विश्वा । वामानि । धीमहि ॥६॥

वयमनुष्ठातारः सवितुः प्रेरकस्य देवस्य सवेऽनुज्ञायां सत्यामदितयेऽखंडनीयायै देव्यै भूम्या अनागसः स्याम । अनपराधिनो भवेम । भूम्यां हि पापाः संभवंति । अपगतेष्वागःसु विश्वा सर्वाणि वामानि वननीयानि धनानि धीमहि । धारयाम ॥

चातुर्मास्येषु वैश्वदेवे पर्वणि सावित्रस्य द्वादशकपालस्या विश्वदेवमित्यनुवाक्या । सूचितं च । आ विश्वदेवं सत्पतिं वाममद्य सवितः । आ० २.१६. । इति ॥ प्रायणीय एषैव सवितुरनुवाक्या । सूचितं च । आ विश्वदेवं सत्पतिं य इमा विश्वा जातानि । आ० ४.३. । इति ॥ देवसुवां हविःष्वेषैव सवितुरनुवाक्या । सूचितं च । आ विश्वदेवं सत्पतिं न प्रमिये सवितुर्दैव्यस्य तत् । आ० ४.११. । इति ॥

॥ सैषा सप्तमी ॥

आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणीमहे । सत्यसवं सवितारं ॥७॥

आ । विश्वऽदेवं । सत्ऽपतिं । सुऽउक्तैः । अद्य । वृणीमहे । सत्यऽसवं । सवितारं ॥७॥

विश्वदेवं । विश्वे देवा यस्य वशे भवंति तं तादृशं । तं हि सर्वात्मत्वादिंद्रं मित्रं वरुणमग्निमाहुरित्यादिश्रुतेरितरेषां तद्विभूतित्वात् । सत्पतिं सतामनुष्ठातॄणां पालकं सत्यसवं सत्यानुज्ञं सवितारं देवमद्यास्मिन्यागदिने सूक्तैरावृणीमहे । संभजामहे ॥

॥ अथाष्टमी ॥

य इमे उभे अहनी पुर एत्यप्रयुच्छन् । स्वाधीर्देवः सविता ॥८॥

यः । इमे इति । उभे इति । अहनी इति । पुरः । एति । अप्रऽयुच्छन् । सुऽआधीः । देवः । सविता ॥८॥

यः सविता देवः स्वाधीः शोभनाध्यानः सुकर्मा वा सन् इमे अहनी राव्यहनी तयोः पुरः पुरस्तादप्रयुच्छन् अप्रमाद्यन्नेति गच्छति तमावृणीमह इति संबंधः ॥

प्रायणीये य इमा विश्वेति सवितुर्याज्या। सूचितं च। य इमा विश्वा जातानि सुत्रामाणं पृथिवीं द्यामनेहसं। आ॰ ४.३.। इति ॥ अश्वमेधेऽश्वमुत्सृज्यानु सवनं सावित्रीष्टिः कार्या। तस्यामेषा माध्यंदिने सवनेऽनुवाक्या। सूचितं च। य इमा विश्वा जातान्या देवो यातु सविता सुरत्नः। आ॰ १०.६.। इति ॥

॥ सैषा नवमी ॥

य इमा विश्वा जातान्याश्रावयति श्लोकेन। प्र च सुवाति सविता ॥९॥

यः। इमा। विश्वा। जातानि। आऽश्रवयति। श्लोकेन। प्र। च। सुवाति। सविता ॥९॥

यो देव इमेमानि विश्वा सर्वाणि जातान्युत्पन्नान् प्राणिनः। जंगमानित्यर्थः। तान् श्लोकेन यशसाश्रावयति। सर्वेऽप्यस्य स्तुतिं शृण्वंतीत्यर्थः। अथवा गर्जनशब्देन सर्वाणीमान्युत्पन्नान्याश्रावयति वृष्ट्युन्मुखः सन्। किंच सविता प्रसुवाति च प्रेरयति तं वृणीमह इत्यर्थः ॥

॥ इति चतुर्थस्य चतुर्थे षड्विंशो वर्गः ॥

अच्छा वदेति दशर्चमेकादशं सूक्तं भौमस्यात्रेरार्षं। अत्रेयमनुक्रमणिका। अच्छा दशात्रिः पार्जन्यमुपाद्यास्तिस्रो जगत्य उपांत्यानुष्टुबिति। यत्पर्जन्येत्येषा नवम्यनुष्टुप् वि वृक्षानित्याद्यास्तिस्रो जगत्यः शिष्टाः षट् त्रिष्टुभः। पर्जन्यो देवता ॥ अनेन सूक्तेन प्रत्यृचं वा दिश उपस्थेयाः। सूचितं च। संस्थितायां सर्वा दिश उपतिष्ठेताच्छा वद तवसं गीर्भिराभिरिति चतसृभिः प्रत्यृचं सूक्तेन वा। आ॰ २.१३.। इति ॥

॥ तत्र प्रथमा ॥

अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास।
कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधीषु गर्भं ॥१॥

अच्छ। वद। तवसं। गीःऽभिः। आभिः। स्तुहि। पर्जन्यं। नमसा। आ। विवास।
कनिक्रदत्। वृषभः। जीरऽदानुः। रेतः। दधाति। ओषधीषु। गर्भं ॥१॥

हे स्तोतस्तवसं बलवंतं पर्जन्यमच्छाभिप्राप्य वद। प्रार्थय ॥ पर्जन्यशब्दो यास्केन बहुधा निरुक्तः। पर्जन्यस्तृपेराद्यंतविपरीतस्य तर्पयिता जन्यः परो जेता

वा जनयिता वा प्रार्जयिता वा रसानां । नि० १०.१०. । इति ॥ आभिर्गीर्भिः स्तुतिवाग्भिः स्तुहि । नमसान्नेन हविर्लक्षणेनाविवास । सर्वतः परिचर । यः पर्जन्यो वृषभोऽपां वर्षिता जीरदानुः क्षिप्रदानः कनिक्रदत् गर्जनशब्दं कुर्वन्नोषधीषु गर्भे गर्भस्थानीयं रेत उदकं दधाति स्थापयति तं स्तुहि ॥

॥ अथ द्वितीया ॥

वि वृक्षान् हंत्युत हंति रक्षसो विश्वं बिभाय भुवनं महावधात् ।
उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन् हंति दुष्कृतः ॥ २ ॥

वि । वृक्षान् । हंति । उत । हंति । रक्षसः । विश्वं । बिभाय । भुवनं । महाऽवधात् ।
उत । अनागाः । ईषते । वृष्ण्यऽवतः । यत् । पर्जन्यः । स्तनयन् । हंति । दुःऽकृतः ॥ २ ॥

अयं मंत्रो निरुक्ते स्पष्टं व्याख्यातः । तदेवात्र लिख्यते । पर्जन्यो विहंति वृक्षान्विहंति च रक्षांसि सर्वाणि चास्माद्भूतानि बिभ्यति महावधात् महान् ह्यस्य वधः । अप्यनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन्हंति दुष्कृतः पापकृतः । नि० १०.११. । इति ॥

॥ अथ तृतीया ॥

रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्याँ३ अह ।
दूरात्सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं१ नभः ॥ ३ ॥

रथीऽइव । कशया । अश्वान् । अभिऽक्षिपन् । आविः । दूतान् । कृणुते । वर्ष्यान् । अह ।
दूरात् । सिंहस्य । स्तनथाः । उत् । ईरते । यत् । पर्जन्यः । कृणुते । वर्ष्यं । नभः ॥ ३ ॥

रथीव रथस्वामीव । स यथा कशयाश्वानभिक्षिपन् दूतान् भटानाविष्करोति तद्वदसौ पर्जन्योऽपि कशयाश्वान्मेघानभिक्षिपन् अभिप्रेरयन् वर्ष्यान् वर्षकान् दूतान् दूतवद्वृष्टिप्रेरकान्मेघान् मरुतो वाविष्कृणुते । प्रकटयति । अहेति पूरणः । एवं सति सिंहस्य ॥ सहतेर्हिंसतेर्वा शब्दकर्मणः सिंहशब्दः ॥ अवर्षणेनाभिभवितुः शब्दयितुर्वा मेघस्य स्तनथा गर्जनशब्दा दूरादुदीरते । उद्गच्छंति । कदा । यद्यदा पर्जन्यो नभोऽतरिक्षं वर्ष्यं वर्षोपेतं कृणुते करोति तदा ॥

प्र वाता इति चतुर्थी पर्जन्यस्य चरोर्याज्या । सूत्रितं च । प्र वाता वांति पतयंति विद्युत इत्यग्न्याधेयप्रभृतीनि । आ० २.१५. । इति ॥ तत्पाठस्तु ॥

प्र वाता वांति पतयंति विद्युत उदोषधीर्जिहते पिन्वते स्वः ।
इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥४॥
प्र। वाताः। वांति। पतयंति। विऽद्युतः। उत्। ओषधीः। जिहते। पिन्वते। स्वरिति स्वः।
इरा। विश्वस्मै। भुवनाय। जायते। यत्। पर्जन्यः। पृथिवीं। रेतसा। अवति ॥४॥

प्र वांति वाता वृष्ट्यर्थं। पतयंति गच्छंति समंतात्संचरंति विद्युतः। ओषधीरोषधय उज्जिहते। उद्गच्छंति। प्रवर्धंते। स्वरंतरिक्षं पिन्वते। क्षरति। इरा भूमिर्विश्वस्मै सर्वस्मै भुवनाय सर्वजगद्धिताय जायते। समर्था भवति। कदैवमिति। यद्यदा पर्जन्यो देवः पृथिवीं रेतसोदकेनावति रक्षति अभिगच्छति वा तदैवं भवति ॥

॥ अथ पंचमी ॥

यस्य व्रते पृथिवी नंनमीति यस्य व्रते शफवज्जर्भुरीति ।
यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥५॥
यस्य। व्रते। पृथिवी। नंनमीति। यस्य। व्रते। शफऽवत्। जर्भुरीति।
यस्य। व्रते। ओषधीः। विश्वऽरूपाः। सः। नः। पर्जन्य। महि। शर्म। यच्छ ॥५॥

यस्य पर्जन्यस्य व्रते कर्मणि पृथिवी नंनमीति अत्यर्थं नमति सर्वेषामधो भवति। यस्य व्रते शफवत् पादोपेतं गवादिकं जर्भुरीति भ्रियते पूर्यते गच्छतीति वा। यस्य व्रते कर्मण्योषधीरषध्यो विश्वरूपा नानारूपा भवंति हे पर्जन्य स महांस्त्वं नोऽस्मभ्यं महि शर्म महत् सुखं यच्छ। प्रयच्छ ॥

॥ इति चतुर्थस्य चतुर्थे सप्तविंशो वर्गः ॥

॥ अथ षष्ठी ॥

दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिंचन्नसुरः पिता नः ॥६॥
दिवः। नः। वृष्टिं। मरुतः। ररीध्वं। प्र। पिन्वत। वृष्णः। अश्वस्य। धाराः।
अर्वाङ्। एतेन। स्तनयित्नुना। आ। इहि। अपः। निऽसिंचन्। असुरः। पिता। नः ॥६॥

हे मरुतो यूयं दिवोऽतरिक्षसकाशात् नोऽस्मदर्थं वृष्टिं ररीध्वं। दत्त। वृष्णो

वर्षकस्याश्वस्य व्यापकस्य मेघस्य संबंधिन्यो धारा उदकधारा प्रपिन्वत । प्रक्षरत । हे पर्जन्य त्वमेतेन स्तनयित्नुना गर्जता मेघेन सहार्वाङ् अस्मदभिमुखमेहि । आगच्छ । किं कुर्वन् । अपोऽभांसि निषिंचन् स देवोऽसुर उदकानां निरसितापि सन् नोऽस्माकं पिता पालकश्च ॥

॥ अथ सप्तमी ॥

अभि क्रंद स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।
दृतिं सु कर्ष विषितं न्यंचं समा भवंतूद्वतो निपादाः ॥७॥

अभि । क्रंद । स्तनय । गर्भं । आ । धाः । उदन्ऽवता । परि । दीय । रथेन ।
दृतिं । सु । कर्ष । विऽसितं । न्यंचं । समाः । भवंतु । उत्ऽवतः । निऽपादाः ॥७॥

अभि भूम्यभिमुखं क्रंद । शब्दय । तदेव पुनरुच्यते दार्ढ्याय । स्तनय । गर्ज । गर्भं गर्भस्थानीयमुदकमोषधीष्वाधाः । आधेहि । तदर्थमुदन्वतोदकवता रथेन परि दीय । परितो गच्छ । दृतिं दृतिवदुदकधारकं मेघं विषितं विशेषेण सितं बद्धं न्यंचं न्यक् अधोमुखं सु सुष्ठु कर्ष । आकर्ष वृष्ट्यर्थं । यद्वा विषितं विमुक्तबंधनमेवं कर्ष । एवं कृत उद्वत ऊर्ध्ववंत उन्नतप्रदेशा निपादा न्यग्भूतपादा निकृष्टपादा वा निम्नोन्नतप्रदेशाः समा एकरूपा भवंतु । उदकपूर्णा भवंत्वित्यर्थः ॥

॥ अथाष्टमी ॥

महांतं कोशमुदचा नि षिंच स्यंदंतां कुल्या विषिताः पुरस्तात् ।
घृतेन द्यावापृथिवी व्युंधि सुप्रपाणं भवत्वघ्न्याभ्यः ॥८॥

महांतं । कोशं । उत् । अच । नि । सिंच । स्यंदंतां । कुल्याः । विऽसिताः । पुरस्तात् ।
घृतेन । द्यावापृथिवी इति । वि । उंधि । सुऽप्रपानं । भवतु । अघ्न्याभ्यः ॥८॥

हे पर्जन्य त्वं महांतं प्रवृद्धं कोशं कोशस्थानीयं मेघमुत्कृष्टमुदच । उद्गच्छ । उद्गमय वा । तथा कृत्वा निषिंच । नीचैः क्षारय । कुल्या नद्यो विषिता विप्रमुक्ताः सत्यः स्यंदंतां प्रवहंतु पुरस्तात् पूर्वाभिमुखं । प्रायेण नद्यः प्राच्यः स्यंदंते । घृतेनोदकेन द्यावापृथिवी दिवं च पृथिवीं च व्युंधि । क्लेदयात्यधिकं । अघ्न्याभ्यो गोभ्यः सुप्रपाणं सुष्ठु प्रकर्षेण पातव्यमुदकं भवतु ॥

॥ अथ नवमी ॥

यत्पर्जन्य कनिक्रदत्स्तनयन् हंसि दुष्कृतः ।
प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि ॥९॥

यत् । पर्जन्य । कनिक्रदत् । स्तनयन् । हंसि । दुःऽकृतः ।
प्रति । इदं । विश्वं । मोदते । यत् । किं । च । पृथिव्यां । अधि ॥९॥

हे पर्जन्य यद्यदा त्वं कनिक्रदद्त्यर्थं शब्दयन् स्तनयन् दुष्कृतः पापकृतो मेघान् हंसि विदारयसि तदानीमिदं विश्वं जगत् प्रतिमोदते। विश्वं विशेष्यते। यत्किंच पृथिव्यामधि भूम्यामधिष्ठितं यच्चराचरात्मकं तदिदं विश्वं मोदते । हृष्यति । वृष्टेः सर्वजगत्प्रीतिकारणत्वं प्रसिद्धं ॥

॥ अथ दशमी ॥

अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उं ।
अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषां ॥१०॥

अवर्षीः। वर्षं। उत्। ऊं इति। सु। गृभाय। अकः। धन्वानि। अतिऽएतवै। ऊं इति।
अजीजनः। ओषधीः। भोजनाय। कं। उत। प्रऽजाभ्यः। अविदः। मनीषां ॥१०॥

इयमतिवृष्टिविमोचनी॥ हे पर्जन्य त्वमवर्षीः। वृष्टवानसि। वर्षमुदु षू गृभाय। उत्कृष्टं सु सुष्ठु गृभाय । गृहाण । परिहरेत्यर्थः । धन्वानि निरुदकप्रदेशानकः । जलवतः कृतवानसि। किमर्थं। अत्येतवा उ। अतिक्रम्य गंतुं। ओषधीरजीजनः। उत्पादयः । किमर्थः । भोजनाय धनाय भोगाय वा । कमित्ययं शिशिरं जीवनाय कं। नि० १.१०.। इतिवत्पादपूरणः। उतापि च प्रजाभ्यः सकाशात् मनीषां स्तुतिमविदः । प्राप्तवानसि ॥

॥ इति चतुर्थस्य चतुर्थेऽष्टाविंशो वर्गः ॥

बळित्थेति तृचात्मकं द्वादशं सूक्तं भौमस्यात्रेरार्षं पृथिवीदेवताकमानुष्टुभं । अनुक्रांतं च। बळित्था तृचं पार्थिवमानुष्टुभमिति॥ सूक्तविनियोगो लैंगिकः। आद्या देवानां हविःषु पृथिव्या अनुवाक्या । बळित्था पर्वतानां हळ्हा चिद्या वनस्पतीन् । आ० ६.१४.। इति हि सूचितं ॥ भूमिस्तोमे चैषा मरुत्वतीयशस्त्रे सूक्तमुखीया । आ० ९.५.॥

॥ सैषा प्रथमा ॥

बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि ।

प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥१॥

बट् । इत्था । पर्वतानां । खिद्रं । बिभर्षि । पृथिवि ।

प्र । या । भूमिं । प्रवत्वति । मह्ना । जिनोषि । महिनि ॥१॥

द्विरूपा पृथिवी चैषा प्रत्यक्षदेवतापि च । मध्यस्थाना देवतोक्ता साच संबोध्य वर्ण्यते ॥ हे पृथिवि प्रथनवति मध्यस्थानदेवते । त्वमित्थेत्थममुत्रांतरिक्षे वा बट् सत्यं पर्वतानां मेघानां वा खिद्रं खेदनं भेदनं बिभर्षि । धारयसि । हे महिनि महति हे प्रवत्वति प्रकर्षवति प्रवणोदकवति वा या त्वं भूमिं प्रत्यक्षां पृथिवीं मह्ना महत्त्वेन महतोदकेन वा प्रजिनोषि प्रकर्षेण प्रीणयसि ॥

॥ अथ द्वितीया ॥

स्तोमासस्त्वा विचारिणि प्रति ष्टोभंत्यक्तुभिः ।

प्र या वाजं न हेषंतं पेरुमस्यस्यर्जुनि ॥२॥

स्तोमासः । त्वा । विऽचारिणि । प्रति । स्तोभंति । अक्तुऽभिः ।

प्र । या । वाजं । न । हेषंतं । पेरुं । अस्यसि । अर्जुनि ॥२॥

हे विचारिणि विविधंचरणशीले पृथिवि देवि त्वां स्तोमासः स्तोतारोऽक्तुभिर्गमनशीलैः स्तोत्रैः प्रतिष्टोभंति । अभिष्टुवंति । किंच या त्वं हेषंतं शब्दयंतं वाजं न अश्वमिवोद्वृत्तं पेरुं पूरकं मेघं प्रास्यसि प्रक्षिपसि हे अर्जुनि शुभ्रवर्णे गमनशीले वा ॥

देवानां हविःषु दृळ्हा चिदिति पृथिव्या याज्या । एषैव भूमिस्तोमे निष्केवल्ये सूक्तमुखीया । सूत्रं तु पूर्वमेवोदाहृतं ॥

॥ सैषा तृतीया ॥

दृळ्हा चिद्या वनस्पतीन्क्ष्मया दर्धर्ष्योजसा ।

यत्ते अभ्रस्य विद्युतो दिवो वर्षंति वृष्टयः ॥३॥

दृळ्हा । चित् । या । वनस्पतीन् । क्ष्मया । दर्धर्षि । ओजसा ।

यत् । ते । अभ्रस्य । विऽद्युतः । दिवः । वर्षंति । वृष्टयः ॥३॥

हे पृथिवि या त्वं दृळ्हा चित् ॥ सुपां सुलुगिति तृतीयाया आकारः ॥ दृढया क्ष्मया भूम्या सह वनस्पतीन् वृक्षानोजसा बलेन दर्धर्षि धारयसि। अथवा दृढेति विधेयविशेषणं। वनस्पतीन् दृढान् कृत्वा धारयसीत्यर्थः। यद्यस्यास्ते तव संबंधिनो वृष्टयो वर्षका मेघा विद्युतो विद्योतमानादभ्रस्य ॥ पंचम्यर्थे षष्ठी ॥ अभ्रादपां हर्तुर्दिवोऽंतरिक्षादादित्याद्वा वर्षंति। अथवा यद्यस्यास्ते तवाभ्रस्य मेघस्य वृष्टय उदकसंघाता विद्युतो विद्योतमानाया दिवः सकाशाद्वर्षंति पतंति ॥

॥ इति चतुर्थस्य चतुर्थे एकोनत्रिंशो वर्गः ॥

प्र सम्राज इत्यष्टर्चं त्रयोदशं सूक्तमात्रेयं त्रैष्टुभं वारुणं। अनुक्रम्यते च। प्र सम्राजेऽष्टौ वारुणमिति। विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय।
वि यो जघान शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय ॥१॥

प्र। सम्ऽराजे। बृहत्। अर्च। गभीरं। ब्रह्म। प्रियं। वरुणाय। श्रुताय।
वि। यः। जघान। शमिताऽइव। चर्म। उपऽस्तिरे। पृथिवीं। सूर्याय ॥१॥

अत्रिः स्वात्मानं संबोध्य ब्रवीति। हे अत्रे त्वं सम्राजे सम्यग्राजमानायेश्वराय श्रुताय सर्वत्र श्रूयमाणाय वरुणायोपद्रवस्य निवारकाय जनानामावरकायैतन्नामकाय देवाय बृहत् प्रभूतं गभीरं दुरवगाहं बह्वर्थोपेतं प्रियं प्रियभूतं ब्रह्म स्तोत्ररूपं कर्म प्रार्च। प्रार्चय। प्रोच्चारयेत्यर्थः। यो वरुणः शमितेव चर्म शमिता पशुविशसनकर्ता यथोपस्तरणाय चर्म हंति तद्वत्पृथिवीं विस्तीर्णमंतरिक्षं ॥ तृतीयस्यां पृथिव्यामिति श्रुतेरंतरिक्षस्यापि पृथिवीशब्दवाच्यत्वं ॥ सूर्याय सूर्यस्योपस्तिर आस्तरणाय विजघान विस्तारयामास। विस्तृतं हि व्यवहारयोग्यं भवति तस्माद्व्यवहारायांतरिक्षं विस्तारितवान्। उरुं हि राजा वरुणश्चकार। ऋग्वे॰ १. २४. ८.। इति ह्युक्तं ॥

॥ अथ द्वितीया ॥

वनेषु व्यं१तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु।
हृत्सु क्रतुं वरुणो अप्स्व१ग्निं दिवि सूर्यमदधात्सोममद्रौ ॥२॥

वनेषु । वि । अंतरिक्षं । ततान । वाजं । अर्वत्ऽसु । पयः । उस्रियासु ।
हृत्ऽसु । क्रतुं । वरुणः । अप्ऽसु । अग्निं । दिवि । सूर्यं । अदधात् । सोमं । अद्रौ ॥२॥

अयं वरुणो वनेषु वृक्षाग्रेष्वंतरिक्षं विततान । विस्तारितवान् । तथा वाजसनेयकं । वनेषु हीदमेषु वृक्षाग्रेष्वंतरिक्षं विततं तस्मादाह वनेषु व्यंतरिक्षं ततानेति । वाजं बलमर्वत्स्वश्वेषु विततान । पयः क्षीरमुस्रियासु गोषु । उस्रियेति गोनाम । उत्स्राविणोऽस्यां भोगा इति तद्व्युत्पत्तिः । हृत्सु हृदयेषु क्रतुं कर्मसंकल्पं । यद्धि मनसा ध्याययति तत्कर्मणा करोति । अप्सूदकेष्वग्निं वैद्युतमौर्वं वा सर्वत्र वितताननेति संबंधः । किंच दिवि द्युलोके सूर्यमदधात् । स्थापितवान् । सोमं चाद्रौ पर्वतेऽदधात् ॥

॥ अथ तृतीया ॥

नीचीनबारं वरुणः कवंधं प्र ससर्ज रोदसी अंतरिक्षं ।
तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम ॥३॥
नीचीनऽबारं । वरुणः । कवंधं । प्र । ससर्ज । रोदसी इति । अंतरिक्षं ।
तेन । विश्वस्य । भुवनस्य । राजा । यवं । न । वृष्टिः । वि । उनत्ति । भूम ॥३॥

नीचीनबारमधोमुखबिलं प्रससर्ज । कृतवान् । कं । कवंधं । कवनमुदकं । तद्धीयतेऽत्रेति कवंधो मेघः । तं तथाकरोत् । अथवा कवंधमुदकं । तदुदकं नीचीनबारं नीचीननिर्गमनबिलं चकार । मेघं विदार्योदकमधोमुखं चकारेत्यर्थः । किं प्रतीत्युच्यते । रोदसी द्यावापृथिव्यावंतरिक्षं च प्रति । लोकत्रयहितायेत्यर्थः । तेनोदकेन विश्वस्य सर्वस्य भुवनस्य भूतजातस्य राजा स्वामी वरुणो भूम भूमिं व्युनत्ति । क्लेदयति । वृष्टिः सेक्ता पुमान्यवं न यवमिव यवान्यथा प्ररोहाय सर्वत्र प्रसारयति तद्वद्भूमिं सर्वत्रोनत्ति । अथवा वृष्टिर्वरुण इति संबंधः । वर्षकः पर्जन्य इत्यर्थः । अस्मिन्पक्षे यवं पुरुष इवेति पुरुषशब्दोऽध्याहार्यः । अत्र नीचीनबारं वरुणः कवंधं । नि० १०.४. । इत्यादिनिरुक्तं द्रष्टव्यं ॥

॥ अथ चतुर्थी ॥

उनत्ति भूमिं पृथिवीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित् ।
समभ्रेण वसत पर्वतासस्तविषीयंतः श्रथयंत वीराः ॥४॥

उनत्ति । भूमिं । पृथिवीं । उत । द्यां । यदा । दुग्धं । वरुणः । वष्टि । आत् । इत् ।
सं । अभ्रेण । वसत । पर्वतासः । तविषीऽयंतः । श्रथयंत । वीराः ॥४॥

वरुणो भूमिं पृथिवीं प्रथितमंतरिक्षं । अंतरिक्षस्यापि पृथिवीशब्दवाच्यत्वं पूर्वमुक्तं । उतापि च द्यां द्युलोकमुनत्ति । क्लेदयति । यदायं दुग्धमुदकपूरणं वष्टि कामयते । अथवा दुग्धमुदकं । तेन तत्कार्यमोषध्यादिकं लक्ष्यते । ओषध्यादयः प्रवर्धंतामिति यदा कामयते आदिदनंतरमेव संवसत । समाच्छादयंति । के । पर्वतासः पर्ववंतोऽद्रयः । केन । अभ्रेण मेघेन । किंच तविषीयंतो बलमिच्छंतो वीरा विशेषेण वृष्टेः प्रेरयितारो मरुतः श्रथयंत । श्रथयंति मेघान् ॥

॥ अथ पंचमी ॥

इमामू ष्वासुरस्य श्रुतस्य महीं मायां वरुणस्य प्र वोचं ।
मानेनेव तस्थिवाँ अंतरिक्षे वि यो ममे पृथिवीं सूर्येण ॥५॥

इमां । ऊं इति । सु । आसुरस्य । श्रुतस्य । महीं । मायां । वरुणस्य । प्र । वोचं ।
मानेनऽइव । तस्थिऽवान् । अंतरिक्षे । वि । यः । ममे । पृथिवीं । सूर्येण ॥५॥

आसुरस्यासुरसंबंधिनः । असुराणामस्य च बध्यघातकभावः संबंधः । असुरहंतुरित्यर्थः । अथवासुरो मेघः । प्राणदानात्तत्संबंधिनः श्रुतस्य विश्रुतस्य महीं महतीमिमां मायां प्रज्ञां प्रवोचं । प्रब्रवीमि । कैषा मायेति सोच्यते । यो वरुणोऽंतरिक्षे तस्थिवान् तिष्ठन्मानेनेव दंडेनेव सूर्येण पृथिवीमंतरिक्षं विममे परिच्छिनत्ति तस्यैषा माया ॥

॥ इति चतुर्थस्य चतुर्थे त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

इमामू नु कवितमस्य मायां महीं देवस्य नकिरा दधर्ष ।
एकं यदुद्ना न पृणंत्येनीरासिंचंतीरवनयः समुद्रं ॥६॥

इमां । ऊं इति । नु । कविऽतमस्य । मायां । महीं । देवस्य । नकिः । आ । दधर्ष ।
एकं । यत् । उद्ना । न । पृणंति । एनीः । आऽसिंचंतीः । अवनयः । समुद्रं ॥६॥

कवितमस्य प्रकृष्टप्रज्ञस्य देवस्य द्योतमानस्य स्तुत्यस्य वा वरुणस्येमां सर्वप्र-

सिद्धां महीं महतीं मायां प्रज्ञां नकिर्नैवादधर्षे। न हिनस्ति कश्चिदपि। ऊ न्विति पूरणौ। यद्यस्मादेकं समुद्रमुद्गोदकेन न पृणंति न पूरयंति। काः। एनीरेन्यः शुभ्रा गमनशीला वासिंचंतीरुदकमासेचयंत्योऽवनयो नद्यः। बह्व्यो नद्यः सर्वदोदकेन पूरयंत्योऽपि नैकमपि समुद्रं पूरयंतीति। इदं वरुणस्य महत्कर्मेति। अत्रांतरिक्षविस्तारादिसमुद्रापूरणपर्यंतं कर्म परमेश्वरस्यैवोचितं न वरुणस्येति न वाच्यं तस्य वरुणादिरूपावस्थानात्। एष ब्रह्मेत्यादि श्रुतेः॥

॥ अथ सप्तमी ॥

अर्यम्यं वरुण मित्र्यं वा सखायं वा सदमिद्भ्रातरं वा।
वेशं वा नित्यं वरुणारणं वा यत्सीमागश्चकृमा शिश्रथस्तत् ॥७॥
अर्यम्यं। वरुण। मित्र्यं। वा। सखायं। वा। सदं। इत्। भ्रातरं। वा।
वेशं। वा। नित्यं। वरुण। अरणं। वा। यत्। सीं। आगः। चकृम। शिश्रथः। तत् ॥७॥

हे वरुण अर्यम्यं। अर्यमैवार्यम्यः॥ स्वार्थिको यत्। अर्तेरिदं रूपं॥ प्रदातारमित्यर्थः। अथवेरणान्मननाच्च शास्तीत्यर्यमा गुरुः। तं। वा अथवा मित्र्यं॥ ञिमिदा स्नेहन इत्यस्मान्मित्रं। स्वार्थिको यत्॥ अनुरक्तमित्यर्थः। वा अथवा सखायं समानख्यानं सदमित्सर्वदैव भ्रातरं वा। नित्यं निरंतरं वेशं निकटनिकेतनवर्तिनं वा। अरणं वा। अशब्दमित्यर्थः। अथवारणमदातारं वा नित्यं निरंतरं। एतान्प्रति यत्सीं यदेतदागोऽपराधं चकृम तच्छिश्रथः। अस्मत्तो विनाशय॥

॥ अथाष्टमी ॥

कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म।
सर्वा ता वि ष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ॥८॥
कितवासः। यत्। रिरिपुः। न। दीवि। यत्। वा। घ। सत्यं। उत। यत्। न। विद्म।
सर्वा। ता। वि। स्य। शिथिराऽइव। देव। अध। ते। स्याम। वरुण। प्रियासः ॥८॥

कितवासः कितवा द्यूतकृतः। किं तवास्ति सर्वं मया जितमिति वदतीति कितवः। न दीवि न देवने द्यूते यथा यद्रिरिपुर्लेपयंति पापमारोपयंति यदस्मासु द्वेष्टारो मयि त्वमेतत्पापमकरोरित्याक्षिपंति॥ अत्र पुरस्तादुपचारोऽपि नकार उपमार्थीयः॥ वा अथवा। घेति पूरणः। यत्पापं सत्यमारोपमंतरेण

कृतवंतः स्मः । उतापि च यत्कृतं पापं न विद्म न जानीमः ता तानि सर्वा सर्वाणि शिथिरेव शिथिलानीव शिथिलबंधनानि फलानीव विष्य । विमोचय ॥ स्यतिरुपसृष्टो विमोचने ॥ हे देव अधानंतरं ते तव प्रियासः प्रियाः स्याम । भवेम ॥

॥ इति चतुर्थस्य चतुर्थ एकत्रिंशो वर्गः ॥

इंद्राग्नी यमिति षड्टचं चतुर्दशं सूक्तमत्रेरार्षमानुष्टुभमैंद्राग्नं । षष्ठी विराट्पूर्वा । आद्यौ दशकावष्टकास्त्रय इति परिभाषितत्वात् । तथा चानुक्रांतं । इंद्राग्नी षळैंद्राग्नमानुष्टुभं विराट्पूर्वांतमिति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

इंद्राग्नी यमवथ उभा वाजेषु मर्त्यं ।

हळ्हा चित्स प्र भेदति द्युम्ना वाणीरिव त्रितः ॥ १ ॥

इंद्राग्नी इति । यं । अवथः । उभा । वाजेषु । मर्त्यं ।

हळ्हा । चित् । सः । प्र । भेदति । द्युम्ना । वाणीःऽइव । त्रितः ॥ १ ॥

हे इंद्राग्नी उभोभौ परस्परावियुक्तौ युवां यं मर्त्यमवथो रक्षथो वाजेषु संग्रामेषु स मर्त्यो हळ्हा चित् दृढान्यपि द्युम्ना द्योतमानानि धनानि शत्रुसंबंधीनि भेदति । भिनत्ति । त्रित ऋषिर्वाणीरिव प्रतिवादिवाक्यानीव । अथवा त्रिषु स्थानेषु वर्तमानोऽग्निः शत्रूणां वाक्यानीव ॥

॥ अथ द्वितीया ॥

या पृतनासु दुष्टरा या वाजेषु श्रवाय्या ।

या पंच चर्षणीरभीद्राग्नी ता हवामहे ॥ २ ॥

या । पृतनासु । दुस्तरा । या । वाजेषु । श्रवाय्या ।

या । पंच । चर्षणीः । अभि । इंद्राग्नी इति । ता । हवामहे ॥ २ ॥

या याविंद्राग्नी पृतनासु दुष्टरा दुष्टरावनभिभाव्यौ । या यौ च वाजेषु संग्रामेष्वन्नेषु वा श्रवाय्या श्रवाय्यौ स्तुत्यौ । या यौ पंच चर्षणीः । चर्षणयो मनुष्याः । तानभि । रक्षत इति शेषः । ता तौ महानुभावौ हवामहे । स्तुमः ॥

॥ अथ तृतीया ॥

तयोरिदमवच्छवस्तिग्मा दिद्युन्मघोनोः ।

प्रति द्रुणा गभस्त्योर्गवां वृत्रघ्न एषते ॥३॥

तयोः । इत् । अमऽवत् । शवः । तिग्मा । दिद्युत् । मघोनोः ।

प्रति । द्रुणा । गभस्त्योः । गवां । वृत्रऽघ्ने । आ । ईषते ॥३॥

अमवदभिभावुकं शवो बलं तयोरित् तयोरेव । मघोनोर्मघवतोरन्नवतोर्धनवतोर्वा तयोर्दिद्युत् वज्रं तिग्मा तीक्ष्णं वर्तते गभस्त्योर्हस्तयोः । एवंभूतौ देवौ गवामुदकानां पणिभिरपहृतानां वा गवां लाभाय द्रुणा द्रुविकारेण गमनशीलेन वैकेन रथेन वृत्रघ्न आवरकमेघहननाय तथाविधवृत्रासुरवधाय वा प्रतीषते । प्रतिगच्छतः ॥

॥ अथ चतुर्थी ॥

ता वामेषे रथानामिंद्राग्नी हवामहे ।

पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा ॥४॥

ता । वां । एषे । रथानां । इंद्राग्नी इति । हवामहे ।

पती इति । तुरस्य । राधसः । विद्वांसा । गिर्वणःऽतमा ॥४॥

हे देवौ ता तौ वक्ष्यमाणगुणौ वां युवां हवामहे । स्तुमः । किमर्थं । रथानामेषे युद्धे रथानां प्रेरणाय । कीदृशौ युवां । इंद्राग्नी इंद्रमग्निं च परस्परयुग्मभूतौ तुरस्य जंगमरूपस्य राधसो धनादिलक्षणस्य पती स्वामिनौ विद्वांसा सर्वज्ञौ गिर्वणस्तमा गीर्भिर्वननीयतमौ । ईदृशौ युवां हवामहे ॥

॥ अथ पंचमी ॥

ता वृधंतावनु द्यून्मर्ताय देवावदभा ।

अर्हंता चित्पुरो दधेंऽशेव देवावर्वते ॥५॥

ता । वृधंतौ । अनु । द्यून् । मर्ताय । देवौ । अदभा ।

अर्हंता । चित् । पुरः । दधे । अंशाऽइव । देवौ । अर्वते ॥५॥

ता तावनु द्यून् प्रतिदिनं वृधंतौ वर्धमानौ । सर्वदा प्रवृद्धावित्यर्थः । वर्धने दृष्टांतः । मर्तेव मनुष्याविव । तौ यथा प्रतिदिनं वर्धेते । देवौ द्योतमानावद्भा- हिंस्यावर्हंता चित् प्रकर्षेण पूज्यौ । चिदिति पूजायां । तादृशौ महानुभावौ देवा- वर्वंते ऽश्वलाभाय पुरोदधे पुरस्कुर्वे । अंशेव । अंशो नाम द्वादशादित्यमध्यवर्ती देवः । स भगस्याप्युपलक्षकः । अंशाविव । आदित्याविव । दीप्तावित्यर्थः ॥

॥ अथ षष्ठी ॥

एवेंद्राग्निभ्यामहावि हव्यं शूष्यं घृतं न पूतमद्रिभिः ।

ता सूरिषु श्रवो बृहद्रयिं गृणत्सु दिधृतमिषं गृणत्सु दिधृतं ॥ ६ ॥

एव । इंद्राग्नि ऽभ्यां । अहावि । हव्यं । शूष्यं । घृतं । न । पूतं । अद्रिऽभिः ।

ता । सूरिषु । श्रवः । बृहत् । रयिं । गृणत्ऽसु । दिधृतं । इषं । गृणत्ऽसु । दिधृतं ॥ ६ ॥

एवैवमिदानीं क्रियमाणप्रकारेण । स्तुतिसाहित्येनेत्यर्थः । इंद्राग्निभ्यां हव्यं हविरहावि । परित्यक्तमासीत् । कीदृशं तत् । शूष्यं बलकरं । किमिव । अद्रिभिर्ग्राव- भिः पूतमभिषुतं घृतं न सोमरसमिव । तद्यथा युवाभ्यां प्रदीयते तद्वच्चरुपुरोडा- शादिकमपि । ता तौ देवौ सूरिषु मेधाविष्वस्मासु बृहत् प्रभूतं श्रवोऽन्नं यशो वा रयिं धनं च दिधृतं । धारयतं । इषमन्नं गृणत्सु स्तुवत्सु दिधृतं । पुनरुक्तिरादरार्था ॥

॥ इति चतुर्थस्य चतुर्थे द्वात्रिंशो वर्गः ॥

प्र वो मह इति नवर्चं पंचदशं सूक्तमेवयामरुदाख्यस्यात्रेयस्य मुनेरार्षं मरुद्दे- वताकमतिजगतीच्छंदस्कं । तथा चानुक्रमणिका । प्र वो नवैवयामरुन्मारुतम- तिजागतमिति ॥ दशरात्रे षष्ठेऽहनि तृतीयसवने ऽच्छावाकशस्त्र इदं सूक्तं । सूचितं च । एवयामरुदुक्थो वृषाकपिना । आ० ८.४. । इति ॥

॥ तत्र प्रथमा ॥

प्र वो महे मतयो यंतु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।

प्र शर्धाय प्रयज्यवे सुखादये तवसे भंददिष्टये धुनिव्रताय शवसे ॥ १ ॥

प्र । वः । महे । मतयः । यंतु । विष्णवे । मरुत्वते । गिरिऽजाः । एवयामरुत् ।

प्र । शर्धाय । प्रऽयज्यवे । सुऽखादये । तवसे । भंदत्ऽइष्टये । धुनिऽव्रताय । शवसे ॥ १ ॥

प्रयंतु प्रगच्छंतु गिरिजा वाचि निष्पन्ना मतयः स्तुतयः। कस्मै। वस्तुभ्यं। वचनव्यत्ययः। विष्णवे व्याप्तायेंद्राय विष्णवे वा मरुत्वते मरुद्भिस्तद्वते। कस्य स्तुतय इत्युच्यते। एवयामरुत् एतन्नामकस्य ऋषेः॥ षष्ठ्या लुक्॥ अथवायमृषिर्गिरिजाः स्तुतेर्जनयिता भवति। उत्तरार्द्धे मरुत्स्तुतिः। किंच प्रयंतु स्तुतयः। कस्मै। शर्धाय बलाय मारुताय। इतरत्सर्वं बलविशेषणं। प्रयज्यवे प्रकर्षेण यष्टव्याय सुखादये शोभनाभरणाय। खादिराभरणविशेषः। हस्तेषु खादिश्च। ऋग्वे० १.१६८.३.। पत्सु खादयः। ऋग्वे० ५.५४.११.। इति च श्रुतेः। तवसे बलवते भंदद्दिष्टये। स्तुतिरूपेष्टिर्यस्य तद्भंदद्दिष्टि। तस्मै धुनिव्रताय मेघानां चालनं कर्म यस्य तादृशाय शवसे गमनवते॥

॥ अथ द्वितीया॥

प्र ये जाता महिना ये च नु स्वयं प्र विद्मना ब्रुवत एवयामरुत्।
क्रत्वा तद्वो मरुतो नाधृषे शवो दाना मह्ना तदेषामधृष्टासो नाद्रयः॥२॥

प्र। ये। जाताः। महिना। ये। च। नु। स्वयं। प्र। विद्मना। ब्रुवते। एवयामरुत्।
क्रत्वा। तत्। वः। मरुतः। न। आऽधृषे। शवः। दाना। मह्ना। तत्। एषां।
अधृष्टासः। न। अद्रयः॥२॥

ये महिना महता विष्णुनेंद्रेण वा सह प्रजाताः प्रादुर्भूतास्तान्ब्रुवते। ये च नु क्षिप्रं स्वयमेव विद्मना यज्ञगमनविषयज्ञानेन सह प्रजाताः प्रादुर्भूतास्तान्मरुत एवयामरुद्ब्रुवते। स्तौति॥ प्रेत्ययमाख्यातेन वा संबंधनीयः। ब्रुवत इति व्यत्ययेन बहुवचनं। एकवचने वा छांदसः शः। निघाताभावश्छांदसः॥ अथ प्रत्यक्षवादः। हे मरुतो वो युष्माकं तत्प्रसिद्धं शवो बलं क्रत्वा चालनादिरूपेण कर्मणा युक्तं नाधृषे। केश्चिदप्याधर्षणीयं न भवति। अन्येषामसुरादीनां क्रत्वा कर्मणा वानभिभाव्यं भवति॥ कृत्यार्थे केन्॥ किंचैषां वो तत् बलं दानाभिमतदानेन मह्ना महत्त्वेन चोपेतं। यूयं प्रबलाः। अधृष्टासोऽधर्षनीयाः। तत्र दृष्टांतः। अद्रयो न। ते यथाधृष्यास्तद्वद्यूयमपि॥

॥ अथ तृतीया ॥

प्र ये दिवो बृहतः शृण्विरे गिरा सुशुक्वानः सुभ्वं एवयामरुत् ।
न येषामिरी सधस्थ ईष्ट आँ अग्नयो न स्वविद्युतः प्र स्यंद्रासो धुनीनां ॥३॥

प्र । ये । दिवः । बृहतः । शृण्विरे । गिरा । सुऽशुक्वानः । सुऽभ्वः । एवयामरुत् ।
न । येषां । इरी । सधऽस्थे । ईष्टे । आ । अग्नयः । न । स्वऽविद्युतः । प्र । स्यंद्रासः ।
धुनीनां ॥३॥

ये मरुतो बृहतो दिवो द्युलोकादागच्छंतः प्र शृण्विरे शृण्वंति तान्मरुतो गिरैवयामरुत्स्तुतवान् । कीदृशास्ते । सुशुक्वानो दीप्ताः सुभ्वः सुष्ठु भवंतः । येषां मरुतां सधस्थे सहस्थाने स्वकीये निवासे तिष्ठतामिरीरिता प्रेरिता नेष्ट आ । नेशते च चालयितुं । आ इति चार्थे । अग्नयो न अग्नय इव स्वविद्युतः स्वयमेव विद्योतमाना धुनीनां नदीनां स्यंद्रासो वर्षणेन चालयितारश्च ॥

॥ अथ चतुर्थी ॥

स चक्रमे महतो निरुरुक्रमः समानस्मात्सदस एवयामरुत् ।
यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः ॥४॥

स । चक्रमे । महतः । निः । उरुऽक्रमः । समानस्मात् । सदसः । एवयामरुत् ।
यदा । अयुक्त । त्मना । स्वात् । अधि । स्नुऽभिः । विऽस्पर्धसः । विऽमहसः ।
जिगाति । शेऽवृधः । नृऽभिः ॥४॥

स मरुद्गणो महतः प्रवृद्धात्समानस्मात्सर्वेषां साधारणात्सदसः स्थानादंतरिक्षादुरुक्रमो विस्तीर्णक्रमणः सन् निश्चक्रमे । निरगच्छत् । एवयामरुदृषिर्यदा स्वात्स्वकीयस्थानात् । अधीति पंचम्यर्थानुवादी । त्मनात्मनैव स्नुभिर्गंतृभिर्नृभिः स्वनेतृभिरश्वैरयुक्त युक्तोऽभवदागमनप्रार्थनाय । अथ बहुवदुच्यते । तदानीं विस्पर्धसो विविधस्पर्धाः । अहं पुरतो गच्छाम्यहं पुरतो गच्छामीति तेषां स्पर्धा । अथवा विगतस्पर्धाः । न ह्येषां साम्यं स्पर्धकाः संति । विमहसो विशिष्टबलाः शेवृधः शेवस्य सुखस्य वर्धयितारो जिगाति । निर्गच्छंति ॥ व्यत्ययेनैकवचनं ॥

॥ अथ पंचमी ॥

स्वनो न वोऽमवान्रेजयद्वृषा त्वेषो ययिस्तविष एवयामरुत् ।
येना सहंत ऋंजत स्वरोचिषः स्थारश्मानो हिरण्ययाः स्वायुधास इष्मिणः ॥५॥
स्वनः । न । वः । अमऽवान् । रेजयत् । वृषा । त्वेषः । ययिः । तविषः । एवयामरुत् ।
येन । सहंतः । ऋंजत । स्वऽरोचिषः । स्थाःऽरश्मानः । हिरण्ययाः । सुऽआयुधासः ।
इष्मिणः ॥५॥

हे मरुतो वो युष्माकं स्वनो वेगजनितः शब्दो न रेजयत् न कंपयत्वेवयामरुतं मां ॥ सुपां सुलुगिति द्वितीयालुक् ॥ स्वनो विशेष्यते । अमवान् बलवान् वृषा वर्षिता वृष्टेस्त्वेषो दीप्तो ययिर्गंता तविषः प्रवृद्धः । येन स्वनेन सहंतः शत्रूनभिभवंतो यूयमृंजत । प्रसाधयथ ॥ लडर्थे लोट् ॥ कीदृशा यूयं । स्वरोचिषः स्वायत्तरश्मयः स्थारश्मानः स्थिररश्मयो हिरण्यया हिरण्याभरणाः स्वायुधासः स्वायत्तायुधा इष्मिणोऽन्नवंतो गमनवंतो वा ॥

॥ इति चतुर्थस्य चतुर्थे त्रयस्त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

अपारो वो महिमा वृद्धशवसस्त्वेषं शवोऽवत्वेवयामरुत् ।
स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्यता निदः शुशुक्वांसो नाग्नयः ॥६॥
अपारः । वः । महिमा । वृद्धऽशवसः । त्वेषं । शवः । अवतु । एवयामरुत् ।
स्थातारः । हि । प्रऽसितौ । संऽदृशि । स्थन । ते । नः । उरुष्यत । निदः । शुशुक्वांसः ।
न । अग्नयः ॥६॥

हे मरुतो वो युष्माकं महिमापारोऽनवधिकः । हे वृद्धशवसः प्रवृद्धबलास्त्वेषं दीप्तं शवो युष्माकं बलमवतु रक्षत्वेवयामरुतं मां ॥ द्वितीयैकवचनस्य लुक् ॥ यूयं प्रसितौ प्रबलबंधने नियमनवति यज्ञे संदृशि संदर्शने निमित्ते स्थातारो हि स्थाननियमेन तिष्ठंतो भवथ खलु । ते नोऽस्मान्निदो निंदकाच्छत्रोः सकाशादुरुष्यत । रक्षत । अग्नय इव शुशुक्वांसो यूयमिति ॥

॥ अथ सप्तमी ॥

ते रुद्रासः सुमखा अग्नयो यथा तुविद्युम्ना अवंत्वेवयामरुत् ।
दीर्घं पृथु पप्रथे सद्म पार्थिवं येषामज्मेष्वा महः शर्धांस्यद्भुतैनसां ॥ ७ ॥

ते । रुद्रासः । सुऽमखाः । अग्नयः । यथा । तुविऽद्युम्नाः । अवंतु । एवयामरुत् ।
दीर्घं । पृथु । पप्रथे । सद्म । पार्थिवं । येषां । अज्मेषु । आ । महः । शर्धांसि ।
अद्भुतऽएनसां ॥ ७ ॥

हे मरुतो रुद्रासो रुद्रपुत्राः सुमखाः शोभनयज्ञा अग्नयो यथा अग्नय इव तुविद्युम्नाः प्रभूतदीप्तयः । अथवा अग्निसदृशास्तुविद्युम्नाः प्रभूतधना अवंतु रक्षंत्वेवयामरुदेतन्नामानमृषिं मां । पार्थिवं । पृथिव्यचांतरिक्षं । तत्संबंधि दीर्घमायतं पृथु विस्तीर्णं सद्म सदनं पप्रथे । मरुद्भिः प्रथितमभूत् । अद्भुतैनसामपापानां येषामज्मेषु गमनेषु महो महांति शर्धांसि चागच्छंतीति शेषः ॥

॥ अथाष्टमी ॥

अद्वेषो नो मरुतो गातुमेतन श्रोता हवं जरितुरेवयामरुत् ।
विष्णोर्महः समन्यवो युयोतन स्मद्रथ्यो३न दंसनाप द्वेषांसि सनुतः ॥ ८ ॥

अद्वेषः । नः । मरुतः । गातुं । आ । इतन । श्रोत । हवं । जरितुः । एवयामरुत् ।
विष्णोः । महः । सऽमन्यवः । युयोतन । स्मत् । रथ्यः । न । दंसना । अप । द्वेषांसि ।
सनुतरिति ॥ ८ ॥

हे मरुतो अद्वेषोऽद्वेषसो यूयं नोऽस्माकं गातुं गमनस्वभावं स्तोत्रं प्रत्येतन । आगच्छत । तदर्थं जरितुः स्तोतुरेवयामरुदेवयामरुतो मम हवं श्रोत । शृणुत । विष्णोर्व्यापकस्येंद्रस्य महो महतो हे समन्यवः समानयज्ञा यूयं स्मत् । अयं प्रशस्तनाम । प्रशस्ता रथ्यो न रथिनो योद्धार इव । ते यथा शत्रूनपाकुर्वंति तद्वदस्माकं दंसना कर्मणा सनुतः । अंतर्हितनामैतत् । अंतर्हितान् द्वेषांसि द्वेष्टॄन् अपयुयोतन । दूरे वियोजयत । पृथक्कुरुत ॥

अध्यायोपाकरणोत्सर्गयोर्विनियुक्ता । गृ॰ सू॰ ३. ५. ॥

॥ अथ नवमी ॥

गंता नो यज्ञं यज्ञियाः सुशमि श्रोता हवमरक्ष एवयामरुत् ।
ज्येष्ठासो न पर्वतासो व्योमनि यूयं तस्य प्रचेतसः स्यात दुर्धर्तवो निदः ॥९॥

गंत । नः । यज्ञं । यज्ञियाः । सुऽशमि । श्रोत । हवं । अरक्षः । एवयामरुत् ।
ज्येष्ठासः । न । पर्वतासः । विऽओमनि । यूयं । तस्य । प्रऽचेतसः । स्यात ।
दुःऽधर्तवः । निदः ॥९॥

हे यज्ञिया मरुतो यूयं नोऽस्माकं यज्ञं गंत । आगच्छत । सुशमि शोभनकर्म यथा भवति तथा । सुकर्मत्वायेत्यर्थः । तदर्थं नो हवमस्मदीयमाह्वानं श्रोत । शृणुत । अरक्षो रक्षोवर्जिता यूयं ॥ लिंगवचनयोर्व्यत्ययः ॥ ज्येष्ठासो न ज्येष्ठा इव पर्वतासो विंध्यादय इवातिप्रवृद्धा व्योमन्यंतरिक्षे वर्तमानाः प्रचेतसो यूयं तस्य निदो निंदकस्य दुर्धर्तवो दुर्धराः स्यात । भवत ॥

॥ इति चतुर्थस्य चतुर्थे चतुस्त्रिंशो वर्गः ॥

इति पंचमे मंडले षष्ठोऽनुवाकः समाप्तं चायेयं पंचमं मंडलं ॥

॥ अथ षष्ठं मंडलं ॥

भारद्वाजे षष्ठे मंडले षडनुवाकाः। तत्र प्रथमेऽनुवाके पंचदश सूक्तानि। तत्र त्वं ह्यग्न इति त्रयोदशर्चं प्रथमं सूक्तं। त्वं ह्यग्ने सप्तोनेति बार्हस्पत्यो भरद्वाजः षष्ठं मंडलमपश्यदित्यनुक्रांतत्वात् मंडलद्रष्टा स एव भरद्वाज ऋषिः। अनादेशपरिभाषया त्रिष्टुप्। मंडलादिपरिभाषयाग्निर्देवता॥ पशोर्हविष्यवदीयमाने मैत्रावरुणेनानुवचनीयमिदं मनोतासूक्तं। सूचितं च। त्वं ह्यग्ने प्रथम इत्यन्वाह। आ० ३.६.। इति॥ प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छंदस्येतदादिसूक्तषट्कं द्वितीयवर्जं। सूचितं च। त्वं ह्यग्ने प्रथम इति षण्णां द्वितीयमुद्धरेत्। आ० ४.१३.। इति॥ आद्योपाकरणे विनियुक्ता। सूत्रं तु पूर्वं मंत्र उक्तं॥

॥ तत्र प्रथमा ॥

त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता।
त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै॥१॥

त्वं। हि। अग्ने। प्रथमः। मनोता। अस्याः। धियः। अभवः। दस्म। होता।
त्वं। सीं। वृषन्। अकृणोः। दुस्तरीतु। सहः। विश्वस्मै। सहसे। सहध्यै॥१॥

हे अग्ने प्रथमो देवानां मध्ये प्रथमः प्रतमः प्रकृष्टतमः पूर्वभावी वा त्वं मनोता हि देवानां मनो यत्रोतं संबद्धं भवति तादृशो भवसि। हिशब्दोऽग्निः सर्वमनोतामग्नौ मनोताः संगच्छंते। ऐ० ब्रा० २.१०.। इत्यादिब्राह्मणप्रसिद्धिद्योतनार्थः। हे दस्म दर्शनीय अस्या धियोऽस्य कर्मणो होता देवानामाह्वाताभवः। भवसि। हे वृषन् कामानां वर्षितः त्वं सीं सर्वतो दुष्टरीतु दुर्हिंस्यमहिंस्यं सहो बलमकृणोः। अकरोः। किमर्थं। विश्वस्मै सहसे सर्वस्यापि बलवतः शत्रोः सहध्या अभिभवनाय॥

॥ अथ द्वितीया ॥

अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन्।
तं त्वा नरः प्रथमं देवयंतो महो राये चितयंतो अनु ग्मन्॥२॥

अर्ध । होता । नि । असीदः । यजीयान् । इळः । पदे । इषयन् । ईड्यः । सन् ।
तं । त्वा । नरः । प्रथमं । देवऽयंतः । महः । राये । चितयंतः । अनु । ग्मन् ॥ २ ॥

अधाधुना हे अग्ने यजीयानतिशयेन यष्टा त्वं होता होमनिष्पादकः सन् इळो भूम्या वेदिलक्षणायाः पदे स्थाने न्यसीदः । निषण्णवानसि । किं कुर्वन् । इषयन् पशुपुरोडाशादिलक्षणमन्नमिच्छन् ईड्यः स्तुत्यः सन् । तं तादृशं त्वा त्वां प्रथममितरदेवताभ्यः पूर्वं देवयंतो देवं त्वामात्मन इच्छंतो नरो नेतारो मनुष्या ऋत्विग्यजमाना महो महते राये धनाय चितयंतो जानंतः स्तुत्या ज्ञापयंतो वा अनुग्मन् । अन्वगच्छन् पूर्वं ॥

॥ अथ तृतीया ॥

वृतेव यंतं बहुभिर्वसव्यैइस्त्वे रयिं जागृवांसो अनु ग्मन् ।
रुशंतमग्निं दर्शतं बृहंतं वपावंतं विश्वहा दीदिवांसं ॥ ३ ॥

वृताऽइंव । यंतं । बहुऽभिः । वसव्यैः । त्वे इति । रयिं । जागृऽवांसः । अनु । ग्मन् ।
रुशंतं । अग्निं । दर्शतं । बृहंतं । वपाऽवंतं । विश्वहा । दीदिऽवांसं ॥ ३ ॥

वृतेव मार्गेण । इवेति संप्रत्यर्थे । लोकद्वयमध्यगतेन मार्गेण बहुभिरनेकैर्वसव्यैर्वसुभिः ॥ स्वार्थिकस्तद्धितप्रत्ययः ॥ यजमानानां निवासयोग्यैर्वा सार्द्धं यंतं गच्छंतं त्वानुग्मन् । अनुगच्छंति । संभजंते यजमानाः । कीदृशास्ते । त्वे त्वयि देवे रयिं धनं जागृवांसः । प्रयच्छंत इत्यर्थः । कीदृशं त्वामित्युच्यते । रुशंतं दीप्तवर्णमग्निमंगनादिगुणविशिष्टं दर्शतं दर्शनीयं बृहंतं महांतं वपावंतं विश्वहा सर्वेषु कालेषु दीदिवांसं दीप्यमानं ॥

॥ अथ चतुर्थी ॥

पदं देवस्य नमसा व्यंतः श्रवस्यवः श्रव आपन्नमृक्तं ।
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयंत संदृष्टौ ॥ ४ ॥

पदं । देवस्य । नमसा । व्यंतः । श्रवस्यवः । श्रवः । आपन् । अमृक्तं ।
नामानि । चित् । दधिरे । यज्ञियानि । भद्रायां । ते । रणयंत । संऽदृष्टौ ॥ ४ ॥

देवस्य द्योतमानस्याग्नेः पदमाहवनीयस्थानं नमसा हविषा स्तोत्रेण वा व्यंतो गच्छंतः श्रवस्यवोऽन्नमिच्छंतः पूर्वे यजमानाः श्रवः सर्वत्र श्रूयमाणमन्नम-

मृक्तमन्यैरपरिबाध्यमापन्। आप्नुवंति। हे अग्ने ते तव भद्रायां स्तुत्यायां संदृष्टौ निमित्तायां रणयंत। रमयंति। यज्ञियानि यज्ञयोग्यानि नामानि नमनीयानि वैश्वानरो जातवेदा इत्यादीनि दधिरे। धारयंति। अथवा नमनसाधनानि स्तोत्राणि दधिरे ॥

॥ अथ पंचमी ॥

त्वां वर्धंति क्षितयः पृथिव्यां त्वां राय उभयासो जनानां।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणां ॥ ५ ॥
त्वां। वर्धंति। क्षितयः। पृथिव्यां। त्वां। रायः। उभयासः। जनानां।
त्वं। त्राता। तरणे। चेत्यः। भूः। पिता। माता। सदं। इत्। मानुषाणां ॥ ५ ॥

हे अग्ने त्वां क्षितयो मनुष्या ऋत्विजः पृथिव्यां वेदिलक्षणायां वर्धंति। वर्धयंति। उभयास उभयविधानि पश्वपशुरूपाणि जनानां यजमानानां संबंधीनि रायो धनान्यृत्विजोऽध्वर्य्वादयस्त्वां त्वामुद्दिश्य वर्धंति। अथवोभयविधानि धनानि गवादीनि जनानां पुत्रादीनामर्थाय प्राप्तुं त्वां वर्धंति। हे तरणे दुःखात्तारकाग्ने त्वं चेत्यो ज्ञातव्यः स्तुत्यः सन् त्राता रक्षिता भूः। भवसि। किंच मानुषाणां मनुष्याणां स्तोतॄणामस्माकं सदमित्सर्वदा पिता माता मातापितृस्थानीयो भूः। भवसि ॥

॥ इति चतुर्थस्य चतुर्थे पंचत्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

सपर्येण्यः स प्रियो विक्ष्व१ग्निर्होता मंद्रो नि षसादा यजीयान्।
तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम ॥ ६ ॥
सपर्येण्यः। सः। प्रियः। विक्षु। अग्निः। होता। मंद्रः। नि। ससाद। यजीयान्।
तं। त्वा। वयं। दमे। आ। दीदिऽवांसं। उप। ज्ञुऽबाधः। नमसा। सदेम ॥ ६ ॥

सोऽग्निः सपर्येण्यः पूज्यः प्रियः कामानां पूरको विक्षु प्रजासु होता होमनिष्पादको मंद्रो मदनीयो यजीयानतिशयेनेतरदेवानां यष्टा यजनीयो वा। एवं महानुभावोऽग्निर्निषसाद। निषण्णोऽभूत्। अथ प्रत्यक्षकृतः। तं त्वा तादृशं त्वां वयं यजमाना दमे गृहे दीदिवांसं दीप्यमानं ज्ञुबाधः जानुनी बाधयंतोऽवन-

तज्जानवः प्रणताः संतो नमसा स्तोत्रेणोपासदेम। आसादयेम। अथवोपासीदेमेत्येवमाशास्ते॥

॥ अथ सप्तमी॥

तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयंतः।

त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन॥७॥

तं। त्वा। वयं। सुऽध्यः। नव्यं। अग्ने। सुम्नऽयवः। ईमहे। देवऽयंतः।

त्वं। विशः। अनयः। दीद्यानः। दिवः। अग्ने। बृहता। रोचनेन॥७॥

हे अग्ने तं तादृशं महानुभावं नव्यं स्तुत्यं त्वा त्वां सुध्यः शोभनबुद्धयः सुम्नायवः सुखमिच्छंतो देवयंतो देवं त्वामिच्छंतो वयमीमहे। याचामहे। स्तुम इत्यर्थः। हे अग्ने त्वं दीद्यानो दीप्यमानः सन्। केन। बृहता महता रोचनेन रोचमानेन तेजसा दीद्यानो विशः प्रजाः स्तोतृनस्मान् दिवः स्वर्गमनयः। अगमयः। रोचनेनादित्येन दिवं गमयेति वा संबंधः। आदित्यमार्गेणेत्यर्थः॥

॥ अथाष्टमी॥

विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनां।

प्रेतीषणिमिषयंतं पावकं राजंतमग्निं यजतं रयीणां॥८॥

विशां। कविं। विश्पतिं। शश्वतीनां। निऽतोशनं। वृषभं। चर्षणीनां।

प्रेतिऽइषणिं। इषयंतं। पावकं। राजंतं। अग्निं। यजतं। रयीणां॥८॥

शश्वतीनां नित्यानां विशामृत्विग्यजमानलक्षणानां विश्पतिं स्वामिनं कविं क्रांतदर्शिनं नितोशनं शत्रूणां हिंसकं वृषभं कामानां वर्षकं चर्षणीनां स्तोतृणां मनुष्याणां प्रेतीषणिं प्राप्तगमनमिषयंतमन्नं कुर्वंतं पावकं शोधकं राजंतं दीप्यमानं दीपयंतं वा रयीणां लाभाय यजतं यष्टव्यमग्निं स्तुम इति शेषः॥

॥ अथ नवमी॥

सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिं।

य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतः॥९॥

सः। अग्ने। ईजे। शशमे। च। मर्तः। यः। ते। आनट्। संऽइधा। हव्यऽदातिं।

यः। आऽहुतिं। परि। वेद। नमःऽभिः। विश्वा। इत्। सः। वामा। दधते। त्वाऽऊतः॥९॥

हे अग्ने त्वां स मर्तः स यजमान ईजे। यजते। शशमे च। स्तौति। शशमान इति स्तुतिकर्मसु पाठादिदमपि स्तुतिकर्म। यो यजमानस्ते तव समिधा सह हव्यदातिं हविषां दानमानट् करोति। किंच यो यजमानो नमोभिः स्तुतिभिराहुतिमाज्यादिलक्षणां परि वेद परितो वेत्ति। ददातीत्यर्थः। स यजमानस्त्वोतस्त्वया रक्षितः सन् विश्वेत् सर्वाणि वामा वननीयानि धनानि दधते। धारयति॥

॥ अथ दशमी ॥

अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः।
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम ॥१०॥

अस्मै। ऊं इति। ते। महि। महे। विधेम। नमःऽभिः। अग्ने। सम्ऽइधा। उत। हव्यैः।
वेदी। सूनो इति। सहसः। गीःऽभिः। उक्थैः। आ। ते। भद्रायां। सुऽमतौ। यतेम॥१०॥

हे अग्ने महे महतेऽस्मै ते तुभ्यं महि महदत्यधिकं विधेम। परिचरेम। कैरित्युच्यते। नमोभिर्नमस्कारैः समिधा वा उतापि च हव्यैर्हविर्भिः। हे सहसः सूनो वेदी वेद्यां गीर्भिः स्तोत्रैरुक्थैः शस्त्रैश्च विधेमेति संबंधः। किंच ते तव भद्रायां स्तुत्यायां सुमतौ शोभनानुग्रहबुद्धावायतेम। आगच्छेम। भवेमेत्यर्थः॥

॥ अथैकादशी ॥

आ यस्ततंथ रोदसी वि भासा श्रवोभिश्च श्रवस्य१स्तरुत्रः।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि ॥११॥

आ। यः। ततंथ। रोदसी इति। वि। भासा। श्रवःऽभिः। च। श्रवस्यः। तरुत्रः।
बृहत्ऽभिः। वाजैः। स्थविरेभिः। अस्मे इति। रेवत्ऽभिः। अग्ने। विऽतरं
वि। भाहि॥११॥

हे अग्ने यस्त्वं रोदसी द्यावापृथिव्यौ भासा दीप्त्या व्याततंथ व्यतनोः। किंच तरुत्रस्तारकस्त्वं श्रवोभिः स्तुतिभिः श्रवस्यश्च भवसि हे तादृशाग्ने बृहद्भिर्महद्भिर्वाजैरन्नैः स्थविरेभिः स्थविरैः स्थूलै रेवद्भी रयिमद्भिरस्मे अस्मदर्थं वितरं विशिष्टतरं वि भाहि। विशेषेण दीप्यस्व॥

॥ अथ द्वादशी ॥

नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि संतु ॥१२॥

नृऽवत्। वसो इति। सदं। इत्। धेहि। अस्मे इति। भूरि। तोकाय। तनयाय। पश्वः। पूर्वीः। इषः। बृहतीः। आरेऽअघाः। अस्मे इति। भद्रा। सौश्रवसानि। संतु ॥१२॥

हे वसो वासक धनवन्वाग्ने नृवत् मनुष्यैरुपेतं धनं सदमित्सर्वदास्मे अस्मासु धेहि। स्थापय। किंच भूरि प्रभूतान् पश्वः पशूंश्च धेहि। किमर्थं। तोकायास्मत्पुत्राय तनयाय तत्पुत्राय। किंच पूर्वीः पूरयित्र्यः कामानां बह्व्यो वा बृहतीर्महत्य आरेअघाः। आरे दूरेऽघानि यासु ताः। तादृश्य इष उक्तलक्षणान्यन्नानि भद्रा भद्राणि सौश्रवसानि सुश्रवस्त्वान्यस्मे अस्मासु संतु। भवंतु ॥

पुरूण्यग्न इति त्रयोदश्युखासंभरणीयेष्टावग्नेः क्षत्रवतोऽनुवाक्या। सूचितं च। पुरूण्यग्ने पुरुधा त्वाया स चित्र चित्रं चितयंतमस्मे। आ० ४.१.। इति ॥ तत्पाठस्तु ॥

पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्यां।
पुरूणि हि त्वे पुरुवार संत्यग्ने वसु विधते राजनि त्वे ॥ १३ ॥

पुरूणि। अग्ने। पुरुधा। त्वाऽया। वसूनि। राजन्। वसुता। ते। अश्यां। पुरूणि। हि। त्वे इति। पुरुऽवार। संति। अग्ने। वसु। विधते। राजनि। त्वे इति ॥१३॥

हे अग्ने राजन् ते तव पुरूणि बहूनि पुरुधा गवाश्वादिरूपेण बहुप्रकाराणि वसूनि धनानि वसुता वसुतायै वसुमत्त्वायाश्यां। व्याप्नुयां भुंजीय वा ॥ अत्र भरतस्वामी वसुतेत्येतत्पदं सप्तम्यंतं चकार भट्टभास्करमिश्रोऽप्येकपदं संबुद्ध्यंतं चकार ॥ हे पुरुवार बहुभिर्वरणीयाग्ने राजनि राजमाने त्वे त्वयि पुरूणि बहूनि वसु वसूनि त्वे त्वां विधते परिचरते मह्यं दातव्यानि संति ॥

॥ इति चतुर्थस्य चतुर्थे षट्त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके चतुर्थोऽध्यायः समाप्तः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ पंचमोऽध्याय आरभ्यते ॥ षष्ठमंडलस्य षडनुवाकात्मकस्य प्रथमेऽनुवाके पंचदश सूक्तानि। तत्र त्वं हीत्येकादशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षमाग्नेयं। अंत्या षट्पंचाशदक्षरा शक्कर्यादितो दशानुष्टुभः। अनुक्रम्यते हि। त्वं ह्येकादशानुष्टुभं शक्कर्यंतमिति ॥ प्रातरनुवाक आग्नेये ऋतावानुष्टुभे छंदसीदं सूक्तमुत्तमावर्जं विनियुक्तं। सूत्र्यते हि। त्वं हि क्षैतवदग्ना यो होताजनिष्ट। आ० ४.१३। इति ॥ आश्विनशस्त्रे चैतत् शंसनीयं प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् ॥ अंगिरसां द्विरात्रे द्वितीयेऽहनीदमेव सूक्तमाज्यशस्त्रं। सूचितं च। त्वं हि क्षैतवदिति चाज्यं। आ० १०.२। इति ॥

॥ तत्र प्रथमा ॥

त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥१॥
त्वं। हि। क्षैतऽवत्। यशः। अग्ने। मित्रः। न। पत्यसे।
त्वं। विऽचर्षणे। श्रवः। वसो इति। पुष्टिं। न। पुष्यसि ॥१॥

हे अग्ने त्वं हि त्वं खलु क्षैतवत्। क्षितिः क्षयोऽपचयः। तत्संबंधि क्षैतं शुष्कं काष्ठं। तद्युक्तं यशोऽन्नं हविर्लक्षणं पत्यसे। अभिपतसि। गच्छसि*। तत्र दृष्टांतः। मित्रो न। अहरभिमानी देवो मित्रः। स इव। यद्वा यश इति गृहनाम। क्षैतवत्। क्षैतं निवासकं हविर्लक्षणमन्नं। तद्युक्तं यजमानगृहं मित्रभूतः पुरुष इवाभिपतसि। यद्वा पत्यतिरैश्वर्यकर्मा। ईदृशमन्नं पत्यसे। ईशिषे। अतः कारणात् हे विचर्षणे विशेषेण सर्वस्य द्रष्टर्वसो वासकाग्ने त्वं श्रवः श्रवणीयमन्नं यजमानगृहस्थं न। अयं नशब्दश्चार्थे। अन्नकार्यभूतां पुष्टिं च पुष्यसि। वर्धयसि ॥

॥ अथ द्वितीया ॥

त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते ।

त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ॥ २ ॥

त्वां । हि । स्म । चर्षणयः । यज्ञेभिः । गीःऽभिः । ईळते ।

त्वां । वाजी । याति । अवृकः । रजःऽतूः । विश्वऽचर्षणिः ॥ २ ॥

हे अग्ने त्वां हि स्म त्वामेव खलु चर्षणयो मनुष्या यज्ञेभिर्यज्ञसाधनैर्हविर्भिर्गीर्भिः स्तुतिभिरीळते । स्तुवंति । अपि च वाजी । वाजो गमनं । तद्वान् सूर्यस्त्वां याति । गच्छति । प्रविशतीत्यर्थः । तथा च श्रूयते । अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरान्नक्तं ददृश इति । वाजिशब्दश्च सूर्यवाचकत्वेन क्वचित् श्रूयते । अग्निर्वायुः सूर्यस्ते वै वाजिन इति वायुः सप्तिरादित्यो वाजीति च । कीदृशो वाजी । अवृको हिंसकरहितो रजस्तूः । उदकमत्र रज उच्यते । तस्य वृष्टिलक्षणस्य प्रेरयिता । यद्वा रजसां लोकानां तरिता गंता विश्वचर्षणिः सर्वस्य द्रष्टा ॥

॥ अथ तृतीया ॥

सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिंधते ।

यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे ॥ ३ ॥

सऽजोषः । त्वा । दिवः । नरः । यज्ञस्य । केतुं । इंधते ।

यत् । ह । स्यः । मानुषः । जनः । सुम्नऽयुः । जुह्वे । अध्वरे ॥ ३ ॥

हे अग्ने सजोषः सजोषसः सह प्रीयमाणा दिवः स्तुतेर्नरो नेतार ऋत्विजो यज्ञस्य केतुं प्रज्ञापकं त्वा त्वामिंधते । समिद्धं कुर्वंति । कदेति चेदुच्यते । यद्ध यदा खलु स्य स मानुषो मनोरपत्यभूतो जनो जातो यजमानो होता वा सुम्नायुः सुम्नं सुखमात्मन इच्छन् अध्वरे हिंसाप्रत्यवायरहिते यज्ञे जुह्वे त्वामाह्वयति तदेत्यर्थः ॥

॥ अथ चतुर्थी ॥

ऋधद्यस्ते सुदानवे धिया मर्तः शशमते ।

ऊती ष बृहतो दिवो द्विषो अंहो न तरति ॥ ४ ॥

ऋधत् । यः । ते । सुऽदानवे । धिया । मर्तः । शशमते ।
ऊती । सः । बृहतः । दिवः । द्विषः । अंहः । न । तरति ॥ ४ ॥

ऋधत् । स यजमान ऋध्नुयात् हे अग्ने सुदानवे शोभनदानाय तुभ्यं ॥ षष्ठ्यर्थे चतुर्थी ॥ तव संबंधिना धिया कर्मणा यो मर्तो मरणधर्मा यजमानः शशमते शाम्यति । यद्वा शमतिः स्तुतिकर्मा । त्वदर्थं कर्मणा युक्तः सन् स्तौति । स यजमानो बृहतो महतो दिवो दीप्तस्य तव संबंधिन्योती ऊत्या रक्षया द्विषो द्वेष्टॄनंहो न आहननशीलं पापमिव तरति । अतिक्रामति ॥

॥ अथ पंचमी ॥

समिधा यस्त आहुतिं निशितिं मर्त्यो नशत् ।
वयावंतं स पुष्यति क्षयमग्ने शतायुषं ॥ ५ ॥
संऽइधा । यः । ते । आऽहुतिं । निऽशितिं । मर्त्यः । नशत् ।
वयाऽवंतं । सः । पुष्यति । क्षयं । अग्ने । शतऽआयुषं ॥ ५ ॥

हे अग्ने समिधा समिंधनहेतुभूतेनेध्मेन सह ते त्वदीयां निशितिं निशितां तनूकृतां मंत्रसंस्कृतामाहुतिं यो मर्त्यो मनुष्यो नशत् व्याप्नुयात् । नशतिर्व्याप्तिकर्मा । स मनुष्यो यजमानो वयावंतं । वयाः शाखाः पुत्रपौत्रादिलक्षणाः । तद्युक्तं शतायुषं बहुविधान्नं चिरकालजीवनं वा क्षयं गृहं पुष्यति । पोषयति । वर्धयति । तत्र चिरकालमवतिष्ठत इत्यर्थः ॥

॥ इति चतुर्थस्य पंचमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ६ ॥
त्वेषः । ते । धूमः । ऋण्वति । दिवि । सन् । शुक्रः । आऽततः ।
सूरः । न । हि । द्युता । त्वं । कृपा । पावक । रोचसे ॥ ६ ॥

हे अग्ने त्वेषो दीप्तस्य ते तव शुक्रो निर्मलः शुभ्रवर्णो वा धूमो दिव्यंतरिक्ष आततो विस्तीर्णः सन् ऋण्वति । मेघात्मना परिणतो गच्छति । अपि च हे

पावक शोधकाग्ने सूरो न सूर्य इव कृपाभिमुखीकरणसमर्थया स्तुत्या स्तूयमानस्त्वं द्युता दीप्त्या रोचसे हि। दीप्यसे खलु ॥

॥ अथ सप्तमी ॥

अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः।
रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः ॥ ७ ॥

अध। हि। विक्षु। ईड्यः। असि। प्रियः। नः। अतिथिः।
रण्वः। पुरिऽइव। जूर्यः। सूनुः। न। त्रययाय्यः ॥ ७ ॥

अधापि च विक्षु प्रजासु हे अग्ने त्वमीड्यः स्तुत्योऽसि। भवसि। हि यस्मादर्थे। यस्मादेवं तस्मान्नोऽस्माकमतिथिः। लुप्तोपममेतत्। अतिथिरिव प्रियोऽसि। यद्वा हविर्वहनाय सततगामी भूत्वास्माकं प्रियोऽसि। तथा पुरीव नगर्यां जूर्यो जीर्णो वृद्धो हितोपदेष्टा राजेव रण्वो रमणीयो गंतव्यो वा भवसि। तथा सूनुर्न पुत्र इव त्रययाय्यो यजमानैस्त्रातव्यः पालयितव्यो भवसि॥ त्रायतेरेतद्रूपं॥ यद्वा-तत्सूनोर्विशेषणं। विद्यातपःकर्मलक्षणं त्रयं यातीति त्रययाय्यः॥ यातेरौणादिक आय्यप्रत्ययः। स्पृहयाय्य इति यथा। अथवा त्रययाय्यो जन्मत्रयं प्राप्तः। जन्मत्रयं स्मर्यते। मातुरग्रेऽधिजननं द्वितीयं मौंजिबंधनात्। तृतीयं यज्ञदीक्षाया इति जन्मत्रयं स्मृतमिति। तादृशः पुत्र इति। रण्वो रमणीयोऽसि ॥

॥ अथाष्टमी ॥

क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः।
परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः ॥ ८ ॥

क्रत्वा। हि। द्रोणे। अज्यसे। अग्ने। वाजी। न। कृत्व्यः।
परिज्माऽइव। स्वधा। गयः। अत्यः। न। ह्वार्यः। शिशुः ॥ ८ ॥

हे अग्ने क्रत्वा कर्मणा मंथनरूपेण द्रोणे द्रुमे काष्ठेऽरण्यां विद्यमानस्त्वमज्यसे हि। व्यज्यसे खलु। तथा वाजी न वेजनवानश्व इव कृत्व्यः। कृत्वीति कर्मनाम। हविर्वहनादीनां कर्मणां कर्ता। स यथा पुरुषं वहति तद्वद्धविर्वहनमग्नेरस्मा-दृश्यं। तथा परिज्मेव परितः सर्वत्र गंता वायुरिव दावानलादिरूपेण सर्वत्र गंता त्वं स्वधा। अन्ननामैतत्। अन्नं गयो गृहं च भवसि। उभयोर्दातेत्यर्थः।

अपि च शिशुर्जातमात्रो बालोऽपि त्वमत्यो न सततगामी जात्यश्व इव ह्वार्यः कुटिलमितस्ततो गंतासि ॥ ह्वृ कौटिल्य इत्यस्यैतद्रूपं ॥

कारीर्यामग्नेर्धामच्छदो वैकल्पिक्यनुवाक्या त्वं त्येति । सूत्रितं च । त्वं त्या चिदच्युता धामन् ते विश्वं भुवनमधिश्रितं । आ० २. १३. । इति ॥

॥ सैषा नवमी ॥

त्वं त्या चिदच्युताग्ने पशुर्न यवसे ।
धामा ह यत्ते अजर वना वृश्चंति शिक्वसः ॥ ९ ॥
त्वं । त्या । चित् । अच्युता । अग्ने । पशुः । न । यवसे ।
धाम । ह । यत् । ते । अजर । वना । वृश्चंति । शिक्वसः ॥ ९ ॥

हे अग्ने त्वं त्या तानि काष्ठानि । चिच्छब्दोऽपिशब्दसमानार्थो भिन्नक्रमः । अच्युताच्युतानि च्यावयितुमशक्यान्यपि । अत्सीति शेषः । तत्र दृष्टांतः । यवसे घासे विसृष्टः पशुरिव । स यथा सर्वं भक्षयति तथा त्वं प्रौढकाष्ठादीनि क्षणमात्रेण दहसीत्यर्थः । हे अजर जरारहिताग्ने यद्यस्य ॥ सुपां सुलुगिति षष्ठ्या लुक् ॥ शिक्वसो दीप्तस्य ते तव धाम धामानि तेजांसि वना वननीयानि संभजनीयान्यरण्यानि वृश्चंति छिंदंति तक्षंति स त्वमिति पूर्वत्रान्वयः । हेत्येतत्पादपूरणं ॥

॥ अथ दशमी ॥

वेषि ह्यध्वरीयतामग्ने होता दमे विशां ।
समृधो विश्पते कृणु जुषस्व हव्यमंगिरः ॥ १० ॥
वेषि । हि । अध्वरिऽयतां । अग्ने । होता । दमे । विशां ।
संऽऋधः । विश्पते । कृणु । जुषस्व । हव्यं । अंगिरः ॥ १० ॥

हे अग्ने अध्वरीयतामध्वरं यज्ञमात्मन इच्छतां विशां यजमानानां दमे गृहे त्वं होता देवानामाह्वाता सन् वेषि हि स्तुतिं हवींषि वा यतः कामयसे अतः कारणाद्विश्पते विशां पालकाग्ने समृधः समृद्धानस्मान्यजमानान् कृणु । कुरु । कृत्वा च हे अंगिरोऽंगनादिगुणयुक्त अंगाररूप वाग्ने हव्यमस्मदीयं हविर्जुषस्व । सेवस्व ॥

॥ अथैकादशी ॥

अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥ ११ ॥

अच्छ । नः । मित्रऽमहः । देव । देवान् । अग्ने । वोचः । सुऽमतिं । रोदस्योः ।
वीहि । स्वस्तिं । सुऽक्षितिं । दिवः । नॄन् । द्विषः । अंहांसि । दुःऽइता । तरेम । ता । तरेम । तव । अवसा । तरेम ॥ ११ ॥

हे मित्रमहोऽनुकूलदीप्ते देव दानादिगुणयुक्ताग्ने रोदस्योर्द्यावापृथिव्योर्वर्तमानस्त्वं देवान्यष्टव्यानिंद्रादीनच्छाभिमुख्येन नोऽस्माकं सुमतिं स्तुतिं वोचः । ब्रूहि । दिवः स्तुतेर्नॄन्नेतॄनस्मान् सुक्षितिं शोभननिवासयुक्तं स्वस्तिमविनाशं वीहि । गमय ॥ वेतिरत्रांतर्भावितण्यर्थो द्रष्टव्यः ॥ वयं च द्विषो द्वेष्टॄन् शत्रूनंहांसि पापानि दुरिता तत्फलरूपाणि दुर्गमनानि तरेम । अतिक्रामेम । तथा ता तानि व्यवहितानि जन्मांतरकृतानि च पापादीनि तरेम । उक्त एवार्थो दार्ढ्याय पुनरुच्यते । हे अग्ने तवावसा रक्षणेन द्वेष्टृप्रभृतीनत्यंतं तरेम ॥

॥ इति चतुर्थस्य पंचमे द्वितीयो वर्गः ॥

अग्ने स क्षेषदित्यष्टर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं । अनुक्रांतं च । अग्नेऽष्टाविति ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे ।
यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः ॥ १ ॥

अग्ने । सः । क्षेषत् । ऋतऽपाः । ऋतेऽजाः । उरु । ज्योतिः । नशते । देवऽयुः । ते ।
यं । त्वं । मित्रेण । वरुणः । सऽजोषाः । देव । पासि । त्यजसा । मर्तं । अंहः ॥ १ ॥

हे अग्ने स यजमानः क्षेषत् । क्षियति । निवसति । चिरकालं जीवेदित्यर्थः । कीदृशो यजमानः । ऋतपा ऋतस्य यज्ञस्य पालक ऋतेजा यज्ञनिमित्तं जातः । उषित्वा च ते त्वदीयं देवयुर्देवानात्मन इच्छन् स यजमान उरु विस्तीर्णं ज्योतिः

सूर्याख्यं नशते। प्राप्नोति। हे देव द्योतमानाग्ने यं मर्तं मनुष्यं यजमानं मित्रेण वरुणः॥ तृतीयार्थे प्रथमा॥ वरुणेन च सजोषाः सह प्रीयमाणस्त्वं त्यजसा त्याजनसाधनेनायुधेनांहोऽंहसः पापात्पासि रक्षसि स यजमान इति पूर्वत्र संबंधः॥

॥ अथ द्वितीया ॥

ईजे यज्ञेभिः शशमे शमीभिर्ऋधद्वारायाग्नये ददाश।
एवा चन तं यशसामजुष्टिर्नांहो मर्तं नशते न प्रदृप्तिः॥२॥
ईजे। यज्ञेभिः। शशमे। शमीभिः। ऋधत्ऽवाराय। अग्नये। ददाश।
एव। चन। तं। यशसां। अजुष्टिः। न। अंहः। मर्तं। नशते। न। प्रऽदृप्तिः॥२॥

यो यजमान ऋधद्वाराय ऋधत्समृद्धं वारं वरणीयं धनं यस्य तादृशायाग्नये ददाश हवींषि ददाति स यजमानो यज्ञेभिः सर्वैर्यज्ञैरीजे। इष्टवान् भवति। तथा शमीभिः कर्मभिः कृच्छ्रचांद्रायणादिभिः शशमे। शांतश्च भवति। आग्नेयेन यागेन सर्वं फलं लभत इत्यर्थः। अपि च तं यजमानं यशसां यशस्विनां पुत्राणामजुष्टिरप्राप्तिर्नैव नशते। नैव प्राप्नोति। पुत्रवान्भवत्येवेत्यर्थः। तथा मर्तं मनुष्यं तमंहः पापं न नशते। तथा प्रदृप्तिरनर्थहेतुः प्रदर्पश्च तं न प्राप्नोति॥

॥ अथ तृतीया ॥

सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आ धीः।
हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः॥३॥
सूरः। न। यस्य। दृशतिः। अरेपाः। भीमा। यत्। एति। शुचतः। ते। आ। धीः।
हेषस्वतः। शुरुधः। न। अयं। अक्तोः। कुत्र। चित्। रण्वः। वसतिः। वनेऽजाः॥३॥

सूरो न सूर्यस्येव यस्याग्नेर्दृशतिर्दर्शनमरेपाः पापरहितं। हे अग्ने यत् यस्य ते तव शुचतो ज्वलतो धीर्धारयित्री ज्वाला भीमा भयंकरा सती आ समंतादेति गच्छति। योऽयमग्निर्हेषस्वतः शब्दयुक्ताः शुरुधो न शुचः शोकस्य रोधयित्रीर्गाश्चाक्तोः। अक्तुरिति रात्रिनाम। तेन च तत्र संचारी राक्षसादिर्लक्ष्यते। राक्षसादेः स्वभूता ददातीति शेषः। सोऽयं वसतिः सर्वेषामावासभूतो वनेजा अरण्ये जायमानः कुत्रा चित् क्वचिदेव स्थाने पर्वताग्रादौ रण्वो रमणीयो भवति॥

॥ अथ चतुर्थी ॥

तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा ।
विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् ॥४॥

तिग्मं । चित् । एम । महि । वर्पः । अस्य । भसत् । अश्वः । न । यमसानः । आसा ।
विऽजेहमानः । परशुः । न । जिह्वां । द्रविः । न । द्रवयति । दारु । धक्षत् ॥४॥

अस्याग्नेरेम गमनभूतो मार्गस्तिग्मं तीक्ष्णं स्प्रष्टुमशक्यत्वात् । अस्य च वर्पो रूपं महि महत् प्रभूतं भसत् । दीप्यते ॥ भस भर्त्सनदीप्त्योरिति धातुः ॥ कीदृशोऽग्निः । अश्वो न अश्व इवासास्येन यमसानस्तृणादिकं नियच्छन् । तथा परशुर्न । यथा परशुः स्वकीयां धारां काष्ठे प्रक्षिपति तथा स्वकीयां जिह्वां ज्वालां विजेहमानस्तरुगुल्मादौ प्रक्षिपन् । तथा दारु काष्ठं धक्षत् दहन् द्रविर्न । द्रविर्द्रावयिता स्वर्णकारः । स यथा स्वर्णादिकं द्रावयति तथा सर्वं वनं द्रावयति । मूर्तभूतं भस्मसात्करोतीत्यर्थः ॥

॥ अथ पंचमी ॥

स इदस्तेव प्रति धादसिष्यञ्छिशीत तेजोऽयसो न धाराम् ।
चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः ॥५॥

सः । इत् । अस्ताऽइव । प्रति । धात् । असिष्यन् । शिशीत । तेजः । अयसः । न । धाराम् ।
चित्रऽध्रजतिः । अरतिः । यः । अक्तोः । वेः । न । द्रुऽसद्वा । रघुपत्मऽजंहाः ॥५॥

स इत्स खल्वग्निरस्तेव बाणादेः क्षेप्तेव प्रतिधात् । स्वकीयज्वालां प्रतिधत्ते । यथा धन्वी लक्ष्याभिमुख्येन बाणं संधत्ते तथा ज्वालां संधत्त इत्यर्थः । प्रतिधाय चासिष्यन् ज्वालां प्रक्षेप्स्यन् तेजः स्वकीयं शिशीत । निश्यति । तीक्ष्णीकरोति । तत्र दृष्टांतः । अयसो न धारां । यथायोमयस्य परश्वादेर्धारां प्रक्षेप्तुकामस्तीक्ष्णीकरोति तद्वत् । तीक्ष्णीकृत्य च चित्रध्रजतिर्विचित्रगतिरक्तो रात्रेररतिरभिगंता वेर्न पक्षीव द्रुषद्वा वृक्षेषु सीदन् रघुपत्मजंहा लघुपतनसमर्थपादः । एवंभूतः सन् योऽग्निर्वर्तते स इति पूर्वत्रान्वयः ॥

॥ इति चतुर्थस्य पंचमे तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

स ईं रेभो न प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः ।
नक्तं य ईमरुषो यो दिवा नॄनमर्त्यो अरुषो यो दिवा नॄन् ॥ ६ ॥
सः । ईं । रेभः । न । प्रति । वस्ते । उस्राः । शोचिषा । ररपीति । मित्रऽमहाः ।
नक्तं । यः । ईं । अरुषः । यः । दिवा । नॄन् । अमर्त्यः । अरुषः । यः । दिवा । नॄन् ॥ ६ ॥

स ईं सोऽयमग्नी रेभो न स्तुत्यः सूर्य इवोस्रा दीप्ता ज्वालाः प्रतिवस्ते । आच्छादयति । तथा मित्रमहाः सर्वेषामनुकूलप्रकाशः सन् शोचिषा तेजसा रारपीति । भृशं शब्दं करोति । य ईमयमग्निर्नक्तं रात्रावरुष आरोचमानः सन् दिवाहनीव नॄन्मनुष्यान् स्वस्वकार्ये प्रेरयति । पुनर्यच्छब्दः पूरकः । तथामर्त्योऽमरणधर्मारुष आरोचमानो रोषरहितो वा योऽग्निर्दिवा द्योतमानेन तेजसा नॄन्नेतॄनात्मीयान्रश्मीन् प्रेरयति स इति पूर्ववत्संबंधः । यद्वा नक्तं रात्रौ योऽयमग्निररुष आरोचमानो यश्च मरणरहितोऽग्निर्दिवाह्नि नॄन्नेतॄन् देवान्हविर्भिः संयोजयति । यो दिवा नॄनिति पुनरुक्तिरादरार्था ॥

॥ अथ सप्तमी ॥

दिवो न यस्य विधतो नवीनोद्वृषा रुक्ष ओषधीषु नूनोत् ।
घृणा न यो ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी ॥ ७ ॥
दिवः । न । यस्य । विधतः । नवीनोत् । वृषा । रुक्षः । ओषधीषु । नूनोत् ।
घृणा । न । यः । ध्रजसा । पत्मना । यन् । आ । रोदसी इति । वसुना । दं । सुपत्नी इति सुऽपत्नी ॥ ७ ॥

दिवो न दीप्तस्य सूर्यस्येव विधतो विधातृ रश्मीकुर्वतो यस्याग्नेर्नवीनोत भृशं शब्दोऽभूत् । एतदेव व्याचष्टे । वृषा कामानां वर्षिता रुक्षो दीप्तः सोऽग्निरोषधीषु दह्यमानासु नूनोत् । भृशं शब्दमकरोत् । यश्च घृणा न संचलनशीलेन दीप्तेन वा ध्रजसा गमनशीलेन तेजसा पत्मनेतस्ततं उत्पतता यन् गच्छन् वर्तते सोऽग्निर्दं अस्मच्छत्रून् दमयन् सुपत्नी शोभनपतिके रोदसी द्यावापृथिव्यौ वसुना धनेनापूरयति ॥

॥ अथाष्टमी ॥

धायोभिर्वा यो युज्येभिरर्कैर्विद्युन्न दविद्योत्स्वेभिः शुष्मैः ।
शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत् ॥ ८ ॥

धायःऽभिः । वा । यः । युज्येभिः । अर्कैः । विऽद्युत् । न । दविद्योत् । स्वेभिः । शुष्मैः ।
शर्धः । वा । यः । मरुताम् । ततक्ष । ऋभुः । न । त्वेषः । रभसानः । अद्यौत् ॥ ८ ॥

योऽग्निर्धायोभिर्वा धारकैरश्वैरिव युज्येभिर्युज्यैः स्वयमेव युज्यमानैरर्कैरर्चनीयैर्दीप्तिभिर्गच्छति सोऽग्निर्विद्युन्न विद्युदिव स्वेभिः स्वकीयैः शुष्मैः शोषकैस्तेजोभिर्दविद्योत् । विद्योतते । यश्च मरुतामेतत्संज्ञकानां देवानां शर्धो वा बलमिव ततक्ष तनूकरोति सर्वं तीक्ष्णीकरोति । शोषयतीति यावत् । सोऽयमृभुर्न उरु भासमानः सूर्य इव त्वेषो दीप्तो रभसानो वेगं कुर्वन् अद्यौत् । विद्योतते । प्रकाशते ॥

॥ इति चतुर्थस्य पंचमे चतुर्थो वर्गः ॥

यथा होतरित्यष्टर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं । यथा होतरित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि ।
एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् ॥ १ ॥

यथा । होतरिति । मनुषः । देवऽताता । यज्ञेभिः । सूनो इति । सहसः । यजासि ।
एव । नः । अद्य । समना । समानान् । उशन् । अग्ने । उशतः । यक्षि । देवान् ॥ १ ॥

हे होतर्देवानामाह्वातः सहसः सूनो बलस्य पुत्राग्ने यथा येन प्रकारेण मनुषो मनोः प्रजापतेर्यजमानस्य देवताता । यज्ञनामैतत् । देवताततौ यज्ञे यज्ञेभिर्यजमानसाधनैर्हविर्भिर्यजासि देवान्यजसि एवैवं हे अग्ने नोऽस्माकमद्यास्मिन्यज्ञे समानान् त्वत्सदृशानिंद्रादीनुशन् कामयमानस्त्वमुशतः कामयमानान्यष्टव्यान् देवान् समना क्षिप्रं यक्षि । यज । यद्वा समानं मन्यंतेऽस्मिन् देवानिति समनो यज्ञः । तस्मिन्निति योज्यं ॥

॥ अथ द्वितीया ॥

स नो विभावा चक्षणिर्न वस्तोरग्निर्वंदारु वेद्यश्चनो धात् ।
विश्वायुर्यो अमृतो मर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः ॥२॥

सः । नः । विभाऽवा । चक्षणिः । न । वस्तोः । अग्निः । वंदारु । वेद्यः । चनः । धात् ।
विश्वऽआयुः । यः । अमृतः । मर्त्येषु । उषःऽभुत् । भूत् । अतिथिः । जातऽवेदाः ॥२॥

वस्तोरहनि चक्षणिर्न प्रकाशकः सूर्य इव विभावा विशेषेण दीप्यमानो वेद्यः सर्वैर्ज्ञातव्यो लंभनीयो वा सोऽग्निर्नोऽस्मभ्यं वंदारु वंदनीयं स्तुत्यं चनोऽन्नं धात् । दधातु । प्रयच्छत्वित्यर्थः । विश्वायुः सर्वान्नः सर्वेषां जीवनहेतुर्वामृतो मरणरहितोऽतिथिर्हविर्वहनाय सततगामी जातवेदा जातानां वेदिता जातधनो वा एवंभूतो योऽग्निर्मर्त्येषु मनुष्येषु यजमानेषूषर्भुद्भूत् उषःकालेऽग्निहोत्रहोमार्थं प्रबुद्धो भवति स इति पूर्वत्रान्वयः ॥

॥ अथ तृतीया ॥

द्यावो न यस्य पनयंत्यभ्वं भासांसि वस्ते सूर्यो न शुक्रः ।
वि य इनोत्यजरः पावकोऽश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥३॥

द्यावः । न । यस्य । पनयंति । अभ्वं । भासांसि । वस्ते । सूर्यः । न । शुक्रः ।
वि । यः । इनोति । अजरः । पावकः । अश्नस्य । चित् । शिश्नथत् । पूर्व्याणि ॥३॥

नेति संप्रत्यर्थे । उक्तं च । अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोगः । नि० ७.३१. । इति ॥ द्यावः स्तोतारः संप्रतीदानीं यस्याग्नेरभ्वं महत्कर्म पनयंति स्तुवंति सोऽग्निः सूर्यो न सूर्य इव शुक्रः शुक्लवर्णः सन् भासांसि तेजांसि वस्ते । आच्छादयति । यश्चाजरो जरारहितः पावकः सर्वस्य शोधकोऽग्निर्वीनोति भासा सर्वं व्याप्नोति सोऽयमश्नस्य चित् व्यापनशीलस्यापि राक्षसादेः पूर्व्याणि चिरंतनानि पुराणि शिश्नथत् । हिनस्ति ॥ श्नथ क्नथ हिंसायामिति धातुः ॥

॥ अथ चतुर्थी ॥

वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाज्मान्नं ।
स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यंतः ॥४॥

वद्मा। हि। सूनो इति। असि। अद्मऽसद्वा। चक्रे। अग्निः। जनुषा। अज्म। अन्नं।
सः। त्वं। नः। ऊर्जेऽसने। ऊर्जं। धाः। राजाऽइव। जेः। अवृके। क्षेषि। अंतरिति ॥४॥

हे सूनो सहसः पुत्र। यद्वा षू प्रेरणे। सर्वस्य प्रेरकाग्ने वद्मा वदनीयः स्तुत्योऽसि हि। परः पादः परोक्षकृतः। अद्मसद्वाद्मस्वदनीयेषु हविःषु सीदन् हविःस्वीकरणायोपविशन्नग्निर्जनुषा जन्मना स्वभावत एवाज्म। गृहनामैतत्। गृहमन्नं च यजमानानां चक्रे। करोति। ऊर्जसन ऊर्जस्यान्नस्य दातरग्ने नोऽस्मभ्यं स तादृशस्त्वमूर्जमन्नं धाः। देहि। तथा राजेव जेः। अस्मच्छत्रून् जय। एतत्सर्वार्थमवृके राक्षसादिभिर्बाधकैर्वियुक्तेऽस्मदीयेऽग्न्यागारेऽंतर्मध्ये क्षेषि। निवस ॥

॥ अथ पंचमी ॥

नितिक्ति यो वारणमन्नमत्ति वायुर्न राष्ट्र्यत्येत्यक्तून्।
तुर्याम यस्त आदिशामरातीरत्यो न ह्रुतः पततः परिह्रुत् ॥५॥
निऽतिक्ति। यः। वारणं। अन्नं। अत्ति। वायुः। न। राष्ट्री। अति। एति। अक्तून्।
तुर्याम। यः। ते। आऽदिशां। अरातीः। अत्यः। न। ह्रुतः। पततः। परिऽह्रुत् ॥५॥

योऽग्निर्वारणं तमसां निवारकं स्वकीयं तेजो नितिक्ति निश्यति तीक्ष्णीकरोति ॥ तिज निशान इति धातुः ॥ यश्चान्नं यष्टृभिर्दीयमानं हविर्लक्षणमत्ति भक्षयति। तथा च श्रूयते। अन्नादो वा एषोऽन्नपतिर्यदग्निरिति। सोऽग्निर्वायुर्न वायुरिव राष्ट्री। ईश्वरनामैतत्। राष्ट्रं राज्यं। तद्वान्। वायुर्यथा स्वमाहात्म्येन सर्वमीष्टे तद्वत्। सर्वस्येश्वर इत्यर्थः। तादृशः सन् अक्तून् रात्रीरत्येति। अतिक्रामति। तद्गतमंधकारं तिरस्करोतीत्यर्थः। वयं च त्वत्प्रसादात्तुर्याम तं हिंस्याम यो जनस्ते तुभ्यमादिशामादिश्यमानानां दीयमानानां हविषामरातीररातिरदाता ॥ छांदसो दीर्घः ॥ यद्वारातीर्धनस्यादातॄन् ते त्वां प्रत्यादिशामादेष्टॄणामाचक्षाणानामस्माकं यो जनो विरोधी तं हिंस्याम। त्वं चात्यो न शीघ्रगामी जात्यश्व इव ह्रुतो हिंसकान्पतत आभिमुख्येन गच्छतः शत्रून् परिह्रुत् परिगत्य हंता भव ॥ ह्वरतेर्हिंसार्थस्यैतद्रूपं ॥

॥ इति चतुर्थस्य पंचमे पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

आ सूर्यो न भानुमद्भिरर्कैरग्ने ततंथ रोदसी वि भासा ।
चित्रो नयत्परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन् ॥६॥
आ । सूर्यः । न । भानुमत्ऽभिः । अर्कैः । अग्ने । ततंथ । रोदसी इति । वि । भासा ।
चित्रः । नयत् । परि । तमांसि । अक्तः । शोचिषा । पत्मन् । औशिजः । न । दीयन् ॥६॥

हे अग्ने रोदसी द्यावापृथिव्यौ भासा दीप्त्या व्याततंथ । विशेषेणाच्छादयसि । तत्र दृष्टांतः । भानुमद्भिः प्रभावद्भिरर्कैरर्चनीयैः किरणैः सूर्यो न । यथा सूर्य आतनोति तद्वत् । परोऽर्द्धर्चः परोक्षकृतः । पत्मन् । पतत्यस्मिन्निति पत्म मार्गः । तस्मिन्नौशिजो न । उशिजः स्तोतारः । स्तुत्यतया तत्संबंध्यौशिजः सूर्यः । स इव दीयन् गच्छन् शोचिषा तेजसाक्तः संश्लिष्टः अत एव चित्रश्चायनीयोऽग्निस्तमांसि नैशान्यंधकाराणि परिणयत् । परिणयति । परितो गमयति । सर्वस्मादपि दिग्भागान्निवर्तयतीत्यर्थः ॥

॥ अथ सप्तमी ॥

त्वां हि मंद्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इंद्रं न त्वा शवसा देवता वायुं पृणंति राधसा नृतमाः ॥७॥
त्वां । हि । मंद्रऽतमं । अर्कऽशोकैः । ववृमहे । महि । नः । श्रोषि । अग्ने ।
इंद्रं । न । त्वा । शवसा । देवता । वायुं । पृणंति । राधसा । नृऽतमाः ॥७॥

हे अग्ने मंद्रतमं स्तुत्यतमं त्वामर्कशोकैरर्चनीयैः पूजनीयैः शोकैर्दीप्तिभिर्युक्तं हि यस्मात् ववृमहे वृणीमहे संभजामहे । यद्वार्कशोकैरर्चनीयैः प्रशस्यैर्दीप्तिकरणैः स्तोत्रैः साधनभूतैस्त्वां संभजामहे तस्मान्महि महन्नोऽस्मदीयं स्तोत्रं श्रोषि । शृणु । हे अग्ने नृतमाः स्तुतीनां नेतृतमा ऋत्विजः शवसा बलेन वायुं गंतारं । यद्वा वायुमिव शवसा युक्तमिंद्रं न इंद्रमिव देवता देवतात्मानं त्वां राधसा हविर्लक्षणेन धनेन पृणंति । प्रीणयंति ॥ देवताशब्दात् द्वितीयायाः सुपां सुलुगिति लुक् ॥

॥ अथाष्टमी ॥

नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः ।
ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः ॥८॥

नु । नः । अग्ने । अवृकेभिः । स्वस्ति । वेषि । रायः । पथिऽभिः । पर्षि । अंहः ।
ता । सूरिऽभ्यः । गृणते । रासि । सुम्नं । मदेम । शतऽहिमाः । सुऽवीराः ॥ ८ ॥

हे अग्ने नोऽस्मानवृकेभिः । वृकाः स्तेनाः । तद्रहितैः पथिभिर्मार्गै रायो धनानि नु क्षिप्रं स्वस्ति क्षेमेण वेषि । गमय । प्रापय । अंहोऽहंसः पापात्पर्षि । उक्तलक्षणैर्मार्गैः पारय चास्मान् । यानि त्वया सूरिभ्यः स्तोतृभ्यो देयानि सुम्नानि ता तानि सुम्नं सुम्नानि सुखानि गृणते स्तुवते मह्यं रासि । देहि । वयं च शतहिमाः शतं हेमंतान् संवत्सरान् सुवीराः । वीर्याज्जायंत इति वीराः पुत्रादयः । शोभनपुत्रपौत्रादिसहिताः संतो मदेम । हृष्याम ॥

॥ इति चतुर्थस्य पंचमे षष्ठो वर्गः ॥

हुवे व इति सप्तर्चं पंचमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं । तथा चानुक्रम्यते । हुवे वः सप्तेति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्यविष्ठं ।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक् ॥ १ ॥

हुवे । वः । सूनुं । सहसः । युवानं । अद्रोघऽवाचं । मतिऽभिः । यविष्ठं ।
यः । इन्वति । द्रविणानि । प्रऽचेताः । विश्वऽवाराणि । पुरुऽवारः । अध्रुक् ॥ १ ॥

हे अग्ने वः ॥ व्यत्ययेन बहुवचनं ॥ त्वां मतिभिर्मननीयैः स्तोत्रैर्हुवे । आह्वयामि । कीदृशं । सहसो बलस्य सूनुं पुत्रं । अग्निर्हि बलेन मथ्यमानो जायते । युवानं नित्यतरुणं फलस्य मिश्रयितारं वा अद्रोघवाचं । अद्रोग्धव्या प्रशस्ता स्तुतिरूपा वाक् यस्मिन् प्रयुज्यते तादृशं । यविष्ठमतिशयेन युवानं । प्रचेताः प्रकृष्टज्ञानः पुरुवारः पुरुभिर्बहुभिर्वरणीयः संभजनीयोऽध्रुगद्रोग्धा यजमानानां एवंभूतो योऽग्निर्विश्ववाराणि सर्वैर्वरणीयानि संभजनीयानि प्रशस्यानि द्रविणानि धनानीन्वति प्रेरयति । स्तोतृभ्यो ददातीति यावत् । तं त्वां हुव इति पूर्वत्र संबंधः ॥

॥ अथ द्वितीया ॥

त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके ॥ २ ॥

त्वे इति॑। वसू॑नि। पुरु॒ऽअ॒नी॒क॒। हो॒तः॒। दो॒षा। वस्तोः॑। आ। ई॒रि॒रे॒। य॒ज्ञिया॑सः।
क्षाम॑ऽइव। विश्वा॑। भुव॑नानि। यस्मि॑न्। सं। सौभ॑गानि। द॒धि॒रे। पा॒व॒के ॥२॥

हे पुर्वणीक बहुज्वाल होतर्देवानामाह्वातरग्ने त्वे त्वयि दोषा रात्रौ वस्तो-रहनि च यज्ञियासो यज्ञार्हा यजमाना वसूनि हविर्लक्षणानि धनान्येरिरे। आभिमुख्येन प्रेरयंति। प्रापयंति। जुह्वतीत्यर्थः। विश्वा विश्वानि सर्वाणि भुव-नानि भूतजातानि क्षामेव क्षमायां भूम्यामिव यस्मिन् पावके शोधकेऽग्नौ सौभगानि धनानि संदधिरे देवाः सम्यग्निहितवंतः। अग्नौ वामं वसु संन्यदध-तेति ब्राह्मणं। तस्मिंस्त्वयीति पूर्वत्र योज्यं॥

॥ अथ तृतीया ॥

त्वं वि॒क्षु प्र॒दिवः॑ सीद आ॒सु क्रत्वा॑ र॒थीर॑भवो॒ वार्या॑णां।
अत॑ इनोषि विध॒ते चि॑कित्वो॒ व्या॑नु॒षक् जा॑तवेदो॒ वसू॑नि ॥३॥

त्वं। वि॒क्षु। प्र॒ऽदिवः॑। सी॒दः॒। आ॒सु। क्रत्वा॑। र॒थीः। अ॒भ॒वः॒। वार्या॑णां।
अतः॑। इ॒नो॒षि॒। वि॒ध॒ते। चि॒कि॒त्वः॒। वि। आ॒नु॒षक्। जा॒त॒ऽवे॒दः॒। वसू॑नि ॥३॥

हे अग्ने त्वं प्रदिवः। पुराणनामैतत्। पुरातनकालीनासु विक्षु प्रजास्वासु परिदृश्यमानासु च सीदः। सीदसि। विश्वांतरात्मना वर्तसे। तथा क्रत्वात्मीयेन कर्मणा वार्याणां वरणीयानां धनानां रथीरभवः। रंहयिता यजमानेभ्यः प्राप-यिताभूः। अतः कारणात् हे चिकित्वो विद्वन् जातवेदो जातानां प्राणिनां वेदितरग्ने विधते परिचरते यजमानाय वसूनि धनान्यानुषगनुषक्तं सततं यथा भवति तथा वीनोषि। विविधं प्रेरयसि॥

प्रवर्ग्येऽभिष्टवे यो नः सनुत्य इति तृचः। सूत्रितं च। यो नः सनुत्यो अभि-दासदग्ने भवा नो अग्ने सुमना उपेताविति तृचाः। आ० ४.६.। इति॥

॥ तयोः प्रथमा सूक्ते चतुर्थी ॥

यो नः॒ सनु॑त्यो अ॒भि॒दास॑दग्ने॒ यो अंत॑रो मित्रमहो व॒नु॒ष्यात्।
तम॒जरे॑भि॒र्वृष॑भि॒स्तव॒ स्वैस्तपा॑ तपिष्ठ॒ तप॑सा॒ तप॑स्वान् ॥४॥

यः। नः॒। सनु॑त्यः। अ॒भि॒ऽदास॑त्। अ॒ग्ने॒। यः। अंत॑रः। मि॒त्र॒ऽम॒हः॒। व॒नु॒ष्यात्।
तं। अ॒जरे॑भिः। वृष॑ऽभिः। तव॑। स्वैः। तप॑। त॒पि॒ष्ठ॒। तप॑सा। तप॑स्वान् ॥४॥

हे अग्ने यः शत्रुः सनुत्यः । सनुतरित्यंतर्हितनाम । अंतर्हिते देशे वर्तमानः सन् नोऽस्मानभिदासत् उपक्षयति बाधते । यश्चांतरोऽभ्यंतरवर्ती सन् हे मित्रमहोऽनुकूलदीप्ते मित्राणां महयितर्वाग्ने वनुष्यात् हिंस्यात् तमुभयविधं हे तपिष्ठ तृप्तृतमाग्ने तपसा तेजसा तपस्वान्तेजस्वी त्वमजरेभिर्जरारहितैर्वृषभिर्वर्षितृभिर्वृष्टिहेतुभूतैस्तव स्वैः स्वभूतैरसाधारणैस्तेजोभिस्तप । दह ॥

॥ अथ पंचमी ॥

यस्ते॑ य॒ज्ञेन॑ स॒मिधा॒ य उ॒क्थैर॒र्केभिः॑ सूनो सहसो॒ ददा॑शत् ।
स मर्त्ये॑ष्वमृत॒ प्रचे॑ता रा॒या द्यु॒म्नेन॒ श्रव॑सा॒ वि भा॑ति ॥५॥

यः । ते॒ । य॒ज्ञेन॑ । स॒म्ऽइधा॑ । यः । उ॒क्थैः । अ॒र्केभिः॑ । सू॒नो॒ इति॑ । स॒ह॒सः॒ । ददा॑शत् ।
सः । मर्त्ये॑षु । अ॒मृ॒त॒ । प्रऽचे॑ताः । रा॒या । द्यु॒म्नेन॑ । श्रव॑सा । वि । भा॒ति॒ ॥५॥

हे सहसः सूनो बलस्य पुत्राग्ने ते त्वां यो यजमानो यज्ञेन यागेन ददाशत् परिचरति । यश्च समिधा समिंधनसाधनेनेध्मेन । यश्चोक्थैः शस्त्रैरर्केभिरर्चनीयैः स्तोत्रैश्च परिचरति हे अमृत मरणधर्मरहिताग्ने स यजमानो मर्त्येषु मनुष्येषु प्रचेताः प्रकृष्टज्ञानः सन् राया धनेन द्युम्नेन द्योतमानेन श्रवसा श्रवणीयेनान्नेन यशसा वा वि भाति । विशेषेण प्रकाशते ॥

॥ अथ षष्ठी ॥

स तत्कृ॑धीषि॒तस्तूय॑मग्ने॒ स्पृधो॑ बाधस्व॒ सह॑सा॒ सह॑स्वान् ।
यच्छ॒स्यसे॒ द्युभि॑र॒क्तो वचो॑भि॒स्तज्जु॑षस्व जरि॒तुर्घोषि॒ मन्म॑ ॥६॥

सः । तत् । कृ॒धि॒ । इ॒षि॒तः । तूय॑म् । अ॒ग्ने॒ । स्पृधः॑ । बा॒ध॒स्व॒ । सह॑सा । सह॑स्वान् ।
यत् । श॒स्यसे॑ । द्यु॒ऽभिः॑ । अ॒क्तः । वचः॑ऽभिः । तत् । जु॒ष॒स्व॒ । ज॒रि॒तुः । घोषि॑ । मन्म॑ ॥६॥

हे अग्ने स त्वमिषितः प्रेषितः सन् तूयं क्षिप्रं तत्कृधि । कुरु । किं तदित्यत आह । सहस्वान् बलवांस्त्वं स्पृधः स्पर्धमानान् सहसा बलेन परेषामभिभवनसमर्थेन तेजसा वा बाधस्व । विनाशय । द्युभिर्द्योतमानैस्तेजोभिरक्तो संसिक्तस्त्वं वचोभिः स्तुतिरूपैर्वाक्यैर्यच्छस्यसे यत्स्तूयसे । त्वामुद्दिश्य यत् स्तोत्रं स्तोतृभिः क्रियत इत्यर्थः । तन्मन्म मननीयं घोषि घोषणीयं जरितुः स्तोत्रं जुषस्व । सेवस्व ॥

अग्नये कामाय पुरोडाशमष्टाकपालमित्यस्याश्यामेत्येषा याज्या । सूचितं च । अश्याम तं काममग्ने तवोतीति कामाय । आ० २. १०. । इति ॥

॥ सैषा सप्तमी ॥

अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवीरं ।
अश्याम वाजमभि वाजयंतोऽश्याम द्युम्नमजराजरं ते ॥७॥

अश्याम । तं । कामं । अग्ने । तव । ऊती । अश्याम । रयिं । रयिऽवः । सुवीरं ।
अश्याम । वाजं । अभि । वाजयंतः । अश्याम । द्युम्नं । अजर । अजरं । ते ॥७॥

हे अग्ने ते तव संबंधिन्योती ऊत्या रक्षया तं काममश्याम । प्राप्नुयाम । तमेव कामं विवृणोति । हे रयिवो धनवन्नग्ने सुवीरं शोभनपुत्रादियुक्तं रयिं धनमश्याम । प्राप्नुयाम । तथा वाजयंतो वाजमन्नमात्मन इच्छंतो वयं वाजं त्वया दत्तमन्नमभि आभिमुख्येनाश्याम । प्राप्नुयाम । हे अजर जरारहिताग्ने त्वदीयमजरं जरारहितं द्युम्नं द्योतमानं यशश्चाश्याम । प्राप्नुयाम ॥

॥ इति चतुर्थस्य पंचमे सप्तमो वर्गः ॥

प्र नव्यसेति सप्तर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं । प्र नव्यसेत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र नव्यसा सहसः सूनुमच्छा यज्ञेन गातुमव इच्छमानः ।
वृश्चद्वनं कृष्णयामं रुशंतं वीती होतारं दिव्यं जिगाति ॥१॥

प्र । नव्यसा । सहसः । सूनुं । अच्छ । यज्ञेन । गातुं । अवः । इच्छमानः ।
वृश्चत्ऽवनं । कृष्णयामं । रुशंतं । वीती । होतारं । दिव्यं । जिगाति ॥१॥

गातुमुपगंतव्यं स्तोतव्यं वा सहसः सूनुं बलस्य पुत्रमग्निमवोऽन्नं रक्षणं वा इच्छमान इच्छन् स्तोता नव्यसा नवतरेण यज्ञेन युक्तः सन् अच्छाभिमुख्येन प्र जिगाति । प्रकर्षेण गच्छति । कीदृशमग्निं । वृश्चद्वनं वृक्णं छिन्नं दग्धं वनं येन तादृशं कृष्णयामं कृष्णवर्त्मानं रुशंतं श्वेतवर्णं वीती वीत्या कांतेन यज्ञेन होतारं यष्टारं दिव्यं दिवि भवं ॥

॥ अथ द्वितीया ॥

स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः ।
यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन् ॥२॥

सः । श्वितानः । तन्यतुः । रोचनऽस्थाः । अजरेभिः । नानदत्ऽभिः । यविष्ठः ।
यः । पावकः । पुरुऽतमः । पुरूणि । पृथूनि । अग्निः । अनुऽयाति । भर्वन् ॥२॥

सोऽग्निः श्वितानः श्वेतमानः श्वेतवर्णो वर्तते । तन्यतुः शब्दकारी रोचनस्थाः । रोचंतेऽस्मिन् ग्रहनक्षत्रादीनीति रोचनमंतरिक्षं । तत्र स्थितोऽजरेभिर्जरारहितैर्नानदद्भिरत्यर्थं शब्दं कुर्वद्भिर्मरुद्भिर्युक्तो रश्मिभिर्वा यविष्ठो युवतमः । यः पावकः शोधकोऽग्निः पुरुतमोऽतिशयेन प्रभूतः सन् पुरूणि बहूनि पृथूनि स्थूलानि काष्ठानि भर्वन् भक्षयन् अनुयाति अनुगच्छति स इत्थमित्थं वर्तत इति पूर्वत्र संबंधः ॥

गार्हपत्यादीनां मिथः संसर्गेऽग्नये विविचय इष्टिः कर्तव्या । तत्र वि त इत्येषानुवाक्या । आ० ३. १३. ॥

॥ सैषा तृतीया ॥

वि ते विष्वग्वातजूतासो अग्ने भामासः शुचे शुचयश्चरंति ।
तुविम्रक्षासो दिव्या नवग्वा वना वनंति धृषता रुजंतः ॥३॥

वि । ते । विष्वक् । वातऽजूतासः । अग्ने । भामासः । शुचे । शुचयः । चरंति ।
तुविऽम्रक्षासः । दिव्याः । नवऽग्वाः । वना । वनंति । धृषता । रुजंतः ॥३॥

हे शुचे शुद्ध दीप्त वाग्ने ते त्वदीया वातजूतासो वातेन प्रेरिताः शुचयो निर्मला भामासो दीप्तयो विष्वक् सर्वतो वि चरंति । विविधं गच्छंति । तुविम्रक्षासो बहुकाष्ठानि स्पृशंतो दिव्या दिवि द्योतमानेऽग्नौ भवा नवग्वा नूतनगमनास्ते रश्मयो वना वनानि वनंति । संभजंते । दहंतीत्यर्थः । किं कुर्वंतः । धृषता धर्षकेण तेजसा रुजंतो वनानि भंजयंतः ॥

॥ अथ चतुर्थी ॥

ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपंति विषितासो अश्वाः ।
अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः ॥४॥

ये। ते। शुक्रासः। शुचयः। शुचिष्मः। क्षां। वपंति। विऽसितासः। अश्वाः।
अध। भ्रमः। ते। उर्विया। वि। भाति। यातयमानः। अधि। सानु। पृश्नेः ॥४॥

हे शुचिष्मो दीप्तिमन्नग्ने ते तव शुक्रासः शुभ्रा ये शुचयो दीप्तयो क्षां पृथिवीं भूमिं वपंति मुंडयंति। केशस्थानीयानोषधिवनस्पतीन् दहंतीत्यर्थः। अग्निर्हं दाति रोमा पृथिव्याः। ऋग्वे० १.६५.४.। इति निगमांतरं। ते रश्मयो विषितासो विमुक्ता अश्वा इव। इतस्ततो गच्छंतीति शेषः। अधास्मिन्काले ते त्वदीयो भ्रमो भ्रमणशीलो ज्वालासमूहः पृश्नेर्नानारूपाया भूमेरधि उपरि सानु समुच्छ्रितं देशं पर्वताग्रादिकं प्रति यातयमानः स्वकीयमयं व्यापारयन् उर्वियोरु बहुलं वि भाति। विशेषेण प्रकाशते ॥

॥ अथ पंचमी ॥

अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना।
शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वनानि ॥५॥

अध। जिह्वा। पापतीति। प्र। वृष्णः। गोषुऽयुधः। न। अशनिः। सृजाना।
शूरस्यऽइव। प्रऽसितिः। क्षातिः। अग्नेः। दुःऽवर्तुः। भीमः। दयते। वनानि ॥५॥

अधापि च वृष्णो वर्षितुरग्नेर्जिह्वा ज्वाला प्रपापतीति। प्रकर्षेण पुनःपुनः पतति। गच्छति। तत्र दृष्टांतः। गोषुयुधो नाशनिः सृजाना। असुरप्रहृतासु गोषु युध्यन्निंद्रो गोषुयुत्। तस्मात्सृज्यमानाशनिर्वज्र इव। तथा शूरस्येव शौर्योपेतस्य नरस्य प्रसितिः प्रबंधनं यथान्यैर्दुःसहमेवमग्नेः क्षातिर्ज्वाला सोढुमशक्येत्यर्थः। क्षीयंते दह्यंतेऽस्यामोषधिवनस्पतय इति क्षायतेरधिकरणे क्तिन्। अपि च दुर्वर्तुर्दुर्वारोऽन्यैर्वारयितुमशक्यो भीमो भयंकरोऽग्निर्वनानि दयते। दहति ॥ दयतिश्च दहतिकर्मा ॥

॥ अथ षष्ठी ॥

आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता ततंथ।
स बाधस्वाप भया सहोभिः स्पृधो वनुष्यन्वनुषो नि जूर्व ॥६॥

आ। भानुना। पार्थिवानि। ज्रयांसि। महः। तोदस्य। धृषता। ततंथ।
सः। बाधस्व। अप। भया। सहःऽभिः। स्पृधः। वनुष्यन्। वनुषः। नि। जूर्व ॥६॥

हे अग्ने भानुना दीप्त्या पार्थिवानि पृथिव्यां भवानि जयांसि ॥ जयतिर्गतिकर्मा ॥ गंतव्यानि स्थानानि महो महतस्तोदस्य प्रेरकस्य धृषता धर्षकेण रश्मिना सहाततंथ । आस्तृणासि । आच्छादयसि । स त्वं भया भयकरणान्यपबाधस्व । तथा सहोभिरभिभवनसमर्थैर्बलैस्तेजोभिर्वा स्पृधः स्पर्धमानान्वनुष्यन् हिंसन् वनुषो हिंसकान् शत्रून्निजूर्व । निजहि ॥ जूर्वतिर्हंतिकर्मा ॥

उखासंभरणीयेष्टावग्नेः क्षत्रवतः स चित्रेत्येषा याज्या । सूत्रितं च । स चित्र चित्रं चितयंतमस्मे अग्निरीशे बृहतः क्षत्रियस्य । आ॰ ४.१. । इति ॥

॥ सैषा सप्तमी ॥

स चि॑त्र चि॒त्रं चि॒तय॑ंतमस्मे चित्र॑क्षत्र चि॒त्रत॑मं वयो॒धां ।

चं॒द्रं र॒यिं पु॑रु॒वीरं॑ बृ॒हंतं॒ चंद्र॑ चं॒द्राभि॑र्गृण॒ते यु॑वस्व ॥ ७ ॥

सः । चि॒त्र॒ । चि॒त्रं । चि॒तय॑ंतं । अ॒स्मे इति॑ । चित्र॑ऽक्षत्र । चित्र॑ऽतमं । व॒यः॒ऽधां ।

चं॒द्रं । र॒यिं । पु॒रु॒ऽवीरं॑ । बृ॒हंतं॑ । चंद्र॑ । चं॒द्राभिः॑ । गृ॒ण॒ते । यु॒व॒स्व॒ ॥ ७ ॥

हे चित्र चायनीय हे चित्रक्षत्र विचित्रबल चायनीयधन वा हे चंद्राह्लादकाग्ने स तादृशस्त्वं चंद्राभिराह्लादयित्रीभिः स्तुतिभिर्गृणते स्तुवते । वचनव्यत्ययः । स्तुवद्भ्योऽस्मे अस्मभ्यं दातुं रयिं धनं युवस्व । पृथक्कुरु । कीदृशं रयिं । चित्रं चायनीयं चितयंतं ज्ञापयंतं । धनेन हि पुरुषः प्रख्यायते । चित्रतममतिशयेनाश्चर्यभूतं वयोधां वयसोऽन्नस्य धातारं प्रदातारं चंद्रमाह्लादकं पुरुवीरं पुरुभिर्बहुभिर्वीरैः पुत्रपौत्रादिभिर्युक्तं बृहंतं महांतं । ईदृशं धनमस्मभ्यं प्रयच्छेत्यर्थः ॥

॥ इति चतुर्थस्य पंचमेऽष्टमो वर्गः ॥

मूर्धानमिति सप्तर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकं । षष्ठीसप्तम्यौ जगत्यौ शिष्टाः पंच त्रिष्टुभः । तथा चानुक्रांतं । मूर्धानं वैश्वानरीयं हि द्विजगत्यंतमिति ॥ गतः सूक्तविनियोगः ॥ विषुवत्याग्निमारुत आद्यस्तृचो वैकल्पिकः स्तोत्रियः । तथैव सूत्रितं च । मूर्धानं दिवो अरतिं पृथिव्या मूर्धा दिवो नाभिरग्निः पृथिव्या इति वा । आ॰ ८.६. । इति ॥

॥ तत्र प्रथमा ॥

मू॒र्धानं॑ दि॒वो अ॑र॒तिं पृ॑थि॒व्या वै॑श्वान॒रमृ॒त आ जा॒तम॒ग्निं ।

क॒विं स॒म्राज॒मति॑थिं॒ जना॑नामा॒सन्ना पात्रं॑ जनयंत दे॒वाः ॥ १ ॥

मूर्द्धानं । दिवः । अरतिं । पृथिव्याः । वैश्वानरं । ऋते । आ । जातं । अग्निं ।
कविं । संऽराजं । अतिथिं । जनानां । आसन् । आ । पात्रं । जनयंत । देवाः ॥१॥

मूर्द्धानं शिरोभूतं । कस्य । दिवो द्युलोकस्य पृथिव्याः प्रथिताया भूमेररतिं गंतारं । यद्वा गंतव्यं स्वामिनं वैश्वानरं विश्वेषां नराणां संबंधिनमृते । ऋतमिति सत्यस्य यज्ञस्य वा नाम । निमित्तसप्तम्येषा । ऋतनिमित्तमा आभिमुख्येन जातं सृष्ट्यादावुत्पन्नं कविं क्रांतदर्शिनं सम्राजं सम्यग्राजमानं जनानां यजमानानामतिथिं हविर्वहनाय सततं गंतारं । यद्वातिथिवत्पूज्यं । आसन्नासन्यास्ये ॥ द्वितीयार्थे सप्तमी ॥ आस्यभूतं । अग्निलक्षणेनास्येन हि देवा हवींषि भुंजते । पात्रं पातारं रक्षकं । यद्वास्येन धारकं । एवंगुणविशिष्टं वैश्वानराग्निं देवाः स्तोतार ऋत्विजो देवा एव वा आ जनयंत । यद्वाभिमुख्येनाजीजनन् । अरण्योः सकाशादुदपादयन् ॥

॥ अथ द्वितीया ॥

नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवंत ।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयंत देवाः ॥२॥
नाभिं । यज्ञानां । सदनं । रयीणां । महां । आऽहावं । अभि । सं । नवंत ।
वैश्वानरं । रथ्यं । अध्वराणां । यज्ञस्य । केतुं । जनयंत । देवाः ॥२॥

यज्ञानां ज्योतिष्टोमादियागानां नाभिं नहनं बंधकं तथा रयीणां धनानां सदनं स्थानमेकनिलयं महां महांतमाहावं । आहूयंतेऽस्मिन्नाहुतय इत्याहावः । तादृशं । यद्वा वृष्ट्युदकधारणमाहावं निपानस्थानीयं । एवंभूतमग्निमभि. अभितः सं नवंत । स्तोतारः सम्यक् स्तुवंति । तथा वैश्वानरं विश्वेषां नराणां संबंधिनमध्वराणां यज्ञानां रथ्यं रथिनं । यथा रथी स्वरथं नयति तद्वन्नेतारं ग्राहयितारं गमयितारं यज्ञस्य केतुं प्रज्ञापकं । एवंविधमग्निं देवाः स्तोतार ऋत्विजो देवा एव वा जनयंत जनयंति । मंथनेनोत्पादयंति ॥

॥ अथ तृतीया ॥

त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः ।
वैश्वानर त्वमस्मासु धेहि वसूनि राजन्स्पृहयाय्याणि ॥३॥

त्वत् । विप्रः । जायते । वाजी । अग्ने । त्वत् । वीरासः । अभिमातिऽसहः ।
वैश्वानर । त्वं । अस्मासु । धेहि । वसूनि । राजन् । स्पृहयाय्याणि ॥३॥

हे अग्ने वाजी हविर्लक्षणान्नवान्पुरुषस्त्वत् त्वत्तः सकाशात् विप्रो मेधावी जायते । तुभ्यं हविर्दानेन मेधावी भवति । तथा वीरासो वीरास्त्वत् त्वत्तोऽभिमातिषाहोऽभिमातीनां शत्रूणामभिभवितारो जायंते । यस्मादेवं तस्मात् हे वैश्वानर राजन् राजमानाग्ने त्वमस्मासु त्वद्भक्तेषु स्पृहयाय्याणि स्पृहणीयानि वसूनि धनानि धेहि । निधेहि ॥

॥ अथ चतुर्थी ॥

त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवंते ।
तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ॥४॥
त्वां । विश्वे । अमृत । जायमानं । शिशुं । न । देवाः । अभि । सं । नवंते ।
तव । क्रतुऽभिः । अमृतऽत्वं । आयन् । वैश्वानर । यत् । पित्रोः । अदीदेः ॥४॥

हे अमृत मरणधर्मरहिताग्ने विश्वे सर्वे देवाः स्तोतारो जायमानमरण्योः सकाशादुत्पद्यमानं त्वां शिशुं न पुत्रमिवाभिसंनवंते । अभिसंस्तुवंति । यद्वा दीव्यंतीति देवा रश्मयः । ते सर्वे जायमानं त्वामभिसंनवंते अभिसंगच्छंते यथा पितरः पुत्रमभिगच्छंति । अपि च हे वैश्वानराग्ने यद्यदा पित्रोः पालयित्र्योर्द्यावापृथिव्योर्मध्येऽदीदेः दीप्यसे तदानीं तव त्वदीयैः क्रतुभिः कर्मभिर्ज्योतिष्टोमादिभिर्यागैरमृतत्वं देवत्वमायन् । यजमानाः प्राप्नुवंति ॥

॥ अथ पंचमी ॥

वैश्वानर तव तानि व्रतानि महान्यग्ने नकिरा दधर्ष ।
यज्जायमानः पित्रोरुपस्थेऽविंदः केतुं वयुनेष्वह्नां ॥५॥
वैश्वानर । तव । तानि । व्रतानि । महानि । अग्ने । नकिः । आ । दधर्ष ।
यत् । जायमानः । पित्रोः । उपऽस्थे । अविंदः । केतुं । वयुनेषु । अह्नां ॥५॥

हे वैश्वानर विश्वेषां नराणां संबंधिन्नग्ने तव त्वदीयानि तानि प्रसिद्धानि व्रतानि कर्माणि महानि महांति नकिरादधर्ष । न कश्चनान्यो धर्षयति । बाधते । यद्यदा त्वं पित्रोर्द्यावापृथिव्योरुपस्थ उपस्थानेऽंतरिक्षे वयुनेषु गंतव्येषु मार्गेषु

जायमानः सन् अह्नां केतुं प्रज्ञापकं सूर्यं स्वर्भानुनावृतमविंदः अलंभयः। तमोरू-पमसुरं स्वतेजसा निवारयन्नस्थापय इत्यर्थः। तदा तानि व्रतानीति पूर्वत्रान्वयः॥

॥ अथ षष्ठी ॥

वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना।
तस्येदु विश्वा भुवनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः ॥६॥

वैश्वानरस्य। विऽमितानि। चक्षसा। सानूनि। दिवः। अमृतस्य। केतुना।
तस्य। इत्। ऊं इति। विश्वा। भुवना। अधि। मूर्धनि। वयाःऽइव। रुरुहुः। सप्त।
विऽस्रुहः ॥६॥

वैश्वानरस्य विश्वनरहितस्याग्नेश्चक्षसा तेजसामृतस्योदकस्य केतुना प्रज्ञापकेन दिवो द्युलोकस्य सानूनि समुच्छ्रितस्थलानि नक्षत्ररूपाणि विमितानि निर्मितानि। यद्वा दिवोऽतरिक्षस्य सानूनि समुच्छ्रितप्रदेशा मेघात्मका विमितानि निर्मिताः। धूमविकारत्वात्तेषां। तस्येदु तस्यैव वैश्वानरस्य मूर्धनि मूर्धस्थानीय उपरिवर्तमाने धूमे मेघात्मना परिणते विश्वा विश्वानि व्याप्तानि भुवना भुवनान्युदकान्यधि वसंति। यद्वा वैश्वानरात्मकस्य परब्रह्मणो मूर्धन्युपरिप्रदेशे सर्वाणि भूतजातान्यधिवसंति। तथा वयाः शाखा इव सप्त सर्पणशीलाः सप्तसंख्या वा विस्रुहो नद्यश्च गंगाद्या रुरुहुः। रोहंति। अस्मादेव वैश्वानरात् प्रादुर्भवंति। आहुतिद्वारा सकलं जगदग्नेः सकाशादुत्पद्यत इत्यर्थः॥

॥ अथ सप्तमी ॥

वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः।
परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता ॥७॥

वि। यः। रजांसि। अमिमीत। सुऽक्रतुः। वैश्वानरः। विः। दिवः। रोचना। कविः।
परि। यः। विश्वा। भुवनानि। पप्रथे। अदब्धः। गोपाः। अमृतस्य। रक्षिता ॥७॥

सुक्रतुः सुकर्मा वैश्वानरो विश्वेषां नराणां हितो योऽग्नी रजांस्युदकानि लोकान्वा व्यमिमीत निर्मितवान्। तथा दिवो द्युलोकस्य संबंधीनि रोचना रोचमानानि दीप्यमानानि नक्षत्रादीनि कविः क्रांतदर्शी सन् योऽग्निर्व्यमिमीत। यश्च विश्वा सर्वाणि भुवनानि भूतजातानि व्याप्तान्युदकानि वा परिपप्रथे

परितोऽप्रथयत् सोऽयमदब्धः केनाप्यहिंसितो गोपाः सर्वस्य गोपायिता रक्षितामृतस्यामरणहेतोरुदकस्य रक्षिता पालयिता सन् वर्तत इति शेषः ॥

॥ इति चतुर्थस्य पंचमे नवमो वर्गः ॥

पृक्षस्येति सप्तर्चमष्टमं सूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकं । आदितः षड्जगत्यः सप्तमी त्रिष्टुप् । तथा चानुक्रांतं । पृक्षस्यांत्या त्रिष्टुबिति ॥ चातुर्विंशिकेऽहन्याग्निमारुत इदं सूक्तं वैश्वानरीयनिविद्धानं । सूचितं च । पृक्षस्य वृष्णो वृष्णे शर्धाय । आ० ७.४. । इति ॥ आभिप्लविके पृष्ठ्याभिप्लवषडहयोः पंचमेऽहनीदमेव सूक्तं वैश्वानरनिविद्धानं । सूचितं च । पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुतं । आ० ७.७. । इति ॥ विषुवत्याग्निमारुत आद्यौ तृचौ स्तोत्रियानुरूपौ । सूचितं च । पृक्षस्य वृष्णो अरुषस्य नू सह इति स्तोत्रियानुरूपौ । आ० ८.६. । इति ॥

॥ तत्र प्रथमा ॥

पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा जातवेदसः ।
वैश्वानराय मतिर्नव्यसी शुचिः सोमइव पवते चारुरग्नये ॥१॥
पृक्षस्य । वृष्णः । अरुषस्य । नु । सहः । प्र । नु । वोचं । विदथा । जातऽवेदसः ।
वैश्वानराय । मतिः । नव्यसी । शुचिः । सोमःऽइव । पवते । चारुः । अग्नये ॥१॥

पृक्षस्य संपृक्तस्य व्याप्तस्य । यद्वा पृक्षं हविर्लक्षणमन्नं । तद्वतः । वृष्णो वर्षितुररुषस्यारोचमानस्य जातवेदसो जातानां वेदितुर्वैश्वानराग्नेः सहो बलमभिभवनसमर्थं विदथा विदथे यज्ञे नु क्षिप्रं प्र वोचं । प्रब्रवीमि । प्रकर्षेण स्तौमीत्यर्थः । एको नुशब्दः पूरकः । नव्यसी नवतरा शुचिर्निर्मला यद्वा स्तोतॄणां शोधयित्री चारुः शोभना मतिर्मननीया स्तुतिश्चास्मै वैश्वानरायाग्नये पवते । मत्सकाशात्स्रवति । स्वयमेव निर्गच्छतीत्यर्थः । सोम इव । यथा सोमो दशापवित्रात्स्रवति तद्वत् ॥

॥ अथ द्वितीया ॥

स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत ।
व्यं१तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् ॥२॥

सः। जायमानः। परमे। विऽओमनि। व्रतानि। अग्निः। व्रतऽपाः। अरक्षत।
वि। अंतरिक्षं। अमिमीत। सुऽक्रतुः। वैश्वानरः। महिना। नाकं। अस्पृशत् ॥२॥

स वैश्वानरोऽग्निर्व्रतपा व्रतस्य पालकः परम उत्कृष्टे व्योमनि व्योम्न्याकाशे जायमानः सूर्यात्मना प्रादुर्भवन् व्रतानि कर्माणि लौकिकानि वैदिकानि चारक्षत। रक्षति। अंतरिक्षं च व्यमिमीत। एतदुपलक्षितांस्त्रीन् लोकान्निर्मितवान्। तथा सुक्रतुः शोभनकर्मा वैश्वानरोऽग्निर्महिना स्वमहिम्ना तेजसा नाकं द्युलोकमस्पृशत्। स्पृशति स्म ॥

॥ अथ तृतीया ॥

व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽतर्वावदकृणोज्ज्योतिषा तमः।
वि चर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यं ॥३॥

वि। अस्तभ्नात्। रोदसी इति। मित्रः। अद्भुतः। अंतःऽवावत्। अकृणोत्। ज्योतिषा। तमः।
वि। चर्मणी इवेति चर्मणीऽइव। धिषणे इति। अवर्तयत्। वैश्वानरः। विश्वं। अधत्त।
वृष्ण्यं ॥३॥

मित्रो मित्रभूतः सर्वेषामद्भुतो महान् आश्चर्यभूतो वा वैश्वानरोऽग्नी रोदसी द्यावापृथिव्यौ व्यस्तभ्नात्। विशेषेण स्तंभितवान्। यथाधो न पततस्तथा स्वकीयदेशे स्थापितवानित्यर्थः। तथा ज्योतिषा तेजसा तमोऽधकारं चांतर्वावदंतर्हितं तिरोहितमकृणोत्। अकरोत् ॥ वावदिति वातेर्गतिकर्मणो यङ्लुगंतस्य रूपं ॥ अपि च धिषणे धारयित्र्यौ द्यावापृथिव्यौ चर्मणी इव यथा पशोर्विशसिता द्वे चर्मणी शोषणार्थं प्रसारयति तथा व्यावर्तयत्। विवृते विस्तृते अकरोत्। किं बहुना वैश्वानरोऽयमग्निर्विश्वं सर्वं वृष्ण्यं वीर्यमधत्त। धत्ते। धारयति ॥

॥ अथ चतुर्थी ॥

अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुर्ऋग्मियं।
आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः ॥४॥

अपां। उपऽस्थे। महिषाः। अगृभ्णत। विशः। राजानं। उप। तस्थुः। ऋग्मियं।
आ। दूतः। अग्निं। अभरत्। विवस्वतः। वैश्वानरं। मातरिश्वा। पराऽवतः ॥४॥

आप इत्यंतरिक्षनाम । अपामंतरिक्षस्योपस्थ उपस्थाने मध्ये महिषाः । महन्नामैतत् । महांतो मरुतोऽगृभ्णत । अगृह्णन् । इमं वैश्वानरं वैद्युतात्मना वर्तमानमजानन्नित्यर्थः । गृहीत्वा च विशः प्रजा राजानं स्वामिनमृग्मियमर्चनीयमुपतस्थुः । अस्तुवन् । अपि चेमं वैश्वानरमग्निं पुरा सूर्यसमीपे विद्यमानं दूतो वेगवान् देवानां दूतो वा मातरिश्वा वायुः परावतो दूरदेशाद्विवस्वत आदित्यादाभरत् । इमं लोकं प्रत्याजहार ॥

॥ अथ पंचमी ॥

युगेयुगे विदथ्यं गृणद्भ्योऽग्ने रयिं यशसं धेहि नव्यसीं ।
पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा ॥५॥
युगेऽयुगे । विदथ्यं । गृणत्ऽभ्यः । अग्ने । रयिं । यशसं । धेहि । नव्यसीं ।
पव्याऽईव । राजन् । अघऽशंसं । अजर । नीचा । नि । वृश्च । वनिनं । न । तेजसा ॥५॥

हे अग्ने युगे युगे काले काले विदथ्यं । विदथो यज्ञः । तदर्हं त्वामुद्दिश्य नव्यसीं नवतरां स्तुतिं गृणद्भ्य उच्चारयितृभ्योऽस्मभ्यं रयिं धनं यशसं यशस्विनं पुत्रं च धेहि । विधेहि । कुरु । किंच हे राजन् राजमानाजर जरारहिताग्ने पव्येव वज्रेणेवात्मीयेन तेजसा वनिनं न वृक्षमिवाघशंसमघस्यानर्थस्य शंसितारं शत्रुं नीचा नीचीनो न्यग्भूतो यथा भवति तथा निवृश्च । निजहि ॥

॥ अथ षष्ठी ॥

अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यं ।
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ॥६॥
अस्माकं । अग्ने । मघवत्ऽसु । धारय । अनामि । क्षत्रं । अजरं । सुऽवीर्यं ।
वयं । जयेम । शतिनं । सहस्रिणं । वैश्वानर । वाजं । अग्ने । तव । ऊतिऽभिः ॥६॥

हे अग्ने अस्माकं ॥ सप्तम्यर्थे षष्ठी ॥ अस्मासु मघवत्सु हविर्लक्षणेन धनेन युक्तेषु क्षत्रं धनं धारय । स्थापय । कीदृशं । अनाम्यनमनीयमनपहार्यमजरं जरारहितमनश्वरं सुवीर्यं शोभनवीर्योपेतं । किंच हे वैश्वानराग्ने तवोतिभिस्त्वत्संबंधिभी रक्षणैर्वयं शतिनं शतसंख्यायुक्तं शतपुरुषयुक्तं वा तथा सहस्रिणं वाजमन्नं जयेम । लभेमहि ॥

॥ अथ सप्तमी ॥

अदब्धेभिस्तव गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन् ।
रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः ॥७॥
अदब्धेभिः । तव । गोपाभिः । इष्टे । अस्माकं । पाहि । त्रिऽसधस्थ । सूरीन् ।
रक्ष । च । नः । ददुषां । शर्धः । अग्ने । वैश्वानर । प्र । च । तारीः । स्तवानः ॥७॥

हे इष्टे यष्टव्य एषणीय वा त्रिषधस्थ त्रिषु लोकेषु सहावस्थायिन् यद्वाहवनीयादिषु त्रिष्वायतनेषु यष्टव्यैर्देवैः सहावतिष्ठमानाग्ने अदब्धेभिः केनाप्यहिंसितैस्तव त्वदीयैर्गोपाभिर्गोपकै रक्षकैस्तेजोभिरस्माकं सूरीनस्मदीयान् स्तोतॄन् पाहि । रक्ष । हे वैश्वानराग्ने ददुषां हवींषि दत्तवतां नोऽस्माकं शर्धो बलं रक्ष च । स्तवानः स्तूयमानस्त्वं प्र च तारीः । प्रवर्धय च ॥

॥ इति चतुर्थस्य पंचमे दशमो वर्गः ॥

अहश्चेति सप्तर्चं नवमं सूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकं । अनुक्रांतं च । अहश्चेति ॥ व्यूळ्हे दशरात्रे षष्ठेऽहन्याग्निमारुतशस्त्रे वैश्वानरनिविद्धानमिदं । सूत्र्यते हि । अहश्च कृष्णं मध्वो वो नाम । आ॰ ८.८. । इति ॥

॥ तत्र प्रथमा ॥

अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥१॥
अहरिति । च । कृष्णं । अहः । अर्जुनं । च । वि । वर्तेते इति । रजसी इति । वेद्याभिः ।
वैश्वानरः । जायमानः । न । राजा । अव । अतिरत् । ज्योतिषा । अग्निः । तमांसि ॥१॥

आहरति पुरुषोऽस्मिन्कर्माणीत्यहः । कृष्णं कृष्णवर्णं । एतत्सामानाधिकरण्यादहःशब्दो रात्रिवाचकः । तमसा कृष्णवर्णा रात्रिश्चार्जुनं च सौरेण तेजसा शुक्लवर्णमहो दिवसश्च रजसी स्वस्वभासा सर्वं जगद्रंजयंतौ वेद्याभिर्वेदितव्याभिरनुकूलतया ज्ञातव्याभिः स्वप्रवृत्तिभिर्विवर्तेते । विविधं पर्यावर्तेते । यद्वा रजसी द्यावापृथिव्यौ । उपलक्षणमेतत् । लोकत्रयं प्रत्यावर्तेते । एतच्च वैश्वानराग्नेराज्ञयेति शेषः । स हि देवतात्वेनात्र प्रतिपाद्यः । स च वैश्वानरोऽग्निर्जाय-

मानो न राजा प्रादुर्भवन् प्रवर्धमानो राजेव ज्योतिषा तेजसा तमांस्यवातिरत् ॥ अवतिरतिर्वधकर्मा ॥ अवतिरति । विनाशयति ॥

॥ अथ द्वितीया ॥

नाहं तंतुं न वि जानाम्योतुं न यं वयंति समरेऽतमानाः ।
कस्य स्वित्पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा ॥२॥

न । अहं । तंतुं । न । वि । जानामि । ओतुं । न । यं । वयंति । संऽअरे । अतमानाः ।
कस्य । स्वित् । पुत्रः । इह । वक्त्वानि । परः । वदाति । अवरेण । पित्रा ॥२॥

वैश्वानरस्य महत्त्वमाख्यास्यन्नृषिस्तदर्थं यज्ञं वस्त्रात्मकतया रूपयन् तस्य दुर्ज्ञानत्वमनया प्रतिपादयतीति यज्ञवादिनो मन्यंते । तंतुं । तंतवः पटस्य प्रागायतानि सूत्राणि । तानि च यज्ञात्मकस्य वस्त्रस्य गायत्र्यादीनि छंदांसि स्तुतशस्त्राणि च । तान्यहं न विजानामि । तथौतुं । ओतवस्तिरश्चीनानि सूत्राणि । तानि चात्र यजूंष्याध्वर्यवाणि कर्माणि च । तान्यहं न विजानामि । अपि चैतदुभयसाध्यं तं पटं यज्ञलक्षणं न विजानामि यं पटं यज्ञलक्षणं समरे संगमने देवयजनेऽतमानाः सततं चेष्टमाना ऋत्विजो वयंति तंतूनोतूंश्च संतन्वंति । वस्त्ररूपेण निष्पादयंतीत्यर्थः । इहास्मिन् लोके कस्य स्वित् । स्विदिति वितर्के । कस्य खलु पुत्रो मनुष्यो वक्त्वानि वक्तव्यानि तानीमानि परः परस्तादमुष्मिन् लोके वर्तमानो यः सूर्यस्तस्य पित्रावरेणावस्तादस्मिन् लोके वर्तमानेन वैश्वानराग्निनानुशिष्टः सन् वदाति । वदेत् । न कश्चिदपि प्रवदितुं शक्नोतीत्यर्थः ॥ एतच्च संप्रदायविद्भिरुक्तं । वैश्वानरस्य पुत्रोऽसौ परस्ताद्दिवि यः स्थितः । छंदांस्यध्वरवस्त्रस्य स्तुतशस्त्राणि तंतवः ॥ यजूंषि चेष्टाश्चौतुः स्याद्वस्त्रं वातव्यमध्वरः । परः परः स्थितः सूर्यः पिताग्निः पार्थिवो मत इति ॥ रूपकतया जगत्सृष्टेर्दुर्ज्ञानत्वमनया प्रतिपादयतीत्यात्मविदो मन्यंते । तंतुं तंतून् तंतुस्थानानि सूक्ष्माणि वियदादीन्यपंचीकृतानि भूतानि न विजानामि । ओतुमोतून् पंचीकृतानि स्थूलान्योतुस्थानीयान्यपि वियदादीनि न विजानामि । न च तत्कार्यं पटस्थानीयं प्रपंचं विजानामि यं प्रपंचं समरे तंतूनामोतूनां च संगमनेऽतमानाः सततं चेष्टमानाः संसारिणो वयंति उत्पादयंति । तेषां भोगार्थमीश्वरः सृजतीति कर्तृत्वमुपचर्यते । इहास्मिन्विषये परः परस्ताद्बुद्धेरविषये वर्तमानानि वक्त्वानि

वक्तव्यानीमान्यवरेणार्वाचीनेन मृष्युत्तरकालमुत्पन्नेन पित्रा स्वजनकेनानुशिष्टः सन् कस्य खलु पुत्रो वदाति । वदेत् । स्वोत्पत्तेः प्राचीनं वृत्तांतमजानानः कश्चिदपि न वदेदित्यर्थः ॥

॥ अथ तृतीया ॥

स इत्तंतुं स वि जानात्योतुं स वक्त्वान्यृतुथा वदाति ।

य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन् ॥ ३ ॥

सः । इत् । तंतुं । सः । वि । जानाति । ओतुं । सः । वक्त्वानि । ऋतुऽथा । वदाति ।

यः । ईं । चिकेतत् । अमृतस्य । गोपाः । अवः । चरन् । परः । अन्येन । पश्यन् ॥ ३ ॥

यद्यप्युक्तेन प्रकारेण दुर्ज्ञानानि तथाप्येतानि वैश्वानरोऽग्निर्जानाति वदति चेत्यनया प्रतिपादयति । स इत् स एव वैश्वानरोऽग्निस्तंतुं तंतुस्थानीयानि गायत्र्यादीनि छंदांसि स्तुतशस्त्राणि विजानाति । तथा स एवोतुमोतुस्थानीयानि यजूंष्याध्वर्यवाणि च कर्माणि विजानाति । ऋतुथा काले काले तत्तदनुष्ठानसमये वक्त्वानि वक्तव्यानि च तानि वदाति । वदति । वदेत् । योऽयं वैश्वानरोऽमृतस्य गोपा उदकस्य गोपायिता रक्षितावोऽवस्ताद्भूलोके चरन् पार्थिवाग्निरूपेण संचरन् परः परस्ताद्दिव्यन्येन सूर्यात्मना पश्यन् सर्वं जगत्प्रकाशयन् ईमिमानि परि दृश्यमानानि सर्वाणि भूतानि चिकेतत् जानाति स एवेति पूर्वत्र संबंधः । यद्वा स इत् स एव तंतुं तंतुस्थानीयानि सूक्ष्मभूतानि विजानाति नान्यः कश्चित् । तथोतुमोतुस्थानीयानि स्थूलभूतानि च स एव विजानाति । स एव वक्त्वानि । वक्तव्यान्युपदेष्टव्यानीमान्यृतुथा काले काले यदा यदा विद्यासंप्रदायोच्छेदस्तदा तदा वदाति । वदेत् । कोऽसौ यो विजानीयाद्वदेच्चेत्यत आह । यो वैश्वानरो विश्वनरात्मकः परमात्मामृतस्यामृतत्वस्य विमोक्षणस्य गोपा रक्षितावोऽवस्तात्संसारदशायां चरन् अंतःकरणोपेतो जीवात्मभावेन संचरन् परः परस्तादविद्याया ऊर्ध्वं वर्तमानेनान्येनोक्तविलक्षणेन निरुपाधिकेन सच्चिदादिलक्षणेन रूपेण पश्यन् सर्वं जगत्प्रकाशयन् ईमिमानि चिकेतत् जानाति । तथा च परमात्मानं प्रकृत्य श्रूयते । तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति ॥

॥ अथ चतुर्थी ॥

अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।
अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः ॥४॥
अयं । होता । प्रथमः । पश्यत । इमं । इदं । ज्योतिः । अमृतं । मर्त्येषु ।
अयं । सः । जज्ञे । ध्रुवः । आ । निऽसत्तः । अमर्त्यः । तन्वा । वर्धमानः ॥४॥

अयं वैश्वानरोऽग्निः प्रथम आद्यो होता । मानुषो हि होता द्वितीयः । हे मनुष्यास्तमिमं पश्यत । भजतेत्यर्थः । मर्त्येषु मरणस्वभावेषु शरीरेष्वमृतं मरणरहितमिदं वैश्वानराख्यं ज्योतिर्जाठररूपेण वर्तत इत्यर्थः । अपि च सोऽयमग्निर्ध्रुवो निश्चल आ समंतान्निषत्तो निषण्णः सर्वव्यापी अत एवामर्त्यो मरणरहितोऽपि तन्वा शरीरेण संबंधात् जज्ञे । जायते । वर्धमानश्च भवतीत्युपचर्यते ॥

॥ अथ पंचमी ॥

ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वंतः ।
विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यंति साधु ॥५॥
ध्रुवं । ज्योतिः । निऽहितं । दृशये । कं । मनः । जविष्ठं । पतयत्ऽसु । अंतः ।
विश्वे । देवाः । सऽमनसः । सऽकेताः । एकं । क्रतुं । अभि । वि । यंति । साधु ॥५॥

ध्रुवं निश्चलं मनो मनसः तस्मादपि जविष्ठमतिशयेन वेगवत् ईदृशं वैश्वानराख्यं ज्योतिः पतयत्सु गच्छत्सु जंगमेषु प्राणिष्वंतर्मध्ये निहितं । प्रजापतिना स्थापितं । किमर्थं । दृशये कं । दर्शनार्थं । किंच विश्वे सर्वे देवाश्च समनसः समानमनस्काः सकेताः समानप्रज्ञाश्च संत एकं मुख्यं गंतारं वा क्रतुं कर्मणां कर्तारं साधु सम्यक् अभि वि यंति । आभिमुख्येन विविधं प्राप्नुवंति । सेवंत इत्यर्थः । यद्वा पतयत्सु गच्छत्सु प्राणिष्वंतर्मध्ये हृदये मनो जविष्ठं मनसोऽप्यतिशयेन वेगयुक्तं ध्रुवं निश्चलं निर्विकल्पं । तथा च वाजसनेयकं । अनेजदेकं मनसो जवीयः । वा॰ सं॰ ४०. ४. । इति । ज्योतिर्ब्रह्म चैतन्यं निहितं । न केनचित् स्थापितं । यो वेद निहितं गुहायां परमे व्योमन्निति हि श्रूयते । किमर्थं । दृशये दर्शनार्थं । ज्ञानेन हि सर्वं जानंति । अपि च । दीव्यंतीति देवा इंद्रियाणि । विश्वे सर्वे देवा सर्वाणींद्रियाणि चक्षुराद्याः समनसो मनसा सह वर्तमानाः सकेताः सतेजस्काः

संत एकमद्वितीयं क्रतुं सृष्ट्यादीनां कर्मणां कर्तारं विश्वनरात्मकं परमात्मानमभिलक्ष्य साधु सम्यक् वि यंति। विविधं गच्छंति। देवा एव वेममभि वि यंति। आभिमुख्येन विविधमुपयंति। उपासत इत्यर्थः। तथा च श्रूयते। तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति ॥

॥ अथ षष्ठी ॥

वि मे कर्णा पतयतो वि चक्षुर्वी३दं ज्योतिर्हृदय आहितं यत्।

वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ॥६॥

वि। मे। कर्णा। पतयतः। वि। चक्षुः। वि। इदं। ज्योतिः। हृदये। आऽहितं। यत्।

वि। मे। मनः। चरति। दूरेऽआधीः। किं। स्वित्। वक्ष्यामि। किं। ऊं इति। नु। मनिष्ये ॥६॥

वैश्वानरं श्रोतुकामस्य मे मम कर्णा कर्णौ वि पतयतः। विविधं गच्छतः। श्रोतव्यानां तदीयगुणानां बहुत्वात्। तथा वैश्वानरं दिदृक्षमाणस्य मम चक्षुरिंद्रियं वि पतयति। विविधं गच्छति। द्रष्टव्यानां तदीयरूपाणां बहुत्वात्। तथा ज्योतिः प्रकाशकं हृदये हृदयपुंडरीक आहितं निहितं यद्बुद्ध्याख्यं तत्त्वमिदमपि वि पतयति। विविधं गच्छति वैश्वानरात्मानं ज्ञातुं। अपि च दूरआधीः। दूरे विप्रकृष्टे विषय आधीराध्यानं यस्य तादृशं ॥ छांदसो लिंगव्यत्ययः ॥ मे मदीयं मनश्च वि चरति। विविधं प्रवर्तते। एवमहमहमिकया सर्वेष्विंद्रियेषु प्रवृत्तेषु किं स्विदहं वैश्वानरस्य रूपमिति वक्ष्यामि। किमु नु किमु खलु संप्रति मनिष्ये। मनसा प्रपत्स्ये। वैश्वानरस्य गुणानामनंतत्वात् मंदप्रज्ञेन मया ज्ञातुं न शक्यत इत्यर्थः ॥

॥ अथ सप्तमी ॥

विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांसं।

वैश्वानरोऽवतूतये नोऽमर्त्योऽवतूतये नः ॥७॥

विश्वे। देवाः। अनमस्यन्। भियानाः। त्वां। अग्ने। तमसि। तस्थिऽवांसं।

वैश्वानरः। अवतु। ऊतये। नः। अमर्त्यः। अवतु। ऊतये। नः ॥७॥

हे वैश्वानर तमस्यंधकारे तस्थिवांसं स्थितवंतं त्वां विश्वे सर्वे देवा अनमस्यन्। नमस्कुर्वंति। कुतो हेतोः। भियाना अंधकाराद्भीताः। तादृशोऽमर्त्यो

मरणरहितो वैश्वानरोऽग्निर्नोऽस्मानूतय ऊत्या रक्षणेनावतु । रक्षतु । पुनरुक्तिरादरार्था ॥

॥ इति चतुर्थस्य पंचम एकादशो वर्गः ॥

पुरो व इति सप्तर्चं दशमं सूक्तं भरद्वाजस्यार्षमाग्नेयं। सप्तमी विंशिका द्विपदा विराट् शिष्टास्त्रिष्टुभः। तथा चानुक्रांतं। पुरो वो द्विपदांतं॥ प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छंदसीदमादीनि चत्वारि सूक्तानि। सूचितं च। पुरो वो मंद्रमिति चत्वारि तं सुप्रतीकमिति षट्। आ॰ ४.१३.। इति ॥

॥ तत्र प्रथमा ॥

पुरो वो मंद्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वं।

पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः ॥१॥

पुरः। वः। मंद्रं। दिव्यं। सुऽवृक्तिं। प्रऽयति। यज्ञे। अग्निं। अध्वरे। दधिध्वं।

पुरः। उक्थेभिः। सः। हि। नः। विभाऽवा। सुऽअध्वरा। करति। जातऽवेदाः ॥१॥

हे ऋत्विग्यजमाना वो यूयं मंद्रं मोदनं स्तुत्यं वा दिव्यं दिवि भवं सुवृक्तिं सुष्ठु दोषैर्वर्जितं सुखेनावर्जनीयं वा एवंगुणमग्निं प्रयति प्रगच्छति प्रवर्तमानेऽध्वरे रक्षःप्रभृतिभिरहिंस्ये हिंसाप्रत्यवायरहिते वास्मिन्यज्ञे पुरो दधिध्वं। पुरस्तादाहवनीयरूपेण धारयत। यद्वा पुरोधसं कुरुत। उक्थेभिः स्तुतशस्त्रैश्च पुरो दधिध्वं। विभावा विशेषेण दीप्यमानो जातवेदा जातानां वेदिता सोऽग्निर्हि यस्मात् नोऽस्मान् स्वध्वरा शोभनयागान् करति करोति तस्मात्पुरो दधिध्वमित्यन्वयः ॥

॥ अथ द्वितीया ॥

तमु द्युमः पुर्वणीक होतरग्ने अग्निभिर्मनुष इधानः।

स्तोमं यमस्मै ममतेव शूषं घृतं न शुचि मतयः पवंते ॥२॥

तं। ऊं इति। द्युऽमः। पुरुऽअनीक। होतः। अग्ने। अग्निऽभिः। मनुषः। इधानः।

स्तोमं। यं। अस्मै। ममताऽइव। शूषं। घृतं। न। शुचि। मतयः। पवंते ॥२॥

हे द्युमो दीप्तिमन् पुर्वणीक बहुज्वाल होतर्देवानामाह्वातरग्ने अग्निभिस्त्वावयवभूतैरन्यैरग्निभिः सार्द्धमिधानः समिध्यमानो दीप्तः सन् मनुषो मनुष्यस्य

स्तोतुस्तमु तं स्तोमं शृणिवति शेषः । उ इति पादपूरणं । यं स्तोमं स्तोत्रं शूषं सुखकरं घृतं न पवित्राभ्यामुत्पूतं घृतमिव शुचि शुद्धमस्मा अग्नये मतयो मंतारः स्तोतारो ममतेव । ममता नाम ब्रह्मवादिनी दीर्घतमसो माता । सेव पवंते पुनंति संस्कुर्वंति । दोषवर्जितमुच्चारयंतीत्यर्थः । तं स्तोममित्यन्वयः ॥

॥ अथ तृतीया ॥

पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः ।
चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्य साता गोमतो दधाति ॥३॥
पीपाय । सः । श्रवसा । मर्त्येषु । यः । अग्नये । ददाश । विप्रः । उक्थैः ।
चित्राभिः । तं । ऊतिऽभिः । चित्रऽशोचिः । व्रजस्य । साता । गोऽमतः । दधाति ॥३॥

स यजमानो मर्त्येषु मनुष्येषु श्रवसान्नेन पीपाय वर्धति विप्रो मेधावी यो यजमान उक्थैः स्तुतिभिः सार्धं हवींषि ददाश प्रयच्छति । तं यजमानं चित्रशोचिर्विचित्रदीप्तिरग्निश्चित्राभिराश्चर्यभूताभिरूतिभी रक्षाभिर्गोमतो गोभिर्युक्तस्य व्रजस्य गोष्ठस्य साता सातौ संभजने दधाति धारयति ॥

॥ अथ चतुर्थी ॥

आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा ।
अध बहु चित्तम ऊर्म्यायास्तिरः शोचिषा ददृशे पावकः ॥४॥
आ । यः । पप्रौ । जायमानः । उर्वी इति । दूरेऽदृशा । भासा । कृष्णऽअध्वा ।
अध । बहु । चित् । तमः । ऊर्म्यायाः । तिरः । शोचिषा । ददृशे । पावकः ॥४॥

कृष्णाध्वा कृष्णवर्त्मा योऽग्निर्जायमानः प्रादुर्भवन् उर्वी विस्तीर्णे द्यावापृथिव्यौ दूरेदृशा दूरे दृश्यमानया भासा दीप्त्यापप्रौ आपूरयति स पावकोऽग्निरधानंतरमूर्म्यायाः । रात्रिनामैतत् । रात्रेः संबंधि बहु चित् बह्वपि तमोऽधकारं शोचिषा दीप्त्या तिरस्कुर्वन् ददृशे । दृश्यते ॥

॥ अथ पंचमी ॥

नू नश्चित्रं पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि ।
ये राधसा श्रवसा चात्यन्यान्सुवीर्येभिश्चाभि संति जनान् ॥५॥

नु। नः। चित्रं। पुरुऽवाजाभिः। ऊती। अग्ने। रयिं। मघवत्ऽभ्यः। च। धेहि।
ये। राधसा। श्रवसा। च। अति। अन्यान्। सुऽवीर्येभिः। च। अभि। संति। जनान्॥५॥

हे अग्ने मघवद्भ्यो हविर्लक्षणधनयुक्तेभ्यो नोऽस्मभ्यं पुरुवाजाभिर्बह्वन्नैरूती ऊतिभी रक्षणैः सह चित्रं चायनीयं रयिं धनं नु क्षिप्रं धेहि। देहि। प्रयच्छ। चशब्दो वक्ष्यमाणेन समुच्चयार्थः। ये राधसा धनेन श्रवसान्नेन च सुवीर्येभिः शोभनैर्वीर्यैश्चान्यान् जनान्मनुष्यानति अतिशयेनाभि संति अभिभवंति तादृशान्पुत्रांश्चास्मभ्यं देहीत्यर्थः॥

॥ अथ षष्ठी ॥

इमं यज्ञं चनो धा अग्न उशन्यं त आसानो जुहुते हविष्मान्।
भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाजस्य गध्यस्य सातौ॥६॥
इमं। यज्ञं। चनः। धाः। अग्ने। उशन्। यं। ते। आसानः। जुहुते। हविष्मान्।
भरत्ऽवाजेषु। दधिषे। सुऽवृक्तिं। अवीः। वाजस्य। गध्यस्य। सातौ॥६॥

हे अग्ने उशन् कामयमानस्त्वमिमं पुरोवर्ति यज्ञं यागसाधनं चनो हविर्लक्षणमन्नं धाः। धेहि। स्वात्मनि धारय। यं च पुरोडाशादिकमासान आसीन उपविशन् हविष्मान्हविर्युक्तो यजमानस्ते तुभ्यं त्वदर्थं जुहुते जुहोति तमिममित्यन्वयः। अपि च भरद्वाजेषृषिषु सुवृक्तिं सुष्ठु दोषैर्वर्जितां स्तुतिं दधिषे। धारय। गध्यस्य॥ गध्यतिर्मिश्रीभावकर्मा॥ मिश्रणीयस्य प्राप्यस्य वाजस्यान्नस्य सातौ संभजने निमित्तभूतेऽवीः। तानृषीन्रक्ष च॥

॥ अथ सप्तमी ॥

वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः सुवीराः॥७॥
वि। द्वेषांसि। इनुहि। वर्धय। इळां। मदेम। शतऽहिमाः। सुऽवीराः॥७॥

हे अग्ने द्वेषांसि द्वेष्टॄन् शत्रून् वीनुहि। विविधं गमय। इळामन्नं चास्मदीयं वर्धय। वयं च सुवीराः शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेताः संतः शतहिमाः शतं हेमंतान् संवत्सरान्मदेम। मोदेम। तृप्ता भूयास्म॥

॥ इति चतुर्थस्य पंचमे द्वादशो वर्गः॥

यजस्व होतरिति षडृचमेकादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं। अनुक्रम्यते च। यजस्व षडिति ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न प्रयुक्ति।
आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः ॥१॥
यजस्व। होतः। इषितः। यजीयान्। अग्ने। बाधः। मरुतां। न। प्रऽयुक्ति।
आ। नः। मित्रावरुणा। नासत्या। द्यावा। होत्राय। पृथिवी इति। ववृत्याः ॥१॥

हे होतर्देवानामाह्वातरग्ने यजीयान्यष्टृतमस्त्वमिषितः प्रेषितोऽस्माभिः प्रार्थितः सन्। नेति संप्रत्यर्थे। संप्रति प्रयुक्ति प्रयुक्तौ प्रयुज्यमाने यज्ञे मरुतां देवानां बाधः शत्रूणां बाधकं गणं यजस्व। यद्वैतद्वाक्यद्वयं। हे होतरग्ने यजस्व देवानित्येकं वाक्यं। प्रयुज्यत इति प्रयुक्ति बलं। मरुतां न प्रयुक्ति मरुतां बलमिवास्मच्छत्रून् बाधः। बाधस्वेति द्वितीयं वाक्यं। अपि च मित्रावरुणा। अहरभिमानी देवो मित्रो वरुणो राज्यभिमानी। तौ च नासत्या सत्यस्य नेतारौ सत्यस्वभावावेव वा नासिकाप्रभवौ वाश्विनौ द्यावापृथिवी दिवं च पृथिवीं च एतांश्च देवान् होत्रायास्मद्यज्ञाय तदर्थमाववृत्याः। आवर्तय। आवहेत्यर्थः ॥

॥ अथ द्वितीया ॥

त्वं होता मंद्रतमो नो अध्रुगंतर्देवो विदथा मर्त्येषु।
पावकया जुह्वा३ वह्निरासाग्ने यजस्व तन्वं१ तव स्वां ॥२॥
त्वं। होता। मंद्रऽतमः। नः। अध्रुक्। अंतः। देवः। विदथा। मर्त्येषु।
पावकया। जुह्वा। वह्निः। आसा। अग्ने। यजस्व। तन्वं। तव। स्वां ॥२॥

हे अग्ने त्वं मर्त्येषु मनुष्येष्वंतर्मध्ये वर्तमाने विदथा विदथे यज्ञे होता देवानामाह्वाता भवसि। कीदृशस्त्वं। मंद्रतमः स्तुत्यतमो नोऽस्माकमध्रुगद्रोग्धास्मदर्थं द्रोहरहितो वा। सर्वदा मित्रभूत इत्यर्थः। देवो दानादिगुणयुक्तः। अपि च हे अग्ने जुह्वा। हूयतेऽस्यामाहुतय इति जुहूर्ज्वाला। तया पावकया शोधयित्र्यासास्येन देवानामास्यभूतया वह्निर्हविषां वोढा त्वं तव स्वां स्वभूतां स्विष्टकृदाख्यां तन्वं तनूं यजस्व ॥

॥ अथ तृतीया ॥

धन्यां चिद्धि त्वे धिषणा वष्टि प्र देवाञ्जन्मं गृणते यजंध्यै ।
वेपिष्ठो अंगिरसां यद्ध विप्रो मधुं छंदो भनंति रेभ इष्टौ ॥३॥

धन्यां । चित् । हि । त्वे इति । धिषणां । वष्टिं । प्र । देवान् । जन्मं । गृणते । यजंध्यै ।
वेपिंष्ठः । अंगिरसां । यत् । ह । विप्रंः । मधुं । छंदः । भनंति । रेभः । इष्टौ ॥३॥

धन्या धनमिच्छंती धनहेतुभूता धिषणा स्तुतिर्हि अग्ने ते त्वां वष्टि । कामयते । चिदित्येतत्पादपूरणं । किमर्थं । देवान्यष्टव्यानिंद्रादीन् प्र यजध्यै प्रकर्षेण यष्टुं त्वदीयं जन्म प्रादुर्भावं गृणते स्तुवते यजमानायेहग्भूतयजमानार्थं । यद्ध यदा खल्वंगिरसामृषीणां मध्ये वेपिष्ठोऽतिशयेन स्तुतेः प्रेरयिता विप्रो मेधावी रेभः स्तोता भरद्वाज इष्टौ यज्ञे मधु मधुमन्मदकरं छंदः स्तोत्रं भनति उच्चारयति तदा धिषणा वष्टीत्यन्वयः ॥

॥ अथ चतुर्थी ॥

अदिद्युतत्स्वपांको विभावाग्ने यजस्व रोदंसी उरूची ।
आयुं न यं नमंसा रातहंव्या अंजंति सुप्रयसं पंच जनाः ॥४॥

अदिद्युतत् । सु । अपाकः । विऽभावां । अग्ने । यजंस्व । रोदंसी इतिं । उरूची इतिं ।
आयुं । न । यं । नमंसा । रातऽहंव्याः । अंजंति । सुऽप्रयसं । पंचं । जनाः ॥४॥

अयमग्निः स्वदिद्युतत् । सुष्ठु द्योतते । दीप्यते । कथंभूतः । अपाकः । पाकः पक्तव्यप्रज्ञो मूर्खः । तद्विलक्षणोऽपाकः । विभावा दीप्तिमान् । शेषः प्रत्यक्षकृतः । हे अग्ने स त्वमुरूची उरु विस्तीर्णमंचत्यौ विस्तृते रोदसी द्यावापृथिव्यौ यजस्व । हविषा पूजय । आयुं न मनुष्यमतिथिमिव यं पंच जना मनुष्या ऋत्विग्यजमानलक्षणा रातहव्या दत्तहविष्काः संतः सुप्रयसं शोभनहविर्लक्षणमग्निं नमसान्नेन हविर्लक्षणेनांजंति सिंचंति तर्पयंति स त्वं यजस्वेत्यन्वयः ॥

॥ अथ पंचमी ॥

वृंजे ह यन्नमंसा बर्हिरग्नावयांमि स्रुग्घृतवंती सुवृक्तिः ।
अम्यंक्षि सद्म सदंने पृथिव्या अश्रांयि यज्ञः सूर्ये न चक्षुः ॥५॥

वृंजे। ह। यत्। नमसा। बर्हिः। अग्नौ। अयामि। स्रुक्। घृतऽवती। सुऽवृक्तिः।
अध्यक्षि। सद्म। सदने। पृथिव्याः। अश्रायि। यज्ञः। सूर्ये। न। चक्षुः ॥५॥

यद्ध यदा खलु नमसा हविषा सहाग्नावग्निसमीपे बर्हिर्वृंजे॥ वृजिर्छेदनार्थः॥ छिद्यते। आह्रियत इत्यर्थः। सुवृक्तिः सुष्ठु दोषैर्वर्जिता घृतवती घृतपूर्णा स्रुगयामि। नियम्यते। बर्हिष्यासाद्यते। तथा पृथिव्या भूमेः सदने स्थाने सद्म हविरासादनार्था वेदिरध्यक्षि॥ अक्षतिर्गतिकर्मा॥ गम्यते। परिगृह्यते। तदानीं यज्ञोऽश्रायि। यजमान आश्रितो भवति। तत्र दृष्टांतः। सूर्ये न चक्षुः। यथा सूर्ये सर्वस्य प्रेरक आदित्ये प्रकाशकं तेजः समवैति तद्वत्॥

॥ अथ षष्ठी ॥

दशस्या नः पुर्वणीक होतर्देवेभिरग्ने अग्निभिरिधानः।
रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः ॥६॥

दशस्य। नः। पुरुऽअनीक। होतः। देवेभिः। अग्ने। अग्निऽभिः। इधानः।
रायः। सूनो इति। सहसः। ववसानाः। अति। स्रसेम। वृजनं। न। अंहः ॥६॥

हे पुर्वणीक बहुज्वाल होतर्देवानामाह्वातरग्ने देवेभिर्देवैर्द्योतमानैरन्यैरग्निभिस्त्वद्विभूतिभूतैः सार्द्धमिधान इध्यमानो दीप्यमानः सन् नोऽस्मभ्यं रायो धनानि दशस्य। प्रयच्छ। हे सहसः सूनो बलस्य पुत्राग्ने वावसाना हविषा त्वामाच्छादयंतो वयं वृजनं न शत्रुमिवांहः पापमतिस्रसेम। अतिगच्छेम। अतिक्रामेमेत्यर्थः॥

॥ इति चतुर्थस्य पंचमे त्रयोदशो वर्गः ॥

मध्ये होतेति षड़ृचं द्वादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं। मध्य इत्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

मध्ये होता दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी यजध्यै।
अयं स सूनुः सहस ऋतावा दूरात्सूर्यो न शोचिषा ततान ॥१॥

मध्ये। होता। दुरोणे। बर्हिषः। राट्। अग्निः। तोदस्य। रोदसी इति। यजध्यै।
अयं। सः। सूनुः। सहसः। ऋतऽवा। दूरात्। सूर्यः। न। शोचिषा। ततान ॥१॥

होता देवानामाह्वाता बर्हिषो यज्ञस्य राट् राजाग्निस्तोदस्य। तुद्यते तपसा पीड्यत इति तोदो यजमानः। तस्य दुरोणे गृहे मध्ये निषीदतीति शेषः। किमर्थं। रोदसी द्यावापृथिव्यौ यजध्यै यष्टुं। स तादृशोऽयं सहसः सूनुः सहसस्पुत्र ऋतावा सत्यवान्यज्ञवान्वाग्निः सूर्यो न सूर्य इव दूराद्दूरत एव शोचिषा तेजसा ततान। आतनोति। विस्तारयति। दूरदेशे वर्तमानोऽपि सूर्य इव सर्वं जगद्भासयतीत्यर्थः॥

॥ अथ द्वितीया ॥

आ यस्मिन्त्वे स्वपाके यजत्र यक्षद्राजन्त्सर्वतातेव नु द्यौः।
त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै॥२॥

आ। यस्मिन्। त्वे इति। सु। अपाके। यजत्र। यक्षत्। राजन्। सर्वताताऽइव। नु। द्यौः।
त्रिऽसधस्थः। ततरुषः। न। जंहः। हव्या। मघानि। मानुषा। यजध्यै॥२॥

द्यौः स्तोता सर्वतातेव। इवशब्दः पूरकः। यज्ञनामैतत्। सर्वतातौ सर्वैस्तायमाने यज्ञे। यद्वा सर्वशब्दात्स्वार्थिकस्तातिल्प्रत्ययः। सर्वः स्तोता हे यजत्र यष्टव्य राजन् राजमानाग्ने अपाके प्राज्ञे त्वे यस्मिंस्त्वे त्वयि सु अत्यंतं नु क्षिप्रमायक्षत् आयजति हवींषि जुहोति त्रिषधस्थस्त्रिषु लोकेषु सह स्थितः। यद्वा गार्हपत्यादिरूपेण त्रिधावस्थितः। तादृशस्त्वं ततरुषो न तरिता सूर्य इव जंहः शीघ्रं गंता भव॥ जंह इति हंतेर्गतिकर्मणो रूपं। यद्वा तॄ प्लवनतरणयोरित्यस्मात्क्वसौ रूपं ततर्वानिति। तस्य षष्ठ्यां रूपमेतत्ततरुष इति॥ तरितुः सूर्यस्येव जंहो वेगस्तव भवत्वित्यर्थः। किमर्थं। मघानि मंहनीयानि प्रशस्यानि मानुषा मनुष्याणां संबंधीनि हव्या हव्यानि हवींषि यजध्यै यष्टुं देवेभ्यो दातुं॥

॥ अथ तृतीया ॥

तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत्।
अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु॥३॥

तेजिष्ठा। यस्य। अरतिः। वनेऽराट्। तोदः। अध्वन्। न। वृधसानः। अद्यौत्।
अद्रोघः। न। द्रविता। चेतति। त्मन्। अमर्त्यः। अवर्त्रः। ओषधीषु॥३॥

यस्याग्नेररतिर्गंत्री ज्वाला तेजिष्ठातिशयेन तेजस्विनी सती वनेराट् दावरूपेणारण्ये राजमाना वर्तते वृधसानो वर्धमानः सोऽग्निस्तोदो अध्वन् न। तोदः

सर्वस्य प्रेरकः सूर्यः । स इवाध्वनि स्वमार्गेऽतरिक्षेऽद्यौत् । प्रकाशते । अपि चाद्रोघो न अद्रोग्धव्यो यद्वा प्राणरूपेण सर्वेषामद्रोग्धा वायुरिव तादृशोऽमर्त्यो मरणरहितः सोऽग्निरोषधीषु । ओषः पाक एषु धीयत इत्योषधयो वनानि । तेषु द्रविता शीघ्रगामी सन् अवर्त्रः केनाप्यवारणीयश्च भवन् त्मना त्मना स्वप्रकाशेनैव चेतति । चेतयति । सर्वं जगत् ज्ञापयति ॥

॥ अथ चतुर्थी ॥

सास्माकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः ।
द्र्वन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः ॥४॥

सः । अस्माकेभिः । एतरि । न । शूषैः । अग्निः । स्तवे । दमे । आ । जातऽवेदाः ।
द्रुऽअन्नः । वन्वन् । क्रत्वा । न । अर्वा । उस्रः । पिताऽइव । जारयायि । यज्ञैः ॥४॥

जातवेदा जातधनो जातप्रज्ञो वा सोऽग्निरस्माकेभिरस्मदीयैः स्तोतृभिरेतरी न । एतरि गंतरि याचमाने पुरुषे विद्यमानानि स्तोत्राणि यथात्यंतं सुखकराणि तथा शूषैः सुखकरैः स्तोत्रैर्दमेऽस्मदीये यज्ञगृह आ आभिमुख्येन स्तवे । स्तूयते । अपि च द्र्वन्नः । द्रुर्द्रुमः । स एवान्नं यस्य स तथोक्तः । अत एव वन्वन् वनानि संभजन् क्रत्वा न क्रतुनात्मीयेन कर्मणा चार्वा गंता भवति । तत्र दृष्टांतः । उस्रः पितेव । पिता पालयिता वत्सानां जनको वोस्रो वृषभ इव । स यथा मैथुनार्थं शीघ्रं गच्छति तद्वत् । यज्ञैर्यज्ञवद्भिर्यजमानैश्च जारयायि । स्तूयते ॥ जरतेः स्तुतिकर्मण एतद्रूपं ॥

॥ अथ पंचमी ॥

अध स्मास्य पनयंति भासो वृथा यत्तक्षदनुयाति पृथ्वीं ।
सद्यो यः स्यंद्रो विषितो धवीयानृणो न तायुरति धन्वा राट् ॥५॥

अध । स्म । अस्य । पनयंति । भासः । वृथा । यत् । तक्षत् । अनुऽयाति । पृथ्वीं ।
सद्यः । यः । स्यंद्रः । विऽसितः । धवीयान् । ऋणः । न । तायुः । अति । धन्व । राट् ॥५॥

अधास्मिंल्लोके । स्मेति पूरकः । अस्याग्नेर्भासो रश्मीन् पनयंति । स्तोतारः स्तुवंति । यद्यदा वृथानायासेन तक्षत् तक्षन् तनूकुर्वन् वनानि सम्यग्दहन् पृथ्वीं विस्तीर्णामरण्यभुवमनुयात्यनुगच्छति तदानीं पनयंतीत्यन्वयः । योऽग्निः स्यंद्रः

स्यंदनवान् विषितो विमुक्तः प्रतिबंधरहितः अत एव सद्यः शीघ्रं धवीयान् गंतृतमो भवति । क इव । ऋणो न तायुः ॥ ऋणोतिर्गतिकर्मा ॥ तायुरिति स्तेननाम । यथा स्तेनः शीघ्रं गंता भवति तद्वत्सोऽयमग्निर्धन्व मरुभूमिमतिक्रम्य राट् । राजते । यद्वा धन्वंत्यस्मादाप इति धन्वांतरिक्षं । अतिशयेनांतरिक्षमाक्रम्य राजते ॥

॥ अथ षष्ठी ॥

स त्वं नो अर्वन्निदाया विश्वेभिरग्ने अग्निभिरिधानः ।
वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः ॥ ६ ॥

सः । त्वं । नः । अर्वन् । निदायाः । विश्वेभिः । अग्ने । अग्निऽभिः । इधानः ।
वेषि । रायः । वि । यासि । दुच्छुनाः । मदेम । शतऽहिमाः । सुऽवीराः ॥ ६ ॥

हे अर्वन् गंतरग्ने स तादृशस्त्वं निदाया निंदित्र्याः प्रजाया निंदाया एव वा पाहीति शेषः । कथंभूतः सन् । विश्वेभिः सर्वैरग्निभिस्त्वच्छाखाभूतैरिधान इध्यमानः सन् । रायो धनानि चास्मान् वेषि । गमय । यद्वा हविर्लक्षणानि धनानि वेषि । कामयसे । दुच्छुना दुःखकारिणीः शत्रुसेना वि यासि च । विविधं गमयसि च । वयं च सुवीराः शोभनपुत्रपौत्राः संतः शतहिमाः शतं संवत्सरान्मदेम । मोदेम ॥

॥ इति चतुर्थस्य पंचमे चतुर्दशो वर्गः ॥

त्वद्विश्वेति षडृचं त्रयोदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं । त्वद्विश्वेत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

त्वद्विश्वा सुभग सौभगान्यग्ने वि यंति वनिनो न वयाः ।
श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपां ॥ १ ॥

त्वत् । विश्वा । सुऽभग । सौभगानि । अग्ने । वि । यंति । वनिनः । न । वयाः ।
श्रुष्टी । रयिः । वाजः । वृत्रऽतूर्ये । दिवः । वृष्टिः । ईड्यः । रीतिः । अपां ॥ १ ॥

हे सुभग शोभनधनाग्ने विश्वा विश्वानि सर्वाणि सौभगानि धनानि त्वत्त्वत्तो वि यंति । विविधं निर्गच्छंति । हिरण्यमूलत्वात्सर्वेषां धनानां हिरण्यं चाग्नेः सकाशादुत्पन्नं । तस्य रेतः परापतत्तद्धिरण्यमभवदिति श्रुतेः । निर्गमने

दृष्टांतः। वनिनो न वयाः। यथा वृक्षाच्छाखा विविधं निर्गच्छंति तद्वत्। तथा रयिः पशुसंघश्च त्वत्सकाशादेव श्रुष्टी क्षिप्रं व्येति। निर्गच्छति। पशवो वै रयिः पशूनेवावरुंध इति तैत्तिरीयकं। वृत्रतूर्ये वृत्राणां हिंसके संग्रामे शत्रून् जेतुं वाजो बलं च त्वत्तो व्येति। दिवोऽंतरिक्षाद्या वृष्टिः सापि त्वत्त एव व्येति। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मरणात्। अतस्त्वमीड्यः सर्वैः स्तुत्यः सन् अपामुदकानां रीतिर्गमयिता भवसि॥

॥ अथ द्वितीया ॥

त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः।
अग्ने मित्रो न बृहत ऋतस्यासि क्षत्ता वामस्य देव भूरेः ॥२॥
त्वं। भगः। नः। आ। हि। रत्नं। इषे। परिज्माऽइव। क्षयसि। दस्मऽवर्चाः।
अग्ने। मित्रः। न। बृहतः। ऋतस्य। असि। क्षत्ता। वामस्य। देव। भूरेः ॥२॥

हे अग्ने भगो भजनीयस्त्वं नोऽस्मभ्यं रत्नं रमणीयं धनमेषे। आगमय। प्रयच्छ॥ इण् गतावित्यस्यैतद्रूपं। हीति पूरकः॥ दस्मवर्चा दर्शनीयदीप्तिस्त्वं परिज्मेव परितो गंता वायुरिव क्षयसि। सर्वत्र निवससि। यद्वा क्षयतिरैश्वर्यकर्मा। सर्वस्येशिषे। हे अग्ने मित्रो न प्रमीतेस्त्रायको देव इव बृहतो महत ऋतस्योदकस्य यज्ञस्य वा क्षत्तासि॥ क्षदतिश्च दानकर्मा॥ दाता भवसि। तथा हे देव द्योतमानाग्ने भूरेर्बहुलस्य वामस्य वननीयस्य धनस्य च दाता भवसीत्यनुषंगः॥

॥ अथ तृतीया ॥

स सत्पतिः शवसा हंति वृत्रमग्ने विप्रो वि पणेर्भर्ति वाजं।
यं त्वं प्रचेत ऋतजात राया सजोषा नप्त्रापां हिनोषि ॥३॥
सः। सत्ऽपतिः। शवसा। हंति। वृत्रं। अग्ने। विप्रः। वि। पणेः। भर्ति। वाजं।
यं। त्वं। प्रऽचेतः। ऋतऽजात। राया। सऽजोषाः। नप्त्रा। अपां। हिनोषि ॥३॥

हे अग्ने सत्पतिः सतां पालयिता स पुरुषो वृत्रमावरकं शत्रुं शवसा बलेन हंति। स च विप्रो मेधावी सन् पणेर्वणिज एतन्नाम्नोऽसुरस्य वाजमन्नं बलं वा वि भर्ति। वियुज्य हरति॥ हृग्रहोर्भ इति भत्वं॥ हे प्रचेतः प्रकृष्टज्ञान ऋतजात। ऋतमिति यज्ञनाम। तदर्थं जाताग्ने अपां नप्त्रा न पातयित्रा पुत्रेण

मध्यमस्थानेन वैद्युताग्निना सजोषाः संगतस्त्वं यं पुरुषं राया ॥ चतुर्थ्यर्थे तृतीया ॥ धनार्थं हिनोषि प्रेरयसि स हंतीत्यन्वयः ॥

॥ अथ चतुर्थी ॥

यस्ते सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वेद्यानट् ।

विश्वं स देव प्रति वारमग्ने धत्ते धान्यं१ पत्यते वसव्यैः ॥ ४ ॥

यः । ते । सूनो इति । सहसः । गीःऽभिः । उक्थैः । यज्ञैः । मर्तः । निऽशितिं । वेद्या । आनट् ।

विश्वं । सः । देव । प्रति । वा । अरं । अग्ने । धत्ते । धान्यं । पत्यते । वसव्यैः ॥ ४ ॥

हे सहसः सूनो बलस्य पुत्राग्ने ते तव निशितिं तैक्ष्ण्यं यो मर्तो मनुष्यो यजमानो गीर्भिः स्तुतिभिरुक्थैः शस्त्रैर्यज्ञैर्यजमानसाधनैर्हैविर्भिश्च वेद्या वेद्यायां यज्ञभूमावानट् प्रापयति स मर्तो हे देव द्योतमानाग्ने विश्वं सर्वमरं पर्याप्तं । वाशब्दश्चार्थे । धान्यं च प्रतिधत्ते । प्रतिधारयति । वसव्यैर्वसुभिश्च पत्यते । संगच्छते ॥

॥ अथ पंचमी ॥

ता नृभ्य आ सौश्रवसा सुवीराग्ने सूनो सहसः पुष्यसे धाः ।

कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये ॥ ५ ॥

ता । नृऽभ्यः । आ । सौश्रवसा । सुऽवीरा । अग्ने । सूनो इति । सहसः । पुष्यसे । धाः ।

कृणोषि । यत् । शवसा । भूरि । पश्वः । वयः । वृकाय । अरये । जसुरये ॥ ५ ॥

हे सहसः सूनो सहसस्पुत्राग्ने सुवीरा शोभनैः पुत्रैरुपेतानि सौश्रवसा सुश्रवांसि शोभनान्यन्नानि ता तानि नृभ्यः शत्रुजनेभ्य आहृत्य धाः । अस्मासु धेहि । किमर्थं । पुष्यसे पोषार्थं । यद्वा नृभ्यः स्तुतीनां नेतृभ्योऽस्मभ्यमाधेहि । आभिमुख्येन प्रयच्छ । शवसा बलेन युक्तस्त्वं भूरि बहुलं पश्वः पशोः संबंधि दध्यादिलक्षणं यद्वयोऽन्नं वृकायादात्रे जसुरय उपक्षपयित्रे कृणोषि करोषि तदन्नमाहृत्य प्रयच्छेत्यर्थः ॥

॥ अथ षष्ठी ॥

वद्मा सूनो सहसो नो विहाया अग्ने तोकं तनयं वाजिनो दाः ।

विश्वाभिर्गीर्भिरभि पूर्तिमश्यां मदेम शतहिमाः सुवीराः ॥ ६ ॥

वक्ता। सूनो इति। सहसः। नः। विऽहायाः। अग्ने। तोकं। तनयं। वाजिनः। दाः। विश्वाभिः। गीःऽभिः। अभि। पूर्तिं। अश्यां। मदेम। शतऽहिमाः। सुऽवीराः ॥६॥

हे सहसः सूनोऽग्ने विहायाः। महन्नामैतत्। महांस्त्वं नोऽस्माकं वक्ता वदिता हितोपदेष्टा भव। अपि च तोकं पुत्रं तनयं तत्पुत्रं च वाजिनोऽन्नयुक्तं नोऽस्मभ्यं दाः। देहि। अहं स्तोता विश्वाभिः सर्वाभिर्गीर्भिस्त्वद्विषयाभिः पूर्तिं कामानां पूर्तिमभ्यश्यां। अभिप्राप्नुयां। अन्यद्गतं ॥

॥ इति चतुर्थस्य पंचमे पंचदशो वर्गः ॥

अग्ना य इति षडृचं चतुर्दशं सूक्तं भरद्वाजस्यार्षमाग्नेयं। षष्ठी शक्करी शिष्टाः पंचानुष्टुभः। तथा चानुक्रांतं। अग्ना य आनुष्टुभं शक्कर्यंतमिति ॥ प्रातरनुवाक आग्नेये क्रतावाश्विनशस्त्रे चेदं सूक्तं। सूचितं च। अग्ना यो होताजनिष्ट। आ० ४. १३.। इति ॥ अत्रेश्चतुर्वीराख्ये चतूरात्रेऽहीने तृतीयेऽहनीदं सूक्तमाज्यशस्त्रं। सूचितं च। अग्ना यो मर्त्यो दुव इति तृतीये। आ० १०. २.। इति ॥

॥ तत्र प्रथमा ॥

अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः।
भसन्नु ष प्र पूर्व्य इषं वुरीतावसे ॥१॥

अग्ना। यः। मर्त्यः। दुवः। धियं। जुजोष। धीतिऽभिः।
भसत्। नु। सः। प्र। पूर्व्यः। इषं। वुरीत। अवसे ॥१॥

यो मर्त्यो मनुष्योऽग्नावग्नावग्निविषयं दुवः परिचरणं धियं कर्म च यज्ञादिलक्षणं धीतिभिः स्तुतिभिः सार्द्धं जुजोष सेवते आचरति स मर्त्यः पूर्व्यः पूर्वेषु मुख्यः सन् नु क्षिप्रं प्रभसत्। प्रभासेत। प्रकृष्टप्रकाशवान् भवेत्। अवसे पुत्रादीनां रक्षणार्थमिषमन्नं च वुरीत। वृणीत। संभजेत। शत्रुसकाशाल्लभेतेत्यर्थः ॥

॥ अथ द्वितीया ॥

अग्निरिद्धि प्रचेता अग्निर्वेधस्तम ऋषिः।
अग्निं होतारमीळते यज्ञेषु मनुषो विशः ॥२॥

अग्निः। इत्। हि। प्रऽचेताः। अग्निः। वेधःऽतमः। ऋषिः।
अग्निं। होतारं। ईळते। यज्ञेषु। मनुषः। विशः ॥२॥

अग्निरिदग्निरेव प्रचेताः प्रकृष्टज्ञानवान् नान्यः कश्चित्। हि यस्मादेवं तस्माद्वेधस्तमो विधातृतमोऽतिशयेन हविर्वहनादीनां कर्मणां कर्ता ऋषिः सर्वस्य द्रष्टा च भवति। मनुषो मनुष्यस्य यजमानस्य विशः प्रजा ऋत्विग्लक्षणा होतारं देवानामाह्वातारं तादृशमग्निं यज्ञेषु यागेष्वीळते। स्तुवंति ॥

॥ अथ तृतीया ॥

नाना ह्य१ग्नेऽवसे स्पर्धंते रायो अर्यः।

तूर्वंतो दस्युमायवो व्रतैः सीक्षंतो अव्रतं ॥३॥

नाना। हि। अग्ने। अवसे। स्पर्धंते। रायः। अर्यः।

तूर्वंतः। दस्युं। आयवः। व्रतैः। सीक्षंतः। अव्रतं ॥३॥

हे अग्ने अर्योऽरेः शत्रो रायो धनान्यवसे त्वत्स्तोतॄणां रक्षणार्थं नाना शत्रुसकाशात्पृथग्भूताः स्पर्धंते। अहमेव पालयान्यहमेव पालयानीति स्पर्धां कुर्वंति। आयवो मनुष्यास्ते च स्तोतारो दस्युमुपक्षपयितारं शत्रुं तूर्वंतो हिंसंतो व्रतैस्त्वद्वत्यैर्यागैरव्रतं व्रतविरोधिनं च पुरुषं सीक्षंतः सोढुमभिभवितुमिच्छंतो भवंति ॥

॥ अथ चतुर्थी ॥

अग्निरप्सामृतीषहं वीरं ददाति सत्पतिं।

यस्य त्रसंति शवसः संचक्षि शत्रवो भिया ॥४॥

अग्निः। अप्सां। ऋतिऽसहं। वीरं। ददाति। सत्ऽपतिं।

यस्य। त्रसंति। शवसः। संऽचक्षि। शत्रवः। भिया ॥४॥

अयमग्निर्वीरं पुत्रं ददाति। स्तोतृभ्यः प्रयच्छति। कीदृशं पुत्रं। अप्सामपामाप्तव्यानां कर्मणां सनितारं संभक्तारमृतीषहमृतीनामरातीनां सोढारमभिभवितारं सत्पतिं सतां कर्मणां पालयितारं। यस्य वीरस्य संचक्षि संदर्शने सति शवसो बलात् भिया भीत्या शत्रवस्त्रसंति उद्विजंते तं वीरमित्यन्वयः ॥

॥ अथ पंचमी ॥

अग्निर्हि विद्मना निदो देवो मर्तमुरुष्यति।

सहावा यस्यावृतो रयिर्वाजेष्ववृतः ॥५॥

अग्निः । हि । विद्मना । निदः । देवः । मर्तं । उरुष्यति ।
सहऽवा । यस्य । अवृतः । रयिः । वाजेषु । अवृतः ॥ ५ ॥

सहावा । सहो बलं । तद्वान् देवो दानादिगुणयुक्तोऽग्निर्विद्मना ज्ञानेन युक्तः सन् तं मर्तं मनुष्यं यजमानं निदो निंदकादुरुष्यति । रक्षति । हीति पूरकः । यस्य मर्तस्य रयिर्हविर्लक्षणं धनमवृतो रक्षःप्रभृतिभिरनाच्छादितं वाजेषु यज्ञेष्ववृतोऽन्यैर्यजमानैरसंभक्तं तं हविष्मंतं यजमानमुरुष्यतीत्यन्वयः ॥

॥ अथ षष्ठी ॥

अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥ ६ ॥

अच्छ । नः । मित्रऽमहः । देव । देवान् । अग्ने । वोचः । सुऽमतिं । रोदस्योः ।
वीहि । स्वस्तिं । सुऽक्षितिं । दिवः । नॄन् । द्विषः । अंहांसि । दुःऽइता । तरेम । ता ।
तरेम । तव । अवसा । तरेम ॥ ६ ॥

व्याख्यातेयं ॥ अक्षरार्थस्तु । अनुकूलदीप्ते दानादिगुणयुक्ताग्ने द्यावापृथिव्योरभिगतस्त्वमस्मदीयां सुष्टुतिं यष्टव्यान् देवान्प्रतिवोचः । प्रब्रूहि । स्तुतेर्नेतॄनस्मांश्च सुनिवासमविनाशं गमय । वयं च त्वत्प्रसादाद्द्वेष्टॄन् पापानि तत्फलानि दुर्गमनानि चाति क्रामेम । व्यवहितानि जन्मांतरकृतानि च तान्यतिक्रामेम । त्वदीयेन रक्षणेनात्यंतमतिक्रामेमेति ॥

॥ इति चतुर्थस्य पंचमे षोडशो वर्गः ॥

इममू षु व इत्येकोनविंशत्यृचं पंचदशं सूक्तमांगिरसस्य वीतहव्यस्य भरद्वाजस्य वार्षमाग्नेयं । आदौ नव जगत्यस्तृतीयाषष्ठ्यौ तु शक्वर्यतिशक्वर्यौ पंचदशी शक्वरी सप्तदश्यनुष्टुबष्टादशी बृहती दशम्याद्याः पंच षोडश्येकोनविंशी चेति सप्त त्रिष्टुभः । तथा चानुक्रांतं । इममूष्वेकोना वीतहव्य ऋषिर्वा जागतं प्राग्दशम्यास्तृतीयापंचदश्यौ शक्वर्यौ षष्ठ्यतिशक्वर्यनुष्टुब्बृहत्या उपांत्ये इति ॥ प्रातरनुवाक आग्नेये क्रतावाश्विनशस्त्रे चादितो नवर्चः । सूत्रितं च । इममू षु वो अतिथिमुषर्बुधं

। आ० ४.२३.। इति ॥ दशराचे पंचमेऽहनि नवर्चमाज्यशस्त्रं। सूचितं च। इममू षु वो अतिथिमुषर्बुधमिति नवाज्यं। आ० ७.१२.। इति ॥

॥ तच प्रथमा ॥

इममू षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृंजसे गिरा।
वेतीद्दिवो जनुषा कच्चिदा शुचिर्ज्योक्चिदत्ति गर्भो यदच्युतं ॥१॥

इमं। ऊं इति। सु। वः। अतिथिं। उषःऽबुधं। विश्वासां। विशां। पतिं। ऋंजसे। गिरा। वेति। इत्। दिवः। जनुषा। कत्। चित्। आ। शुचिः। ज्योक्। चित्। अत्ति। गर्भः। यत्। अच्युतं ॥१॥

हे वीतहव्य ऋषे भरद्वाज वा वस्त्वं ॥ विभक्तिवचनयोर्व्यत्ययः ॥ इममु इममेवाग्निं गिरा स्तुत्या स्वृंजसे। सुष्ठु प्रसाधय ॥ ऋंजतिः प्रसाधनकर्मेति यास्कः ॥ कीदृशं। अतिथिं सततं गंतारं। यद्वातिथिवत्पूज्यं। उषर्बुधमुषसि प्रबुद्धं विश्वासां सर्वासां विशां प्रजानां पतिं पालयितारं। जनुषा जन्मना स्वत एव शुचिः शुद्धो निर्मलो वाग्निः कच्चित् कदाचित् कस्मिंश्चिद्यागकाले दिवो द्युलोकादावेति। आगच्छति। तदानीं प्रसाधयेत्यन्वयः। एवं प्रसाधितोऽग्निर्गर्भोऽरण्योर्मध्ये गर्भवद्वर्तमानः। यद्वा द्यावापृथिव्योर्गर्भभूतः सन् यद्धविरच्युतं च्युतिरहितं नित्यमग्निहोत्रादिसाधनभूतं पयःप्रभृतिकं तत् ज्योक्चित् चिरकालमत्ति। भक्षयति ॥

॥ अथ द्वितीया ॥

मित्रं न यं सुधितं भृगवो दधुर्वनस्पतावीड्यमूर्ध्वशोचिषं।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे ॥२॥

मित्रं। न। यं। सुऽधितं। भृगवः। दधुः। वनस्पतौ। ईड्यं। ऊर्ध्वऽशोचिषं। स। त्वं। सुऽप्रीतः। वीतऽहव्ये। अद्भुत। प्रशस्तिऽभिः। महयसे। दिवेऽदिवे ॥२॥

वनस्पतावरण्यां सुधितं सुष्ठु निहितमीड्यं स्तुत्यमूर्ध्वशोचिषमुच्छ्रिततेजस्कं यमग्निं त्वां मित्रं न मित्रमिव सखिभूतमिव भृगवो महर्षयो दधुः आदधुः गृहे स्थापितवंतः हे अद्भुत महन्नग्ने स तादृशस्त्वं वीतहव्य एतत्संज्ञ ऋषौ सुप्रीतः सुष्ठु प्रीयमाणो भव। यतो दिवे दिवे प्रतिदिनं प्रशस्तिभिः प्रकृष्टैः स्तोत्रैर्महयसे पूज्यसे। भरद्वाज ऋषिश्चेत् वीतहव्ये दत्तहविष्के भरद्वाज इति योजनीयं ॥

॥ अथ तृतीया ॥

स त्वं दक्षस्यावृको वृधो भूरर्यः परस्यांतरस्य तरुषः ।
रायः सूनो सहसो मर्त्येष्वा छर्दिर्यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः ॥३॥

सः । त्वं । दक्षस्य । अवृकः । वृधः । भूः । अर्यः । परस्य । अंतरस्य । तरुषः ।
रायः । सूनो इति । सहसः । मर्त्येषु । आ । छर्दिः । यच्छ । वीतऽहव्याय । सऽप्रथः ।
भरत्ऽवाजाय । सऽप्रथः ॥३॥

हे अग्ने स तादृशोऽवृको बाधकरहितस्त्वं दक्षस्यानुष्ठानसमर्थस्य वृधो वर्धयिता भूः । भवसि । तथा परस्य विप्रकृष्टस्यार्योऽरेः शत्रोरंतरस्यांतिकतरस्य संनिकृष्टस्य शत्रोस्तरुषस्तरिता भवसि । अतः कारणात् हे सहसः सूनो सप्रथः सर्वतः पृथुस्त्वं मर्त्येषु मनुष्येषु मध्ये भरद्वाजाय संभृतहविर्लक्षणान्नाय वीतहव्याय । वीतं गमितं हव्यं हविर्येन तादृशाय भरद्वाजायेति वा योज्यं । रायो धनानि छर्दिर्गृहमायच्छ । प्रयच्छ । सप्रथ इति पुनरुक्तिरादरार्था ॥

॥ अथ चतुर्थी ॥

द्युतानं वो अतिथिं स्वर्णरमग्निं होतारं मनुषः स्वध्वरं ।
विप्रं न द्युक्षवचसं सुवृक्तिभिर्हव्यवाहमरतिं देवमृंजसे ॥४॥

द्युतानं । वः । अतिथिं । स्वःऽनरं । अग्निं । होतारं । मनुषः । सुऽअध्वरं ।
विप्रं । न । द्युक्षऽवचसं । सुवृक्तिऽभिः । हव्यऽवाहं । अरतिं । देवं । ऋंजसे ॥४॥

हे वीतहव्य त्वं सुवृक्तिभिः शोभनाभिः स्तुतिभिर्हव्यवाहं हविषां वोढारं देवमग्निमृंजसे । प्रसाधय । कीदृशं । द्युतानं दीप्यमानं वो युष्माकमतिथिमतिथिवत्पूज्यं स्वर्णरं स्वर्गस्य नेतारं मनुषो मनोः प्रजापतेर्यज्ञे होतारं देवानामाह्वातारं स्वध्वरं शोभनयज्ञं विप्रं न मेधाविनं विपश्चितमिव द्युक्षवचसं । दीप्तैर्निवासभूतं द्युक्षं । तादृशवाक्योपेतमरतिमर्यं स्वामिनं ॥

॥ अथ पंचमी ॥

पावकया यश्चितयंत्या कृपा क्षामन्रुरुच उषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥५॥

पावकया । यः । चितयंत्या । कृपा । क्षामन् । रुरुचे । उषसः । न । भानुना ।
तूर्वन् । न । यामन् । एतशस्य । नु । रणे । आ । यः । घृणे । न । ततृषाणः । अजरः ॥५॥

योऽग्निः पावकया शोधयित्र्या चितयंत्या चेतयंत्या प्रज्ञापयंत्या कृपा दीप्त्या क्षामन् भूम्यां रुरुचे दीप्यते । उषसो न भानुना । यथोषसः प्रकाशेन भासंते तद्वत् । अपि च यामन् यामनि संग्रामे तूर्वन्न शत्रून् हिंसन् पुरुष इवैतशस्यै-तत्संज्ञस्य ऋषे रणे सूर्येण सह संग्रामे सहायार्थं योऽग्निर्नु क्षिप्रमाघृणे आदीप्यते । प्रैतशं सूर्ये पस्पृधानं । ऋग्वे० १.६१.१५. । इति निगमांतरं । नूनं सर्वे देवास्तस्य साहाय्यमकार्षुः । यश्च ततृषाणस्तृषितः प्रभावेन सर्वभक्षणशीलोऽजरो जरार-हितश्च भवति तं देवमृंजस इति पूर्वस्यामृचि संबंधः ॥

॥ इति चतुर्थस्य पंचमे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणि ।
उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि
नो दुवः ॥६॥

अग्निंऽअग्निं । वः । संऽइधा । दुवस्यत । प्रियंऽप्रियं । वः । अतिथिं । गृणीषणि ।
उप । वः । गीःऽभिः । अमृतं । विवासत । देवः । देवेषु । वनते । हि । वार्यं । देवः ।
देवेषु । वनते । हि । नः । दुवः ॥६॥

हे अस्मदीयाः स्तोतारो वो यूयं प्रियं प्रियमत्यंतं प्रियं वो युष्माकमतिथि-मतिथिवत्पूज्यं गृणीषणि शब्दनीयं स्तुत्यमग्निमग्निमग्निमेव । नान्यं देवमित्यर्थः । समिधा समिंधनेन समिद्भिर्वा दुवस्यत । परिचरत । यद्वा गृणीषणीति सप्तम्यंतं । गृणीषणि स्तोत्रे विषयतया वर्तमानं । अपि च वो यूयममृतममरणमग्निं गीर्भिः स्तुतिभिरुपेत्य विवासत । परिचरत । हि यस्मात् देवेषु मध्ये देवो दानादिगु-णयुक्तोऽग्निर्वार्यं वरणीयं समिदादिकं वनते संभजते । हि यस्माच्च देवेषु मध्ये देवोऽग्निर्नोऽस्माकं दुवः परिचरणं वनते संभजते तस्माद्दुवस्यतेत्यन्वयः ॥

दशमेऽहन्याग्निमारुते समिद्धमिति तृचो जातवेदस्यनिविद्धानार्थः । सूचितं च । समिद्धमग्निं समिधा गिरा गृण इति तृचश्च । आ० ८.१२. । इति ॥

॥ तत्र प्रथमा सूक्ते सप्तमी ॥

समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवं ।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसं ॥७॥
सम्ऽइद्धं । अग्निं । सम्ऽइधा । गिरा । गृणे । शुचिं । पावकं । पुरः । अध्वरे । ध्रुवं ।
विप्रं । होतारं । पुरुऽवारं । अद्रुहं । कविं । सुम्नैः । ईमहे । जातऽवेदसं ॥७॥

समिद्धं सम्यग्दीप्तमग्निं समिधा समिंधनहेतुभूतया गिरा स्तुत्या गृणे । स्तौमि । यद्वा समिधा समिद्भिर्दारुभिः समिद्धं सम्यगिद्धं । अपि च शुचिं स्वयं शुद्धं पावकं सर्वेषां शोधकं ध्रुवं निश्चलं तमग्निमध्वरे यज्ञे पुरस्करोमीति शेषः । तथा विप्रं मेधाविनं होतारं देवानामाह्वातारं पुरुवारं बहुभिर्वरणीयमद्रुहमद्रोग्धारं सर्वेषामनुकूलं कविं क्रांतदर्शिनं जातवेदसं जातानां वेदितारमग्निं सुम्नैः सुखकरैः स्तोत्रैरीमहे । संभजामहे । यद्वा द्वितीयार्थे तृतीया । सुम्नानि धनानीमहे । याचामहे ॥

॥ अथाष्टमी ॥

त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यं ।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥८॥
त्वां । दूतं । अग्ने । अमृतं । युगेऽयुगे । हव्यऽवाहं । दधिरे । पायुं । ईड्यं ।
देवासः । च । मर्तासः । च । जागृविं । विऽभुं । विश्पतिं । नमसा । नि । सेदिरे ॥८॥

हे अग्ने त्वां देवासो देवाश्च मर्तासो मनुष्याश्च दूतं दधिरे । विदधिरे । कृतवं[illegible] । कीदृशं त्वां । अमृतममरणं युगे युगे काले काले तत्तद्यागानुष्ठानसमये हव्यवाहं हव्यानां हविषां वोढारं पायुं पालयितारमीड्यं स्तुत्यं । अपि च त उभयविधा जागृविं जागरणशीलं विभुं व्याप्तं विश्पतिं विशां प्रजानां पालयितारं तमग्निं नमसा नमस्कारेण हविर्लक्षणान्नेन वा निषेदिरे । उपसेदिरे ॥

॥ अथ नवमी ॥

विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे ।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥९॥

विऽभूषन्। अग्ने। उभयान्। अनु। व्रता। दूतः। देवानां। रजसी इति। सं। ईयसे।
यत्। ते। धीतिं। सुऽमतिं। आऽवृणीमहे। अध। स्म। नः। त्रिऽवरूथः। शिवः। भव ॥९॥

हे अग्ने उभयानुभयविधान् देवान्मनुष्यांश्च विभूषन् विशेषेण भूषयन् अलंकुर्वन् त्वमनु व्रता व्रतान्यनु व्रतेषु कर्मसु यागेषु देवानां दूतः सन् रजसी द्यावापृथिव्यौ समीयसे। संचरसि। देवानानेतुं द्युलोकं गच्छसि हवींषि च नेतुमिमं लोकं। किंच यद्यस्मात्ते तुभ्यं त्वदर्थं धीतिं कर्म सुमतिं शोभनां स्तुतिं चावृणीमहे वयं संभजामहे अधातः कारणात् त्रिवरूथस्त्रिस्थानस्त्वं नोऽस्माकं शिवः सुखकरो भव ॥ स्मेत्येतत्पादपूरणं ॥

प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छंदसि तं सुप्रतीकमित्याद्याः षडृचः। सूचितं च। तं सुप्रतीकमिति षट्। आ० ४.१३.। इति ॥

॥ तत्र प्रथमा सूक्ते दशमी ॥

तं सुप्रतीकं सुदृशं स्वंचमविद्वांसो विदुष्टरं सपेम।
स यक्षद्विश्वा वयुनानि विद्वान्प्र हव्यमग्निरमृतेषु वोचत् ॥१०॥

तं। सुऽप्रतीकं। सुऽदृशं। सुऽअंचं। अविद्वांसः। विदुःऽतरं। सपेम।
सः। यक्षत्। विश्वा। वयुनानि। विद्वान्। प्र। हव्यं। अग्निः। अमृतेषु। वोचत् ॥१०॥

अविद्वांसो वैदुष्यरहिता अल्पमतयो वयं विदुष्टरं विद्वत्तरं सर्वज्ञं तमग्निं सपेम। परिचरेम। कीदृशं। सुप्रतीकं शोभनांगं सुदृशं शोभनद्रष्टारं स्वंचं सुष्ठुंचंतं गच्छंतं। किंच स तादृशोऽग्निर्यक्षत्। देवान्यजतु। विश्वा सर्वाणि वयुनानि। ज्ञाननामैतत्। इह तु ज्ञातव्ये वर्तते। ज्ञातव्यान्यर्थजातानि विद्वान् जानन्नग्निरमृतेषु मरणरहितेषु देवेषु हव्यमस्मदीयं हविः प्रवोचत्। प्रब्रवीतु। युष्मदर्थं हविः कल्पितं तदर्थं यूयमागच्छतेत्येवं कथयतु ॥

॥ इति चतुर्थस्य पंचमेऽष्टादशो वर्गः ॥

॥ अथैकादशी ॥

तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिं।
यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया ॥११॥

तं। अग्ने। पासि। उत। तं। पिपर्षि। यः। ते। आनट्। कवये। शूर। धीतिं।
यज्ञस्य। वा। निऽशितिं। वा। उत्ऽइतिं। वा। तं। इत्। पृणक्षि। शवसा। उत। राया ॥११॥

हे अग्ने तं पुरुषं पासि। रक्षसि। उतापि च तं पिपर्षि। कामैः पूरयसि। यः पुरुषो हे शूर शौर्यवन्नग्ने कवये क्रांतदर्शनाय ते तुभ्यं त्वदर्थं धीतिं कर्म स्तुतिं वानट् प्राप्नोति। यद्वा क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी। कविं त्वां धीतिमानट् प्रापयति। तं पासीत्यन्वयः। अपि च यज्ञस्य यागस्य वा तत्साधनभूतस्य हविषो वा निशितिं वा। निशितिः संस्कारः। तं वोदितिमुद्गमनं वानट् प्रापयति तमित्तमेव शवसा बलेन पृणक्षि। पूरयसि। उतापि च राया धनेन पूरयसि ॥

॥ अथ द्वादशी ॥

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री ॥१२॥

त्वं। अग्ने। वनुष्यतः। नि। पाहि। त्वं। ऊं इति। नः। सहसाऽवन्। अवद्यात्।
सं। त्वा। ध्वस्मन्ऽवत्। अभि। एतु। पाथः। सं। रयिः। स्पृहयाय्यः। सहस्री ॥१२॥

हे अग्ने त्वं वनुष्यतो हिंसकाच्चोर्नि नितरामस्मान्रक्ष। हे सहसावन् बलवन्नग्ने त्वमु त्वमेव नोऽस्मानवद्यात्पापात् निपाहि। त्वा त्वां ध्वस्मन्वत् ध्वंसनवत् ध्वस्तदोषं पाथो हविर्लक्षणमस्माभिर्दत्तमन्नं समभ्येतु। सम्यगभिगच्छतु। स्पृहयाय्यः स्पृहणीयः सहस्री सहस्रसंख्यायुक्तो रयिस्त्वया दत्तं धनं सम्यगभिगच्छतु ॥

व्यूळ्हे दशरात्रे पंचमेऽहन्याग्निमारुतेऽग्निर्होतेति तृचो जातवेदसनिविद्धानीयः। सूत्रितं च। अग्निर्होता गृहपतिः स राजेति तिस्रः। आ॰ ८.८.। इति ॥ पत्नीसंयाजेषु गृहपतेराद्यानुवाक्या। सूत्रितं च अग्निर्होता गृहपतिः स राजा हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः। आ॰ १.१०.। इति ॥ आश्विनशस्त्रस्यैषैव प्रतिपत्। सूत्रितं च। अग्निर्होता गृहपतिः स राजेति प्रतिपदेकपातिनी पच्छः। आ॰ ६.५.। इति ॥

॥ सैषा सूक्ते त्रयोदशी ॥

अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः।
देवानां उत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा ॥१३॥

अग्निः। होता। गृहऽपतिः। सः। राजा। विश्वा। वेद। जनिमा। जातऽवेदाः।
देवानां। उत। यः। मर्त्यानां। यजिष्ठः। सः। प्र। यजतां। ऋतऽवा ॥१३॥

होता देवानामाह्वाता राजा राजमानः सोऽग्निर्गृहपतिर्गृहाणां पतिरधिपतिर्भवति। तथा विश्वा विश्वानि सर्वाणि जनिम जन्मानि जन्मवंति भूतजातानि जातवेदा जातप्रज्ञः सन् वेद। वेत्ति। जानाति। योऽग्निर्देवानामिंद्रादीनामुतापि च मर्त्यानां मनुष्याणां च मध्ये यजिष्ठोऽतिशयेन यष्टा भवति ऋतावा। ऋतं सत्यं यज्ञो वा। तद्वान् सोऽग्निः प्र यजतां। प्रकर्षेण देवान्यजतु ॥

अग्ने यदद्येति दर्शपूर्णमासयोः स्विष्टकृतो याज्या। सूत्रितं च। अग्ने यदद्य विशो अध्वरस्य होतरित्यनवानं यजति। आ० १.६.। इति ॥

॥ सैषा सूक्ते चतुर्दशी ॥

अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा।
ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य ॥१४॥

अग्ने। यत्। अद्य। विशः। अध्वरस्य। होतरिति। पावकऽशोचे। वेः। त्वं। हि। यज्वा।
ऋता। यजासि। महिना। वि। यत्। भूः। हव्या। वह। यविष्ठ। या। ते। अद्य ॥१४॥

हे अध्वरस्य होतर्यज्ञस्य निष्पादक पावकशोचे शोधकदीप्ते एवंभूत हे अग्ने अद्यास्मिन्काले विशो मनुष्यस्य यजमानस्य यत्कर्तव्यं तद्वेः। कामयस्व। हि यस्मात्त्वं यज्वा देवानां यष्टा भवसि तस्मात्त्वमृता ऋते यज्ञे यजासि। देवान्यज। अपि च महिना महिम्ना स्वमाहात्म्येन यद्यस्माद्विभूः विभवसि व्याप्तो भवसि अतः कारणात् हे यविष्ठ युवतमाग्ने ते तुभ्यं त्वदर्थमद्येदानीं या यानि हव्यानि जुहुमस्तानि हव्या हव्यानि हवींषि वह। स्वकीयां स्विष्टकृदाख्यां तनुं प्रापय ॥

॥ अथ पंचदशी ॥

अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै।
अवा नो मघवन्वाजसाताविग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम ॥१५॥

अभि। प्रयांसि। सुऽधितानि। हि। ख्यः। नि। त्वा। दधीत। रोदसी इति। यजध्यै।
अव। नः। मघऽवन्। वाजऽसातौ। अग्ने। विश्वानि। दुःऽइता। तरेम। ता।
तरेम। तव। अवसा। तरेम ॥१५॥

हे अग्ने सुधितानि सु निहितानि वेद्यामासादितानि प्रयांस्यन्नानि हविर्ल-

क्षणान्यभिख्यः। अभिपश्यसि। हि पूरकः। तादृशं त्वां रोदसी द्यावापृथिव्यावे-तदुपलक्षितान् सर्वान् देवान्यजध्यै यष्टुं निदधीत। अयं यजमानो निहितवान्। हे मघवन्नग्ने नोऽस्मान्वाजसातौ संग्रामेऽन्नस्य संभजने वा निमित्तभूतेऽव। रक्ष। वयं च विश्वानि सर्वाणि दुरिता दुरितानि दुःखानि तरेम। अति-क्रामेम। अन्यद्गतं ॥

॥ इति चतुर्थस्य पंचम एकोनविंशो वर्गः ॥

अग्निप्रणयनेऽग्ने विश्वेभिरित्येषानुवक्तव्या। सूचितं च। अग्ने विश्वेभिः स्वनीक देवैरित्यर्द्धर्च आरमेत्। आ० २.१७.। इति ॥

॥ सैषा सूक्ते षोडशी ॥

अग्ने॑ विश्वे॑भिः स्वनीक दे॒वैरूर्णा॑वंतं प्रथ॒मः सी॑द॒ योनिं॑।

कु॒ला॒यिनं॑ घृ॒तवं॑तं सवि॒त्रे य॒ज्ञं न॑य॒ यज॑मानाय सा॒धु ॥१६॥

अग्ने॑। विश्वे॑भिः। सु॒ऽअ॒नी॒क॒। दे॒वैः। ऊर्णा॑ऽवंतं। प्र॒थ॒मः। सी॒द॒। योनिं॑।

कु॒ला॒यिनं॑। घृ॒तऽवं॑तं। स॒वि॒त्रे। य॒ज्ञं। न॒य॒। यज॑मानाय। सा॒धु ॥१६॥

हे स्वनीक सुज्वालाग्ने विश्वेभिर्विश्वैः सर्वैर्देवैः सहोर्णावंतमूर्णास्तुकावंतं योनिमुत्तरवेदिलक्षणं स्थानं प्रथमः सर्वेषु देवेषु मुख्यस्त्वं सीद। उपविश। कीदृशं योनिं। कुलायिनं। कुलायो नीडं। तत्सदृशं गुग्गुल्वादिसंभरणोपेतं। तथा च श्रूयते। कुलायमिव ह्येतद्यज्ञे क्रियते यत्पैतुदारवाः परिधयो गुग्गुलूर्णा-स्तुकाः सुगंधितेजनानि। ऐ० ब्रा० १.२८.। इति। घृतवंतं व्याघारणाज्ययुक्तं। एवमुत्तरवेद्यां निषण्णस्त्वं सवित्रे हविषां प्रेरयित्रे यजमानाय॥ षष्ठ्यर्थे चतुर्थ्येषा॥ ईदृशस्य यजमानस्य यज्ञं साध्वार्जवेन नय। देवान्प्रापय ॥

॥ अथ सप्तदशी ॥

इ॒मम॑ु॒ त्यम॑थर्व॒वद॒ग्निं म॑थंति वे॒धसः॑।

यमं॑कु॒यंत॒मान॑य॒न्नमू॑रं श्या॒व्या॑भ्यः ॥१७॥

इ॒मं। ऊं॒ इति॑। त्यं। अ॒थ॒र्वऽव॒त्। अ॒ग्निं। मं॒थं॒ति॒। वे॒धसः॑।

यं। अं॒कु॒ऽयंतं॑। आ। अन॑यन्। अमू॑रं। श्या॒व्या॑भ्यः ॥१७॥

वेधसः कर्मणां विधातार ऋत्विज इमं दृश्यमानं त्यं तं पूर्वोक्तगुणमग्निम-थर्ववत् यथाथर्वाख्य ऋषिः पुरामथ्नात्तथा मंथंति। मथ्नंति। अरण्योः सका-

शाज्जनयंति । अंकूयंतं । कुत्सितमंचनं गमनमंकु । तदात्मन इच्छंतं देवेभ्यो निर्गत्येतस्ततः पलायमानममूरममूढं यमग्निं श्याव्याभ्यः । श्यावीति रात्रिनाम । तत्र भवास्तमसः संहतयः श्याव्याः । ताभ्यः सकाशादानयन् आगमयन् तं मंथंतीत्यन्वयः ॥

॥ अथाष्टादशी ॥

जनिष्वा देववीतये सर्वताता स्वस्तये ।

आ देवान्वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः ॥१८॥

जनिष्व । देवऽवीतये । सर्वऽताता । स्वस्तये ।

आ । देवान् । वक्षि । अमृतान् । ऋतऽवृधः । यज्ञं । देवेषु । पिस्पृशः ॥१८॥

हे अग्ने सर्वताता सर्वैस्तायमाने यज्ञे मथ्यमानस्त्वं जनिष्व । प्रादुर्भव । किमर्थं । देववीतये देवकामाय यजमानाय ॥ षष्ठ्यर्थे चतुर्थ्येषा ॥ ईदृशस्य यजमानस्य स्वस्तयेऽविनाशार्थं । जनित्वा चामृतान्मरणरहितानृतावृधो यज्ञस्य वर्धयितॄन् देवानावक्षि । आवह । तदनंतरं तेषु देवेष्वस्मदीयं यज्ञं पिस्पृशः । स्पर्शय । प्रापयेत्यर्थः ॥

॥ अथैकोनविंशी ॥

वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहंतं ।

अस्थूरि नो गार्हपत्यानि संतु तिग्मेन नस्तेजसा सं शिशाधि ॥१९॥

वयं । ऊं इति । त्वा । गृहऽपते । जनानां । अग्ने । अकर्म । संऽइधा । बृहंतं ।

अस्थूरि । नः । गार्हऽपत्यानि । संतु । तिग्मेन । नः । तेजसा । सं । शिशाधि ॥१९॥

हे गृहपते यज्ञानां पालकाग्ने जनानां प्राणिनां मध्ये वयमु वयमेव त्वा त्वां समिधा समिंधनेन बृहंतं महांतमकर्म । कृतवंतः स्मः । अतः कारणात् नोऽस्माकं गार्हपत्यानि गृहपतित्वान्यस्थूर्यस्थूरीणि । एकाश्वयुक्तः शकटः स्थूरिरित्युच्यते तद्विपरीतो बहुभिरश्वैरुपेतः शकटोऽस्थूरिः । तेन च संपूर्णता लक्ष्यते । अस्थूरीणि पुत्रपशुधनादिभिः संपूर्णानि भवंतु । अपि च नोऽस्मान् तिग्मेन तीक्ष्णेन तेजसा सं शिशाधि । सम्यङ्क्ष्श्य । सम्यक् तीक्ष्णीकुरु । संयोजयेत्यर्थः ॥

॥ इति चतुर्थस्य पंचमे विंशो वर्गः ॥

॥ इति षष्ठे मंडले प्रथमोऽनुवाकः ॥

द्वितीयेऽनुवाकेऽष्ट सूक्तानि। तत्र त्वमग्ने यज्ञानामित्यष्टाचत्वारिंशदृचं प्रथमं सूक्तं भरद्वाजस्यार्षमाग्नेयं। आद्या षष्ठी च वर्धमाना गायत्री षट्सप्तकाष्टकाः सा वर्धमानेत्युक्तलक्षणोपेतत्वात्। सप्तविंश्यनुष्टुप्। आ ते अग्ने अग्निं देवास इत्येते ऋचावनुष्टुभौ। तयोः पूर्वा वीती यो देवमिति त्रिष्टुप्। शिष्टा द्वाचत्वारिंशदृचो गायत्र्यः। तथा चानुक्रम्यते। त्वमग्नेऽष्टाचत्वारिंशद्गायत्रं वर्धमानाद्या षष्ठी च सप्तविंश्यनुष्टुप् त्रिष्टुप्पूर्वे चांत्ये इति॥ प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ गायत्रे छंदसीदं सूक्तमुच्यते। तत्रांत्यास्तिस्र ऋच उद्धर्तव्याः। सूत्र्यते हि। त्वमग्ने यज्ञानामिति तिस्र उत्तमा उद्धरेत्। आ० ४.१३.। इति॥ विश्वजित्याग्निमारुते बृहत्साम यद्यग्निष्टोमसाम स्यात्तदानीमाद्याः षडृचः स्तोत्रियानुरूपार्थाः। सूत्रितं हि। त्वमग्ने यज्ञानामिति स्तोत्रियानुरूपौ। आ० ८.७.। इति॥

॥ तत्र प्रथमा ॥

त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने॥१॥

त्वं। अग्ने। यज्ञानां। होता। विश्वेषां। हितः। देवेभिः। मानुषे। जने॥१॥

हे अग्ने त्वं विश्वेषां सर्वेषां सप्तसंस्थारूपेण भिन्नानां यज्ञानां होता होमनिष्पादकोऽसि। यद्वा यज्ञानां संबंधी देवानामाह्वाता भवसि। कुत इत्यत आह। यस्मात्त्वं मानुषे मनोः संबंधिनि मनुष्ये जने यजमाने देवेभिर्देवैर्हितो होतृत्वेन निहितोऽसि तस्मादित्यर्थः॥

॥ अथ द्वितीया ॥

स नो मंद्राभिरध्वरे जिह्वाभिर्यजा महः। आ देवान्वक्षि यक्षि च॥२॥

सः। नः। मंद्राभिः। अध्वरे। जिह्वाभिः। यज। महः। आ। देवान्। वक्षि। यक्षि। च॥२॥

हे अग्ने स त्वं नोऽस्माकमध्वरे यज्ञे मंद्राभिर्मदकरीभिः स्तुत्याभिर्वा जिह्वाभिर्ज्वालाभिर्महो महतो देवान्यज। हविर्भिस्तर्पय। कथं तदित्युच्यते। देवान्यष्टव्यानिंद्रादीनावक्षि। आवह। ततो यक्षि च। यज च। हवींषि तेभ्यो देहीत्यर्थः॥

पाथिकृत्यामग्नेः पथिकृतोऽनुवाक्या वेत्थेत्येषा। सूचितं च। वेत्था हि वेधो अध्वन आ देवानामपि पंथामागन्म। आ० ३.१०.। इति॥

॥ सैषा तृतीया ॥

वेत्था हि वेधो अध्वनः पथश्च देवांजसा। अग्ने यज्ञेषु सुक्रतो ॥३॥

वेत्थ। हि। वेधः। अध्वनः। पथः। च। देव। अंजसा। अग्ने। यज्ञेषु। सुक्रतो इति सुऽक्रतो ॥३॥

हे वेधो विधातः सुक्रतो शोभनकर्मन्देव दानादिगुणयुक्ताग्ने त्वं यज्ञेषु दर्शपूर्णमासादियागेष्वध्वनो महामार्गान् पथश्च क्षुद्रमार्गांश्चांजसा जवेन वेत्थ। जानासि। हि यस्मादेवं तस्मात्कारणाद्यज्ञमार्गाद्भ्रष्टं यजमानं पुनस्तं मार्गं प्रापयेत्यर्थः ॥

॥ अथ चतुर्थी ॥

त्वामीळे अध द्विता भरतो वाजिभिः शुनं। ईजे यज्ञेषु यज्ञियं ॥४॥

त्वां। ईळे। अध। द्विता। भरतः। वाजिऽभिः। शुनं। ईजे। यज्ञेषु। यज्ञियं ॥४॥

हे अग्ने त्वां भरतो दौष्यंतिरेतत्संज्ञो राजा वाजिभिः। वाजो हविर्लक्षणमन्नं। तद्वद्भिर्ऋत्विग्भिः सह द्विता द्विविधमिष्टप्राप्त्यनिष्टपरिहाररूपेण द्विधा भिन्नं शुनं सुखमुद्दिश्येळे। स्तुतवान्। स्तुत्वा च यज्ञियं यज्ञार्हं त्वां यज्ञेषु ॥ तृतीयार्थे सप्तमी ॥ यज्ञैरीजे। इष्टवान्। तस्मै त्वमुभयविधं सुखं प्रादा इत्यर्थः ॥

॥ अथ पंचमी ॥

त्वमिमा वार्या पुरु दिवोदासाय सुन्वते। भरद्वाजाय दाशुषे ॥५॥

त्वं। इमा। वार्या। पुरु। दिवःऽदासाय। सुन्वते। भरत्ऽवाजाय। दाशुषे ॥५॥

हे अग्ने त्वमिमानि दृश्यमानानि पुरु पुरूणि बहूनि वार्या वार्याणि वरणीयानि संभजनीयानि धनानि दिवोदासाय सुन्वते। लुप्तोपममेतत्। यथा सोमाभिषवं कुर्वते दिवोदासाख्याय राज्ञे प्रादास्तथा दाशुषे हवींषि दत्तवते भरद्वाजाय ऋषये देहीति शेषः ॥

॥ इति चतुर्थस्य पंचम एकविंशो वर्गः ॥

॥ अथ षष्ठी ॥

त्वं दूतो अमर्त्य आ वहा दैव्यं जनं। शृण्वन्विप्रस्य सुष्टुतिं ॥६॥

त्वं। दूतः। अमर्त्यः। आ। वह। दैव्यं। जनं। शृण्वन्। विप्रस्य। सुऽस्तुतिं ॥६॥

अमर्त्योऽमरणधर्मस्त्वं दूतो भूत्वा दैव्यं देवसंबंधिनं जनमावह । अस्मद्यज्ञ आनय। किं कुर्वन्। विप्रस्य मेधाविनो भरद्वाजस्य सुष्टुतिं शोभनां स्तुतिं शृण्वन् ॥

॥ अथ सप्तमी ॥

त्वाम॑ग्ने स्वा॒ध्यो॒३॒॑ मर्ता॑सो दे॒ववी॑तये । य॒ज्ञेषु॑ दे॒वमी॑ळते ॥७॥

त्वां । अ॒ग्ने॒ । सु॒ऽआ॒ध्यः॑ । मर्ता॑सः । दे॒वऽवी॑तये । य॒ज्ञेषु॑ । दे॒वं । ई॒ळ॒ते॒ ॥७॥

हे अग्ने देवं द्योतमानं त्वां स्वाध्यः शोभनाध्याना मर्तासो मनुष्या देववीतये देवानां तर्पनार्थं यज्ञेष्वीळते । स्तुवंति याचंते वा ॥

॥ अथाष्टमी ॥

तव॒ प्र य॑क्षि सं॒दृश॑मु॒त क्रतुं॑ सु॒दान॑वः । विश्वे॑ जुषंत का॒मिनः॑ ॥८॥

तव॑ । प्र । य॒क्षि॒ । स॒म्ऽदृश॑म् । उ॒त । क्रतु॑म् । सु॒ऽदान॑वः । विश्वे॑ । जु॒ष॒न्त॒ । का॒मिनः॑ ॥८॥

हे अग्ने तव संदृशं सम्यग्दर्शनीयं यद्वा सम्यग्द्रष्टारं सर्वस्य भासकं तेजः प्रयक्षि । प्रयक्ष्ये । प्रकर्षेण पूजयामि । उतापि च सुदानवः सुदानोः शोभन-दानस्य तव क्रतुं कर्म प्रज्ञानं वा पूजयामि । न केवलमहमेव किंत्वन्ये विश्वे सर्वेऽपि यजमानाः कामिनस्त्वदनुग्रहात्तैस्तैः कामैरुपेताः संतो जुषंत । त्वदीयं संदृशं क्रतुं च सेवंते ॥

॥ अथ नवमी ॥

त्वं होता॒ मनु॑र्हितो॒ वह्नि॑रा॒सा वि॒दुष्ट॑रः । अग्ने॒ यक्षि॑ दि॒वो विशः॑ ॥९॥

त्वं । होता॑ । मनुः॑ऽहितः । वह्निः॑ । आ॒सा । वि॒दुःऽत॑रः । अग्ने॑ । यक्षि॑ । दि॒वः । विशः॑ ॥९

हे अग्ने त्वं होता होतृत्वेन मनुर्हितो मनुनाहितोऽसि । आसास्येनास्यभूतया ज्वालया वह्निर्हविषां वोढा विदुष्टरोऽतिशयेन विद्वान् । अतः कारणात्त्वं दिवो द्युलोकसंबंधिनीर्विशो दैवीः प्रजा यक्षि । यज ॥

दर्शपूर्णमासयोः सामिधेनीष्वग्न आ याहीत्याद्यास्तिस्रः । सूचितं च । अग्न आ याहि वीतये गृणान ईळेन्यो नमस्यस्तिरः । आ॰ १.२. । इति ॥ गार्हप-त्याहवनीययोर्मिथः संसर्गेऽग्नये वीतयेऽष्टाकपालः पुरोडाशः । तस्याग्न आ याहीत्येषानुवाक्या । सूचितं च । अग्न आ याहि वीतये यो अग्निं देववीतये । आ॰ ३.१३. । इति ॥

॥ सैषा सूक्ते दशमी ॥

अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ॥१०॥

अग्ने। आ। याहि। वीतये। गृणानः। हव्यऽदातये। नि। होता। सत्सि। बर्हिषि ॥१०॥

हे अग्ने त्वमायाहि। आगच्छ। किमर्थं। वीतये हविषां भक्षणार्थं। किंच हव्यदातये हव्यानि हवींषि देवेभ्यो दातुं। गृणानः स्तूयमानस्त्वं बर्हिष्यास्तीर्णे दर्भे होता सन् निषत्सि। निषीद। उपविश ॥

॥ इति चतुर्थस्य पंचमे द्वाविंशो वर्गः ॥

॥ अथैकादशी ॥

तं त्वा समिद्भिरंगिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य ॥११॥

तं। त्वा। समित्ऽभिः। अंगिरः। घृतेन। वर्धयामसि। बृहत्। शोच। यविष्ठ्य ॥११॥

हे अंगिरोऽंगनादिगुणयुक्त अंगाररूप वांगिरसः पुत्र वाग्ने तं पूर्वोक्तगुणं त्वा त्वां समिद्भिः समिंधनहेतुभिर्दारुभिर्घृतेनाज्येन च वर्धयामसि। वर्धयामः। अतो हे यविष्ठ्य युवतमाग्ने बृहन्महदत्यंतं शोच। दीप्यस्व ॥

॥ अथ द्वादशी ॥

स नः पृथु श्रवाय्यमच्छा देव विवाससि। बृहदग्ने सुवीर्यं ॥१२॥

सः। नः। पृथु। श्रवाय्यं। अच्छ। देव। विवाससि। बृहत्। अग्ने। सुऽवीर्यं ॥१२॥

हे देव द्योतमानाग्ने स पूर्वोक्तगुणस्त्वं पृथु विस्तीर्णं श्रवाय्यं श्रवणीयं प्रशस्यं बृहन्महत्सुवीर्यं शोभनवीर्योपेतं धनं नोऽस्मानच्छ विवाससि। अभिगमय। अत्र वाजसनेयकं। अच्छा देव विवाससीति तन्नो गमयेत्येवैतदाहेति ॥

अग्निमंथने त्वामग्ने पुष्करादधीत्याद्यास्तिस्र ऋचोऽनूच्याः। सूचितं च। त्वामग्ने पुष्करादधीति तिसृणामर्धर्चं शिष्ट्वारमेत्। आ० २.१६.। इति ॥

॥ तत्र प्रथमा सूक्ते त्रयोदशी ॥

त्वामग्ने पुष्करादध्यथर्वा निरमंथत। मूर्ध्नो विश्वस्य वाघतः ॥१३॥

त्वां। अग्ने। पुष्करात्। अधि। अथर्वा। निः। अमंथत। मूर्ध्नः। विश्वस्य। वाघतः ॥१३॥

हे अग्ने अथर्वैतन्नामक ऋषिस्त्वां पुष्करादधि पुष्करपर्णे निरमंथत। अरण्योः

सकाशादजनयत् । कीदृशात्पुष्करात् । मूर्ध्नो मूर्धवद्धारकाद्विश्वस्य सर्वस्य जगतो वाघतो वाहकात् । पुष्करपर्णे हि प्रजापतिर्भूमिमप्रथयत् तत्पुष्करपर्णेऽप्रथयदिति श्रुतेः । भूमिश्च सर्वजगत आधारभूतेति पुष्करपर्णस्य सर्वजगद्धारकत्वं । अत्र पुष्करशब्देन पुष्करपर्णमभिधीयत इति । एतच्च तैत्तिरीयके विस्पष्टमाम्नातं । त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रुतमविंददिति ॥

॥ अथ चतुर्दशी ॥

तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरंदरं ॥१४॥

तं । ऊं इति । त्वा । दध्यङ् । ऋषिः । पुत्रः । ईधे । अथर्वणः । वृत्रऽहनं । पुरंऽदरं ॥१४॥

हे अग्ने य उक्तगुणस्तमु तमेव त्वामथर्वणः पुत्रो दध्यङ् एतत्संज्ञ ऋषिरीधे । दीपितवान् । कीदृशं । वृत्रहणमावरकाणां शत्रूणां हंतारं पुरंदरमसुरपुराणां दारयितारं ॥

॥ अथ पंचदशी ॥

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमं । धनंजयं रणेरणे ॥१५॥

तं । ऊं इति । त्वा । पाथ्यः । वृषा । सं । ईधे । दस्युहनऽतमं । धनंऽजयं । रणेऽरणे ॥१५॥

पाथ्यो वृषा नाम कश्चिदृषिः । तमु तमेव त्वा त्वां हे अग्ने समीधे । समिंध । समदीपयत् । कीदृशं । दस्युहंतममतिशयेन दस्यूनामुपक्षपयितॄणां शत्रूणां हंतारं रणे रणे युद्धे युद्धे धनंजयं धनानां जेतारं ॥

॥ इति चतुर्थस्य पंचमे त्रयोविंशो वर्गः ॥

उक्थ्ये क्रतौ तृतीयसवने मैत्रावरुणस्यैह्यू ष्वित्यादिकौ तृचौ स्तोत्रियानुरूपौ । आ॰ ६.१.॥ आभिप्लविकेषूक्थ्येषु त्वेतौ वैकल्पिकौ स्तोत्रियानुरूपौ । आभिप्लविकेषूक्थ्येषु सूत्रितं च । एह्यू षु ब्रवाणि त आग्निरगामि भारतः । आ॰ ७.८. । इति ॥ पौनराधेयिक्यामिष्टावुत्तराज्यभागस्यैह्यू ष्वित्यनुवाक्या । सूत्रितं च । एह्यू षु ब्रवाणि त इत्याग्नेयावाज्यभागौ । आ॰ २.८. । इति ॥

॥ सैषा सूक्ते षोडशी ॥

एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इंदुभिः ॥१६॥

आ । इहि । ऊं इति । सु । ब्रवाणि । ते । अग्ने । इत्था । इतराः । गिरः । एभिः । वर्धासे । इंदुऽभिः ॥१६॥

हे अग्न एहि । आगच्छ । ते तुभ्यं त्वदर्थं गिरः स्तुतीरित्थेत्थमनेन प्रकारेण स सुष्ठु ब्रवाणीत्याशास्यते । ताः स्तुतीः शृणित्यर्थः । उ इत्येतत्पूरकं । इतरा असुरैः कृताः स्तुतीः शृणिवति शेषः । तथा च ब्राह्मणं । अग्न इत्येतरा गिर इत्यसुर्या ह वा इतरा गिरः । ऐ० ब्रा० ३. ४९. । इति । अपि चागतस्त्वमेभिरेतैरिंदुभिः सोमैर्वर्धासे । वर्धस्व ॥

॥ अथ सप्तदशी ॥

यत्र क्व च ते मनो दक्षं दधस उत्तरं । तत्रा सदः कृणवसे ॥१७॥

यत्रं । क्वं । च । ते । मनः । दक्षं । दधसे । उत्ऽतरं । तत्रं । सदः । कृणवसे ॥१७॥

हे अग्ने ते तव मनोऽनुग्रहात्मकमंतःकरणं यत्र यस्मिन्देशे क्व च कस्मिंश्चि-द्यजमाने वर्तते तत्र तस्मिन्यजमान उत्तरमुद्गततरं श्रेष्ठं दक्षं बलकरमन्नं वा दधसे । धारयसि । तथा सदः स्थानं च कृणवसे । तस्मिन्यजमाने करोषि ॥

॥ अथाष्टादशी ॥

नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो । अथा दुवो वनवसे ॥१८॥

नहि । ते । पूर्तं । अक्षिऽपत् । भुवत् । नेमानां । वसो इति । अथं । दुवः । वनवसे ॥१८॥

हे अग्ने ते त्वदीयं पूर्तं पूरकं तेजोऽक्षिपदक्ष्णोः पातकं विनाशकं न हि भुवत् । न भवतु । सर्वदास्माकं दर्शनसामर्थ्यं करोतु । हे नेमानां वसो । नेम-शब्दोऽल्पवाची । मनुष्याणां मध्ये कतिपयानां यजमानानां वासक । अधातः कारणात् दुवोऽस्माभिर्यजमानैः कृतं परिचरणं वनवसे । संभजस्व ॥

॥ अथैकोनविंशी ॥

आग्निरंगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः ॥१९॥

आ । अग्निः । अगामि । भारतः । वृत्रऽहा । पुरुऽचेतनः । दिवःऽदासस्य । सत्ऽपतिः ॥१९॥

अयमग्निरागामि । अस्माभिः स्तुतिभिरभ्यगम्यत । कीदृशः । भारतो हविषां भर्ता दिवोदासस्यैतत्संज्ञस्य राज्ञो वृत्रहा वृत्राणां शत्रूणां हंता पुरुचेतनः पुरूणां बहूनां चेतयिता ज्ञाता । सर्वज्ञ इत्यर्थः । सत्पतिः सतां यजमानानां पालयिता ॥

॥ अथ विंशी ॥

स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना । वन्वन्नवातो अस्तृतः ॥२०॥

सः । हि । विश्वा । अति । पार्थिवा । रयिं । दाशत् । महिऽत्वना । वन्वन् । अवातः । अस्तृतः ॥२०॥

स हि खल्वग्निर्विश्वा विश्वानि सर्वाणि पार्थिवा पृथिव्यां भवानि भूतजातानि महित्वा महत्त्वेन स्वमहिम्नातिक्रामन् रयिं धनं दाशत् । अस्मभ्यं ददातु । यद्वा विश्वं सर्वं पार्थिवं पृथिव्यां विद्यमानं धनमतिशयेन दाशत् । ददातु । कीदृशोऽग्निः । महित्वना महत्त्वेन तेजसा वन्वन् काष्ठानि शत्रून्वा हिंसन् अवातोऽन्यैः शत्रुभिरप्रतिगतोऽस्तृतः केनाप्यहिंसितः ॥

॥ इति चतुर्थस्य पंचमे चतुर्विंशो वर्गः ॥

॥ अथैकविंशी ॥

स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता । बृहत्ततंथ भानुना ॥२१॥

सः । प्रत्नऽवत् । नवीयसा । अग्ने । द्युम्नेन । संऽयता । बृहत् । ततंथ । भानुना ॥२१॥

हे अग्ने यः पूर्वोक्तगुणविशिष्टः स तादृशस्त्वं प्रत्नवत् प्रत्नेन पुराणेन नवीयसा नवतरेण द्युम्नेन द्योतमानेन संयता संगच्छता सम्यग्व्याप्नुवता भानुना तेजसा बृहन्महदंतरिक्षं ततंथ । विस्तारयसि ॥

॥ अथ द्वाविंशी ॥

प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया । अर्च गाय च वेधसे ॥२२॥

प्र । वः । सखायः । अग्नये । स्तोमं । यज्ञं । च । धृष्णुऽया । अर्च । गाय । च । वेधसे ॥२२॥

हे सखायः समानख्याना ऋत्विजो वो यूयं धृष्णुया शत्रूणां धर्षकाय वेधसे विधात्रेऽग्नये स्तोमं स्तोत्रं गाय । गायत । तथा यज्ञं यजनसाधनं हविश्च प्रार्च । प्रयच्छ ॥

॥ अथ त्रयोविंशी ॥

स हि यो मानुषा युगा सीदद्धोता कविक्रतुः । दूतश्च हव्यवाहनः ॥२३॥

सः । हि । यः । मानुषा । युगा । सीदत् । होता । कविऽक्रतुः । दूतः । च । हव्यऽवाहनः ॥२३॥

स हि स खल्वग्निः सीदत्। सीदतु। अस्मदीये यज्ञे बर्हिष्युपविशतु। योऽग्निर्होता देवानामाह्वाता कविक्रतुः क्रांतप्रज्ञो मानुषा युगा मानुषाणि युगानि मनुष्यसंबंधिनो यज्ञार्हान्कालविशेषान् येषु यागा अनुष्ठीयंते॥ अत्यंतसंयोगे द्वितीया॥ एतावंतं कालं देवानां दूतः। स हव्यवाहनो हविषां वोढा च भवति॥

॥ अथ चतुर्विंशी ॥

ता राजाना शुचिव्रतादित्यान्मारुतं गणं। वसो यक्षीह रोदसी॥२४॥

ता। राजाना। शुचिऽव्रता। आदित्यान्। मारुतं। गणं। वसो इति। यक्षि। इह। रोदसी इति॥२४॥

ता तौ प्रसिद्धौ राजाना राजमानौ शुचिव्रता शुचिकर्माणौ मित्रावरुणावादित्यानदितेः पुत्रान् धात्रादीन्मारुतं गणं मरुतां संघं च रोदसी द्यावापृथिव्यौ च एतान्देवान् हे वसो वासकाग्न इहास्मिन्यज्ञे यक्षि। यज॥

॥ अथ पंचविंशी ॥

वस्वी ते अग्ने संदृष्टिरिषयते मर्त्याय। ऊर्जो नपादमृतस्य॥२५॥

वस्वी। ते। अग्ने। संऽदृष्टिः। इषऽयते। मर्त्याय। ऊर्जः। नपात्। अमृतस्य॥२५॥

हे ऊर्जो नपाद्बलस्य पुत्राग्ने अमृतस्य मरणरहितस्य ते तव संदृष्टिर्दीप्तिर्वस्वी वासयित्री। प्रशस्येत्यर्थः। सा मर्त्याय मनुष्याय यजमानायेषयते। इषमन्नमिच्छति। ददातीत्यर्थः॥

॥ इति चतुर्थस्य पंचमे पंचविंशो वर्गः ॥

॥ अथ षड्विंशी ॥

क्रत्वा दा अस्तु श्रेष्ठोऽद्य त्वा वन्वन्त्सुरेक्णाः। मर्त आनाश सुवृक्तिं॥२६॥

क्रत्वा। दाः। अस्तु। श्रेष्ठः। अद्य। त्वा। वन्वन्। सुऽरेक्णाः। मर्तः। आनाश। सुऽवृक्तिं॥२६॥

हे अग्ने अद्येदानीं क्रत्वा कर्मणा परिचरणात्मना त्वां वन्वन् संभजन् दा हवींषि दाता यजमानः श्रेष्ठोऽतिशयेन प्रशस्योऽस्तु। सुरेक्णाः शोभनधनश्चास्तु। तथा स मर्तो मनुष्यः सुवृक्तिं त्वद्विषयां सुष्टुतिं चानाश। व्याप्नोतु। तव सर्वदा स्तोता भवत्वित्यर्थः॥

॥ अथ सप्तविंशी ॥

ते ते॑ अग्ने॒ त्वोता॑ इ॒षयं॑तो॒ विश्व॒मायुः॑ ।
तरं॑तो अ॒र्यो अरा॑तीर्व॒न्वंतो॑ अ॒र्यो अरा॑तीः ॥२७॥

ते । ते॒ । अ॒ग्ने॒ । त्वाऽऊ॑ताः । इ॒षयं॑तः । विश्वं॑ । आयुः॑ ।
तरं॑तः । अ॒र्यः । अरा॑तीः । व॒न्वंतः॑ । अ॒र्यः । अरा॑तीः ॥२७॥

हे अग्ने ते त्वदीया ये त्वां स्तुवंति स्तोतारस्त्वोतास्त्वयोता रक्षिता अत एवेषयंत इषमात्मन इच्छंतः संतो विश्वं सर्वमायुरन्नं लभंत इति शेषः। आयुरेव वा शतवर्षलक्षणमिषयंत इच्छंतः प्राप्नुवंतीति शेषः । तथार्योऽरातीरभिगंत्रीररातीः काश्चिच्छत्रुसेनास्तरंतोऽतिक्रामंतोऽर्योऽभिगंत्रीररातीः काश्चन शत्रुसेना वन्वंतो हिंसंतश्च भवंतीति शेषः ॥

॥ अथाष्टाविंशी ॥

अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा॒ यास॒द्विश्वं॒ न्य१॒॑त्रिणं॑। अ॒ग्निर्नो॑ वनते र॒यिं ॥२८॥

अ॒ग्निः। ति॒ग्मेन॑। शो॒चिषा॑। यास॑त्। विश्वं॑। नि। अ॒त्रिणं॑। अ॒ग्निः। नः॒। व॒न॒ते॒। र॒यिं ॥२८॥

अयमग्निस्तिग्मेन तीक्ष्णेन शोचिषा तेजसा विश्वं सर्वमत्रिणमत्तारं राक्षसादिकं नियासत्। निहंतु। अपि च नोऽस्मभ्यमग्नी रयिं धनं वनते। ददातु ॥

॥ अथैकोनत्रिंशी ॥

सु॒वीरं॑ र॒यिमा भ॑र॒ जात॑वेदो॒ विच॑र्षणे। ज॒हि रक्षां॑सि सुक्रतो ॥२९॥

सु॒ऽवीरं॑। र॒यिं। आ। भ॒र॒। जात॑ऽवेदः। विऽच॑र्षणे। ज॒हि। रक्षां॑सि। सु॒क्र॒तो॒ [illegible]
सुऽक्रतो ॥२९॥

हे जातवेदो जातप्रज्ञान जातधन वा विचर्षणे विशेषेण द्रष्टरग्ने सुवीरं शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेतं रयिं धनमाभर। आहर। तथा हे सुक्रतो सुकर्मन्नग्ने रक्षांसि च जहि। विनाशय ॥

॥ अथ त्रिंशी ॥

त्वं नः॑ पा॒ह्यंह॑सो॒ जात॑वेदो अघाय॒तः। रक्षा॑ णो ब्रह्मणस्कवे ॥३०॥

त्वं। नः॒। पा॒हि॒। अंह॑सः। जात॑ऽवेदः। अ॒घ॒ऽय॒तः। रक्ष॑। नः॒। ब्र॒ह्म॒णः॒। क॒वे॒॥३०॥

हे जातवेदस्त्वं नोऽस्मानंहसः पापात्पाहि। रक्ष। तथा हे ब्रह्मणस्कवे स्तुतिरूपस्य मंत्रस्य कवे कावयितः शब्दयितरग्ने। अग्निर्हि शब्दमुत्पादयति। तथा च स्मर्यते। मनः कायाग्निमाहंति स प्रेरयति मारुतं। मारुतस्तूरसि चरन् मंद्रं जनयति स्वरमिति। तादृशाग्नेऽघायतोऽघमनर्थमस्माकमिच्छतः शत्रोश्च नोऽस्मान्रक्ष॥

॥ इति चतुर्थस्य पंचमे षड्विंशो वर्गः ॥

॥ अथैकत्रिंशी ॥

यो नो॑ अग्ने दु॒रेव॒ आ मर्तो॑ व॒धाय॒ दाश॑ति। तस्मा॑न्नः पा॒ह्यंह॑सः ॥३१॥

यः। नः। अ॒ग्ने॒। दुः॒ऽए॒वः॑। आ। मर्तः॑। व॒धाय॑। दाश॑ति। तस्मा॑त्। नः॒। पा॒हि॒। अंह॑सः ॥३१॥

हे अग्ने दुरेवो दुष्टाभिप्रायो यो मर्तो मनुष्यो वधाय स्वस्यायुधाय नोऽस्मानादाशति अभिप्रयच्छति। आयुधेनास्मान्हंतीत्यर्थः। तस्मान्मनुष्यादंहसः पापाच्च नोऽस्मान्पाहि। रक्ष॥

॥ अथ द्वात्रिंशी ॥

त्वं तं दे॑व जि॒ह्वया॒ परि॑ बाधस्व दु॒ष्कृत॑म्। मर्तो॒ यो नो॒ जिघां॑सति ॥३२॥

त्वं। तं। दे॒व॒। जि॒ह्वया॑। परि॑। बा॒ध॒स्व॒। दुः॒ऽकृत॑म्। मर्तः॑। यः। नः॒। जिघां॑सति ॥३२॥

हे देव द्योतमानाग्ने त्वं तं वक्ष्यमाणं दुष्कृतं दुष्कर्मकारिणं मनुष्यं जिह्वया ज्वालया परिबाधस्व। सर्वतो जहि। यो मर्तो मनुष्यो नोऽस्मान् जिघांसति हंतुमिच्छति॥

॥ अथ त्रयस्त्रिंशी ॥

भ॒रद्वा॑जाय स॒प्रथः॒ शर्म॑ यच्छ सहन्त्य। अग्ने॒ वरे॑ण्यं॒ वसु॑ ॥३३॥

भ॒रत्ऽवा॑जाय। स॒ऽप्रथः॑। शर्म॑। य॒च्छ॒। स॒ह॒न्त्य॒। अग्ने॑। वरे॑ण्यं। वसु॑ ॥३३॥

हे सहंत्य शत्रूणामभिभवितरग्ने भरद्वाजाय मह्यमृषये सप्रथः सर्वतः पृथु विस्तीर्णं शर्म सुखं गृहं वा यच्छ। देहि। तथा वरेण्यं वरणीयं वसु धनं च देहि॥

पौर्णमास्यामाग्नेयाज्याभागस्यानुवाक्याग्निर्वृत्राणीत्येषा। सूचितं च। अग्निर्वृत्राणि जंघनदिति पूर्वस्याज्यभागस्यानुवाक्या। आ॰ १.५.। इति॥ इष्टिपशुसोमेषु च यत्र वृधन्वंतौ पुष्टिमंतावित्यादिविशेषविधिर्न दृश्यते तत्र सर्वत्रैषैव प्रथमाज्यभागानुवाक्या॥ उपसद्याग्नेयस्यैषानुवाक्या सायंकालीनस्य त्वेषैव याज्या।

सूचितं च । अग्निर्वृत्राणि जंघनद्य उग्र इव शर्यहेति विपर्यासो याज्यानुवाक्यानां । आ॰ ४.८.। इति ॥

॥ सैषा चतुस्त्रिंशी ॥

अ॒ग्निर्वृ॒त्राणि॑ जंघनद्द्रविण॒स्युर्वि॑प॒न्यया॑ । समि॑द्धः शु॒क्र आहु॑तः ॥३४॥

अ॒ग्निः । वृ॒त्राणि॑ । जं॒घ॒न॒त् । द्र॒वि॒ण॒स्युः । वि॒प॒न्यया॑ । सम्ऽइ॑द्धः । शु॒क्रः । आऽहु॑तः ॥३४॥

विपन्यया स्तुत्या स्तूयमानो द्रविणस्युर्द्रविणं धनं स्तोतृणामिच्छन् यद्वा हविर्लक्षणं धनमात्मन इच्छन्नग्निर्वृत्राण्यावरकाणि रक्षःप्रभृतीनि तमांसि वा जंघनत् । भृशं हंतु । कीदृशोऽग्निः । समिद्धः सम्यग्दीप्तः अत एव शुक्रः शुक्लवर्ण आहुतो हविर्भिरभिहुतः ॥

॥ अथ पंचत्रिंशी ॥

गर्भे॑ मा॒तुः पि॒तुष्पि॒ता वि॑दिद्युता॒नो अ॒क्षरे॑ । सीद॑न्नृ॒तस्य॒ योनि॒मा ॥३५॥

गर्भे॑ । मा॒तुः । पि॒तुः । पि॒ता । वि॒ऽदि॒द्यु॒ता॒नः । अ॒क्षरे॑ । सीद॑न् । ऋ॒तस्य॑ । योनि॑म् । आ ॥३५॥

अत्र मातृपितृशब्दाभ्यां भूद्यावाभिधीयेते । द्यौः पिता पृथिवी मातेति श्रुतेः । मातुर्भूम्या गर्भे गर्भस्थाने मध्येऽक्षरे क्षरणरहिते वेद्याख्ये स्थाने विदिद्युतानो विशेषेण दीप्यमानः पितुः पिता द्युलोकस्य पालयिता हविषां प्रदानेन। एवंभूतोऽग्निर्ऋतस्य यज्ञस्य योनिमुत्तरवेद्याख्यं धिष्ण्यं ॥ सप्तम्यर्थे द्वितीया ॥ आसीदन् उत्तरवेद्यामुपविशन् अग्निर्वृत्राणि जंघनदित्यन्वयः ॥

॥ इति चतुर्थस्य पंचमे सप्तविंशो वर्गः ॥

॥ अथ षट्त्रिंशी ॥

ब्रह्म॑ प्र॒जाव॒दा भ॑र॒ जात॑वेदो॒ विच॑र्षणे । अग्ने॒ यद्दी॒दय॑द्दि॒वि ॥३६॥

ब्रह्म॑ । प्र॒जाऽव॑त् । आ । भ॒र॒ । जात॑ऽवेदः । वि॒ऽच॒र्ष॒णे॒ । अग्ने॑ । यत् । दी॒दय॑त् । दि॒वि ॥३६॥

हे जातवेदो जातानां वेदितर्विचर्षणे विशेषेण द्रष्टरग्ने प्रजावत्पुत्रपौत्रसहितं ब्रह्मान्नमाभर । आहर । यद्ब्रह्म दिवि द्युलोके दीदयद्दीप्यते देवेषु मध्ये यत्प्रशस्तमन्नं राजते तदाहरेत्यर्थः ॥

॥ अथ सप्तत्रिंशी ॥

उप॑ त्वा र॒ण्वसं॑दृशं॒ प्रय॑स्वंतः सहस्कृत । अग्ने॑ ससृ॒ज्महे॒ गिरः॑ ॥३७॥

उप॑ । त्वा॒ । र॒ण्वऽसं॑दृशम् । प्रय॑स्वंतः । स॒हः॒ऽकृ॒त॒ । अग्ने॑ । स॒सृ॒ज्महे॑ । गिरः॑ ॥३७॥

हे सहस्कृत सहसा बलेनोत्पन्नाग्ने प्रयस्वंतो हविर्लक्षणान्नवंतो वयं रत्नसंदृशं रमणीयसंदर्शनं स्तोतव्यसंदर्शनं वा त्वा त्वामुप प्रति गिरः स्तुतीः ससृज्महे। विसृजामः। उच्चारयाम इत्यर्थः ॥

॥ अथाष्टत्रिंशी ॥

उप॑ छा॒याम्इ॑व॒ घृणे॒रग॑न्म॒ शर्म॑ ते व॒यं। अग्ने॒ हिर॑ण्यसंदृशः ॥३८॥

उप॑। छा॒यांऽइ॑व। घृणेः॑। अग॑न्म। शर्म॑। ते॒। व॒यं। अग्ने॑। हिर॑ण्यऽसंदृशः ॥३८॥

हे अग्ने हिरण्यसंदृशो हितरमणीयतेजसो हिरण्यवद्रोचमानतेजसो वा घृणेर्दीप्तस्य ते तव शर्म शरणमाश्रयणमुपागन्म। उपगच्छाम। तत्र दृष्टांतः। छायामिव। यथा घर्मार्त्ताः संतप्ताश्छायामुपागच्छंति तद्वत् ॥

उपसदि प्रातःकालीनस्याग्नेयस्य य उग्र इवेति याज्या सायंकालीनस्य त्वेषवानुवाक्या। सूत्रितं च। अग्निर्वृत्राणि जंघनद्य उग्र इव शर्यहा। आ० ४.८.। इति ॥

॥ सैषा त्रैकोनचत्वारिंशी ॥

य उ॒ग्र इ॑व शर्य॒हा ति॒ग्मशृं॑गो॒ न वंस॑गः। अग्ने॒ पुरो॑ रु॒रोजि॑थ ॥३९॥

यः। उ॒ग्रःऽइ॑व। श॒र्य॒ऽहा। ति॒ग्मऽशृं॑गः। न। वंस॑गः। अग्ने॑। पुरः॑। रु॒रोजि॑थ ॥३९॥

योऽग्निरुग्र इवोद्गूर्णबलो धन्वीव शर्यहा शर्यैर्बाणैः शत्रूणां हंता तिग्मशृंगो न वंसगस्तीक्ष्णशृंगो वननीयगतिर्वृषभ इव हे अग्ने स त्वं पुर आसुरीस्तिस्रः पुरी रुरोजिथ। भग्नवानसि। रुद्रो वा एष यदग्निरिति श्रुतेः। रुद्रकृतमपि त्रिपुरदहनमग्निकृतमेवेत्यग्निः स्तूयते। यद्वा त्रिपुरदहनसाधनभूते बाणेऽग्नेरनीकत्वेनावस्थानादग्निः पुराणि भग्नवानित्युच्यते। देवासुरा वा एषु लोकेषु समयतंत। ऐ० ब्रा० १.२३.। इत्यादिकं ब्राह्मणमनुसंधेयं ॥

अग्निमंथने जायमानेऽग्नावा यं हस्त इत्येषानुवाक्या। सूत्रितं च। आ यं हस्ते न खादिनमित्यर्द्धर्च आरमेत्। आ० २.१६.। इति ॥

॥ सैषा चत्वारिंशी ॥

आ यं हस्ते॒ न खा॒दिनं॒ शिशुं॑ जा॒तं न बिभ्र॑ति। वि॒शाम॒ग्निं स्व॑ध्व॒रं ॥४०॥

आ। यं। हस्ते॑। न। खा॒दिन॑। शिशुं॑। जा॒तं। न। बिभ्र॑ति। वि॒शां। अ॒ग्निं। सु॒ऽअ॒ध्व॒रं ॥४०॥

मंथनोत्पन्नं यमग्निं शिशुं जातं न जातं पुत्रमिव हस्त आबिभ्रति हस्तेषु-

भिमुखं धारयंत्यध्वर्यवः । पूर्वो नशब्दः पुरस्तादुपचारोऽप्युपमार्थीयः । खादिनं न भक्षकं व्याघ्रादिमिव । यथा तं बिभ्रतः पुरुषा अवहितास्तथाभूता इत्यर्थः । यद्वा संप्रत्यर्थे । संप्रतीदानीं खादिनं हविषां भक्षकं यमग्निं हस्ते धारयंति विश्वां जनानां स्वध्वरं शोभनयागस्य निष्पादकं तमग्निं हे ऋत्विजः परिचरतेति शेषः ॥

॥ इति चतुर्थस्य पंचमेऽष्टाविंशो वर्गः ॥

अग्निमंथने जातस्याग्नेराहवनीये प्रहरणसमये प्र देवं देववीतय इति तृचो ऽनुवक्तव्यः । सूचितं च । प्र देवं देववीतय इति द्वे अग्निनाग्निः समिध्यते । आ॰ २.१६. । इति ॥

॥ तत्र प्रथमा सूक्त एकचत्वारिंशी ॥

प्र देवं देववीतये भरता वसुवित्तमं । आ स्वे योनौ नि षीदतु ॥४१॥

प्र । देवं । देवऽवीतये । भरत । वसुवित्ऽतमं । आ । स्वे । योनौ । नि । सीदतु ॥४१॥

हे अध्वर्यवो देवं द्योतमानं वसुवित्तमं वसूनां धनानां वेदयितारं लंभयितारमग्निं प्रभरत । प्रहरत । आहवनीयेऽग्नौ प्रक्षिपत । किमर्थं । देववीतये । देवानां भक्षणार्थं । तथा च ब्राह्मणं । प्र देवं देववीतये भरता वसुवित्तममिति प्रह्रियमाणायाभिरूपा यद्यज्ञेऽभिरूपं तत्समृद्धमा स्वे योनौ निषीदत्वित्येष ह वा अस्य स्वो योनिर्यदग्निरग्नेः । ऐ॰ ब्रा॰ १.१६. । इति । स चाग्निः स्वे योनौ कारणे स्थान आहवनीय आनिषीदतु । अभिनिषण्णो भवतु । ब्राह्मणं च भवति । एष वा अस्य स्वो योनिर्यदग्निरग्नेः । ऐ॰ ब्रा॰ १.१६. । इति ॥

॥ अथ द्वाचत्वारिंशी ॥

आ जातं जातवेदसि प्रियं शिशीतातिथिं । स्योन आ गृहपतिं ॥४२॥

आ । जातं । जातऽवेदसि । प्रियं । शिशीत । अतिथिं । स्योने । आ । गृहऽपतिं ॥४२॥

हे अध्वर्यवो जातं प्रादुर्भूतमतिथिं । लुप्तोपममेतत् । अतिथिमिव प्रियं अत एव गृहपतिं गृहाणां स्वामिनमग्निं जातवेदसि जातप्रज्ञे स्योने सुखकर आहवनीयेऽग्नावाशिशीत ॥ अंतर्णीतण्यर्थस्य शीङ एतद्रूपं ॥ शाययत । स्थापयत ॥ यद्वा श्यैङ् गतावित्यस्य छांदसं रूपं ॥ गमयत । प्रापयतेत्यर्थः ॥ शो तनूकरण इत्यस्य वा रूपं ॥ श्यत । तीक्ष्णीकुरुत । संस्कुरुत । प्रहरतेति यावत् । द्वितीय आकारः पूरकः । जात इतरो जातवेदा इतरः । ऐ॰ ब्रा॰ १.१६. । इत्यादिकं ब्राह्मणमत्रानुसंधेयं ॥

॥ अथ त्रिचत्वारिंशी ॥

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहंति मन्यवे ॥४३॥

अग्ने । युक्ष्व । हि । ये । तव । अश्वासः । देव । साधवः । अरं । वहंति । मन्यवे ॥४३॥

हे देव द्योतमानाग्ने तानश्वान्युक्ष्व । आत्मीये रथे योजय । ये तव त्वदीयाः साधवः साधकाः सुशीला वाश्वासोऽश्वा अरमलं पर्याप्तं वहंति । किमर्थं । मन्यवे । मन्यते यष्टव्यत्वेन देवानचेति मन्युर्यागः । तदर्थं तानश्वान्रथे युक्ष्वेत्यर्थः । हि खलु ॥

॥ अथ चतुश्चत्वारिंशी ॥

अच्छा नो याह्या वहाभि प्रयांसि वीतये । आ देवान्त्सोमपीतये ॥४४॥

अच्छ । नः । याहि । आ । वह । अभि । प्रयांसि । वीतये । आ । देवान् । सोमऽपीतये ॥४४॥

हे अग्ने नोऽस्मानच्छाभिमुख्येन याहि । आगच्छ । तथा प्रयांसि हविर्लक्षणान्यन्नान्यभिलक्ष्य देवानावह । किमर्थं । वीतये तेषां हविषां स्वादनार्थं । तथा सोमपीतये सोमपानार्थं च तान्देवानावह ॥

॥ अथ पंचचत्वारिंशी ॥

उदग्ने भारत द्युमदजस्रेण दविद्युतत् । शोचा वि भाह्यजर ॥४५॥

उत् । अग्ने । भारत । द्युऽमत् । अजस्रेण । दविद्युतत् । शोच । वि । भाहि । अजर ॥४५॥

हे भारत हविषां भर्तरग्न उच्छोच । उन्नततरं दीप्यस्व । तदेव विवृणोति । हे अजर जरारहिताग्ने दविद्युतत् भृशं द्योतमानस्त्वं द्युमत् द्युमता दीप्तिमता ॥ सुपां सुलुगिति तृतीयाया लुक् ॥ अजस्रेणाविच्छेदेन तेजसा वि भाहि । विशेषेण प्रकाशयस्व । यद्वा भातिरत्रांतर्णीतण्यर्थः । त्वं प्रथममुद्दीप्यस्व पश्चादात्मीयेन तेजसा सर्वं जगत्प्रकाशयेति योजनीयं ॥

॥ इति चतुर्थस्य पंचम एकोनत्रिंशो वर्गः ॥

॥ अथ षट्चत्वारिंशी ॥

वीती यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान् ।
होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसा विवासेत् ॥४६॥

वीती । यः । देवं । मर्तः । दुवस्येत् । अग्निं । ईळीत । अध्वरे । हविष्मान् ।
होतारं । सत्यऽयजं । रोदस्योः । उत्तानऽहस्तः । नमसा । आ । विवासेत् ॥४६॥

यो मर्तो मनुष्यो हविष्मान्हविर्भिर्युक्तो यजमानो वीती वीत्या कांतेन हविर्लक्षणेनान्नेन यं कंचन देवं दुवस्येत् परिचरेत् तस्मिन्नध्वरे यज्ञेऽग्निमीळीत। स्तुवीत। सर्वेषु यागेष्वग्निः पूज्यत इत्यर्थः । कीदृशमग्निं । रोदस्योर्द्यावापृथिव्योर्लोकद्वये वर्तमानानां होतारमाह्वातारं सत्ययजं सत्येनावितथेन हविषा यष्टारं । किंचायं यजमान ईदृशमग्निमुत्तानहस्तः कृतांजलिपुटः सन् नमसा नमस्कारेण हविषा वाविवासेत् । परिचरेत् ॥

॥ अथ सप्तचत्वारिंशी ॥

आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि ।
ते ते भवंतूक्षण ऋषभासो वशा उत ॥४७॥

आ । ते । अग्ने । ऋचा । हविः । हृदा । तष्टं । भरामसि ।
ते । ते । भवंतु । उक्षणः । ऋषभासः । वशाः । उत ॥४७॥

अनयाध्ययनं प्रशस्यत इत्याश्वलायनो मन्यते । गृ० १.१. । हे अग्ने ते तुभ्यं हृदा हृदयेन तष्टं संस्कृतमृचा ऋग्रूपेण वर्तमानं हविर्ऋचमेव हविः कृत्वाभरामसि । आहरामः । त इति तच्छब्देन प्रकृतमृग्रूपं हविः परामृश्यते । प्रतिनिर्दिश्यमानापेक्षया पुंस्त्वबहुत्वे । ऋग्रूपं तद्धविस्ते तुभ्यमुक्षण उक्षाणः सेचनसमर्था ऋषभास ऋषभा उतापि च वशाश्च भवंतु । ऋषभवशारूपेण परिणतं सत् त्वद्भक्षणाय भवत्विति शेषः ॥

॥ अथाष्टाचत्वारिंशी ॥

अग्निं देवासो अग्नियमिंधते वृत्रहंतमं ।
येना वसून्याभृता तृळ्हा रक्षांसि वाजिना ॥४८॥

अग्निं । देवासः । अग्नियं । इंधते । वृत्रहन्ऽतमं ।
येन । वसूनि । आऽभृता । तृळ्हा । रक्षांसि । वाजिना ॥४८॥

अग्नियं मुख्यं वृत्रहंतममतिशयेन वृत्रस्य हंतारमिममग्निं देवासो देवा इंधते । दीपयंति । येनाग्निना वसून्यसुरैरपहृतानि धनानि हविर्लक्षणान्यन्नानि वाभृता-

सुरसकाशाद्यजमानाद्वाहृतानि । येन च वाजिना बलवताग्निना रक्षांसि यज्ञविरोधीनि तृळ्हा तृढानि हिंसितानि तमग्निमिंधत इत्यन्वयः ॥
॥ इति चतुर्थस्य पंचमे त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके पंचमोऽध्यायः समाप्तः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

चतुर्थाष्टके षष्ठोऽध्याय आरभ्यते ॥ षष्ठे मंडले द्वितीयेऽनुवाके प्रथमं सूक्तं व्याख्यातं । तत्र पिबा सोममिति द्वितीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं । अंत्या द्विपदा त्रिष्टुप् । तथा चानुक्रांतं । पिबा पंचोनेंद्रं त्रैष्टुभं द्विपदांतमिति ॥ अभिजिति मरुत्वतीयशस्त्र एतन्निविद्धानं । सूचितं च । पिबा सोमं तमु ष्टुहीति मध्यंदिनः । आ० ८.५. । इति ॥ समूळ्हे दशरात्रेऽष्टमेऽहनि मरुत्वतीयशस्त्र एतत्सूक्तं । सूचितं च । पिबा सोममभि तमस्य द्यावापृथिवी । आ० ८.७. । इति ॥ सूर्यस्तुन्नाम्न्येकाहे मरुत्वतीय एतत्सूक्तं निविद्धानं । सूत्र्यते हि । सूर्यस्तुता यशस्कामः पिबा सोममभि । आ० ९.८. । इति ॥ महाव्रतेऽपि मरुत्वतीय एतत्सूक्तं । तथैव पंचमारण्यके सूचितं । पिबा सोममभि यमुग्र तर्दः कया शुभा सवयसः सनीळाः । ऐ० आ० ५.१. । इति ॥ माध्यंदिने सवन आद्यास्तिस्रो होतृमैत्रावरुणब्राह्मणाच्छंसिनां प्रस्थितयाज्याः । सूचितं च । पिबा सोममभि यमुग्र तर्द इति तिस्रोऽर्वाङेहि सोमकामं त्वाहुः । आ० ५.५. । इति ॥

॥ तत्र प्रथमा ॥

पिबा सोममभि यमुग्र तर्द ऊर्वं गव्यं महि गृणान इंद्र ।
वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रममित्रिया शवोभिः ॥१॥

पिब । सोमम् । अभि । यं । उग्र । तर्दः । ऊर्वं । गव्यं । महि । गृणानः । इंद्र ।
वि । यः । धृष्णो इति । वधिषः । वज्रऽहस्त । विश्वा । वृत्रं । अमित्रिया । शवःऽभिः ॥१॥

हे उग्रोद्गूर्णबलेंद्र गृणानोऽंगिरोभिः स्तूयमानस्त्वं यं सोममभ्युद्दिश्य । पातुमित्यर्थः । महि महद्गव्यं गोसंबंध्यूर्वं पणिभिरावृतं समूहं तर्दः प्रकाशितवानसि ॥ तृदिर्हिंसाकर्मा च प्रकाशनार्थः ॥ तं सोमं पिब । पानं कुरु । हे धृष्णो शत्रूणां धर्षक वज्रहस्त वज्रपाणे हे इंद्र यस्त्वं शवोभिर्बलैः सहितः सन् विश्वा विश्वं वृत्रमावरकममित्रियामित्रियं शत्रुं ॥ अमित्रशब्दात् द्वितीयैकवचनस्येयादेशः ॥ विवधिषः व्यवधीः स त्वं सोमं पिबेति संबंधः ॥

॥ अथ द्वितीया ॥

स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो यो मतीनां ।
यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इंद्र चित्राँ अभि तृंधि वाजान् ॥२॥

सः । ईं । पाहि । यः । ऋजीषी । तरुत्रः । यः । शिप्रऽवान् । वृषभः । यः । मतीनां ।
यः । गोत्रऽभित् । वज्रऽभृत् । यः । हरिऽस्थाः । सः । इंद्र । चित्रान् । अभि । तृंधि ।
वाजान् ॥२॥

हे इंद्र ऋजीषी । ऋजीषशब्देन गतरसः सोमोऽभिधीयते । तद्वान्यस्त्वं तरुत्रः शत्रूणां तारकोऽसि यस्त्वं शिप्रवान् शोभनहनुरसि यस्त्वं मतीनां स्तोतॄणां ॥ मन्यतेः स्तुतिकर्मणः कर्तरि क्तिच् ॥ वृषभः कामानां वर्षितासि स त्वमीमेनं सोमं पाहि । पिब । हे इंद्र यस्त्वं वज्रभृद्वज्रधरो यस्त्वं गोत्रभिद्गोत्राणां पर्वतानां मेघानां वा भेत्तासि यस्त्वं हरिष्ठा हर्योः स्थातासि हे इंद्र स त्वं चित्रान् विचित्रान् वाजानन्नान्यभितृंधि । अस्मभ्यं प्रकाशय ॥

॥ अथ तृतीया ॥

एवा पाहि प्रत्नथा मंदतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इंद्र तृंधि ॥३॥

एव । पाहि । प्रत्नऽथा । मंदतु । त्वा । श्रुधि । ब्रह्म । ववृधस्व । उत । गीःऽभिः ।
आविः । सूर्यं । कृणुहि । पीपिहि । इषः । जहि । शत्रून् । अभि । गाः । इंद्र । तृंधि ॥३॥

हे इंद्र त्वं प्रत्नथा प्रत्नान्पुराणान् सोमान्यथापिबस्तथैवैवमिममस्मदीयं सोमं

पाहि। पिब। स च सोमस्त्वया पीतः सन् त्वा त्वां मंदतु। मदयतु। ब्रह्मास्माभिः कृतं स्तोत्रं श्रुधि। शृणु। उतापि च गीर्भिः स्तुतिरूपाभिर्वाग्भिर्ववृधस्व। त्वं वर्धस्व। अपि च सूर्यं सर्वस्य प्रेरकं देवमाविष्कृणुहि। आविष्कुरु। वयं सूर्यं यथा पश्येम तथा कुर्वित्यर्थः। इषोऽन्नानि च पीपिहि। अस्मभ्यं प्यायय। शत्रूनस्मत्सपत्नान् जहि। नाशय। हे इंद्र त्वं पणिभिरपहृता गा अभितृंधि। प्रकाशय॥

॥ अथ चतुर्थी ॥

ते त्वा मदा बृहदिंद्र स्वधाव इमे पीता उक्षयंत द्युमंतं।
महामनूनं तवसं विभूतिं मत्सरासो जर्हृषंत प्रसाहं ॥४॥

ते। त्वा। मदाः। बृहत्। इंद्र। स्वधाऽवः। इमे। पीताः। उक्षयंत। द्युऽमंतं।
महां। अनूनं। तवसं। विऽभूतिं। मत्सरासः। जर्हृषंत। प्रऽसहं ॥४॥

हे स्वधावोऽन्नवन्निंद्र मदा मदकरास्त इमे पीताः सोमा द्युमंतं दीप्तिमंतं त्वा त्वां बृहदत्यंतमुक्षयंत। सिंचयंतु। अपि च हे इंद्र त्वां मत्सरासो मदकराः सोमा जर्हृषंत। भृशं हर्षयंतु। कीदृशं। महां महांतं प्रभूतमनूनं सर्वगुणैर्न्यूनतारहितं। संपूर्णगुणमित्यर्थः। तवसं प्रवृद्धं विभूतिं विभवंतं प्रसाहं शत्रूणामभिभवितारं॥

॥ अथ पंचमी ॥

येभिः सूर्यमुषसं मंदसानोऽवासयोऽप दृळ्हानि दर्द्रत्।
महामद्रिं परि गा इंद्र संतं नुत्था अच्युतं सदसः परि स्वात् ॥५॥

येभिः। सूर्यं। उषसं। मंदसानः। अवासयः। अप। दृळ्हानि। दर्द्रत्।
महां। अद्रिं। परि। गाः। इंद्र। संतं। नुत्थाः। अच्युतं। सदसः। परि। स्वात् ॥५॥

हे इंद्र येभिर्यैः सोमैर्मंदसानो मोदमानस्त्वं सूर्यं सर्वस्य प्रेरकं देवमुषसमुषोदेवतां चावासयः स्वस्थाने न्यवासयः। अथवा सूर्योषसौ यथा तमांसि विवासयतस्तथाकार्षीः। किं कुर्वन्। दृळ्हानि दृढानि तमांस्यपदर्द्रत्। अपदारयन्। किंच हे इंद्र त्वं पणिभिरपहृता गाः परि संतं परितो विद्यमानं महां महांतमद्रिं पर्वतं नुत्थाः। अनुदः। कीदृशं। स्वात्स्वकीयात्सदसः स्थानात्परि परितोऽच्युतमविचालितं विनाशरहितं। स्थिरमित्यर्थः॥

॥ इति चतुर्थस्य षष्ठे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

तव क्रत्वा तव तद्दंसनाभिरामासु पक्वं शच्या नि दीधः ।
और्णोर्दुर उस्रियाभ्यो वि दृळ्होदूर्वाद्गा असृजो अंगिरस्वान् ॥६॥

तव । क्रत्वा । तव । तत् । दंसनाभिः । आमासु । पक्वं । शच्या । नि । दीधरिति दीधः ।
और्णोः । दुरः । उस्रियाभ्यः । वि । दृळ्हा । उत् । ऊर्वात् । गाः । असृजः । अंगिरस्वान् ॥६॥

हे इंद्र तव क्रत्वा त्वदीयया प्रज्ञया तव दंसनाभिस्त्वदीयैः कर्मभिः शच्या सामर्थ्येनामास्वपक्वासु गोषु पक्वं परिणतं तत्प्रसिद्धं पयो निदीधः । नितरां धारयसि । अपि च हे इंद्र त्वमुस्रियाभ्यो गोभ्यः । गा निर्गमयितुमित्यर्थः । दृळ्हा दृढानि । वलेन पाषाणादिभिर्दृढीकृतानीत्यर्थः । दुरो द्वाराणि व्यौर्णोः । उद्घाटितवानसि । अंगिरस्वानंगिरोभिर्युक्तस्त्वमूर्वात्समूहात् । गोष्ठादित्यर्थः । गा उदसृजः । उदगमयः ॥

॥ अथ सप्तमी ॥

पप्राथ क्षां महि दंसो व्युर्वीमुप द्यामृष्वो बृहदिंद्र स्तभायः ।
अधारयो रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य ॥७॥

पप्राथ । क्षां । महि । दंसः । वि । उर्वीं । उप । द्यां । ऋष्वः । बृहत् । इंद्र । स्तभायः ।
अधारयः । रोदसी इति । देवपुत्रे इति देवऽपुत्रे । प्रत्ने इति । मातरा । यह्वी इति । ऋतस्य ॥७॥

हे इंद्र त्वं महि महता दंसो दंससा कर्मणोर्वीं विस्तीर्णां क्षां भूमिं वि पप्राथ । विशेषेण पूरितवानसि ॥ प्रा पूरण इति धातुः ॥ हे इंद्र ऋष्वो महांस्त्वं बृहद्बृहतीं द्यां दिवमुपस्तभायः । उपस्तभ्नासि । निरालंबं वितिष्ठंती द्यौर्यथा न पततीद्रस्तथा करोतीत्यर्थः । अपि च त्वं रोदसी द्यावापृथिव्यावधारयः । पोषणैर्धारयसि । कीदृश्यौ । देवपुत्रे । देवाः पुत्रा ययोस्ते । प्रत्ने पुराणे मातरा मातरौ निर्मात्र्यावृतस्योदकस्य यज्ञस्य वा यह्वी यह्व्यौ महत्यौ । यद्वा विश्वस्य मातरावृतस्य ब्रह्मणो यह्वी पुत्र्यौ । यह्वुरित्यपत्यनामैतत् ॥

॥ अथाष्टमी ॥

अध त्वा विश्वे पुर इंद्र देवा एकं तवसं दधिरे भराय ।
अदेवो यदभ्यौहिष्ट देवान्त्स्वर्षाता वृणत इंद्रमत्र ॥८॥

अर्ध । त्वा । विश्वे । पुरः । इंद्र । देवाः । एकं । तवसं । दधिरे । भराय ।
अदेवः । यत् । अभि । औहिष्ट । देवान् । स्वःऽसाता । वृणते । इंद्रं । अत्रं ॥८॥

अथाधुनास्मिन्काले विश्वे देवाः सर्वे वह्न्यादयो हे इंद्र एकं मुख्यं तवसं प्रवृद्धं बलवंतं त्वा त्वां भराय संग्रामाय पुरो दधिरे । पुरस्ताच्चक्रिरे । यद्यदादेवो वृत्रोऽसुरो देवानभ्यौहिष्ट संग्रामार्थमभिगतवान् ॥ ओहतिर्गतिकर्मा ॥ किंचास्मिन्काले स्वर्षाता स्वर्षातौ संग्राम इंद्रं वृणते । संभजंते स्म । मरुत इति शेषः । मरुतो हींद्रं देवेषु पलायितेषु समभजन्नित्यर्थः । अधुना पुरो दधिर इति संबंधः ॥

॥ अथ नवमी ॥

अध द्यौश्चित्ते अप सा नु वज्राद्द्वितानमद्भियसा स्वस्य मन्योः ।
अहिं यदिंद्रो अभ्योहसानं नि चिद्विश्वायुः शयथे जघान ॥९॥

अर्ध । द्यौः । चित् । ते । अप । सा । नु । वज्रात् । द्विता । अनमत् । भियसा । स्वस्य । मन्योः ।
अहिं । यत् । इंद्रः । अभि । ओहसानं । नि । चित् । विश्वऽआयुः । शयथे । जघान ॥९॥

सा प्रसिद्धा देवानामाश्रयत्वेन द्यौश्चित् द्युलोकोऽपि हे इंद्र अधाधुनास्मिन्काले द्विता द्विधा द्विप्रकारात्ते त्वदीयाद्वज्रात्स्वस्यात्मीयान्मन्योः क्रोधाच्च भियसा भयेनापानमत् । अपननाम । नु इति पूरणः । विश्वायुर्बह्वन्न इंद्रो यद्यदाभ्योहसानमभिगच्छंतमहिं वृत्रं शयथे शयननिमित्ते । मरणायेत्यर्थः । जघान न्यवधीत् । चिदिति पूरणः । यदा वृत्रं जघानास्मिन्काले द्यौर्ननामेति संबंधः ॥

॥ अथ दशमी ॥

अध त्वष्टा ते मह उग्र वज्रं सहस्रभृष्टिं ववृतच्छताश्रिं ।
निकाममरमणसं येन नवंतमहिं सं पिणगृजीषिन् ॥१०॥

अर्ध । त्वष्टा । ते । महः । उग्र । वज्रं । सहस्रऽभृष्टिं । ववृतत् । शतऽअश्रिं ।
निऽकामं । अरऽमनसं । येन । नवंतं । अहिं । सं । पिणक् । ऋजीषिन् ॥१०॥

अथाधुना हे उग्रोद्गूर्णबलेंद्र महो महतस्तव त्वष्टा देवशिल्पी वज्रं ववृतत । न्यवर्तयत् । निष्पन्नं कृतवान् । कीदृशं । सहस्रभृष्टिं सहस्रधारं शताश्रिं शतपर्वाणं । हे ऋजीषिन् गतरससोमवन्निंद्र येन वज्रेण निकामं । नियतः कामो यस्य

तं । अरमणसं । शत्रूणामरमभिगंतृ मनो यस्य तं । नवंतं शब्दायमानमहिं वृत्रमसुरं संपिणक् संपिष्टवानसि तं वज्रं कृतवानित्यर्थः ॥

॥ इति चतुर्थस्य षष्ठे द्वितीयो वर्गः ॥

॥ अथैकादशी ॥

वर्धान्यं विश्वे मरुतः सजोषाः पचच्छतं महिषाँ इंद्र तुभ्यं ।
पूषा विष्णुस्त्रीणि सरांसि धावन्वृत्रहणं मदिरमंशुमस्मै ॥ ११ ॥

वर्धान् । यं । विश्वे । मरुतः । सऽजोषाः । पचत् । शतं । महिषान् । इंद्र । तुभ्यं ।
पूषा । विष्णुः । त्रीणि । सरांसि । धावन् । वृत्रऽहनं । मदिरं । अंशुं । अस्मै ॥ ११ ॥

सजोषाः सह प्रीयमाणा विश्वे मरुतः सर्वे देवा हे इंद्र यं त्वां वर्धान् स्तोत्रैर्वर्धयंति हे इंद्र तस्मै तुभ्यं पूषेतन्नामको देवो विष्णुरेतन्नामकश्च शतं शतसंख्याकान्महिषान् पुंपशून् पचत् । पचेत् । अपि चास्मै तुभ्यं सरांसि द्रोणकलशपूतभृदाहवन्याख्यानि त्रीणि पात्राण्यंशुं सोमं धावन् । अगच्छन् । सोमैः पात्राणि पूर्यंत इत्यर्थः । कीदृशं सोमं । मदिरं मदकरं वृत्रहणं वृत्राणां शत्रूणां हंतारं । अत्र वृत्रहन्शब्देन सोमोऽभिधीयते । पीते हि सति सोमे वृत्राणि हंतुमिंद्रः समर्थो भवतीति यावत् ॥

॥ अथ द्वादशी ॥

आ क्षोदो महि वृतं नदीनां परिष्ठितमसृज ऊर्मिमपां ।
तासामनु प्रवत इंद्र पंथां प्रार्दयो नीचीरपसः समुद्रं ॥ १२ ॥

आ । क्षोदः । महि । वृतं । नदीनां । परिऽस्थितं । असृजः । ऊर्मिं । अपां ।
तासां । अनु । प्रऽवतः । इंद्र । पंथां । प्र । आर्दयः । नीचीः । अपसः । समुद्रं ॥ १२ ॥

हे इंद्र त्वं महि महद्वृतं वृत्रेण परिवृतमाच्छादितं परिष्ठितं परितः स्थितं नदीनां सिंधूनां संबंधि क्षोद उदकमासृजः । आ समंतात्सृष्टवानसि । येन नद्यः पूर्णाः प्रवहेयुस्तदित्यर्थः । अपामुदकानामूर्मिं समूहं सृष्टवानसि । पुनर्वचनमादरार्थं । हे इंद्र तासां नदीनां संबंधिनः पंथां पथो मार्गान् प्रवतः प्रवणानन्वकार्षीरिति शेषः । अन्वित्युपसर्गयोग्यक्रियाध्याहारः । किंच नीचीः प्रवणाभिमुखीः । वेगयुक्ता इत्यर्थः । अपसोऽप उदकानि । अपस इत्यप एवार्थे वर्तते । समुद्रमुदधिं प्रार्दयः । प्रागमयः । अर्दयतिर्नयनकर्मा ॥

॥ अथ त्रयोदशी ॥

एवा ता विश्वा चकृवांसमिंद्रं महामुग्रमजुर्यं सहोदां ।
सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात् ॥१३॥
एव । ता । विश्वा । चकृऽवांसं । इंद्रं । महां । उग्रं । अजुर्यं । सहःऽदां ।
सुऽवीरं । त्वा । सुऽआयुधं । सुऽवज्रं । आ । ब्रह्म । नव्यं । अवसे । ववृत्यात् ॥१३॥

हे इंद्र त्वा त्वां नव्यं नूतनमन्यैरकृतपूर्वं ब्रह्मास्माभिः कृतं स्तोत्रमवसेऽस्माकं रक्षणायाववृत्यात्। आवर्तयतु। कीदृशं त्वां। एवैवमुक्तप्रकारेण ता तानि प्रसिद्धानि विश्वा विश्वानि सर्वाणि कर्माणि चकृवांसं कृतवंतमिंद्रमीश्वरं महां महांतमुग्रमोजस्विनमजुर्यमजरं सहोदां सहसो बलस्य दातारं सुवीरं शोभना वीरा मरुतो यस्य तं स्वायुधं शोभनायुधं सुवज्रं शोभनवज्रोपेतं ॥

॥ अथ चतुर्दशी ॥

स नो वाजाय श्रवस इषे च राये धेहि द्युमत इंद्र विप्रान् ।
भरद्वाजे नृवत इंद्र सूरीन्दिवि च स्मैधि पार्ये न इंद्र ॥१४॥
सः । नः । वाजाय । श्रवसे । इषे । च । राये । धेहि । द्युऽमतः । इंद्र । विप्रान् ।
भरत्ऽवाजे । नृऽवतः । इंद्र । सूरीन् । दिवि । च । स्म । एधि । पार्ये । नः । इंद्र ॥१४॥

हे इंद्र स त्वं द्युमतो दीप्तिमतो विप्रान्मेधाविनोऽस्मान्वाजाय बलाय श्रवस इषे चान्नाय च राये धनाय धेहि। धारय। अपि च हे इंद्र भरद्वाजे मयि नृवतो मनुष्यवतः। परिचारकयुक्तानित्यर्थः। सूरीन् तव स्तोतॄन् पुत्रपौत्रान् कुर्विति शेषः। हे इंद्र त्वं पार्ये पारणीय आगामिनि च दिवि दिवस एधि स्म नः। अस्माकं रक्षिता खलु भवेत्यर्थः ॥

षष्ठेऽहनि तृतीयसवने ब्राह्मणाच्छंसिशस्त्रेऽनुरूपतृचस्याया वाजमिति तृतीया। सूत्रितं च। अया वाजं देवहितं सनेमेति स्तोत्रियानुरूपौ। आ० ८.३.। इति ॥

॥ सैषा पंचदशी ॥

अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥१५॥
अया । वाजं । देवऽहितं । सनेम । मदेम । शतऽहिमाः । सुऽवीराः ॥१५॥

अयानया स्तुत्या देवहितं देवेन द्योतमानेनेंद्रेण दत्तं वाजमन्नं सनेम । वयं संभजेम । अपि च सुवीराः शोभनपुत्रोपेता वयं मदेम । हृष्याम ॥

॥ इति चतुर्थस्य षष्ठे तृतीयो वर्गः ॥

तमु ष्टुहीति पंचदशर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं । तथा चानुक्रम्यते । तमु ष्टुहीति ॥ अभिजिति निष्केवल्य एतन्निविद्धानं । सूचितं च । तमु ष्टुहीति मध्यंदिनः । आ० ८.५. । इति ॥ इंद्राग्न्योः कुलायनाम्न्येकाहेऽपि निष्केवल्य एतन्निविद्धानं । सूचितं च । तिष्ठा हरी तमु ष्टुहीति मध्यंदिनः । आ० ९. ७. । इति ॥ महाव्रतेऽपि निष्केवल्ये । तथैव पंचमारण्यके सूचितं । तमु ष्टुहि यो अभिभूत्योजाः सुत इत्त्वं निमिश्ल इंद्र सोम इति त्रीणि । ऐ० आ० ५. ८. । इति ॥

॥ तत्र प्रथमा ॥

तमु ष्टुहि यो अभिभूत्योजा वन्वन्नवातः पुरुहूत इंद्रः ।
अषाळ्हमुग्रं सहमानमाभिर्गीर्भिर्वर्ध वृषभं चर्षणीनां ॥ १ ॥

तं । ऊं इति । स्तुहि । यः । अभिभूतिऽओजाः । वन्वन् । अवातः । पुरुऽहूतः । इंद्रः ।
अषाळ्हं । उग्रं । सहमानं । आभिः । गीःऽभिः । वर्ध । वृषभं । चर्षणीनां ॥ १ ॥

अभिभूत्योजा अभिभावुकतेजा वन्वन् शत्रून्हिंसन् अवातः शत्रुभिरहिंसितः ॥ वनोतेर्निष्ठांतस्य नञ्पूर्वस्य रूपं । यद्वा वातेर्वातं ॥ अनभिगतः पुरुहूतो बहुभिराहूतो य इंद्रोऽस्तीति शेषः । हे भरद्वाज तमु ष्टुहि । तमेवेंद्रं स्तुहि । अपि चाभिर्वक्ष्यमाणाभिर्गीर्भिः स्तुतिरूपाभिर्वाग्भिस्तमिंद्रं वर्ध । वर्धय । कीदृशं । अषाळ्हमनभिभूतमुग्रमुद्गूर्णमोजस्विनं वा सहमानं शत्रूनभिभवंतं चर्षणीनां प्रजानां संबंधिनं वृषभं वर्षितारं ॥

॥ अथ द्वितीया ॥

स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी ।
बृहद्रेणुश्च्यवनो मानुषीणामेकः कृष्टीनामभवत्सहावा ॥ २ ॥

सः । युध्मः । सत्वा । खजऽकृत् । समत्ऽवा । तुविऽम्रक्षः । नदनुऽमान् । ऋजीषी ।
बृहत्ऽरेणुः । च्यवनः । मानुषीणां । एकः । कृष्टीनां । अभवत् । सहऽवा ॥ २ ॥

बृहद्रेणुर्बृहतो महतो रेणोः पांसोरुत्थापकः । संग्रामेष्विति यावत् । एको

मुख्यः सहावा बलवान् स इंद्रो मानुषीणां मनोः संबंधिनीनां कृष्टीनां प्रजानां यजमानानां च्यवनोऽभिगंताभवत्। आसीत्। कीदृशः। युध्मो योद्धा सत्वा दाता॥ सनोतेरिदं रूपं॥ खजकृत् खजानां संग्रामाणां कर्ता॥ खज इति संग्रामनामैतत्॥ समद्वा। यजमानैः सह मदः समत् तद्वान्। तुविम्रक्षः॥ मृक्षतिः संस्नेहनकर्मा॥ तुवीनां बहूनां वर्षणेन संस्नेहनकर्ता नदनुमान् शब्दवानृजीषी। ऋजीषशब्देन सवनद्वयाभिषुतः पुनस्तृतीयसवनेऽप्यभिषुतः सोम उच्यते। तद्वान्॥

॥ अथ तृतीया ॥

त्वं ह नु त्यद॑दमयो॒ दस्यूँ॒रेकः॑ कृ॒ष्टीर॑वनो॒रार्या॑य।

अस्ति॑ स्वि॒न्नु वी॒र्यं१॒ तत्त॑ इंद्र॒ न स्वि॑दस्ति॒ तदृ॑तु॒था वि वो॑चः ॥३॥

त्वं। ह। नु। त्यत्। अ॒द॒म॒यः॒। द॒स्यू॑न्। एकः॑। कृ॒ष्टीः। अ॒व॒नोः॒। आर्या॑य।

अस्ति॑। स्वि॒त्। नु। वी॒र्य॑म्। तत्। ते॒। इं॒द्र॒। न। स्वि॒त्। अ॒स्ति॒। तत्। ऋ॒तु॒ऽथा। वि। वो॒चः॒ ॥३॥

हे इंद्र त्यत्स स त्वं। त्यदिति तच्छब्दपर्यायः। अत्र लिंगव्यत्ययः। दस्यून् कर्महीनान् जनान् नु क्षिप्रमदमयः। दांतानकरोः। हशब्दः पूरणार्थः। अपि चैको मुख्यस्त्वं कृष्टीः पुत्रदासादीनार्याय कर्मकृते जनायावनोः। अददाः। एवं स्तुवन्नृषिरिंद्रं यदा नाद्राक्षीत्तदा तस्य वीर्यसद्भावे विचिकित्समानः परार्धर्चमाह। हे इंद्र ते तव यत्पूर्वमुक्तं तद्वीर्यं सामर्थ्यं स्विन्नृस्ति। किंस्विद्भवति। स्विदिति विचिकित्सायां। यद्वा नास्ति स्वित्। तद्बलमृतुथा काले काले वि वोचः। विशेषेण ब्रूहि॥

॥ अथ चतुर्थी ॥

सदिद्धि ते॑ तुविजा॒तस्य॒ मन्ये॒ सहः॑ सहिष्ठ तु॒र॒तस्तु॒रस्य॑।

उ॒ग्रमु॒ग्रस्य॑ त॒वस॒स्तवी॒योऽर॑ध्रस्य रध्र॒तुरो॑ बभूव ॥४॥

सत्। इत्। हि। ते। तु॒वि॒ऽजा॒तस्य॑। मन्ये॑। सहः॑। स॒हि॒ष्ठ॒। तु॒र॒तः। तु॒रस्य॑।

उ॒ग्रं। उ॒ग्रस्य॑। त॒वसः॑। तवी॑यः। अर॑ध्रस्य। र॒ध्र॒ऽतुरः॑। ब॒भू॒व ॥४॥

पूर्वमंत्र इंद्रस्य बलसदसद्भावं संदिहानया बलमस्त्येवेत्यवधारयन्नाह। हि यस्मादर्थे। हि यस्मात्कारणात् हे सहिष्ठ बलवत्तमेंद्र तुविजातस्य बहुयज्ञेषु

प्रादुर्भूतस्य तुरतोऽस्मान् हिंसतस्तुरस्य शत्रूणां हिंसितुर्बलवतो वा ते तव सहो बलं सदिद्विद्यमानमेवाहं मन्ये। उग्रस्योजस्विनस्तवसः प्रवृद्धस्याध्रस्य शत्रुभिर्वशीकर्तुमशक्यस्य ॥ रधेर्वशीकरणार्थस्य रूपं ॥ रध्रतुरो वशीकरणीयानां सपत्नानां हिंसकस्य तव बलं बभूव। भवत्येव। कीदृशं। उग्रमुद्गूर्णं तवीयः प्रवृद्धतरं। यतस्त्वं वृत्रादीन् शत्रून् हंस्यतस्ते बलं विद्यत एवेत्यर्थः ॥

॥ अथ पंचमी ॥

तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमंगिरोभिः।

हन्नच्युतच्युद्दस्मेषयंतमृणोः पुरो वि दुरो अस्य विश्वाः ॥५॥

तत्। नः। प्रत्नं। सख्यं। अस्तु। युष्मे इति। इत्था। वदत्ऽभिः। वलं। अंगिरःऽभिः।

हन्। अच्युतऽच्युत्। दस्म। इषयंतं। ऋणोः। पुरः। वि। दुरः। अस्य। विश्वाः ॥५॥

प्रत्नं पुराणं। चिरकालानुवर्तीत्यर्थः। तत्प्रसिद्धं नोऽस्मदीयं सख्यं स्तुत्यस्तोतृलक्षणं सखित्वं हे इंद्र युष्मे युष्मास्वस्तु। पूजार्थं बहुवचनं। हे अच्युतच्युदच्युतानामविचलितानां च्यावक हे दस्म दर्शनीयेंद्र त्वमिषयंतमायुधानि प्रेरयंतं वलमेतन्नामानमसुरमित्था सत्यमेव वदद्भिस्त्वां स्तुवद्भिरंगिरोभिः सह हन्। हतवानसि। अपि चास्य वलस्य पुरो नगराणि व्यृणोः। व्यगमयः। वियुक्तान्यकार्षीरित्यर्थः। विश्वाः सर्वा दुरः पुरीणां द्वारश्च व्यृणोः ॥

॥ इति चतुर्थस्य षष्ठे चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

स हि धीभिर्हव्यो अस्त्युग्र ईशानकृन्महति वृत्रतूर्ये।

स तोकसाता तनये स वज्री वितंतसाय्यो अभवत्समत्सु ॥६॥

सः। हि। धीभिः। हव्यः। अस्ति। उग्रः। ईशानऽकृत्। महति। वृत्रऽतूर्ये।

सः। तोकऽसाता। तनये। सः। वज्री। वितंतसाय्यः। अभवत्। समत्ऽसु ॥६॥

उग्र ओजस्वीशानकृत्। स्तोतॄनीशानान् समर्थान्करोतीतीशानकृत्। स इंद्रो महति प्रभूते वृत्रतूर्ये संग्रामे। वृत्रतूर्य इति संग्रामनामैतत्। धीभिः स्तोतृभिः स्तुतिभिर्वा हव्यो जयार्थिभिराह्वातव्योऽस्ति। भवति। हिशब्दः पादपूरणः। तोक-

साता तोकस्य पुत्रस्य सातौ लाभे निमित्ते तनये तत्पुत्रे निमित्ते सति स इंद्र आह्वातव्योऽस्ति। वज्री वज्रवान् स इंद्रः समत्सु संग्रामेषु वितंतसाय्यो विशेषेण विस्तार्यैः स्तोत्रैर्वंदनीयोऽभवत्। भवति। यद्वा वितंतसाय्यः शत्रूणां हिंसकः॥ तंतस इति धातुर्हिंसाकर्मा। तस्य कर्तरि रूपं॥

॥ अथ सप्तमी ॥

स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे।
स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः॥७॥

सः। मज्मना। जनिम। मानुषाणां। अमर्त्येन। नाम्ना। अति। प्र। सर्स्रे।
सः। द्युम्नेन। सः। शवसा। उत। राया। सः। वीर्येण। नृऽतमः। संऽओकाः॥७॥

स इंद्रोऽमर्त्येन विनाशरहितेन नाम्ना शत्रूणां नमयित्रा मज्मना बलेन। मज्मनेति बलनामैतत्। मानुषाणां मनुष्याणां जनिम जन्म। संघमित्यर्थः। अतिप्रसर्स्रे। अतिप्रपेदे। स इंद्रो द्युम्नेन यशसा समोकाः समानस्थानो भवति। किंच स इंद्रः शवसा बलेन समोका भवति। उतापि च नृतमो नेतृतमः स इंद्रो राया धनेन वीर्येण सामर्थ्येन च समोका भवति॥

॥ अथाष्टमी ॥

स यो न मुहे न मिथू जनो भूत्सुमंतुनामा चुमुरिं धुनिं च।
वृणक्पिप्रुं शंबरं शुष्णमिंद्रः पुरां च्यौत्नाय शयथाय नू चित्॥८॥

सः। यः। न। मुहे। न। मिथु। जनः। भूत्। सुमंतुऽनामा। चुमुरिं। धुनिं। च।
वृणक्। पिप्रुं। शंबरं। शुष्णं। इंद्रः। पुरां। च्यौत्नाय। शयथाय। नु। चित्॥८॥

य इंद्रो न मुहे संग्रामे कदापि न मुह्यति। यश्च मिथु मिथ्या वृथा जनो जनयिता न भूत् न भवति किंतु सुमंतुनामा प्रज्ञाननामा। प्रख्यातनामेत्यर्थः। स इंद्रः पुरां शत्रुसंबंधिनीनां पुरीणां च्यौत्नाय च्यवनाय नाशनाय शयथाय शत्रूणां मरणाय च नू चित् शीघ्रमेव कर्म कुरुत इति शेषः। तथा चुमुरिं धुनिं चैतन्नामकावसुरौ वृणक्। अवृणक्। हिंसितवानसि॥ वृणक्तिर्हिंसाकर्मा॥ अपि च पिप्रुं शंबरं शुष्णमेतन्नामकान् त्रीनसुरान् हिंसितवानसि॥

॥ अथ नवमी ॥

उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिंद्र तिष्ठ ।
धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मंद पुरुदत्र मायाः ॥९॥

उत्ऽअवता । त्वक्षसा । पन्यसा । च । वृत्रऽहत्याय । रथं । इंद्र । तिष्ठ ।
धिष्व । वज्रं । हस्ते । आ । दक्षिणऽत्रा । अभि । प्र । मंद । पुरुऽदत्र । मायाः ॥९॥

हे इंद्र उदवतोऽच्छता ॥ अवतिरत्र गतिकर्मा ॥ त्वक्षसा शत्रूणां तनूकर्त्रा पन्यसा स्तुत्यतरेण बलेन युक्तस्त्वं वृत्रहत्याय शत्रुहननाय स्वकीयं रथं च तिष्ठ । आरोह । तथा दक्षिणत्रा दक्षिणे हस्ते पाणौ वज्रं स्वकीयमायुधमाधिष्व । आधत्स्व । तदनंतरं हे पुरुदत्र बहुधनेंद्र त्वमासुरीर्माया अभ्यभिगम्य प्रमंद । प्रकर्षेण जहि । अत्र मंदतिर्वधकर्मा ॥

॥ अथ दशमी ॥

अग्निर्न शुष्कं वनमिंद्र हेती रक्षो नि धक्ष्यशनिर्न भीमा ।
गंभीरय ऋष्वया यो रुरोजाध्वानयद्दुरिता दंभयच्च ॥१०॥

अग्निः । न । शुष्कं । वनं । इंद्र । हेतिः । रक्षः । नि । धक्षि । अशनिः । न । भीमा ।
गंभीरया । ऋष्वया । यः । रुरोज । अध्वनयत् । दुःऽइता । दंभयत् । च ॥१०॥

अग्निर्नाग्निरिव । नशब्द उपमार्थीयः । यथाग्निः शुष्कं नीरसं वनं वृक्षसमूहं दहति हे इंद्र हेतिस्त्वदीयं वज्रं तद्वच्छत्रून्नाशयति । तदेवाह । अशनिर्न भीमा । यथाशनिर्भीमा भवति तद्वद्भयंकरस्त्वं रक्षो राक्षसं नि धक्षि । वज्रेण नितरां दह । य इंद्रो गंभीरया शत्रुभिरधर्षणीयया ऋष्वया महत्या ॥ ऋष्व इति महन्नामैतत् ॥ हेत्या रुरोज शत्रून्बभंज । अध्वनयत् युद्धे गर्जनलक्षणं शब्दं करोति । तथा च दुरिता दुरितानि दंभयच्च भिनत्ति च । स त्वं रक्षो नि धक्षीति पूर्वेणान्वयः ॥

॥ इति चतुर्थस्य षष्ठे पंचमो वर्गः ॥

॥ अथैकादशी ॥

आ सहस्रं पथिभिरिंद्र राया तुविद्युम्न तुविवाजेभिरर्वाक् ।
याहि सूनो सहसो यस्य नू चिददेव ईशे पुरुहूत योतोः ॥११॥

आ। सहस्रं। पथिऽभिः। इंद्र। राया। तुविऽद्युम्न। तुविऽवाजेभिः। अर्वाक्।
याहि। सूनो इति। सहसः। यस्य। नु। चित्। अदेवः। ईशे। पुरुऽहूत। योतोः ॥११॥

हे तुविद्युम्न बहुधन हे सहसः सूनो बलस्य पुत्रेंद्र। ओजसो जातमुत मन्य एनं। ऋग्वे० १०.७३.१०.। इति निगमांतरे बलपुत्रत्वं सिद्धं। राया धनेन युक्तस्त्वं सहस्रं सहस्रेण। बहुभिरित्यर्थः। तुविवाजेभिर्बहुबलैः पथिभिः। पतंति गच्छंत्यमीभिरिति पंथानो वाहाः। तैरर्वाक् मदभिमुखः सन् आयाहि। आगच्छ। हे पुरुहूत बहुभिराहूतेंद्र यस्य तव योतोर्बलादिभिः पृथक्कर्तुमदेवः कश्चिदसुरो नू चिदीशे नेष्टे। अत्र नूचिदिति निषेधार्थे वर्तते॥

॥ अथ द्वादशी ॥

प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो ररप्शे महिमा पृथिव्याः।
नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः ॥१२॥

प्र। तुविऽद्युम्नस्य। स्थविरस्य। घृष्वेः। दिवः। ररप्शे। महिमा। पृथिव्याः।
न। अस्य। शत्रुः। न। प्रतिऽमानं। अस्ति। न। प्रतिऽस्थिः। पुरुऽमायस्य। सह्योः ॥१२॥

तुविद्युम्नस्य बहुयशसो बहुधनस्य वा स्थविरस्य प्रवृद्धस्य घृष्वेः शत्रूणां घर्षकस्येंद्रस्य महिमा महत्त्वं दिवो द्युलोकात्पृथिव्या भूमेश्च प्रररप्शे। प्रररिचे। विरप्शीति महन्नामसु पाठात् नाम्नां च प्रायेण धातुजन्यत्वात् रप्शतिरत्रातिशयवाची। पुरुमायस्य बहुप्रज्ञस्य सह्योः शत्रूणामभिभवितुरस्येंद्रस्य शत्रुः शातयिता नास्ति। प्रतिमानं प्रतिनिधिर्नास्ति। अस्य प्रतिष्ठिः प्रतिष्ठाश्रयो नास्ति। स एव सर्वस्य प्रतिष्ठेत्यर्थः॥

॥ अथ त्रयोदशी ॥

प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदायुमतिथिग्वमस्मै।
पुरु सहस्रा नि शिशा अभि क्षामुत्तूर्वयाणं धृषता निनेथ ॥१३॥

प्र। तत्। ते। अद्य। करणं। कृतं। भूत्। कुत्सं। यत्। आयुं। अतिथिऽग्वं। अस्मै।
पुरु। सहस्रा। नि। शिशाः। अभि। क्षां। उत्। तूर्वयाणं। धृषता। निनेथ ॥१३॥

अद्येदानीमपि हे इंद्र ते त्वया कृतं करणं तत्कर्म प्रभूत्। प्रभवति। प्रकाशते।

किं तदित्युच्यते। कुत्सं शुष्णाद्राक्षसादेतन्नामानमृषिं चायुं शत्रुभ्यः सकाशादेतत्संज्ञकं पौरुरवसमतिथिग्वमतिथीनामभिगंतारं दिवोदासं च शंबराद्ररक्षिथेति यत्करणं तत्प्रभवतीति पूर्वेण संबंधः। ररक्षिथेति द्वितीयाश्रुतेरुचितक्रियाध्याहारः। अपि चास्मा अनंतरोक्तायातिथिग्वाय पुरु पुरूणि बहूनि सहस्रा सहस्राणि शंबरस्य धनानि निशिशाः। अददाः। इंद्रः शंबरं हत्वा तस्य धनानि दिवोदासाय ददावित्यर्थः। तथा हे इंद्र धृषता धर्षणेन त्वदीयेन वज्रेण शंबरं हत्वा क्षां पृथिवीमभि अभिलक्ष्य पृथिव्यां वर्तमानं तूर्वयाणं त्वरितगमनं दिवोदासमुन्निनेथ। आपन्न उदगमयः॥

अनुक्रीनाम्न्येकाहे मरुत्वतीयशस्त्रेऽनु त्वाहिघ्न इति सूक्तमुखीया। सूचितं च। अनु त्वाहिघ्ने अध देव देवा अनु ते दायि मह इंद्रियाय। आ० ९.५.। इति॥

॥ सैषा सूक्ते चतुर्दशी॥

अनु त्वाहिघ्ने अध देव देवा मदन्विश्वे कवितमं कवीनां।
करो यत्र वरिवो बाधिताय दिवे जनाय तन्वे गृणानः॥१४॥

अनु। त्वा। अहिऽघ्ने। अध। देव। देवाः। मदन्। विश्वे। कविऽतमं। कवीनां।
करः। यत्र। वरिवः। बाधिताय। दिवे। जनाय। तन्वे। गृणानः॥१४॥

हे देव द्योतमानेंद्र त्वा त्वामधास्मिन्काले विश्वे सर्वे देवाः स्तोतारोऽहिघ्ने मेघहननाय। वृष्टिप्रदानायेत्यर्थः। अनुमदन्। अनुमदंति। अनुस्तुवंति। कीदृशं त्वां। कवीनां मेधाविनां मध्ये कवितममत्यंतं कविं। यत्र यस्मिन्काले गृणानः स्तोतृभिः स्तूयमानस्त्वं बाधिताय दारिद्र्यादिभिः पीडिताय दिवे स्तोत्रे जनाय तन्वे स्तोतॄणां तनयाय च वरिवो धनं करः अकरोः अददाः। अथवा हे देवेंद्र अधास्मिन्काले विश्वे सर्वे देवाः सुराः। अहिर्वृत्र एवोच्यते। तस्य हननाय कवीनां कवितमं त्वामनुमदंति। यत्र यस्मिन् स्तोत्रे सति बाधितायासुरैः पीडिताय दिवे द्युलोकनिवासाय जनाय तन्वे शोभायै वृत्रहननेन तव शोभार्थं वरिवश्चकर्थ॥

॥ अथ पंचदशी॥

अनु द्यावापृथिवी तत्र ओजोऽमर्त्या जिहत इंद्र देवाः।
कृष्वा कृत्नो अकृतं यत्ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः॥१५॥

अनु । द्यावापृथिवी इति । तत् । ते । ओजः । अमर्त्याः । जिहते । इंद्र । देवाः ।
कृष्व । कृत्नो इति । अकृतं । यत् । ते । अस्ति । उक्थं । नवीयः । जनयस्व । यज्ञैः ॥१५॥

हे इंद्र ते त्वदीयं तत्प्रसिद्धमोजो बलं द्यावापृथिवी अनुजिहाते । अमर्त्या अमरणधर्माणो देवास्त्वदीयं बलमनुजिहते । अनुगच्छंति । हे कृत्नो बहूनां कर्मणां कर्तस्ते त्वदीयमकृतं यत्कर्मास्ति तत्कृष्व । कुरुष्व । तदनंतरं यज्ञैर्यज्ञेषु नवीयो नवतरमुक्थं स्तोत्रं जनयस्व ॥

॥ इति चतुर्थस्य षष्ठे षष्ठो वर्गः ॥

महाँ इंद्र इति त्रयोदशर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं । अनुक्रांतं च । महान्त्सप्तोनेति ॥ माध्यंदिने सवने सोमातिरेके शस्त्रं भवति । तत्रेदं सूक्तं । सूचितं च । महाँ इंद्रो नृवद्विष्णोर्नु कं । आ० ६. ७. । इति ॥ समूळ्हे द्वितीये छंदोमे मरुत्वतीयशस्त्र एतत्सूक्तं । सूचितं च । महाँ इंद्रो नृवदिति मरुत्वतीयं । आ० ८. ७. । इति ॥

॥ तत्र प्रथमा ॥

महाँ इंद्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥१॥
महान् । इंद्रः । नृऽवत् । आ । चर्षणिऽप्राः । उत । द्विऽबर्हाः । अमिनः । सहःऽभिः ।
अस्मद्र्यक् । ववृधे । वीर्याय । उरुः । पृथुः । सुऽकृतः । कर्तृऽभिः । भूत् ॥१॥

नृवत् यथा नेता राजा भृत्यादीनां कामानां पूरयिता तद्वत् चर्षणिप्राश्चर्षणीनां स्तोतृजनानां कामानां पूरको महान्प्रभूत इंद्र आगच्छतु । आ इत्युपसर्गदर्शनाद्गच्छत्वित्याख्यातस्याध्याहारः । उतापि च द्विबर्हा द्वयोर्लोकयोः परिवृढः सहोभिः शत्रुबलैरमिनोऽहिंसनीय इंद्रोऽस्मद्र्यगस्मदभिमुखं यथा भवति तथा वीर्याय वीरकर्मकरणाय ववृधे । वर्धते । उरुः शरीरेण विस्तीर्णः पृथुर्गुणैः प्रथितः कर्तृभिर्यजमानैः सुकृतो भूत् । सुष्ठु परिचरितो भवति ॥

॥ अथ द्वितीया ॥

इंद्रमेव धिषणा सातये धाद्बृहंतमृष्वमजरं युवानं ।
अषाळ्हेन शवसा शूशुवांसं सद्यश्चिद्यो वावृधे असामि ॥२॥

इंद्रं । एव । धिषणा । सातये । धात् । बृहंतं । ऋष्वं । अजरं । युवानं ।
अषाळ्हेन । शवसा । शूशुऽवांसं । सद्यः । चित् । यः । ववृधे । असामि ॥२॥

धिषणास्मदीया स्तुतिः सातये दानायेंद्रमेव धात् । धारयति । कीदृशं । बृहंतं महांतमृष्वं गंतारमजरं जरारहितं युवानं नित्यतरुणमषाळ्हेन शत्रुभिरनभिभूतेन शवसा बलेन शूशुवांसं प्रवृद्धं ॥ श्वयतेरिदं रूपं ॥ य इंद्रः सद्यश्चित्सद्य एव जातमात्रः सन् असाम्यनल्पमधिकं यथा भवति तथा ववृधे वर्धते ॥

॥ अथ तृतीया ॥

पृथू करस्ना बहुला गभस्ती अस्मद्र्य१क्सं मिमीहि श्रवांसि ।
यूथेव पश्वः पशुपा दमूना अस्माँ इंद्राभ्या ववृत्स्वाजौ ॥३॥

पृथू इति । करस्ना । बहुला । गभस्ती इति । अस्मद्र्यक् । सं । मिमीहि । श्रवांसि ।
यूथाऽइव । पश्वः । पशुऽपाः । दमूनाः । अस्मान् । इंद्र । अभि । आ । ववृत्स्व । आजौ ॥३॥

हे इंद्र त्वं पृथू विस्तीर्णौ करस्ना कर्मणां कर्तारौ बहुला बहुप्रदौ गभस्ती त्वदीयौ बाहू श्रवांस्यन्नानि । दातुमिति शेषः । अस्मद्र्यगस्मदभिमुखं संमिमीहि । कुरु । किंच हे इंद्र दमूना दांतमनास्त्वमाजौ संग्रामेऽस्मानभ्याववृत्स्व । अभ्यावर्तस्व । तत्र दृष्टांतः । पशुपाः पशूनां पालकः पश्वः पशूनां यूथेव यूथानि यथावर्तयति तद्वत् ॥

॥ अथ चतुर्थी ॥

तं व इंद्रं चतिनमस्य शाकैरिह नूनं वाजयंतो हुवेम ।
यथा चित्पूर्वे जरितार आसुरनेद्या अनवद्या अरिष्टाः ॥४॥

तं । वः । इंद्रं । चतिनं । अस्य । शाकैः । इह । नूनं । वाजऽयंतः । हुवेम ।
यथा । चित् । पूर्वे । जरितारः । आसुः । अनेद्याः । अनवद्याः । अरिष्टाः ॥४॥

नूनमद्येहास्मिन्यज्ञे वाजयंतोऽन्नमिच्छंतो वयं स्तोतारः शाकैः शक्तैः समर्थस्य तव सहायैर्मरुद्भिः सहितं चतिनं शत्रूणां चातकं । नाशकमित्यर्थः । इंद्रं परमेश्वरं तं वः प्रसिद्धं त्वां हुवेम । स्तुमः । यथा चिद्यथैव पूर्वे पुरातना जरितारः स्तोतारोऽनेद्या अनिंद्या अनवद्याः पापरहिता अरिष्टा अहिंसिताश्चासुः बभूवुः हे इंद्र त्वत्प्रसादाद्वयमपि तथैव भवेमेत्यर्थः ॥

॥ अथ पंचमी ॥

धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः ।
सं जग्मिरे पथ्या३ रायो अस्मिन्त्समुद्रे न सिंधवो यादमानाः ॥ ५ ॥

धृतऽव्रतः । धनऽदाः । सोमऽवृद्धः । सः । हि । वामस्य । वसुनः । पुरुऽक्षुः ।
सं । जग्मिरे । पथ्याः । रायः । अस्मिन् । समुद्रे । न । सिंधवः । यादमानाः ॥ ५ ॥

स हि स खल्विंद्रो धृतव्रतो धृतकर्मा । धनदाः स एव धनप्रदः । कीदृशस्य धनस्येत्याकांक्षायामुपसर्जनीभूतस्यापि धनस्य विशेषणे वामस्य वसुन इति । वामस्य वननीयस्य वसुनः श्रेष्ठस्य । यद्वा वसुनो धनस्य स्वामीति शेषः । सोमवृद्धः स एव सोमेन प्रवृद्धः । पुरुक्षुर्बह्वन्नः स एव । अस्मिन्निंद्र एव पथ्याः स्तोतॄणां हितानि रायो धनानि संजग्मिरे । संगच्छंते । तत्र दृष्टांतः । सिंधवो नद्यः समुद्रे न यथा समुद्रे यादमाना अभिगच्छंत्यस्तद्वत् ॥

॥ इति चतुर्थस्य षष्ठे सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रं ।
विश्वा द्युम्ना वृष्ण्या मानुषाणामस्मभ्यं दा हरिवो मादयध्यै ॥ ६ ॥

शविष्ठं । नः । आ । भर । शूर । शवः । ओजिष्ठं । ओजः । अभिऽभूते । उग्र ।
विश्वा । द्युम्ना । वृष्ण्या । मानुषाणां । अस्मभ्यं । दाः । हरिऽवः । मादयध्यै ॥ ६ ॥

हे शूर विक्रांतेंद्र शविष्ठं बलवत्तमं शवो बलं नोऽस्मभ्यमाभर । आहर । हे अभिभूते शत्रूणामभिभावुकेंद्र उग्रमप्रसह्यमोजिष्ठमोजस्वितममोजो दीप्तिमस्मभ्यमाभर । विश्वा विश्वानि सर्वाणि वृष्ण्या वृष्ण्यानि सेचनसमर्थानि द्युम्ना द्युम्नानि द्योतमानानि यानि धनानि मानुषाणां मनुष्याणां भोग्यतया कल्पितानि हे हरिवो हरिवन्निंद्र तानि धनानि मादयध्या अस्मान्मादयितुमस्मभ्यं दाः । प्रयच्छ ॥

॥ अथ सप्तमी ॥

यस्ते मदः पृतनाषाळमृध्र इंद्र तं न आ भर शूशुवांसं ।
येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः ॥ ७ ॥

यः । ते । मदः । पृतनाषाट् । अमृंध्रः । इंद्र । तं । नः । आ । भर । शूशुऽवांसं ।
येन । तोकस्य । तनयस्य । सातौ । मंसीमहि । जिगीवांसः । त्वाऽऊताः ॥७॥

पृतनाषाट् शत्रुसेनानामभिभविताऽमृध्रोऽहिंसितो यो मदो हर्षो हे इंद्र ते त्वया देयः शूशुवांसं प्रवृद्धं तं मदं नोऽस्मभ्यमाभर । आहर । त्वोतास्त्वया रक्षिता जिगीवांसो जितवंतो वयं तोकस्य पुत्रस्य तनयस्य तत्पुत्रस्य च सातौ लाभे निमित्तभूते सति येन हर्षेण मंसीमहि त्वां स्तुवीमहि तमाभरेति पूर्वेणान्वयः ॥

॥ अथाष्टमी ॥

आ नो भर वृषणं शुष्ममिंद्र धनस्पृतं शूशुवांसं सुदक्षं ।
येन वंसाम पृतनासु शत्रून्तवोतिभिरुत जामीँरजामीन् ॥८॥
आ । नः । भर । वृषणं । शुष्मं । इंद्र । धनऽस्पृतं । शूशुऽवांसं । सुऽदक्षं ।
येन । वंसाम । पृतनासु । शत्रून् । तव । ऊतिऽभिः । उत । जामीन् । अजामीन् ॥८॥

हे इंद्र त्वं वृषणं वर्षितारं शुष्मं सेनालक्षणं बलमस्मभ्यमाभर । आहर । कीदृशं । धनस्पृतं धनस्य पालकं शूशुवांसं प्रवृद्धं सुदक्षं शोभनबलं । हे इंद्र तवोतिभिस्त्वदीयाभी रक्षाभिः पृतनासु संग्रामेषु ॥ पृतना इति संग्रामनाम ॥ येन बलेन शत्रून्वंसाम हनाम । उतेत्यच भिन्नक्रमः । जामीन्बंधूनुतापि चाजामीन् शत्रूंश्च येन शुष्मेण वंसाम तं शुष्ममाभरेति पूर्वेण संबंधः ॥

॥ अथ नवमी ॥

आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।
आ विश्वतो अभि समेत्वर्वाङिंद्र द्युम्नं स्वर्वद्धेह्यस्मे ॥९॥
आ । ते । शुष्मः । वृषभः । एतु । पश्चात् । आ । उत्तरात् । अधरात् । आ । पुरस्तात् ।
आ । विश्वतः । अभि । सं । एतु । अर्वाङ् । इंद्र । द्युम्नं । स्वः॑ऽवत् । धेहि । अस्मे इति ॥९॥

हे इंद्र वृषभो वर्षिता ते त्वदीयं शुष्मो बलमर्वाङस्मदभिमुखः सन् पश्चात्पश्चिमभागादेतु । आगच्छतु । उत्तरादुत्तरभागादागच्छतु । अधराद्दक्षिणाच्चैतु । पुरस्तात्पूर्वभागाच्च गच्छतु । विश्वतः सर्वस्माद्दिग्भागादभि अस्मानभिलक्ष्या समेतु । सम्यगागच्छतु । हे इंद्र त्वं स्वर्वत्सुखयुक्तं द्युम्नं धनमस्मे अस्मभ्यं धेहि । प्रयच्छ ॥

॥ अथ दशमी ॥

नृवत्त इंद्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः ।
ईक्षे हि वस्व उभयस्य राजन्धा रत्नं महि स्थूरं बृहंतं ॥१०॥

नृऽवत् । ते । इंद्र । नृऽतमाभिः । ऊती । वंसीमहि । वामं । श्रोमतेभिः ।
ईक्षे । हि । वस्वः । उभयस्य । राजन् । धाः । रत्नं । महि । स्थूरं । बृहंतं ॥१०॥

नृवन्मनुष्यैः परिचारकजनैर्युक्तं श्रोमतेभिः श्रोतव्यैर्यशोभिः सहितं वामं वननीयं धनं हे इंद्र ते त्वत्तो नृतमाभिर्नेतृतमाभिरूती ऊतिभी रक्षाभिर्वंसीमहि । वयं संभजेमहि । हि यस्मात्कारणात् हे राजन् राजमानेंद्र त्वमुभयस्य पार्थिवस्य दिव्यस्य च वस्वो धनस्येक्षे ईशिषे तस्मात्कारणान्महि महांतं स्थूरं विपुलं बृहंतं गुणैः परिवृढं रत्नं रमणीयं धनं ॥ अत्र रत्नशब्दः पुंल्लिंगः ॥ धाः । धेहि ॥

॥ अथैकादशी ॥

मरुत्वंतं वृषभं वावृधानमकवारिं दिव्यं शासमिंद्रं ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥११॥

मरुत्वंतं । वृषभं । ववृधानं । अकवऽअरिं । दिव्यं । शासं । इंद्रं ।
विश्वऽसहं । अवसे । नूतनाय । उग्रं । सहःऽदां । इह । तं । हुवेम ॥११॥

इहास्मिन्यज्ञे नूतनायाभिनवायावसे रक्षणाय तं प्रसिद्धमिंद्रं हुवेम । स्तुमः । आह्वयामो वा । कीदृशं । मरुत्वंतं मरुद्भिर्युक्तं वृषभं कामानां वर्षितारं ववृधानं प्रवृद्धमकवारिमकुत्सितशत्रुं दिव्यं द्योतमानं शासं शासितारं विश्वसहं विश्वस्य लोकस्याभिभवितारमुग्रमोजस्विनं सहोदां बलप्रदं ॥

॥ अथ द्वादशी ॥

जनं वज्रिन्महि चिन्मन्यमानमेभ्यो नृभ्यो रंधया येष्वस्मि ।
अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये गोष्वप्सु ॥१२॥

जनं । वज्रिन् । महि । चित् । मन्यमानं । एभ्यः । नृऽभ्यः । रंधय । येषु । अस्मि ।
अध । हि । त्वा । पृथिव्यां । शूरऽसातौ । हवामहे । तनये । गोषु । अप्ऽसु ॥१२॥

येषु येषां नृणां मध्येऽहमस्मि एको भवामि हे वज्रिन् वज्रवन्निंद्र त्वमेभ्यो

नृभ्यो मनुष्येभ्यो महि महदत्यंतमात्मानं मन्यमानं जनं। बहुमन्यमानमित्यर्थः। रंधय। वशीकुरु। चिदिति पादपूरणः। अधाधुना पृथिव्यां भूम्यां शूरसातौ युद्धे प्रवृत्ते सति तनये पुत्रे निमित्ते च गोषु पशुष्वप्सूदकेषु च निमित्तेषु हे इंद्र त्वा द्युलोके स्थितं त्वां हवामहे। वयमाह्वयामः॥

॥ अथ त्रयोदशी ॥

वयं त एभिः पुरुहूत सख्यैः शत्रोःशत्रोरुत्तर इत्स्याम।

घ्नंतो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः॥१३॥

वयं। ते। एभिः। पुरुऽहूत। सख्यैः। शत्रोःऽशत्रोः। उत्ऽतरे। इत्। स्याम।

घ्नंतः। वृत्राणि। उभयानि। शूर। राया। मदेम। बृहता। त्वाऽऊताः॥१३॥

हे पुरुहूत पुरुभिराहूतेंद्र एभिः प्रसिद्धैः सख्यैः स्तोत्रलक्षणैः सखिकर्मभिस्ते त्वया सह वयमुभयानि जामिरूपाण्यजामिरूपाणि वृत्राण्यमित्राणि घ्नंतो हिंसंतः शत्रोः शत्रोः सर्वस्माच्छत्रोरुत्तर इत्स्याम। अधिका एव भवेम। हे शूर विक्रांतेंद्र त्वोता वयं त्वया रक्षिताः संतो बृहता महता राया धनेन मदेम। हृष्याम॥

॥ इति चतुर्थस्य षष्ठेऽष्टमो वर्गः ॥

द्यौर्न य इंद्रेति त्रयोदशर्चं पंचमं सूक्तं भरद्वाजस्यार्षमैंद्रं त्रैष्टुभं। वि पिप्रोरित्येषा सप्तमी दशाक्षरचतुष्टययुक्ता विराट्। अनुक्रम्यते च। द्यौर्न वि पिप्रोर्विराडिति॥ पृष्ठ्यषडहस्य षष्ठेऽहनि तृतीयसवन उक्थ्यस्तोत्राणि यदि द्विपदासु स्तुवीरन् यदि वाग्निष्टोमसंस्थः स्यात्तदानीं माध्यंदिने सवनेऽच्छावाकः स्वशस्त्र आरंभणीयाभ्य ऊर्ध्वमेतत्सूक्तं शंसेत्। सूचितं च। द्यौर्न य इंद्रेत्यच्छावाकः। आ॰ ८.४.। इति॥ इदमेव सूक्तमिंद्राविष्ण्वोरुत्क्रांतिनाम्न्येकाहे निष्केवल्यनिविद्धानं। द्यौर्न य इंद्रेति माध्यंदिनः। आ॰ ९.७.। इति॥

॥ तत्र प्रथमा ॥

द्यौर्न य इंद्राभि भूमार्यस्तस्थौ रयिः शवसा पृत्सु जनान्।

तं नः सहस्रभरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरं॥१॥

द्यौः। न। यः। इंद्र। अभि। भूम। अर्यः। तस्थौ। रयिः। शवसा। पृत्ऽसु। जनान्।

तं। नः। सहस्रऽभरं। उर्वराऽसां। दद्धि। सूनो इति। सहसः। वृत्रऽतुरं॥१॥

यो रयिः पुत्ररूपं धनं शवसा बलेन पृत्सु संग्रामेष्वर्योऽरीन् शत्रून् जनानभितस्थौ आक्रामेत्। तत्र दृष्टांतः। द्यौर्न। द्योतमानः सूर्यो यथा भूम भूतान्याक्रामति तद्वत्। हे सहसः सूनो बलस्य पुत्रेंद्र त्वं तं पुत्रं नोऽस्मभ्यं दद्धि। देहि। कीदृशं। सहस्रभरं सहस्रस्य धनस्य भर्तारमुर्वरासामुर्वराणां सस्याढ्यानां भूमीनां सनितारं संभक्तारं वृत्रतुरं वृत्राणां शत्रूणां तरितारं तुर्वितारं वा॥

॥ अथ द्वितीया ॥

दिवो न तुभ्यमन्विंद्र सत्रासुर्यं देवेभिर्धायि विश्वं।

अहिं यद्वृत्रमपो वव्रिवांसं हन्नृजीषिन्विष्णुना सचानः॥२॥

दिवः। न। तुभ्यं। अनु। इंद्र। सत्रा। असुर्यं। देवेभिः। धायि। विश्वं।

अहिं। यत्। वृत्रं। अपः। वव्रिऽवांसं। हन्। ऋजीषिन्। विष्णुना। सचानः॥२॥

दिवो सूर्यायेव हे इंद्र तुभ्यं सत्रा सत्यमेव विश्वं व्याप्तमसुर्यमसुरत्वं बलं देवेभिर्देवैः स्तोतृभिरनुधायि। व्यधायि। अकारि। स्तोत्रैः स्तूयमाना देवता बलवती भवतीत्यर्थः। हे ऋजीषिन् विगतरससोमेंद्र विष्णुना सचानः संगच्छमानस्त्वं॥ षच समवाय इति धातो रूपं॥ यद्येनासुर्येणाप उदकानि वव्रिवांसं परिवृण्वंतमहिमागत्य हंतारं वृत्रमसुरं हन् अवधीः तद्बलं व्यधायीति पूर्वेण संबंधः॥

॥ अथ तृतीया ॥

तूर्वन्नोजीयान्तवसस्तवीयान्कृतब्रह्मेंद्रो वृद्धमहाः।

राजाभवन्मधुनः सोम्यस्य विश्वासां यत्पुरां दर्त्नुमावत्॥३॥

तूर्वन्। ओजीयान्। तवसः। तवीयान्। कृतऽब्रह्मा। इंद्रः। वृद्धऽमहाः।

राजा। अभवत्। मधुनः। सोम्यस्य। विश्वासां। यत्। पुरां। दर्त्नुं। आवत्॥३॥

यद्यदेंद्रो विश्वासां सर्वासां पुरां पुरीणां दर्त्नुं दारकं वज्रमावत् प्रापत् तदा सोम्यस्य सोममयस्य मधुनो मधुररसस्य राजाभवत्। स्वाम्यासीत्। कीदृशः। तूर्वन् हिंसकान् हिंसन्नोजीयानतिशयेनौजस्वी तवसो बलवतस्तवीयान्बलवत्तरः कृतब्रह्मा। कृतं ब्रह्म स्तोत्रं यस्मै स्तोतृभिः सः। अथवा कृतं दत्तं ब्रह्मान्नं येन स्तोतृभ्यः सः। वृद्धमहा वृद्धतेजाः। एवंभूत इंद्रो राजाभवदिति॥

॥ अथ चतुर्थी ॥

शतैरपद्रन्पणयं इंद्रात्र दशोणये कवयेऽर्कसातौ ।
वधैः शुष्णस्याशुषस्य मायाः पित्वो नारिरेचीत्किं चन प्र ॥४॥

शतैः । अपद्रन् । पणयः । इंद्र । अत्र । दशऽओणये । कवये । अर्कऽसातौ ।
वधैः । शुष्णस्य । अशुषस्य । मायाः । पित्वः । न । अरिरेचीत् । किं । चन । प्र ॥४॥

अत्रास्मिन्नर्कसातौ । अर्कोऽन्नं प्राप्यतेऽस्मिन्नित्यर्कसातिर्युद्धं । तस्मिन्दशोणये बहुहविष्कात्कवये मेधाविनः ॥ पंचम्यर्थे चतुर्थी ॥ हे इंद्र त्वत्सहायात्कुत्साद्बिभ्यतः पणय एतन्नामकासुराः शतैः शतसंख्याकैर्बलैः सार्धमपद्रन् । अपाद्रवन् । अपलायंत । अपि चेंद्रोऽशुषस्याशुष्कस्य । संपूर्णबलस्येत्यर्थः । शुष्णस्यैतन्नामकासुरस्य शत्रोर्मायाः कपटान्वधैर्हननसाधनैरायुधैर्न प्रारिरेचीत् । प्ररिक्तानतिरिक्तान्नाकरोत् । पित्वोऽन्नस्य । पितुरित्यन्ननामैतत् । किंचन किंचिदपि न प्रारिरेचीत् । तदीयमन्नं सर्वमप्यपाहारयत् ॥

॥ अथ पंचमी ॥

महो द्रुहो अप विश्वायु धायि वज्रस्य यत्पतने पादि शुष्णः ।
उरु ष सरथं सारथये करिंद्रः कुत्साय सूर्यस्य सातौ ॥५॥

महः । द्रुहः । अप । विश्वऽआयु । धायि । वज्रस्य । यत् । पतने । पादि । शुष्णः ।
उरु । सः । सऽरथं । सारथये । कः । इंद्रः । कुत्साय । सूर्यस्य । सातौ ॥५॥

यद्यदा स शुष्णोऽसुरो वज्रस्य पतने पाते पादि अगच्छत् । अम्रियतेत्य.. । तदा महो महतो द्रुहो द्रोग्धुः शुष्णस्य संबंधि विश्वायु सर्वगतं । बलमिति शेषः । अपधायि । अपहितमकारि । तिरस्कृतमित्यर्थः । स इंद्रः सारथये सारथिभूताय कुत्साय सरथं समानरथं सूर्यस्य सातौ भजने निमित्तभूत उरु विस्तीर्णं यथा भवति तथा कः । अकरोत् । तथा चोक्तं । कुत्सायेंद्रोऽसुरं शुष्णं जिघांसुः कुत्समात्मनः सारथिं कल्पयित्वा । अस्य शत्रुं शुष्णमहंस्ततश्च कुत्सस्य रक्षां बहुलां चकारेत्यनयोच्यत इति ॥

॥ इति चतुर्थस्य षष्ठे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन् ।
प्रावन्नमीं साप्यं ससंतं पृणग्राया समिषा सं स्वस्ति ॥ ६ ॥

प्र । श्येनः । न । मदिरं । अंशुं । अस्मै । शिरः । दासस्य । नमुचेः । मथायन् ।
प्र । आवत् । नमीं । साप्यं । ससंतं । पृणक् । राया । सं । इषा । सं । स्वस्ति ॥ ६ ॥

श्येनः सुपर्णश्च । नेत्ययं शब्दः समुच्चये वर्तते । अस्मा इंद्राय मदिरं मदकरमंशुं सोमं । प्रेति आ इत्यस्यार्थे वर्तते । आहरत् । उपसर्गदर्शनाच्चाख्यातमध्याह्रियते । किंचायमिंद्रोऽपि दासस्य प्राणिनामुपक्षपयितुर्नमुचेरेतन्नाम्नोऽसुरस्य शिरः शीर्षं मथायन् मंथनं कुर्वन् साप्यं सयस्य पुत्रं ससंतं स्वपंतं नमीमेतत्संज्ञकमृषिं प्रावत् । प्रारक्षत् । स्वस्त्यविनाशेन राया पश्वादिधनेनेषान्नेन च तमृषिं संपृणक् । समयोजयत् ॥

॥ अथ सप्तमी ॥

वि पिप्रोरहिमायस्य दृळ्हाः पुरो वज्रिञ्छवसा न दर्दः ।
सुदामन्तद्रेक्णो अप्रमृष्यमृजिश्वने दात्रं दाशुषे दाः ॥ ७ ॥

वि । पिप्रोः । अहिऽमायस्य । दृळ्हाः । पुरः । वज्रिन् । शवसा । न । दर्दरिति दर्दः ।
सुऽदामन् । तत् । रेक्णः । अप्रऽमृष्यं । ऋजिश्वने । दात्रं । दाशुषे । दाः ॥ ७ ॥

हे वज्रिन् वज्रवन्निंद्र त्वमहिमायस्याहंत्री माया यस्य पिप्रोरेतन्नाम्नोऽसुरस्य संबंधिनीर्दृळ्हा दृढानि पुरः प्राकारादीनि दुर्गाणि शवसा बलेन विदर्दः । विदारितवानसि । नेति पादपूरणः । त्वं पिप्रोर्नृमणः प्रारुजः पुरः । ऋग्वे॰ १. ५१. ५. । शतं पूर्भिरायसीभिर्नि पाहि । ऋग्वे॰ ७. ३. ७. । इति दर्शनात् । अपि च हे सुदामन् शोभनदानेंद्र त्वं दात्रं हविर्लक्षणं धनं दाशुषे दत्तवत ऋजिश्वन एतन्नामकाय राजर्षयेऽप्रमृष्यं केनाप्यबाध्यं तत्तस्य स्वभूतं रेक्णो धनं दाः । अदाः । दत्तवानसि ॥

॥ अथाष्टमी ॥

स वेतसुं दशमायं दशोणिं तूतुजिमिंद्रः स्वभिष्टिसुम्नः ।
आ तुग्रं शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै ॥ ८ ॥

सः । वेतसुं । दशऽमायं । दशऽओणिं । तूतुजिं । इंद्रः । स्वभिष्टिऽसुम्नः ।
आ । तुग्रं । शश्वंत् । इभं । द्योतनाय । मातुः । न । सीं । उप । सृज । इयध्यै ॥ ८ ॥

स्वभिष्टिसुम्नः सुष्ठ्वभ्येषणीयान्यभिगम्यानि सुम्नानि सुखानि येन देयानि स इंद्रो दशमायं बहुवंचनं वेतसुं वेतसुनामानमसुरं दशोणिमेतन्नामकं च तूतुजिं तूतुजिनामकं च आ अपि च तुग्रं तुग्रनामकमसुरं तथेभमेतन्नामकमसुरं चेयध्या एतुं द्योतनायैतत्संज्ञाय राज्ञे शश्वदुपसृज । उपासृजत् । वशीचकार । तत्र दृष्टांतः । मातुर्न मातुर्जनन्या इव पुत्रं । यथा मात्रे पुत्रो वशीभवति तद्वद्वशंचकारेत्यर्थः । सीमिति पादपूरणः ॥

॥ अथ नवमी ॥

स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ ।
तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इंद्रमृष्वं ॥ ९ ॥
सः । ईं । स्पृधः । वनते । अप्रतिऽइतः । बिभ्रत् । वज्रं । वृत्रऽहनं । गभस्तौ ।
तिष्ठत् । हरी इति । अधि । अस्ताऽइव । गर्ते । वचःऽयुजा । वहतः । इंद्रं । ऋष्वं ॥ ९ ॥

गभस्तौ हस्ते वृत्रहणं वृत्राणां शत्रूणां हंतारं वज्रं स्वकीयमायुधं बिभ्रद्धारयन् अप्रतीतः शत्रुभिरप्रतिगतः स इंद्रः स्पृधः स्पर्धमानानीमिमान्वृत्रप्रभृतीन् शत्रून् वनते । हंति । हरी स्वकीयावश्वावधितिष्ठत् । आरोहति । तत्र दृष्टांतः । अस्तेव गर्ते । यथा क्षेप्ता शूरो रथेऽधितिष्ठति तद्वत् । तथा वचोयुजा वचोमात्रेण युज्यमानौ । यद्वा स्तोतॄणां स्तुतिभिर्युज्यमानौ तौ हरी च ऋष्वं महांतमिंद्रं वहतः ॥

॥ अथ दशमी ॥

सनेम तेऽवसा नव्यं इंद्र प्र पूरवः स्तवंत एना यज्ञैः ।
सप्त यत्पुरः शर्म शारदीर्दर्द्धन्दासीः पुरुकुत्साय शिक्षन् ॥ १० ॥
सनेम । ते । अवसा । नव्यः । इंद्र । प्र । पूरवः । स्तवंते । एना । यज्ञैः ।
सप्त । यत् । पुरः । शर्म । शारदीः । दर्त् । हन् । दासीः । पुरुऽकुत्साय । शिक्षन् ॥ १० ॥

हे इंद्र ते त्वदीयेनावसा रक्षणेन नव्यो नवीयो नवतरं त्वया दीयमानं धनं सनेम । वयं स्तोतारो भजेमहि । पूरवो मनुष्याः स्तोतार एनानेन स्तोत्रेण युक्तैर्यज्ञैः प्रस्तवंते । त्वां स्तुवंति । यद्यस्मात्कारणाद्दासीः कर्मणामुपक्षपयि-

चीः शत्रुप्रजा हन् घ्नन् हिंसन् पुरुकुत्सायैतन्नामकाय राज्ञे शिक्षन् धनानि प्रयच्छन् हे इंद्र त्वं शारदीः शरन्नाम्नोऽसुरस्य संबंधिनीः सप्त सप्तसंख्याकाः पुरः पुरीः शर्म शर्मणा वज्रेण दर्त् विदारितवानसि तस्मात्कारणात्त्वां स्तोतारः स्तुवंतीत्यर्थः ॥

॥ अथैकादशी ॥

त्वं वृध इंद्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय ।
परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातं ॥ ११ ॥

त्वं । वृधः । इंद्र । पूर्व्यः । भूः । वरिवस्यन् । उशने । काव्याय ।
परा । नवऽवास्त्वं । अनुऽदेयं । महे । पित्रे । ददाथ । स्वं । नपातं ॥ ११ ॥

हे इंद्र पूर्व्यः पुरातनस्त्वं काव्याय कविपुत्रायोशन उशनसे भार्गवाय वरिवस्यन् धनमिच्छन् वृधो भूः । स्तोतॄणां वर्धको भवसि । अनुदेयमनुदातव्यं धनं नववास्त्वमेतन्नामकमसुरं पराहत्य स्वं स्वकीयमौशनसं नपातं युद्धे शत्रुभिर्गृहीतं पुत्रं महे महते पित्रे पालयितव्यायोशनसे परादद्दाथ । तस्य शत्रुं हत्वा प्रकर्षेण दत्तवानसि ॥

॥ अथ द्वादशी ॥

त्वं धुनिरिंद्र धुनिमतीर्ऋणोरपः सीरा न स्रवंतीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥ १२ ॥

त्वं । धुनिः । इंद्र । धुनिऽमतीः । ऋणोः । अपः । सीराः । न । स्रवंतीः ।
प्र । यत् । समुद्रं । अति । शूर । पर्षि । पारय । तुर्वशं । यदुं । स्वस्ति ॥ १२ ॥

हे इंद्र धुनिः शत्रूणां कंपयिता त्वं धुनिमतीर्धुनिर्नामासुरो यासु निरोधकतया विद्यते ता अप उदकानि सीरा न नदीरिव स्रवंतीः प्रवहंतीर्ऋणोः । अगमयः । धुनिं हत्वा तेन निरोधितान्युदकानि प्रवाहयतीत्यर्थः । हे शूर वीरेंद्र यद्यदा समुद्रमति अतिक्रम्य प्रपर्षि प्रतीर्णो भवसि तदा समुद्रपारे तिष्ठंतौ तुर्वशं यदुं च पारय । अपारयः । समुद्रमतारयः ॥

॥ अथ त्रयोदशी ॥

तव ह त्यदिंद्र विश्वमाजौ सस्तो धुनीचुमुरी या ह सिष्वप् ।
दीदयदित्तुभ्यं सोमेभिः सुन्वन्दभीतिरिध्मभृतिः पक्थ्य१र्कैः ॥ १३ ॥

तव । ह । त्यत् । इंद्र । विश्वं । आजौ । सस्तः । धुनीचुमुरी इति । या । ह । सिस्वप् ।
दीदयत् । इत् । तुभ्यं । सोमेभिः । सुन्वन् । दभीतिः । इध्मऽभृतिः । पक्थी । अर्कैः ॥१३॥

हे इंद्र आजौ संग्रामे तव ह तवैव विश्वं व्याप्तं त्यत्तादृशं कर्म भवति । कीदृशमिति तदुच्यते । या यौ धुनीचुमुरी । धुनिश्च चुमुरिश्चेत्येतन्नामकावसुरौ । सिष्वप् त्वमस्वापयः तावसुरौ सस्तः । संग्रामे सुप्तवंतौ मृतावित्यर्थः ॥ भूतार्थे व्यत्ययेन लट् । द्वितीयो हशब्दः पादपूरणः ॥ तदनंतरं हे इंद्र तुभ्यं त्वदर्थं सुन्वन् सोमानभिषुण्वन् पक्थी पक्थवान् हवींषि पक्ववानिध्मभृतिरिध्मानां भर्ताहर्ता वा दभीतिर्नाम राजर्षिः सोमेभिः सोमैरर्कैर्हविर्लक्षणैरन्नैर्दीदयदित् । दीप्यत एव । धुनिं चुमुरिं तस्मै जघंथेत्यर्थः । त्वं नि दस्युं चुमुरिं धुनिं चेति हि दर्शनात् ॥

॥ इति चतुर्थस्य षष्ठे दशमो वर्गः ॥

इमा उ त्वेति द्वादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं । नवम्येकादशी च वैश्वदेव्यौ । तथा चानुक्रम्यते । इमा उ द्वादश नवम्येकादश्यौ वैश्वदेव्याविति ॥ उपहव्यनाम्न्येकाह इदं सूक्तं मरुत्वतीयनिविद्धानं । सूचितं च । इमा उ त्वा य एक इदिति मध्यंदिनः । आ० ९.७. । इति ॥ इंद्राविष्ण्वोरुत्क्रांतिनाम्न्येकाहेऽपीदं मरुत्वतीयनिविद्धानं । सूचितं च । इमा उ त्वा द्यौर्न य इंद्रेति मध्यंदिनः । आ० ९.७. । इति ॥ तृतीये छंदोमेऽपि मरुत्वीय इदं सूक्तं । सूचितं च । प्र मंदिन इमा उ त्वेति मरुत्वतीयं । आ० ८.७. । इति ॥

॥ तत्र प्रथमा ॥

इमा उ त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवंते ।
धियो रथेष्ठामजरं नवीयो रयिर्विभूतिरीयते वचस्या ॥१॥

इमाः । ऊं इति । त्वा । पुरुऽतमस्य । कारोः । हव्यं । वीर । हव्याः । हवंते ।
धियः । रथेऽस्थां । अजरं । नवीयः । रयिः । विऽभूतिः । ईयते । वचस्या ॥१॥

पुरुतमस्य वहुलं कामं कांक्षतः ॥ तमु अभिकांक्षायामिति धातुः ॥ कारोः स्तोतुर्भरद्वाजस्य संबंधिन्यो हव्याः स्तुत्याः प्रशस्या इमा धियः स्तुतयो हे वीर शूरेंद्र हव्यं त्वा त्वां हवंते । ह्वयंति । कीदृशं । रथेस्थां रथे स्थितमजरं जरारहितं नवीयो नवीयांसं नवतरं । उ इति पूरणः । अपि च वचस्या स्तुत्या श्रेष्ठा विभूतिर्जगतो विभवहेतू रयिर्हविर्लक्षणं धनमीयते । त्वामभिगच्छति ॥

॥ अथ द्वितीया ॥

तमु स्तुष इंद्रं यो विदानो गिर्वाहसं गीर्भिर्यज्ञवृद्धं ।
यस्य दिवमति मह्ना पृथिव्याः पुरुमायस्य रिरिचे महित्वं ॥ २ ॥
तं । ऊं इति । स्तुषे । इंद्रं । यः । विदानः । गिर्वाहसं । गीःऽभिः । यज्ञऽवृद्धं ।
यस्य । दिवं । अति । मह्ना । पृथिव्याः । पुरुऽमायस्य । रिरिचे । महिऽत्वं ॥ २ ॥

य इंद्रो विदानः सर्वं विद्वान् सर्वैर्ज्ञायमानो वा गिर्वाहसं गीर्भिर्वहनीयं यज्ञवृद्धं यज्ञैः प्रवृद्धं तमु तमेवेंद्रं स्तुषे । स्तुवे । पुरुमायस्य बहुप्रज्ञस्य बहुवंचनस्य वा यस्येंद्रस्य महित्वं माहात्म्यं दिवं दिवो द्युलोकात् ॥ पंचम्यर्थे द्वितीया ॥ पृथिव्या भूलोकान्मह्ना महिम्नातिरिरिचे अतिरिच्यते तं स्तुव इति संबंधः ॥

॥ अथ तृतीया ॥

स इत्तमोऽवयुनं ततन्वत्सूर्येण वयुनवच्चकार ।
कदा ते मर्ता अमृतस्य धामेयक्षंतो न मिनंति स्वधावः ॥ ३ ॥
सः । इत् । तमः । अवयुनं । ततन्वत् । सूर्येण । वयुनऽवत् । चकार ।
कदा । ते । मर्ताः । अमृतस्य । धाम । इयक्षंतः । न । मिनंति । स्वधाऽवः ॥ ३ ॥

स इत्स एवेंद्रोऽवयुनमप्रज्ञानं । प्रज्ञाननाशनमित्यर्थः । ततन्वद्वृत्रेण विस्तीर्यमाणं तमोऽंधकारं दिवि सूर्येण दिव्यारोपितेन देवेन वयुनवत् प्रकाशवच्चकार । कृतवान् । परोऽर्धर्चः प्रत्यक्षकृतः । हे स्वधावो बलवन्निंद्र मर्ता मनुष्या अमृतस्य नित्यस्य ते त्वदीयं धाम स्वर्गाख्यं स्थानं । तत्रस्थान्देवानित्यर्थः । इयक्षंतो यष्टुमिच्छंतः कदा कदाचित् । सर्वदेत्यर्थः । न मिनंति । किमपि प्राणिजातं न हिंसंति ॥

॥ अथ चतुर्थी ॥

यस्ता चकार स कुह स्विदिंद्रः कमा जनं चरति कासु विक्षु ।
कस्ते यज्ञो मनसे शं वराय को अर्क इंद्र कतमः स होता ॥ ४ ॥
यः । ता । चकार । सः । कुह । स्वित् । इंद्रः । कं । आ । जनं । चरति । कासु । विक्षु ।
कः । ते । यज्ञः । मनसे । शं । वराय । कः । अर्कः । इंद्र । कतमः । सः । होता ॥ ४ ॥

य इंद्रस्ता तान्युक्तप्रसिद्धानि वृत्रवधादीनि कर्माणि चकार अकरोत् स इंद्रोऽद्य कुह स्वित् क्व स्विद्वर्तते कं जनं कमपि देशमाचरति कासु विक्षु प्रजासु वर्तेत इतींद्रस्य विभूतिमहत्वान्न निश्चेतुं शक्यं। अथ प्रत्यक्षस्तुतिः। हे इंद्र कः कीदृशो यज्ञस्ते तव मनसे चेतसे शं सुखकरो भवति। वराय तव वरणाय कः कीदृशोऽर्को मंत्रः समर्थो भवति। होताह्वाता तव वरणाय यः समर्थो भवति स होता कतमश्च भवति ॥

॥ अथ पंचमी ॥

इदा हि ते वेविषतः पुराजाः प्रत्नास आसुः पुरुकृत्सखायः ।
ये मध्यमास उत नूतनास उतावमस्य पुरुहूत बोधि ॥ ५ ॥

इदा। हि। ते। वेविषतः। पुराऽजाः। प्रत्नासः। आसुः। पुरुऽकृत्। सखायः।
ये। मध्यमासः। उत। नूतनासः। उत। अवमस्य। पुरुऽहूत। बोधि ॥ ५ ॥

पुराजाः पूर्वस्मिन्काले जाताः प्रत्नासः पुराणा अंगिरःप्रभृतय इदा हीदानीमिव। हिशब्द उपामार्थे वर्तते। वेविषतः कर्माणि प्राप्नुवंतो हे पुरुकृत बहूनां कर्मणां कर्तरिंद्र ते तव सखायः स्तोतार आसुः। बभूवुः। ये मध्यमासो मध्यमकालजा उतापि च ये नूतनासोऽद्यतना यतस्तेऽपि सर्वे ते स्तोतारो बभूवुः अतः कारणादुतापिचावमस्यार्वाचीनस्य ममापि स्तोत्रं हे पुरुहूत बहुभिराहूतेंद्र त्वं बोधि। बुध्यस्व ॥

॥ इति चतुर्थस्य षष्ठ एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

तं पृच्छंतोऽवरासः पराणि प्रत्ना त इंद्र श्रुत्यानु येमुः ।
अर्चामसि वीर ब्रह्मवाहो यादेव विद्म तात्त्वा महांतं ॥ ६ ॥

तं। पृच्छंतः। अवरासः। पराणि। प्रत्ना। ते। इंद्र। श्रुत्या। अनु। येमुः।
अर्चामसि। वीर। ब्रह्मऽवाहः। यात्। एव। विद्म। तात्। त्वा। महांतं ॥ ६ ॥

हे वीर शूर ब्रह्मवाहो ब्रह्मभिर्मंत्रैर्वहनीयेंद्र अवरासोऽर्वाचीना मनुष्यास्तमुक्तगुणोपेतं त्वां पृच्छंतोऽर्चंतः ॥ पृच्छतिरर्चतिकर्मा ॥ पराणि प्रकृष्टानि प्रत्ना प्रत्नानि पुराणानि श्रुत्या श्रुत्यानि श्रोतव्यानि ते त्वदीयानि कर्माण्यनुयेमुः।

अनुयमनं निबंधनं। स्तुतिरूपाभिर्वाग्भिर्निबबंधुः। तथा वयमपि महांतं प्रभूतं त्वा त्वामर्चामसि। अर्चामः। स्तुमः। यादेव यान्येव कर्माणि विद्म जानीमः तानैः कर्मभिः स्तुम इति संबंधः॥

॥ अथ सप्तमी ॥

अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु तिष्ठ।
तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व ॥७॥

अभि। त्वा। पाजः। रक्षसः। वि। तस्थे। महि। जज्ञानं। अभि। तत्। सु। तिष्ठ।
तव। प्रत्नेन। युज्येन। सख्या। वज्रेण। धृष्णो इति। अप। ता। नुदस्व ॥७॥

रक्षसो रक्षसां संबंधि पाजः सेनालक्षणं बलं हे इंद्र त्वाभि त्वामभिमुखं वितस्थे। प्रतिष्ठते। तथा त्वमपि महि महज्जज्ञानं प्रादुर्भवत्तद्बलमभि अभिमुखः सन् सु सुष्ठु तिष्ठ। स्थिरो भव। स्थित्वा च हे धृष्णो शत्रूणां धर्षकेंद्र तव त्वदीयेन वज्रेण ता तद्बलमपनुदस्व। अपगतं प्रेरय। छिंधीत्यर्थः। कीदृशेन। प्रत्नेन पुराणेन युज्येन योज्येन सख्या नित्यसहायेन॥

॥ अथाष्टमी ॥

स तु श्रुधींद्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः।
त्वं ह्या३पिः प्रदिवि पितॄणां शश्वद्बभूथ सुहव एष्टौ ॥८॥

सः। तु। श्रुधि। इंद्र। नूतनस्य। ब्रह्मण्यतः। वीर। कारुऽधायः।
त्वं। हि। आपिः। प्रऽदिवि। पितॄणां। शश्वत्। बभूथ। सुऽहवः। आऽइष्टौ ॥८॥

हे कारुधायः कारूणां स्तोतॄणां धारक हे वीरेंद्र स प्रसिद्धस्त्वं नूतनस्येदानींतनस्य ब्रह्मण्यतो ब्रह्म स्तोत्रं कर्तुमिच्छतो मम स्तोत्रं तु क्षिप्रं श्रुधि। शृणुहि। यस्मात्कारणात् हे इंद्र त्वमेष्टावायजनेऽभिकामने वा सति सुहवः शोभनाह्वानः सन् प्रदिवि पूर्वस्मिन्काले पितॄणामंगिरसामापिर्बंधुः शश्वच्चिरकालं बभूथ अभूः तस्मात्कारणान्मदीयं स्तोत्रं श्रुधीति संबंधः॥

॥ अथ नवमी ॥

प्रोतये वरुणं मित्रमिंद्रं मरुतः कृष्वावसे नो अद्य।
प्र पूषणं विष्णुमग्निं पुरंधिं सवितारमोषधीः पर्वतांश्च ॥९॥

प्र । ऊतये॑ । वरु॑णं । मि॒त्रं । इंद्रं॑ । म॒रुतः॑ । कृ॒ष्व॒ । अव॑से । नः॒ । अ॒द्य ।
प्र । पू॒षणं॑ । विष्णुं॑ । अ॒ग्निं । पुरं॑ऽधिं । स॒वि॒तारं॑ । ओष॑धीः । पर्व॑तान् । च॒ ॥९॥

अस्यामृचि विश्वे देवा स्तूयंते । हे भरद्वाज अद्येदानीं वरुणं राज्यभिमानिनं च मित्रमहरभिमानिनं चेंद्रं च प्रसिद्धं मरुतो मरुद्गणांश्च नोऽस्माकमूतये तर्पणायावसे रक्षणाय च प्रकृष्व । अभिमुखीकुरुष्व । किंच पूषणमेतत्संज्ञकं च विष्णुं सर्वव्यापिनं देवं च पुरंधिं पुरुधियं पुरुकर्माणमग्निं च सवितारं सर्वस्य प्रेरकं देवमोषधीरोषध्यभिमानिनो देवान् पर्वतांश्चाद्रीनित्येतान् देवानस्माकं तर्पणाय रक्षणाय च प्रकृष्व । स्तुत्याभिमुखीकुरु ॥

॥ अथ दशमी ॥

इ॒म उ॑ त्वा पुरुशाक प्रयज्यो जरि॒तारो॑ अ॒भ्य॑र्च॒न्त्य॒र्कैः ।
श्रु॒धी हव॒मा हु॑व॒तो हु॑वा॒नो न त्वावाँ॑ अ॒न्यो अ॑मृत॒ त्वद॑स्ति ॥१०॥

इ॒मे । ऊं॒ इति॑ । त्वा॒ । पु॒रु॒ऽशा॒क॒ । प्र॒य॒ज्यो॒ इति॑ प्रऽयज्यो । ज॒रि॒तारः॑ । अ॒भि । अ॒र्च॒न्ति॒ । अ॒र्कैः ।
श्रु॒धि । हव॑म् । आ । हु॒व॒तः । हु॒वा॒नः । न । त्वाऽवा॑न् । अ॒न्यः । अ॒मृ॒त॒ । त्वत् । अ॒स्ति॒ ॥१०॥

हे पुरुशाक बहुशक्ते हे प्रयज्यो प्रकृष्टेन यजनीयेंद्र त्वा त्वामिमे जरितारः स्तोतारोऽर्कैरर्चनीयैः स्तोत्रैरभ्यर्चंति । अभिष्टुवंति । तथा हे अमृत अमरणशीलेंद्र हुवानः स्तूयमानस्त्वमाहुवतोऽभिष्टुवतो मम हवं स्तोत्रं श्रुधि । शृणु । किंच त्वावान् त्वत्सदृशो देवस्त्वदन्यो नास्ति ॥

॥ अथैकादशी ॥

नू म॒ आ वाच॒मुप॑ याहि वि॒द्वान्विश्वे॑भिः सूनो सहसो॒ यज॑त्रैः ।
ये अ॑ग्निजि॒ह्वा ऋ॑त॒साप॑ आ॒सुर्ये मनुं॑ च॒क्रुरुप॑रं॒ दसा॑य ॥११॥

नु । मे॒ । आ । वाच॑म् । उप॑ । या॒हि॒ । वि॒द्वान् । विश्वे॑भिः । सू॒नो॒ इति॑ । स॒ह॒सः॒ । यज॑त्रैः ।
ये । अ॒ग्नि॒ऽजि॒ह्वाः । ऋ॒त॒ऽसाप॑ः । आ॒सुः । ये । मनु॑म् । च॒क्रुः । उप॑रम् । दसा॑य ॥११॥

इयं च वैश्वदेवीत्युक्तं । हे सहसः सूनो बलस्य पुत्रेंद्र विद्वान् सर्वज्ञस्त्वं यजत्रैर्यजनीयैर्विश्वेभिः सर्वैर्देवैः सह नु क्षिप्रं मे मदीया वाचः स्तुतिरूपाणि वचांस्युपाभि आयाहि । आगच्छ । एवंभूतमिंद्रं प्रार्थयत ऐंद्रत्वात्सूक्तस्य । ये

देवा अग्निजिह्वाः। अग्निर्जिह्वास्थानीयो येषां ते। ऋतसाप ऋतं यज्ञं स्पृशंत आसुर्भवंति ये च देवा दसाय शत्रूणामुपक्षेपणाय मनुं राजर्षिमुपरं दस्यूनामुपरिभवं चक्रुः कृतवंतः तैः सहागच्छेति पूर्वेण संबंधः॥

॥ अथ द्वादशी ॥

स नो बोधि पुरएता सुगेषूत दुर्गेषु पथिकृद्विदानः।

ये अश्रमास उरवो वहिष्ठास्तेभिर्न इंद्राभि वक्षि वाजं ॥१२॥

सः। नः। बोधि। पुरःऽएता। सुऽगेषु। उत। दुःऽगेषु। पथिऽकृत्। विदानः।

ये। अश्रमासः। उरवः। वहिष्ठाः। तेभिः। नः। इंद्र। अभि। वक्षि। वाजं ॥१२॥

हे इंद्र पथिकृद्वर्त्मनां कर्ता विदानः सर्वं विद्वान् स त्वं सुगेषु सुखेन गंतव्येषूतापि च दुर्गेषु दुःखेन गंतव्येषु च मार्गेषु नोऽस्माकं पुरएता पुरो गंता बोधि। भव॥ बोधीति भवतेर्लोण्मध्यमपुरुषैकवचनस्य छांदसं रूपं॥ अश्रमासः श्रमरहिता उरवो महांतो वहिष्ठा वोढृतमास्तव येऽश्वाः संति हे इंद्र तेभिस्तैरश्वैर्नोऽस्मभ्यं वाजमन्नमभिवक्षि। अभिवह॥

॥ इति चतुर्थस्य षष्ठे द्वादशो वर्गः ॥

य एक इदित्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। य एक इदेकादशेति॥ आभिप्लविके प्रथमेऽहनि दशरात्रस्य प्रथमेऽहनि च माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रेऽहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि। तेष्विदं द्वितीयं सूक्तं। सूत्रितं च। य एक इद्यस्तिग्मशृंगः। आ० ७. ५.। इति॥ उपहव्यनाम्न्येकाहेऽपीदं निष्केवल्यनिविद्धानं। सूत्रितं च। य एक इदिति मध्यंदिनः। आ० ९. ७.। इति॥

॥ तत्र प्रथमा ॥

य एक इद्धव्यश्चर्षणीनामिंद्रं तं गीर्भिरभ्यर्च आभिः।

यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान् ॥१॥

यः। एकः। इत्। हव्यः। चर्षणीनां। इंद्रं। तं। गीःऽभिः। अभि। अर्चे। आभिः।

यः। पत्यते। वृषभः। वृष्ण्यऽवान्। सत्यः। सत्वा। पुरुऽमायः। सहस्वान् ॥१॥

य इंद्रश्चर्षणीनां प्रजानामापत्स्वेक इदेक एव हव्यो ह्वातव्य आभिर्गीर्भिः

स्तुतिरूपाभिर्वाग्भिस्तमिंद्रमभ्यर्चे । अभिष्टौमि । य इंद्रः पत्यते स्तोतॄनभिगच्छति। यद्वा पत्यते लोकानामीष्टे। कीदृशः। वृषभः कामानां वर्षिता वृष्ण्यावान्बलवान् सत्योऽविसंवादी सत्वा शत्रूणां सादयिता कामानां दाता वा ॥ सदेर्वा सनोतेर्वेदं रूपं ॥ पुरुमायो बहुप्रज्ञः सहस्वानभिभवनवान् तमिंद्रमभिष्टौमीति संबंधः ॥

॥ अथ द्वितीया ॥

तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयंतः ।
नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठं ॥२॥
तं। ऊं इति। नः। पूर्वे। पितरः। नवऽग्वाः। सप्त। विप्रासः। अभि। वाजयंतः।
नक्षत्ऽदाभं। ततुरिं। पर्वतेऽस्थां। अद्रोघऽवाचं। मतिऽभिः। शविष्ठं ॥२॥

पूर्वे प्रत्ना नवग्वा नवभिर्मासैः सत्रमनुष्ठितवंतः सप्त सप्तसंख्याका विप्रासो विप्रा मेधाविनो वाजयंतो वाजमन्नं हविर्लक्षणमिंद्रस्य कुर्वंतः। इंद्रं वा वाजिनं बलिनं कुर्वंतः ॥ तत्करोतीति णिच् ॥ एवंभूता नोऽस्माकं पितरोऽंगिरसस्तमु तमेवेंद्रं मतिभिः स्तुतिभिरभि। तुष्टुवुरिति शेषः। कीदृशं। नक्षद्दाभं॥ नक्षतिर्गतिकर्मा ॥ अभिगच्छतां शत्रूणां दंभितारं हिंसितारं ततुरिं तरितारं पर्वतेष्ठां पर्वतेष्ववस्थितमद्रोघवाचं। अद्रोग्धव्यानतिक्रमणीया वागाज्ञारूपा यस्य तं। शविष्ठं बलवत्तमं ॥

॥ अथ तृतीया ॥

तमीमह इंद्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः ।
यो अस्कृधोयुरजरः स्वर्वान्तमा भर हरिवो मादयध्यै ॥३॥
तं। ईमहे। इंद्रं। अस्य। रायः। पुरुऽवीरस्य। नृऽवतः। पुरुऽक्षोः।
यः। अस्कृधोयुः। अजरः। स्वःऽवान्। तं। आ। भर। हरिऽवः। मादयध्यै ॥३॥

पुरुवीरस्य बहुपुत्रपौत्रयुक्तस्य नृवतः परिचारकजनसहितस्य पुरुक्षोर्बह्वन्नस्य बहुपशोर्वास्य राय इदं धनं ॥ द्वितीयार्थे षष्ठी ॥ तमिंद्रमीमहे । याचामहे । यो रयिरस्कृधोयुरविच्छिन्नोऽजरो जराहानिरहितः स्ववान् सुखयुक्तो हे हरिवो हरिवन् स्वकीयाश्वोपेतेंद्र त्वं तं रयिं मादयध्या अस्मान्मादयितुमाभर। आहर ॥

॥ अथ चतुर्थी ॥

तन्नो वि वोचो यदि ते पुरा चिज्जरितार आनशुः सुम्नमिंद्र ।
कस्ते भागः किं वयो दुध्र खिद्वः पुरुहूत पुरूवसोऽसुरघ्नः ॥ ४ ॥

तत् । नः । वि । वोचः । यदि । ते । पुरा । चित् । जरितारः । आनशुः । सुम्नं । इंद्र ।
कः । ते । भागः । किं । वयः । दुध्र । खिद्वः । पुरुऽहूत । पुरूवसो इति पुरुऽवसो ।
असुरऽघ्नः ॥ ४ ॥

हे इंद्र यदि ते तव पुरा चित्पूर्वस्मिन्काले जरितारः स्तोतारः सुम्नं सुखमानशुः तत्तत्सुखं नोऽस्माकं विवोचः । विब्रूहि । दुध्र दुर्धर हे खिद्वः शत्रूणां खेदयितर्हे पुरुहूत हे पुरूवसो इंद्र असुरघ्नोऽसुराणां हंतुस्ते तव यज्ञेषु को भागः क्लृप्तः । वयो हविर्लक्षणमन्नं किं क्लृप्तं । यदि केचिच्चिरंतनाः पूर्वकालेऽपि त्वत्तः सकाशात्सुखं लेभिरे तर्ह्यहमपि तत्सुखं लप्स्य इति विचार्य सुखप्राप्तिविलंबो ममासोढव्यो भवेदित्यर्थः ॥

॥ अथ पंचमी ॥

तं पृच्छंती वज्रहस्तं रथेष्ठामिंद्रं वेपी वक्करी यस्य नू गीः ।
तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ ॥ ५ ॥

तं । पृच्छंती । वज्रऽहस्तं । रथेऽस्थां । इंद्रं । वेपी । वक्करी । यस्य । नु । गीः ।
तुविऽग्राभं । तुविऽकूर्मिं । रभःऽदां । गातुं । इषे । नक्षते । तुम्रं । अच्छ ॥ ५ ॥

पूर्वयोपालब्ध इंद्र ऋषये कामान्प्रायच्छत् ततः स कामपूर्ण ऋषिराह । वज्रहस्तं वज्रपाणिं रथेष्ठां रथे स्थितं तमिंद्रं पृच्छंत्यर्चयंती ॥ पृच्छतिरर्चतिकर्मा ॥ वेपी । वेपो यागादिलक्षणं कर्म । तद्वती वक्करी गुणानां वक्त्री गीरीदृशी स्तुतिर्यस्य यजमानस्य भवति । कीदृशमिंद्रं पृच्छंती । तुविग्राभं तुवीनां बहूनां ग्रहीतारं तुविकूर्मिं बहुकर्माणं रभोदां रभसो बलस्य दातारं । नु इति पूरणः । स यजमानो गातुं सुखमिषे । गच्छति । किंच तुम्रं ग्लापयितारं शत्रुमच्छाभिमुखं नक्षते । गच्छति ॥

॥ इति चतुर्थस्य षष्ठे त्रयोदशो वर्गः ॥

॥ अथ षष्ठी ॥

अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन ।

अच्युता चिद्वीळिता स्वोजो रुजो वि हळ्हा धृषता विरप्शिन् ॥ ६ ॥

अया । ह । त्यं । मायया । ववृधानं । मनःऽजुवा । स्वऽतवः । पर्वतेन ।

अच्युता । चित् । वीळिता । सुऽओजः । रुजः । वि । हळ्हा । धृषता । विऽरप्शिन् ॥ ६ ॥

हे स्वतवः स्वभूतबलेंद्र त्वं मनोजुवा मनोवद्गच्छतानेन पर्वतेन बहुपर्वणा स्वकीयेनायुधेन वज्रेण । वज्रेण शतपर्वणा । ऋग्वे॰ १. ८०. ६. । इति दर्शनात् । अयानया मायया वावृधानं वर्धमानं त्यं प्रसिद्धं वृत्रं व्यरुजः । विशेषेणाभांक्षीः । तथा हे स्वोजः शोभनतेजो हे विरप्शिन् हे महन्निंद्र त्वमच्युताच्युतानि चिद्विनाशरहितान्यपि वीळिता वीळितान्यशिथिलीकृतानि हळ्हा दृढानि पुराणि धृषता धर्षकेण वज्रेण व्यरुजः । भग्नवानसि ॥

॥ अथ सप्तमी ॥

तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नवत्परितंसयध्यै ।

स नो वक्षदनिमानः सुवह्मेंद्रो विश्वान्यति दुर्गहाणि ॥ ७ ॥

तं । वः । धिया । नव्यस्या । शविष्ठं । प्रत्नं । प्रत्नऽवत् । परिऽतंसयध्यै ।

सः । नः । वक्षत् । अनिऽमानः । सुऽवह्मा । इंद्रः । विश्वानि । अति । दुःऽगहानि ॥ ७ ॥

नव्यस्या नवतरया धिया स्तुत्या शविष्ठं बलवत्तमं प्रत्नं पुराणं हे इंद्र तं वस्त्वां प्रत्नवत् चिरंतना ऋषय इव परितंसयध्यै परितो विस्तारयितुं । इ॰ प्रवृत्तोऽस्मीति शेषः । अनिमानोऽपरिमाणः सुवह्मा शोभनवहनः स इंद्रो विश्वानि समस्तानि दुर्गहाणि दुर्गाणि नोऽस्मभ्यमतिवक्षत् । अतिवहतु ॥

॥ अथाष्टमी ॥

आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽंतरिक्षा ।

तपा वृषन्विश्वतः शोचिषा तान्ब्रह्मद्विषे शोचय क्षामपश्च ॥ ८ ॥

आ । जनाय । द्रुह्वणे । पार्थिवानि । दिव्यानि । दीपयः । अंतरिक्षा ।

तप । वृषन् । विश्वतः । शोचिषा । तान् । ब्रह्मऽद्विषे । शोचय । क्षां । अपः । च ॥ ८ ॥

हे इंद्र त्वं द्रुह्वणे साधुजनानां द्रोग्धुर्जनाय जनस्य राक्षसादेः ॥ षष्ठ्यर्थे चतुर्थी ॥ पार्थिवानि पृथिव्यां भवानि दिव्यानि दिवि भवान्यंतरिक्षांतरिक्षे भवानि च स्थानान्या दीपयः। आ समंतात्तापय। हे वृषन् कामानां वर्षितरिंद्र त्वं विश्वतः सर्वतो विद्यमानान् तान्राक्षसादीन् शोचिषा त्वदीयया दीप्त्या तप। दह। किंच ब्रह्मद्विषे ब्राह्मणद्वेष्ट्रे राक्षसादये। ब्रह्मद्विषं दग्धुमित्यर्थः। क्षां पृथिवीमपश्चांतरिक्षं शोचय। दीपय। आप इत्यंतरिक्षनामैतत् ॥

॥ अथ नवमी ॥

भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसंदृक्।

धिष्व वज्रं दक्षिण इंद्र हस्ते विश्वा अजुर्य दयसे वि मायाः ॥ ९ ॥

भुवः। जनस्य। दिव्यस्य। राजा। पार्थिवस्य। जगतः। त्वेषऽसंदृक्।

धिष्व। वज्रं। दक्षिणे। इंद्र। हस्ते। विश्वाः। अजुर्य। दयसे। वि। मायाः ॥ ९ ॥

हे त्वेषसंदृक् दीप्तदर्शनेंद्र दिव्यस्य दिवि भवस्य जनस्य राजेश्वरो भुवः। भवसि। जगतो जंगमस्य पार्थिवस्य च राजा भवसि। दक्षिणे हस्ते वज्रं धिष्व। निधेहि। तेन च निहितेन वज्रेण विश्वाः सर्वा आसुरीर्माया विदयसे। विबाधसे॥ दय दानहिंसागतिरक्षणेष्विति धातुः ॥ हे इंद्राजुर्य जरयितुमशक्येंद्र त्वमिति ॥

॥ अथ दशमी ॥

आ संयतमिंद्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्रां।

यया दासान्यार्याणि वृत्रा करो वज्रिन्त्सुतुका नाहुषाणि ॥ १० ॥

आ। संऽयतं। इंद्र। नः। स्वस्तिं। शत्रुऽतूर्याय। बृहतीं। अमृध्रां।

यया। दासानि। आर्याणि। वृत्रा। करः। वज्रिन्। सुऽतुका। नाहुषाणि ॥ १० ॥

हे इंद्र शत्रुतूर्याय शत्रूणां तारणाय बृहतीं महतीममृध्रामहिंसितां संयतं संयतीं संगच्छमानां स्वस्तिं क्षेमलक्षणां संपदं हे इंद्र नोऽस्मभ्यमाभर। वज्रिन्वज्रवन्निंद्र यया स्वस्त्या दासानि कर्महीनानि मनुष्यजातान्यार्याणि कर्मयुक्तानि करः अकरोः। नाहुषाणि मनुष्यसंबंधीनि। नहुषा इति मनुष्यनामैतत्। वृत्रा वृत्राणि शत्रून् सुतुका सुतुकानि शोभनहिंसोपेतान्यकरोः ॥

॥ अथैकादशी ॥

स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरा गहि प्रयज्यो ।
न या अदेवो वरते न देव आभिर्याहि तूयमा मद्र्यद्रिक् ॥ ११ ॥
सः। नः। नियुत्ऽभिः। पुरुऽहूत। वेधः। विश्वऽवाराभिः। आ। गहि। प्रयज्यो इति प्रऽयज्यो।
न। याः। अदेवः। वरते। न। देवः। आ। आभिः। याहि। तूयं। आ। मद्र्यद्रिक् ॥ ११ ॥

हे पुरुहूत हे वेधो विधातर्हे प्रयज्यो प्रकृष्टेन यजनीयेंद्र स त्वं विश्ववाराभिर्विश्वैर्वरणीयाभिः संभजनीयाभिर्नियुद्भिरश्वैर्नोऽस्मानागहि। आगच्छ। अदेवोऽसुरो या नियुतो यानश्वान्न वरते न वारयति देवश्च न वरते आभिर्नियुद्भिस्तूयमा क्षिप्रमेव मद्र्यद्रिक् मदभिमुखः सन् आयाहि। आगच्छ ॥ अद्र्यागमस्य द्विर्वचनं छांदसं ॥

॥ इति चतुर्थस्य षष्ठे चतुर्दशो वर्गः ॥

सुत इदिति दशर्चमष्टमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं। सुत इद्दशेत्यनुक्रांतं ॥ विषुवति निष्केवल्य इदं सूक्तं। सूचितं च। सुत इत्त्वमेष प्र पूर्वीः। आ० ८.७.। इति ॥ महाव्रतेऽपि निष्केवल्य इदमादीनि त्रीणि सूक्तानि। तथैव पंचमारण्यके सूचितं। सुत इत्त्वं निमिश्ल इंद्र सोम इति त्रीणि। ऐ० आ० ५.८.। इति ॥

॥ तत्र प्रथमा ॥

सुत इत्त्वं निमिश्ल इंद्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे ।
यद्वा युक्ताभ्यां मघवन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिंद्र यासि ॥ १ ॥
सुते। इत्। त्वं। निऽमिश्लः। इंद्र। सोमे। स्तोमे। ब्रह्मणि। शस्यमाने। उक्थे।
यत्। वा। युक्ताभ्यां। मघऽवन्। हरिऽभ्यां। बिभ्रत्। वज्रं। बाह्वोः। इंद्र। यासि ॥ १ ॥

सोमे सुत इदभिषुत एव सति ब्रह्मणि बृहति महति स्तोमे स्तोत्र उच्चार्यमाणे सत्युक्थे शस्त्रे शस्यमाने सति हे इंद्र त्वं निमिश्लो निमिश्रः सन् हरी संयोजयन् हे मघवन्धनवन्निंद्र त्वं बाह्वोर्हस्तयोर्वज्रं स्वकीयमायुधं बिभ्रद्धारयन् युक्ताभ्यां रथे नियुक्ताभ्यां हरिभ्यामश्वाभ्यां यासि यद्वागच्छसीति यत्र तत्सोमेऽभिषुत इति संबंधः ॥

॥ अथ द्वितीया ॥

यद्वा दिवि पार्ये सुष्विमिंद्र वृत्रहत्येऽवसि शूरसातौ ।

यद्वा दक्षस्य बिभ्युषो अबिभ्यदरंधयः शर्धत इंद्र दस्यून् ॥ २ ॥

यत् । वा । दिवि । पार्ये । सुस्विं । इंद्र । वृत्रऽहत्ये । अवसि । शूरऽसातौ ।

यत् । वा । दक्षस्य । बिभ्युषः । अबिभ्यत् । अरंधयः । शर्धतः । इंद्र । दस्यून् ॥ २ ॥

हे इंद्र त्वं दिवि द्युलोके शूरसातौ शूरैर्भटैः संभजनीये वृत्रहत्ये युद्धे च पार्ये प्राप्तव्ये सति सुष्विमभिषोतारं यजमानमवसि यद्वा रक्षसीति यच्च। वेति समुच्चये। दक्षस्य यज्ञादिषु समर्थस्य बिभ्युषः शत्रुभ्यो बिभ्यतो जनस्य शर्धतः संग्राम उत्सहमानान्दस्यूनुपक्षपयितॄन् शत्रून् हे इंद्र त्वमबिभ्यद्भीतिरहितः सन् अरंधयो यद्वा वशीकरोषीति यच्च तत्सर्वं सोमेऽभिषुत इति पूर्वेण संबंधः ॥ तथा चोक्तं । यद्वाह्नोर्धारयन्वज्रं हरिभ्यां यासि वृत्रहन् । यच्च रक्षसि संग्रामे नॄन् सोममभिषुण्वतः ॥ यच्च कर्म सुदक्षस्य यजमानस्यापारयः। वशीकरोषि तांस्तस्मै बिभ्यते भीतिवर्जितः ॥ तत्सोमेऽभिषुते स्तोत्रशस्त्रयोश्च प्रवृत्तयोः। इति द्वृचोऽयमेकार्थः सुत इत्त्वमिति द्वयमिति ॥

॥ अथ तृतीया ॥

पाता सुतमिंद्रो अस्तु सोमं प्रणेनीरुग्रो जरितारमूती ।

कर्ता वीराय सुष्वय उ लोकं दाता वसु स्तुवते कीरये चित् ॥ ३ ॥

पाता । सुतं । इंद्रः । अस्तु । सोमं । प्रऽनेनीः । उग्रः । जरितारं । ऊती ।

कर्ता । वीराय । सुस्वये । ऊं इति । लोकं । दाता । वसु । स्तुवते । कीरये । चित् ॥ ३ ॥

इंद्रः सुतमभिषुतं सोमं पातास्तु। पानशीलो भवतु ॥ तृनंतत्वान्न लोकाव्ययनिष्ठेति षष्ठीप्रतिषेधः ॥ कीदृशः। ऊती ऊत्या मार्गेण जरितारं स्तोतारं प्रणेनीः प्रकर्षेण नेतोग्र उद्गूर्णो वीराय यज्ञादिकर्मसु दक्षाय सुष्वये सोमाभिषवं कुर्वते यजमानाय लोकं स्थानं कर्ता। दातेत्यर्थः। उ इति पादपूरणः। स्तुवते स्तोत्रं कुर्वते कीरये चित् ॥ चिदिति चार्थे ॥ स्तोत्रे च। कीरिरिति स्तोतॄनामैतत्। वसु धनं दातास्तु ॥

॥ अथ चतुर्थी ॥

गंतेयांति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं ददिर्गाः ।
कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः ॥ ४ ॥

गंता । इयंति । सवना । हरिऽभ्यां । बभ्रिः । वज्रं । पपिः । सोमं । ददिः । गाः ।
कर्ता । वीरं । नर्यं । सर्वऽवीरं । श्रोता । हवं । गृणतः । स्तोमऽवाहाः ॥ ४ ॥

इंद्रो हरिभ्यां स्वकीयाभ्यामियंति हृदयस्थानि त्रीणि सवना सवनानि गंता गमनशीलो भवतु । कीदृशः । वज्रं स्वकीयमायुधं बभ्रिर्भर्ता धारकः सोममभिषुतं पपिः पाता गा ददिर्दाता नर्यं मनुष्यहितं सर्ववीरं बहुपुत्रोपेतं वीरं पुत्रं कर्ता यजमानाय दाता गृणतः स्तुवतः स्तोतुः संबंधि हवं स्तोत्रं श्रोता श्रावकः स्तोमवाहाः स्तोमैः स्तोत्रैर्वहनीयः ॥

॥ अथ पंचमी ॥

अस्मै वयं यद्वावान तद्विविष्म इंद्राय यो नः प्रदिवो अपस्कः ।
सुते सोमे स्तुमसि शंसदुक्थेंद्राय ब्रह्म वर्धनं यथासत् ॥ ५ ॥

अस्मै । वयं । यत् । ववान । तत् । विविष्मः । इंद्राय । यः । नः । प्रऽदिवः । अपः । करिति कः ।
सुते । सोमे । स्तुमसि । शंसत् । उक्था । इंद्राय । ब्रह्म । वर्धनं । यथा । असत् ॥ ५ ॥

प्रदिवः पुराणो य इंद्रो नोऽस्मदर्थमपः पोषणादिकं कर्म कः करोति अयमिंद्रो यत्स्तोत्रादिकं ववान कामयतेऽस्मा इंद्राय वयं तद्विविष्मः । व्याप्नुमः । कुर्म इत्यर्थः । सोमे सुतेऽभिषुते सति स्तुमसि । स्तुमः । इंद्राय स्तोत्राणि कुर्मः उक्थोक्थानि शस्त्राणि शंसत् शंसंतः ॥ प्रथमाबहुवचनस्य लुक् ॥ ब्रह्म हविळक्षणमन्नमिंद्रायेंद्रार्थं वर्धनं यथा वृद्धिकरमसत् स्यात् तथा कुर्म इत्यर्थः ॥

॥ इति चतुर्थस्य षष्ठे पंचदशो वर्गः ॥

॥ अथ षष्ठी ॥

ब्रह्माणि हि चकृषे वर्धनानि तावत्त इंद्र मतिभिर्विविष्मः ।
सुते सोमे सुतपाः शंतमानि रांद्र्या क्रियास्म वक्षणानि यज्ञैः ॥ ६ ॥

ब्रह्माणि । हि । चकृषे । वर्धनानि । तावत् । ते । इंद्र । मतिऽभिः । विविष्मः ।
सुते । सोमे । सुतऽपाः । शंऽतमानि । रांद्र्या । क्रियास्म । वक्षणानि । यज्ञैः ॥ ६ ॥

हे इंद्र त्वं हि यस्मात्कारणात् ब्रह्माणि स्तोत्राणि वर्धनानि स्वयमेव वृद्धिकराणि चकृषे कृतवानसि तस्मात्कारणात्तावत्तावंति तादृशानि स्तोत्राणि ते तुभ्यं मतिभिर्बुद्धिभिर्वयं विविष्मः। व्याप्नुमः। वर्धनानि स्तोत्राणि मम यथा भवेयुस्त्वं तादृशानि कल्पितवानसीत्यर्थः। अपि च हे सुतपा अभिषुतस्य सोमस्य पातस्त्वं शंतमानि सुखकृत्तमानि रांध्रा रांध्राणि रमणीयानि यज्ञैर्हविर्भिर्युक्तानि वक्षणानि वाहकानि स्तोत्राणि क्रियास्म। करवाम ॥

॥ अथ सप्तमी ॥

स नो बोधि पुरोळाशं रराणः पिबा तु सोमं गोऋजीकमिंद्र।
एदं बर्हिर्यजमानस्य सीदोरुं कृधि त्वायत उ लोकं ॥ ७ ॥
सः। नः। बोधि। पुरोळाशं। रराणः। पिब। तु। सोमं। गोऽऋजीकं। इंद्र।
आ। इदं। बर्हिः। यजमानस्य। सीद। उरुं। कृधि। त्वाऽयतः। ऊं इति। लोकं ॥ ७ ॥

हे इंद्र रराणो रममाणः स त्वं नोऽस्मदीयं पुरोडाशमेतल्लक्षणं हविर्बोधि। बुध्यस्व। किंच गोऋजीकं गोविकारदध्यादिभिः संस्कृतमभिषुतं सोमं तु क्षिप्रं पिब। पिबेः। तदर्थं च यजमानस्य संबंधीदं बर्हिरासीद। अभिविश। तदनंतरं त्वायतस्त्वामिच्छतो यजमानस्य लोकं स्थानमुरु विस्तीर्णं कृधि। कुरु ॥ उ इति पूरणः ॥

॥ अथाष्टमी ॥

स मंदस्वा ह्यनु जोषमुग्र प्र त्वा यज्ञास इमे अश्नुवंतु।
प्रेमे हवासः पुरुहूतमस्मे आ त्वेयं धीरवस इंद्र यम्याः ॥ ८ ॥
सः। मंदस्व। हि। अनु। जोषं। उग्र। प्र। त्वा। यज्ञासः। इमे। अश्नुवंतु।
प्र। इमे। हवासः। पुरुऽहूतं। अस्मे इति। आ। त्वा। इयं। धीः। अवसे। इंद्र। यम्याः ॥ ८ ॥

हे उग्रोद्गूर्णबलेंद्र स त्वमनु जोषं कामानुगुणं यथा भवति तथा मंदस्व। मोदस्व ॥ हिशब्दः पादपूरणः। हियोगे मंदस्वेत्याख्यातस्य व्यत्ययात्सर्वानुदात्तत्वं ॥ इमे यज्ञासो यज्ञाः सोमास्त्वा त्वां प्राश्नुवंतु। प्राप्नुवंतु। हे पुरुहूत बहुभिराहूतेंद्र त्वामस्मे अस्मदीयानीमे हवासो हवाः स्तोत्राणि प्राप्नुवंतु। इयं धीः स्तुतिस्त्वामवसेऽस्माकं रक्षणायायम्याः। आयच्छतु। नियच्छतु ॥

॥ अथ नवमी ॥

तं वः सखायः सं यथा सुतेषु सोमेभिरीं पृणता भोजमिंद्रं ।
कुविन्नस्मा असति नो भराय न सुष्विमिंद्रोऽवसे मृधाति ॥९॥
तं । वः । सखायः । सं । यथा । सुतेषु । सोमेभिः । ईं । पृणत । भोजं । इंद्रं ।
कुवित् । तस्मै । असति । नः । भराय । न । सुस्विं । इंद्रः । अवसे । मृधाति ॥९॥

हे सखायः स्तोतारो वो यूयं सोमेषु सुतेष्वभिषुतेषु सत्सु भोजं दातारं तमीमेतमिंद्रं सोमेभिः सोमैर्यथाकामं संपृणत । संपूरयत । तस्मा इंद्राय कुविद्बहूपकरणं । कुविदिति बहुनामैतत् । असति । अस्तु । किमर्थं । नोऽस्माकं भराय भरणाय पोषणाय । इंद्रः सुष्विमभिषवणशीलं यजमानमवसे तर्पणाय न मृधाति । न बाधते ॥

॥ अथ दशमी ॥

एवेदिंद्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदिन्मघोनः ।
असद्यथा जरित्र उत सूरिरिंद्रो रायो विश्ववारस्य दाता ॥१०॥
एव । इत् । इंद्रः । सुते । अस्तावि । सोमे । भरत्ऽवाजेषु । क्षयत् । इत् । मघोनः ।
असत् । यथा । जरित्रे । उत । सूरिः । इंद्रः । रायः । विश्वऽवारस्य । दाता ॥१०॥

मघोनो धनवतो हविष्मतो यजमानस्य क्षयदीश्वर इंद्रः सोमे सुतेऽभिषुते सति भरद्वाजेषु भरद्वाजे मय्येवैवमस्तावि । स्तुतोऽभूत् । इंद्रो जरित्रे स्तोत्रे सूरिः सन्मार्गे प्रेरको यथासत् भवेत् । उतापि च विश्ववारस्य विश्वैर्वरणीयस्य रायो धनस्य दाता यथा भवेत् तथास्तावीति संबंधः ॥ इदिति द्वयं पूरणं ॥

॥ इति चतुर्थस्य षष्ठे षोडशो वर्गः ॥

॥ इति षष्ठे मंडले द्वितीयोऽनुवाकः ॥

तृतीयेऽनुवाके विंशति सूक्तानि । तत्र वृषा मद इति दशर्चं प्रथमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं । वृषेत्यनुक्रांतं ॥ विषुवति निष्केवल्य एतत्सूक्तं । सूचितं च । वृषा मदः प्र मंहिष्ठाय । आ० ८.६. । इति ॥

॥ तत्र प्रथमा ॥

वृषा मद इंद्रे श्लोक उक्था सचा सोमेषु सुतपा ऋजीषी ।

अर्चत्र्यो मघवा नृभ्य उक्थैर्द्युक्षो राजा गिरामक्षितोतिः ॥१॥

वृषा । मदः । इंद्रे । श्लोकः । उक्था । सचा । सोमेषु । सुतऽपाः । ऋजीषी ।

अर्चत्र्यः । मघऽवा । नृऽभ्यः । उक्थैः । द्युक्षः । राजा । गिरां । अक्षितऽऊतिः ॥१॥

सोमेषु सोमवत्सु यागेष्विंद्रे सोमपानजनितो मदो वृषा यजमानस्य कामानां वर्षको भवति । यद्वा सर्वजनाह्लादकस्य वर्षणस्य कर्ता भवति । उक्थोक्थेन शस्त्रेण सचा सह श्लोकः स्तोत्ररूपः शब्दो वृषा भवति । सुतपा अभिषुतस्य सोमस्य पाता ऋजीषृजीषं गतरसमपि सोमं न परित्यजन्मघवा धनवान् स चेंद्रो नृभ्यः स्तुतीनां नेतृभ्य उक्थैः स्तोत्रैरर्चत्र्योऽर्चनीयो भवति । द्युक्षो द्युलोकनिवासो गिरां स्तुतीनां राजेश्वर इंद्रोऽक्षितोतिरक्षीणरक्षश्च भवति ॥

॥ अथ द्वितीया ॥

ततुरिर्वीरो नर्यो विचेताः श्रोता हवं गृणत उर्व्यूतिः ।

वसुः शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजं ॥२॥

ततुरिः । वीरः । नर्यः । विऽचेताः । श्रोता । हवं । गृणतः । उर्विऽऊतिः ।

वसुः । शंसः । नरां । कारुऽधायाः । वाजी । स्तुतः । विदथे । दाति । वाजं ॥२॥

वाज्यन्नवानिंद्रो विदथे यज्ञेऽस्माभिः स्तुतः सन् वाजमन्नं दाति । अस्मभ्यं ददाति । कीदृश इंद्रः । ततुरिः शत्रूणां हिंसको वीरो विक्रांतो नर्यो नरहितो विचेता विविक्तज्ञानो हवमस्मदीयं स्तोत्रं श्रोता गृणतः स्तुवतः स्तोतृजनस्योर्व्यूतिर्विस्तृतरक्षो वसुर्वासयिता नरां नृणां स्तोतृजनानां शंसः शंसनीयः कारुधायाः कारूणां स्तोतॄणां धारयिता । एवंभूत इंद्रो वाजं ददातीति संबंधः ॥

॥ अथ तृतीया ॥

अक्षो न चक्र्योः शूर बृहन्प्र ते मह्ना रिरिचे रोदस्योः ।

वृक्षस्य नु ते पुरुहूत वया व्यूतयो रुरुहुरिंद्र पूर्वीः ॥३॥

अक्षः । न । चक्र्योः । शूर । बृहन् । प्र । ते । मह्ना । रिरिचे । रोदस्योः ।

वृक्षस्य । नु । ते । पुरुऽहूत । वयाः । वि । ऊतयः । रुरुहुः । इंद्र । पूर्वीः ॥३॥

हे शूर विक्रांतेंद्र बृहन् महान् ते त्वदीयो मह्ना महिमा रोदस्योर्द्यावापृथिव्योः प्ररिरिचे। अतिरिच्यते। द्यावापृथिवीभ्यामित्यर्थः। अत्र दृष्टांतः। चक्र्योश्चक्रयोरक्षो न। रथसंबंध्यक्षो यथा चक्राभ्यां बहिर्गतस्तद्वत्। हे पुरुहूत बहुभिराहूतेंद्र त्वदीयाः पूर्वीर्बह्व्य ऊतयो रक्षा वि रुरुहुः। विशेषेण रोहंति। तत्र दृष्टांतः। वृक्षस्य नु। यथा वृक्षस्य वयाः शाखा विरोहंति तद्वत् ॥

॥ अथ चतुर्थी ॥

शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः संचरणीः ।
वत्सानां न तंतयस्त इंद्र दामन्वंतो अदामानः सुदामन् ॥४॥

शचीऽवतः। ते। पुरुऽशाक। शाकाः। गवांऽइव। स्रुतयः। संऽचरणीः।
वत्सानां। न। तंतयः। ते। इंद्र। दामन्ऽवंतः। अदामानः। सुऽदामन् ॥४॥

हे पुरुशाक बहुकर्मन्निंद्र शचीवतः प्रज्ञावतस्ते त्वदीयाः शाकाः शक्तयः कर्माणि वा सर्वतः संचरंतीति शेषः। तत्र दृष्टांतः। गवामिव धेनूनां स्रुतयो मार्गा यथा संचरणीः सर्वत्र संचारिणो भवंति तद्वत्। अपि च वत्सानां न तंतयः। तंतिर्नाम दीर्घप्रसारिता रज्जुः। यत्र नियतैर्विशाखदामभिर्बहवो वत्सा बध्यंते। यथा तंतयो बहूनां वत्सानां बंधका हे सुदामन् शोभनदानेंद्र तथा ते त्वदीयाः शाका दामन्वंतो बंधनवंतो बहूनां शत्रूणां बंधका अदामानः स्वयमन्यैरबद्धाः ॥

॥ अथ पंचमी ॥

अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिंद्रः ।
मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति ॥५॥

अन्यत्। अद्य। कर्वरं। अन्यत्। ऊं इति। श्वः। असत्। च। सत्। मुहुः। आऽचक्रिः। इंद्रः।
मित्रः। नः। अत्र। वरुणः। च। पूषा। अर्यः। वशस्य। परिऽएता। अस्ति ॥५॥

अयमिंद्रोऽद्यास्मिन्दिवसेऽन्यत्कर्वरं। कर्मनामैतत्। कर्म करोति। अन्यदु अन्यदेवोक्तविलक्षणमेव कर्म श्वः परस्मिन्दिने करोति। एतदेव विव्रियते। असच्चाशुभमशनिपातनादिकं सत् वर्षणादिकं शोभनं कर्म च। यद्वा त्रिशिरसो विश्वरूपस्य वधादिकमसत्कर्म लोकोपद्रवकारिणो वृत्रादेरसुरस्य वधादिरूपं सत्कर्म च मुहुः पुनः पुनरसाविंद्र आचक्रिः कर्ता भवति। एवं परस्परविलक्षणं

कर्म स्वमहिम्ना पुनः पुनरावर्तयन् प्रतिदिवसमन्यदेव परेषामसाधारणं कर्म करोतीत्यर्थः। एवंविध इंद्रोऽत्रास्मिन्यज्ञे नोऽस्माकं वशस्य कामयितव्यस्य फलस्य स्वर्गादेः पर्यंतास्ति। परिगमयिता भवतु॥ अस्तेर्लेटि रूपं॥ मित्रोऽहरभिमानी देवो वरुणो रात्र्यभिमानी पूषा पोषको देवोऽर्यः प्रेरकः सवितैते चेंद्रेण नियम्यमाना अस्मदीयस्य कामस्य परिगमयितारः संतु। यद्वा मित्रादयोऽप्यत्र स्वप्रधान्येनाभिधीयंते। मित्रादय इंद्रः प्रत्येकमस्मदीयस्य कामस्य पर्यंतास्तु। तथा बृहद्देवतायामुक्तं। प्रोतयेऽन्यदिति त्वेते वैश्वदेव्यावृचौ स्मृते इति॥

॥ इति चतुर्थस्य षष्ठे सप्तदशो वर्गः॥

॥ अथ षष्ठी॥

वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिंद्रानयंत यज्ञैः।
तं त्वाभिः सुष्टुतिभिर्वाजयंत आजिं न जग्मुर्गिर्वाहो अश्वाः॥६॥

वि। त्वत्। आपः। न। पर्वतस्य। पृष्ठात्। उक्थेभिः। इंद्र। अनयंत। यज्ञैः।
तं। त्वा। आभिः। सुस्तुतिऽभिः। वाजयंतः। आजिं। न। जग्मुः। गिर्वाहः। अश्वाः॥६॥

हे इंद्र त्वत्त्वत्सकाशादुक्थेभिरुक्थैः शस्त्रैर्यज्ञैर्हविर्भिश्च स्तोतारः कामानात्मनो व्यनयंत। विविधं प्रापयंति। तत्र दृष्टांतः। पर्वतस्याद्रेः पृष्ठादुपरिभागादापो न अप उदकानि यथा तद्वत्। अपि च हे गिर्वाहो गीर्भिः स्तुतिरूपाभिर्वाग्भिर्वहनीयेंद्र तं प्रसिद्धं त्वा त्वां वाजयंतो बलिनं कुर्वंतः। यद्वा वाजमन्नमिच्छंतो भरद्वाजाः स्तोतार आभिः पूर्वोक्ताभिः सुष्टुतिभिः शोभनाभिः स्तुतिभिर्जग्मुः। प्रापुः। क्षिप्रगमने दृष्टांतः। अश्वा वाहा आजिं न संग्रामं यथा शीघ्रं प्रापुस्तद्वत्॥

॥ अथ सप्तमी॥

न यं जरंति शरदो न मासा न द्याव इंद्रमवकर्शयंति।
वृद्धस्य चिद्वर्धतामस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना॥७॥

न। यं। जरंति। शरदः। न। मासाः। न। द्यावः। इंद्रं। अवऽकर्शयंति।
वृद्धस्य। चित्। वर्धतां। अस्य। तनूः। स्तोमेभिः। उक्थैः। च। शस्यमाना॥७॥

शरदः संवत्सरा यमिंद्रं न जरंति न जरयंति नापक्षीणयंति। तथा मासाश्च नापक्षीणयंति। तथा द्यावो दिवसाश्च यमिंद्रं नावकर्शयंति नाल्पीभावयंति

वृद्धस्य चित् प्रवृद्धस्याप्यस्येंद्रस्य तनूः शरीरं स्तोमेभिरस्मदीयैः स्तोत्रैरुक्थैश्च शस्त्रैश्च शस्यमाना स्तूयमाना सती वर्धतां। प्रवृद्धा भवतु ॥

॥ अथाष्टमी ॥

न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान्।
अज्रा इंद्रस्य गिरयश्चिदृष्वा गंभीरे चिद्भवति गाधमस्मै ॥ ८ ॥
न। वीळवे। नमते। न। स्थिराय। न। शर्धते। दस्युऽजूताय। स्तवान्।
अज्राः। इंद्रस्य। गिरयः। चित्। ऋष्वाः। गंभीरे। चित्। भवति। गाधं। अस्मै ॥ ८ ॥

स्तवानस्माभिः स्तूयमान इंद्रो वीळवे दृढगात्राय यजमानाय न नमते। न वशीभवति। स्थिराय युद्धेऽविचलिताय च न नमते। शर्धते उत्सहमानाय दस्युजूताय कर्मवर्जितैः प्रेरिताय यजमानाय न वशीभवति। यद्यपि स्तोतारो बहुगुणाः संति तथापींद्रस्तेभ्यो दस्युसहितेभ्यो न वशीभवतीत्यर्थः। अपि च ऋष्वा महांतो गिरयश्चित्पर्वता अपींद्रस्याज्राः सुगमनाः क्षेपणीया भवंति। गंभीरे चिदगाधेऽपि स्थानेऽस्मा इंद्राय गाधमेव स्थानं विषयो भवति ॥

॥ अथ नवमी ॥

गंभीरेण न उरुणामत्रिन्प्रेषो यंधि सुतपावन्वाजान्।
स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायां ॥ ९ ॥
गंभीरेण। नः। उरुणा। अमत्रिन्। प्र। इषः। यंधि। सुतऽपावन्। वाजान्।
स्थाः। ऊं इति। सु। ऊर्ध्वः। ऊती। अरिषण्यन्। अक्तोः। विऽउष्टौ। परिऽतक्म्यायां ॥ ९ ॥

हे अमत्रिन्। अमत्रं बलं। तद्वन् हे सुतपावन् सुतस्य सोमस्य पातरिंद्र गंभीरेण केनापि दुरवगाहेनोरुणा विस्तीर्णेन मनसा नोऽस्मभ्यमिषोऽन्नानि वाजान्बलानि च प्रयंधि। प्रयच्छ। किंचाक्तो रात्रेर्व्युष्टौ विवासेऽह्नि परितक्म्यायां रात्रौ हे इंद्र त्वमूती अस्माकं रक्षायै हे इंद्र अरिषण्यन्नहिंसंस्त्वमूर्ध्व उद्युक्तः स्था ऊ षु। सुष्ठु तिष्ठैव ॥

॥ अथ दशमी ॥

सचस्व नायमवसे अभीक इतो वा तमिंद्र पाहि रिषः।
अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः ॥ १० ॥

सचस्व। नार्यं। अवसे। अभीके। इतः। वा। तं। इंद्र। पाहि। रिषः।
अमा। च। एनं। अरण्ये। पाहि। रिषः। मदेम। शतऽहिमाः। सुऽवीराः ॥१०॥

हे इंद्र त्वं नार्यं कर्मणां स्तुतीनां च नेतारमभीके संग्रामेऽवसे रक्षणाय सचस्व। सेवस्व। इतो वास्मात्संनिकृष्टाच्च रिषः शत्रोरमुतो विप्रकृष्टाच्छत्रोश्च। वाशब्दोऽनुक्तेन विवक्षितेन समुच्चयः। हे इंद्र तं स्तोतारं पाहि। रक्ष। तथामा च गृहे च। अमेति गृहनाम। अरण्ये कानने च रिषः शत्रोः पाहि। तं रक्ष। तदनंतरं सुवीराः शोभनपुत्रा वयं शतहिमाः शतसंवत्सरान्मदेम। हृष्याम ॥

॥ इति चतुर्थस्य षष्ठेऽष्टादशो वर्गः ॥

या त ऊतिरिति नवर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। या ते नवेति ॥ पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनीदं सूक्तं निष्केवल्यनिविद्धानं। सूचितं च। या त ऊतिरवमेति मध्यंदिनः। आ० ७. ६.। इति ॥

॥ तत्र प्रथमा ॥

या त ऊतिरवमा या परमा या मध्यमेंद्र शुष्मिन्नस्ति।
ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान्न उग्र ॥१॥

या। ते। ऊतिः। अवमा। या। परमा। या। मध्यमा। इंद्र। शुष्मिन्। अस्ति।
ताभिः। ऊं इति। सु। वृत्रऽहत्ये। अवीः। नः। एभिः। च। वाजैः। महान्। नः। उग्र ॥१॥

हे शुष्मिन् बलवन्निंद्र ते त्वदीया योतिर्या रक्षावमाधमास्ति। या परमोत्कृष्टास्ति। या मध्यमास्ति ताभिरूतिभिर्वृत्रहत्ये युद्धे नोऽस्मान् सु अत्यंतमवीः। पालय। किंच हे उग्रोद्गूर्णेंद्र महांस्त्वमेभिर्भोज्यसाधनैर्वाजैरन्नैश्च नोऽस्मान संयोजयेति शेषः ॥

॥ अथ द्वितीया ॥

आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिंद्र।
आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽव तारीर्दासीः ॥२॥

आभिः। स्पृधः। मिथतीः। अरिषण्यन्। अमित्रस्य। व्यथय। मन्युं। इंद्र।
आभिः। विश्वाः। अभिऽयुजः। विषूचीः। आर्याय। विशः। अव। तारीः। दासीः ॥२॥

हे इंद्र आभिरस्मदीयाभिः स्तुतिभिर्मिथतीः शत्रुसैन्यानि हिंसतीः स्पृधोऽस्मदीयाः सेना अरिषण्यन्नहिंसन्। पालयन्नित्यर्थः। अमित्रस्य शत्रोर्मन्युं संग्रामादिषु विद्यमानं कोपं व्यथय। नाशय। अपि चाभिः स्तुतिभिरेवाभियुजोऽभियोक्त्रीर्विषूचीः सर्वतो विद्यमाना दासीः कर्मणामुपक्षपयित्रीर्विश्वाः सर्वा विशः प्रजा आर्याय यज्ञादिकर्मकृते यजमानायावतारीः। विनाशय ॥

॥ अथ तृतीया ॥

इंद्र॑ जा॒मय॑ उ॒त येऽजा॑मयोऽर्वाची॒नासो॑ व॒नुषो॑ युयु॒ज्रे ।
त्वमे॑षां विथु॒रा शवां॑सि ज॒हि वृष्ण्या॑नि कृणु॒ही परा॑चः ॥३॥
इंद्र॑ । जा॒मयः॑ । उ॒त । ये । अजा॑मयः । अर्वा॒ची॒नासः॑ । व॒नुषः॑ । यु॒यु॒ज्रे ।
त्वं । ए॒षां॒ । वि॒थु॒रा । शवां॑सि । ज॒हि । वृष्ण्या॑नि । कृ॒णु॒हि । परा॑चः ॥३॥

हे इंद्र जामयो ज्ञातिरूपाः संनिकृष्टा ये शत्रवः। उतापि चाजामयो दूरदेशे स्थिता ये शत्रवोऽर्वाचीनासोऽस्मदभिमुखा वनुषो हिंसंतो युयुज्रे उद्युक्ता भवंति एषामुभयविधानां शत्रूणां संबंधीनि शवांसि बलानि विथुरा विथुराणि हीनानि त्वं कुर्विति शेषः। तथा वृष्ण्यान्येषां वीर्याणि जहि। नाशय। किंच पराच उभयविधान् शत्रून्पराचः पराङ्मुखान् कृणुहि। कुरु ॥

॥ अथ चतुर्थी ॥

शूरो॑ वा॒ शूरं॑ वनते॒ शरी॑रैस्तनू॒रुचा॒ तरु॑षि॒ यत्कृ॒ण्वैते॑ ।
तो॒के वा॒ गोषु॒ तन॑ये॒ यद॒प्सु वि क्रंद॑सी उ॒र्वरा॑सु॒ ब्रवै॑ते ॥४॥
शूरः॑ । वा॒ । शूरं॑ । व॒न॒ते॒ । शरी॑रैः । त॒नू॒ऽरुचा॑ । तरु॑षि । यत् । कृ॒ण्वैते॒ इति॑ ।
तो॒के । वा॒ । गोषु॑ । तन॑ये । यत् । अ॒प्ऽसु । वि । क्रंद॑सी॒ इति॑ । उ॒र्वरा॑सु । ब्रवै॑ते॒ इति॑ ॥४॥

हे इंद्र शूरस्त्वदनुगृहीतो वीरः शरीरैरंगैः शूरं वा वीरमपि वनते। हंति। वेत्ययमपीत्यस्यार्थे वर्तते। यद्वा वेत्यनेन विकल्पाभिधायकेनाशूरो वा त्वदनुगृहीतः सन् शूरं वनते। कदा वनत इत्येतदाह। तनूरुचा शरीरेण शोभमानौ परस्परविरोधिनौ तरुषि युद्धे यद्यदा कृण्वैते संग्रामं कुर्वाते। यद्यदा च तोके वा पुत्रनिमित्ते वा गोषु निमित्तभूतासु वा तनये पौत्रे निमित्तभूते वाप्सूदकेषु

निमित्तेषु वोर्वरासु सर्वसस्याढ्यासु भूमिषु निमित्तासु क्रंदसी क्रंदमानावाक्रोशंतौ विब्रवैते विवदेते। हे इंद्र पुत्रादिलाभजयस्त्वदनुगृहीतस्य भवतीत्यर्थः ॥

॥ अथ पंचमी ॥

नहि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध।
इंद्र नकिष्ट्वा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि ॥ ५॥

नहि। त्वा। शूरः। न। तुरः। न। धृष्णुः। न। त्वा। योधः। मन्यमानः। युयोध।
इंद्र। नकिः। त्वा। प्रति। अस्ति। एषां। विश्वा। जातानि। अभि। असि। तानि ॥ ५॥

हे इंद्र त्वा त्वया सह शूरो विक्रांतजनो नहि युयोध। न युध्यते। तथा तुरोऽन्येषां शत्रूणां हिंसकोऽतस्त्वया न युयोध। धृष्णुर्धर्षको न युयोध। मन्यमानो युद्धे क्रुध्यन् योधो भटस्त्वा त्वया न युयोध। हे इंद्र एषां शूरादीनां मध्ये कश्चन त्वा तव नकिः प्रत्यस्ति। प्रतिनिधिर्नास्ति। विश्वा विश्वानि जातानि प्रादुर्भूतानि तानि शूरादीनि त्वमभ्यसि। अभिभवसि ॥

॥ इति चतुर्थस्य षष्ठ एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

स पत्यत उभयोर्नृम्णमयोर्यदी वेधसः समिथे हवंते।
वृत्रे वा महो नृवति क्षये वा व्यचस्वंता यदि वितंतसैते ॥ ६॥

सः। पत्यते। उभयोः। नृम्णं। अयोः। यदि। वेधसः। संऽइथे। हवंते।
वृत्रे। वा। महः। नृऽवति। क्षये। वा। व्यचस्वंता। यदि। वितंतसैते इति ॥ ६॥

अयोरनयोरुभयोर्मध्ये स जनो नृम्णं धनं पत्यते। ईष्टे। कयोर्मध्ये क ईष्ट इत्येतदुभयमाह। यदि यस्य जनस्य। यदीति निपातो यस्यार्थे वर्तते। समिथे यज्ञे वेधसः कर्मणां विधातार ऋत्विजो हवंते इंद्रं स्तुवंति स ईष्ट इति संबंधः। महो महति प्रभूते वृत्रे वा निरोधे निमित्ते वा नृवति परिचारकमनुष्ययुक्ते क्षये वा गृहनिमित्ते वा व्यचस्वंतौ यदि यौ जनौ। यदीति यावित्यर्थे वर्तते। वितंतसैते वियुध्येते तयोर्मध्य इति संबंधः ॥ तसेरुपक्षयकर्मणो विपूर्वाद्वितंतसैते इति भवति। यद्वा तंतस इति धातुः कंड्वादिषु पठ्यते तस्मादिदं रूपमिति ॥

॥ अथ सप्तमी ॥

अध स्मा ते चर्षणयो यदेजानिंद्र त्रातोत भवा वरूता ।
अस्माकासो ये नृतमासो अर्य इंद्र सूरयो दधिरे पुरो नः ॥७॥
अध । स्म । ते । चर्षणयः । यत् । एजान् । इंद्र । त्राता । उत । भव । वरूता ।
अस्माकासः । ये । नृऽतमासः । अर्यः । इंद्र । सूरयः । दधिरे । पुरः । नः ॥७॥

अध स्मापि च हे इंद्र ते त्वदीयाश्चर्षणयः पुरुषा यद्यदेजान् एजेयुर्भीत्या कंपेयुः त्वं तेषां त्राता पालको भव । उतापि च वरूता संभक्ता भव । अस्माकासोऽस्मदीया नृतमासो नेतृतमा ये मनुष्या हे इंद्र त्वामर्योऽरयो । प्रापयितार इत्यर्थः । तेषां त्राता भव । हे इंद्र सूरयो ये स्तोतारो नोऽस्मान्पुरोदधिरे पुरश्चक्रिरे तेषां च त्राता भवेति ॥

साकमेधेषु माहेंद्र्यामिष्टाविंद्रस्य वृत्रघ्नो याज्या । सूत्रितं च । अनु ते दायि मह इंद्रियाय विश्वकर्मन्हविषा वावृधानः । आ॰ २.१८. । इति ॥ अनुत्रीनाम्न्येकाहे निष्केवल्य एषैव सूक्तमुखीया । सूत्रितं च । अनु ते दायि मह इंद्रियाय कथो नु ते परि चराणि विद्वानिति द्वे । आ॰ ९.५. । इति ॥

॥ सैषा सूक्तेऽष्टमी ॥

अनु ते दायि मह इंद्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।
अनु क्षत्रमनु सहो यजत्रेंद्र देवेभिरनु ते नृषह्ये ॥८॥
अनु । ते । दायि । महे । इंद्रियाय । सत्रा । ते । विश्वं । अनु । वृत्रऽहत्ये ।
अनु । क्षत्रं । अनु । सहः । यजत्र । इंद्र । देवेभिः । अनु । ते । नृऽसह्ये ॥८॥

हे इंद्र महे महते ते तुभ्यमिंद्रियायैश्वर्यार्थमनुदायि । अन्वदायि । अनुदीयते स्म । वृत्रहत्ये वृत्रवधे निमित्ते ते तुभ्यं विश्वं समस्तं सत्रा सत्यमनुदायि । कैः किमनुदायीति तदुभयमाह । येन विश्वं बिभर्ति तत्क्षत्रं बलमनुदायि । येन शत्रूनभिभवति तद्गुणविशिष्टं महो बलमनुदायि । हे यजत्र यजनीयेंद्र ते तुभ्यं नृषह्ये युद्धे देवेभिः सर्वैर्देवैरेतत्सर्वमनुदायि ॥

॥ अथ नवमी ॥

एवा नः स्पृधः समजा समत्स्विंद्र रारंधि मिथतीरदेवीः ।
विद्याम वस्तोरवसा गृणंतो भरद्वाजा उत त इंद्र नूनं ॥ ९ ॥

एव । नः । स्पृधः । सं । अज । समत्ऽसु । इंद्र । ररंधि । मिथतीः । अदेवीः ।
विद्याम । वस्तोः । अवसा । गृणंतः । भरत्ऽवाजाः । उत । ते । इंद्र । नूनं ॥ ९ ॥

हे इंद्र एवैवं स्तुतस्त्वं नोऽस्मदीयाः स्पृधः शत्रुसेनाः समत्सु संग्रामेषु समज । शत्रुवधार्थं प्रेरय । किंच मिथतीर्हिंसतीरदेवीरासुरीः सेना ररंधि । अस्मदर्थं वशीकुरु । उतापि च हे इंद्र ते गृणंतस्त्वां स्तुवंतो भरद्वाजा वयमवसान्नेन सह वस्तोर्वासस्य । निवासमित्यर्थः । नूनमवश्यं विद्याम । लभेमहि ॥

॥ इति चतुर्थस्य षष्ठे विंशो वर्गः ॥

श्रुधी न इंद्रेत्यष्टर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं । तथा चानुक्रम्यते । श्रुधी नोऽष्टाविति । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

श्रुधी न इंद्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः ।
सं यद्विशोऽयंत शूरसाता उग्रं नोऽवः पार्ये अहन्दाः ॥ १ ॥

श्रुधि । नः । इंद्र । ह्वयामसि । त्वा । महः । वाजस्य । सातौ । ववृषाणाः ।
सं । यत् । विशः । अयंत । शूरऽसातौ । उग्रं । नः । अवः । पार्ये । अहन् । दाः ॥ १ ॥

हे इंद्र ववृषाणाः सोमैस्त्वां सिंचंतो वयं स्तोतारो महो महतो वाजस्यान्नस्य सातौ लाभार्थं त्वा त्वां ह्वयामसि । आह्वयामः । हे इंद्र त्वं नोऽस्माकं तदाह्वानं श्रुधि । शृणु । यद्यदा विशो जनाः शूरसाता शूरसातौ युद्धे समयंत संगच्छंते तदा पार्येऽतिमेऽहन्नहनि दिवसे नोऽस्मभ्यमुग्रमूर्जूर्णमवो रक्षणं दाः । अदाः । प्रयच्छ ॥

॥ अथ द्वितीया ॥

त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ ।
त्वां वृत्रेष्विंद्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन् ॥ २ ॥

त्वां । वाजी । हवते । वाजिनेयः । महः । वाजस्य । गध्यस्य । सातौ ।

त्वां । वृत्रेषु । इंद्र । सत्ऽपतिं । तरुत्रं । त्वां । चष्टे । मुष्टिऽहा । गोषु । युध्यन् ॥ २ ॥

वाजी हविर्लक्षणान्नवान्वाजिनेयो वाजिन्याः पुत्रो भरद्वाजो हे इंद्र त्वां गध्यस्य सर्वैः प्राप्यस्य महो महतो वाजस्यान्नस्य सातौ लाभे निमित्ते हवते। स्तौति। अपि च हे इंद्र सत्पतिं सज्जनानां पालकं तरुत्रं दुर्जनानां तारकं त्वां वृत्रेषूपद्रवेषु निमित्तेषु भरद्वाजो हवते। मुष्टिहा मुष्टिबलेन शत्रूणां हंता गोषु निमित्तभूतासु युध्यन् शत्रुभिः सह युद्धं कुर्वन् भरद्वाजस्त्वां चष्टे। पश्यति। प्रतिभालयते ॥

॥ अथ तृतीया ॥

त्वं कविं चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् ।

त्वं शिरो अमर्मणः पराहन्नतिथिग्वाय शंस्यं करिष्यन् ॥ ३ ॥

त्वं । कविं । चोदयः । अर्कऽसातौ । त्वं । कुत्साय । शुष्णं । दाशुषे । वर्क्

त्वं । शिरः । अमर्मणः । परा । अहन् । अतिथिऽग्वाय । शंस्यं । करिष्यन् ॥

हे इंद्र त्वमर्कसातावन्नलाभार्थं कविं भार्गवमृषिं चोदयः। अचोदयः। प्रेरय। किंच हे इंद्र त्वं दाशुषे हविर्दत्तवते कुत्साय शुष्णमसुरं वर्क्। छेदितवानसि ॥ वर्गिति वृणक्तेश्छेदनार्थस्य लुङि रूपं ॥ तथा त्वमतिथिग्वायातिथीनामभिगंत्रे दिवोदासाय शंस्यं स्तुत्यं सुखं करिष्यन् अमर्मणो मर्महीनमात्मानं मन्यमानस्य शंबरस्य शिरः शीर्षं पराहन्। अवधीः ॥

॥ अथ चतुर्थी ॥

त्वं रथं प्र भरो योधमृष्वमावो युध्यंतं वृषभं दशद्युं ।

त्वं तुग्रं वेतसवे सचाहन्त्वं तुजिं गृणंतमिंद्र तूतोः ॥ ४ ॥

त्वं । रथं । प्र । भरः । योधं । ऋष्वं । आवः । युध्यंतं । वृषभं । दशऽद्युं ।

त्वं । तुग्रं । वेतसवे । सचा । अहन् । त्वं । तुजिं । गृणंतं । इंद्र । तूतोरिति तूतोः ॥ ४ ॥

हे इंद्र त्वं वृषभसंज्ञकाय राज्ञे योधं युद्धसाधनमृष्वं महांतं रथं प्रभरः। प्रापयः। अपि च युध्यंतं शत्रुभिः सह युद्धं कुर्वंतं दशद्युं दश दिवसा युध्यतो यस्य गतास्तं वृषभमेतदाख्यं राजानमावः। युद्धादपीपलः। किंच त्वं वेतसव एतन्नाम्ने राज्ञे

सचा सहायभूतः सन् तुग्रमसुरमहन्। हतवानसि। वेतसुर्नाम कश्चिदसुरः। अत्र तस्मादन्योऽसावुच्यते। यद्वा वेतसव इति तृतीयार्थे चतुर्थी। वेतसुनासुरेण सहितं तुग्रं हतवानसि। तथा च मंत्रांतरे श्रूयते। अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रंधयं। ऋग्वे० १०.४९.४.। इति। हे इंद्र त्वं गृणंतं त्वां स्तुवंतं तुजिमेतदाख्यं राजानं तूतोः। अवर्धयः॥

॥ अथ पंचमी ॥

त्वं तदुक्थमिंद्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि।
अव गिरेर्दासं शंबरं हन्प्रावो दिवोदासं चित्राभिरूती ॥५॥

त्वं। तत्। उक्थं। इंद्र। बर्हणा। करिति कः। प्र। यत्। शता। सहस्रा। शूर। दर्षि।
अव। गिरेः। दासं। शंबरं। हन्। प्र। आवः। दिवःऽदासं। चित्राभिः। ऊती ॥५॥

हे इंद्र बर्हणा बर्हणः शत्रूणां हिंसकस्त्वमुक्थं प्रशस्यं तत्कर्म कः। अकरोः। किं तत्कर्मेत्युच्यते। हे शूर वीरेंद्र त्वं शता शतानि सहस्रा सहस्राणि च शंबरस्यानुचरान् भटान्प्रदर्षि। विदारितवानसि। तथा च निगमांतरे। अध्वर्यवो यः शतं शंबरस्य। ऋग्वे० २.१४.६.। इति। तथा त्वं दासं यज्ञादिकर्मणामुपक्षपयितारं गिरेः पर्वतान्निर्गतं शंबरमसुरमवहन्। अवावधीः। तथापि श्रूयते। यः शंबरं पर्वतेषु क्षियंतं। ऋग्वे० २.१२.११.। इति। किंच चित्राभिर्विचित्राभिरूती ऊतिभी रक्षाभिर्दिवोदासं राजानं प्रावः। प्रकर्षेण पालयसि स्म॥

॥ इति चतुर्थस्य षष्ठ एकविंशो वर्गः॥

॥ अथ षष्ठी ॥

त्वं श्रद्धाभिर्मंदसानः सोमैर्दभीतये चुमुरिमिंद्र सिष्वप्।
त्वं रजिं पिठीनसे दशस्यन्षष्टिं सहस्रा शच्या सचाहन् ॥६॥

त्वं। श्रद्धाभिः। मंदसानः। सोमैः। दभीतये। चुमुरिं। इंद्र। सिस्वप्।
त्वं। रजिं। पिठीनसे। दशस्यन्। षष्टिं। सहस्रा। शच्या। सचा। अहन् ॥६॥

हे इंद्र श्रद्धाभिः श्रद्धापुरःसरमादरातिशयेनानुष्ठितैः कर्मभिर्मंदसानो मोदमानः। यच्छ्रद्धया युक्तं कर्म तत्सारवद्भवति। तथा च श्रूयते। यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति। छा० उ० १.१.१०.। इति।

सोमैश्च मंदसानस्त्वं दभीतय एतन्नामकाय राजर्षये चुमुरिमेतदाख्यमसुरं सिष्वप्। अस्वापयः। अवधीरित्यर्थः। किंच हे इंद्र त्वं पिठीनस एतन्नामकाय रजिमेतदाख्यां कन्यां वा राज्यं वा दशस्यन् प्रयच्छन् शच्या प्रज्ञया षष्टिं षष्टिसंख्याकानि सहस्रा भटानां सहस्राणि सचा सह युगपदेवाहन्। अवधीः ॥

॥ अथ सप्तमी ॥

अहं चन तत्सूरिभिरानश्यां तव ज्याय इंद्र सुम्नमोजः ।
त्वया यत्स्तवंते सधवीर वीरास्त्रिवरूथेन नहुषा शविष्ठ ॥ ७ ॥

अहं । चन । तत् । सूरिऽभिः । आनश्यां । तव । ज्यायः । इंद्र । सुम्नं । ओजः ।
त्वया । यत् । स्तवंते । सधऽवीर । वीराः । त्रिऽवरूथेन । नहुषा । शविष्ठ ॥ ७ ॥

हे सधवीर वीरैः सहित शविष्ठ बलवत्तमेंद्र वीराः स्तोतारस्त्रिवरूथेन। त्रीणि वरूथान्यावरकाणि भुवनानि यस्य तेन । नहुषा शत्रूणां बंधकेन त्वया दत्तं यत्सुम्नं सुखमोजो बलं च स्तवंते स्तुवंति हे इंद्र तव त्वया दत्तं ज्यायोऽतिशयेन प्रशस्यं तत्सुम्नमोजोऽहं चनाहमपि भरद्वाजो सूरिभिर्मदीयैः स्तोतृभिः सहानश्यां। प्राप्नुयां ॥

॥ अथाष्टमी ॥

वयं ते अस्यामिंद्र द्युम्नहूतौ सखायः स्याम महिन प्रेष्ठाः ।
प्रातर्दनिः क्षत्रश्रीरस्तु श्रेष्ठो घने वृत्राणां सनये धनानां ॥ ८ ॥

वयं । ते । अस्यां । इंद्र । द्युम्नऽहूतौ । सखायः । स्याम । महिन । प्रेष्ठाः ।
प्रातर्दनिः । क्षत्रऽश्रीः । अस्तु । श्रेष्ठः । घने । वृत्राणां । सनये । धनानां ॥ ८ ॥

हे महिन पूजनीयेंद्र ते त्वदर्थं सखायः स्तोतारो वयमस्यां द्युम्नहूतावस्मिन्धननिमित्ते स्तोत्रे प्रेष्ठा अतिशयेन प्रियाः स्याम। भवेम। प्रातर्दनिः। प्रतर्दनो नाम राजा। तस्य पुत्रः क्षत्रश्रीरेतन्नामको मम याज्यो राजा श्रेष्ठोऽस्तु। सर्वेषामुत्कृष्टो भवतु। किमर्थं। वृत्राणां शत्रूणां घने वधाय च धनानां वसूनां सनये संभजनाय च श्रेष्ठोऽस्त्विति संबंधः ॥

॥ इति चतुर्थस्य षष्ठे द्वाविंशो वर्गः ॥

किमस्य मद इत्यष्टर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं। अनुक्रांतं च। किमस्यांत्या

चायमानस्याभ्यावर्तिनो दानस्तुतिः। भरद्वाज ऋषिः। त्रिष्टुप् छंदः। अंत्यायास्तु दानस्तुतिरूपत्वाद्या तेनोच्यत इति न्यायेन दानमेव देवता ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

किमस्य मदे किम्वस्य पीताविंद्रः किमस्य सख्ये चकार।
रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किमु नूतनासः ॥१॥

किं। अस्य। मदे। किं। ऊं इति। अस्य। पीतौ। इंद्रः। किं। अस्य। सख्ये। चकार।
रणाः। वा। ये। निऽसदि। किं। ते। अस्य। पुरा। विविद्रे। किं। ऊं इति। नूतनासः ॥१॥

भरद्वाज ऋषिः फलविलंबनासहिष्णुः सन् अनयेंद्रमाक्षिपति। अस्य सोमस्य मदे सतींद्रः किं चकार। कृतवान्। किमु किंचास्य सोमस्य पीतौ पाने सति किं चकार। अस्य सोमस्य सख्ये सखित्वे किं चकार। पानात्पूर्वमिंद्रः सोमेन सह वसतीत्यर्थः। अस्य सोमस्य निषदि गृहे रणा वा ये स्तोतारश्च संति ते स्तोतारः पुरा पूर्वं हे इंद्र ते त्वत्तः किं विविद्रे। किं लेभिरे। नूतनासो नूतना इदानींतनाः स्तोतारश्च किमु लेभिरे ॥

॥ अथ द्वितीया ॥

सदस्य मदे सद्वस्य पीताविंद्रः सदस्य सख्ये चकार।
रणा वा ये निषदि सत्ते अस्य पुरा विविद्रे सदु नूतनासः ॥२॥

सत्। अस्य। मदे। सत्। ऊं इति। अस्य। पीतौ। इंद्रः। सत्। अस्य। सख्ये। चकार।
रणाः। वा। ये। निऽसदि। सत्। ते। अस्य। पुरा। विविद्रे। सत्। ऊं इति। नूतनासः ॥२॥

एवमाक्षिप्त इंद्रस्तस्मा ऋषय ईप्सितं धनं प्रददौ। तदनंतरमृषिरिंद्रसकाशात्संपूर्णकामः सन् पुरा यान्युपालंभप्रतिपादकानि वाक्यान्युवोचेदानीं तानि निराकरोति। इंद्रोऽस्य सोमस्य मदे सत् शुभं कर्म चकार। अस्य सोमस्य पीतौ पाने सत् शुभं कर्म चकार। अस्य सख्ये सत् शुभं चकार। ये रणा वा स्तोतारश्च ते निषदि गृहे। यज्ञगृह इत्यर्थः। पुरा पूर्वं हे इंद्र ते त्वत्तः सत् शुभं कर्म विविद्रे। लेभिरे। नूतनास इदानींतनाः स्तोतारः सदु शुभमेव कर्म लेभिरे ॥

॥ अथ तृतीया ॥

नहि नु ते महिमनः समस्य न मघवन्मघवत्त्वस्य विद्म ।
न राधसोराधसो नूतनस्येंद्र नकिर्ददृश इंद्रियं ते ॥ ३ ॥
नहि । नु । ते । महिमनः । समस्य । न । मघऽवन् । मघवत्ऽत्वस्य । विद्म ।
न । राधसःऽराधसः । नूतनस्य । इंद्र । नकिः । ददृशे । इंद्रियं । ते ॥ ३ ॥

हे मघवन्धनवन्निंद्र ते त्वदीयस्य समस्य समस्तस्य महिमनो महिम्नो महिमानं नहि विद्म। वयं न जानीमः ॥ नुशब्दः पूरणः ॥ तथा मघवत्त्वस्य त्वदीयस्य धनिकत्वस्य च वयं न जानीमः । नूतनस्य स्तुत्यस्य राधसो राधसस्त्वदीयं सर्वं धनं च न जानीमः ॥ सर्वत्र द्वितीयार्थे षष्ठी ॥ हे इंद्र ते त्वदीयमिंद्रियं सामर्थ्यं नकिर्ददृशे । केनापि न दृश्यते ॥

॥ अथ चतुर्थी ॥

एतत्त्यत्त इंद्रियमचेति येनावधीर्वरशिखस्य शेषः ।
वज्रस्य यत्ते निहतस्य शुष्मात्स्वनाच्चिदिंद्र परमो ददार ॥ ४ ॥
एतत् । त्यत् । ते । इंद्रियं । अचेति । येन । अवधीः । वरऽशिखस्य । शेषः ।
वज्रस्य । यत् । ते । निऽहतस्य । शुष्मात् । स्वनात् । चित् । इंद्र । परमः । ददार ॥ ४ ॥

हे इंद्र येन वीर्येण वरशिखस्य । वरशिखो नाम कश्चिदसुरः । शेषः शेषांसि पुत्रान् । शेष इत्यपत्यनामैतत् । अवधीः अहिंसीः ते त्वदीयमेतत्त्यत्तत्तदिदमिंद्रियं वीर्यमचेति । अस्माभिरज्ञायि । हे इंद्र यद्यस्माच्छुष्माद्बलान्निहतस्य प्रेरितस्य त्वदीयवज्रस्य स्वनाच्चित् ध्वनेरेव परमो वरशिखस्य पुत्राणां मध्ये बलाद्याधिक्येनोत्कृष्टः कश्चित्पुत्रो ददार अदीर्यत ॥

॥ अथ पंचमी ॥

वधीदिंद्रो वरशिखस्य शेषोऽभ्यावर्तिने चायमानाय शिक्षन् ।
वृचीवंतो यद्धरियूपीयायां हन्पूर्वे अर्धे भियसापरो दर्त् ॥ ५ ॥
वधीत् । इंद्रः । वरऽशिखस्य । शेषः । अभिऽआवर्तिने । चायमानाय । शिक्षन् ।
वृचीवतः । यत् । हरिऽयूपीयायां । हन् । पूर्वे । अर्धे । भियसा । अपरः । दर्त् ॥ ५ ॥

पूर्वोक्तमेवार्थमनया विवृणोति । अयमिंद्रश्चायमानाय चयमानस्य राज्ञः पुत्रायाभ्यावर्तिन एतन्नामकाय राज्ञे शिक्षन् ईप्सितानि वसूनि प्रयच्छन् वरशिखस्यासुरस्य शेषः पुत्रान्वधीत् । अवधीत् । अहिंसीत् । वरशिखस्य पुत्रान् कथमवधीदित्युच्यते । यद्यदायमिंद्रो हरियूपीयायां । हरियूपीया नाम काचिन्नदी काचिन्नगरी वा । तस्यां पूर्वेऽर्द्धे प्राग्भागे स्थितान् वृचीवतः । वृचीवान् नाम वरशिखस्य कुलोत्पन्नः पूर्वः । तद्गोत्रजान्वरशिखस्य पुत्रान् हन् अवधीत् तदापरोऽपरभागे स्थितो वरशिखस्य श्रेष्ठः पुत्रो भियसा भीत्या दर्त् । दीर्णोऽभूत् ॥

॥ इति चतुर्थस्य षष्ठे त्रयोविंशो वर्गः ॥

॥ अथ षष्ठी ॥

त्रिंशच्छतं वर्मिण इंद्र साकं यव्यावत्यां पुरुहूत श्रवस्या ।
वृचीवंतः शरवे पत्यमानाः पात्रा भिंदाना न्यर्थान्यायन् ॥ ६ ॥
त्रिंशत्ऽशतं । वर्मिणः । इंद्र । साकं । यव्याऽवत्यां । पुरुऽहूत । श्रवस्या ।
वृचीवंतः । शरवे । पत्यमानाः । पात्रा । भिंदानाः । निऽअर्थानि । आयन् ॥ ६ ॥

इदानीमुक्तमेवार्थं विवृणोति । हे पुरुहूत बहुभिराहूतेंद्र श्रवस्या श्रवस्यया । श्रवोऽन्नं यशो वा । तद्वांछया युद्धे त्वां जित्वान्नं प्राप्नुयाम यशो वा प्राप्नुयामेति कामयमानाः शरवे हिंसायै । त्वां हिंसितुमित्यर्थः । पत्यमाना अभिपतंतोऽभिगच्छंतः पात्रा पात्राणि यज्ञसाधनानि भिंदाना भिंदंतो वर्मिणः कवचभृतस्त्रिंशच्छतं त्रिंशदधिकशतसंख्याका वृचीवंतो वरशिखस्य पुत्राः साकं युगपदेव यव्यावत्यां पूर्वोक्तायां हरियूपीयायां न्यर्थान्यर्थशून्यान्यायन् । अगच्छन् । विनाशं प्रापुरित्यर्थः ॥

॥ अथ सप्तमी ॥

यस्य गावावरुषा सूयवस्यू अंतरू षु चरतो रेरिहाणा ।
स सृंजयाय तुर्वशं परादाद्वृचीवतो दैववाताय शिक्षन् ॥ ७ ॥
यस्य । गावौ । अरुषा । सुयवस्यू इति सुऽयवस्यू । अंतः । ऊं इति । सु । चरतः । रेरिहाणा ।
स । सृंजयाय । तुर्वशं । परा । अदात् । वृचीवतः । दैवऽवाताय । शिक्षन् ॥ ७ ॥

अरुषारुषौ रोचमानौ सुयवस्यू शोभनतृणानीच्छंतौ रेरिहाणा लेलिहानौ पुनः पुनर्घासमास्वादयंतौ । यद्वा गतिविशेषं कुर्वंतौ । यस्येंद्रस्य संबंधिनौ गा-

वावश्वावंतद्यावापृथिव्योर्मध्येऽंतरिक्षे चरतो गच्छतः ॥ उ सु इतीमौ पूरणौ ॥ स इंद्रः सृंजयायैतन्नामकाय राज्ञे तुर्वशं राजानं परादात् । प्रददौ । किं कुर्वन् । वृचीवतो वारशिखान् दैववाताय देववातवंशोत्पन्नायाभ्यावर्तिने राज्ञे शिक्षन् वशीकुर्वन् । तेषां धनानि प्रयच्छन्निति वा ॥

॥ अथाष्टमी ॥

द्वयाँ अग्ने रथिनो विंशतिं गा वधूमंतो मघवा मह्यं संराट् ।
अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानां ॥ ८ ॥

द्वयान् । अग्ने । रथिनः । विंशतिं । गाः । वधूऽमंतः । मघऽवा । मह्यं । संऽराट् ।
अभिऽआवर्ती । चायमानः । ददाति । दुःऽनशा । इयं । दक्षिणा । पार्थवानां ॥ ८ ॥

अधुना भरद्वाजः स्वस्मा अभ्यावर्तिना दत्तं धनजातमग्नये प्रकथयति । हे अग्ने मघवा धनवान् प्रभूतदानो वा सम्राट् राजसूययाजी चायमानश्चयमानस्य पुत्रोऽभ्यावर्त्येतदाह्वयो राजा रथिनो रथसहितान्वधूमतः स्त्रीयुक्तान् द्वयान्मिथुनभूतान् विंशतिं विंशतिसंख्याकान् गाः पशून्मह्यं ददाति । प्रायच्छत् । पार्थवानां पृथोर्वंशजस्याभ्यावर्तिनो राज्ञः संबंधिनी ॥ पूजार्थं बहुवचनं ॥ इयं दक्षिणा दुर्नशा केनापि नाशयितुमशक्या भवति ॥

॥ इति चतुर्थस्य षष्ठे चतुर्विंशो वर्गः ॥

आ गाव इत्यष्टर्चं पंचमं सूक्तं । अत्रेयमनुक्रमणिका । आ गावो गव्यं द्वितीयैंद्री वांत्यश्च पादोऽंत्यानुष्टुप् जागतस्तृचो द्वितीयादिरिति । भरद्वाज ऋषिः । इंद्रो यज्वन इत्याद्यस्तृचो जागतः । उपेदमित्यंत्यानुष्टुप् शिष्टाश्चतस्रस्त्रिष्टुभः । कृत्स्नस्य गौर्देवता द्वितीयायाः सूक्तांत्यपादस्य च विकल्पेनेंद्रो देवता ॥ गवामुपस्थान एतत्सूक्तं । सूचितं च । आगावीयमेक इति ॥

॥ तत्र प्रथमा ॥

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदंतु गोष्ठे रणयंत्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिंद्राय पूर्वीरुषसो दुहानाः ॥ १ ॥

आ । गावः । अग्मन् । उत । भद्रं । अक्रन् । सीदंतु । गोऽस्थे । रणयंतु । अस्मे इति ।
प्रजाऽवंतीः । पुरुऽरूपाः । इह । स्युः । इंद्राय । पूर्वीः । उषसः । दुहानाः ॥ १ ॥

गाव आग्मन्। अस्मदीयं गृहमागच्छंतु। उतापि च भद्रं भजनीयं शुभमक्रन्। कुर्वंतु। तथा गोष्ठेऽस्मदीये गवां स्थाने सीदंतु। उपविशंतु। तदनंतरमस्मे अस्मासु रणयंतु। रमंतां। अपि चेहास्मिन् गोष्ठे पुरुरूपा नानावर्णा गावः प्रजावतीः प्रजावत्यः संततिसहिताः पूर्वीर्बह्व्य इंद्रायेंद्रार्थमुषस उषःकालान् प्रति दुहाना दोहमानाः स्युः। भवेयुः॥

॥ अथ द्वितीया ॥

इंद्रो यज्वने पृणते च शिक्षत्युपेद्ददाति न स्वं मुषायति।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुं ॥२॥

इंद्रः। यज्वने। पृणते। च। शिक्षति। उप। इत्। ददाति। न। स्वं। मुषायति।
भूयःऽभूयः। रयिं। इत्। अस्य। वर्धयन्। अभिन्ने। खिल्ये। नि। दधाति। देवऽयुं॥२॥

इंद्रो यज्वने यजनशीलाय पृणते च स्तुतिभिः प्रीणयित्रे च स्तोत्रे शिक्षति। अपेक्षितं धनं ददाति। न केवलं सकृदेव दानमपि तु सर्वदेत्याह। उपेद्ददाति। उपेत्य सर्वदा ददात्येव। यज्वनः स्तोतुश्च स्वं स्वभूतं धनं न मुषायति। कदाचिदपि नापहरति। अपि चास्योभयविधस्य रयिं धनमात्मना दत्तं भूयो भूयः पुनः पुनर्वर्धयन्नित् वृद्धिं प्रापयन्नेव देवयुं देवमिंद्रमात्मन इच्छंतं तं जनमभिन्ने शत्रुभिरभेद्ये खिल्ये। खिलमप्रतिहतं स्थानं। तदेव खिल्यं। स्वार्थिको यत्॥ अन्यैर्गंतुमशक्ये स्थले निदधाति। निक्षिपति। निवासयतीत्यर्थः॥

देवीनां हविःषु न ता नशंति न ता अर्वेति गोदेवताया याज्यापुरोनुवाक्ये। आ० ६.१४.॥ गोस्तोमेऽपि मरुत्वतीयनिष्केवल्ययोरेते सूक्तमुखीये। सूत्रितं च। न ता अर्वा रेणुककाटो अश्नुते न ता नशंति न दभाति तस्करः। आ० ९.५.। इति॥

॥ तत्र तामेतां सूक्ते तृतीयामाह ॥

न ता नशंति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति।
देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह ॥३॥

न। ताः। नशंति। न। दभाति। तस्करः। न। आसां। आमित्रः। व्यथिः। आ। दधर्षति।
देवान्। च। याभिः। यजते। ददाति। च। ज्योक्। इत्। ताभिः। सचते। गोऽपतिः। सह॥३॥

ता गावो न नशंति। अस्मत्सकाशान्न नश्यंतु। किंच तस्करश्चोरोऽपि न

दभाति । अस्मदीया गा न हिंस्यात् । तथामित्रोऽमित्रस्य शत्रोः संबंधि व्यथिः शस्त्रमासामिमा गा नादधर्षति । नाक्रमतु । गोपतिरेवंभूतानां गवां स्वामी यजमानो याभिर्गोभिर्देवांश्चेंद्रादीनुद्दिश्य यजते यजनं करोति । यो गा इंद्रार्थं ददाति च प्रयच्छति च ताभिस्तादृशीभिर्गोभिः सह ज्योगित् चिरकालमेव सचते । संगच्छतां ॥

॥ अथ चतुर्थी ॥

न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यंति ता अभि ।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरंति यज्वनः ॥४॥

न । ताः । अर्वा । रेणुऽककाटः । अश्नुते । न । संस्कृतऽत्रं । उप । यंति । ताः । अभि ।
उरुऽगायं । अभयं । तस्य । ताः । अनु । गावः । मर्तस्य । वि । चरंति । यज्वनः ॥४॥

रेणुककाटो रेणोः पार्थिवस्य रजस उद्भेदकः ॥ कटिर्भेदनकर्मा ॥ अर्वा युद्धार्थमागतोऽश्वो ता गा नाश्नुते । न प्राप्नुयात् । तथा ता गावः संस्कृतत्रं विशसनादिसंस्कारं नाभ्युपयंति । नाभिगच्छंतु । अपि च ता गावो यज्वनो यागशीलस्य तस्य मर्तस्य मनुष्यस्योरुगायं विस्तीर्णगमनमभयं भयवर्जितं प्रदेशमनूद्दिश्य वि चरंति । विशेषेण गच्छंतु ॥

॥ अथ पंचमी ॥

गावो भगो गाव इंद्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इंद्र इच्छामीद्धृदा मनसा चिदिंद्रं ॥५॥

गावः । भगः । गावः । इंद्रः । मे । अच्छान् । गावः । सोमस्य । प्रथमस्य । भक्षः ।
इमाः । याः । गावः । सः । जनासः । इंद्रः । इच्छामि । इत् । हृदा । मनसा । चित् । इंद्रं ॥५॥

गाव एव मह्यं भगो धनं भवंतु । इंद्रश्च मे मह्यं गावो गा अच्छान् । यच्छतु । गावः प्रथमस्य हविषां श्रेष्ठस्य सोमस्य भक्षो भक्षणं भवंतु । अभिषुतस्य हि सोमस्य गव्येनाज्यादिना संश्रयणत्वात् । हे जनासो जना इमा एवंभूता या गावः संति सः । ता इत्यर्थः । ता एव गाव इंद्रो भवंति । दधिघृतादिरूपेणेंद्रस्याप्यायनत्वात् । एवंभूतमिंद्रं हृदा श्रद्धायुक्तेन मनसा चित् ॥ चिदित्यप्यर्थे ॥ इच्छामीत् । कामय एव । साधनभूताभिर्गोभिरेवंभूतमिंद्रं यष्टुमिच्छामीत्यर्थः ॥

॥ अथ षष्ठी ॥

यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकं।
भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ॥ ६॥
यूयं। गावः। मेदयथ। कृशं। चित्। अश्रीरं। चित्। कृणुथ। सुऽप्रतीकं।
भद्रं। गृहं। कृणुथ। भद्रऽवाचः। बृहत्। वः। वयः। उच्यते। सभासु ॥ ६॥

हे गावो यूयं मेदयथ। आप्यायनं कुरुथेत्यर्थः। तथा कृशं चित् क्षीणमप्यश्रीरं चिदमंगलमपि सुप्रतीकं शोभनांगं कृणुथ। कुरुथ। हे भद्रवाचः कल्याणध्वन्युपेता गावोऽस्मदीयं गृहं भद्रं कल्याणं कृणुथ। गोभिरुपेतं कुरुथ। सभासु यागपरिषत्सु हे गावो युष्माकं बृहन्महद्वयोऽन्नमुच्यते। सर्वैर्दीयत इत्यर्थः ॥

॥ अथ सप्तमी ॥

प्रजावतीः सूयवसं रिशंतीः शुद्धा अपः सुप्रपाणे पिबंतीः।
मा वः स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः ॥ ७॥
प्रजाऽवतीः। सुऽयवसं। रिशंतीः। शुद्धाः। अपः। सुऽप्रपाने। पिबंतीः।
मा। वः। स्तेनः। ईशत। मा। अघऽशंसः। परि। वः। हेतिः। रुद्रस्य। वृज्याः ॥ ७॥

हे गावो यूयं प्रजावतीः प्रजावत्यो वत्साभिर्युक्ता भवतेति शेषः। सुयवसं शोभनतृणं रिशंती रिशंत्यो भक्षणार्थं हिंसंत्यो भवत। सुप्रपाणे सुखेन पातव्ये तटाकादौ शुद्धा निर्मला अप उदकानि पिबंतीः पिबंत्यश्च भवत। वो युष्मान् स्तेनस्तस्करो मेशत। मेशिष्ट। ईश्वरो मा भूत्। तथाप्यघशंसो व्याघ्रादिः शत्रुर्मेशत। अपि च वो युष्मान्रुद्रस्य कालात्मकस्य परमेश्वरस्य हेतिरायुधं च परिवृज्याः। परिवृणक्तु। परिहरतु ॥

॥ अथाष्टमी ॥

उपेदमुपपर्चनमासु गोषूप पृच्यतां।
उप ऋषभस्य रेतस्युपेंद्र तव वीर्ये ॥ ८॥
उप। इदं। उपऽपर्चनं। आसु। गोषु। उप। पृच्यतां।
उप। ऋषभस्य। रेतसि। उप। इंद्र। तव। वीर्ये ॥ ८॥

आसु गोषिदमुपपर्चनमाप्यायनमुपपृच्यतां । संपृच्यतां । हे इंद्र तव वीर्ये त्वदीयवीर्ये निमित्ते ऋषभस्य गवां गर्भमादधानस्य वृषभस्य रेतसीदमुपपर्चनमाप्यायनं। गोषु आप्यायितासु सतीषु तत्संबंधिक्षीरादिहविर्भिरेवेंद्र आप्यायितो भवतीत्यर्थः। उपेति पुनर्वचनं पादभेदानां पूरणार्थमिति ॥

॥ इति चतुर्थस्य षष्ठे पंचविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके षष्ठोऽध्यायः समाप्तः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ सप्तमोऽध्याय आरभ्यते। षष्ठस्य मंडलस्य तृतीयेऽनुवाके पंच सूक्तानि व्याकृतानि। इंद्रं व इति षडृचं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं। अनुक्रम्यते च। इंद्रं षडिति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

इंद्रं वो नरः सख्याय सेपुर्महो यंतः सुमतये चकानाः ।
महो हि दाता वज्रहस्तो अस्ति महामु रण्वमवसे यजध्वं ॥१॥

इंद्रं। वः। नरः। सख्याय। सेपुः। महः। यंतः। सुऽमतये। चकानाः।
महः। हि। दाता। वज्रऽहस्तः। अस्ति। महां। ऊं इति। रण्वं। अवसे। यजध्वं ॥१॥

हे यजमाना वो युष्माकं संबंधिनो नरो नेतार ऋत्विजः सख्याय सखिभावार्थमिंद्रं सेपुः। परिचरंति। स्पृशंति वा। कथंभूताः। महो महांति स्तोत्राणि यंत उपयंतः प्राप्नुवंतः। कुर्वंत इत्यर्थः। तथा सुमतये। सुमतिः शोभनानुग्र-

हात्मिका तदीया सुमतिः। तां चकानाः कामयमानाः ॥ क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञा। चकाना इति कामयतेश्छांदसं रूपं ॥ यद्वा महो महत्कर्म यंतोऽनुतिष्ठंतः सुमतये सुमतिं शोभनां स्तुतिं चकानाः शब्दयंतः ॥ कै गै शब्द इत्यस्माल्लिटः कानचि रूपं ॥ हि यस्माद्वज्रहस्तो वज्रपाणिरिंद्रो महो महतो धनस्य दातास्ति भवति तस्माद्रण्वं रमणीयं महां महांतं तमेवावसे रक्षणाय यजध्वं। हविर्भिः पूजयत ॥

॥ अथ द्वितीया ॥

आ यस्मिन्हस्ते नर्या मिमिक्षुरा रथे हिरण्यये रथेष्ठाः।
आ रश्मयो गभस्त्योः स्थूरयोराध्वन्नश्वासो वृषणो युजानाः ॥२॥

आ। यस्मिन्। हस्ते। नर्याः। मिमिक्षुः। आ। रथे। हिरण्यये। रथेऽस्थाः।
आ। रश्मयः। गभस्त्योः। स्थूरयोः। आ। अध्वन्। अश्वासः। वृषणः। युजानाः ॥२॥

यस्मिन्निंद्रे नर्या नृभ्यो हिता राय आमिमिक्षुः आसिच्यंते आपूर्यंते ॥ व्यत्ययेन कर्मणि कर्तृप्रत्ययः ॥ इंद्रे कुत्रेति चेत्। हस्ते तदीये बाहौ। यद्वैतत्समानाधिकरणमिंद्रस्य विशेषणं। हस्ते हंतर्यस्मिन्निंद्र इत्यर्थः। उक्तं यास्केन। हस्तो हंतेः प्राशुर्हनने। नि० १.७.। इति। यद्वेहशे यस्मिन्निंद्रे वर्तमाना राय आमिमिक्षुः आसिंचंति आपूरयंति स्तोतॄन्। यश्चेंद्रो रथेष्ठा रथे स्थाता तत्स्वभावः सन् हिरण्यये सुवर्णमये रथ आतिष्ठति। यद्वा रथेष्ठा रथेऽवस्थिता रायो धनानि हिरण्मये रथे तिष्ठन् य इंद्र आसिंचति अभिवर्षति। यस्य च स्थूरयोः स्थूलयोर्विस्तृतयोर्गभस्त्योः। बाहुनामैतत्। बाह्वो रश्मयोऽभीशव आसिच्यंते आयम्यंते। यस्य चाश्वासोऽश्वा वृषणः सेक्तारो युवानो युजाना रथे युज्यमाना अध्वन्नध्वनि मार्ग आमिमिक्षुः आसिंचंति आपूरयंति। आगच्छंतीत्यर्थः। तमिंद्रं स्तुम इति शेषः ॥

॥ अथ तृतीया ॥

श्रिये ते पादा दुव आ मिमिक्षुर्धृष्णुर्वज्री शवसा दक्षिणावान्।
वसानो अत्कं सुरभिं दृशे कं स्व१र्ण नृतविषिरो बभूथ ॥३॥

श्रिये। ते। पादा। दुवः। आ। मिमिक्षुः। धृष्णुः। वज्री। शवसा। दक्षिणऽवान्।
वसानः। अत्कं। सुरभिं। दृशे। कं। स्वः। न। नृतो इति। इषिरः। बभूथ ॥३॥

हे इंद्र श्रिय ऐश्वर्यार्थं ते त्वदीययोः पादा पादयोर्दुवः परिचरणमामिमिक्षुः। आसिंचंति। समर्पयंति। भरद्वाजः समर्पयति। व्यत्ययेन बहुवचनं। यद्वा ते तव पादौ श्रिये श्रयितुं सेवितुं दुवः परिचरणमासिंचंति। अनुतिष्ठंति। यस्त्वं शवसा बलेन धृष्णुः शत्रूणां धर्षको वज्री वज्रवान् दक्षिणावान्। दक्षिणा स्तोतृभ्यो दातव्यं धनं। तद्वान् हे नृतो नेतरिंद्र स त्वं सुरभिं प्रशस्तमत्कं सततगमनशीलमात्मीयं रूपं दृशे सर्वेषां दर्शनार्थं वसान आच्छादयन् स्वर्ण सूर्य इव इषिरो गंतैषणीयो वा बभूथ। भवसि। कमिति पूरकः ॥

॥ अथ चतुर्थी ॥

स सोम आमिश्लतमः सुतो भूद्यस्मिन्पक्तिः पच्यते संति धानाः।
इंद्रं नरः स्तुवंतो ब्रह्मकारा उक्था शंसंतो देववाततमाः ॥ ४ ॥

सः। सोमः। आमिश्लऽतमः। सुतः। भूत्। यस्मिन्। पक्तिः। पच्यते। संति। धानाः।
इंद्रं। नरः। स्तुवंतः। ब्रह्मऽकाराः। उक्था। शंसंतः। देववातऽतमाः ॥ ४ ॥

यः सोमो वक्ष्यते स सोमः सुतोऽभिषुतः सन् आमिश्लतम आभिमुख्येन मिश्रतमो भूत्। इंद्रेणात्यर्थं संगच्छते। यस्मिन् सोमेऽभिषुते सति पक्तिः पक्तव्यः पुरोडाशादिः पच्यते। भृष्टयवा धानाः। ताश्च संति हविरर्थं संस्कृता भवंति। यस्मिंश्च सोमेऽभिषुते नरो नेतारो ब्रह्मकारा ब्रह्मणोऽन्नस्य हविर्लक्षणस्य कर्तार ऋत्विज इंद्रं स्तोत्रैः स्तुवंत उक्थोक्थानि शस्त्राणि च शंसंत उच्चारयंतो देववाततमा देवानतिशयेनोपगता भवंति स सोम इंद्रेण संमिश्रितोऽभूदित्यन्वयः ॥

॥ अथ पंचमी ॥

न ते अंतः शवसो धाय्यस्य वि तु बाबधे रोदसी महित्वा।
आ ता सूरिः पृणति तूतुजानो यूथेवाप्सु समीजमान ऊती ॥ ५ ॥

न। ते। अंतः। शवसः। धायि। अस्य। वि। तु। बाबधे। रोदसी इति। महिऽत्वा।
आ। ता। सूरिः। पृणति। तूतुजानः। यूथाऽइव। अप्ऽसु। संऽईजमानः। ऊती ॥ ५ ॥

हे इंद्र ते तवास्योक्तगुणस्य शवसो बलस्यांतोऽवसानं न धायि। अत्र केवलोऽपि दधातिरवपूर्वार्थो द्रष्टव्यः। नावाधायि। अस्माभिर्नाज्ञायीत्यर्थः। यद्वलं रोदसी द्यावापृथिव्यौ महित्वा महत्त्वेन तु क्षिप्रं विबाबधे। यस्माद्व-

लाद्द्यावापृथिव्यौ बिभीत इत्यर्थः । ता तवलं सूरिः स्तोता गृणानस्त्वरितः सन् ऊती ऊत्या तर्पकेण हविषा समीजमानः सम्यग्यजन् आपृणाति । आपूरयति । तत्र दृष्टांतः । यूथेवाप्सूदकेषु गवां यूथानीव यथा गोपालोऽपः पाययन्नभितर्पयति तद्वत् ॥

॥ अथ षष्ठी ॥

एवेदिंद्रः सुहव ऋष्वो अस्तूती अनूती हिरिशिप्रः सत्वा ।
एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून् ॥ ६ ॥

एव । इत् । इंद्रः । सुऽहवः । ऋष्वः । अस्तु । ऊती । अनूती । हिरिऽशिप्रः । सत्वा ।
एव । हि । जातः । असमातिऽओजाः । पुरु । च । वृत्रा । हनति । नि । दस्यून् ॥ ६ ॥

एवैवमुक्तेन प्रकारेण ऋष्वो महानिंद्रः सुहवोऽस्तु सुखेनाह्वातव्यो भवतु । इदिति पूरणः । हिरिशिप्रः । शिप्रे हनू नासिके वा । हरितवर्णे शिप्रे यस्य तादृश इंद्र ऊती ऊत्यागमनेनानूती अनूत्यानागमनेन वा सत्वा गमयिता भवति धनानां । स्वयमागतोऽनागतोऽपि स्तोतृभ्यो धनं प्रयच्छतीत्यर्थः । एवा ह्येवं हि जातः प्रादुर्भूतोऽयमिंद्रोऽसमात्योजा असमात्यसमानमनुपममुत्कृष्टतरमोजो बलं यस्य तादृशः सन् पुरु पुरूणि बहूनि च वृत्रा वृत्राण्यावरकाणि रक्षःप्रभृतीनि हनति । हिनस्तु । तथा दस्यूनुपक्षपयितॄन् शत्रूंश्च निहंतु ॥

॥ इति चतुर्थस्य सप्तमे प्रथमो वर्गः ॥

भूय इदिति पंचर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं । भूयः पंचेत्यनुक्रांतं । अग्निष्टोमे माध्यंदिनसवनेऽच्छावाकशस्त्र एतत्सूक्तं शंसनीयं । सूचितं च । उदिद्ध्वस्य रिच्यते भूय इत् । आ० ५. १६. । इति ॥ महाव्रतेऽपि निष्केवल्य एतत्सूक्तं । तथैव पंचमारण्यके सूचितं । भूय इद्वावृधे वीर्याय नृणामु त्वा । ऐ० आ० ५. ६. । इति ॥

॥ तत्र प्रथमा ॥

भूय इद्वावृधे वीर्यायँ एको अजुर्यो दयते वसूनि ।
प्र रिरिचे दिव इंद्रः पृथिव्या अर्धमिदस्य प्रति रोदसी उभे ॥ १ ॥

भूयः । इत् । ववृधे । वीर्याय । एकः । अजुर्यः । दयते । वसूनि ।
प्र । रिरिचे । दिवः । इंद्रः । पृथिव्याः । अर्धं । इत् । अस्य । प्रति । रोदसी इति । उभे इति ॥ १ ॥

अयमिंद्रो भूय इद्बहुतरमेव वावृधे । प्रवृद्धोऽभूत् । किमर्थं । वीर्याय वीरकर्माणि वृत्रवधादीनि कर्तुं । एको मुख्योऽजुर्यो जरयितुमशक्यो स चेंद्रो वसूनि धनानि दयते । स्तोतृभ्यो ददाति । तथा दिवो द्युलोकात्पृथिव्या भूमेश्चायमिंद्रः प्ररिरिचे । अतिरिच्यते । किंचास्येंद्रस्योभे रोदसी द्यावापृथिव्यावर्धमिदर्धमेव प्रति । अस्येंद्रस्यार्धो भागो द्यावापृथिव्योः प्रतिनिधिर्भवतीत्यर्थः ॥

॥ अथ द्वितीया ॥

अधा मन्ये बृहदसुर्यमस्य यानि दाधार नकिरा मिनाति ।
दिवेदिवे सूर्यो दर्शतो भूद्वि सद्मान्युर्विया सुक्रतुर्धात् ॥२॥
अध । मन्ये । बृहत् । असुर्यं । अस्य । यानि । दाधार । नकिः । आ । मिनाति ।
दिवेऽदिवे । सूर्यः । दर्शतः । भूत् । वि । सद्मानि । उर्विया । सुऽक्रतुः । धात् ॥२॥

अधाधुनास्येंद्रस्य बृहन्महदसुर्यमसुरहननकुशलं बलं मन्ये । स्तौमि ॥ मन्यतिः स्तुतिकर्मा ॥ स चेंद्रो यानि कर्माणि दाधार धारयति तानि नकिरामिनाति । न कश्चिदपि हिनस्ति । कानि पुनस्तानि । उच्यते । दिवे दिवे प्रतिदिनं वृत्रेणावृतः सूर्यो दर्शतो दर्शनीयो भूत् । भवति । आवरकस्यासुरस्य वधेन सूर्यं प्रकाशितवानित्येकं कर्म । सुक्रतुः शोभनकर्मा स इंद्रः सद्मानि भुवनान्युर्वियोरूणि विस्तीर्णानि विधात् । व्यधात् । अकार्षीत् । इदमपरं कर्म । एतदादीनि बहूनि कर्माणि कृतवानित्यर्थः ॥

॥ अथ तृतीया ॥

अद्या चिन्नू चित्तदपो नदीनां यदाभ्यो अरदो गातुमिंद्र ।
नि पर्वता अद्मसदो न सेदुस्त्वया दृळ्हानि सुक्रतो रजांसि ॥३॥
अद्य । चित् । नु । चित् । तत् । अपः । नदीनां । यत् । आभ्यः । अरदः । गातुं । इंद्र ।
नि । पर्वताः । अद्मऽसदः । न । सेदुः । त्वया । दृळ्हानि । सुक्रतो इति सुऽक्रतो ।
रजांसि ॥३॥

हे इंद्र अद्या चिदद्यापि नू चित्पुरापि तव नदीनां संबंधिकं तदपः कर्म वर्तते । आभ्यो नदीभ्यो गातुं मार्गमरदः प्रवहनार्थं व्यलिख इति यत्कर्म तत्सर्वदानुपक्षीणं सवर्तत इत्यर्थः । अपि च त्वदाज्ञया पर्वता गिरयो निषेदुः ।

निषसाः। उत्पतनं परित्यज्य क्वचिदेव स्थाने नैश्चल्येनोपविष्टा बभूवुः। अद्मसदो न। अद्मादनीयमन्नं। तदर्थं सीदंतः पुरुषा इव। यथा ते भोजनार्थं नैश्चल्येनासते तथेत्यर्थः। अतः कारणात् हे सुक्रतो शोभनकर्मन्निंद्र त्वया रजांसि सर्वे लोका दृळ्हानि दृंहितानि स्थिरीकृता आसन् ॥

॥ अथ चतुर्थी ॥

सत्यमित्तन्न त्वावाँ अन्यो अस्तींद्र देवो न मर्त्यो ज्यायान्।
अहन्नहिं परिशयानमर्णोऽवासृजो अपो अच्छा समुद्रं ॥४॥

सत्यं। इत्। तत्। न। त्वाऽवान्। अन्यः। अस्ति। इंद्र। देवः। न। मर्त्यः। ज्यायान्।
अहन्। अहिं। परिऽशयानं। अर्णः। अव। असृजः। अपः। अच्छ। समुद्रं ॥४॥

हे इंद्र वक्ष्यमाणं तत्सत्यमित्सत्यमेव नानृतं। त्वावान् त्वत्सदृशोऽन्यो देवो नास्ति। त्वत्सदृशोऽन्यो मर्त्यो मनुष्योऽपि नैव विद्यते। ज्यायानधिकोऽपि देवो मनुष्यो वा न खल्वस्ति। इति यन्नीयते तत्सत्यमेवेत्यर्थः। अपि च त्वमर्ण उदकं परिशयानं परिवृत्य शयानमहिं मेघमहन्। अवधीः। हत्वा च समुद्रमंतरिक्षं जलधिं वाच्छाभिमुख्येनाप उदकान्यवासृजः। अवाङ्मुखतया विसृष्टवानसीत्यर्थः॥

॥ अथ पंचमी ॥

त्वमपो वि दुरो विषूचीरिंद्र दृळ्हमरुजः पर्वतस्य।
राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन्द्यामुषासं ॥५॥

त्वं। अपः। वि। दुरः। विषूचीः। इंद्र। दृळ्हं। अरुजः। पर्वतस्य।
राजा। अभवः। जगतः। चर्षणीनां। साकं। सूर्यं। जनयन्। द्यां। उषसं ॥५॥

हे इंद्र त्वं दुरो वृत्रेणावृता अपो विषूचीर्विविधमंचंत्यो यथा सर्वतः प्रसृता भवंति तथा व्यसृजः। यतस्त्वं पर्वतस्य पर्ववतो मेघस्य दृळ्हं दृढमपां बंधकप्रदेशमरुजः अभांक्षीः। अपि च त्वं जगतः संबंधिनीनां चर्षणीनां प्रजानां राजाभवः। अधिपतिर्भवसि। किं कुर्वन्। सूर्यं द्यां द्युलोकमुषसं च तमसावृतमेतत्रितयं साकं युगपदेव जनयन् प्रादुर्भावयन्। प्रकाशयन्नित्यर्थः ॥

॥ इति चतुर्थस्य सप्तमे द्वितीयो वर्गः ॥

अभूरेक इति पंचर्चमष्टमं सूक्तं भरद्वाजस्य सुहोत्रस्यार्षं। उपांत्या शक्करी

शिष्टास्त्रिष्टुभः। इंद्रो देवता। अनुक्रम्यते च। अभूरेकः सुहोत्रस्तु चतुर्थी शक्वरीति॥ महाव्रतस्य निष्केवल्य इदमादीन्यष्ट सूक्तानि शंसनीयानि। तथा पंचमारण्यकं। अभूरेको रयिपते रयीणामित्यष्टौ सूक्तानि। ऐ॰ आ॰ ५.८.। इति॥ पृष्ठ्यस्य षष्ठेऽहनि निष्केवल्य इदं सूक्तं निविद्धानं। सूचितं च। ऐंद्र याह्युप नः प्र घा न्वस्याभूरेक इति निष्केवल्यं। आ॰ ८.१.। इति॥ विश्वजिति माध्यंदिनेऽच्छावाकशस्त्रे सामसूक्ताख्यमेतच्छंसनीयं। सूचितं च। अभूरेको रयिपते रयीणामिति सामसूक्तानि। आ॰ ८.७.॥

॥ तत्र प्रथमा ॥

अभूरेको रयिपते रयीणामा हस्तयोरधिथा इंद्र कृष्टीः।
वि तोके अप्सु तनये च सूरेऽवोचंत चर्षणयो विवाचः॥१॥

अभूः। एकः। रयिऽपते। रयीणां। आ। हस्तयोः। अधिथाः। इंद्र। कृष्टीः।
वि। तोके। अप्ऽसु। तनये। च। सूरे। अवोचंत। चर्षणयः। विऽवाचः॥१॥

हे रयिपते धनस्य पालकेंद्र एकः प्रधानभूतस्त्वं रयीणां धनानां स्वाम्यभूः। भवसि। यद्वा रयीणां रयिपत इति संबंधः। एको रयिशब्दोऽनुवादो यथा गवामसि गोपतिरेक इंद्र। ऋग्वे॰ ७.९८.६.। इति। तदानीमेको मुख्यस्त्वं भवसीति योजनीयं। अपि च हे इंद्र त्वं हस्तयोरात्मीययोर्बाह्वोः कृष्टीः प्रजा आधिथाः। आधत्से। सर्वं जगत्तवाज्ञायां वर्तत इत्यर्थः। किंच चर्षणयो मनुष्यास्तोके पुत्रेऽप्सूदकेषु सूरे शत्रूणां प्रेरके तनये पौत्रेषु चैतेषु निमित्तभूतेषु सत्सु विवाचो विशिष्टाः स्तुतीर्व्यवोचंत। विविधं ब्रुवंति॥

॥ अथ द्वितीया ॥

त्वद्भियेंद्र पार्थिवानि विश्वाच्युता चिच्च्यावयंते रजांसि।
द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते॥२॥

त्वत्। भिया। इंद्र। पार्थिवानि। विश्वा। अच्युता। चित्। च्यवयंते। रजांसि।
द्यावाक्षामा। पर्वतासः। वनानि। विश्वं। दृळ्हं। भयते। अज्मन्। आ। ते॥२॥

हे इंद्र त्वत्त्वत्तो भिया भयेन विश्वा विश्वानि व्यापकानि पार्थिवानि। पृथिव्यंतरिक्षनाम। तत्र भवानि रजांस्युदकान्यच्युता चित् च्यावयितुमशक्यान्यपि

च्यावयंते। मेघाः प्रच्यावयंति। चलंतीत्यर्थः। अपि च हे इंद्र ते तवाज्मन्नागमने सति द्यावाक्षामा द्यावापृथिव्यौ पर्वतासो गिरयो वनानि वृक्षाश्च भयं प्राप्नुवंति। किं बहुना विश्वं सर्वं दृळ्हं स्थिरं प्राणिजातं भयते। बिभेति ॥

॥ अथ तृतीया ॥

त्वं कुत्सेनाभि शुष्णमिंद्राशुषं युध्य कुयवं गविष्टौ।

दश प्रपित्वे अध सूर्यस्य मुषायश्चक्रमविवे रपांसि ॥ ३ ॥

त्वं। कुत्सेन। अभि। शुष्णं। इंद्र। अशुषं। युध्य। कुयवं। गोऽइष्टौ।

दश। प्रऽपित्वे। अध। सूर्यस्य। मुषायः। चक्रं। अविवेः। रपांसि ॥ ३ ॥

हे इंद्र त्वं कुत्सेन सहाशुषं शोषयितुमशक्यं प्रबलं शुष्णं सर्वस्य शोषकमेतत्संज्ञमसुरमभियुध्य। अभ्ययुध्यः। कुत्सस्य साहाय्यार्थं तेनासुरेण सह युद्धं कृतवानसीत्यर्थः। तथा गविष्टौ। गावो बाणा इष्यंति गच्छंतीति गविष्टिः संग्रामः। तस्मिन्कुयवमेतत्संज्ञमसुरं च दश। अदशः। हिंसितवानसि ॥ दन्श दशन इत्येतस्माच्छांदसे लोटि रूपं ॥ अधापि च प्रपित्वे प्रपतने युद्धे सूर्यस्य चक्रं रथावयवभूतं मुषायः। अमुष्णाः। तदाप्रभृति सूर्यस्य रथ एकचक्रोऽभूत्। तथा चाम्नातं। सप्त युंजंति रथमेकचक्रं। ऋग्वे० १.१६४.२.। इति। एतशाख्यस्य ऋषेः सूर्येण सह युद्धे तत्साहाय्यार्थमागत इंद्रः सूर्यस्य चक्रमपहृतवानित्याख्यातं। सूरश्चक्रं प्र वृहज्जात ओजसा। ऋग्वे० १.१३०.९.। इति च निगमांतरं। अपि च रपांसि पापकारीणि रक्षःप्रभृतीन्यविवेः। अस्माल्लोकादगमयः। अवधीरित्यर्थः ॥

॥ अथ चतुर्थी ॥

त्वं शतान्यव शंबरस्य पुरो जघंथाप्रतीनि दस्योः।

अशिक्षो यत्र शच्या शचीवो दिवोदासाय सुन्वते सुतक्रे भरद्वाजाय गृणते वसूनि ॥ ४ ॥

त्वं। शतानि। अव। शंबरस्य। पुरः। जघंथ। अप्रतीनि। दस्योः।

अशिक्षः। यत्र। शच्या। शचीऽवः। दिवःऽदासाय। सुन्वते। सुतऽक्रे। भरत्ऽवाजाय। गृणते। वसूनि ॥ ४ ॥

हे इंद्र त्वं शतानि शतसंख्यानि दस्योरुपक्षपयितुरसुरस्य शंबरस्यैतत्संज्ञस्य

पुरः पुरीरप्रतीनि ॥ लिंगव्यत्ययः ॥ केनाप्यप्रतिगता अवजघंथ । अवाहन् । हे शचीवः प्रज्ञावन् हे सुतक्रे अभिषुतेन सोमेन क्रीतेंद्र यत्र यस्मिन्काले सुन्वते सोमाभिषवं कुर्वते दिवोदासाय शच्या प्रज्ञयाशिक्षो धनानि प्रादा गृणते स्तुवते भरद्वाजाय च वसूनि प्रादाः तस्मिन्काले शांबरीः पुरोऽवजघंथेत्यन्वयः ॥

॥ अथ पंचमी ॥

स सत्यसत्वन्महते रणाय रथमा तिष्ठ तुविनृम्ण भीमं ।
याहि प्रपथिन्नवसोप मद्रिक्प्र च श्रुत श्रावय चर्षणिभ्यः ॥ ५ ॥

सः । सत्यऽसत्वन् । महते । रणाय । रथं । आ । तिष्ठ । तुविऽनृम्ण । भीमं ।
याहि । प्रऽपथिन् । अवसा । उप । मद्रिक् । प्र । च । श्रुत । श्रवय । चर्षणिऽभ्यः ॥ ५ ॥

हे सत्यसत्वन् । सत्याः सत्वानो भटा यस्य स तथोक्तः । हे तुविनृम्ण । तुवि बहुलं नृम्णं धनं यस्य स तथोक्तः । हे तादृशेंद्र स त्वं महते रणाय संग्रामाय तदर्थं भीमं भयंकरमात्मीयं रथमातिष्ठ । हे प्रपथिन् प्रकृष्टमार्गेंद्र अवसा रक्षणेन सह तेन च रथेनोपयाहि आगच्छ मद्रिक् मदभिमुखः । तथा हे श्रुत विश्रुतेंद्र चर्षणिभ्यः प्रजाभ्यः प्रश्रावय च । अस्मान् प्रख्यापय च । सर्वासु प्रजासु मध्येऽस्मान्प्रख्यातान् कुर्वित्यर्थः ॥

॥ इति चतुर्थस्य सप्तमे तृतीयो वर्गः ॥

अपूर्व्येति पंचर्चं नवमं सूक्तं त्रैष्टुभमैंद्रं । द्वितीये छांदोमिकेऽहनि निष्केवल्य एतत्सूक्तं । सूचितं च । अपूर्व्या पुरुतमानि तां सु ते कीर्त्ति । आ० ८.७. । इति ॥ महाव्रतेऽपि निष्केवल्येऽस्य सूक्तस्य विनियोग उक्तः ॥

॥ तत्र प्रथमा ॥

अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शंतमानि वचांस्यासा स्थविराय तक्षं ॥ १ ॥

अपूर्व्या । पुरुऽतमानि । अस्मै । महे । वीराय । तवसे । तुराय ।
विऽरप्शिने । वज्रिणे । शंऽतमानि । वचांसि । आसा । स्थविराय । तक्षं ॥ १ ॥

अपूर्व्यापूर्व्याणि पूर्वैरकृतानि नूतनानि पुरुतमानि बहुतमानि शंतमानि सुखकृत्तमानि वचांसि स्तुतिरूपाणि वाक्यान्यासास्येनास्मा इंद्राय तक्षं ।

अतव्यं । करोमि । वीळ्हयाय । महे महते वीराय विविधशत्रूणां मारयित्रे तवसे तवस्विने बलवते तुराय त्वरमाणाय विरप्शिने विशेषेण स्तुत्याय वज्रिणे वज्रवते स्थविराय प्रवृद्धाय ॥

॥ अथ द्वितीया ॥

स मातरा सूर्येणा कवीनामवासयद्रुजदद्रिं गृणानः ।
स्वाधीभिर्ऋक्वभिर्वावशान उदुस्रियाणामसृजन्निदानं ॥२॥

सः । मातरा । सूर्येण । कवीनां । अवासयत् । रुजत् । अद्रिं । गृणानः ।
सुऽआधीभिः । ऋक्वऽभिः । वावशानः । उत् । उस्रियाणां । असृजत् । निऽदानं ॥२॥

स इंद्रो मातरा मातरौ दिवं च पृथिवीं च कवीनां क्रांतदर्शिनामंगिरसामर्थाय सूर्येणावासयत् । प्राकाशयत् । किं कुर्वन् । अद्रिं गवामदर्शनाय बलेन स्थापितं पर्वतं रुजन्भंजन् । यद्वा कवीनामंगिरसामिति तृतीयार्थे षष्ठी । अंगिरोभिर्गृणानः स्तूयमान इति संबंधः । अपि च स्वाधीभिः शोभनध्यानैर्ऋक्वभिः स्तोतृभिरंगिरोभिर्वावशानः पुनः पुनः काम्यमानः सन् उस्रियाणां बलस्य भृत्यैः पणिभिरपहृतानां गवां निदानं बंधनमुदसृजत् । अमोचयत् ॥

॥ अथ तृतीया ॥

स वह्निभिर्ऋक्वभिर्गोषु शश्वन्मितज्ञुभिः पुरुकृत्वा जिगाय ।
पुरः पुरोहा सखिभिः सखीयन्दृळ्हा रुरोज कविभिः कविः सन् ॥३॥

सः । वह्निऽभिः । ऋक्वऽभिः । गोषु । शश्वत् । मितज्ञुऽभिः । पुरुऽकृत्वा । जिगाय ।
पुरः । पुरःऽहा । सखिऽभिः । सखिऽयन् । दृळ्हाः । रुरोज । कविऽभिः । कविः । सन् ॥३॥

पुरुकृत्वा बहुकर्मकृत्स इंद्रो वह्निभिर्हविषां वोढृभिर्ऋक्वभिः स्तोतृभिः शश्वत्सर्वदा मितज्ञुभिः संकुचितजानुभिरंगिरोभिः सह गोषु निमित्तभूतेषु जिगाय । असुरान् जितवान् । जित्वा च पुरोहा पुराणां हंता स इंद्रः सखिभिः समानख्यानैः कविभिः क्रांतप्रज्ञैरंगिरोभिः सह सखीयन् सखित्वमात्मन इच्छन् कविः सन् स्वयमपि क्रांतप्रज्ञो भवन् दृळ्हा स्थिराः पुर आसुरीः पुरी रुरोज ॥

॥ अथ चतुर्थी ॥

स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः ।
पुरुवीराभिर्वृषभ क्षितीनामा गिर्वणः सुविताय प्र याहि ॥४॥

सः । नीव्याभिः । जरितारं । अच्छ । महः । वाजेभिः । महत्ऽभिः । च । शुष्मैः ।
पुरुऽवीराभिः । वृषभ । क्षितीनां । आ । गिर्वणः । सुविताय । प्र । याहि ॥४॥

हे वृषभ कामानां वर्षक हे गिर्वणो गिरा स्तुत्या संभजनीयेंद्र स त्वं महो महद्भिर्वाजेभिर्वाजैरन्नैर्महद्भिः शुष्मैर्बलैश्च सह क्षितीनां प्रजानां मध्ये जरितारं स्तोतारमच्छाभिमुख्येन नीव्याभिर्नव्याभिर्नवतराभिः पुरुवीराभिः पुरूणां बहूनां वीरयित्रीभिर्वडवाभिराप्रयाहि । आगच्छ । किमर्थं । सुविताय शोभनाय । सुख-प्राप्त्यर्थमित्यर्थः ॥

॥ अथ पंचमी ॥

स सर्गेण शवसा तक्तो अत्यैरप इंद्रो दक्षिणतस्तुराषाट् ।
इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषुरप्रमृष्यं ॥५॥

सः । सर्गेण । शवसा । तक्तः । अत्यैः । अपः । इंद्रः । दक्षिणतः । तुराषाट् ।
इत्था । सृजानाः । अनपऽवृत् । अर्थं । दिवेऽदिवे । विविषुः । अप्रऽमृष्यं ॥५॥

तुराषाट् तुराणां हिंसकानां सोढाभिभविता स इंद्रः सर्गेण सर्वदोद्युक्तेन शवसा बलेनात्यैरश्वैः सततगामिभिस्तेजोभिर्वा तक्तः संगतः सन् दक्षिणतो दक्षिणायनेऽप उदकानि विसृजतीति शेषः । इत्थेत्थमनेन प्रकारेण सृजानाः सृज्यमानास्ता आपोऽर्थं गंतव्यमप्रमृष्यमन्यैरक्षोभ्यं समुद्रं दिवे दिवे प्रतिदिन-मनपावृत् अपावर्तनं पुनरागमनं यथा न भवति तथा विविषुः । व्याप्नुवंति ॥ अर्तेस्थन्प्रत्ययांतस्य रूपमर्थमिति ॥

॥ इति चतुर्थस्य सप्तमे चतुर्थो वर्गः ॥

य ओजिष्ठ इति पंचर्चं दशमं सूक्तं शुनहोत्रस्यार्षं त्रैष्टुभमैंद्रं । अनुक्रम्यते च । य ओजिष्ठः शुनहोत्रस्त्विति ॥ महाव्रतेऽपि निष्केवल्य उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

य ओजिष्ठ इंद्र तं सु नो दा मदो वृषन्त्स्वभिष्टिर्दास्वान् ।
सौवश्व्यं यो वनवत्स्वश्वो वृत्रा समत्सु सासहदमित्रान् ॥ १ ॥

यः । ओजिष्ठः । इंद्र । तं । सु । नः । दाः । मदः । वृषन् । सुऽअभिष्टिः । दास्वान् ।
सौवश्व्यं । यः । वनवत् । सुऽअश्वः । वृत्रा । समत्ऽसु । ससहत् । अमित्रान् ॥ १ ॥

हे वृषन् कामानां वर्षयितरिंद्र त्वं यः पुत्र ओजिष्ठ ओजस्वितमो बलवत्तमो मदस्तव मादयिता । स्तुतिभिः स्तोतेत्यर्थः । स्वभिष्टिः शोभनाभ्येषणो दास्वान् । हविषां दानं दाः । तद्वान् । एवंगुणविशिष्टं तं पुत्रं नोऽस्मभ्यं सु सुष्ठु दाः । देहि । यः पुत्रः स्वश्वः सन् समत्सु संग्रामेषु सौवश्व्यं शोभनाश्वानां समूहं वनवत् हिंस्यात् । तथा वृत्रा वृत्रान् वारयितॄनमित्रान् शत्रूंश्च सासहत् अत्यर्थमभिभवेत् तं दा इत्यन्वयः ॥

॥ अथ द्वितीया ॥

त्वां हीँ३द्रावसे विवाचो हवंते चर्षणयः शूरसातौ ।
त्वं विप्रेभिर्वि पणीँरशायस्त्वोत इत्सनिता वाजमर्वा ॥ २ ॥

त्वां । हि । इंद्र । अवसे । विऽवाचः । हवंते । चर्षणयः । शूरऽसातौ ।
त्वं । विप्रेभिः । वि । पणीन् । अशायः । त्वाऽऊतः । इत् । सनिता । वाजं । अर्वा ॥ २ ॥

हे इंद्र त्वां हि त्वामेव विवाचो विविधस्तुतिरूपा वाचो येषां तादृशाश्चर्षणयो मनुष्याः शूरसातौ शूरैः संभजनीये संग्रामेऽवसे रक्षणार्थं हवंते । आह्वयंति । किंच त्वं विप्रेभिर्विप्रैर्मेधाविभिरंगिरोभिः सार्द्धं पणीन् । वलस्यानुचरा असुराः पणयः । तान्व्यशायः । विशेषेणाशाययः । हतवानित्यर्थः । अतस्त्वोत इत् त्वयोतो रक्षित एव सनिता संभक्ता पुरुषो वाजमन्नमर्वाभिगंता भवति ॥

॥ अथ तृतीया ॥

त्वं ताँ इंद्रोभयाँ अमित्रान्दासा वृत्राण्यार्या च शूर ।
वधीर्वनेव सुधितेभिरत्कैरा पृत्सु दर्षि नृणां नृतम ॥ ३ ॥

त्वं । तान् । इंद्र । उभयान् । अमित्रान् । दासा । वृत्राणि । आर्या । च । शूर ।
वधीः । वनाऽइव । सुऽधितेभिः । अत्कैः । आ । पृत्ऽसु । दर्षि । नृणां । नृऽतम ॥ ३ ॥

हे इंद्र त्वं तानुभयानुभयविधानमित्रान् शत्रूनवधीः। अहिंसीः। के त उभयविधाः। दासोपक्षपयितॄन्कर्मविरोधिनो वलप्रभृतीनसुरान् ॥ सुपां सुलुगिति शस आकारः ॥ आर्यायोषित्कर्मानुष्ठातृत्वेन श्रेष्ठानि वृत्राण्यावरकाणि विश्वरूपादीनि च तानुभयविधान् हे शूर त्वं हतवानित्यर्थः। नृणां नेतॄणां मध्ये नृतमातिशयेन नेतर्हे इंद्र पृत्सु संग्रामेषु सुधितेभिः सुष्ठु निहितैरकैरात्मीयैरायुधैरादर्षि। अन्यानपि शत्रूनाहणासि। विदारयसि। तत्र दृष्टांतः। वनेव वनानीव। यथा वृक्षजातानि कुठारादिभिश्छिनत्ति तद्वत् ॥

॥ अथ चतुर्थी ॥

स त्वं न इंद्राकवाभिरूती सखा विश्वायुरविता वृधे भूः।
स्वर्षाता यद्ध्वयामसि त्वा युध्यंतो नेमधिता पृत्सु शूर ॥४॥
सः। त्वं। नः। इंद्र। अकवाभिः। ऊती। सखा। विश्वऽआयुः। अविता। वृधे। भूः।
स्वःऽसाता। यत्। ह्वयामसि। त्वा। युध्यंतः। नेमऽधिता। पृत्ऽसु। शूर ॥४॥

हे इंद्र स तादृशस्त्वमकवाभिरकुत्सिताभिरूती ऊतिभी रक्षाभिर्नोऽस्माकं वृधे वर्धनायाविता रक्षिता भूः। भव। तथा विश्वायुः सर्वतो गंता त्वमस्माकं सखा च भव। नेमधिता। नेमशब्दोऽर्धवाची। उक्तं च। त्वो नेम इत्यर्धस्येति। अर्धाः कतिपयाः पुरुषा धीयंत एष्विति नेमधितयः संग्रामाः। तादृशेषु पृत्सु पृतनासु संग्रामेषु युध्यंतो युद्धं कुर्वंतो वयं स्वर्षाता स्वः सुष्ठ्वरणीयं धनं तस्य संभजनार्थं हे शूर त्वां यद्यदा ह्वयामसि आह्वयामः तदानीं त्वमविता सखा च भवेत्यर्थः ॥

॥ अथ पंचमी ॥

नूनं न इंद्रापराय च स्या भवा मृळीक उत नो अभिष्टौ।
इत्था गृणंतो महिनस्य शर्मन्दिवि ष्याम पार्ये गोषतमाः ॥५॥
नूनं। नः। इंद्र। अपराय। च। स्याः। भव। मृळीकः। उत। नः। अभिष्टौ।
इत्था। गृणंतः। महिनस्य। शर्मन्। दिवि। स्याम। पार्ये। गोसऽतमाः ॥५॥

हे इंद्र त्वं नूनमद्य नोऽस्माकं स्याः। अस्मदीयो भव। अपराय चापरस्मिन्नन्यस्मिन्नपि कालेऽस्मदीयो भव। उतापि च त्वं नोऽस्माकमभिष्टावभिगमने सति मृळीकः सुखयिता भव। इत्थेत्थमनेन प्रकारेण गृणंतः स्तुवंतो वयं गोष-

तमा महिम्नस्य महतस्तव संबंधिनि दिवि द्योतमाने पार्ये दुःखस्य पारके शर्मन् शर्मणि सुखे स्याम। वर्तमाना भवेम॥

॥ इति चतुर्थस्य सप्तमे पंचमो वर्गः ॥

सं च त्वे जग्मुरिति पंचर्चमेकादशं सूक्तं शुनहोत्रस्यार्षं। सं च त्व इत्यनुक्रांतं॥ तृतीये छांदोमिकेऽहनीदमादिके द्वे सूक्ते। सूचितं च। सं च त्वे जग्मुरिति सूक्ते। आ॰ ८.७। इति॥ महाव्रतेऽपि निष्केवल्य उक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

सं च॒ त्वे ज॒ग्मुर्गिर॑ इंद्र पू॒र्वीर्वि च॒ त्वद्यं॑ति वि॒भ्वो॑ मनी॒षाः।
पु॒रा नू॒नं च॑ स्तु॒तय॒ ऋषी॑णां पस्पृ॒ध्र इंद्रे॒ अध्यु॑क्था॒र्का॥१॥

सं। च॒। त्वे इति॑। ज॒ग्मुः। गिरः॑। इं॒द्र॒। पू॒र्वीः। वि। च॒। त्वत्। यं॒ति॒। वि॒ऽभ्वः॑। म॒नी॒षाः।
पु॒रा। नू॒नं। च॒। स्तु॒तयः॑। ऋषी॑णां। प॒स्पृ॒ध्रे। इंद्रे॑। अधि॑। उ॒क्थ॒ऽअ॒र्काः॥१॥

हे इंद्र त्वे त्वयि पूर्वीर्बह्व्यो गिरः स्तुतयश्च संजग्मुः। संगच्छंते। त्वत्तो विभ्वो विभवो विस्तृता मनीषाः स्तोतॄणां मतयश्च वियंति। विविधं निर्गच्छंति। शेषः परोक्षकृतः। पुरा पूर्वस्मिन्काले नूनमद्य च ऋषीणामतींद्रियार्थदर्शिनां भरद्वाजादीनां स्तुतयः स्तोत्राणींद्रेऽध्यधिकं पस्पृध्रे। अस्पर्धंत। अहमहमिकयेंद्रस्य स्तवने त्वरिता बभूवुरित्यर्थः। तथोक्थार्का। उक्थं शस्त्रं। तद्रूपाण्यर्काण्यर्चनसाधनानि स्तोत्राणि च पस्पृधे। अस्पर्धंत॥

॥ अथ द्वितीया ॥

पु॒रु॒हू॒तो यः पु॑रुगू॒र्त ऋभ्वाँ॒ एकः॑ पुरुप्रश॒स्तो अस्ति॑ य॒ज्ञैः।
रथो॒ न म॒हे शव॑से युजा॒नो॒३॑स्माभि॒रिंद्रो॑ अनु॒माद्यो॑ भूत्॥२॥

पु॒रु॒ऽहू॒तः। यः। पु॒रु॒ऽगू॒र्तः। ऋभ्वा॑। एकः॑। पु॒रु॒ऽप्र॒श॒स्तः। अस्ति॑। य॒ज्ञैः।
रथः॑। न। म॒हे। शव॑से। यु॒जा॒नः। अ॒स्माभिः॑। इंद्रः॑। अ॒नु॒ऽमाद्यः॑। भू॒त्॥२॥

पुरुहूतो बहुभिराहूतः पुरुगूर्तो बहुभिरुद्यमित ऋभ्वा महानेकः प्रधानभूत एवंगुणविशिष्टो य इंद्रो यज्ञैर्यष्टृभिः पुरुषैर्यजनसाधनैः स्तोत्रैर्वा पुरुप्रशस्तोऽस्ति बहुधा प्रशस्तः स्तुतो भवति स इंद्रो रथो न रथ इव महे महते शवसे बलाय

तदर्थं युजानोऽस्मत्स्तुतिभिर्युज्यमानः सन् अस्माभिः स्तोतृभिरनमाद्यो भूत् । सर्वदा स्तुत्यो भवतु ॥

॥ अथ तृतीया ॥

न यं हिंसंति धीतयो न वाणीरिंद्रं नक्षंतीदभि वर्धयंतीः ।
यदि स्तोतारः शतं यत्सहस्रं गृणंति गिर्वणसं शं तदस्मै ॥ ३ ॥

न । यं । हिंसंति । धीतयः । न । वाणीः । इंद्रं । नक्षंति । इत् । अभि । वर्धयंतीः ।
यदि । स्तोतारः । शतं । यत् । सहस्रं । गृणंति । गिर्वणसं । शं । तत् । अस्मै ॥ ३ ॥

यमिंद्रं धीतयः कर्माणि परिचरणानि न हिंसंति न बाधंते । वाणीर्वाण्यः स्तुतयश्च यं न बाधंते । दातुमसमर्थः पुरुषोऽन्यकृतैः परिचरणैः स्तुतिभिश्च भृशं खिद्यतेऽस्य चेंद्रस्य बहुधनत्वाद्दातृत्वाच्च तस्मिन्प्रयुज्यमानानि परिचरणानि स्तोत्राणि च बाधहेतवो नाभूवन्नित्यर्थः । किं तर्हीत्यत आह । तमिंद्रं वर्धयंतीर्वर्धयंत्योऽभिनक्षंति । अभिगच्छंति । अपि च गिर्वणसं गिरां संभक्तारमिंद्रं शतं शतसंख्याकाः स्तोतारो यदि गृणंति स्तुवंति । यद्यदि च सहस्रं सहस्रसंख्याकाः स्तोतारः स्तुवंति तत्सर्वं स्तोत्रमस्मा इंद्राय शं सुखकरं भवति ॥

॥ अथ चतुर्थी ॥

अस्मा एतद्दिव्य१र्चेव मासा मिमिक्ष इंद्रे न्ययामि सोमः ।
जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः ॥ ४ ॥

अस्मै । एतत् । दिवि । अर्चाऽइव । मासा । मिमिक्षः । इंद्रे । नि । अयामि । सोमः ।
जनं । न । धन्वन् । अभि । सं । यत् । आपः । सत्रा । ववृधुः । हवनानि । यज्ञैः ॥ ४ ॥

एतदेतस्मिन्दिवि दिवसे सौत्येऽहन्यर्चेवार्चनसाधनेन स्तोत्रेणेव मासा मानेनेंद्राय त्वा वृत्रघ्न इत्यादिमंत्रसाध्येन युक्तो मिमिक्षो वसतीवर्येकधनाख्याभिरद्भिरासिक्तः सोमोऽस्मै ॥ विभक्तिव्यत्ययः ॥ अस्मिन्निंद्रे न्ययामि । नियतोऽभूत् । यद्वास्मा इंद्रायैतत्स्तोत्रं प्रवाणीति शेषः । दिवि द्युलोकेऽर्चेवार्कः सूर्य इव मासा । लुप्तोपमेतत् । माति परिच्छिनत्तीति मासश्चंद्रमाः । स इव मिमिक्षो वृष्ट्युदकानां सेक्ता य इंद्रो वर्ततेऽस्मिन्निंद्रेऽभिषुतः सोमो नियम्यते स्म । किंच तमिंद्रं यज्ञैर्यजनसाधनैः पुरोडाशादिभिर्हविर्भिः सार्धं हवनानि स्तोत्राणि सत्रा सह

वावृधुः । अवर्धयन् । तत्र दृष्टांतः । धन्वन्धन्वनि मरुदेशेऽभि अभिमुखं संयत् सम्यग्यत्यो गच्छंत्य आपो जनं प्राणिनमिव । यथा मरुदेश उपलभ्यमाना आपः प्राणिनं वर्धयंति तद्वत् ॥

॥ अथ पंचमी ॥

अस्मा एतन्मह्यांगूषमस्मा इंद्राय स्तोत्रं मतिभिरवाचि ।

असद्यथा महति वृत्रतूर्य इंद्रो विश्वायुरविता वृधश्च ॥ ५ ॥

अस्मै । एतत् । महि । आंगूषं । अस्मै । इंद्राय । स्तोत्रं । मतिऽभिः । अवाचि ।

असत् । यथा । महति । वृत्रऽतूर्ये । इंद्रः । विश्वऽआयुः । अविता । वृधः । च ॥ ५ ॥

अस्मा इंद्राय महि महदेतदांगूषं स्तोत्रं मतिभिः स्तोतृभिरवाचि । उक्तमभूत् । अस्मा इंद्राय स्तोत्रमिति पुनरुक्तिरादरार्था । विश्वायुः सर्वत्र गंता स इंद्रो महति प्रभूते वृत्रतूर्ये संग्रामे यथा येन प्रकारेणास्माकमविता रक्षको वृधो वर्धयिता चासत् भवेत् तथावाचीत्यन्वयः ॥

॥ इति चतुर्थस्य सप्तमे षष्ठो वर्गः ॥

कदा भुवन्निति पंचर्चं द्वादशं सूक्तं नरस्यार्षं त्रैष्टुभमैंद्रं । तथा चानुक्रांतं । कदा नरस्त्विति ॥ तृतीये छंदोमे महाव्रते च निष्केवल्य उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

कदा भुवन्रथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः ।

कदा स्तोमं वासयोऽस्य राया कदा धियः करसि वाजरत्नाः ॥ १ ॥

कदा । भुवन् । रथऽक्षयाणि । ब्रह्म । कदा । स्तोत्रे । सहस्रऽपोष्यं । दाः ।

कदा । स्तोमं । वासयः । अस्य । राया । कदा । धियः । करसि । वाजऽरत्नाः ॥ १ ॥

हे इंद्र ब्रह्म ब्रह्माणि स्तोत्राण्यस्मदीयानि रथक्षयाणि रथनिवासानि कदा कस्मिन्काले भुवन् । भवेयुः । रथेऽवस्थितं त्वां कदा प्राप्नुवंतीत्यर्थः । कदा कस्मिन्काले स्तोत्रे स्तुवते मह्यं सहस्रपोष्यं सहस्रसंख्याकपुरुषपोषकं गोसमूहं पुत्रं वा दाः । कदा चास्य मम स्तोतुः स्तोमं स्तोत्रं राया धनेन वासयः । व्यापयेः । धियः कर्माणि चाग्निहोत्रादीनि वाजरत्ना वाजैरन्नै रमणीयाः कदा कस्मिन्काले करसि कुर्याः । एवं स्तोता फलस्य विलंबमसहमान इंद्रमनया पृष्टवान् ॥

॥ अथ द्वितीया ॥

कर्हि स्वित्तदिंद्र यन्नृभिर्नॄन्वीरैर्वीरान्नीळयासे जयाजीन् ।
त्रिधातु गा अधि जयासि गोष्विंद्र द्युम्नं स्वर्वद्धेह्यस्मे ॥ २ ॥

कर्हि । स्वित् । तत् । इंद्र । यत् । नृऽभिः । नॄन् । वीरैः । वीरान् । नीळयासे । जय । आजीन् ।
त्रिऽधातु । गाः । अधि । जयासि । गोषु । इंद्र । द्युम्नं । स्वःऽवत् । धेहि । अस्मे इति ॥ २ ॥

फलस्य विलंबमसहमान ऋषिरनयापींद्रं पृच्छति । हे इंद्र कर्हि स्वित्कदा खलु तद्भवेत् । नृभिरस्मदीयैः पुरुषैर्नॄन् शत्रुपुरुषान् तथा वीरैरस्मदीयैः पुत्रैर्वीरान् शत्रुपुत्रांश्च यन्नीळयासे त्वं संश्लेषयेः संयोजयेः ॥ नीळयतिः संश्लेषणकर्मा ॥ ईदृशं युद्धे यत्संश्लेषणं तत्कदा भवेदिति वितर्कः । अपि चास्मदर्थं त्वमाजीन् संग्रामान् कदा जय । जयेः । कदा च गोष्वभिगंतृषु शत्रुषु विद्यमानास्त्रिधातु त्रिधातूनां क्षीरदधिघृतानां त्रयाणां धारयित्रीर्गा अधिजयासि । अधिकं जयेः । हे इंद्र त्वं स्वर्वत् व्याप्तिमत् द्युम्नं धनमस्मे अस्मासु कदा धेहि । धारयेः ॥

॥ अथ तृतीया ॥

कर्हि स्वित्तदिंद्र यज्जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ ।
कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः ॥ ३ ॥

कर्हि । स्वित् । तत् । इंद्र । यत् । जरित्रे । विश्वऽप्सु । ब्रह्म । कृणवः । शविष्ठ ।
कदा । धियः । न । निऽयुतः । युवासे । कदा । गोऽमघा । हवनानि । गच्छाः ॥ ३ ॥

अनयापि कतिचित् प्रश्नाः क्रियंते । हे इंद्र कर्हि स्वित्कदा खलु तद्भवेत् । हे शविष्ठ बलवत्तमेंद्र त्वं जरित्रे स्तोत्रे विश्वप्सु बहुविधरूपं ब्रह्मान्नं कृणवः करोषीति यत् तत्कदा भवेदिति वितर्कः । कदा च धियः कर्माणि । नेति समुच्चये । नियुतः स्तुतीश्च युवासे । आत्मनि योजयेः । कदा च त्वं गोमघा गोमघानि गवां दातॄणि ॥ मंहतेर्दानार्थस्य रूपमुत्तरपदं ॥ हवनानि स्तोत्राणि गच्छाः । अभिगच्छेः ॥

॥ अथ चतुर्थी ॥

स गोमघा जरित्रे अश्वश्चंद्रा वाजश्रवसो अधि धेहि पृक्षः ।
पीपिहीषः सुदुघामिंद्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः ॥ ४ ॥

सः । गोऽमघाः । जरित्रे । अश्वऽचंद्राः । वाजऽश्रवसः । अधि । धेहि । पृक्षः ।
पीपिहि । इषः । सुऽदुघाः । इंद्र । धेनुं । भरत्ऽवाजेषु । सुऽरुचः । रुरुच्याः ॥४॥

हे इंद्र स त्वं जरित्रे स्तोत्रे गोमघा गवां दात्रीरश्वचंद्रा अश्वैराह्लादयंतीर्वाजश्रवसो वाजैर्बलैः प्रसिद्धा एवंभूताः पृक्षोऽन्नानि भरद्वाजेषु भरद्वाजपुत्रेष्वस्मास्वधि धेहि । धारय । तथैषस्तान्यन्नानि सुदुघां शोभनदोग्ध्रीं धेनुं गां च हे इंद्र पीपिहि । प्यायय । अपि च ता इषो गौश्च सुरुचः शोभनदीप्तयो यथा भवंति तथा त्वं रुरुच्याः । दीपयेः । शोभनदीप्तियुक्ताश्च ताः संत्वित्यर्थः ॥

॥ अथ पंचमी ॥

तमा नूनं वृजनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे ।
मा निररं शुक्रदुघस्य धेनोरांगिरसान्ब्रह्मणा विप्र जिन्व ॥५॥

तं । आ । नूनं । वृजनं । अन्यथा । चित् । शूरः । यत् । शक्र । वि । दुरः । गृणीषे ।
मा । निः । अरं । शुक्रऽदुघस्य । धेनोः । आंगिरसान् । ब्रह्मणा । विप्र । जिन्व ॥५॥

हे इंद्र त्वं नूनमद्यतनं वृजनं बाधकमस्मदीयं शत्रुमन्यथा चिदन्येनैव प्रकारेण योजय । येन प्रकारेण सर्वे जीवंति तद्विलक्षणं प्रकारं मरणाख्यं प्रापयेत्यर्थः । आकारः पूरकः । हे शक्र सर्वकार्येषु शक्तेंद्र शूरः शौर्योपेतो वि दुरो विशेषेण दारयिता शत्रूणां । यद्वा दुरो द्वाराणि शत्रुसंबंधीनि विघटयंस्त्वं यद्यस्माद्गृणीषे अस्माभिः स्तूयसे तस्मात्कारणात् शुक्रदुघस्य शुक्राणां निर्मलानां दोग्धुरिंद्रस्य धेनोर्वाचः स्तोत्रान्मा निररं । मा निर्गच्छेयं । यद्वा शुक्रस्य पयसो दोग्ध्र्या धेनोस्त्वया दत्ताया गोः सकाशान्मा निर्गच्छेयं ॥ अरमित्याख्यातमृ गतावित्यस्य रूपं ॥ सा सर्वदास्मासु निवसत्वित्यर्थः । हे विप्र प्राज्ञेंद्र आंगिरसानंगिरोगोत्रजानस्मान् ब्रह्मणान्नेन जिन्व । प्रीणय ॥

॥ इति चतुर्थस्य सप्तमे सप्तमो वर्गः ॥

सत्रा मदास इति पंचर्चं त्रयोदशं सूक्तं नरस्यार्षं त्रैष्टुभमैंद्रं । सत्रेत्यनुक्रांतं ॥ पृष्ठ्यस्य पंचमेऽहनि निष्केवल्य एतत्सूक्तं शस्यं । सूचितं च । प्रेदं ब्रह्मेंद्रो मदाय सत्रा मदास इति निष्केवल्यं । आ० ७.१२. । इति ॥ विश्वजिति माध्यंदिनसवने प्रशास्तुः शस्त्र इदं साममसूक्ताख्यं शंसनीयं । सूचितं च । सत्रा मदासो यो जात

एवा भूरेक इति सामसूक्तानि । आ० ८.७। इति ॥ महाव्रतेऽपि निष्केवल्य एतस्य विनियोगः ॥

॥ तत्र प्रथमा ॥

सत्रा मदासस्तव विश्वजन्याः सत्रा रायोऽध ये पार्थिवासः ।
सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा असुर्यं ॥ १ ॥

सत्रा । मदासः । तव । विश्वऽजन्याः । सत्रा । रायः । अध । ये । पार्थिवासः ।
सत्रा । वाजानां । अभवः । विऽभक्ता । यत् । देवेषु । धारयथाः । असुर्यं ॥ १ ॥

हे इंद्र तव त्वदीया मदासः सोमपानजनिता मदाः सत्रा । सत्यनामैतत् । सत्यं विश्वजन्याः सर्वजनहिता भवंति । यद्वा सत्रेति महन्नाम । महांतस्तव मदा इति योज्यं । अधापि च पार्थिवासः पृथिव्युपलक्षिते लोकत्रये भवास्त्वदीया ये रायो धनसमूहाः संति तेऽपि सत्रा सत्यं विश्वजनहिता भवंतीत्यन्वयः । किंच त्वं वाजानामन्नानां सत्रा सत्यं विभक्ता दाताभवः । भवसि । यद्वा सत्रा महतां वाजानामिति योज्यं । यद्यस्मात्त्वं देवेषु मध्येऽसुर्यं बलं धारयथा अतः कारणात्त्वमेवं करोषीत्यर्थः ॥

॥ अथ द्वितीया ॥

अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय ।
स्यूमगृभे दुधयेऽर्वते च क्रतुं वृंजंत्यपि वृत्रहत्ये ॥ २ ॥

अनु । प्र । येजे । जनः । ओजः । अस्य । सत्रा । दधिरे । अनु । वीर्याय ।
स्यूमऽगृभे । दुधये । अर्वते । च । क्रतुं । वृंजंति । अपि । वृत्रऽहत्ये ॥ २ ॥

अस्येंद्रस्यौजो बलं जनो यजमानोऽनु प्र येजे । संततं प्रकर्षेण यजते । पूजयति । अपि च तमिंद्रं वीर्याय वीरकर्म कर्तुं सत्रा सत्यमनुदधिरे । पुरोदधिरे यजमानाः । यद्वा सत्रा महांतमिंद्रमिति योज्यं । अपि च स्यूमगृभे स्यूमः स्यूतानविच्छेदेन वर्तमानान् शत्रून् गृह्णते दुधये । दुधिर्हिंसाकर्मा । तेषां हिंसकायार्वते शत्रूणामभिगंत्रे च तस्मा इंद्राय क्रतुं कर्म परिचरणात्मकं वृंजंति निष्पादयंति । किमर्थं । वृत्रहत्ये वृत्रस्य वारकस्य शत्रोर्हनननिमित्तं ॥

॥ अथ तृतीया ॥

तं सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुरिंद्रं ।
समुद्रं न सिंधव उक्थशुष्मा उरुव्यचसं गिर आ विशंति ॥३॥
तं । सध्रीचीः । ऊतयः । वृष्ण्यानि । पौंस्यानि । निऽयुतः । सश्चुः । इंद्रं ।
समुद्रं । न । सिंधवः । उक्थऽशुष्माः । उरुऽव्यचसं । गिरः । आ । विशंति ॥३॥

तमिंद्रमूतयो मरुतः सध्रीचीः सहांचंत्यः संगता भूत्वा सश्चुः । सचंते । सेवंते । यद्वोतयस्तर्पकाण्यन्नानि सह वर्तमानानि भूत्वा सेवंते । तथा वृष्ण्यानि वीर्याणि पौंस्यानि बलानि च नियुतो रथे युज्यमाना वडवाश्च तमिंद्रं सेवंते । अपि चोक्थशुष्माः । उक्थं शस्त्रं । तदेव बलं यासां तादृशा गिरः स्तुतयश्चोरुव्यचसं विस्तीर्णव्याप्तिकं तमिंद्रमाविशंति । प्रविशंति । तत्र दृष्टांतः । समुद्रं न सिंधवः । यथा स्यंदनशीला नद्यः समुद्रमाविशंत्याविश्य च विभक्ततया न दृश्यंते एवं सर्वा अपि स्तुतय इंद्रेणैकीभवंतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

स रायस्खामुप सृजा गृणानः पुरुश्चंद्रस्य त्वमिंद्र वस्वः ।
पतिर्बभूथासमो जनानामेको विश्वस्य भुवनस्य राजा ॥४॥
सः । रायः । खां । उप । सृज । गृणानः । पुरुऽचंद्रस्य । त्वं । इंद्र । वस्वः ।
पतिः । बभूथ । असमः । जनानां । एकः । विश्वस्य । भुवनस्य । राजा ॥४॥

हे इंद्र गृणानः स्तूयमानः स त्वं रायो धनस्य खां । नदीनामैतत् । अत्र तत्संबद्धा धारा लक्ष्यते । धारामुपसृज । विमुंच । अस्माभिः संयोजयेत्यर्थः । कीदृशस्य धनस्य । पुरुश्चंद्रस्य बहूनामाह्लादकस्य वस्वो निवासकस्य । अपि चासमोऽनुपमः सर्वोत्कृष्टस्त्वं जनानां सर्वेषां प्राणिनां पतिरधिपतिर्बभूथ । तथा विश्वस्य सर्वस्य भुवनस्य भूतजातस्यैकोऽसाधारणो राजेश्वरश्च बभूविथ ॥

॥ अथ पंचमी ॥

स तु श्रुधि श्रुत्या यो दुवोयुर्द्यौर्न भूमाभि रायो अर्यः ।
असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः ॥५॥

सः । तु । श्रुधि । श्रुत्या । यः । दुवःऽयुः । द्यौः । न । भूमे । अभि । रायः । अर्यः ।
असः । यथा । नः । शवसा । चकानः । युगेऽयुगे । वयसा । चेकितानः ॥५॥

हे इंद्र श्रुत्या श्रुत्यानि श्रोतव्यानि स्तोत्राणि तु क्षिप्रं श्रुधि । शृणु । यस्त्वं दुवोयुरस्मदीयं परिचरणमात्मन इच्छन् अर्योऽरेः संबंधीनि रायो धनानि भूम बहुतराणि द्यौर्न सूर्य इवाभिभवसि स त्वं श्रुधीत्यन्वयः । अपि च शवसास्मदीयेन बलेन स्तोतव्येन युक्तश्चकानः स्तूयमानो युगे युगे काले काले वयसा हविर्लक्षणेनान्नेन चेकितानः प्रज्ञायमानस्त्वं यथा येन प्रकारेण नोऽस्माकमसाधारणोऽसि तथासः । स्याः ॥

॥ इति चतुर्थस्य सप्तमेऽष्टमो वर्गः ॥

अर्वाग्रथमिति पंचर्चं चतुर्दशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं । अर्वाग्रथमित्यनुक्रांतं ॥ महाव्रते निष्केवल्य उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

अर्वाग्रथं विश्ववारं त उग्रेंद्र युक्तासो हरयो वहंतु ।
कीरिश्चिद्धि त्वा हवते स्वर्वानृधीमहि सधमादस्ते अद्य ॥१॥
अर्वाक् । रथं । विश्वऽवारं । ते । उग्र । इंद्र । युक्तासः । हरयः । वहंतु ।
कीरिः । चित् । हि । त्वा । हवते । स्वःऽवान् । ऋधीमहि । सधऽमादः । ते । अद्य ॥१॥

हे उग्रोद्गूर्णबलेंद्र युक्तासो रथेन युक्ता हरयोऽश्वास्ते त्वदीयं विश्ववारं विश्वैर्वरणीयं रथमर्वागस्मदभिमुखं वहंतु । आनयंतु । हि यस्मात् स्वर्वान् । स्वः सुष्ठु रणीयं गुणजातं । तद्वान् कीरिश्चित् स्तोता भरद्वाज ऋषिस्त्वा त्वां हवते आह्वयति तस्मात्कारणात्त्वदीयं रथमभिमुखं वहंत्वित्यर्थः । वयं चाद्येदानीं ते त्वया सधमादः सह माद्यंत ऋधीमहि । समृद्धा भवेम ॥

तृतीये पर्यायेऽच्छावाकस्य प्रो द्रोण इत्येषा शस्त्रयाज्या । सूत्रितं च । प्रो द्रोणे हरयः कर्माग्मन्निति याज्या । आ० ६.४.। इति ॥

॥ सैषा द्वितीया ॥

प्रो द्रोणे हरयः कर्माग्मन्पुनानास ऋज्यंतो अभूवन् ।
इंद्रो नो अस्य पूर्व्यः पपीयाद्द्युक्षो मदस्य सोम्यस्य राजा ॥२॥

प्रो इति। द्रोणे। हरयः। कर्म। अग्मन्। पुनानासः। ऋज्यंतः। अभूवन्।
इंद्रः। नः। अस्य। पूर्व्यः। पपीयात्। द्युक्षः। मदस्य। सोम्यस्य। राजा ॥२॥

हरयो हरितवर्णाः सोमाः कर्मास्मदीयं यज्ञं प्रो अग्मन्। प्रकर्षेण गच्छंति। प्राप्नुवंति। प्राप्य च पुनानासः पूयमाना द्रोणे द्रोणकलश ऋज्यंत ऋजु गच्छंतोऽभूवन्। भवंति। पूर्व्यः पुरातनो द्युक्षो दीप्तेर्निवासभूतो द्युस्थानो वा मदस्य मदकरस्य सोम्यस्य सोमस्य राजेश्वर एवंभूत इंद्रश्चास्येमं सोमं पपीयात्। पिबतु॥

॥ अथ तृतीया ॥

आसस्राणासः शवसानमच्छेंद्रं सुचक्रे रथ्यासो अश्वाः।
अभि श्रव ऋज्यंतो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत् ॥३॥

आऽसस्राणासः। शवसानं। अच्छ। इंद्रं। सुऽचक्रे। रथ्यासः। अश्वाः।
अभि। श्रवः। ऋज्यंतः। वहेयुः। नु। चित्। नु। वायोः। अमृतं। वि। दस्येत् ॥३॥

आसस्राणासः परितो गच्छंतो रथ्यासो रथे युक्ता अश्वा ऋज्यंत ऋजुगमनाः संतः सुचक्रे शोभनचक्रे रथेऽवस्थितं शवसानं बलमिवाचरंतमिंद्रं श्रवः श्रवणीयमस्मदीयं हविरच्छाभिमुख्येनाभिवहेयुः। आवहेयुः। नूचिदिति निपातो निषेधेऽत्र वर्तते। अमृतममरणहेतुभूतं सोमलक्षणं हविर्वायोर्हेतोर्न्न इदानीं नूचित् नैव विदस्येत्। क्षयं न प्राप्नुयात्। पात्रे गृहीतः सोमो वायुना शुष्यति ततः पुरैव तत्पानार्थमश्वा इंद्रमभिवहेयुरित्यर्थः॥

॥ अथ चतुर्थी ॥

वरिष्ठो अस्य दक्षिणामियर्तींद्रो मघोनां तुविकूर्मितमः।
यया वज्रिवः परियास्यंहो मघा च धृष्णो दयसे वि सूरीन् ॥४॥

वरिष्ठः। अस्य। दक्षिणां। इयर्ति। इंद्रः। मघोनां। तुविकूर्मिऽतमः।
यया। वज्रिऽवः। परिऽयासि। अंहः। मघा। च। धृष्णो इति। दयसे। वि। सूरीन् ॥४॥

वरिष्ठ उरुतमस्तुविकूर्मितमोऽतिशयेन बहुविधकर्मेंद्रो मघोनां मघवतां हविर्लक्षणधनोपेतानां मध्येऽस्य यजमानस्य दक्षिणां यज्ञे दातव्यामियर्ति। प्रेरयति। यद्वा मघोनामित्यस्येत्यनेन समानाधिकरणं। वचनव्यत्ययः। मघोनो

हविष्मतोऽस्य यजमानस्येत्यर्थः। शेषः प्रत्यक्षकृतः। हे वज्रिवो वज्रवन्निंद्र यया दक्षिणया दत्रयांहः पापं यज्ञसंबंधि परियासि विनाशयसि हे धृष्णो धर्षक मघा मघानि धनानि सूरीन् स्तोतृन् पुष्यांश्च यया च दक्षिणया विदयसे प्रयच्छसि तादृशीं दक्षिणां प्रेरयसीत्यर्थः॥

॥ अथ पंचमी ॥

इंद्रो वाजस्य स्थविरस्य दातेंद्रो गीर्भिर्वर्धतां वृद्धमहाः।
इंद्रो वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः पृणति तूतुजानः ॥५॥
इंद्रः। वाजस्य। स्थविरस्य। दाता। इंद्रः। गीःऽभिः। वर्धतां। वृद्धऽमहाः।
इंद्रः। वृत्रं। हनिष्ठः। अस्तु। सत्वा। आ। ता। सूरिः। पृणति। तूतुजानः ॥५॥

अयमिंद्रः स्थविरस्य वाजस्यान्नस्य बलस्य वा दाता भवतु। स चेंद्रो वृद्धमहाः प्रवृद्धतेजस्कः सन् गीर्भिरस्मदीयाभिः स्तुतिभिर्वर्धतां। सत्वा शत्रूणां शातयिता स इंद्रो वृत्रमावरकं शत्रुं हनिष्ठो हंतृतमोऽस्तु। भवतु। अपि च सूरिः प्रेरकः स इंद्रस्तूतुजानस्त्वरमाणस्ता तानि धनान्यापृणति। अस्मभ्यं प्रयच्छतु॥

॥ इति चतुर्थस्य सप्तमे नवमो वर्गः ॥

अपादित इति पंचर्चं पंचदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं। अपादित्यनुक्रांतं॥ महाव्रते निष्केवल्य उक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

अपादित उदु नश्चित्रतमो महीं भर्षद्द्युमतीमिंद्रहूतिं।
पन्यसीं धीतिं दैव्यस्य यामन् जनस्य रातिं वनते सुदानुः ॥१॥
अपात्। इतः। उत्। ऊं इति। नः। चित्रऽतमः। महीं। भर्षत्। द्युऽमतीं। इंद्रऽहूतिं।
पन्यसीं। धीतिं। दैव्यस्य। यामन्। जनस्य। रातिं। वनते। सुऽदानुः ॥१॥

चित्रतमश्चायनीयतम आश्चर्यतमो वा स इंद्रो नोऽस्मदीयादितोऽस्माद्ग्रहचमसादेरपात्। सोमं पिबतु। यद्वेतोऽस्माच्छत्रोर्नोऽस्मानपात्। पातु। रक्षतु। उदु इत्येतौ पूरणौ। तथा महीं महतीं द्युमतीं दीप्तिमतीमिंद्रहूतिमिंद्रस्य स्तुतिं भर्षत्। स इंद्रो बिभर्तु। धारयतु। दैव्यस्य देवसंबंधिनो जनस्य यामन् यामनि

यद्वे क्रियमाणां पन्यसीं स्तुत्यतमां धीतिं परिचरणरूपां क्रियां रातिं दातव्यं हविश्च सुदानुः शोभनदान इंद्रो वनते । संभजतु ॥

॥ अथ द्वितीया ॥

दूराच्चिदा वसतो अस्य कर्णा घोषादिंद्रस्य तन्यति ब्रुवाणः ।
एयमेनं देवहूतिर्ववृत्यान्मद्र्य१गिंद्रमियमृच्यमाना ॥ २ ॥

दूरात् । चित् । आ । वसतः । अस्य । कर्णा । घोषात् । इंद्रस्य । तन्यति । ब्रुवाणः ।
आ । इयं । एनं । देवऽहूतिः । ववृत्यात् । मद्र्यक् । इंद्रं । इयं । ऋच्यमाना ॥ २ ॥

अस्येंद्रस्य कर्णा कर्णौ दूराच्चित् दूरदेशादप्यावसतः । स्तोत्रश्रवणार्थमागच्छतः । इंद्रस्य घोषाद्घोषणीयात्स्तोत्राद्धेतोर्ब्रुवाणः स्तुवन् स्तोता तन्यति । शब्दं करोति । यद्वा सर्वत्र विस्तारयति । देवहूतिर्देवस्येंद्रस्याह्वानरूपेयं स्तुतिश्च ऋच्यमाना स्वयं प्रेर्यमाणा सत्येनमिंद्रं मद्र्यक् मदभिमुखमाववृत्यात् । आवर्तयतु । पुनरियमिति पूरणः ॥

॥ अथ तृतीया ॥

तं वो धिया परमया पुराजामजरमिंद्रमभ्यनूष्यर्कैः ।
ब्रह्मा च गिरो दधिरे समस्मिन्महांश्च स्तोमो अधि वर्धदिंद्रे ॥ ३ ॥

तं । वः । धिया । परमया । पुराऽजां । अजरं । इंद्रं । अभि । अनूषि । अर्कैः ।
ब्रह्म । च । गिरः । दधिरे । सं । अस्मिन् । महान् । च । स्तोमः । अधि । वर्धत् । इंद्रे ॥ ३ ॥

हे इंद्र तं तादृशमिंद्रं वस्त्वां । व्यत्ययेन बहुवचनं । परमयोत्कृष्टतमया धिया स्तुत्यार्कैरर्चनसाधनैर्हविर्भिः सार्धमभ्यनूषि । अभिष्टौमि । कीदृशं । पुराजां पूर्वस्मिन्काले जातं चिरंतनमजरं जरारहितं नित्यं । अतः कारणादस्मिन्निंद्रे ब्रह्म ब्रह्माणि हविर्लक्षणान्यन्नानि गिरः स्तुतयश्च संदधिरे । संधीयंते । संश्लिष्यंते । महान् प्रवृद्धः स्तोमश्चाधि वर्धत् । अधिकं वर्धते ॥

॥ अथ चतुर्थी ॥

वर्धाद्यं यज्ञ उत सोम इंद्रं वर्धाद्ब्रह्म गिर उक्था च मन्म ।
वर्धाहैनमुषसो यामन्नक्तोर्वर्धान्मासाः शरदो द्याव इंद्रं ॥ ४ ॥

वर्धात्। यं। यज्ञः। उत। सोमः। इंद्रं। वर्धात्। ब्रह्म। गिरः। उक्था। च। मन्म।

वर्ध। अह। एनं। उषसः। यामन्। अक्तोः। वर्धान्। मासाः। शरदः। द्यावः। इंद्रं ॥४॥

यमिंद्रं यज्ञो यागो वर्धात् वर्धयति। उतापि च तत्साधनभूतः सोमश्च यमिंद्रं वर्धयति। तथा ब्रह्म हविर्लक्षणमन्नं च पुरोडाशादिकं यमिंद्रं वर्धात् वर्धयति। गिरः स्तोत्राणि मन्म मननीयान्युक्थोक्थशस्त्राणि च यं वर्धयंति एनमिंद्रमुषसश्चाक्तो रात्रेर्यामन् यामनि गमने सति वर्ध। वर्धयंति। मासाः शरदः संवत्सराश्च द्यावो दिवसाश्चैनमिंद्रं वर्धान्। वर्धयंति ॥

॥ अथ पंचमी ॥

एवा जज्ञानं सहसे असामि वावृधानं राधसे च श्रुताय।

महामुग्रमवसे विप्र नूनमा विवासेम वृत्रतूर्येषु ॥५॥

एव। जज्ञानं। सहसे। असामि। ववृधानं। राधसे। च। श्रुताय।

महां। उग्रं। अवसे। विप्र। नूनं। आ। विवासेम। वृत्रऽतूर्येषु ॥५॥

हे विप्र मेधाविन्निंद्र एवैवं जज्ञानं प्रादुर्भवंतं सहसे शत्रूणामभिभवार्थमसामि बहुलं वावृधानं वर्धमानं महां महांतमुग्रमुद्गूर्णबलं त्वां नूनमद्य वृत्रतूर्येषु श्रुताय विश्रुताय राधसे धनाय चावसे रक्षणाय चाविवासेम। परिचरेम ॥

॥ इति चतुर्थस्य सप्तमे दशमो वर्गः ॥

मंद्रस्य कवेरिति पंचर्चं षोडशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं। मंद्रस्येत्यनुक्रांतं ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

मंद्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वचनस्य मध्वः।

अपा नस्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः ॥१॥

मंद्रस्य। कवेः। दिव्यस्य। वह्नेः। विप्रऽमन्मनः। वचनस्य। मध्वः।

अपाः। नः। तस्य। सचनस्य। देव। इषः। युवस्व। गृणते। गोऽअग्राः ॥१॥

मंद्रस्य मोदनस्य मदकरस्य वा कवेर्विक्रांतस्य दिव्यस्य दिवि भवस्य वह्नेर्वोढुर्विप्रमन्मनः। विप्रा मेधाविनो मन्मनः स्तोतारो यस्य स तथोक्तः। तस्य

वचनस्य वचनीयस्य स्तुत्यस्य तस्य सर्वत्र प्रसिद्धस्य सचनस्य सेव्यस्य एवंभूतस्य मध्वो मधुनः सोमस्य ॥ क्रियायहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ एवंभूतं नोऽस्मदीयं सोमं हे इंद्र त्वमपाः । पिब । अपि च हे देव द्योतमानेंद्र गृणते स्तुवते ॥ तृतीयार्थे चतुर्थी ॥ स्तुवता मया गोअग्राः । गावोऽग्रे प्रमुखे यासां तादृशा इषोऽन्नानि युवस्व । संयोजय ॥

॥ अथ द्वितीया ॥

अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिर्ऋतयुग्युजानः ।
रुजदरुग्णं वि वलस्य सानुं पणींर्वचोभिरभि योधदिंद्रः ॥ २ ॥

अयं । उशानः । परि । अद्रिं । उस्राः । ऋतधीतिऽभिः । ऋतऽयुक् । युजानः ।
रुजत् । अरुग्णं । वि । वलस्य । सानुं । पणीन् । वचःऽभिः । अभि । योधत् । इंद्रः ॥ २ ॥

अयमिंद्रोऽद्रिं वलेन गोपिधानाय निर्मितं शिलोच्चयं परि परितः पर्वतसमीपे विद्यमाना उस्रा गा उशानः कामयमान ऋतधीतिभिः सत्यकर्मभिरंगिरोभिर्युजानः संगच्छमान ऋतयुक् ऋतेन तत्कृतेन स्तोत्रेण युक्तश्च भूत्वा वलस्यासुरस्य स्वभूतं सानुमुच्छ्रितं पर्वतमरुग्णमन्यैरभग्नं विरुजत् । व्यभांक्षीत् । किंच पणीन्वलानुचरानेतत्संज्ञानसुरांश्च वचोभिः स्तुत्यैरायुधैः संतर्जनरूपैर्वाक्यैरेव वायमिंद्रोऽभियोधत् । अभ्ययुध्यत् ॥

॥ अथ तृतीया ॥

अयं द्योतयदद्युतो व्य१क्तून्दोषा वस्तोः शरद इंदुरिंद्र ।
इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार ॥ ३ ॥

अयं । द्योतयत् । अद्युतः । वि । अक्तून् । दोषा । वस्तोः । शरदः । इंदुः । इंद्र ।
इमं । केतुं । अदधुः । नु । चित् । अह्नां । शुचिऽजन्मनः । उषसः । चकार ॥ ३ ॥

हे इंद्र त्वया नियम्यमानः पीयमानो वायमिंदुः सोमोऽद्युतोऽद्योतमानानक्तून् । अक्तुरिति रात्रिनाम । अत्र च तत्संबंधात्पक्षमासादयो लक्ष्यंते । पक्षमासादीन् तथा दोषा रात्रिं वस्तोर्दिवसं शरदः संवत्सरांश्च विद्योतयत् । व्यदीपयत् । कुत इत्यत आह । नूचित् पुरा देवा इमं सोमं चंद्रात्मना नभसि वर्तमानमह्नां दिवसानां केतुं प्रज्ञापकं यस्माददधुः व्यदधुः अकुर्वन् तस्मादनेन

पक्षमासादयः सर्वे प्रकाश्यंते । चंद्रगत्यधीनत्वात्तिथिविभागानां । अपि चायं सोम उषस उषःकालान् शुचिजन्मनात्मीयेन तेजसा शुद्धोदयान् चकार । करोति ॥

॥ अथ चतुर्थी ॥

अयं रोचयदरुचो रुचानो३ऽयं वासयद्व्यृ१तेन पूर्वीः ।

अयमीयत ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः ॥४॥

अयं । रोचयत् । अरुचः । रुचानः । अयं । वासयत् । वि । ऋतेन । पूर्वीः ।

अयं । ईयते । ऋतयुक्ऽभिः । अश्वैः । स्वःऽविदा । नाभिना । चर्षणिऽप्राः ॥४॥

अयमिंद्रो रुचानो रोचमानः सूर्यात्मना दीप्यमानोऽरुचः प्रकाशरहितान् तमसा मलीमसान् सर्वांल्लोकान्रोचयत् । प्रकाशयति । तथा पूर्वीर्बह्वीरुषसश्चायमिंद्र ऋतेन सत्यभूतेन सर्वत्र गमनशीलेन वा तेजसा विवासयत् । व्यापयति । तत्रत्यानि तमांसि निवर्तयतीत्यर्थः । तथा ऋतयुग्भिर्ऋतेन स्तोत्रेण युज्यमानैरश्वैर्नाभिना संनद्धेन स्वर्विदा सुष्ठुरणीयस्य धनस्य लंभकेन रथेन चर्षणिप्राश्चर्षणीनां मनुष्याणां कामैः पूरयिता सन् अयमेवेंद्र ईयते । गच्छति ॥

॥ अथ पंचमी ॥

नू गृणानो गृणते प्रत्न राजन्निषः पिन्व वसुदेयाय पूर्वीः ।

अप ओषधीरविषा वनानि गा अर्वतो नॄनृचसे रिरीहि ॥५॥

नु । गृणानः । गृणते । प्रत्न । राजन् । इषः । पिन्व । वसुऽदेयाय । पूर्वीः ।

अपः । ओषधीः । अविषा । वनानि । गाः । अर्वतः । नॄन् । ऋचसे । रिरीहि ॥५॥

हे प्रत्न पुरातन राजन् राजमानेंद्र गृणानः स्तूयमानस्त्वं वसुदेयाय वसूनि धनानि त्वया देयानि यस्मै तादृशाय गृणते स्तुवते पूर्वीर्बह्वीरिषोऽन्नानि नु क्षिप्रं पिन्व । सिंच । प्रयच्छेत्यर्थः । किंच ऋचसेऽर्चयित्रे स्तोत्रेऽपो वृष्टिलक्षणान्युदकान्योषधीर्व्रीह्यादीन् अविषा विषरहितानि रक्षकाणि वा वनानि वृक्षजातानि चूतपनसादीनि गा अर्वतोऽश्वान्नॄन्मनुष्यांश्च कर्मकरान् रिरीहि । देहि ॥

॥ इति चतुर्थस्य सप्तम एकादशो वर्गः ॥

इंद्र पिबेति पंचर्चं सप्तदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं । इंद्र पिबेत्यनुक्रांतं ॥

गतः सूक्तविनियोगः ॥ प्रथमे रात्रिपर्यायेऽच्छावाकस्याद्या शस्त्रयाज्या । सूचितं च । इंद्र पिब तुभ्यं सुतो मदाय । आ० ६. १४. । इति ॥

॥ सैषा तत्र प्रथमा ॥

इंद्र पिब तुभ्यं सुतो मदायाव स्य हरी वि मुंचा सखाया ।
उत प्र गाय गण आ निषद्याथा यज्ञाय गृणते वयो धाः ॥ १ ॥
इंद्र । पिब । तुभ्यं । सुतः । मदाय । अव । स्य । हरी इति । वि । मुच । सखाया ।
उत । प्र । गाय । गणे । आ । निऽसद्य । अथ । यज्ञाय । गृणते । वयः । धाः ॥ १ ॥

हे इंद्र तं सोमं पिब यः सोमस्तुभ्यं मदाय मदार्थं सुतोऽभिषुतः । यतस्त्वया सोमः पातव्योऽतः कारणात्सखाया समानख्यानौ मित्रभूतौ वा हरी अश्वाववस्य । अवस्थापय । तदनंतरं विमुच । रथाद्विमुंच । उतापि च गणेऽस्मत्स्तोतृसंघ आ आभिमुख्येन निषद्योपविश्य प्रगाय । अस्माभिः कृतं स्तोत्रमुपश्लोकय । अथानंतरं यज्ञाय यजमानाय गृणते स्तुवते वयोऽन्नं धाः । देहि ॥

द्वितीये रात्रिपर्यायेऽच्छावाकस्य पिबेति शस्त्रयाज्या । सूचितं च । अस्य पिबेति याज्या । आ० ६. ४. । इति ॥

॥ सैषा सूक्ते द्वितीया ॥

अस्य पिब यस्य जज्ञान इंद्र मदाय क्रत्वे अपिबो विरप्शिन् ।
तमु ते गावो नर आपो अद्रिरिंदुं समह्यन्पीतये समस्मै ॥ २ ॥
अस्य । पिब । यस्य । जज्ञानः । इंद्र । मदाय । क्रत्वे । अपिबः । विऽरप्शिन् ।
तं । ऊं इति । ते । गावः । नरः । आपः । अद्रिः । इंदुं । सं । अह्यन् । पीतये । सं । अस्मै ॥ २ ॥

हे इंद्र अस्येमं सोमं पिब । हे विरप्शिन् महन् जज्ञानो जायमान एव त्वं यस्य यं सोममपिबः पूर्वं पीतवानसि । किमर्थं । मदाय हर्षाय क्रत्वे कर्मणे वृत्रवधादिलक्षणं वीर्यकर्म कर्तुं च । तमु तादृशमेवेंदुं सोमं गावो गवि भवाः श्रपणसाधनाः क्षीरादयो नरो नेतारोऽध्वर्यव आपो वसतीवर्याख्या अद्रिरभिषवार्थो ग्रावा एते सर्वेऽस्मा अस्येंद्रस्य ते तव पीतये पानार्थं समह्यन् । समगमयन् ॥ हि गतावित्यस्यैतद्रूपं । पुनः समिति पूरकः ॥

॥ अथ तृतीया ॥

समिद्धे अग्नौ सुत इंद्र सोम आ त्वा वहंतु हरयो वहिष्ठाः ।
त्वायता मनसा जोहवीमींद्रा याहि सुविताय महे नः ॥ ३ ॥
संऽइद्धे । अग्नौ । सुते । इंद्र । सोमे । आ । त्वा । वहंतु । हरयः । वहिष्ठाः ।
त्वाऽयता । मनसा । जोहवीमि । इंद्र । आ । याहि । सुविताय । महे । नः ॥ ३ ॥

अग्नौ समिद्धे दीप्ते सोमे सुतेऽभिषुते सति हे इंद्र त्वा त्वां वहिष्ठा वोढृतमा हरयोऽश्वा आवहंतु । इमं यज्ञं प्रत्यानयंतु । अहं च त्वायता त्वां कामयमानेन मनसा जोहवीमि । पुनः पुनराह्वयामि । हे इंद्र त्वं नोऽस्माकं महे महते सुविताय कल्याणायायाहि । आगच्छ ॥

॥ अथ चतुर्थी ॥

आ याहि शश्वदुशता ययाथेंद्र महा मनसा सोमपेयं ।
उप ब्रह्माणि शृणव इमा नोऽथा ते यज्ञस्तन्वे३ वयो धात् ॥ ४ ॥
आ । याहि । शश्वत् । उशता । ययाथ । इंद्र । महा । मनसा । सोमऽपेयं ।
उप । ब्रह्माणि । शृणवः । इमा । नः । अथ । ते । यज्ञः । तन्वे । वयः । धात् ॥ ४ ॥

हे इंद्र पुरा शश्वद्बहुकृत्वो ययाथ । सोमपानार्थं यज्ञं गतवानसि । अतः कारणादुशतास्मान्कामयमानेन महा महता मनसा सह सोमपेयं सोमः पीयते यस्मिन् तादृशमस्मदीयं यज्ञमायाहि । अभिगच्छ । आगत्य च ब्रह्माणि स्तोत्राणीमेदानीं प्रयुज्यमानानि नोऽस्मदीयान्युपशृणवः । उपशृणु । अथानंतरं यज्ञो यजमानस्ते तव तन्वे शरीराय त्वच्छरीरपोषार्थं वयोऽन्नं सोमात्मकं धात् । ददातु ॥

॥ अथ पंचमी ॥

यदिंद्र दिवि पार्ये यदृधग्यद्वा स्वे सदने यत्र वासि ।
अतो नो यज्ञमवसे नियुत्वान्त्सजोषाः पाहि गिर्वणो मरुद्भिः ॥ ५ ॥
यत् । इंद्र । दिवि । पार्ये । यत् । ऋधक् । यत् । वा । स्वे । सदने । यत्र । वा । असि ।
अतः । नः । यज्ञं । अवसे । नियुत्वान् । सऽजोषाः । पाहि । गिर्वणः । मरुत्ऽभिः ॥ ५ ॥

हे इंद्र पार्ये पारगे दूरदेशे दिवि द्युलोकाख्ये यद्यदि त्वं वर्तसे । यदि वा

पृथक्। एतत्पृथक्छब्देन समानार्थं। पृथगन्यस्मिन्देशे वर्तसे। यद्वा स्वे स्वकीये सदने गृहे। अथवा किमनेन विशेषणेन यत्र यस्मिन्देशेऽसि भवसि अतोऽस्मात्स्थानादागत्य हे गिर्वणो गिरां संभक्तरिंद्र नियुत्वान्। नियुतोऽश्वाः। तद्वान्मरुद्भिः सजोषाः सह प्रीयमाणस्त्वं नोऽस्माकमवसे रक्षणाय यज्ञमस्मदीयं यागं पाहि। रक्ष। यद्वा यज्ञं यजनसाधनमस्मदीयं सोममवसे तर्पणाय पाहि। पिब ॥

॥ इति चतुर्थस्य सप्तमे द्वादशो वर्गः ॥

अहेळमान इति पंचर्चमष्टादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं। अनुक्रांतं च। अहेळमान इति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

अहेळमान उप याहि यज्ञं तुभ्यं पवंत इंदवः सुतासः।
गावो न वज्रिन्त्स्वमोको अच्छेंद्रा गहि प्रथमो यज्ञियानां ॥१॥

अहेळमानः। उप। याहि। यज्ञं। तुभ्यं। पवंते। इंदवः। सुतासः।
गावः। न। वज्रिन्। स्वं। ओकः। अच्छ। इंद्र। आ। गहि। प्रथमः। यज्ञियानां ॥१॥

हे इंद्र अहेळमानोऽक्रुध्यंस्त्वं यज्ञमस्मदीयमुपयाहि। उपगच्छ। यतः कारणात्तुभ्यं त्वदर्थं सुतासोऽभिषुता इंदवः सोमाः पवंते पूयंते दशापवित्रेण शोध्यंते। हे वज्रिन् वज्रवन्निंद्र गावो न गावः स्वकीयं गोष्ठमिव स्वं स्वकीयमोकः स्थानं द्रोणकलशादिलक्षणमच्छाभिमुख्येन। प्राप्नुवंतीति शेषः। अतः कारणात् हे इंद्र यज्ञियानां यज्ञार्हाणां देवानां मध्ये प्रथमो मुख्यस्त्वमागहि। आगच्छ ॥

॥ अथ द्वितीया ॥

या ते काकुत्सुकृता या वरिष्ठा यया शश्वत्पिबसि मध्व ऊर्मिं।
तया पाहि प्र ते अध्वर्युरस्थात्सं ते वज्रो वर्ततामिंद्र गव्युः ॥२॥

या। ते। काकुत्। सुऽकृता। या। वरिष्ठा। यया। शश्वत्। पिबसि। मध्वः। ऊर्मिं।
तया। पाहि। प्र। ते। अध्वर्युः। अस्थात्। सं। ते। वज्रः। वर्ततां। इंद्र। गव्युः ॥२॥

हे इंद्र या ते तव काकुज्जिह्वा सुकृता सुष्ठु धात्रा निर्मिता। या च वरिष्ठोरुतमा विस्तीर्णतमा। यया च मध्वो मधुनः सोमस्योर्मिं रसं शश्वद्बहुकृत्वः पिबसि

तया जिह्वयास्मदीयं सोमं पाहि। पिब। तदर्थमध्वर्युरध्वरस्य नेता ऋत्विग्गृहीतसोमः सन् प्रास्थात्। हविर्धानादुत्तरवेदिदेशं प्रत्यगमत्। अपि च हे इंद्र गव्युः शत्रुसंबंधिनीर्गा आत्मन इच्छन् ते त्वदीयो वज्रः संवर्ततां। शत्रुभिः संगतो भवतु। तान् हंत्वित्यर्थः॥

॥ अथ तृतीया ॥

एष द्रप्सो वृषभो विश्वरूप इंद्राय वृष्णे समकारि सोमः।
एतं पिब हरिवः स्थातरुग्र यस्येशिषे प्रदिवि यस्ते अन्नं ॥३॥
एषः। द्रप्सः। वृषभः। विश्वऽरूपः। इंद्राय। वृष्णे। सं। अकारि। सोमः।
एतं। पिब। हरिऽवः। स्थातः। उग्र। यस्य। ईशिषे। प्रऽदिवि। यः। ते। अन्नं ॥३॥

द्रप्सो द्रवणशीलो वृषभः कामानां वर्षिता विश्वरूपो बहुविधरूपोपेत ईदृग्विध एष सोमो वृष्णे कामानां वर्षित्र इंद्रायेंद्रस्य पानार्थं समकारि। अभिषवादिभिः संस्कृतोऽभूत्। हे हरिवः। हरी अश्वौ। तद्वन् हे स्थातः सर्वेषामधिष्ठातरुग्रोद्गूर्णबलेंद्र एतमीदृशं सोमं पिब। यस्य सोमस्य प्रदिवि। जातावेकवचनं। प्रभूतेषु दिवसेषु प्रगतेष्वहःसु वेशिषे त्वमेवेश्वरो भवसि। यश्च सोमस्ते तवान्नमन्नत्वेन परिकल्पित एतं पिबेत्यन्वयः॥

॥ अथ चतुर्थी ॥

सुतः सोमो असुतादिंद्र वस्यानयं श्रेयान् चिकितुषे रणाय।
एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तविषीरा पृणस्व ॥४॥
सुतः। सोमः। असुतात्। इंद्र। वस्यान्। अयं। श्रेयान्। चिकितुषे। रणाय।
एतं। तितिर्वः। उप। याहि। यज्ञं। तेन। विश्वाः। तविषीः। आ। पृणस्व ॥४॥

हे इंद्र सुतोऽभिषुतोऽयं सोमोऽसुतादकृताभिषवात्सोमादन्यदीयाद्वस्यान् वसीयान् वसुमत्तरः प्रशस्यतरः। तथा चिकितुषे विदुषेऽभिज्ञाय तुभ्यं रणाय रमणीयाय तदर्थं श्रेयान् श्रेष्ठश्च भवति। त्वामतिशयेन रमयितेत्यर्थः। हे तितिर्वः शत्रूणां तरितरिंद्र यजनसाधनमेतं सोममुपयाहि। उपगतेन च सोमेन विश्वास्तविषीः सर्वाणि बलान्यापृणस्व। आपूरय॥

॥ अथ पंचमी ॥

ह्वयामसि त्वेंद्र याह्यर्वाङरं ते सोमस्तन्वे भवाति ।

शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु ॥ ५ ॥

ह्वयामसि । त्वा । आ । इंद्र । याहि । अर्वाङ् । अरं । ते । सोमः । तन्वे । भवाति ।

शतक्रतो इति शतऽक्रतो । मादयस्व । सुतेषु । प्र । अस्मान् । अव । पृतनासु ।

प्र । विक्षु ॥ ५ ॥

हे इंद्र त्वा त्वां ह्वयामसि । आह्वयामः । अतः कारणात्त्वमर्वाङस्मदभिमुखः सन् आयाहि । आगच्छ । अस्मदीयः सोमश्च ते तन्वे तव शरीरायारं पर्याप्तं भवाति । भवतु । त्वदीयं शरीरं यथाभिलाषं तर्पयत्वित्यर्थः । हे शतक्रतो बहुविधकर्मन्निंद्र त्वं च सुतेष्वभिषुतेष्वस्मदीयेषु सोमेषु मादयस्व । तृप्यस्व ॥ मद तृप्तियोगे ॥ तदनंतरं पृतनासु संग्रामेष्वस्मान्प्राव । प्रकर्षेण रक्ष । न केवलं पृतनासु किंतु विक्षु सर्वासु प्रजास्वस्मान्प्राव । प्ररक्ष ॥

॥ इति चतुर्थस्य सप्तमे त्रयोदशो वर्गः ॥

प्रत्यस्मा इति चतुर्ऋचमेकोनविंशं सूक्तं भरद्वाजस्यार्षमैंद्रं । चतुर्थी बृहती शिष्टा अनुष्टुभः । तथा चानुक्रांतं । प्रत्यस्मै चतुष्कमानुष्टुभं बृहत्यंतमिति ॥ प्रातःसवनेऽच्छावाकस्येदमुन्नीयमानसूक्तं । सूचितं च । प्रत्यस्मा इत्युन्नीयमानायानूच्य । आ० ५.७. । इति ॥

॥ तत्र प्रथमा ॥

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।

अरंगमाय जग्मयेऽपश्चाद्दघ्वने नरे ॥ १ ॥

प्रति । अस्मै । पिपीषते । विश्वानि । विदुषे । भर ।

अरंऽगमाय । जग्मये । अपश्चात्ऽदघ्वने । नरे ॥ १ ॥

हे अध्वर्यो अस्मा इंद्राय प्रतिभर । अभिहर । सोमं प्रयच्छेत्यर्थः । कीदृशायेंद्राय । पिपीषते पातुमिच्छते विश्वानि सर्वाणि वेद्यानि विदुषे जानतेऽरंगमाय पर्याप्तगमनाय जग्मये यज्ञेषु गमनशीलायापश्चाद्दघ्वने ॥ दघिर्गतिकर्मा ॥ अपश्चाद्गमनाय सर्वेषामग्रगामिने नरे नेत्रे यज्ञानां ॥

तृतीये स्वरसाम्नि निष्केवल्य एमेनमिति स्तोत्रियस्तृचः। सूत्रितं च। एमेनं प्रत्येतनेत्याद्यो वा सर्वेषां। आ० ८.५.। इति ॥

॥ तत्र प्रथमा सूक्ते द्वितीया ॥

एमेनं प्रत्येतन सोमेभिः सोमपातमं।

अमत्रेभिर्ऋजीषिणमिंद्रं सुतेभिरिंदुभिः ॥२॥

आ। ईं। एनं। प्रति॑ऽएतन। सोमेभिः। सोमऽपातमं।

अमत्रेभिः। ऋजीषिणं। इंद्रं। सुतेभिः। इंदुऽभिः ॥२॥

हे अध्वर्यवः सोमेभिः सोमैः करणभूतैः सोमपातममतिशयेन सोमस्य पातारमेनमिंद्रमा अभिमुखं प्रत्येतन। प्रतिगच्छत। ईमिति निपातोऽनर्थकः। कीदृशमिंद्रं। अमत्रेभिरमत्रैः सोमपात्रैर्ग्रहचमसादिभिर्ऋजीषिणं। ऋजीषं शत्रूणामुपार्जकं बलं। तद्वंतं। यद्वा ऋजीषिणमित्युत्तरत्र संबंधनीयं। सुतेभिरभिषुतैरिंदुभिः सोमैर्ऋजीषिणं। गतसारः सोम ऋजीषः। तद्वंतं। अथवामत्रेभिरमत्रैरमात्रैरपरिमितैरभिषुतैः सोमैर्ऋजीषिणं॥ ऋजेर्गत्यर्थाद्भावसाधन ऋजीषशब्दः। ततो मत्वर्थीय इनिः॥ संगतमित्यर्थः। एवंविधमिंद्रं प्रतिगच्छतेत्यन्वयः। अन्य आह। अमत्रेभिर्ग्रहचमसादिगतैरभिषुतैः सोमैर्ऋजीषिणं बलवंतमेनमिंद्रं प्रतिगच्छतेति ॥

॥ अथ तृतीया ॥

यदीं सुतेभिरिंदुभिः सोमेभिः प्रतिभूषथ।

वेदा विश्वस्य मेधिरो धृषत्तंतमिदेषते ॥३॥

यदि। सुतेभिः। इंदुऽभिः। सोमेभिः। प्रतिऽभूषथ।

वेद। विश्वस्य। मेधिरः। धृषत्। तंऽतं। इत्। आ। ईषते ॥३॥

हे अध्वर्यवः सुतेभिरभिषुतैरिंदुभिरुंदनशीलैर्द्रवैः सोमेभिः सोमैर्यदि प्रतिभूषथ इंद्रं प्रति यूयं प्रतिगच्छथ॥ भू प्राप्तावित्यस्यैतद्रूपं॥ तदानीं मेधिरो मेधावी। मेधो यज्ञस्तद्वान्वा। स इंद्रो विश्वस्य विश्वं सर्वं भवदीयं कामं वेद। वेत्ति। जानाति। ज्ञात्वा च धृषत् शत्रूणां धर्षकः सन् तं तमित्तं तं काममेवैषते। प्रापयति ॥

॥ अथ चतुर्थी ॥

अस्माअस्मा इदंधसोऽध्वर्यो प्र भरा सुतं ।

कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्परत् ॥ ४ ॥

अस्मैऽअस्मै । इत् । अंधसः । अध्वर्यो इति । प्र । भर । सुतं ।

कुवित् । समस्य । जेन्यस्य । शर्धतः । अभिऽशस्तेः । अवऽस्परत् ॥ ४ ॥

अस्मा अस्मा इत् अस्मा एवेंद्राय नान्यस्मै हे अध्वर्यो त्वमंधसः सोमलक्षणस्यान्नस्य सुतमभिषुतं रसं प्रभर । संप्रहर । प्रयच्छेति यावत् । स चेंद्रः समस्य सर्वस्य जेन्यस्य जेतव्यस्य शर्धत उत्सहमानस्य शत्रोरभिशस्तेरभिशंसनात् तत्कृताद्धिंसनात्कुविद्बहुशोऽवस्परत् । अस्मान्पालयतु ॥

॥ इति चतुर्थस्य सप्तमे चतुर्दशो वर्गः ॥

यस्य त्यदिति चतुर्ऋचं विंशं सूक्तं भरद्वाजस्यार्षमौष्णिहमैंद्रं । अनुक्रम्यते च । यस्यौष्णिहमिति ॥ महाव्रतेऽपि निष्केवल्येऽप्यौष्णिहतृचाशीतावेतत्सूक्तं । तथैव पंचमारण्यके सूचितं । यस्य त्यच्छंबरं मद इति चयस्तृचा गायत्र्यः । ऐ० आ० ५.११. । इति ॥

॥ तत्र प्रथमा ॥

यस्य त्यच्छंबरं मदे दिवोदासाय रंधयः ।

अयं स सोम इंद्र ते सुतः पिब ॥ १ ॥

यस्य । त्यत् । शंबरं । मदे । दिवःऽदासाय । रंधयः ।

अयं । सः । सोमः । इंद्र । ते । सुतः । पिब ॥ १ ॥

हे इंद्र यस्य सोमस्य मदे पानेन जनिते हर्षे सति शंबरमसुरं दिवोदासाय राज्ञे रंधयः अहिंसीः । यद्वा वशीकृतवानसि ॥ रध्यतिर्वशगमन इति यास्कः ॥ त्यदिति क्रियाविशेषणं । त्यत्तत्प्रसिद्धं यथा भवति तथारंधय इत्यर्थः । हे इंद्र सोऽयं सोमस्ते त्वदर्थं सुतोऽभिषुतः । अतस्त्वं पिब ॥

॥ अथ द्वितीया ॥

यस्य तीव्रसुतं मदं मध्यमंतं च रक्षसे ।

अयं स सोम इंद्र ते सुतः पिब ॥ २ ॥

यस्य । तीव्रऽसुतं । मदं । मध्यं । अंतं । च । रक्षसे ।

अयं । सः । सोमः । इंद्र । ते । सुतः । पिब ॥२॥

हे इंद्र त्वं यस्य सोमस्यावयवभूतं तीव्रसुतं । तीक्ष्णं सुतमभिषवो यस्य स तीव्रसुतः प्रातःसवनिकः । तं मदं मदकरं सोमरसं मध्यं मध्यंदिनसवनगतमंतं तृतीयसवनगतं च सोमरसं रक्षसे रक्षसि सोऽयं सोमस्त्वदर्थमभिषुतस्त्वं पिबेति ॥

॥ अथ तृतीया ॥

यस्य गा अंतरश्मनो मदे दृळ्हा अवासृजः ।

अयं स सोम इंद्र ते सुतः पिब ॥३॥

यस्य । गाः । अंतः । अश्मनः । मदे । दृळ्हाः । अवऽअसृजः ।

अयं । सः । सोमः । इंद्र । ते । सुतः । पिब ॥३॥

यस्य सोमस्य मदे मदकरे रसे पीते सत्यश्मनो वलासुरेण निहितस्य पर्वतस्यांतर्मध्ये विद्यमाना दृळ्हा दृढपिधानाश्च गाः पणिभिरपहृता अवासृजः वलस्य बंधनाद्व्यसृजः स सोम इत्यादि गतं ॥

॥ अथ चतुर्थी ॥

यस्य मंदानो अंधसो माघोनं दधिषे शवः ।

अयं स सोम इंद्र ते सुतः पिब ॥४॥

यस्य । मंदानः । अंधसः । माघोनं । दधिषे । शवः ।

अयं । सः । सोमः । इंद्र । ते । सुतः । पिब ॥४॥

हे इंद्र त्वं यस्यांधसः सोमलक्षणस्यान्नस्य पानेन मंदानो मंदमानो हृष्टः सन् माघोनमैंद्रं शवोऽसाधारणं बलं दधिषे धारयसि । येन सोमेन तवेंद्रत्वं जातमित्यर्थः । सोऽयं सोमः सुतोऽभिषुतस्त्वं पिब ॥

॥ इति चतुर्थस्य सप्तमे पंचदशो वर्गः ॥

॥ इति षष्ठे मंडले तृतीयोऽनुवाकः ॥

चतुर्थेऽनुवाके षट् सूक्तानि । तत्र यो रयिव इति चतुर्विंशत्यृचं प्रथमं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षमैंद्रं । आदितः षडनुष्टुभः सप्तम्यष्टमीनवम्यो विरा-

ज्ञोऽष्टम्येकैव वा विराट् विराजस्त्रिष्टुभः। तथा चानुक्रांतं। यो रयिवश्चतुर्विंशतिः शंयुर्बार्हस्पत्यो ह्यादौ षडनुष्टुभस्तिस्रश्च विराजो मध्यमैव वासामिति ॥ गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

यो रयिवो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः।
सोमः सुतः स इंद्र तेऽस्ति स्वधापते मदः ॥१॥
यः। रयिऽवः। रयिंऽतमः। यः। द्युम्नैः। द्युम्नवत्ऽतमः।
सोमः। सुतः। सः। इंद्र। ते। अस्ति। स्वधाऽपते। मदः ॥१॥

हे रयिवो धनवन्निंद्र यः सोमो रयिंतमोऽतिशयेन रयिमान् धनवान्। यश्च द्युम्नैर्द्योतमानैर्यशोभिर्द्युम्नवत्तमोऽतिशयेन यशस्वी हे स्वधापते स्वधाया अन्नस्य सोमलक्षणस्य पालकेंद्र स सोमोऽभिषुतः सन् ते तव मदो मदकरोऽस्ति। भवति ॥

॥ अथ द्वितीया ॥

यः शग्मस्तुविशग्म ते रायो दामा मतीनां।
सोमः सुतः स इंद्र तेऽस्ति स्वधापते मदः ॥२॥
यः। शग्मः। तुविऽशग्म। ते। रायः। दामा। मतीनां।
सोमः। सुतः। सः। इंद्र। ते। अस्ति। स्वधाऽपते। मदः ॥२॥

हे तुविशग्म बहुसुखेंद्र यः शग्मः सुखकरस्ते त्वदीयः सोमो मतीनां स्तोतॄणां रायो धनस्य दामा दाता भवति हे स्वधापत इंद्र स सोमोऽभिषुतस्तव मदकरो भवति ॥

॥ अथ तृतीया ॥

येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः।
सोमः सुतः स इंद्र तेऽस्ति स्वधापते मदः ॥३॥
येन। वृद्धः। न। शवसा। तुरः। न। स्वाभिः। ऊतिऽभिः।
सोमः। सुतः। सः। इंद्र। ते। अस्ति। स्वधाऽपते। मदः ॥३॥

इमौ नशब्दौ समुच्चयार्थौ। येन पीतेन सोमेन वृद्धो न प्रवृद्धश्च सन् स्वाभि-

स्तुतिभिरात्मीयैर्मरुद्भिः सार्धं शवसा बलेन तुरः शत्रूणां हिंसकश्च भवसि स सोम इत्यादि पूर्ववत् ॥

पृष्ठ्यषडहस्य चतुर्थेऽहनि प्रउगशस्त्रे त्यमु व इत्यैंद्रस्तृचः । सूत्रितं च । त्यमु वो अप्रहणमप त्यं वृजिनं रिपुं । आ० ७.११. । इति ॥

॥ तत्र प्रथमा सूक्ते चतुर्थी ॥

त्यमु॑ वो॒ अप्र॑हणं गृणी॒षे शव॑स॒स्पति॑म् ।

इंद्रं॑ विश्वा॒साहं॒ नरं॒ मंहि॑ष्ठं वि॒श्वच॑र्षणिम् ॥ ४ ॥

त्यं । ऊं इति॑ । वः॒ । अप्र॑ऽहनं । गृ॒णी॒षे । शव॑सः । पति॑म् ।

इंद्रं॑ । वि॒श्व॒ऽसहं॑ । नरं॑ । मंहि॑ष्ठं । वि॒श्वऽच॑र्षणिम् ॥ ४ ॥

हे ऋत्विग्यजमाना वो युष्मदर्थं त्यमु तमेवेंद्रं गृणीषे । स्तौमि । यद्वा वो यूयं गृणीषे । गृणीत । स्तुत । वचनव्यत्ययः । कीदृशमिंद्रं । अप्रहणमप्रहंतारं भक्तानामनुग्राहकं शवसो बलस्य पतिं पालकं विश्वासाहं विश्वस्य शत्रोरभिभवितारं नरं नेतारं मंहिष्ठं दातृतमं विश्वचर्षणिं सर्वस्य द्रष्टारं ॥

॥ अथ पंचमी ॥

यं व॒र्धयं॑तीद्गिरः॒ पतिं॑ तु॒रस्य॒ राध॑सः ।

तमिन्न्व॑स्य॒ रोद॑सी दे॒वी शुष्मं॑ सपर्यतः ॥ ५ ॥

यं । व॒र्धयं॑ति । इत् । गिरः॑ । पतिं॑ । तु॒रस्य॑ । राध॑सः ।

तं । इत् । नु । अ॒स्य॒ । रोद॑सी इति॑ । दे॒वी इति॑ । शुष्मं॑ । स॒प॒र्य॒तः॒ ॥ ५ ॥

गिरः स्तुतय इंद्रसंबंधिनं यमित् यमेव शुष्मं बलं वर्धयंति । कीदृशं । पतिमीश्वरं । कस्य । तुरस्य हिंसकस्य शत्रो राधसो धनस्य । शत्रुधनानामपहर्तारमित्यर्थः । अस्येंद्रस्य तमित्तमेव शुष्मं शोषकं बलं देवी देवनशीले रोदसी द्यावापृथिव्यौ नु क्षिप्रं सपर्यतः । परिचरतः ॥

॥ इति चतुर्थस्य सप्तमे षोडशो वर्गः ॥

॥ अथ षष्ठी ॥

तद्व॑ उ॒क्थस्य॑ ब॒र्हणें॒द्रायो॑पस्तृणी॒षणि॑ ।

विपो॒ न यस्यो॒तयो॒ वि यद्रोहं॑ति स॒क्षितः॑ ॥ ६ ॥

तत् । वः । उक्थस्य । बर्हणा । इंद्राय । उपऽस्तृणीषणि ।
विपः । न । यस्य । ऊतयः । वि । यत् । रोहंति । सऽक्षितः ॥ ६ ॥

हे स्तोतारो वो युष्मदीयस्योक्थस्य स्तोत्रस्य तद्बर्हणा बहुत्वं माहात्म्यमिंद्रायेंद्रार्थमुपस्तृणीषणि । उपस्तरणीयं । उपेत्य विस्तरणीयं । इंद्रो यथा स्तोत्रस्य माहात्म्यं जानीयात् तथा विस्तारयेत इत्यर्थः । यस्येंद्रस्योतयो रक्षा विपो न मेधाविन इव भवंति । सर्वकार्यकुशला इत्यर्थः । यद्वा नेति पूरकः । विपो विप्रस्य मेधाविनो यस्येंद्रस्येति योज्यं । यद्यस्मिंश्चेंद्रे सक्षितः समाननिवासाः संहता ऊतयो विरोहंति प्रादुर्भवंति तस्मा इंद्रायेत्यर्थः ॥

॥ अथ सप्तमी ॥

अविदद्दक्षं मित्रो नवीयान्पपानो देवेभ्यो वस्यो अचैत् ।
ससवान्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्सखिभ्यः ॥ ७ ॥

अविदत् । दक्षं । मित्रः । नवीयान् । पपानः । देवेभ्यः । वस्यः । अचैत् ।
ससऽवान् । स्तौलाभिः । धौतरीभिः । उरुष्या । पायुः । अभवत् । सखिऽभ्यः ॥ ७ ॥

स इंद्रो दक्षं कर्मसु समर्थं प्रवृद्धं वा यष्टारमविदत् । जानाति । कीदृशः । मित्रो मित्रभूतो नवीयान्नवतरः कल्याणतरः स्तुत्यतरो वा । स च पपानः सोमं पिबन् देवेभ्यः स्तोतृभ्यो वस्यो वसीयः श्रेष्ठं धनमचैत् । चिनोति । उपचितं करोति । ददातीति यावत् । अपि च ससवान् । ससमित्यन्ननाम । हविर्लक्षणान्नोपेतः स इंद्रः स्तौलाभिः स्थूलाभिः प्रवृद्धाभिर्धौतरीभिः कंपनकारिणीभिर्वडवाभिरीदृशैर्मरुद्भिर्वा युक्तः सन् सखिभ्यः स्तोतृभ्य उरुष्या रक्षणेच्छयागत्य पायुरभवत् । रक्षको भवति । यद्वा ससवानिति सनतेः क्वसौ रूपं । स्तौलाभिर्धौतरीभिः ससवान् संभजमान इति संबंधः ॥

॥ अथाष्टमी ॥

ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन् ।
दधानो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः ॥ ८ ॥

ऋतस्य । पथि । वेधाः । अपायि । श्रिये । मनांसि । देवासः । अक्रन् ।
दधानः । नाम । महः । वचःऽभिः । वपुः । दृशये । वेन्यः । वि । आवरित्यावः ॥ ८ ॥

ऋतस्य यज्ञस्य पथि मार्गे वेधा विधाता सर्वस्य द्रष्टा सोमोऽपायि। इंद्रेण पीतोऽभूत्। यद्वा वेधा विधातेंद्रोऽपायि। सोमं पिबतु॥ व्यत्ययेन कर्तरि चिण्॥ तस्मिन् सोम इंद्रस्य मनांसि श्रिये श्रयितुं देवाः स्तोतार ऋत्विजोऽक्रन्। कर्माणि कुर्वंति। स चेंद्रो नाम शत्रूणां नामकं महो महदात्मीयं वपुः शरीरं दधानो धारयन् वचोभिः स्तुतिभिर्वेन्यो वननीयः संभजनीयश्च सन् दृशये दर्शनार्थं व्यावः। विवृणोतु। प्रकाशयतु। अनुकूलं तेज इति शेषः। यद्वा वेन्य इति वेनतेः कांतिकर्मणो रूपं वपुरिति च रूपनाम। वेन्यः कमनीयो वपुर्भास्वरं रूपं दृशये दर्शनार्थं व्यावः विवृणोतु वचोभिः स्तूयमानः सन्॥

॥ अथ नवमी ॥

द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः।
वर्षीयो वयः कृणुहि शचीभिर्धनस्य सातावस्माँ अविड्ढि॥९॥

द्युमत्ऽतमं। दक्षं। धेहि। अस्मे इति। सेध। जनानां। पूर्वीः। अरातीः।
वर्षीयः। वयः। कृणुहि। शचीभिः। धनस्य। सातौ। अस्मान्। अविड्ढि॥९॥

हे इंद्र द्युमत्तमं दीप्तिमत्तमं दक्षं बलमस्मे अस्मासु धेहि। धारय। जनानां स्तोतॄणामस्माकं पूर्वीर्बह्वीररातीः शत्रुसेनाः सेध। निषेध। निवारय। अपि चास्माकं वर्षीयो वृद्धतरं वयोऽन्नं शचीभिरात्मीयाभिः प्रज्ञाभिः कृणुहि। कुरु। तथा धनस्य सातौ संभजनेऽस्मानविड्ढि। गमय। यद्वा धनस्य संभजनार्थमस्मान्रक्ष॥

॥ अथ दशमी ॥

इंद्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः।
नकिरापिर्ददृशे मर्त्यत्रा किमंग रध्रचोदनं त्वाहुः॥१०॥

इंद्र। तुभ्यं। इत्। मघऽवन्। अभूम। वयं। दात्रे। हरिऽवः। मा। वि। वेनः।
नकिः। आपिः। ददृशे। मर्त्यऽत्रा। किं। अंग। रध्रऽचोदनं। त्वा। आहुः॥१०॥

हे मघवन् धनवन्निंद्र दात्रे कामानां दात्रे तुभ्यमित् तुभ्यमेव वयं शेषभूता अभूम। यद्वा त्वदर्थमेव दात्रे हविषां दाने वर्तमाना अभूम। हे हरिवो हरिवन्निंद्र अतः कारणान्मा विवेनः। मा विगतकामो भूः। अस्मान् सर्वदा कामयस्व॥

वेनतिः कांतिकर्मा ॥ मर्त्यत्रा मर्त्येषु मनुष्येषु मध्य आपिर्बंधुस्त्वत्तोऽन्यः कश्चिदपि नकिर्ददृशे। नैव दृश्यते। किमनेन विशेषकथनेन। अंग हे इंद्र त्वा त्वां रध्रचोदनं रध्रस्य राधकस्य समृद्धस्य धनस्य चोदनं चोदयितारमाहुः कथयंति पुराजाः ॥

॥ इति चतुर्थस्य सप्तमे सप्तदशो वर्गः ॥

॥ अथैकादशी ॥

मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम।

पूर्वीष्टं इंद्र निःषिधो जनेषु जह्यसुष्वीन्प्र वृहापृणतः ॥११॥

मा। जस्वने। वृषभ। नः। ररीथाः। मा। ते। रेवतः। सख्ये। रिषाम।

पूर्वीः। ते। इंद्र। निःऽसिधः। जनेषु। जहि। असुस्वीन्। प्र। वृह। अपृणतः ॥११॥

हे वृषभ कामानां वर्षितरिंद्र जस्वने ॥ जसिरुपक्षयकर्मा ॥ उपक्षपयित्रे राक्षसादये नोऽस्मान् मा ररीथाः। मा दाः। रेवतो धनवतस्ते तव सख्ये सखित्वे वर्तमाना वयं मा रिषाम हिंसिता मा भूम। हे इंद्र ते त्वदीयाः पूर्वीर्बह्वीर्निःषिधो निःषेधा निवारणानि जनेषु शत्रुषु निहिताः संति। यद्वा निःषिधो निषेधार्था रज्जवः। ताः शत्रुजनेषु तव बह्व्यो विद्यंते। अतः कारणादसुष्वीनभिषोतॄनयजमानान् जहि। मारय। अपृणतो हवींष्यप्रयच्छतश्च प्रवृह। उन्मूलय॥ पृण दान इति धातुः ॥

॥ अथ द्वादशी ॥

उदभ्राणीव स्तनयन्नियर्तींद्रो राधांस्यश्व्यानि गव्या।

त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन्मघोनः ॥१२॥

उत्। अभ्राणिऽइव। स्तनयन्। इयर्ति। इंद्रः। राधांसि। अश्व्यानि। गव्या।

त्वं। असि। प्रऽदिवः। कारुऽधायाः। मा। त्वा। अदामानः। आ। दभन्। मघोनः ॥१२॥

अभ्राणीव स्तनयन् गर्जयन् पर्जन्यो यथा मेघानुद्गमयत्येवमिंद्रोऽश्व्यान्यश्वसंबंधीनि गव्या गव्यानि गोसंबंधीन्येतत्समूहद्वयरूपाणि राधांसि धनान्युदियर्ति। उदीरयति। उद्गमयति स्तोतृभ्यो दातुं। उत्तरार्द्धः प्रत्यक्षकृतः। हे इंद्र प्रदिवः पुराणस्त्वं कारुधायाः कारूणां स्तोतॄणां धारयितासि। भवसि। तादृशं त्वां मघोनो धनवंतः कृपणा अदामानो हविषामदातारो मादभन्। मा हिंसिषुः। यद्वा वचनव्यत्ययः। मघवानं धनवंतं त्वामिति संबंधः

॥ अथ त्रयोदशी ॥

अध्वर्यो वीर प्र महे सुतानामिंद्राय भर स ह्यस्य राजा ।

यः पूर्व्याभिरुत नूतनाभिर्गीर्भिर्वावृधे गृणतामृषीणां ॥ १३ ॥

अध्वर्यो इति । वीर । प्र । महे । सुतानां । इंद्राय । भर । सः । हि । अस्य । राजा ।

यः । पूर्व्याभिः । उत । नूतनाभिः । गीःऽभिः । ववृधे । गृणतां । ऋषीणां ॥ १३ ॥

हे वीर हविषां विशेषेण प्रेरयितरध्वर्यो महे महतेऽस्मा इंद्राय सुतानां ॥ कर्मणि षष्ठी ॥ सुतानभिषुतान् सोमान् प्रभर । प्रहर । प्रगमय । स हि खल्विंद्रोऽस्य सोमस्य राजा स्वामी भवति । य इंद्रः पूर्व्याभिः पूर्वकाले कृताभिरुतापि च नूतनाभिरिदानीं क्रियमाणाभिर्गृणतां स्तुवतामृषीणां संबंधिनीभिर्गीर्भिरुभयविधाभिः स्तुतिभिर्वावृधे वर्धते । स इंद्रो यस्मात्सोमस्य राजा तस्मादस्मै सोमः प्रदेय इत्यर्थः ॥

प्रथमे रात्रिपर्याये मैत्रावरुणस्यास्य मद इति शस्त्रयाज्या । सूचितं च । अस्य मदे पुरु वर्पांसि विद्वानिति याज्या । आ० ६.४. । इति ॥

॥ सैषा सूक्ते चतुर्दशी ॥

अस्य मदे पुरु वर्पांसि विद्वानिंद्रो वृत्राण्यप्रती जघान ।

तमु प्र होषि मधुमंतमस्मै सोमं वीराय शिप्रिणे पिबध्यै ॥ १४ ॥

अस्य । मदे । पुरु । वर्पांसि । विद्वान् । इंद्रः । वृत्राणि । अप्रति । जघान ।

तं । ऊं इति । प्र । होषि । मधुऽमंतं । अस्मै । सोमं । वीराय । शिप्रिणे । पिबध्यै ॥ १४ ॥

अस्य सोमस्य पानेन मदे हर्षे सति विद्वानभिज्ञ इंद्रः पुरु पुरूणि बहूनि वर्पांस्यावरकाणि वृत्राणि शत्रूनप्रति स्वयमन्यैरप्रतिगतः सन् जघान । हतवान् । यद्वा वर्प इति रूपनाम । बहूनि वर्पांस्यसुरमायया निर्मितानि रूपाणि विद्वान् जानन्निंद्रो वृत्राण्यावरकाणि रक्षःप्रभृतीनीतः पूर्वमन्यैरप्रतिगतानि जघान । हतवान् । मधुमंतं माधुर्यवंतं तमु तमेव सोमं शिप्रिणे शोभनहनुकायास्मै वीराय शत्रूणां वीरयित्र इंद्राय पिबध्यै पातुं प्रहोषि । हे अध्वर्यो प्रजुहुधि ॥

द्वितीये रात्रिपर्याये मैत्रावरुणस्यैव पाता सुतमिति शस्त्रयाज्या । सूचितं च । पाता सुतमिंद्रो अस्तु सोमं हंता वृत्रमिति याज्या । आ० ६.४. । इति ॥

॥ सैषा पंचदशी ॥

पाता सुतमिंद्रो अस्तु सोमं हंता वृत्रं वज्रेण मंदसानः ।

गंता यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः ॥ १५ ॥

पाता । सुतं । इंद्रः । अस्तु । सोमं । हंता । वृत्रं । वज्रेण । मंदसानः ।

गंता । यज्ञं । पराऽवतः । चित् । अच्छ । वसुः । धीनां । अविता । कारुऽधायाः ॥ १५ ॥

अयमिंद्रः सुतमभिषुतं सोमं पातास्तु । साधु पाता भवतु ॥ साधुकारिणि तृन् । अत एव न लोकाव्ययेति षष्ठीप्रतिषेधात् द्वितीया । एव हंतेत्यादावपि द्रष्टव्यं ॥ तेन च सोमेन मंदसानो माद्यन् वज्रेणायुधेन वृत्रमावरकं शत्रुं हंतास्तु । भवतु । एतदुभयार्थं परावतश्चित् दूरदेशादपि यज्ञमच्छास्मदीयं यज्ञमभि गंता भवतु । दूरदेशस्थोऽपि शीघ्रमस्मद्यज्ञे सोमपानायागच्छत्वित्यर्थः । कीदृश इंद्रः । वसुः सर्वेषां निवासयिता धीनां ध्यातॄणां स्तोतॄणां कर्मणां वाविता रक्षिता कारुधायाः कारूणां कर्तॄणां यजमानानां धारयिता ॥

॥ इति चतुर्थस्य सप्तमेऽष्टादशो वर्गः ॥

तृतीये रात्रिपर्याये प्रशास्तुरिदं त्यदिति शस्त्रयाज्या । सूचितं च । इदं त्यत्पात्रमिंद्रपानमिति याज्या । आ॰ ६.४. । इति ॥

॥ सैषा सूक्ते षोडशी ॥

इदं त्यत्पात्रमिंद्रपानमिंद्रस्य प्रियममृतमपायि ।

मत्सद्यथा सौमनसाय देवं व्य१स्मद्द्वेषो युयवद्व्यंहः ॥ १६ ॥

इदं । त्यत् । पात्रं । इंद्रऽपानं । इंद्रस्य । प्रियं । अमृतं । अपायि ।

मत्सत् । यथा । सौमनसाय । देवं । वि । अस्मत् । द्वेषः । युयवत् । वि । अंहः ॥ १६ ॥

पात्रं पातव्यमिंद्रपानमिंद्रस्य पानार्हमिंद्रस्य प्रियमनुकूलं त्यत्तदिदं सोमात्मकममृतमपायि । इंद्रः पिबतु ॥ व्यत्ययेन कर्तरि चिण् ॥ यद्वैतदमृतमपायि । इंद्रेण पीयतां । यथा येन प्रकारेण पीतः सोमः सौमनसाय सुमनस्त्वाय देवमिंद्रं मत्सत् मादयेत्तथा पीयतामित्यर्थः । स पीतसोम इंद्रो द्वेषो द्वेष्टॄनस्मदस्मत्तो वियुयवत् । वियोजयतु । अंहः पापं चास्मत्तो वियोजयतु ॥

॥ अथ सप्तदशी ॥

एना मंदानो जहि शूर शत्रूञ्जामिमजामिं मघवन्नमित्रान् ।
अभिषेणाँ अभ्या३देदिशानान्पराच इंद्र प्र मृणा जही च ॥ १७ ॥

एना । मंदानः । जहि । शूर । शत्रून् । जामिं । अजामिं । मघऽवन् । अमित्रान् ।
अभिऽसेनान् । अभि । आऽदेदिशानान् । पराचः । इंद्र । प्र । मृण । जहि । च ॥ १७ ॥

हे मघवन् धनवन् शूर शौर्यवन्निंद्र एनैनेन प्रकृतेनानेन सोमेन मंदानो मंदमानो माद्यन् जामिं ज्ञातिमजामिं तद्विलक्षणमेवमुभयविधानमित्रानस्मत्प्रतिकूलाचरणपरान् शत्रून् जहि । हिंसितान्कुरु । किंचाभिषेणान् प्रत्यभिगताः सेना येषां तादृशानस्मदभिमुखमादेदिशानानायुधानि पुनः पुनरादिशतो विसृजतः शत्रूंश्च हे इंद्र पराचः प्रमृण । ते यथा पराङ्मुखा भवंति तथा बाधस्व । तदनंतरं तान् जहि च ॥

॥ अथाष्टादशी ॥

आसु ष्मा णो मघवन्निंद्र पृत्स्व१स्मभ्यं महि वरिवः सुगं कः ।
अपां तोकस्य तनयस्य जेष इंद्र सूरीन्कृणुहि स्मा नो अर्धं ॥ १८ ॥

आसु । स्म । नः । मघऽवन् । इंद्र । पृत्ऽसु । अस्मभ्यं । महि । वरिवः । सुऽगं । करिति कः ।
अपां । तोकस्य । तनयस्य । जेषे । इंद्र । सूरीन् । कृणुहि । स्म । नः । अर्धं ॥ १८ ॥

हे मघवन् धनवन्निंद्र नोऽस्मदीयास्वासु पृत्सु पृतनासु संग्रामेष्वस्मभ्यं महि महत्सुगं सुखेन प्राप्यं वरिवो धनं कः । कुरु । स्मेति पूरणः । अपि च हे इंद्र अपामाप्तव्यानां धनानामुदकानां वा तोकस्य पुत्रस्य तनयस्य पौत्रस्य च जे[illegible] जयार्थं सूरीन् स्तोतॄन् नोऽस्मानर्धमर्धान् समृद्धान् कृणुहि । कुरु । यद्वार्धकारिणः शत्रूणां खंडयितॄन् कुरु । स्मेति पूरकः ॥

॥ अथैकोनविंशी ॥

आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः ।
अस्मत्रांचो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहंतु ॥ १९ ॥

आ । त्वा । हरयः । वृषणः । युजानाः । वृषऽरथासः । वृषऽरश्मयः । अत्याः ।
अस्मत्रांचः । वृषणः । वज्रऽवाहः । वृष्णे । मदाय । सुऽयुजः । वहंतु ॥ १९ ॥

हे इंद्र त्वा त्वां हरयोऽश्वा वृष्णे वर्षित्रे मदाय मदकराय सोमायेहर्श सोमं पाययितुमावहंतु। कीदृशा अश्वाः। वृषणः कामानां वर्षितारो युजानाः स्वयमेव रथे युज्यमाना वृषरथासः। वृषा कामाभिवर्षको रथो येषां ते तथोक्ताः। वृषरश्मयः। वर्षितारो रश्मयः प्रग्रहा येषां तादृशाः। अत्याः सततगामिनोऽस्मत्रांचोऽस्मान्प्रत्यंचंतो गच्छंतो वृषणो नित्यतरुणा वज्रवाहो वज्रादीन्यायुधानि वहंतः सयुजः शोभनयोजनाः ॥

॥ अथ विंशी ॥

आ ते वृषन्वृषणो द्रोणमस्थुर्घृतप्रुषो नोर्मयो मदंतः।
इंद्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरंति वृषभाय सोमं ॥२०॥
आ। ते। वृषन्। वृषणः। द्रोणं। अस्थुः। घृतऽप्रुषः। न। ऊर्मयः। मदंतः।
इंद्र। प्र। तुभ्यं। वृषऽभिः। सुतानां। वृष्णे। भरंति। वृषभाय। सोमं ॥२०॥

हे वृषन् कामानां वर्षितरिंद्र वृषणः सेक्तारो युवानस्त्वदीया अश्वा घृतप्रुषो नोर्मयो घृतमुदकं सिंचंतः सामुद्रास्तरंगा इव मदंतो हृष्यंतो मत्ताः संतस्ते त्वदीयं द्रोणं द्रुममयं रथमास्थुः। आतिष्ठंत। अतस्त्वमागच्छेति भावः। कुत इत्यत आह। हे इंद्र वृष्णे यूने नित्यतरुणाय वृषभाय कामानां वर्षयित्रे तुभ्यं वृषभिः कामाभिवर्षकैर्ग्रावभिः सुतानामभिषुतानां सोमानां मध्ये त्वद्भागरूपं सोमं यस्मादध्वर्यवः प्रभरंति प्रहरंति होमार्थं प्रणयंति तस्मादागच्छेत्यर्थः ॥

॥ इति चतुर्थस्य सप्तम एकोनविंशो वर्गः ॥

॥ अथैकविंशी ॥

वृषासि दिवो वृषभः पृथिव्या वृषा सिंधूनां वृषभः स्तियानां।
वृष्णे त इंदुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय ॥२१॥
वृषा। असि। दिवः। वृषभः। पृथिव्याः। वृषा। सिंधूनां। वृषभः। स्तियानां।
वृष्णे। ते। इंदुः। वृषभ। पीपाय। स्वादुः। रसः। मधुऽपेयः। वराय ॥२१॥

हे इंद्र त्वं दिवो द्युलोकस्य वृषासि। हविर्भिः सेक्ता भवसि। पृथिव्या भूमेश्च वृषभः कामानां वर्षिता। सिंधूनां स्यंदनशीलानां च नदीनां वृषा वर्षेण पूरयितासि। तथा स्तियानां संघीभूतानां स्थावरजंगमात्मनां प्राणिनां वृषभः का-

मानां वर्धिता भवसि। यद्वा स्त्रियः संघीभूता आपः। तासां वर्धितासि। वृषभ कामाभिवर्षकेंद्र वराय श्रेष्ठाय वृष्णे सेक्त्रे ते तुभ्यं त्वदर्थं स्वादुर्मधुरो रसो रसनीयः प्रशस्यो रसवान्वा रसात्मको वा मधुपेयो मधुवत्पातव्य इंदुः सोमः पीपाय। प्यायते। वर्धते। अतस्त्वमागत्य तं सोमं पिबेति भावः॥

॥ अथ द्वाविंशी ॥

अयं देवः सहसा जायमान इंद्रेण युजा पणिमस्तभायत्।
अयं स्वस्य पितुरायुधानींदुरमुष्णादशिवस्य मायाः॥२२॥
अयं। देवः। सहसा। जायमानः। इंद्रेण। युजा। पणिं। अस्तभायत्।
अयं। स्वस्य। पितुः। आयुधानि। इंदुः। अमुष्णात्। अशिवस्य। मायाः॥२२॥

देवो द्योतमानोऽयमिंदुः सोम इंद्रेण युजा सख्या सह जायमानः प्रादुर्भवन् पणिं वणिजं गवामादातारं वलाख्यमसुरं। यद्वा पणीनां स्वामित्वात्पणिरित्युच्यते। तमसुरं सहसा बलेनास्तभायत्। अस्तभ्नात्। न्यरुधत्। अपि च स्वस्य धनस्य गोरूपस्य पितुः पालयितुरशिवस्यासुखकरस्य वलस्यायुधानि वज्रादीन्यमुष्णात्। अपाहरत्। तदीया मायाश्चामुष्णात्। हे इंद्र त्वत्सख्यबलादेतत्सर्वं सोमः कृतवान् अतस्तव महिमा केन वर्णयितुं शक्यत इतींद्रस्तुतिः॥

॥ अथ त्रयोविंशी ॥

अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरंतः।
अयं त्रिधातु दिवि रोचनेषु त्रितेषु विंददमृतं निगूळ्हं॥२३॥
अयं। अकृणोत्। उषसः। सुऽपत्नीः। अयं। सूर्ये। अदधात्। ज्योतिः। अंतरिति।
अयं। त्रिऽधातु। दिवि। रोचनेषु। त्रितेषु। विंदत्। अमृतं। निऽगूळ्हं॥२३॥

अयं सोम उषस उषःकालान् सुपत्नीः शोभनः पतिः पालकः सूर्यो यासामुषसां तादृशीरकृणोत्। अकरोत्। अयमेव सूर्ये सूर्यमंडलेऽंतर्मध्ये ज्योतिस्तेजोऽदधात्। निहितवान्। त्रिधातु सवनत्रयरूपेण त्रिप्रकारमयं लतारूपः सोमो दिवि द्युलोके रोचनेषु रोचमानेषु त्रितेषु तृतीये स्थाने ततेषु विस्तृतेषु देवेषु निगूळ्हं नितरां गूढमदृश्यतया वर्तमानममृतममृतत्वकारणं पीयूषं विंदत्। अविंदत्। अलभत। हे इंद्र त्वन्माहात्म्यादेवमेवं सोमः कृतवानितींद्रस्य स्तुतिर-

धिगंतव्या । यद्वेदंशब्देनेंद्र एव परामृश्यते । अयमिंद्र उषसः शोभनपतिका अकरोत् । अयमेव सूर्ये तज्ज्योतिरदधात् । दिवि द्युलोके रोचमानेषु त्रिस्थानगतेषु देवेषु मध्येऽयमेवेंद्रस्त्रिधातु सवनत्रयात्मना त्रिप्रकारं निगूढं पात्रैः संवृतममृतममरणहेतुभूतं सोममविंदत् । अलभत ॥

॥ अथ चतुर्विंशी ॥

अयं द्यावापृथिवी वि ष्कभायदयं रथमयुनक्सप्तरश्मिं ।
अयं गोषु शच्या पक्वमंतः सोमो दाधार दशयंत्रमुत्सं ॥ २४ ॥

अयं । द्यावापृथिवी इति । वि । स्कभायत् । अयं । रथं । अयुनक् । सप्तऽरश्मिं ।
अयं । गोषु । शच्या । पक्वं । अंतरिति । सोमः । दाधार । दशऽयंत्रं । उत्सं ॥ २४ ॥

अयं सोमो द्यावापृथिवी दिवं च पृथिवीं च विष्कभायत् । विविधमस्थापयत् । अपि चायं सोमः सूर्यस्य च रथं सप्तरश्मिं सप्त रश्मिभिः किरणैरुपेतं सप्ताश्वं सप्तचक्रं वायुनक् । अयोजयत् । तथायं सोमो गोष्वंतर्मध्ये पक्वं निष्पन्नं शच्या प्रज्ञया संकल्परूपयोत्समुत्सरणशीलं पयो दाधार । धारयति । दशयंत्रं । उत्सस्य हेतुगर्भविशेषणमेतत् । उत्सरणहेतुभूतैर्दशभिश्चक्षुःश्रोत्रादिभिर्यंत्रैरुपायैर्युक्तं । इदं च पदं खैलिकेन मंत्रांतरेण व्याख्यायते । चक्षुश्च श्रोत्रं च मनश्च वाक्च प्राणापानौ देह इदं शरीरं । द्वौ प्रत्यंचावनुलोमौ विसर्गावेतं तं मन्ये दशयंत्रमुत्समिति । यद्वायमिंद्रो द्यावापृथिवी विष्कभायत् । स्वे स्वे स्थाने स्थिते अकरोत् । अयमेव सप्तरश्मिं सूर्यस्य रथमयुनक् । अयमेवेंद्रो गोष्वंतः शच्यात्मीयेन कर्मणा पक्वं पयो धारयति । एवंभूतेंद्रार्थं सोमो दशयंत्रं दशसंख्याकैरैंद्रवायवादिभिर्ग्रहैर्यंत्रितैर्गृहीतैरुपेतमुत्समुत्सरणशीलं रसं दाधार । धारयति । प्रातःसवन ऐंद्रवायवादयो दश ग्रहा गृह्यंते । तथा च ब्राह्मणं । नव प्रातर्ग्रहा गृह्यंते नवभिर्बहिष्पवमाने स्तुवते स्तुते स्तोमे दशमं गृह्णाति । ऐ॰ ब्रा॰ ३. १. । इति । अन्यत्राम्नातं । दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णातीति । तदभिप्रायेणेदं दशयंत्रमिति विशेषणं ॥

॥ इति चतुर्थस्य सप्तमे विंशो वर्गः ॥

य आनयदिति त्रयस्त्रिंशत्यृचं द्वितीयं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षं । पुरूतममित्येषातिनिचृत् । त्रयः सप्तकाः पादनिचृत् मध्यमः षट्कश्चेदतिनिचृदित्युक्त-

[illegible] त्रयस्त्रिंश्यनुष्टुप् शिष्टा गायत्र्यः। अधि बृबुः पणीनामित्यस्मिन्नंत्ये तृचे बृबुर्नाम तक्षा स्तूयते। अतः स तृचस्तद्देवताकः। शिष्टास्त्रिंशदैंद्र्यः। तथा चानुक्रांतं। य आनयत्त्रयस्त्रिंशद्गायत्रं पुरूतममतिनिचृदंत्यानुष्टुप् तृचेंऽत्ये बृबुस्तक्षा दैवतमिति॥ महाव्रतेऽपि निष्केवल्येऽंत्यतृचवर्जमेतत्सूक्तं। तथैव पंचमारण्यकं। य आनयत्परावत इति तिस्र उत्तमा उद्धरति। ऐ० आ० ५.११.। इति॥

॥ तत्र प्रथमा ॥

य आनयत्परावतः सुनीती तुर्वशं यदुं। इंद्रः स नो युवा सखा ॥१॥

यः। आ। अनयत्। पराऽवतः। सुऽनीती। तुर्वशं। यदुं। इंद्रः। सः। नः। युवा। सखा ॥१॥

य इंद्रस्तुर्वशं यदुं चैतत्संज्ञौ राजानौ शत्रुभिर्दूरदेशे प्रक्षिप्तौ सुनीती सुनीत्या शोभनेन नयनेन परावतस्तस्माद्दूरदेशादानयत् आनीतवान् युवा तरुणः स इंद्रो नोऽस्माकं सखा भवतु॥

॥ अथ द्वितीया ॥

अविप्रे चिद्वयो दधदनाशुना चिदर्वता। इंद्रो जेता हितं धनं ॥२॥

अविप्रे। चित्। वयः। दधत्। अनाशुना। चित्। अर्वता। इंद्रः। जेता। हितं। धनं ॥२॥

अविप्रे चित्। विप्रः स्तोता। तद्विलक्षणेऽपि पुरुषे वयोऽन्नं दधत्। इंद्रो धारयति। किमु वक्तव्यं स्तोतरि धारयतीति। स इंद्रोऽनाशुना चित् अक्षिप्रगमनेनाप्यर्वताश्वेन हितं शत्रुषु निहितं स्थापितं धनं जेता जयशीलो भवति॥ जयतेस्ताच्छीलिकस्तृन्। अतो न लोकाव्ययेति षष्ठीप्रतिषेधः॥

॥ अथ तृतीया ॥

महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः। नास्य क्षीयंत ऊतयः ॥३॥

महीः। अस्य। प्रऽनीतयः। पूर्वीः। उत। प्रऽशस्तयः। न। अस्य। क्षीयंते। ऊतयः ॥३॥

अस्येंद्रस्य प्रणीतयः प्रकृष्टा नीतयः प्रापणानि महीर्मह्यो महत्यो भवंति। उतापि च प्रशस्तयः प्रकृष्टाः स्तुतयः स्तोतृभिः क्रियमाणाः पूर्वीर्बह्व्यो भवंति। तथास्येंद्रस्योतयो रक्षा न क्षीयंते। नापचीयंते। किंतु सर्वदा वर्धंत एव॥

॥ अथ चतुर्थी ॥

सखायो ब्रह्मवाहसेऽर्चत प्र च गायत। स हि नः प्रमतिर्मही ॥४॥

सखायः। ब्रह्मऽवाहसे। अर्चत। प्र। च। गायत। सः। हि। नः। प्रऽमतिः। मही ॥४॥

हे सखायः समानख्यानाः स्तोतारो ब्रह्मवाहसे ब्रह्मभिर्मंत्रैर्वहनीयाय प्राश-व्यायेंद्रायार्चत। शस्त्राणि शंसत। प्रगायत च स्तोत्राणि। स हि स खल्विंद्रो नोऽस्माकं मही महती प्रमतिः प्रकृष्टा बुद्धिः। ईदृश्या बुद्धेः प्रदातेत्यर्थः॥

॥ अथ पंचमी ॥

त्वमेकस्य वृत्रहन्नविता द्वयोरसि। उतेदृशे यथा वयं॥५॥

त्वं। एकस्य। वृत्रऽहन्। अविता। द्वयोः। असि। उत। ईदृशे। यथा। वयं॥५॥

हे वृत्रहन् वृत्राणां शत्रूणां हंतरिंद्र त्वमेकस्य स्तोतुर्द्वयोश्च स्तोत्रोरविता रक्षितासि। सर्वेषां स्तोतॄणां रक्षको भवसीत्यर्थः। उतापि चेदृशे जनेऽप्यविता भवसि यथा यादृशा वयं। त्वया रक्षिता बहुविधपुत्रपौत्रा अभूम। ईदृशस्यापि जनस्य त्वमेव रक्षको नान्य इत्यर्थः॥

॥ इति चतुर्थस्य सप्तम एकविंशो वर्गः॥

॥ अथ षष्ठी॥

नयसीद्वति द्विषः कृणोष्युक्थशंसिनः। नृभिः सुवीर उच्यसे॥६॥

नयसि। इत्। ऊं इति। अति। द्विषः। कृणोषि। उक्थऽशंसिनः। नृऽभिः।
सुऽवीरः। उच्यसे॥६॥

हे इंद्रेत् त्वमेव द्विषो द्वेष्टॄनति नयसि। अस्मान्नयसि। तारयसि। उ इति पूरकः। तथोक्थशंसिन उक्थानि शस्त्राणि शंसतः स्तोतॄनस्मान्कृणोषि। समृद्धान्करोषि। यस्मात्त्वं नृभिः स्तुतीनां नेतृभिः पुरुषैः सुवीरः शोभनैर्वीरैः पुत्रपौत्रादिभिः स्तोतृभ्यो दातव्यैरुपेत इत्युच्यसे स्तूयसे अतस्तानप्यस्मभ्यं प्रयच्छेति शेषः॥

॥ अथ सप्तमी॥

ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियं। गां न दोहसे हुवे॥७॥

ब्रह्माणं। ब्रह्मऽवाहसं। गीःऽभिः। सखायं। ऋग्मियं। गां। न। दोहसे। हुवे॥७॥

ब्रह्माणं परिवृढं ब्रह्मवाहसं ब्रह्मभिः स्तुतिरूपैर्मंत्रैर्वहनीयं सखायमस्माकं सखिभूतमृग्मियं। ऋग्मा ऋचः। तदर्हं। स्तुत्यर्हमित्यर्थः। एवंभूतमिंद्रं दोहसे दोग्धुं गां न गामिव गीर्भिः स्तुतिभिर्हुवे। आह्वयाम्यस्मदीयान्कामान्दोग्धुं॥

॥ अथाष्टमी ॥

यस्य विश्वानि हस्तयोरूचुर्वसूनि नि द्विता। वीरस्य पृतनाषहः ॥ ८ ॥

यस्य। विश्वानि। हस्तयोः। ऊचुः। वसूनि। नि। द्विता। वीरस्य। पृतनाऽसहः ॥ ८ ॥

वीरस्य वीर्यवतः पृतनासहः। पृतनाः शत्रुसेनाः। तासामभिभवितुर्यस्येंद्रस्य हस्तयोर्बाह्वोर्विश्वानि सर्वाणि द्विता दिव्यपार्थिवरूपेण द्वैधं वर्तमानानि वसूनि विद्यंत इति न्यूचुः ऋषयो नितरां वदंति तमिंद्रं हुव इति पूर्वत्र संबंधः ॥

॥ अथ नवमी ॥

वि दृळ्हानि चिदद्रिवो जनानां शचीपते। वृह माया अनानत ॥ ९ ॥

वि। दृळ्हानि। चित्। अद्रिऽवः। जनानां। शचीऽपते। वृह। मायाः। अनानत ॥ ९ ॥

हे अद्रिवः। आदृणात्यनेनेत्यद्रिर्वज्रः। तद्वन् शचीपत इंद्र जनानां शत्रूणां दृळ्हानि चित् दृढानि स्थिराण्यपि पुराणि बलानि वा विवृह। विभिंधि। विविधमुन्मूलयेत्यर्थः। हे अनानत अप्रह्वीभूत सर्वोच्छ्रितेंद्र मायाश्च शत्रुभिर्निर्मिता विवृह। विनाशय ॥

॥ अथ दशमी ॥

तमु त्वा सत्य सोमपा इंद्र वाजानां पते। अहूमहि श्रवस्यवः ॥ १० ॥

तं। ऊं इति। त्वा। सत्य। सोमऽपाः। इंद्र। वाजानां। पते। अहूमहि। श्रवस्यवः ॥ १० ॥

हे सत्य अवितथस्वभाव सोमपाः सोमस्य पातर्हे वाजानां पते अन्नानां पालयितरेवंभूत हे इंद्र श्रवस्यवः श्रवोऽन्नमात्मन इच्छंतो वयं तमु त्वा तादृशं त्वामेवाहूमहि। आह्वयामः। स्तुम इत्यर्थः ॥

॥ इति चतुर्थस्य सप्तमे द्वाविंशो वर्गः ॥

॥ अथैकादशी ॥

तमु त्वा यः पुरासिथ यो वा नूनं हिते धने। हव्यः स श्रुधी हवं ॥ ११ ॥

तं। ऊं इति। त्वा। यः। पुरा। आसिथ। यः। वा। नूनं। हिते। धने। हव्यः।
सः। श्रुधि। हवं ॥ ११ ॥

हे इंद्र तमु त्वा तमेव त्वां स्तुम इति शेषः। यस्त्वं पुरा पूर्वस्मिन्काले हव्यो

ज्ञातव्य आसिथ बभूविथ धनलाभार्थं । यो वा यच त्वं हिते शत्रुषु निहिते धने निमित्तभूते सति नूनमद्यापि हव्यो ज्ञातव्यो बभूविथ स त्वमस्मदीयं हवं स्तोत्रं श्रुधि । शृणु ॥

॥ अथ द्वादशी ॥

धीभिरर्वद्भिरर्वतो वाजाँ इंद्र श्रवाय्यान् । त्वया जेष्म हितं धनं ॥१२॥

धीभिः। अर्वत्ऽभिः। अर्वतः। वाजान्। इंद्र। श्रवाय्यान्। त्वया। जेष्म। हितं। धनं ॥१२॥

हे इंद्र धीभिः स्तुतिभिस्त्वद्विषयाभिः प्रीतेन त्वयानुगृहीता वयमर्वद्भिरस्मदीयैरश्वैरर्वतः शत्रुसंबंधिनोऽश्वान् श्रवाय्यान् श्रवणीयान् प्रशस्यान् वाजानन्नानि च हितं शत्रुषु निहितं धनं च जेष्म । त्वदनुग्रहाज्जयेम ॥

॥ अथ त्रयोदशी ॥

अभूरु वीर गिर्वणो महाँ इंद्र धने हिते । भरे वितंतसाय्यः ॥१३॥

अभूः। ऊं इति। वीर। गिर्वणः। महान्। इंद्र। धने। हिते। भरे। वितंतसाय्यः ॥१३॥

हे वीर विविधमीरयितः शत्रूणां हे गिर्वणो गीर्भिर्वननीयेंद्र हिते शत्रुषु निहिते धने निमित्तभूते सति महान् प्रवृद्धस्त्वं भरे संग्रामे वितंतसाय्यः शत्रूणां जेताभूः ॥ तंतस इति धातुर्जयार्थः कंड्वादौ पठ्यते । तस्माद्व्युपसृष्टादौणादिकः कर्तर्याय्यप्रत्ययः ॥

॥ अथ चतुर्दशी ॥

या त ऊतिरमित्रहन्मक्षूजवस्तमासति । तया नो हिनुही रथं ॥१४॥

या। ते। ऊतिः। अमित्रऽहन्। मक्षुजवःऽतमा। असति। तया। नः। हिनुहि। रथं ॥१४॥

हे अमित्रहन् अमित्राणां शत्रूणां हंतरिंद्र ते त्वदीया मक्षुजवस्तमातिशयेन शीघ्रजवा योतिर्गतिरसति अस्ति तया गत्या नोऽस्माकं रथं हिनुहि । प्रेरय । शत्रुजयार्थं शीघ्रं गमय ॥

॥ अथ पंचदशी ॥

स रथेन रथीतमोऽस्माकेनाभियुग्वना । जेषि जिष्णो हितं धनं ॥१५॥

सः। रथेन। रथिऽतमः। अस्माकेन। अभिऽयुग्वना। जेषि। जिष्णो इति। हितं। धनं ॥१५॥

हे जिष्णो जयशीलेंद्र रथीतमोऽतिशयेन रथी महारथः स त्वमस्माकेनास्मदीयेनाभियुग्वनाभियोक्त्रा शत्रूणामभिभवित्रा रथेन हितं शत्रुषु निहितं धनं जेषि। अस्मदर्थं जय ॥

॥ इति चतुर्थस्य सप्तमे त्रयोविंशो वर्गः ॥

॥ अथ षोडशी ॥

य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः। पतिर्जज्ञे वृषक्रतुः ॥१६॥

यः। एकः। इत्। तं। ऊं इति। स्तुहि। कृष्टीनां। विऽचर्षणिः। पतिः। जज्ञे। वृषऽक्रतुः ॥१६॥

विचर्षणिर्विशेषेण सर्वस्य द्रष्टा वृषक्रतुर्वर्षकर्मा य इंद्र एक इदेक एव कृष्टीनां प्रजानां पतिरधिपतिर्जज्ञे अजायत नान्यः कश्चित् तमु तमेवेंद्रं हे स्तोतः स्तुहि ॥

॥ अथ सप्तदशी ॥

यो गृणतामिदासिथापिरूती शिवः सखा। स त्वं न इंद्र मृळय ॥१७॥

यः। गृणतां। इत्। आसिथ। आपिः। ऊती। शिवः। सखा। सः। त्वं। नः। इंद्र। मृळय ॥१७॥

हे इंद्र यस्त्वमूती ऊत्या रक्षया शिवः सुखकरोऽत एव सखा मित्रभूतश्च सन् गृणतामित् स्तुवतामस्माकमेवापिर्बंधुरासिथ पुरा बभूविथ स तादृशस्त्वं नोऽस्मानिदानीं मृळय। सुखय ॥

॥ अथाष्टादशी ॥

धिष्व वज्रं गभस्त्यो रक्षोहत्याय वज्रिवः। सासहीष्ठा अभि स्पृधः ॥१८॥

धिष्व। वज्रं। गभस्त्योः। रक्षःऽहत्याय। वज्रिऽवः। ससहीष्ठाः। अभि। स्पृधः ॥१८॥

हे वज्रिवो वज्रवन्निंद्र गभस्त्योरात्मीययोर्हस्तयोर्वज्रं कुलिशं धिष्व। धारय। किमर्थं। रक्षोहत्याय रक्षसां हननार्थं। धृत्वा च स्पृधः स्पर्धमाना अभिगंत्रीरासुरीः सेनाः संसहीष्ठाः। अत्यर्थमभिभव ॥

॥ अथैकोनविंशी ॥

प्रत्नं रयीणां युजं सखायं कीरिचोदनं। ब्रह्मवाहस्तमं हुवे ॥१९॥

प्रत्नं। रयीणां। युजं। सखायं। कीरिऽचोदनं। ब्रह्मवाहःऽतमं। हुवे ॥१९॥

प्रत्नं चिरंतनं सर्वेषामाद्यं रयीणां धनानां युजं योजयितारं दातारं सखायं

मित्रभूतं कीरिचोदनं कीरीणां स्तोतॄणां चोदयितारं ब्रह्मवाहस्तममतिशयेन ब्रह्मभिर्मंत्रैर्वहनीयमेवंविधमिंद्रं हुवे । आह्वयामि ॥

॥ अथ विंशी ॥

स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते । गिर्वणस्तमो अध्रिगुः ॥२०॥

सः । हि । विश्वानि । पार्थिवा । एकः । वसूनि । पत्यते । गिर्वणःऽतमः । अध्रिऽगुः ॥२०॥

स हि स खल्विंद्रो विश्वानि सर्वाणि पार्थिवा पृथिव्यां भवानि वसूनि धनान्येक एव पत्यते ईष्टे नान्यः कश्चित् । पत्यतिरैश्वर्यकर्मा । कीदृश इंद्रः । गिर्वणस्तमोऽतिशयेन गीर्भिः स्तुतिभिः संभजनीयोऽध्रिगुरधृतगमनः । अप्रतिहतगतिरित्यर्थः ॥

॥ इति चतुर्थस्य सप्तमे चतुर्विंशो वर्गः ॥

॥ अथैकविंशी ॥

स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः । गोमद्भिर्गोपते धृषत् ॥२१॥

सः । नः । नियुत्ऽभिः । आ । पृण । कामं । वाजेभिः । अश्विऽभिः । गोमत्ऽभिः । गोऽपते । धृषत् ॥२१॥

हे गोपते गवां पालयितः स त्वं नोऽस्माकं कामं नियुद्भिर्वडवाभिर्धृषद्धृष्टं दारिद्र्यनाशनसमर्थं यथा भवति तथापृण । आपूरय । यद्वा धृषदितींद्रविशेषणं । शत्रूणां धर्षकस्त्वमित्यर्थः । तथा गोमद्भिर्बहुभिर्गोभिर्युक्तैरश्विभिर्बहुभिरश्वैरुपेतैर्वाजैरन्नैश्चास्मदीयं काममापूरय ॥

॥ अथ द्वाविंशी ॥

तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं यद्गवे न शाकिने ॥२२॥

तत् । वः । गाय । सुते । सचा । पुरुऽहूताय । सत्वने । शं । यत् । गवे । न । शाकिने ॥२२॥

हे स्तोतारो वो यूयं सुतेऽभिषुते सोमे सति पुरुहूताय बहुभिर्यजमानैराहूताय सत्वने शत्रूणां सादयित्रे धनानां वा सनित्रे दात्र इंद्राय तत्स्तोत्रं सचा सह संहता भूत्वा गाय । गायत । यत्स्तोत्रं शाकिने शक्तिमत इंद्राय शं सुखकरं भवति गवे न । यथा गवे यवसं सुखकरं तद्वदित्यर्थः ॥

॥ अथ त्रयोविंशी ॥

न घा वसुर्नि यमते दानं वाजस्य गोमतः । यत्सीमुप श्रवद्गिरः ॥२३॥

न । घ । वसुः । नि । यमते । दानं । वाजस्य । गोऽमतः । यत् । सीं । उप । श्रवत् । गिरः ॥२३॥

वसुर्वासयिता स इंद्रो गोमतो बहुभिर्गोभिर्युक्तस्य वाजस्यान्नस्य बलस्य वा दानं प्रदानं न घ न खलु नियमते । नियच्छति । उपरतं करोति । यद्यदि सीमयं गिरोऽस्मदीयाः स्तुतीरुपश्रवत् उपशृणुयात् । स्तोत्रश्रवणे सति सर्वदा ददातीत्यर्थः ॥

॥ अथ चतुर्विंशी ॥

कुवित्सस्य प्र हि व्रजं गोमंतं दस्युहा गमत् । शचीभिरप नो वरत् ॥२४॥

कुवित्ऽसस्य । प्र । हि । व्रजं । गोऽमंतं । दस्युऽहा । गमत् । शचीभिः । अप । नः । वरत् ॥२४॥

कुवित्सस्य । कुविद्बहुशः स्यति हिनस्तीति कुवित्सो नाम कश्चित् । तस्य स्वभूतं गोमंतं बहुभिर्गोभिर्युक्तं व्रजं गोष्ठं दस्युहा दस्यूनामुपक्षपयितॄणां हंतेंद्रः प्र गमत् । प्रकर्षेण गच्छति । हि यस्मादेवं तस्मात् शचीभिरात्मीयैः कर्मभिः प्रज्ञाभिर्वा नोऽस्माकं ता गा अपवरत् । निगूढास्ता अपावृणोत् ॥

॥ अथ पंचविंशी ॥

इमा उ त्वा शतक्रतोऽभि प्र णोनुवुर्गिरः । इंद्र वत्सं न मातरः ॥२५॥

इमाः । ऊं इति । त्वा । शतक्रतो इति शतऽक्रतो । अभि । प्र । नोनुवुः । गिरः । इंद्र । वत्सं । न । मातरः ॥२५॥

हे शतक्रतो बहुविधकर्मन् बहुविधप्रज्ञ वेंद्र त्वा त्वामभीमा अस्मदीया गिरः स्तुतयः प्रणोनुवुः । प्रकर्षेण पुनः पुनर्गच्छंति । नौतिरत्र गतिकर्मा । तत्र दृष्टांतः । वत्सं न मातरः । यथा मातरो गावो गृहे वर्तमानं वत्सं शीघ्रमभिगच्छंति तद्वत् । यद्वास्मदीया वाचस्त्वामभि नोनुवुः । अभितः शब्दयंति । स्तुवंति । यथा गावो वत्समभिलक्ष्य हंभारवं कुर्वंति तद्वत् ॥

॥ इति चतुर्थस्य सप्तमे पंचविंशो वर्गः ॥

॥ अथ षड्विंशी ॥

दूणाशं सख्यं तव गौरसि वीर गव्यते । अश्वो अश्वायते भव ॥२६॥

दुःऽनशं । सख्यं । तव । गौः । असि । वीर । गव्यते । अश्वः । अश्वऽयते । भव ॥२६॥

हे इंद्र तव त्वदीयं सख्यं सखित्वं दूणाशं दुर्णाशं नाशयितुमशक्यं । अतिदृढमित्यर्थः । अतो हे वीर वीरयितरिंद्र गव्यते गामात्मन इच्छते त्वं गौरसि । गवां प्रदाता भवसि । उपचारात्कारणे कार्यशब्दः । तथाश्वायतेऽश्वानात्मन इच्छतेऽश्वो भव । अश्वप्रदो भवसि ॥

॥ अथ सप्तविंशी ॥

स मंदस्वा ह्यंधसो राधसे तन्वा महे । न स्तोतारं निदे करः ॥२७॥

सः । मंदस्व । हि । अंधसः । राधसे । तन्वा । महे । न । स्तोतारं । निदे । करः ॥२७॥

हे इंद्र स तादृशस्त्वमंधसः सोमस्य पानेन हृष्टया तन्वात्मीयेन शरीरेण मंदस्व । मोदस्व । किमर्थं । महे महते राधसे धनार्थं । हि पूरणः । अपि च त्वदीयं स्तोतारं निदे निंदकाय तस्य वशं न करः । न कुर्याः ॥

॥ अथाष्टाविंशी ॥

इमा उ त्वा सुतेसुते नक्षंते गिर्वणो गिरः । वत्सं गावो न धेनवः ॥२८॥

इमाः । ऊं इति । त्वा । सुतेऽसुते । नक्षंते । गिर्वणः । गिरः । वत्सं । गावः । न । धेनवः ॥२८॥

हे गिर्वणो गीर्भिर्वननीयेंद्र सुते सुते सोमेऽभिषुतेऽभिषुते सतीमा अस्मदीया गिरः स्तुतयस्त्वा त्वां नक्षंते । व्याप्नुवंति । धेनवो दोग्ध्र्यो गावो न गाव इव वत्सं । यथा शीघ्रं वत्सं व्याप्नुवंति तद्वत् ॥

॥ अथैकोनत्रिंशी ॥

पुरूतमं पुरूणां स्तोतॄणां विवाचि । वाजेभिर्वाजयतां ॥२९॥

पुरुऽतमं । पुरूणां । स्तोतॄणां । विऽवाचि । वाजेभिः । वाजऽयतां ॥२९॥

हे इंद्र पुरुतमं पुरूणां बहूनां शत्रूणां तमयितारं ग्लपयितारं त्वां पुरूणां बहूनां स्तोतॄणामस्माकं स्तुतिः प्राप्नोत्विति शेषः । कीदृशानां । विवाचि विविधाः स्तुतशस्त्रात्मिका वाचो यस्मिन्यज्ञे तस्मिन्वाजेभिर्वाजैर्हविर्लक्षणैरन्नैर्वाजयतां वाजवंतं बलवंतं वा त्वां कुर्वतां ॥

॥ अथ त्रिंशी ॥

अस्माकमिंद्र भूतु ते स्तोमो वाहिष्ठो अंतमः । अस्मान्राये महे हिनु ॥३०॥

अस्माकं । इंद्र । भूतु । ते । स्तोमः । वाहिष्ठः । अंतमः । अस्मान् । राये । महे । हिनु ॥३०॥

हे इंद्र वाहिष्ठो वोढृतमोऽस्माकं स्तोमः स्तोत्रं ते तवांतमोऽतिकतमो भूतु । भवतु । त्वं चास्मान्महे महते राये धनाय हिनु । प्रेरय ॥

॥ अथैकत्रिंशी ॥

अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्नस्थात् । उरुः कक्षो न गांग्यः ॥३१॥

अधि । बृबुः । पणीनां । वर्षिष्ठे । मूर्धन् । अस्थात् । उरुः । कक्षः । न । गांग्यः ॥३१॥

बृबुर्नाम पणीनां तक्षा । तत्सकाशाल्लब्धधनो भरद्वाजस्तदीयं दानमनेन तृचेनास्तौत् । एतच्च मनुना स्मर्यते । भरद्वाजः क्षुधार्त्तस्तु सपुत्रो निर्जने वने । बह्वीर्गाः प्रतिजग्राह बृबोस्तक्ष्णो महायशाः । म० १०. १०७. । इति ॥ पणनात्पणयो वणिज एतत्संज्ञा असुरा वा । तेषां तक्षा बृबुर्वर्षिष्ठे मूर्धन्मूर्धनि मूर्धवदुच्छ्रिते स्थलेऽध्यस्थात् अधिष्ठितोऽभूत् गांग्यो गंगायाः कूल उन्नते भवः कक्षो न कक्ष इवोरुर्विस्तीर्णः सन् । जातितो हीनोऽपि दातृत्वात्सर्वत्र श्रेष्ठो भवतीत्यर्थः ॥

॥ अथ द्वात्रिंशी ॥

यस्य वायोरिव द्रवद्भद्रा रातिः सहस्रिणी । सद्यो दानाय मंहते ॥३२॥

यस्य । वायोःऽइव । द्रवत् । भद्रा । रातिः । सहस्रिणी । सद्यः । दानाय । मंहते ॥३२॥

वायोरिव द्रवत् क्षिप्रगामिनो यस्य बृबोर्भद्रा कल्याणी सहस्रिणी सहस्रसंख्यायुक्ता रातिर्दानं सद्यः स्तुतिसमय एव दानाय दानकामाय याचमानाय मह्यं मंहते अपेक्षितं धनं ददाति तं बृबुमित्युत्तरस्यामृचि संबंधः ॥

॥ अथ त्रयस्त्रिंशी ॥

तत्सु नो विश्वे अर्य आ सदा गृणंति कारवः ।
बृबुं सहस्रदातमं सूरिं सहस्रसातमं ॥३३॥

तत् । सु । नः । विश्वे । अर्यः । आ । सदा । गृणंति । कारवः ।
बृबुं । सहस्रऽदातमं । सूरिं । सहस्रऽसातमं ॥३३॥

तमं वृधुं नोऽस्मदीया विश्वे सर्वेऽर्यैः स्तुतीनामीरयितारः कारवः स्तोतारः स सृष्टागृणंति । अभिगृणंति । अभिष्टुवंति । कीदृशं । सहस्रदातममतिशयेन सहस्रसंख्यस्य धनस्य दातारं सूरिं प्राज्ञं यद्वा प्रेरयितारं सहस्रसातममतिशयेन सहस्रसंख्यस्य स्तोत्रस्य धनस्य वा संभक्तारं ॥

॥ इति चतुर्थस्य सप्तमे षड्विंशो वर्गः ॥

त्वामिद्धीति चतुर्दशर्चं तृतीयं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षमैंद्रं । प्रथमातृतीयाद्या अयुजो बृहत्यो द्वितीयाचतुर्थ्याद्या युजः सतोबृहत्यः । तथा चानुक्रांतं । त्वामिद्धि षडूना प्रागाथमिति ॥ सूक्तविनियोगो लैंगिकः ॥ यदि ज्योतिःष्टोमो बृहत्पृष्ठः स्यात्तदानीं निष्केवल्यस्याद्यः प्रगाथः स्तोत्रियः । सूचितं च । यद्वा वै बृहत्त्वामिद्धि हवामहे । आ० ५.१५. । इति ॥ महाव्रतेऽपि निष्केवल्येऽयं प्रगाथः शंसनीयः । तथैव पंचमारण्यके सूचितं । त्वामिद्धि हवामहे त्वं ह्येहि चेरव इति बृहतः स्तोत्रियानुरूपौ । ऐ० आ० ५.८. । इति ॥

॥ तत्र प्रथमा ॥

त्वामिद्धि हवामहे साता वाजस्य कारवः ।
त्वां वृत्रेष्विंद्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥१॥
त्वां । इत् । हि । हवामहे । साता । वाजस्य । कारवः ।
त्वां । वृत्रेषु । इंद्र । सत्ऽपतिं । नरः । त्वां । काष्ठासु । अर्वतः ॥१॥

कारवः स्तोतारो वयं वाजस्यान्नस्य साता सातौ संभजने निमित्तभूते सति हे इंद्र त्वामिद्धि त्वामेव हवामहे । स्तुतिभिराह्वयामः । हे इंद्र सत्पतिं सतां पालयितारं श्रेष्ठं त्वां नरोऽन्येऽपि मनुष्या वृत्रेष्वावरकेषु शत्रुषु सत्सु हवंते । आह्वयंति तज्जयार्थं । अपि चार्वतोऽश्वस्य संबंधिनीषु काष्ठासु यत्राश्वः क्रांत्वा तिष्ठति तासु काष्ठासु संग्रामेषु युद्धकामाश्च त्वामेवाह्वयंति । अतो वयं त्वामेवाह्वयाम इत्यर्थः ॥

॥ अथ द्वितीया ॥

स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
गामश्वं रथ्यमिंद्र सं किर सत्रा वाजं न जिग्युषे ॥२॥

सः । त्वं । नः । चित्र । वज्रऽहस्त । धृष्णुऽया । महः । स्तवानः । अद्रिऽवः ।
गां । अश्वं । रथ्यं । इंद्र । सं । किर । सत्रा । वाजं । न । जिग्युषे ॥ २ ॥

हे चित्र चायनीय वज्रहस्त वज्रबाहो अद्रिवो वज्रवन् । यद्वाहरणात्यनेनेत्यद्रिरशनिः । तद्वन् । एवंभूतेंद्र धृष्णुया धृष्णुः शत्रूणां धर्षयिता महो महान् स ताहशस्त्वं स्तवानोऽस्माभिः स्तूयमानः सन् गां रथ्यं रथवाहनमश्वं च संकिर । सम्यक् प्रयच्छ । जिग्युषे जितवते पुरुषाय भोगार्थं सत्रा महत्प्रभूतं वाजं नान्नमिव । यथा शत्रून् जितवते भोगार्थं बह्वन्नं प्रयच्छसि तद्वत् ॥

महाव्रते निष्केवल्ये यः सत्राहेत्यादिसूक्तशेषः शंसनीयः । सूत्र्यते हि । यः सत्राहा विचर्षणिरिति शेषोऽयं ते अस्तु हर्यत इति सूक्ते । ऐ॰ आ॰ ५.१०. । इति ॥ चातुर्विंशिकेऽहनि माध्यंदिनसवने यः सत्राहेति प्रगाथो वैकल्पिकोऽनुरूपः । सूचितं च । यः सत्राहा विचर्षणिः स्वादोरित्था विषूवतः । आ॰ ७.४. । इति ॥

॥ प्रगाथे प्रथमा सूक्ते तृतीया ॥

यः सत्राहा विचर्षणिरिंद्रं तं हूमहे वयं ।
सहस्रमुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥ ३ ॥

यः । सत्राऽहा । विऽचर्षणिः । इंद्रं । तं । हूमहे । वयं ।
सहस्रऽमुष्क । तुविऽनृम्ण । सत्ऽपते । भव । समत्ऽसु । नः । वृधे ॥ ३ ॥

य इंद्रः सत्राहा महतां शत्रूणां हंता विचर्षणिर्विशेषेण सर्वस्य द्रष्टा तमिंद्रं वयं हूमहे । स्तुतिपदैराह्वयामः । उत्तरार्धः प्रत्यक्षकृतः । हे सहस्रमुष्क सहस्रशेफ । यां कां च स्त्रियं संभवन्निंद्रो भोगलोलुपतया स्वशरीरे पर्वणि पर्वणि शेफान् ससर्जेति कौषीतकिभिराम्नातं । तदभिप्रायेणेदं संबोधनं । हे तुविनृम्ण बहुधन सत्पते सतां पालयितरिंद्र समत्सु संग्रामेषु नोऽस्माकं वृधे वर्धनाय भव ॥

॥ अथ चतुर्थी ॥

बाधसे जनान्वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम ।
अस्माकं बोध्यविता महाधने तनूष्वप्सु सूर्ये ॥ ४ ॥

बाधसे । जनान् । वृषभाऽइव । मन्युना । घृषौ । मीळ्हे । ऋचीषम ।
अस्माकं । बोधि । अविता । महाऽधने । तनूषु । अप्ऽसु । सूर्ये ॥ ४ ॥

हे ऋचीषम ऋचा सम ऋग्याहशं रूपं प्रतिपादयति ताहग्रूपेंद्र घृषौ शत्रूणां घर्षके बाधके मीळ्हे संग्रामे जनानस्मदीयान् शत्रून् वृषभेव वृषभेणेव बलवता मन्युना क्रोधेन बाधसे। बाधस्व। तथा महाधने महतो धनस्य निमित्तभूते संग्रामे चास्माकमविता रक्षिता बोधि। बुध्यस्व। रक्षितृत्वेनात्मानं जानीहि। रक्षको भवेति यावत्। किमर्थं। तनूषु तनयेष्वप्सूदकेषु सूर्ये च लब्धव्येषु सत्स्वेतेषां लाभार्थं। सूर्यस्य लाभः संदर्शनं। तदर्थमित्यर्थः॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिन इंद्र ज्येष्ठं न आ भरेति प्रगाथो वैकल्पिकोऽनुरूपः। सूचितं च। इंद्र ज्येष्ठं न आ भरा त्वा सहस्रमा शतं। आ॰ ७.४.। इति॥

॥ तत्र प्रथमा सूक्ते पंचमी॥

इंद्र ज्येष्ठं न आ भरँ ओजिष्ठं पपुरि श्रवः।
येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः॥५॥

इंद्र। ज्येष्ठं। नः। आ। भर। ओजिष्ठं। पपुरि। श्रवः।
येन। इमे इति। चित्र। वज्रऽहस्त। रोदसी इति। आ। उभे इति। सुऽशिप्र। प्राः॥५॥

हे इंद्र ज्येष्ठं प्रशस्यतममोजिष्ठमोजस्वितममतिशयेन बलकरं पपुरि पूरकं श्रवोऽन्नं नोऽस्मभ्यमाभर। आहर। प्रयच्छ। हे चित्र चायनीय वज्रहस्त वज्रबाहो हे सुशिप्र शोभनहनुक एवंभूत हे इंद्र येनान्नेनेमे परिहश्यमाने उभे रोदसी द्यावापृथिव्यावाप्रा आपूरयसि तदन्नमाभरेत्यन्वयः॥

॥ इति चतुर्थस्य सप्तमे सप्तविंशो वर्गः॥

॥ अथ षष्ठी॥

त्वामुग्रमवसे चर्षणीसहं राजन्देवेषु हूमहे।
विश्वा सु नो विथुरा पिब्दना वसोऽमित्रान्त्सुषहान्कृधि॥६॥

त्वां। उग्रं। अवसे। चर्षणिऽसहं। राजन्। देवेषु। हूमहे।
विश्वा। सु। नः। विथुरा। पिब्दना। वसो इति। अमित्रान्। सुऽसहान्। कृधि॥६॥

हे राजन् राजमानेंद्र देवेषु देवानां मध्य उग्रमुद्गूर्णबलं चर्षणीसहं चर्षणीनां शत्रुभूतानां प्रजानामभिभवितारं त्वामवसे रक्षणाय हूमहे। आह्वयामः। त्वं

विश्वा सर्वाणि पिष्टना पिष्टनानि रक्षांसि। पिहितमव्यक्तं शब्दयंत इति पिष्टनानि। पृषोदरादिः। तानि सु सुष्टु विथुरा व्यथितानि बाधितानि कुरु। हे वसो वासकेंद्र नोऽस्मदीयानमित्रान् शत्रूंश्च सुषहान् सुखेनाभिभवितुं शक्यान् कृधि। कुरु॥

॥ अथ सप्तमी ॥

यदिंद्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु।
यद्वा पंच क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या ॥७॥
यत्। इंद्र। नाहुषीषु। आ। ओजः। नृम्णं। च। कृष्टिषु।
यत्। वा। पंच। क्षितीनां। द्युम्नं। आ। भर। सत्रा। विश्वानि। पौंस्या ॥७॥

हे इंद्र नाहुषीषु। नहुष इति मनुष्यनाम। तत्संबंधिनीषु कृष्टिषु प्रजासु। आकारः समुच्चये। यच्चोजो बलं नृम्णं धनं च विद्यते। यद्वा यच्च पंच पंचानां क्षितीनां। निषादपंचमाश्चत्वारो वर्णाः पंच क्षितयः। तेषां स्वरूपं द्युम्नं द्योतमानमन्नं तत्सर्वमस्मभ्यमाभर। आहर। प्रयच्छ। तथा सत्रा महांति विश्वानि सर्वाणि पौंस्यानि बलानि चास्मभ्यमाहर॥

॥ अथाष्टमी ॥

यद्वा तृक्षौ मघवन्द्रुह्यावा जने यत्पूरौ कच्च वृष्ण्यं।
अस्मभ्यं तद्रिरीहि सं नृषाह्येऽमित्रान्पृत्सु तुर्वणे ॥८॥
यत्। वा। तृक्षौ। मघऽवन्। द्रुह्यौ। आ। जने। यत्। पूरौ। कत्। च। वृष्ण्यं।
अस्मभ्यं। तत्। रिरीहि। सं। नृऽसह्ये। अमित्रान्। पृत्ऽसु। तुर्वणे ॥८॥

हे मघवन् धनवन्निंद्र तृक्षावेतत्संज्ञे राजनि यद्वा यच्च बलं विद्यते द्रुह्यावा द्रुह्यौ चैतत्संज्ञे च जने यद्बलमस्ति। पूरावेतत्संज्ञे नृपे च यत्कच्च यत्किंचन वृष्ण्यं वीर्यं विद्यते तत्सर्वमस्मभ्यं स्तोतृभ्यं सं सम्यग्रिरीहि। प्रयच्छ। कदा। नृसह्ये नृभिर्योद्धृभिः सोढव्ये युद्धे प्रवृत्ते। किमर्थं। पृत्सु पृतनासु संग्रामेष्वमित्रान् शत्रून् तुर्वणे तुर्वितुं हिंसितुं॥

चातुर्विंशिकेऽहनि निष्केवल्य इंद्र त्रिधात्विति वैरूपस्य सामप्रगाथः शंसनीयः। सूचितं च। इंद्र त्रिधातु शरणं त्वमिंद्र प्रतूर्तिषु। आ॰ ७.३.। इति॥

॥ तत्र प्रथमा सूक्ते नवमी ॥

इंद्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत्।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥९॥

इंद्र। त्रिऽधातु। शरणं। त्रिऽवरूथं। स्वस्तिऽमत्।
छर्दिः। यच्छ। मघवत्ऽभ्यः। च। मह्यं। च। यवय। दिद्युं। एभ्यः ॥९॥

हे इंद्र त्रिधातु त्रिप्रकारं त्रिभूमिकं त्रिवरूथं त्रयाणां शीतातपवर्षाणां वारकं स्वस्तिमदविनाशयुक्तं छर्दिश्छदिष्मदाच्छादनयुक्तमेवंगुणविशिष्टं शरणं गृहं मघवद्भ्यश्च। मघं हविर्लक्षणं धनं। तद्वद्भ्यश्चास्मदीयेभ्यो मह्यं भरद्वाजाय च यच्छ। देहि। अपि चैभ्यः सकाशाद्दिद्युं शत्रुप्रेरितं द्योतमानमायुधं यवय। पृथक्कुरु ॥

॥ अथ दशमी ॥

ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नंति धृष्णुया।
अध स्मा नो मघवन्निंद्र गिर्वणस्तनूपा अंतमो भव ॥१०॥

ये। गव्यता। मनसा। शत्रुं। आऽदभुः। अभिऽप्रघ्नंति। धृष्णुऽया।
अध। स्म। नः। मघऽवन्। इंद्र। गिर्वणः। तनूऽपाः। अंतमः। भव ॥१०॥

ये जना गव्यता शत्रूणां गा इच्छता मनसा युक्ताः संतः शत्रुं शातयितारं वैरिणमादभुः अहिंसिषुः। ये च धृष्णुया धृष्णवो धृष्टाः संतोऽस्मानभिलक्ष्य प्रघ्नंति प्रकर्षेण हिंसंति हे मघवन् धनवन् गिर्वणो गिरां संभक्तरिंद्र अध स्मास्मिन्काले तेभ्यः सकाशात् नोऽस्माकं तनूपास्तनूनां शरीराणां रक्षिता सन् अंतमोऽंतिकतमो भव ॥

॥ इति चतुर्थस्य सप्तमेऽष्टाविंशो वर्गः ॥

॥ अथैकादशी ॥

अध स्मा नो वृधे भवेंद्र नायमवा युधि।
यदंतरिक्षे पतयंति पर्णिनो दिद्यवस्तिग्ममूर्धानः ॥११॥

अध। स्म। नः। वृधे। भव। इंद्र। नायं। अव। युधि।
यत्। अंतरिक्षे। पतयंति। पर्णिनः। दिद्यवः। तिग्मऽमूर्धानः ॥११॥

हे इंद्र अध स्म तदानीं नोऽस्माकं वृधे वर्धनाय भव । अपि च नायं योऽस्माकं नयो नेता युधि युद्धे तमप्यव । रक्ष । तदेत्युक्तं कदेत्यत आह । पर्णिनः पक्षवंतस्तिग्ममूर्धानस्तीक्ष्णास्या दिद्यवो दीप्ता बाणा यद्यदांतरिक्षे व्योम्नि पतयंति शत्रुभिर्विसृष्टाः पतंति तदानीं वृधे भवेत्यन्वयः ॥

॥ अथ द्वादशी ॥

यत्र शूरासस्तन्वो वितन्वते प्रिया शर्म पितृणां ।

अध स्मा यच्छ तन्वे३ तने च छर्दिरचित्तं यावय द्वेषः ॥१२॥

यत्र । शूरासः । तन्वः । विऽतन्वते । प्रिया । शर्म । पितृणां ।

अध । स्म । यच्छ । तन्वे । तने । च । छर्दिः । अचित्तं । यवय । द्वेषः ॥१२॥

यत्र यस्मिन्काले शूरासः शूराः शौर्यवंतो योद्धारस्तन्वः स्वकीयानि शरीराणि वितन्वते विस्तारयंति स्वामिनो जयाय शत्रूणां पुरतो दर्शयंति । तथास्मिन्काले प्रिया प्रियाणि शर्म शर्माणि स्थानानि पितृणां जनकानां संबंधीनि । तैरर्जितानीति यावत् । एतानि च वितन्वते शत्रूणां पुरस्ताद्विस्तारयंति । परित्यजंतीति यावत् । अध स्मास्मिन्काले तन्वे शरीराय तने तनयाय च छर्दिश्छादनमायुधानां निवारकं कवचमचित्तं शत्रुभिरज्ञातं यथा भवति तथा यच्छ । प्रयच्छ । शत्रुज्ञानात्पूर्वमेव देहीत्यर्थः । अपि च द्वेषो द्वेष्टॄन् शत्रून्यावय । तेभ्यो वियोजय ॥

॥ अथ त्रयोदशी ॥

यदिंद्र सर्गे अर्वतश्चोदयासे महाधने ।

असमने अध्वनि वृजिने पथि श्येनाँ इव श्रवस्यतः ॥१३॥

यत् । इंद्र । सर्गे । अर्वतः । चोदयासे । महाऽधने ।

असमने । अध्वनि । वृजिने । पथि । श्येनान्ऽइव । श्रवस्यतः ॥१३॥

हे इंद्र महाधने जेतव्यस्य महतो धनस्य निमित्ते महति संग्रामे सर्गे उद्योगे सत्यसमने विषमेऽध्वनि मार्गेऽर्वतोऽस्मादीयानश्वान्यद्यदा चोदयासे प्रेरयसि । वृजिने कुटिले पथि मार्गेऽतरिक्षलक्षणे श्रवस्यतः श्रवोऽन्नमामिषरूपमात्मन इच्छतः श्येनानिव यथामिषार्थिनः श्येना अंतरिक्षे शीघ्रं गच्छंति तथास्मदीया-

नश्वान्यदा त्वं शीघ्रं गमयसि तदानीमस्माकं तन्वे तनयाय च छर्दिर्यच्छेति पूर्वस्यामृचि संबंधः ॥

॥ अथ चतुर्दशी ॥

सिंधूँरिव प्रवण आशुया यतो यदि क्रोशमनु ष्वणि ।

आ ये वयो न ववृ॑तत्यामिषि गृभीता बाह्वोर्गवि ॥१४॥

सिंधून्ऽइव । प्रवणे । आशुऽया । यतः । यदि । क्रोशं । अनु । स्वनि ।

आ । ये । वयः । न । ववृ॑तति । आमिषि । गृभीताः । बाह्वोः । गवि ॥१४॥

उक्तस्यैवार्थस्यातिशयप्रतिपादनार्थेयं । प्रवणे निम्नदेशे सिंधूनिव स्यंदमाना नदीरिवाशुयाशु शीघ्रं यतो गच्छतोऽश्वान् हे इंद्र यदि चोदयासे प्रेरयसि । कदा । क्रोशमनु । क्रोश इति भयनाम । भयमनुलक्ष्य स्वनि स्वन आक्रोशे सति । कीदृशास्तेऽश्वाः । बाह्वोर्बाहुमूलयोर्गृभीताः कक्ष्यया बद्धा येऽश्वा गवि गोरूपे धने जेतव्ये सत्याववृतति पुनः पुनरावर्तंते । आमिषामिषे मांसे ग्रहीतव्ये सति वयो न यथा श्येनादयः पक्षिणः पुनः पुनरावर्तंते तद्वत् । एवंभूतानश्वान् भयेन क्रोशे सति यदा त्वं प्रेरयसि तदानीमस्मदीयेभ्यश्छर्दिः प्रयच्छेति संबंधः । यद्यप्यृषेर्युद्धे प्रसक्तिर्नास्ति तथापि राजपुरोहितत्वेन राजकीयानां पुरुषाणां जयः प्रार्थ्यत इति न कश्चिद्विरोधः ॥

॥ इति चतुर्थस्य सप्तमे नवविंशो वर्गः ॥

स्वादुरित्येकत्रिंशदृचं चतुर्थं सूक्तं भरद्वाजपुत्रस्य गर्गस्यार्षं । प्रस्तोक इत्येषा त्रिष्टुप् दशाश्वानित्यनुष्टुप् दश रथानिति गायत्री महि राध इति द्विपदा द्व्येकादशका युजानो हरितेत्येषा बृहती दिवस्पृथिव्या इति जगती शिष्टास्त्रिष्टुभः । आदितः पंचानामृचां सोमो देवता । अगव्यूति क्षेत्रमित्यर्धर्चप्रथमपादे देवा उत्तरस्य भूमिस्तृतीयस्य बृहस्पतिश्चतुर्थस्येंद्रः । प्रस्तोक इत्याद्याश्चतस्रः सृंजयपुत्रस्य राज्ञो दानस्तुतिरूपत्वात्तद्देवताकाः । वनस्पते वीड्वंग इत्ययं तृचो रथदेवत्यः । उप श्वासयेति तृचो दुंदुभिदेवत्यः । समश्वपर्णा इत्यर्धर्च ऐंद्रः । शिष्टा इंद्रदेवताकाः । तथा चानुक्रांतं । स्वादुरेकत्रिंशद्गर्गः पंचादौ सौम्यो गव्यूत्यर्धर्चो लिंगोक्तदेवतः प्रस्तोक इति त्रिष्टुबनुष्टुब्गायत्री द्विपदा सार्जयस्य प्रस्तोकस्य दानस्तुतिः परौ तृचौ रथदुंदुभिदेवत्यावैंद्रोऽंत्योऽर्धर्चो युजानो बृहती दिवस्पृथिव्या जगती ॥

आग्निमारुत आदितश्चतस्रः शंसनीयाः। सूत्रितं च। स्वादुष्किलायमिति चतस्रो मध्ये चाह्वानं। आ० ५.२०.। इति ॥

॥ तत्र प्रथमा ॥

स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायं।
उतो न्व१स्य पपिवांसमिंद्रं न कश्चन सहत आहवेषु ॥१॥
स्वादुः। किल। अयं। मधुऽमान्। उत। अयं। तीव्रः। किल। अयं। रसऽवान्। उत। अयं।
उतो इति। नु। अस्य। पपिऽवांसं। इंद्रं। न। कः। चन। सहते। आऽहवेषु ॥१॥

अयमभिषुतः सोमः स्वादुरास्वादनीयः किल भवति। उतापि च मधुमान्माधुर्यवांश्चायं सोमो भवति। तथायं सोमस्तीव्रः किल मदोत्पादने तीक्ष्णः खलु भवति। उतापि चायं सोमो रसवान् सारवांश्च भवति। अनेन वाक्यचतुष्टयेन सोमस्य माधुर्यातिशयत्वं च प्रतिपादितं। उतो अपि चास्य सोमस्य॥ द्वितीयार्थे षष्ठी ॥ इमं सोमं पपिवांसं पीतवंतमिंद्रमाहवेषु संग्रामेषु न कश्चन न कोऽपि सहते। अभिभवति। नु इति पूरकः ॥

॥ अथ द्वितीया ॥

अयं स्वादुरिह मदिष्ठ आस यस्येंद्रो वृत्रहत्ये ममाद।
पुरूणि यश्च्यौत्ना शंबरस्य वि नवतिं नव च देह्यो३ हन् ॥२॥
अयं। स्वादुः। इह। मदिष्ठः। आस। यस्य। इंद्रः। वृत्रऽहत्ये। ममाद।
पुरूणि। यः। च्यौत्ना। शंबरस्य। वि। नवतिं। नव। च। देह्यः। हन् ॥२॥

इहास्मिन्यज्ञेऽयं सोमः स्वादुरास्वादितः पीतः सन् मदिष्ठोऽतिशयेन मदयितास। बभूव। यस्य सोमस्य पानेनेंद्रो वृत्रहत्ये वृत्रहननकाले ममाद मत्तो बभूव। यः सोमः शंबरस्यासुरस्य पुरूणि बहूनि च्यौत्ना च्यौत्नानि बलानि जघान। तथा देह्यो दिग्धा उपचिता आसुरीः पुरीः तदीयान् देहान् वा नवतिं नव च नवोत्तरनवतिसंख्याका यः सोमो विहन् व्यहन् अयं सोम इति प्रथमपादेन संबंधः ॥

॥ अथ तृतीया ॥

अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः ।
अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे ॥३॥

अयं । मे । पीतः । उत् । इयर्ति । वाचं । अयं । मनीषां । उशतीं । अजीगरिति ।
अयं । षट् । उर्वीः । अमिमीत । धीरः । न । याभ्यः । भुवनं । कत् । चन । आरे ॥३॥

अयं सोमः पीतः सन् मे मम वाचमुदियर्ति । उद्गमयति । अयमेव सोम उशतीं कांतां मनीषां बुद्धिमुदजीगः । उद्गारयति । प्रकाशयति ॥ गॄ निगरणे इत्यस्माण्ण्यंताल्लुङि चङि रूपं ॥ अपि चायं धीरो धीमान् सोमः षळुर्वीः षण्मोर्वीरंहसस्पांतु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्चेति प्रतिपादिता द्युपृथिव्याद्याः षडमिमीत । निर्मितवान् । याभ्य उर्वीभ्य आरे दूरे विप्रकृष्टे देशे कच्चन किंचन भुवनं भूतजातं न भवति अपि त्वास्वेव सर्वं भूतजातं वर्तते ताहशीरुर्वीर्निर्मितवान् ॥

॥ अथ चतुर्थी ॥

अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः ।
अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्वं१तरिक्षं ॥४॥

अयं । सः । यः । वरिमाणं । पृथिव्याः । वर्ष्माणं । दिवः । अकृणोत् । अयं । सः ।
अयं । पीयूषं । तिसृषु । प्रवत्ऽसु । सोमः । दाधार । उरु । अंतरिक्षं ॥४॥

स खल्वयं सोमो यः पृथिव्या वरिमाणमुरुत्वं विस्तृतत्वमकृणोत् अकरोत् । तथायं सोमो दिवो द्युलोकस्य वर्ष्माणं संहतत्वं दृढत्वमकृणोत् अकरोत् । अयं सोमः स हि भवति । अपि चायं सोमस्तिसृष्वोषधीष्वप्सु गोषु च प्रवत्सु प्रकृष्टास्वेतासु पीयूषं रसं दाधार । धारयति । तथोरु विस्तीर्णमंतरिक्षं च धारयति । तथा च मंत्रांतरं । त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः । त्वमा ततंथोर्वंतरिक्षं । ऋग्वे॰ १.९१.२२. । इति ॥

॥ अथ पंचमी ॥

अयं विदच्चित्रदृशीकमर्णः शुक्रसद्मनामुषसामनीके ।
अयं महान्महता स्कंभनेनोद्द्यामस्तभ्नाद्वृषभो मरुत्वान् ॥५॥

अयं। विदत्। चित्रऽदृशीकं। अर्णः। शुक्रऽसद्मनां। उषसां। अनीके।

अयं। महान्। महता। स्कंभनेन। उत्। द्यां। अस्तभ्नात्। वृषभः। मरुत्वान् ॥५॥

अयं सोमश्चित्रदृशीकं विचित्रदर्शनं यद्वाश्चर्यत्वेन दर्शनीयमर्णः सर्वस्य प्रेरकं सौरं ज्योतिर्विदत्। लंभयति। कस्मिन्काले। शुक्रसद्मनां शुक्रं निर्मलमंतरिक्षं सद्म सदनं यासां तासामुषसामनीके प्रमुखे। उषःकाल इत्यर्थः। अपि च महान् प्रवृद्धोऽयं सोमो महता स्थविष्ठेन स्कंभनेन स्तंभनसाधनेन मध्यवर्तिनांतरिक्षेण द्यां द्युलोकमुदस्तभ्नात्। ऊर्ध्वमस्थापयत्। यथाधो न पतति तथांतरिक्षं तस्याधारत्वेन कृतवानित्यर्थः। कीदृशः सोमः। वृषभो वृष्टेर्जनयिता। सोमाहुत्या हि वृष्टिर्जन्यते। मरुत्वान्मरुद्भिर्युक्तः॥

॥ इति चतुर्थस्य सप्तमे त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

धृषत्पिब कलशे सोममिंद्र वृत्रहा शूर समरे वसूनां।

माध्यंदिने सवन आ वृषस्व रयिस्थानो रयिमस्मासु धेहि ॥६॥

धृषत्। पिब। कलशे। सोमं। इंद्र। वृत्रऽहा। शूर। संऽअरे। वसूनां।

माध्यंदिने। सवने। आ। वृषस्व। रयिऽस्थानः। रयिं। अस्मासु। धेहि ॥६॥

हे शूर शौर्यवन्निंद्र वृत्रहा वृत्राणामावरकाणां शत्रूणां हंता त्वं वसूनां धनानां समरे संग्रामे निमित्तभूते सति कलशे द्रोणकलशेऽवस्थितं सोमं धृषत् धृष्टं यथा भवति तथा पिब। अपि च माध्यंदिने सवन आवृषस्व। आसिंचस्व। जठरं सोमेन पूरय। सैंद्रं हि माध्यंदिनं सवनं। किंच रयिस्थानो रयीणां धनानां स्थानभूतस्त्वं रयिं धनमस्मासु धेहि। धारय॥

॥ अथ सप्तमी ॥

इंद्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ।

भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः ॥७॥

इंद्र। प्र। नः। पुरएताऽइव। पश्य। प्र। नः। नय। प्रऽतरं। वस्यः। अच्छ।

भव। सुऽपारः। अतिऽपारयः। नः। भव। सुऽनीतिः। उत। वामऽनीतिः ॥७॥

हे इंद्र त्वं पुरएतेव पुरतो गंतेव नोऽस्मान् प्र पश्य। प्रकर्षेणेक्षस्व। यथा

मार्गरक्षकः स्वयं पुरतो गच्छन्ननुगच्छतो रक्षणीयान् पथिकान्पश्यति तथा पश्येत्यर्थः । तथा वस्यो वसीयः श्रेष्ठं धनमच्छाभिमुख्येन प्रतरं प्रकृष्टतरमतिशयेन प्रणय । अस्मान्प्रापय । तथा सुपारः सुष्ठु पारयिता दुःखेभ्यस्तारयिता भव । तथा नोऽस्मान् स्तोतॄनतिपारयः । शत्रूनतिक्रामय । सुनीतिः शोभननयनश्चास्माकं भव । उतापि च वामनीतिर्वामानां वननीयानां धनानां नेता भव । यद्वास्मदर्थं श्रेष्ठप्रापणो भव ॥

ऐंद्रे पशावुरुं न इत्येषा वपाया याज्या । सूत्रितं च । उरुं नो लोकमनु नेषि विद्वान् प्र ससाहिषे पुरुहूत शत्रून् । आ० ३.७. । इति ॥ होत्रकैः सदःप्रसर्पणसमयेऽप्येषा जप्या । सूत्रितं च । उरुं नो लोकमनु नेषि विद्वानिति जपंतः । आ० ५.३. । इति ॥ चातुर्विंशिकेऽहन्यहर्गणेषु च द्वितीयादिष्वहःसु माध्यंदिनसवनेऽच्छावाकस्यैषा चारंभणीया । सूत्रितं च । उरुं नो लोकमनु नेषि विद्वानिति कक्षप्स आरंभणीया । आ० ७.४. । इति ॥

॥ सैषा सूक्तेऽष्टमी ॥

उरुं नो लोकमनु नेषि विद्वान्त्स्वर्वज्ज्योतिरभयं स्वस्ति ।
ऋष्वा त इंद्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहंता ॥ ८ ॥

उरुं । नः । लोकं । अनु । नेषि । विद्वान् । स्वःऽवत् । ज्योतिः । अभयं । स्वस्ति ।
ऋष्वा । ते । इंद्र । स्थविरस्य । बाहू इति । उप । स्थेयाम । शरणा । बृहंता ॥ ८ ॥

हे इंद्र विद्वान् जानंस्त्वमुरुं विस्तीर्णं लोकं स्थानं स्वर्गाख्यं नोऽस्माननुनेषि । अनुगमय । तथा स्वर्वत्सुखवदभयं भयरहितं ज्योतिश्च स्वस्ति क्षेमेणानुनेषि । अस्माननुगमय । हे इंद्र स्थविरस्य स्थूलस्य वृद्धस्य ते तव संबंधिनावृष्वा दर्शनीयौ बृहंता महांतौ बाहू त्वदीयौ हस्तौ शरणा शरणौ रक्षकौ रक्षकतयोपस्थेयाम । उपतिष्ठेम । सेवेमहि ॥

॥ अथ नवमी ॥

वरिष्ठे न इंद्र वंधुरे धा वहिष्ठयोः शतावन्नश्वयोरा ।
इषमा वक्षीषां वर्षिष्ठां मा नस्तारीन्मघवन्रायो अर्यः ॥ ९ ॥

वरिष्ठे । नः । इंद्र । वंधुरे । धाः । वहिष्ठयोः । शतऽवन् । अश्वयोः । आ ।
इषं । आ । वक्षि । इषां । वर्षिष्ठां । मा । नः । तारीत् । मघऽवन् । रायः । अर्यः ॥ ९ ॥

हे इंद्र वरिष्ठ उरुतमे विस्तीर्णतमे वंधुरे आत्मीये रथे नोऽस्मान् आ धेहि। धारय। अपि च हे शतावन् शतसंख्यधनेंद्र वहिष्ठयोर्वोढृतमयोः। आकारः समुच्चये। अश्वयोरा त्वदीययोरश्वयोश्चास्मान् धारय। तथेषामन्नानां मध्ये वर्षिष्ठां वृद्धतमामिषमन्नमावक्षि। अस्मदर्थमावह। आनय। हे मघवन् धनवन्निंद्र अर्यो धनस्य स्वाम्यन्यः कश्चिन्नोऽस्माकं रायो धनानि मा तारीत्। मा हिंसीत्॥

॥ अथ दशमी ॥

इंद्र॑ मृ॒ळ मह्यं॑ जी॒वातु॑मिच्छ चो॒दय॒ धिय॒मय॑सो॒ न धारां॑।

यत्किं॒चाहं त्वा॒युरि॒दं वदा॑मि॒ तज्जु॑षस्व कृ॒धि मा॑ दे॒ववं॑तं ॥१०॥

इंद्र॑। मृ॒ळ। मह्यं॑। जी॒वातुं॑। इ॒च्छ॒। चो॒दयं॑। धियं॑। अयं॑सः। न। धारां॑।

यत्। किं। च। अ॒हं। त्वा॒ऽयुः। इ॒दं। वदा॑मि। तत्। जु॒ष॒स्व॒। कृ॒धि। मा॒। दे॒वऽवं॑तं ॥१०॥

हे इंद्र मृळ। मृळय। अस्मान् सुखय। जीवातुं जीवनौषधं च मह्यं दातुमिच्छ। तथा धियं बुद्धिं चोदय। स्तुतिविषयां कर्मविषयां वा प्रेरय। तीक्ष्णीकुरु। अयसो न धारामयोमयस्य खड्गादेर्धारामिव। सा यथा सूक्ष्मा तद्वत्सूक्ष्मविषयां धियं चोदयेत्यर्थः। किंच त्वायुस्त्वामात्मन इच्छन् इदमिदानीं यत्किंचनाहं वदामि समीचीनमसमीचीनं वा तज्जुषस्व। मा मां च देववंतं रक्षकैर्देवैरुपेतं कृधि। कुरु॥

॥ इति चतुर्थस्य सप्तम एकत्रिंशो वर्गः ॥

आयुष्कामेष्ट्यामिंद्रस्य त्रातारमित्यनुवाक्या। सूचितं च। त्रातारमिंद्रमवितारमिंद्रं मा ते अस्यां सहसावन्परिष्टौ। आ० २.१०.। इति ॥

॥ सैषा चैकादशी ॥

त्रा॒तार॒मिंद्र॑मवि॒तार॒मिंद्रं॒ हवे॑हवे सु॒हवं॒ शूर॒मिंद्रं॑।

ह्वया॑मि श॒क्रं पु॑रुहू॒तमिंद्रं॑ स्व॒स्ति नो॑ म॒घवा॑ धा॒त्विंद्रः॑ ॥११॥

त्रा॒तारं॑। इंद्रं॑। अ॒वि॒तारं॑। इंद्रं॑। हवे॑ऽहवे। सु॒ऽहवं॑। शूरं॑। इंद्रं॑।

ह्वया॑मि। श॒क्रं। पु॒रु॒ऽहू॒तं। इंद्रं॑। स्व॒स्ति। नः॒। म॒घऽवा॑। धा॒तु॒। इंद्रः॑ ॥११॥

त्रातारं शत्रुभ्यः पालयितारमिंद्रमाह्वयामि। तथावितारं कामैस्तर्पयितारमिंद्रमाह्वयामि हवे हवे सर्वेष्वाहवनेषु सुहवं सुखेनाह्वातुं शक्यं शूरं शौर्यवंतं

शचं सर्वकार्येषु शक्तं पुरुहूतं पुरुभिर्बहुभिः पालनार्थमाहूतमेवंविधमिंद्रं ह्वयामि। आह्वयामि। एवमाहूतो मघवा धनवान् स इंद्रः स्वस्त्यविनाशं नोऽस्मभ्यं धातु। ददातु। यद्वास्माकं विदधातु ॥

॥ अथ द्वादशी ॥

इंद्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥१२॥
इंद्रः। सुऽत्रामा। स्वऽवान्। अवःऽभिः। सुऽमृळीकः। भवतु। विश्वऽवेदाः।
बाधतां। द्वेषः। अभयं। कृणोतु। सुऽवीर्यस्य। पतयः। स्याम ॥१२॥

सुत्रामा सुष्ठु त्राता स्ववान्धनवान् स इंद्रोऽवोभी रक्षणैः सुमृळीकः सुष्ठु सुखयिता भवतु। तथा च विश्ववेदाः सर्वधनः सर्वविद्वान्वा स इंद्रो द्वेषो द्वेष्टॄन् शत्रून् बाधतां। हिनस्तु। अभयं भयरहितं चास्माकं कृणोतु। करोतु। वयं च तत्प्रसादात्सुवीर्यस्य शोभनवीर्यस्य पतयः स्याम। भवेम ॥

॥ अथ त्रयोदशी ॥

तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम।
स सुत्रामा स्ववाँ इंद्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥१३॥
तस्य। वयं। सुऽमतौ। यज्ञियस्य। अपि। भद्रे। सौमनसे। स्याम।
सः। सुऽत्रामा। स्वऽवान्। इंद्रः। अस्मे इति। आरात्। चित्। द्वेषः। सनुतः। युयोतु ॥१३॥

यज्ञियस्य यज्ञार्हस्य सुमतौ शोभनायामनुग्रहात्मिकायां बुद्धौ वयं स्याम। विषयभूता भवेम। तथा भद्रे कल्याणे सौमनसे सुमनसो भावेऽपि तदीये स्याम। भवेम। स इंद्रोऽस्मास्वनुग्रहात्मिकां बुद्धिं सौमनस्यं च करोत्वित्यर्थः। सुत्रामा सुष्ठु त्राता स्ववान्धनवान् स इंद्रश्चास्मे अस्मत्त आराच्चित् दूरदेश एव द्वेषो द्वेष्टॄन् सनुतः। अंतर्हितनामैतत्। अंतर्हितान्युयोतु। पृथक्करोतु ॥

॥ अथ चतुर्दशी ॥

अव त्वे इंद्र प्रवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवंते।
उरू न राधः सवना पुरूण्यपो गा वज्रिन्युवसे समिंदून् ॥१४॥

अर्व। त्वे इति॑। इ॒न्द्र॒। प्र॒ऽवतः॑। न। ऊ॒र्मिः। गिरः॑। ब्रह्मा॑णि। नि॒ऽयुतः॑। ध॒व॒न्ते॒।
उ॒रु। न। राधः॑। सव॑ना। पु॒रूणि॑। अ॒पः। गाः। व॒ज्रि॒न्। यु॒व॒से॒। सं। इन्दू॑न् ॥१४॥

हे इंद्र त्वे त्वां नियुतः स्तोतुर्गिर उक्थात्मिका वाचो ब्रह्माणि सामरूपाणि स्तोत्राणि चावधवंते। अवगच्छंति। तत्र दृष्टांतः। ऊर्मिर्जलसंघः प्रवतो न प्रवणदेशानिव। यथोच्छ्रितात्स्थलान्निम्नदेशं शीघ्रं गच्छति तद्वत्। नशब्दः समुच्चये। उरूरूणि राधो राधांसि च हविर्लक्षणानि धनानि पुरूणि बहूनि सवना सवनानि बहवोऽभिषुताः सोमाश्च त्वामेवाभिगच्छंति। हे वज्रिन् वज्रवन्निंद्र अपो वसतीवर्याख्या गा गोविकारान् घृतदध्यादीन् श्रपणार्थानिंदून् सोमांश्च सं युवसे। सम्यक् मिश्रयसि। त्वां यष्टुं वसतीवरीभिरभिषुत्य तं सोममाशिरादिभिः श्रपणद्रव्यैः संस्कुर्वंतीत्यर्थः॥

॥ अथ पंचदशी ॥

क ईं॑ स्तव॒त्कः पृ॑णा॒त्को य॑जाते॒ यदु॒ग्रमिन्म॒घवा॑ वि॒श्वहावे॑त्।
पादा॑विव प्र॒हर॑न्न॒न्यम॑न्यं कृ॒णोति॒ पूर्व॒मप॑रं॒ शची॑भिः ॥१५॥

कः। ई॒म्। स्त॒व॒त्। कः। पृ॒णा॒त्। कः। य॒जा॒ते॒। यत्। उ॒ग्रम्। इत्। म॒घऽवा॑। वि॒श्वहा॑। अवे॑त्।
पादौ॑ऽइव। प्र॒ऽहर॑न्। अ॒न्यंऽअ॑न्यं। कृ॒णोति॑। पूर्वं॑। अप॑रं। शची॑भिः ॥१५॥

कः स्तोतेमेनमिंद्रं स्तवत्। स्तुयात्। स्तोतुं शक्नुयात्। को वा पृणात्। एनं प्रीणयेत्। कश्च यजाते। एनं हविर्भिर्यजेत। यद्यस्मादयं मघवा धनवानिंद्र उग्रमिदुद्गूर्णमेव विश्वहा सर्वदावेत् आत्मानं वेत्ति जानाति सर्वदोग्र एव भवति तस्मात्कारणात् न कोऽप्येनं स्तोतुं प्रीणयितुं यष्टुं वा शक्नोतीति भावः। इतोऽपि स्तुत्यादेरविषय इत्याह यस्मादयमिंद्रः शचीभिरात्मीयाभिः प्रज्ञाभिः पूर्वं प्रथमभाविनं संतं स्तोतारमपरं पश्चाद्भाविनं चान्यमन्यं परस्परव्यतिहारेण कृणोति करोति। यः प्रथमभावी मुख्यः स्तोता तं जघन्यं करोति यश्च जघन्यः स्तोता तं मुख्यं करोति। तत्र दृष्टांतः। प्रहरन् पादाविव। यथा पादौ प्रहरन् मार्गे प्रक्षिपन् पुरुषः पूर्वं पादमपरं करोत्यपरं च पूर्वं तद्वत्। अतोऽपि कारणादिंद्रः स्तुत्यादेरविषय इति भावः। एतदादिकेन पंचर्चेनेंद्रस्यातिस्वातंत्र्यं प्रतिपाद्यते॥

॥ इति चतुर्थस्य सप्तमे द्वात्रिंशो वर्गः ॥

॥ अथ षोडशी ॥

शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः ।

एधमानद्विळुभयस्य राजा चोष्कूयते विश इंद्रो मनुष्यान् ॥१६॥

शृण्वे । वीरः । उग्रंऽउग्रं । दमऽयन् । अन्यंऽअन्यं । अतिऽनेनीयमानः ।

एधमानऽद्विट् । उभयस्य । राजा । चोष्कूयते । विशः । इंद्रः । मनुष्यान् ॥१६॥

अयमिंद्रो वीरो वीर्यवानिति शृण्वे । श्रूयते । किं कुर्वन् । उग्रमुग्रमुद्गूर्णमुद्गूर्णं बलिनं शत्रुं प्रति दमायन् । दमः दमनं । बाधनमिच्छन् । अन्यमन्यं प्रथमं नेतव्यमन्यं पश्चान्नेतव्यं चान्यं पूर्वमपरं परस्परव्यवहारेण स्तोतॄनतिनेनीयमानोऽत्यंतं पुनः पुनर्नयन् । अपि चैधमानद्विट् एधमानानां वर्धमानानामसुन्वतां द्वेष्टोभयस्य दिव्यस्य पार्थिवस्य च धनस्य राजेश्वरोऽयमिंद्रो विशो निवेशयितॄन् स्वस्य परिचारकान्मनुष्यान् चोष्कूयते । रक्षणार्थं पुनः पुनराह्वयति ॥

॥ अथ सप्तदशी ॥

परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति ।

अनानुभूतीरवधून्वानः पूर्वीरिंद्रः शरदस्तर्तरीति ॥१७॥

परा । पूर्वेषां । सख्या । वृणक्ति । विऽतर्तुराणः । अपरेभिः । एति ।

अननुऽभूतीः । अवऽधून्वानः । पूर्वीः । इंद्रः । शरदः । तर्तरीति ॥१७॥

अयमिंद्रः पूर्वेषां पूर्वभाविनां प्रशस्तानां कर्मणां कुर्वतां पुरुषाणां सख्या सखित्वानि परावृणक्ति । वर्जयति । अपि च वितर्तुराणस्तान् हिंसन् अपरेभिरपरैरमुख्यैरप्रशस्तैरपि कर्मानुष्ठातृभिरेति । सख्यं प्राप्नोति । तथानानुभूतीरपरिचरणाः प्रजा अवधून्वानः परित्यजन् पूर्वीर्बह्वीः शरदः संवत्सरानयमिंद्रस्तर्तरीति । भृशमतिक्रामति । स्तोतृभिः सह सख्यं कुर्वन् चिरकालं वसतीत्यर्थः ॥

॥ अथाष्टादशी ॥

रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।

इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥१८॥

रूपंऽरूपं । प्रतिऽरूपः । बभूव । तत् । अस्य । रूपं । प्रतिऽचक्षणाय ।

इंद्रः । मायाभिः । पुरुऽरूपः । ईयते । युक्ताः । हि । अस्य । हरयः । शता । दश ॥१८॥

अयमिंद्रः प्रतिरूपो रूपाणां प्रतिनिधिः सन् रूपं रूपं तत्तदग्न्यादिदेवतास्वरूपं बभूव। प्राप्नोति ॥ भू प्राप्ताविति धातुः ॥ इंद्रः स्वमाहात्म्येन तत्तद्देवतारूपो भवतीत्यर्थः। अस्य चेंद्रस्य तत्प्राप्तमग्न्यादिदेवतास्वरूपं प्रतिचक्षणाय प्रतिनियतदर्शनायायमग्निरयं विष्णुरयं रुद्र इत्येवमसंकीर्णदर्शनाय भवति। अपि चायमिंद्रो मायाभिः ॥ ज्ञाननामैतत् ॥ ज्ञानैरात्मीयैः संकल्पैः पुरुरूपो बहुविधशरीरः सन् ईयते। बहून्यजमानान् गच्छति। ननु द्वावेवास्याश्वावेकश्च रथः कथमनेन युगपद्बहून् गच्छतीत्यत आह। अस्येंद्रस्य हरयोऽश्वा युक्ता रथे योजिताः शता दश सहस्रसंख्याका अपरिमिताः संति। हि यस्मादेवं तस्माद्बहुशरीराणि स्वीकृत्य युगपद्विषमतो यजमानान् गच्छतीत्यर्थः ॥ अन्ये मन्यंत इदि परमैश्वर्ये इत्यस्य धातोरर्थानुगमादिंद्रः परमात्मा। स चाकाशवत्सर्वगतः सदानंदरूपः। स एवोपाधिभिरंतःकरणैः प्रतिशरीरमवच्छिन्नः सन् जीवात्मेति व्यपदिश्यते। स एवानादिमायाशक्तिभिर्वियदादिजगदात्मना विवर्तते शब्दादिविषयहरणशीला इंद्रियवृत्तयश्च तेनैव संबद्धाः। एतत्सर्वं तस्य परमात्मनो यद्वास्तवं रूपं तस्य दर्शनायेति। अयमर्थोऽनया प्रतिपाद्यते। रूपं रूपं। रूप्यत इति रूपं शरीरादि। प्रतिशरीरं चिद्रूपः सर्वगतः परमात्मा. प्रतिरूपः प्रतिबिंबरूपः सन् सर्वाणि शरीराणि बभूव। प्राप्नोत्। तच्च प्राप्तं प्रतिबिंबरूपमस्य परमात्मनः प्रतिचक्षणाय प्रतिनियताकारस्य दर्शनाय भवति। स चेंद्रः परमेश्वरो मायाभिर्मायाशक्तिभिः पुरुरूपो वियदादिभिर्बहुविधरूपैरुपेतः सन् ईयते। चेष्टते। एतदप्यस्य परमात्मनः प्रतिचक्षणाय भवति। अस्य च दश शता सहस्रसंख्याका हरय इंद्रियवृत्तय युक्ता विषयग्रहणायोद्युक्ताः संति। तदप्यस्य वास्तवरूपस्य दर्शनाय भवतीति। एवं स्थूलसूक्ष्मशरीरयोर्वियदादिमहाप्रपंचस्य च तत्त्वज्ञानहेतुत्वमनया प्रत्यपादीति ॥

॥ अथैकोनविंशी ॥

युजानो हरिता रथे भूरि त्वष्टेह राजति।

को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु ॥१९॥

युजानः। हरिता। रथे। भूरि। त्वष्टा। इह। राजति।

कः। विश्वाहा। द्विषतः। पक्षः। आसते। उत। आसीनेषु। सूरिषु ॥१९॥

हरिता हरितावश्वौ रथे युजानो युंजन् त्वष्टा दीप्त इंद्र इह त्रैलोक्ये भूरि

भूरिषु बहुषु प्रदेशेषु राजति। दीप्यते। उतापि च सूरिषु स्तोतृष्वस्माद्दशेष्वासीनेषु सत्सु विश्वाहा सर्वदेंद्रादन्यः को नाम विपतः शत्रोः पक्षः पाचको बाधकः सन् आसते। आस्ते। इंद्र एव सर्वदा शत्रून्बाधत इत्यर्थः। यद्वा पक्ष इति सकारांतं समीपवचनं। इंद्रादन्यः को नाम विपतः शत्रोः समीप आसते। आस्ते। इंद्र एव निर्भयः सन् शत्रुसमीपे स्थातुं शक्नोतीति भावः॥

॥ अथ विंशी ॥

अगव्यूति क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत्।

बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इंद्र पंथां ॥२०॥

अगव्यूति। क्षेत्रं। आ। अगन्म। देवाः। उर्वी। सती। भूमिः। अंहूरणा। अभूत्।

बृहस्पते। प्र। चिकित्स। गोऽइष्टौ। इत्था। सते। जरित्रे। इंद्र। पंथां ॥२०॥

अत्रोक्तं। अरण्ये निर्जने गर्गो देवान् भूमिं बृहस्पतिं। इंद्रं चास्तौत्स्वरक्षार्थमृचा मार्गच्युतोऽनयेति॥ अगव्यूतीत्यत्र देवान् पादे भूमिमथोत्तरे। बृहस्पतिं तृतीये तु इंद्र एवोत्तमे स्तुत इति च॥ हे देवा अगव्यूत्यगोचरं गोसंचाररहितं क्षेत्रं देशमागन्म। आगताः स्मः। अतो मां रक्षतेति शेषः। उर्वी विस्तीर्णा सती भूमिरंहूरणा। अंहव आहंतारो दस्यवः। तेषां रमणा रमयित्र्यभूत्। भवति। अस्मानतः सापि रक्षतु। हे बृहस्पते त्वं गविष्टौ गवामन्वेषण उपाये प्रचिकित्स। प्रवेदय। इत्थेत्थमनेन प्रकारेण सते भवते दुःखमनुभवते जरित्रे स्तोत्रे मह्यं हे इंद्र पंथां पंथानं मार्गं प्रचिकित्स। प्रज्ञापय॥

॥ इति चतुर्थस्य सप्तमे त्रयस्त्रिंशो वर्गः॥

॥ अथैकविंशी ॥

दिवेदिवे सदृशीरन्यमर्धं कृष्णा असेधदप सद्मनो जाः।

अहन्दासा वृषभो वस्नयंतोदव्रजे वर्चिनं शंबरं च ॥२१॥

दिवेऽदिवे। सऽदृशीः। अन्यं। अर्धं। कृष्णाः। असेधत्। अप। सद्मनः। जाः।

अहन्। दासा। वृषभः। वस्नऽयंता। उदऽव्रजे। वर्चिनं। शंबरं। च ॥२१॥

अयमिंद्रः सद्मनः सदनात्स्वकीयादंतरिक्षैकदेशात्स्थानाज्जा जायमानः सूर्यात्मना प्रादुर्भवन् सदृशीस्तुल्यरूपाः कृष्णाः कृष्णवर्णा रात्रीर्दिवे दिवे प्रतिदिव-

समपासेधत्। निवर्तयति। किमर्थं। अन्यमर्धमहरर्धमपरं भागं प्रकाशयितुं। अहोरात्रात्मकस्य दिवसस्य हि रात्रिरेको भागः। अपि च वृषभो वर्षयिता स इंद्रो दासा दासावुपक्षपयितारौ यज्ञकर्मणां वव्रयंता। वव्रं निवासहेतुभूतं धनं। तदिच्छंतौ वर्चिनं शंबरं चैतत्संज्ञावसुरावुदव्रजे। उदकानि व्रजंत्यस्मिन्नित्युदव्रजो देशविशेषः। तस्मिन्नहन्। हतवान्॥

॥ अथ द्वाविंशी ॥

प्रस्तोक इन्नु राधसस्त इंद्र दश कोशयीर्दश वाजिनोऽदात्।

दिवोदासादतिथिग्वस्य राधः शांबरं वसु प्रत्यग्रभीष्म ॥२२॥

प्रऽस्तोकः। इत्। नु। राधसः। ते। इंद्र। दश। कोशयीः। दश। वाजिनः। अदात्।

दिवःऽदासात्। अतिथिऽग्वस्य। राधः। शांबरं। वसु। प्रति। अग्रभीष्म ॥२२॥

एतदाद्यासु चतसृषु सृंजयपुत्रस्य प्रस्तोकस्य राज्ञो दानस्तुतिः। स एव दिवोदासोऽश्वथोऽतिथिग्व इति चाख्यायते। हे इंद्र ते तव राधस आराधयितुः स्तोतुः। चतुर्थ्यर्थे षष्ठी। त्वां स्तुवते मह्यं गर्गाय प्रस्तोको राजा दश कोशयीः सुवर्णपूर्णान्दशसंख्याकान् कोशान्दश वाजिनोऽश्वांश्च नु क्षिप्रमदात्। प्रायच्छत्। इदिति पूरणः। वयं च तस्माद्दिवोदासादेतत्संज्ञात्प्रस्तोकाद्वसु धनं प्रत्यग्रभीष्म। प्रतिगृहीतवंतः। कीदृशं। अतिथिग्वस्य तस्यैव प्रस्तोकस्य स्वभूतं राधो राधकं शांबरं शंबरादसुरादागतं। शंबरं हत्वा त्वया दत्तं तदीयमित्यर्थः॥

॥ अथ त्रयोविंशी ॥

दशाश्वान्दश कोशान्दश वस्त्राधिभोजना।

दशो हिरण्यपिंडान्दिवोदासादसानिषं ॥२३॥

दश। अश्वान्। दश। कोशान्। दश। वस्त्रा। अधिऽभोजना।

दशो इति। हिरण्यऽपिंडान्। दिवःऽदासात्। असानिषं ॥२३॥

दश दशसंख्याकानश्वान् दशसंख्याकान् हिरण्यपूर्णान् कोशानधिभोजना। भोजनमिति धननाम। अधिकं धनं येषां मूल्यं। तादृशानि दशसंख्यानि वस्त्राणि दशो दश च दशसंख्याकांश्च हिरण्यपिंडान् सुवर्णपिंडानेतान् सर्वान्दिवोदासात्प्रस्तोकादहमसानिषं। समभजं। लब्धवानस्मि॥

॥ अथ चतुर्विंशी ॥

दश रथान्प्रष्टिमतः शतं गा अथर्वभ्यः । अश्वथः पायवेऽदात् ॥२४॥

दश । रथान् । प्रष्टिऽमतः । शतं । गाः । अथर्वऽभ्यः । अश्वथः । पायवे । अदात् ॥२४॥

दश दशसंख्याकान् प्रष्टिमतः । प्रष्टिस्त्रिपद आधारः । तद्वहंतीति प्रष्टयोऽश्वाः । तद्युक्तान्रथान् शतं शतसंख्याका गाश्चाथर्वभ्योऽथर्वगोत्रेभ्य ऋषिभ्यः पायवे भरद्वाजपुत्रायैतत्संज्ञायास्मद्भ्रात्रे चाश्वथोऽश्ववानेतत्संज्ञः प्रस्तोकोऽदात् । दत्तवान् ॥

॥ अथ पंचविंशी ॥

महि राधो विश्वजन्यं दधानान्भरद्वाजान्त्सार्ञ्जयो अभ्ययष्ट ॥२५॥

महि । राधः । विश्वऽजन्यं । दधानान् । भरत्ऽवाजान् । सार्ञ्जयः । अभि । अयष्ट ॥२५॥

विश्वजन्यं सर्वजनहितं महि महद्राधो धनं दधानान्धारयतो भरद्वाजान् भरद्वाजपुत्रानस्मान् सार्ञ्जयः सृंजयपुत्रः प्रस्तोकोऽभ्ययष्ट । अपूजयत् ॥

॥ इति चतुर्थस्य सप्तमे चतुस्त्रिंशो वर्गः ॥

वनस्पत इत्येषा रथारोहणे विनियुक्ता । सूत्रितं च । वनस्पते वीड्वंगो हि भूया इत्येतयान्यान्यपि वानस्पत्यानि । गृ० सू० २. ६. । इति ॥

॥ सैषा षड्विंशी ॥

वनस्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥२६॥

वनस्पते । वीळुऽअंगः । हि । भूयाः । अस्मत्ऽसखा । प्रऽतरणः । सुऽवीरः ।
गोभिः । संऽनद्धः । असि । वीळयस्व । आऽस्थाता । ते । जयतु । जेत्वानि ॥२६॥

हे वनस्पते वनस्पतिविकार रथ त्वं वीड्वंगो दृढावयवो भूयाः । भव । अस्मत्सखा वयं सखायो यस्य स तादृशश्च भव । प्रतरणः प्रवर्धयिता सुवीरः शोभनैर्वीरैः शूरभटैः पुत्रादिभिर्वा युक्तश्च भव । अपि च त्वं गोभिर्गोविकारैश्चर्मभिः संनद्धोऽसि । सम्यग्बद्धो भवसि । तादृशस्त्वं वीळयस्व । अस्मान्दृढीकुरु । ते तवास्थाता त्वय्यवस्थितो रथी च जेत्वानि जेतव्यानि शत्रुसैन्यानि जयतु ॥

॥ अथ सप्तविंशी ॥

दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ।
अपामोज्मानं परि गोभिरावृतमिंद्रस्य वज्रं हविषा रथं यज ॥२७॥
दिवः । पृथिव्याः । परि । ओजः । उत्ऽभृतं । वनस्पतिऽभ्यः । परि । आऽभृतं । सहः ।
अपां । ओज्मानं । परि । गोभिः । आऽवृतं । इंद्रस्य । वज्रं । हविषा । रथं । यज ॥२७॥

दिवो द्युलोकात्पृथिव्या भूमेश्चोद्भृतमुद्धृतं सारत्वेनोपात्तं यदोजो बलमस्ति तद्रूपं । वनस्पतिविकारत्वाद्रथस्य । वनस्पतयो हि पृथिव्याः सारभूताः ते च द्युसंबंधिभिरुदकैः प्रवृद्धाः । अतो रथस्य लोकद्वयसारत्वमुपपन्नं ॥ परि पंचम्यर्थानुवादी ॥ अपि च वनस्पतिभ्यो वृक्षेभ्यः । परि पूर्ववत् । आभृतमाहृतं सहो बलरूपमपामुदकानामोज्मानं प्रेरकं । यद्वोज्मा वेगः । अपां वेग इव वेगवंतं गोभिर्गोविकारैश्चर्मभिः परित आवृतमावेष्टितमिंद्रस्य वज्रं वज्रैकदेशं । श्रूयते हि । इंद्रो वृत्राय वज्रमुदयच्छत् स त्रेधा व्यभवत् वज्रस्तृतीयं रथस्तृतीयं यूपस्तृतीयमिति । एवंगुणविशिष्टं रथं हविषा पुरोडाशादिना हे अध्वर्यो यज ॥ नूनमेषोत्तरा च रथदेवत्यस्य हविषो याज्यानुवाक्ये लिंगादवगंतव्ये ॥

॥ अथाष्टाविंशी ॥

इंद्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥२८॥
इंद्रस्य । वज्रः । मरुतां । अनीकं । मित्रस्य । गर्भः । वरुणस्य । नाभिः ।
सः । इमां । नः । हव्यऽदातिं । जुषाणः । देव । रथ । प्रति । हव्या । गृभाय ॥२८॥

यो रथ इंद्रस्य वज्र उक्तप्रकारेण वज्रैकदेशो मरुतामेतत्संज्ञानां देवगणानामनीकमग्रभूतं तद्वच्छीघ्रगामी मित्रस्याहरभिमानिनो देवस्य गर्भो गर्भवदंतर्वर्तमानः । अहनि हि रथः संचरति । वरुणस्य राज्यभिमानिदेवस्य नाभिर्नाभिस्थानीयः । नाभिर्यथा देहमध्ये निश्चल्येनावतिष्ठते तद्वद्राचौ क्वचिदेव स्थितः । हे देव द्योतमान रथ य उक्तगुणः स तादृशस्त्वमिमां नोऽस्मदीयां हव्यदातिं हविर्दानवतीं यागक्रियां जुषाणः सेवमानः सन् हव्या हव्यान्यस्मदीयानि हवींषि प्रतिगृभाय । प्रतिगृहाण ॥

परेण मृचेन संग्रामे दुंदुभिरभिमर्शनीयः। सूचितं च। उप श्वासय पृथिवीमुत द्यामिति तृचेन दुंदुभिमभिमृशेत्। गृ॰ सू॰ ३.११.। इति ॥

॥ सैषाप्येकोनत्रिंशी ॥

उप॑ श्वासय पृथि॒वीमु॒त द्यां पु॑रु॒त्रा ते॑ मनुतां॒ विष्ठि॑तं॒ जग॑त्।
स दुं॑दुभे स॒जूरिंद्रे॑ण दे॒वैर्दू॒राद्दवी॑यो॒ अप॑ सेध॒ शत्रू॑न् ॥२९॥

उप॑। श्वा॒स॒य॒। पृ॒थि॒वीम्। उ॒त। द्याम्। पु॒रु॒ऽत्रा। ते॒। म॒नु॒ता॒म्। विऽस्थि॑तम्। जग॑त्।
सः। दु॒दु॒भे॒। स॒ऽजूः। इंद्रे॑ण। दे॒वैः। दू॒रात्। दवी॑यः। अप॑। से॒ध॒। शत्रू॑न् ॥२९॥

हे दुंदुभे पृथिवीमुतापि च द्यां दिवमुपश्वासय। आत्मीयेन जयघोषेणाश्वासय। यथा लोकद्वयं त्वदीयेन शब्देनापूरितं भवति तादृशं शब्दं कुर्वित्यर्थः। अपि च विस्थितं विशेषेण स्थितं स्थावरं जंगमं चोभयविधं प्राणिजातं ते त्वदीयं शब्दं पुरुत्रा बहुधा मनुतां। मन्यतां। जानातु। हे दुंदुभे स त्वमिंद्रेणान्यैर्देवैश्च सजूः सह दूराद्दवीयो दूरादपि दूरतरं शत्रूनस्मदीयानपसेध। अपगमय। अत्र निरुक्तं। दुंदुभिरिति शब्दानुकरणं द्रुमो भिन्न इति वा दुंदुभ्यतेर्वा स्याच्छब्दकर्मणः। नि॰ ९.१२.। इत्यादि ॥

॥ अथ त्रिंशी ॥

आ क्रं॑दय॒ बल॒मोजो॑ न॒ आ धा॒ निः ष्ट॑निहि दुरि॒ता बाध॑मानः।
अप॑ प्रोथ दुंदुभे दु॒च्छुना॑ इ॒त इंद्र॑स्य मु॒ष्टिर॑सि वी॒ळय॑स्व ॥३०॥

आ। क्रं॒द॒य॒। बल॑म्। ओजः॑। नः॒। आ। धाः॒। निः। स्त॒नि॒हि॒। दुः॒ऽइ॒ता। बाध॑मानः।
अप॑। प्रो॒थ॒। दुं॒दु॒भे॒। दु॒च्छुनाः॑। इ॒तः। इंद्र॑स्य। मु॒ष्टिः। अ॒सि॒। वी॒ळय॑स्व ॥३०॥

हे दुंदुभे आक्रंदय। अस्मच्छत्रून्रोदय। बलं सेनारूपमोजः शरीरबलं च नोऽस्मभ्यमाधाः। आधेहि। प्रयच्छ। तथा दुरिता दुरितानि दुर्गमनानि बाधमानो हिंसंस्त्वं निःस्तनिहि। नितरां शब्दं कुरु॥ स्तन शब्द इति धातुः॥ हे दुंदुभे दुच्छुना अस्मद्दुःखहेतुभूतं शुनं सुखं यासां तादृशीः शत्रुसेना इतोऽस्मत्स्थानादपप्रोथ। बाधस्व। त्वं चेंद्रस्य मुष्टिरसि। मुष्टिरिव शत्रूणां हंता भवसि। अतोऽस्मान्वीळयस्व। दृढीकुरु ॥

॥ अथैकत्रिंशी ॥

आमूरज प्रत्यावर्तयेमाः केतुमद्दुंदुभिर्वावदीति ।
समश्वपर्णाश्चरंति नो नरोऽस्माकमिंद्र रथिनो जयंतु ॥३१॥

आ । अमूः । अज । प्रतिऽआवर्तय । इमाः । केतुऽमत् । दुंदुभिः । वावदीति ।
सं । अश्वऽपर्णाः । चरंति । नः । नरः । अस्माकं । इंद्र । रथिनः । जयंतु ॥३१॥

अस्याः पूर्वार्द्धो दुंदुभिदेवत्य उत्तरार्द्धश्चैंद्रः । यद्वोभावप्यर्द्धचावैंद्रौ । हे इंद्र अमूः शत्रुषु स्थितास्ता गा आज । अस्मान्प्रत्यागमय । इमा अस्मदीया गाः शत्रुभिर्जिघृक्षिताः प्रत्यावर्तय । प्रतिनिवर्तय । अयं च दुंदुभिः केतुमत् प्रज्ञानवत् यथा सर्वैर्ज्ञायते तथा वावदीति । भृशं शब्दं करोति । अश्वपर्णा अश्वपतना अश्ववाहाश्च नोऽस्मदीयाश्च नरः पुरुषाः संचरंति । शत्रुभिर्युध्यमाना वर्तंते । तथा सति हे इंद्र अस्माकं रथिनो रथारूढाः पुरुषाः शत्रून् जयंतु ॥

॥ इति चतुर्थस्य सप्तमे पंचत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके सप्तमोऽध्यायः समाप्तः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथाष्टमाध्याय आरभ्यते । षष्ठमंडलस्य चतुर्थेऽनुवाके चत्वारि सूक्तानि व्याख्यातानि । यज्ञायज्ञेति द्वाविंशत्यृचं पंचमं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षं । अत्रानुक्रम्यते । यज्ञायज्ञा द्व्यधिका शंयुस्तृणपाणिकं पृश्निसूक्तं प्रगाथौ बृहती

महासतोबृहती महाबार्हतबार्हतौ प्रगाथावित्याग्नेय्यः काकुभः प्रगाथः पुरउष्णिग्बृहत्यतिजगतीति मारुत्योऽंत्यास्तिस्रो वासां लिंगोक्तदेवताः काकुभः प्रगाथः पुरउष्णिग्बृहतीति पौष्ण्यो बृहती महाबृहती यवमध्यांत्यानुष्टुप् मारुत्योऽंत्या द्यावाभूम्योर्वा पृश्नेर्वेति। यज्ञायज्ञा व इत्येषा बृहती। तृतीयद्वादशका व्यष्टकेति तल्लक्षणसद्भावात्। द्वितीया सतोबृहती। अयुजौ जागतौ सतोबृहतीत्युक्तलक्षणोपेतत्वात्। तृतीया चतुर्थी बृहतीसतोबृहत्यौ पंचमी बृहती षष्ठी महासतोबृहती। अष्टाक्षरास्त्रयः पादा द्वादशाक्षरा द्वौ पादौ सा महासतोबृहती। सप्तमी महाबृहती। अष्टाक्षराश्चत्वारः पादा एको द्वादशाक्षरः सा महाबृहती। अष्टमी महासतोबृहती। अष्टिनस्त्रयो द्वौ जागतौ सा महासतोबृहती। नवमी बृहती दशमी सतोबृहती। एता दशाग्निदेवत्याः। एकादशी ककुप्। मध्यमो यदि द्वादशाक्षर उभयतोऽष्टकौ द्वौ पादौ सा ककुप्। द्वादशी सतोबृहती त्रयोदशी पुरउष्णिक्। आद्यो जागतो द्वितीयतृतीयौ गायत्रौ सा पुरउष्णिक्। चतुर्दशी बृहती पंचदश्यतिजगती द्वापंचाशदक्षरा। एकादश्याद्याः पंच मरुद्देवताकाः। त्रयोदश्यादीनां तिसृणां लिंगोक्ता इंद्रादयो वा देवताः। षोडशी ककुप् सप्तदशी सतोबृहत्यष्टादशी पुरउष्णिगेकोनविंशी बृहती। षोडश्यादीनां चतसृणां पूषा देवता। विंशी बृहत्येकविंशी यवमध्या महाबृहती। आद्यौ द्वावष्टकौ तृतीयो द्वादशकश्चतुर्थपंचमावष्टकौ सा यवमध्या महाबृहती। विंश्येकविंश्योः पृश्निसूक्तमित्युक्तत्वान्मरुतां माता पृश्निर्देवता। द्वाविंश्यनुष्टुप्। स चापि पृश्निदेवत्या द्यावाभूमिदेवत्या वा॥ सूक्तविनियोगो लैंगिकः। आग्निमारुते यज्ञायज्ञा व इत्ययं स्तोत्रियप्रगाथः। सूचितं च। यज्ञायज्ञा वो अग्नये देवो वो द्रविणोदा इति प्रगाथौ स्तोत्रियानुरूपौ। आ॰ ५.२०.। इति॥

॥ तत्रैषा प्रथमा ॥

यज्ञायंज्ञा वो अग्नये गिरागिरा च दक्षसे।
प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषं॥१॥

यज्ञाऽयंज्ञा। वः। अग्नये। गिराऽगिरा। च। दक्षसे।
प्रऽप्र। वयं। अमृतं। जातऽवेदसं। प्रियं। मित्रं। न। शंसिषं॥१॥

हे स्तोतारो वो यूयं यज्ञा यज्ञा यज्ञे यज्ञे सर्वेषु यागेषु दक्षसे प्रवृद्धायाग्नये गिरा गिरा स्तुतिरूपया वाचा वाचा स्तोत्रं कुरुतेति शेषः। चशब्दो भिन्नक्रमो

व इत्यस्मात्परो द्रष्टव्यः। यूयं च स्तोत्रं कुरुत। वयमपि तमग्निं प्रशंसिषं॥ प्रसमुपोदः पादपूरण इति प्रशब्दस्य द्विरुक्तिः पादपूरणार्था। व्यत्ययेनैकवचनं। छांदसो लुङ्॥ प्रशंसाम। कीदृशं। अमृतं मरणरहितं जातवेदसं जातानां वेदितारं जातप्रज्ञं जातधनं वा मित्रं न सखिभूतमिव प्रियमनुकूलं॥ यद्वा व्यत्ययेन त्वमित्यस्य वसादेशः। अग्नय इति च कर्मणि चतुर्थी। क्रियाग्रहणमपि कर्तव्यमिति कर्मणः संप्रदानत्वात्। चशब्दश्चणिति निपातश्चेदर्थे वर्तते। दक्षस इति च दक्षेर्वृद्धिकर्मणोऽंतर्भावितण्यर्थाल्लटि रूपं। चण योगात् निपातैर्यद्यदिहंतेति निघातप्रतिषेधः॥ तत्रायमर्थः। हे स्तोतस्त्वं यज्ञे यज्ञ इममग्निं गिरा गिरा स्तुत्या दक्षसे च वर्धयसि चेत् वयमप्यमृतत्वादिगुणकं तं प्रशंसाम॥

॥ अथ द्वितीया ॥

ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये।
भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनां॥२॥

ऊर्जः। नपातं। सः। हिन। अयं। अस्मऽयुः। दाशेम। हव्यऽदातये।
भुवत्। वाजेषु। अविता। भुवत्। वृधः। उत। त्राता। तनूनां॥२॥

ऊर्जोऽन्नस्य बलस्य वा नपातं पुत्रं प्रशंसिषमित्यनुषंगात् प्रशंसामेत्यर्थः। हिनेति निपातद्वयसमुदायो हीत्यस्यार्थे। स खल्वयमग्निरस्मयुरस्मान्कामयमानो भवति। वयं च हव्यदातये हव्यानां हविषां देवेभ्यो दात्रे तस्मा अग्नये दाशेम। हवींषि दद्याम। स चाग्निर्वाजेषु संग्रामेष्वविता रक्षिता वृधो वर्धकश्चास्माकं भुवत्। भवतु। उतापि च तनूनां तनयानामस्मत्पुत्राणां च त्राता रक्षिता भवतु॥

॥ अथ तृतीया ॥

वृषा ह्यग्ने अजरो महान्विभास्यर्चिषा।
अजस्रेण शोचिषा शोशुचच्छुचे सुदीतिभिः सु दीदिहि॥३॥

वृषा। हि। अग्ने। अजरः। महान्। विऽभासि। अर्चिषा।
अजस्रेण। शोचिषा। शोशुचत्। शुचे। सुदीतिऽभिः। सु। दीदिहि॥३॥

हे अग्ने वृषा वर्षिता कामानां वृष्टेः कर्ता वाजरो जरारहितो महान् गुणैरधिक एवंभूतस्त्वमर्चिषा दीप्त्या विभासि हि। विशेषेण प्रकाशसे खलु। हे शुचे

दीप्ताग्ने अजस्रेणाविच्छिन्नेन शोचिषा तेजसा शोशुचत् भृशं दीप्यमानस्त्वं सुदीतिभिः सुदीप्तिभिः सु दीदिहि । सुष्ठस्मान्दीपय । प्रकाशय ॥

॥ अथ चतुर्थी ॥

महो देवान्यजसि यक्ष्यानुषक्तव क्रत्वोत दंसना ।
अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वंस्व ॥४॥

महः । देवान् । यजसि । यक्षि । आनुषक् । तव । क्रत्वा । उत । दंसना ।
अर्वाचः । सीं । कृणुहि । अग्ने । अवसे । रास्व । वाजा । उत । वंस्व ॥४॥

हे अग्ने त्वं महो महतो देवान्यजसि । यजमानानां यज्ञे हविर्भिः पूजयसि । अतोऽस्माकमपि यज्ञ आनुषक् अनुषक्तं संततं यथा भवति तथा यक्षि । तान्देवान्यज । तदर्थं तव क्रत्वा प्रज्ञयोतापि च दंसना कर्मणा च । सीमिति परिग्रहार्थीयः । तान् सर्वान्देवानर्वाचोऽस्मदभिमुखान् कृणुहि कुर्ववसेऽस्मद्रक्षणार्थं । तथा वाजा वाजान् हविर्लक्षणान्यन्नानि रास्व । तेभ्यो देवेभ्यो देहि । उतापि च त्वमपि वंस्व । तुभ्यं प्रत्तानि हवींषि संभजस्व ॥

॥ अथ पंचमी ॥

यमापो अद्रयो वना गर्भमृतस्य पिप्रति ।
सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि ॥५॥

यं । आपः । अद्रयः । वना । गर्भं । ऋतस्य । पिप्रति ।
सहसा । यः । मथितः । जायते । नृऽभिः । पृथिव्याः । अधि । सानवि ॥५॥

आपो वसतीवर्याख्या अद्रयो ग्रावाणो वना वनानि काष्ठानि च ऋतस्य यज्ञस्योदकस्य वा गर्भं गर्भवदंतर्वर्तमानं यमग्निं पिप्रति पूरयंति । यद्वापः समुद्रिया अद्रयो मेघा वनान्यरण्यानि च ऋतस्य गर्भं वाडववैद्युतदावरूपेण वर्तमानं यमग्निं पिप्रति पूरयंति । यश्चाग्निर्नृभिर्नेतृभिर्ऋत्विग्भिः सहसा बलेन मथितः सन् पृथिव्या अधि भूमेरुपरि सानवि समुच्छ्रित उत्कृष्टे देवयजनदेशे जायते प्रादुर्भवति स त्वं वंस्वेत्यन्वयः । यद्वा यः पप्रावित्यनया संबंधः ॥

॥ इति चतुर्थस्याष्टमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि ।
तिरस्तमो ददृश ऊर्म्यास्वा श्यावास्वरुषो वृषा श्यावा अरुषो वृषा ॥ ६ ॥

आ । यः । पप्रौ । भानुना । रोदसी इति । उभे इति । धूमेन । धावते । दिवि ।
तिरः । तमः । ददृशे । ऊर्म्यासु । आ । श्यावासु । अरुषः । वृषा । आ । श्यावाः ।
अरुषः । वृषा ॥ ६ ॥

योऽग्निर्भानुना दीप्त्योभे रोदसी द्यावापृथिव्यावापप्रौ आपूरयति स धूमेन दिव्यंतरिक्षे धावते । गच्छति । धूमो हि मेघात्मना परिणतः सन् अंतरिक्षे गच्छति । कार्यकारणयोरभेदविवक्षया तद्गमनमग्नावुपचर्यते । अपि चायमरुष आरोचमानो वृषा वर्षिता कामानामेवंगुणकोऽग्निः श्यावासु श्याववर्णासु कृष्णासूर्म्यासु । रात्रिनामैतत् । निशासु तमोऽंधकारं तिरस्कृत्या समंताद्ददृशे । दृश्यते । श्यावाः श्याववर्णा रात्रीश्चा तिष्ठति । अरुषो वृषेति पुनरुक्तिरादरार्था पादपूरणार्था वा ॥

॥ अथ सप्तमी ॥

बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥ ७ ॥

बृहत्ऽभिः । अग्ने । अर्चिऽभिः । शुक्रेण । देव । शोचिषा ।
भरत्ऽवाजे । संऽइधानः । यविष्ठ्य । रेवत् । नः । शुक्र । दीदिहि । द्युऽमत् । पावक ।
दीदिहि ॥ ७ ॥

हे देव दानादिगुणयुक्त यविष्ठ्य युवतम शुक्र दीप्ताग्ने शुक्रेण निर्मलेन शोचिषा तेजसा भरद्वाजेऽस्मद्भ्रातरि समिधानः समिध्यमानस्त्वं बृहद्भिर्महद्भिरर्चिभिस्तेजोभिर्नोऽस्मदर्थं रेवद्धनयुक्तं यथा भवति तथा दीदिहि । दीप्यस्व । तथा पावक हे शोधकाग्ने द्युमत् द्योतमानेन च युक्तं यथा भवति तथा दीदिहि । दीप्यस्व ॥

॥ अथाष्टमी ॥

विश्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणां।

शतं पूर्भिर्यविष्ठ पाह्यंहसः समेद्धारं शतं हिमाः स्तोतृभ्यो ये च ददति ॥८॥

विश्वासां। गृहऽपतिः। विशां। असि। त्वं। अग्ने। मानुषीणां।

शतं। पूःऽभिः। यविष्ठ। पाहि। अंहसः। संऽएद्धारं। शतं। हिमाः। स्तोतृऽभ्यः।
ये। च। ददति ॥८॥

हे अग्ने त्वं मानुषीणां मनोरपत्यभूतानां विश्वासां सर्वासां विशां प्रजानां गृहपतिरसि। गृहस्वामी भवसि। हे यविष्ठ युवतमाग्ने अतस्त्वं शतं हिमाः शतं हेमंतान् संवत्सरान् समेद्धारं त्वां सम्यगिद्धं कृतवंतं मां शतं शतेन शतसंख्याकैः पूर्भिः पालकैरंहसः पापादाहंतुः शत्रोर्वा पाहि। रक्ष। ये च स्तोतृभ्यो ददति धनं तव समिंधनस्य कर्तरि प्रयच्छंति तांश्च पाहि॥

॥ अथ नवमी ॥

त्वं नश्चित्र ऊत्या वसो राधांसि चोदय।

अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥९॥

त्वं। नः। चित्रः। ऊत्या। वसो इति। राधांसि। चोदय।

अस्य। रायः। त्वं। अग्ने। रथीः। असि। विदाः। गाधं। तुचे। तु। नः ॥९॥

हे वसो वासकाग्ने चित्रो दर्शनीयस्त्वमूत्या रक्षया सह राधांसि धनानि नोऽस्मभ्यं चोदय। प्रेरय। अस्य सर्वत्र लोके परिदृश्यमानस्य रायो धनस्य त्वं रथीरसि। रंहिता नेता भवसि। अतः कारणादस्मभ्यं धनानि प्रेरयेत्यर्थः। अपि च नोऽस्माकं तुचे। अपत्यनामैतत्। अपत्यायापतनहेतुभूताय पुत्रादये गाधं प्रतिष्ठां तु क्षिप्रं विदाः। लंभय॥

॥ अथ दशमी ॥

पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः।

अग्ने हेळांसि दैव्या युयोधि नोऽदेवानि ह्वरांसि च ॥१०॥

पर्षि। तोकं। तनयं। पर्तृऽभिः। त्वं। अदब्धैः। अप्रयुत्वऽभिः।

अग्ने। हेळांसि। दैव्या। युयोधि। नः। अदेवानि। ह्वरांसि। च ॥१०॥

हे अग्ने त्वमदब्धैः केनाप्यहिंसितैरप्रयुत्वभिः। यौतिरत्र पृथग्भावार्थः। अपृथग्भूतैः संहतैः पायुभिः पालनसाधनैस्तोकं पुत्रं तनयं पौत्रं च पर्षि। पालय। दैव्या देवसंबंधीनि च हेळांसि क्रोधानस्मत्तो युयोधि। पृथक्कुरु। अदेवानि मनुष्यसंबंधीनि च ह्वरांसि हिंसनानि चास्मत्तः पृथक्कुरु॥

॥ इति चतुर्थस्याष्टमे द्वितीयो वर्गः ॥

॥ अथैकादशी ॥

आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः।

सृजध्वमनपस्फुरां ॥११॥

आ। सखायः। सबःऽदुघां। धेनुं। अजध्वं। उप। नव्यसा। वचः।

सृजध्वं। अनपऽस्फुरां ॥११॥

हे सखायः समानख्याना अध्वर्यवः सबर्दुघां। सबरिति पयसो नाम। अमरणहेतुभूतस्य पयसो दोग्ध्रीं धेनुं गामाजध्वं। अभिगच्छत। प्राप्नुत। केन साधनेन। नव्यसा नवीयसा नवतरेण वचो वचसाह्वानरूपेण शब्देन। तदनंतरमनपस्फुरां। स्फुरतिर्बधकर्मा। अनपबाध्यां तां धेनुमुपसृजध्वं। वत्सेनोपसृष्टां कुरुत। मरुद्देवत्यत्वात् मरुतां यागाय पयो दोग्धुमिति शेषः। अथवा मरुतां माता पृश्न्याख्या माध्यमिका वाग्धेनुः। हे सखायः स्तोतारः सबर्दुघां मरुज्जननहेतुभूतस्य पयसो दोग्ध्रीं धेनुं पृश्निं नव्यसा नवतरेण वचसा स्तोत्रेणोपाजध्वं। उपागच्छत। अनपस्फुरामनपबाधनीयां तां सृजध्वं। बंधनाद्विसृजत। मुंचत। ईदृशी महती धेनुर्मरुतां माता किमु वक्तव्यं तेषां माहात्म्यमिति मरुत्स्तुतिः॥

॥ अथ द्वादशी ॥

या शर्धाय मारुताय स्वभानवे श्रवोऽमृत्यु धुक्षत।

या मृळीके मरुतां तुराणां या सुम्नैरेवयावरी ॥१२॥

या। शर्धाय। मारुताय। स्वऽभानवे। श्रवः। अमृत्यु। धुक्षत।

या। मृळीके। मरुतां। तुराणां। या। सुम्नैः। एवऽयावरी ॥१२॥

या धेनुरमृत्युमरणहेतु श्रवोऽन्नं पयोलक्षणं मारुताय मरुत्संघाय धुक्षत अधुक्षत्। कीदृशाय। शर्धाय प्रसहनशीलाय स्वभानवे स्वायत्तदीप्तये। या च

तुराणां क्षिप्रकारिणां मरुतां मृळीके सुखे तत्परा वर्तते। या च सुखैः सुखैर्हे-तुभूतैः [illegible] वेगितृभिरश्वैर्मध्यमस्थानैरुदकैर्वा सह यात्यन्येषामपि सुखार्थं वृष्टि-जलैः सहागच्छंती तां धेनुमुपाजध्वमिति पूर्वेणान्वयः। अत्रापि पूर्ववन्मरुत्स्तु-तिरधिगंतव्या॥

॥ अथ त्रयोदशी॥

भरद्वाजायाव धुक्षत द्विता।
धेनुं च विश्वदोहसमिषं च विश्वभोजसं॥१३॥

भरत्ऽवाजाय। अव। धुक्षत। द्विता।
धेनुं। च। विश्वऽदोहसं। इषं। च। विश्वऽभोजसं॥१३॥

हे मरुतो भरद्वाजायास्मद्भावे द्विता द्वितयमवधुक्षत। किं तद्द्वितयं। धेनुं च गां चेषं चान्नं च। कीदृशीं धेनुं। विश्वदोहसं विश्वस्य व्याप्तस्य बहुलस्य दोग्ध्रीं। कीदृशमन्नं। विश्वभोजसं सर्वेषां भोगपर्याप्तं॥

॥ अथ चतुर्दशी॥

तं व इंद्रं न सुक्रतुं वरुणमिव मायिनं।
अर्यमणं न मंद्रं सृप्रभोजसं विष्णुं न स्तुष आदिशे॥१४॥

तं। वः। इंद्रं। न। सुऽक्रतुं। वरुणंऽइव। मायिनं।
अर्यमणं। न। मंद्रं। सृप्रऽभोजसं। विष्णुं। न। स्तुषे। आऽदिशे॥१४॥

हे मरुद्गण तं तादृशं वस्त्वां स्तुषे। स्तौमि। किमर्थं। आदिश आदेशनाय धनानामतिसर्जनाय प्रदानाय। कीदृशं त्वां। इंद्रं नेंद्रमिव सुक्रतुं सुकर्माणं वरुणमिव मायिनं मायावंतं प्रज्ञावंतमर्यमणं नार्यमणमिव मंद्रं स्तुत्यं विष्णुं न विष्णुमिव सृप्रभोजसं प्रसृप्तधनं। यदा त्वस्या लिंगोक्तदेवतास्तदानीं नेवशब्दौ चशब्दार्थे द्रष्टव्यौ॥

॥ अथ पंचदशी॥

त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता।
सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गूळ्हा वसू करत्सुवेदा नो वसू करत्॥१५॥

त्वेषं । शर्धः । न । मारुतं । तुविऽस्वनि । अनर्वाणं । पूषणं । सं । यथा । शता ।
सं । सहस्रा । कारिषत् । चर्षणिऽभ्यः । आ । आविः । गूळ्हा । वसु । करत् ।
सुऽवेदा । नः । वसु । करत् ॥१५॥

नेति संप्रत्यर्थे । न संप्रतीदानीं त्वेषं दीप्तं तुविष्वणि बहुस्वनमनर्वाणमप्रत्यृतं शत्रुभिरनभिगतं पूषणं पोषकं मारुतं मरुत्संघरूपमीदृशं शर्धो बलं स्तौमीति शेषः । स च मरुद्गणो यथा येन प्रकारेण शता शतसंख्याकानि धनानि सं सहैव चर्षणिभ्यो मनुष्येभ्योऽस्मभ्यं कारिषत् कुर्यात् । आकारः समुच्चये । यथा वा सहस्रा सहस्रसंख्याकानि धनानि च सं सहैव कारिषत् कुर्यात् तथा स्तौमीति पूर्वेणान्वयः। अपि च स मरुद्गणो गूळ्हा गूढानि संवृतानि वसु वसूनि धनान्याविष्करत् । अस्मभ्यमाविष्करोतु । तथा वसु वसूनि धनानि सुवेदा सुलभानि च नोऽस्माकं करत् । करोतु । यदा तु लिंगादियं पौष्णी तदा मारुतं शर्ध इव त्वेषं पूषणं पूषकमेतत्संज्ञं देवं स्तौमीति योजनीयं ॥

॥ अथ षोडशी ॥

आ मा पूषन्नुप द्रव शंसिषं नु ते अपिकर्ण आघृणे ।
अघा अर्यो अरातयः ॥१६॥

आ । मा । पूषन् । उप । द्रव । शंसिषं । नु । ते । अपिऽकर्णे । आघृणे ।
अघाः । अर्यः । अरातयः ॥१६॥

हे पूषन् मा मामाद्रव । रक्षणार्थमभिगच्छ । हे आघृणे आगतदीप्ते अघा आहंत्रीरर्योऽरीरभिगंत्रीररातयः शत्रुभूताः प्रजा उपद्रव । बाधस्व ॥ उपपूर्वो द्रवतिर्बाधायां वर्तते । यथा प्रजां पशून्यजमानस्योपदोद्रावयति ॥ अहं च ते तवापिकर्णे कर्णावपिगते समीपदेशे स्थितः सन् नु क्षिप्रं शंसिषं । प्रशंसामि ॥

॥ इति चतुर्थस्याष्टमे तृतीयो वर्गः ॥

॥ अथ सप्तदशी ॥

मा काकंबीरमुद्वृहो वनस्पतिमशस्तीर्वि हि नीनशः ।
मोत सूरो अह एवा चन ग्रीवा आदधते वेः ॥१७॥

मा । काकंबीरं । उत् । वृहः । वनस्पतिं । अशस्तीः । वि । हि । नीनशः ।
मा । उत । सूरः । अहरिति । एव । चन । ग्रीवाः । आऽदधते । वेरिति वेः ॥१७॥

ऋषिः पुत्रपौत्रसहितमात्मानं बहुपक्ष्याश्रयवनस्पतित्वेन रूपयन् तस्यानुद्धारमाशास्ते । हे पूषन् मा काकंबीरं काकानां भर्तारं वनस्पतिं वृक्षं मोद्वृहः । उद्धर । मा बाधस्व । पुत्रपौत्रादिभिः सखीभूतैरुपेतमन्यैश्च बहुभिराश्रितं मां मा हिंसीरित्यर्थः । हिशब्दश्चार्थे । अशस्तीरशंसनीया अशंसनीयस्य दुःखस्य कीर्तयित्रीर्वा शत्रुभूताः प्रजा विनीनशो हि । विनाशय च । मोत मा च सूरः प्रेरकः शत्रुरेवैवमहः । अस्मान्मा हार्षीत् । एवमित्यभिसंबंधादाख्यातस्योदात्तवत्त्वाच्चाश्रुतोऽपि यथेत्येतद्वाक्येऽध्याह्रियते । ग्रीवाः । गिरंत्यंतरवस्थापयंति बध्नंतीति ग्रीवा दामानि । यथा व्याधा वेः पक्षिणो हरणार्थं ग्रीवा दामानि जालरूपाण्यादधते भूम्यां निदधते तैश्च निहितैः पक्षिणो हरंत्येवमस्मान् बंधनोपायैः शत्रुर्मा हार्षीदित्यर्थः ॥

॥ अथाष्टादशी ॥

दृतेरिव तेऽवृकमस्तु सख्यं ।
अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः ॥१८॥

दृतेःऽइव । ते । अवृकं । अस्तु । सख्यं ।
अच्छिद्रस्य । दधन्ऽवतः । सुऽपूर्णस्य । दधन्ऽवतः ॥१८॥

हे पूषन् ते तव सख्यं सखित्वमवृकं बाधकरहितं सर्वदैकरूप्येण वर्तमानमस्माकमस्तु । सर्वदा भवतु । दृतेरिव । यथा दृतेस्त्वदीयं सख्यमविच्छिन्नं तद्वत् । कीदृशो दृतिः । अच्छिद्रस्य छिद्ररहितस्य संश्लिष्टस्य दधन्वतो दधिमतः सुपूर्णस्य दध्ना सुष्ठु पूरितस्य । पुनर्दधन्वत इति दध्नोऽधिकत्वद्योतनार्थः । ईदृशो दृतिः सर्वदा पूष्णो रथे वर्तते । स इव वयमपि तव सखायो भवेमेत्यृषिराशास्ते ॥

॥ अथैकोनविंशी ॥

परो हि मर्त्यैरसि समो देवैरुत श्रिया ।
अभि ख्यः पूषन्पृतनासु नस्त्वमवा नूनं यथा पुरा ॥१९॥

परः । हि । मर्त्यैः । असि । समः । देवैः । उत । श्रिया ।
अभि । ख्यः । पूषन् । पृतनासु । नः । त्वं । अव । नूनं । यथा । पुरा ॥१९॥

हे पूषन् मर्त्यैर्मर्त्येभ्यो मनुष्येभ्यः परः परस्तात्स्थितोऽसि । श्रिया संपदा देवैरुत सर्वैर्देवैश्च समः समानोऽसि । अतस्त्वं पृतनासु संग्रामेषु नोऽस्मानभिख्यः । अभिमुख्येनानुग्रहदृष्ट्या विलोकय । यथा पुरा येन प्रकारेण पूर्वकालीनान्पुरुषानवरक्षिथ एवं नूनमद्येदानीमव । अस्मानव ॥

॥ अथ विंशी ॥

वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता ।
देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः ॥२०॥

वामी । वामस्य । धूतयः । प्रऽनीतिः । अस्तु । सूनृता ।
देवस्य । वा । मरुतः । मर्त्यस्य । वा । ईजानस्य । प्रऽयज्यवः ॥२०॥

हे धूतयः कंपयितारः प्रयज्यवः प्रकर्षेण यष्टव्या मरुतः सा सूनृता प्रियसत्यात्मिका माध्यमिका युष्मदीया वाक् प्रणीतिरस्तु । अस्मदर्थं धनानां प्रणेत्री भवतु । देवस्य वा मर्त्यस्य मनुष्यस्य वेजानस्येष्टवत उभयविधस्य पुरुषस्य वामी प्रशस्ता या वाक् वामस्य वननीयस्य धनस्य प्रणीतिः प्रणेत्री सा सूनृतेत्यन्वयः । प्रणीतिरस्त्वस्मदर्थं ॥

॥ अथैकविंशी ॥

सद्यश्चिद्यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः ।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः ॥२१॥

सद्यः । चित् । यस्य । चर्कृतिः । परि । द्यां । देवः । न । एति । सूर्यः ।
त्वेषं । शवः । दधिरे । नाम । यज्ञियं । मरुतः । वृत्रऽहं । शवः । ज्येष्ठं । वृत्रऽहं । शवः ॥२१॥

यस्य च मरुद्गणस्य चर्कृतिः कर्म सद्यश्चित्सद्य एव द्यां पर्येति परिगच्छति दिव्यंतरिक्षे परितो वर्तते देवो न देवो द्योतमानः सूर्य इव तादृशा गणात्मका मरुतस्त्वेषं दीप्तं नाम शत्रूणां नमयितृ यज्ञियं यज्ञार्हं शवो बलं दधिरे । अधारयन् । तच्च शवो बलं वृत्रहं वृत्रादेरसुरस्य हंतृ भवति । तच्च वृत्रहं शवो ज्येष्ठं सर्वेभ्यः प्रशस्ततमं भवति ॥

॥ अथ द्वाविंशी ॥

सकृद्ध द्यौरजायत सकृद्भूमिरजायत ।

पृश्न्या दुग्धं सकृत्पयस्तदन्यो नानु जायते ॥२२॥

सकृत् । ह । द्यौः । अजायत । सकृत् । भूमिः । अजायत ।

पृश्न्याः । दुग्धं । सकृत् । पयः । तत् । अन्यः । न । अनु । जायते ॥२२॥

सकृद्ध सकृदेव द्यौरजायत । उदपद्यत । सकृदुत्पन्नैव स्थिता भवति । न पुनस्तस्यां नष्टायामन्या तत्सदृशी द्यौर्जायते । भूमिश्च सकृदेवाजायत । पृश्न्या मरुतां मातुर्गोः पयश्च सकृदेकवारमेव दुग्धं यस्मात्पयसो मरुतो जज्ञिरे । पृश्नियै वै पयसो मरुतो जाता इति तैत्तिरीयकं । यथा द्यावापृथिव्यौ सकृदेवोत्पद्येते एवं पृश्निरपि सकृद्दुग्धेनैव पयसा मरुतोऽजीजनत् । ततः परमन्यः पदार्थो नानुजायते । तत्सदृशो नोत्पद्यते ॥

॥ इति चतुर्थस्याष्टमे चतुर्थो वर्गः ॥

स्तुषे जनमिति पंचदशर्चं षष्ठं सूक्तं भारद्वाजस्य ऋजिश्वन आर्षं वैश्वदेवं । अंत्या षट्पंचाशदक्षरा शक्वरी शिष्टास्त्रिष्टुभः । तथा चानुक्रांतं । स्तुषे पंचोना ऋजिश्वा ह वैश्वदेवं ह शक्वर्यंतमिति ॥ व्यूळ्हे दशरात्रे पंचमेऽहनीदं वैश्वदेवनिविद्धानं । सूचितं च । ऋभुर्विभ्वा स्तुषे जनमिति वैश्वदेवं । आ० ८.८.। इति । आद्या महानाम्नीव्रते जप्या ॥

॥ सैषा प्रथमा ॥

स्तुषे जनं सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा सुम्नयंता ।

त आ गमंतु त इह श्रुवंतु सुक्षत्रासो वरुणो मित्रो अग्निः ॥१॥

स्तुषे । जनं । सुऽव्रतं । नव्यसीभिः । गीःऽभिः । मित्रावरुणा । सुम्नऽयंता ।

ते । आ । गमंतु । ते । इह । श्रुवंतु । सुऽक्षत्रासः । वरुणः । मित्रः । अग्निः ॥१॥

सुव्रतं सुकर्माणं जनं दैव्यं जनं देवसंघं नव्यसीभिर्नवतराभिर्गीर्भिः स्तुतिभिः स्तुषे । अहं स्तुवे । तथा मित्रावरुणा । मित्रः प्रमीतेस्त्रायको वरुणः पापान्निवारयिता । एतावपि देवौ स्तौमि । कीदृशौ । सुम्नयंता सुम्नं सुखं स्तोतॄणामिच्छंतौ । सुक्षत्रासः शोभनबलास्ते वरुणादयः सर्वे देवा इहास्मिन्यज्ञ आगमंतु ।

आगच्छंतु। ते तादृशाः शृण्वंतु। अस्मदीयाः स्तुतीः शृण्वंतु च। अत्र मित्रादीनां परिगणनमुपलक्षणं सूक्तस्य सर्वदेवताप्रतिपादकत्वात्। अत एव पूर्वं जन-मिति सामान्यनिर्देशः ॥

॥ अथ द्वितीया ॥

विशोविश ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्योः।
दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै ॥२॥

विशःऽविशः। ईड्यं। अध्वरेषु। अदृप्तऽक्रतुं। अरतिं। युवत्योः।
दिवः। शिशुं। सहसः। सूनुं। अग्निं। यज्ञस्य। केतुं। अरुषं। यजध्यै ॥२॥

विशो विशः सर्वस्याः प्रजाया अध्वरेषु यज्ञेष्वीड्यमृत्विग्भिः स्तुत्यमदृप्तक्रतुं दर्परहितकर्माणममूढप्रज्ञं वा युवत्योर्द्यावापृथिव्योररतिमभिगंतारमर्यं स्व[illegible]मनं दिवो द्युलोकस्य शिशुं पुत्रं। दिवस्परि प्रथमं जज्ञे अग्निः। ऋग्वे० १०.[illegible]५.१.। इति निगमः। यद्वा दिवः स्तोतुः पुत्रभूतं। तथापि निगमो भवति। त्वं पुत्रो भवसि यस्ते विधत्। ऋग्वे० २.१.९.। इति। सहसो बलस्य सूनुं पुत्रं यज्ञस्य यागस्य केतुं प्रज्ञापकमरुषमारोचमानमेवंगुणकमग्निं यजध्यै यष्टुं। स्तुष इत्यनु-षज्यते। स्तुषे। स्तुवे ॥

॥ अथ तृतीया ॥

अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या।
मिथस्तुरा विचरंती पावके मन्म श्रुतं नक्षत ऋच्यमाने ॥३॥

अरुषस्य। दुहितरा। विरूपे इति विऽरूपे। स्तृऽभिः। अन्या। पिपिशे। सूरः। अन्या।
मिथःऽतुरा। विचरंती इति विऽचरंती। पावके इति। मन्म। श्रुतं। नक्षतः।
ऋच्यमाने इति ॥३॥

इयमहोरात्रयोः स्तुतिः। अरुषस्य रोचमानस्य सूर्यस्य दुहितरा दुहितरौ। सूर्येण ह्यहोरात्रयोर्विभागः क्रियते। अतस्तदधीनात्मलाभत्वात्तस्य दुहितरावि-त्युच्येते। विरूपे शुक्लकृष्णतया नानारूपे। तयोरन्यैका रात्रिः स्तृभिर्नक्षत्रैः पिपिशे। पिश्यते। संश्लिष्यते ॥ पिश अवयव इति धातुः ॥ अन्याहरात्मिका दुहिता सूरः सूर्येण पिपिशे। संश्लिष्यते। ते च नक्षत्रैः सूर्येण चालंकृते भवत

इतरेतरं मिथस्तुरा परस्परं बाधयंत्यौ। अह्ना रात्रिर्निवर्त्यते रात्र्या चाहरिति परस्परं बाधः। अत एव विचरंती विविधं पृथक्चरंत्यौ पावके सर्वस्य शोधयित्र्यौ। एवंभूते अहश्च रात्रिश्च शुच्यमाने अस्माभिः स्तूयमाने सत्यौ श्रुतं श्रोतव्यं मन्म मननीयं स्तोत्रमस्मत्कृतं नक्षतः। व्याप्नुतां॥

॥ अथ चतुर्थी ॥

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्रां।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥४॥

प्र। वायुं। अच्छ। बृहती। मनीषा। बृहत्ऽरयिं। विश्वऽवारं। रथऽप्रां।
द्युतत्ऽयामा। निऽयुतः। पत्यमानः। कविः। कविं। इयक्षसि। प्रयज्यो इति प्रऽयज्यो ॥४॥

बृहती महती मनीषास्मदीया स्तुतिर्वायुमच्छाभिमुख्येन प्रगच्छतु। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। कीदृशं वायुं। बृहद्रयिं महाधनं विश्ववारं विश्वैर्वरणीयं संभजनीयं रथप्रां रथस्यात्मीयस्य प्रातारं पूरयितारं। यद्वा स्तोतृणां रथं धनैः पूरयितारं। अथ प्रत्यक्षस्तुतिः। हे प्रयज्यो प्रकर्षेण यष्टव्य वायो द्युतद्यामा प्रदीप्तयानो नियुत आत्मीयरथयोज्या वडवास्ताः पत्यमानोऽभिपतन्नभिगच्छन्। यद्वा पत्यतिरैश्वर्यकर्मा। तासां वडवानामीश्वरः कविः क्रांतदर्शी। एवंभूतस्त्वं कविं मेधाविनं स्तोतारमियक्षसि। धनेन पूजय॥

॥ अथ पंचमी ॥

स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान्मनसा युजानः।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥५॥

सः। मे। वपुः। छदयत्। अश्विनोः। यः। रथः। विरुक्मान्। मनसा। युजानः।
येन। नरा। नासत्या। इषयध्यै। वर्तिः। याथः। तनयाय। त्मने। च ॥५॥

अश्विनोः स्वभूतः स रथो मे मदीयं वपुः शरीरं छदयतु। छादयतु। तेजसाच्छादयतु। यो रथो विरुक्मान् विरोचनवान् विशेषेण दीप्यमानो मनसा मनोव्यापारमात्रेण युजानोऽश्वैः संयुज्यमानो भवति। हे नरा नेतारौ हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वाश्विनौ येन रथेन वर्तिः स्तोतृगृहं

तनयाय पुत्राय त्मने तस्मिन्ने स्तोत्रे वेषयध्यै कामान्प्रापयितुं याथः शक्नुथः स एव इति पूर्वेणान्वयः ॥

॥ इति चतुर्थस्याष्टमे पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि ।
सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थातर्जगदा कृणुध्वं ॥ ६ ॥

पर्जन्यवाता । वृषभा । पृथिव्याः । पुरीषाणि । जिन्वतं । अप्यानि ।
सत्यऽश्रुतः । कवयः । यस्य । गीःऽभिः । जगतः । स्थातः । जगत् । आ । कृणुध्वं ॥ ६ ॥

हे पर्जन्यवाता पर्जन्यवायू वृषभा वृष्टेः कर्तारौ पृथिव्याः । अंतरिक्षनामैतत् । अंतरिक्षादप्यान्याप्यान्यानि पुरीषाणि पूरकाण्युदकानि जिन्वतं । प्रेरयतं । उत्तरोऽर्धर्चो मारुतः । हे सत्यश्रुतः सत्यस्य स्तोत्रस्य श्रोतारः कवयो मेधाविनो मरुतो यस्य स्तोतुर्गीर्भिः स्तुतिभिर्यूयं स्तुता भवथ तस्य स्तोतुर्जगत्स्थावरजंगमात्मकं सर्वं प्राणिजातमा कृणुध्वं । आभिमुख्येन कुरुत । हे जगतः स्थातः । गणाभिप्रायमेकवचनं । स्थावरजंगमात्मकस्य जगतोऽवस्थापक हे मरुद्गणेति योज्यं ॥

अन्वारंभणीयायां सारस्वतस्य हविषो याज्या पावीरवीत्येषा । सूत्रितं च । पावीरवी कन्या चित्रायुः पीपिवांसं सरस्वतः । आ० २.८. । इति ॥ एकादशिने सारस्वते पशावेषैव पुरोडाशस्य याज्या । सूत्रितं च । पावीरवी कन्या चित्रायुर्यस्ते स्तनः शशयो यो मयोभूः । आ० ३.७. । इति ॥ आग्निमारुते शस्त्रेऽप्येषा । सूत्रितं च । राकामहमिति द्वे पावीरवी कन्या चित्रायुः । आ० ५.२०. । इति ॥

॥ सैषा सूक्ते सप्तमी ॥

पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत् ॥ ७ ॥

पावीरवी । कन्या । चित्रऽआयुः । सरस्वती । वीरऽपत्नी । धियं । धात् ।
ग्नाभिः । अच्छिद्रं । शरणं । सऽजोषाः । दुःऽआधर्षं । गृणते । शर्म । यंसत् ॥ ७ ॥

पावीरवी शोधयित्री कन्या कमनीया चित्रायुश्चित्रगमना चित्रान्ना वा वीरपत्नी । वीरः प्रजापतिः पतिर्यस्यास्तादृशी । यद्वा वीराणां पालयित्री । एवं-

भूत्वा सरस्वती धियमस्मदीयं कर्म यज्ञाख्यं धात्। दधातु। धारयतु। ददातु वा। शब्देन मंत्रियादितो वर्णोऽनुहीयते। अपि च ग्नाभिर्देवपत्नीभिः सजोषाः सह प्रीयमाणा। यद्वा ग्ना गायत्र्यादीनि छंदांसि। छंदांसि वै ग्ना इति श्रुतेः। तैः सह प्रीयमाणा गृणते स्तुवते मह्यमच्छिद्रं छिद्ररहितं दुराधर्षं शत्रुभिः शीतवातादिभिश्च धर्षितुमशक्यं शरणं गृहं शर्म सुखं च यंसत्। प्रयच्छतु ॥

एकादशिने पौष्णे पशौ पथस्पथ इति हविषो याज्या। सूचितं च। पथस्पथः परिपतिं वचस्या बृहस्पते या परमा परावदिति द्वे। आ० ३.७.। इति ॥

॥ सैषा सूक्तेऽष्टमी ॥

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कं।

स नो रासच्छुरुधश्चंद्राग्रा धियंधियं सीषधाति प्र पूषा ॥८॥

पथःऽपथः। परिऽपतिं। वचस्या। कामेन। कृतः। अभि। आनट्। अर्कं।

सः। नः। रासत्। शुरुधः। चंद्रऽअग्राः। धियंऽधियं। सीसधाति। प्र। पूषा ॥८॥

पथस्पथ सर्वस्य मार्गस्य परिपतिमधिपतिमर्कमर्चनीयं पूषणं कामेन काम्यमानेन फलेन कृतो वशीकृतः स्तोता वचस्या स्तुत्याभ्यानट्। अभ्यश्नुतां। प्राप्नोतु। स च पूषा नोऽस्मभ्यं शुरुधः शुचो रोधयित्रीर्गाश्चंद्राग्राः। चंद्रमिति हिरण्यनाम। हिरण्यप्रमुखा यद्वा स्वर्णशृंगा रासत्। ददातु॥ रा दाने। अस्माल्लेटि रूपं॥ तथा धियं धियं सर्वमस्मदीयं कर्म स पूषा प्रसीषधाति। प्रसाधयतु॥

त्वाष्ट्रे पशौ प्रथमभाजमिति हविषो याज्या। सूचितं च। प्रथमभाजं यशसं वयोधां सोमापूषणा जनना रयीणां। आ० ३.८.। इति ॥

॥ सैषा सूक्ते नवमी ॥

प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभ्वं।

होता यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं विभावा ॥९॥

प्रथमऽभाजं। यशसं। वयःऽधां। सुऽपाणिं। देवं। सुऽगभस्तिं। ऋभ्वं।

होता। यक्षत्। यजतं। पस्त्यानां। अग्निः। त्वष्टारं। सुऽहवं। विभाऽवा ॥९॥

प्रथमभाजं प्रथम उत्पत्तिकाल एव विभक्तारं जंतूनां। यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्रजायत इति श्रुतेः। यशसं

यशस्विनं वयोधां वयसोऽन्नस्य हविर्लक्षणस्य धातारं धारयितारं वा स्तोतृ-
भ्योऽन्नप्रदं सुपाणिं। हस्तस्य मणिबंधादूर्ध्वप्रदेशः पाणिः। शोभनपाणिकं देवं
दानादिगुणयुक्तं सुगभस्तिं। गभस्तिरिति बाहुनाम। शोभनदोर्दंडमृभ्वसमुरु भास-
मानं महांतं वा पस्त्यानां। पस्त्यमिति गृहनाम। तत्स्थानां यजतं पूज्यं।
गृहस्थैर्यजनीयमित्यर्थः। सुहवं सुखेन ह्वातुं शक्यं। एवंभूतं त्वष्टारं होता देवाना-
माह्वाता विभावा दीप्यमानोऽग्निर्यक्षत्। यजत्। अनेन हविषा यजतु ॥

॥ अथ दशमी ॥

भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ।
बृहंतमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ॥१०॥

भुवनस्य। पितरं। गीःऽभिः। आभिः। रुद्रं। दिवा। वर्धय। रुद्रं। अक्तौ।
बृहंतं। ऋष्वं। अजरं। सुऽसुम्नं। ऋधक्। हुवेम। कविना। इषितासः ॥१०॥

भुवनस्य भूतजातस्य पितरं पालयितारं रुद्रं। रुद्दुःखं। तद्द्रावयितारमीश्वर-
माभिर्गीर्भिः स्तुतिभिर्दिवाहनि हे स्तोतर्वर्धय। अक्तौ रात्र्यां च तमेव रुद्रं स्तुति-
भिर्वर्धय। वयं च कविना प्राज्ञेन रुद्रेणेषितासः प्रेरिताः संतो बृहंतं महांतमृष्वं
दर्शनीयमजरं जरारहितं सुषुम्नं शोभनसुखमेवंगुणविशिष्टं रुद्रमृधक् ऋद्धं समृद्धं
यथा भवति तथा हुवेम। स्तवाम ॥

॥ इति चतुर्थस्याष्टमे षष्ठो वर्गः ॥

॥ अथैकादशी ॥

आ युवानः कवयो यज्ञियासो मरुतो गंत गृणतो वरस्यां।
अचित्रं चिद्धि जिन्वथा वृधंत इत्था नक्षंतो नरो अंगिरस्वत् ॥११॥

आ। युवानः। कवयः। यज्ञियासः। मरुतः। गंत। गृणतः। वरस्यां।
अचित्रं। चित्। हि। जिन्वथ। वृधंतः। इत्था। नक्षंतः। नरः। अंगिरस्वत् ॥११॥

हे युवानो नित्यतरुणाः कवयः प्राज्ञा यज्ञियासो यज्ञार्हा एवंभूता हे मरुतो
गृणतः स्तुवतो वरस्यां वरणीयां स्तुतिं प्रत्यागंत। आगच्छत। अपि च हे नरो
नेतारो मरुत इत्थेत्थमनेन प्रकारेण वृधंतो वर्धमानाः। यद्वांतरिक्षं
नक्षंतो व्याप्नुवंतोऽंगिरस्वत्। अंगिरसो गमनशीला रश्मयः। ते यथा शीघ्रं

नभस्वन्तं प्राप्नुवंति तद्वत्। यद्वा ऋभव एवांगिरसः। तद्वच्छीघ्रगामिनः। एवं-भूता यूयमर्चिषं चित्। ओषधिवनस्पतिभिर्निविडो देशश्चित्रं। तद्विलक्षणमोषध्यादिभिर्वियुक्तमपि देशं जिन्वथ। वृष्ट्या तर्पयथ। हीति पूरणः॥

॥ अथ द्वादशी ॥

प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तं।
स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः॥१२॥
प्र। वीराय। प्र। तवसे। तुराय। अज। यूथाऽइव। पशुऽरक्षिः। अस्तं।
सः। पिस्पृशति। तन्वि। श्रुतस्य। स्तृऽभिः। न। नाकं। वचनस्य। विपः॥१२॥

वीराय विक्रांताय विविधं शत्रूणामीरकाय वा मरुद्गणाय प्राज। हे स्तोतः स्तुतिं प्रगमय। तथा तवसे बलिने तुराय क्षिप्रगमनाय च तस्मै गणाय प्राज। तत्र दृष्टांतः। पशुरक्षिः पशुपालको यूथेव। स यथा गोयूथानि सायंकालेऽस्तं गृहं शीघ्रं गमयति तद्वत् शीघ्रं स्तुतिं प्रेरयेत्यर्थः। स च मरुद्गणो वचनस्य वक्तुर्विपो विप्रस्य मेधाविनः स्तोतुः श्रुतस्य॥ क्रियाग्रहणमपि कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी॥ श्रुतं श्रोतव्यं स्तोत्रं तन्व्यात्मीये शरीरे पिस्पृशति। स्पर्शयतु। संश्लेषयतु। तत्स्तोत्रं हृद्गतं भवत्वित्यर्थः। स्पर्शने दृष्टांतः। स्तृभिर्न नाकं। यथा नक्षत्रैर्नाकमंतरिक्षं स्पर्शयति संश्लेषयति तद्वत्॥

॥ अथ त्रयोदशी ॥

यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधिताय।
तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा३ तना च॥१३॥
यः। रजांसि। विऽममे। पार्थिवानि। त्रिः। चित्। विष्णुः। मनवे। बाधिताय।
तस्य। ते। शर्मन्। उपऽदद्यमाने। राया। मदेम। तन्वा। तना। च॥१३॥

यो विष्णुर्बाधितायासुरैर्हिंसिताय मनवे प्रजापतये तदर्थं पार्थिवानि पृथिव्या संबद्धानि रजांसि लोकान्। त्रींल्लोकानिति यावत्। त्रिर्विममे। चिदित्यवधारणे। त्रिभिरेव विक्रमणैः परिमितवान् हे विष्णो तस्य तादृशस्य ते तव॥ तृतीयार्थे षष्ठी॥ ईदृशेन त्वयोपदद्यमानेऽस्मभ्यं दीयमाने शर्मन् शर्मणि गृहे सुखे वा

वर्तमानाः संतो वयं राया धनेन तन्वा रोगादिरहितेन शरीरेण च तना पुत्रेण पौत्रेण च मदेम । मोदेम । हृष्टा भवेम ॥

॥ अथ चतुर्दशी ॥

तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्तत्सविता चनो धात् ।
तदोषधीभिरभि रातिषाचो भगः पुरंधिर्जिन्वतु प्र राये ॥१४॥

तत् । नः । अहिः । बुध्न्यः । अत्ऽभिः । अर्कैः । तत् । पर्वतः । तत् । सविता । चनः । धात् ।
तत् । ओषधीभिः । अभि । रातिऽसाचः । भगः । पुरंऽधिः । जिन्वतु । प्र । राये ॥१४॥

बुध्न्यः । बुध्नमंतरिक्षं । तत्र भवोऽहिः । एत्यंतरिक्ष इत्यहिः । उक्तं च । अहिरयनादेत्यंतरिक्ष इति । एतत्पदद्वयाभिधेयो देवोऽर्कैरर्चनसाधनैर्मंत्रैः स्तूयमानः सन् नोऽस्मभ्यं तत् लोके प्रसिद्धं चनोऽन्नमद्भिरुदकैः सार्द्धं धात् । दधातु । विदधातु । प्रयच्छतु । पर्वतः पूरयिता ॥ पर्व पूरण इति धातुः ॥ यद्वा पर्ववद्वज्रं पर्वतः । तद्वान् । पर्वतस्य गिरेः शत्रुरिति वा पर्वतः । स च तच्चनो दधातु । तथा सविता प्रेरको देवश्च तच्चनो दधातु । अपि च रातिषाचः । रातिं दानं सचंते सेवंत इति रातिषाचो विश्वे देवाः । ते चौषधीभिः । ओषः पाक आसु धीयत इत्योषधयस्तिलमाषाद्याः । ताभिः सार्द्धं तदन्नमभिप्रयच्छंतु । तथा पुरंधिर्बहुधीर्बहुप्रज्ञो वा बहुकर्मा वा भगो भजनीय एतत्संज्ञो देवश्च राये धनार्थं प्रजिन्वतु । अस्मान्प्रेरयतु ॥

॥ अथ पंचदशी ॥

नू नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपां ।
क्षयं दाताजरं येन जनान्स्पृधो अदेवीरभि च क्रमाम विश आदेवीरभ्य१श्नवाम ॥१५॥

नु । नः । रयिं । रथ्यं । चर्षणिऽप्रां । पुरुऽवीरं । महः । ऋतस्य । गोपां ।
क्षयं । दात । अजरं । येन । जनान् । स्पृधः । अदेवीः । अभि । च । क्रमाम । विशः ।
आऽदेवीः । अभि । अश्नवाम ॥१५॥

हे सर्वे देवा नोऽस्मभ्यं रयिं धनं क्षयं गृहं च दात । प्रयच्छत । कीदृशं रयिं । रथ्यं रथसंबंधिनं । रथयुक्तमित्यर्थः । चर्षणिप्रां । चर्षणयो मनुष्याः । तेषां पूरयितारं पुरुवीरं । वीर्याज्जायंत इति वीराः पुत्रादयः । बहुभिर्वीरैरुपेतं । महो महत

द्युमन्तम् ... गोपां रक्षकं । रयिस्वरूपेण धनेन हि यज्ञो रक्ष्यते । मृतो यज्ञस्त्वदक्षिण इति वचनात् । कीदृशं क्षयं । अजरं जरारहितं । येन रयिणा क्षयेण च जनान् शत्रून् स्पृधः स्पर्धमाना अदेवीरदेवसंबंधिनीरासुरीः सेनाः पृतनाभिः ... अभिभवेम । तथा देवीः । आगता देवा यासु हविःस्वीकारार्थं ता आदेव्यः । तादृशीश्च विशः प्रजा यज्ञानुष्ठायिनीर्येन धनेन गृहेण चाभ्यश्नवाम अभिप्राप्नवाम तादृशं धनं गृहं च दातेत्यन्वयः ॥

॥ इति चतुर्थस्याष्टमे सप्तमो वर्गः ॥

॥ इति षष्ठे मंडले चतुर्थोऽनुवाकः ॥

पंचमेऽनुवाके द्वादश सूक्तानि । तत्र हुवे व इति पंचदशर्चं प्रथमं सूक्तमृजिश्वन आर्षं बहुदेवताकं त्रैष्टुभं । हुवे व इत्यनुक्रांतं ॥ गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निं ।
अभिक्षदामर्यमणं सुशेवं त्रातॄन्देवान्सवितारं भगं च ॥१॥

हुवे । वः । देवीं । अदितिं । नमःऽभिः । मृळीकाय । वरुणं । मित्रं । अग्निं ।
अभिऽक्षदां । अर्यमणं । सुऽशेवं । त्रातॄन् । देवान् । सवितारं । भगं । च ॥१॥

हे देवा वो युष्माकं मातरं देवीं द्योतमानामदितिमखंडनीयामदीनां वा एतत्संज्ञां देवतां मृळीकाय सुखार्थं नमोभिर्नमस्कारैः स्तोत्रैर्वा हुवे । ह्वयामि । स्तौमि । तथा वरुणं वारकं मित्रं प्रमीतेस्त्रायकं देवमग्निं चैतांश्च देवान्नमोभिर्हुवे । तथाभिक्षदां । क्षदिर्हिंसाकर्मा । अभिक्षत्तारं शत्रूणां हिंसितारं सुशेवं सुसुखमर्यमणं च नमोभिर्हुवे । सवितारं भगं च नमोभिर्हुवे । किं बहुना त्रातॄन् पालयितॄन् सर्वान्देवान्नमोभिः स्तोत्रैर्हुवे । स्तौमि ॥

॥ अथ द्वितीया ॥

सुज्योतिषः सूर्य दक्षपितॄननागास्त्वे सुमहो वीहि देवान् ।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वंतो यजता अग्निजिह्वाः ॥२॥

सुऽज्योतिषः । सूर्य । दक्षऽपितॄन् । अनागाःऽत्वे । सुऽमहः । वीहि । देवान् ।
द्विऽजन्मानः । ये । ऋतऽसापः । सत्याः । स्वःऽवंतः । यजताः । अग्निऽजिह्वाः ॥२॥

हे सुमहः शोभनदीप्ते सूर्य सर्वस्य प्रेरक दक्षपितॄन्। दक्षः पितामहो येषां ते दक्षपितरः। पितृशब्दो हि सामान्येन पूर्वपुरुषत्वमात्रं ब्रूते। यथाहं पितॄन्त्सुविदत्राँ अवित्सि। ऋग्वे० १०.१५.३.। इति। एषां दक्षपितृत्वं चादितिर्ह्यजनिष्टेति। ऋग्वे० १०.७२.५.। मंत्रादवगम्यते। ईदृशान् सुज्योतिषः शोभनज्योतिष्कान्देवाननागास्त्वेऽनपराधत्वे वीहि। कामयस्व। यथास्माकमपराधं ते न कुर्वंति तथा कुर्या इत्यर्थः। ये देवा द्विजन्मानो द्वयोर्लोकयोर्जायमानाः प्रादुर्भवंत ऋतसाप ऋतं यज्ञं स्पृशंतः सत्या अवितथाः सत्यवादिनो वा स्वर्वंतो धनवंतो यजत्रा यष्टव्या अग्निजिह्वाः। अग्निर्जिह्वास्थानीयो येषां ते। एवंभूता ये देवाः संति तान्देवान्वीहीत्यन्वयः॥

॥ अथ तृतीया ॥

उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं सुषुम्ने।
महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः॥३॥

उत। द्यावापृथिवी इति। क्षत्रं। उरु। बृहत्। रोदसी इति। शरणं। सुसुम्ने इति सुऽसुम्ने।
महः। करथः। वरिवः। यथा। नः। अस्मे इति। क्षयाय। धिषणे इति। अनेहः॥३॥

उतापि च हे द्यावापृथिवी द्यावापृथिव्यावुरु विस्तीर्णं क्षत्रं बलं करथः। कुरुतं। तथा रोदसी द्यावापृथिव्यौ सुसुम्ने सुसुखे युवां बृहन्महच्छरणं गृहं च करथः। कुरुतं। महो महद्वरिवो धनं नोऽस्माकं यथा स्यात्तथा कुरुतमित्यर्थः। अपि च हे धिषणे धारयित्र्यौ द्यावापृथिव्यावनेहः पापराहित्यं चास्मे अस्माकं क्षयाय निवासार्थं कुरुतं॥

॥ अथ चतुर्थी ॥

आ नो रुद्रस्य सूनवो नमंतामद्या हूतासो वसवोऽधृष्टाः।
यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान्॥४॥

आ। नः। रुद्रस्य। सूनवः। नमंतां। अद्य। हूतासः। वसवः। अधृष्टाः।
यत्। ईं। अर्भे। महति। वा। हितासः। बाधे। मरुतः। अह्वाम। देवान्॥४॥

रुद्रस्य सूनवः पुत्रा मरुतोऽद्यास्मिन्काल आहूतास आहूताः संतो नोऽस्मान्प्रत्यानमंतां। आनता भवंतु। आगच्छंतु। कीदृशाः। वसवो वासयितारोऽधृष्टा

अन्यैरहिंसिताः । यद्यदेमेनान्मरुतो देवानर्भेऽल्पे महति प्रभूते वा वाधे संग्रामे हितासो निहिताः स्थिताः संतो वयमह्वाम आह्वयाम तदानीमप्येत्यन्वयः ॥

॥ अथ पंचमी ॥

मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ।
श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजंते अध्वनि प्रविक्ते ॥५॥

मिम्यक्ष । येषु । रोदसी । नु । देवी । सिसक्ति । पूषा । अभ्यर्धऽयज्वा ।
श्रुत्वा । हवं । मरुतः । यत् । ह । याथ । भूम । रेजंते । अध्वनि । प्रऽविक्ते ॥५॥

येषु मरुत्सु रोदसी रुद्रस्य पत्नी देवी द्योतमाना माध्यमिका वाक् मिम्यक्ष नु क्षिप्रं संगच्छते । तथाभ्यर्धयज्वा स्तोतॄनभ्यर्धयन् समृद्धान्कुर्वन्यो यजति धनेन पूजयति तादृशः पूषा पूषको देवश्च सिषक्ति यान्मरुतः सेवते । अभ्यर्धयज्वा-भ्यर्धयन्यजति । नि० ६.६. । इति यास्कः । हे मरुतस्ते यूयं हवमस्मदीयमाह्वानं श्रुत्वा यद्ध यदा खलु याथ आगच्छथ तदानीमध्वनि मार्गे प्रविक्ते गमनार्थं पृथक्कृते सति तत्र विद्यमानानि भूम भूतजातानि रेजंते । कंपंते । तथा च मंत्रांतरं । प्र वेपयंति पर्वतान्वि विंचंति वनस्पतीन् । ऋग्वे० १.३९.५. । इति ॥

॥ इति चतुर्थस्याष्टमेऽष्टमो वर्गः ॥

॥ अथ षष्ठी ॥

अभि त्यं वीरं गिर्वणसमर्चेंद्रं ब्रह्मणा जरितर्नवेन ।
श्रवदिद्धवमुप च स्तवानो रासद्वाजाँ उप महो गृणानः ॥६॥

अभि । त्यं । वीरं । गिर्वणसं । अर्च । इंद्रं । ब्रह्मणा । जरितः । नवेन ।
श्रवत् । इत् । हवं । उप । च । स्तवानः । रासत् । वाजान् । उप । महः । गृणानः ॥६॥

हे जरितः स्तोतस्त्वं तं प्रसिद्धं वीरं वीर्यवंतं विशेषेण शत्रूणामीरकं वा गिर्वणसं गिरां संभक्तारमेवंविधमिंद्रं नवेनाभिनवेन शोभनेन ब्रह्मणा स्तोत्रेणाभ्यर्च । अभिष्टुहि । स च स्तवानः स्तूयमानः सन् हवमस्मदीयं स्तोत्रमुपश्रवदित् । उपशृणुयादेव । अपि च गृणानः स्तूयमान इंद्रो महो महतः प्रभूतान्वाजानन्नानि चोपरासत् । प्रदेयात् । यत एवमतः स्तुहीत्यर्थः ॥

॥ अथ सप्तमी ॥

ओमानमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः ।
यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ॥७॥
ओमानं । आपः । मानुषीः । अमृक्तं । धात । तोकाय । तनयाय । शं । योः ।
यूयं । हि । स्थ । भिषजः । मातृऽतमाः । विश्वस्य । स्थातुः । जगतः । जनित्रीः ॥७॥

हे आपो मानुषीर्मनुष्यहिता यूयममृक्तमहिंसितमोमानं । अवति रक्षतीत्योमा रक्षकमन्नं । तोकाय पुत्राय तनयाय तत्पुत्राय च धात । धत्त । प्रयच्छत । तथा शं शमनमुपद्रवाणां योर्यावनं पृथक्करणं च पृथक्कर्तव्यानां धत्त । प्रयच्छत । कुत इत्यत आह । हि यस्माद्यूयं मातृतमा मातृभ्योऽप्यधिका भिषजः स्थ भवथ तस्माद्धातेत्यन्वयः । कथं मातृभ्योऽप्यधिकं भैषज्यमस्तीत्यत आह । विश्वस्य सर्वस्य स्थातुः स्थावरस्य जगतो जंगमस्य जनित्रीर्जनयित्र्यो भवथ । अतो यूयं भिषजः स्थ ॥

॥ अथाष्टमी ॥

आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ॥८॥
आ । नः । देवः । सविता । त्रायमाणः । हिरण्यऽपाणिः । यजतः । जगम्यात् ।
यः । दत्रऽवान् । उषसः । न । प्रतीकं । विऽऊर्णुते । दाशुषे । वार्याणि ॥८॥

त्रायमाणो रक्षन् हिरण्यपाणिः सुवर्णहस्तो हितरमणीयपाणिर्वा यजतो यष्टव्य एवंभूतः सविता प्रेरको देवो नोऽस्मानाजगम्यात् । आगच्छतु । यो देवो दत्रवान्धनवानुषसो न प्रतीकमुषसः प्रमुखमिव दाशुषे हवींषि दत्तवते यजमानाय वार्याणि वरणीयानि धनानि व्यूर्णुते विवृणोति प्रकाशयति स सवितेत्यन्वयः ॥

॥ अथ नवमी ॥

उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।
स्यामहं ते सदमिद्राती तव स्यामग्नेऽवसा सुवीरः ॥९॥
उत । त्वं । सूनो इति । सहसः । नः । अद्य । आ । देवान् । अस्मिन् । अध्वरे । ववृत्याः ।
स्यां । अहं । ते । सदं । इत् । रातौ । तव । स्यां । अग्ने । अवसा । सुऽवीरः ॥९॥

उतापि च हे सहसः सूनो बलस्य पुत्राग्ने त्वमद्यास्मिन्काले नोऽस्मदीयेऽस्मिन्नध्वरे यागे देवान्यष्टव्यानिंद्रादीनाववृत्याः। आवर्तय। आगमय। अपि चाहं ते तव रातौ धनस्य दाने सदमित्सर्वदैव वर्तमानः स्यां। भवेयं। तथा हे अग्ने तवावसा त्वदीयेन रक्षणेन सुवीरः शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेतश्च स्यां। भवेयं ॥

॥ अथ दशमी ॥

उत त्या मे हवमा जग्म्यातं नासत्या धीभिर्युवमंग विप्रा।
अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके ॥१०॥

उत। त्या। मे। हवं। आ। जग्म्यातं। नासत्या। धीभिः। युवं। अंग। विप्रा।
अत्रिं। न। महः। तमसः। अमुमुक्तं। तूर्वतं। नरा। दुःऽइतात्। अभीके ॥१०॥

उतापि च हे विप्रा प्राज्ञौ नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा हे अश्विनौ त्या तौ प्रसिद्धौ युवं युवां धीभिः परिचरणकैः कर्मभिरुपेतं मे मदीयं हवं स्तोत्रमंग क्षिप्रमाजग्म्यातं। आगच्छतं। आगत्य च महो महतस्तमसोऽसुरकृतादंधकारात् अत्रिं न यथात्रिमृषिममुमुक्तं मोचितवंतौ स्थः हे नरा नेतारावश्विनौ तथास्मानप्यभीकेऽभ्यक्ते प्राप्ते संग्रामे दुरिताद्दुखात् शत्रुकृतात्तूर्वतं। अस्मांस्तारयतं ॥

॥ इति चतुर्थस्याष्टमे नवमो वर्गः ॥

॥ अथैकादशी ॥

ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः।
दशस्यंतो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः ॥११॥

ते। नः। रायः। द्युऽमतः। वाजऽवतः। दातारः। भूत। नृऽवतः। पुरुऽक्षोः।
दशस्यंतः। दिव्याः। पार्थिवासः। गोऽजाताः। अप्याः। मृळत। च। देवाः ॥११॥

हे देवास्ते यूयं द्युमतो दीप्तिमतो वाजवतो बलयुक्तस्य नृवतो नृभिः पुत्रादिभिरुपेतस्य पुरुक्षोर्बहुभिः कीर्तनीयस्य रायो धनस्य नोऽस्मभ्यं दातारो भूत। भवत। अपि च दशस्यंतः कामान्प्रयच्छंतो दिव्या दिवि भवा आदित्याः पार्थिवासः पृथिव्यां भवा वसवो गोजाताः। गौः पृश्निर्माध्यमिका वाक्। तत्र उत्पन्ना मरुतोऽप्या अप्स्वंतरिक्षे भवा रुद्राश्च ते सर्वे यूयमस्मान्मृळत। सुखयत ॥

॥ अथ द्वादशी ॥

ते नो॑ रु॒द्रः सर॑स्वती स॒जोषा॑ मी॒ळ्हुष्मं॑तो॒ विष्णु॑र्मृळंतु वा॒युः ।

ऋ॒भु॒क्षा वाजो॒ दैव्यो॑ विधा॒ता प॒र्जन्या॒वाता॑ पिप्यता॒मिषं॑ नः ॥१२॥

ते । नः॒ । रु॒द्रः । सर॑स्वती । स॒ऽजोषा॑ः । मी॒ळ्हुष्मं॑तः । विष्णुः॑ । मृ॒ळं॒तु॒ । वा॒युः ।

ऋ॒भु॒क्षाः । वाजः॑ । दैव्यः॑ । वि॒ऽधा॒ता । प॒र्जन्या॒वाता॑ । पि॒प्य॒तां॒ । इषं॑ । नः॒ ॥१२॥

मीळ्हुष्मंतो वर्षणवंतस्ते देवा नोऽस्मान्मृळंतु । मृळयंतु । सुखयंतु । के त इति चेदुच्यते । रुद्रः सरस्वती च सजोषाः सह प्रीयमाणा विष्णुर्वायुश्च ऋभुक्षाः । ऋभुर्विभ्वा वाज इति त्रयः सौधन्वनाः । तेषामाद्य ऋभुश्च वाजोऽतिमश्च । उपलक्षणमेतत् । विभ्वा च । दैव्यो देवेभ्यो हितो विधाता प्रजापतिश्च । अपि च पर्जन्यावाता पर्जन्यश्च वायुश्चोभौ नोऽस्मभ्यमिषमन्नं पिप्यतां । वर्धयतां ॥

॥ अथ त्रयोदशी ॥

उ॒त स्य दे॒वः स॑वि॒ता भगो॑ नोऽ॒पां नपा॑दवतु॒ दानु॒ पप्रिः॑ ।

त्वष्टा॑ दे॒वेभि॒र्जनि॑भिः स॒जोषा॒ द्यौर्दे॒वेभिः॑ पृथि॒वी स॑मु॒द्रैः ॥१३॥

उ॒त । स्यः । दे॒वः । स॒वि॒ता । भगः॑ । नः॒ । अ॒पां । नपा॑त् । अ॒व॒तु॒ । दानु॑ । पप्रिः॑ ।

त्वष्टा॑ । दे॒वेभिः॑ । जनि॑ऽभिः । स॒ऽजोषा॑ः । द्यौः । दे॒वेभिः॑ । पृ॒थि॒वी । स॒मु॒द्रैः ॥१३॥

उतापि च स्य स यः प्रेरकतया सर्वत्र प्रख्यातः स सविता देवो भगश्चापां नपाच्चापां मेघस्थानां पुत्रो माध्यमिकोऽग्निः स च नोऽस्मानवतु । रक्षतु । कीदृशोऽपां नपात् । दानु दातव्यं धनं पप्रिः प्राता पूरयिता ॥ प्रा पूरण इत्यस्मादादृगमहन इति किनो लिङ्वद्भावाच्च लोकाव्ययेति षष्ठीप्रतिषेधः ॥ तथा देवेभिर्देवैर्जनिभिस्तत्पत्नीभिश्च सजोषाः सहप्रीतिस्त्वष्टा च देवेभिर्देवैः सह प्रीयमाणा द्यौश्च समुद्रैः सह प्रीयमाणा पृथिवी चैताश्च सर्वा देवता अस्मानवंतु ॥

आग्निमारुत उत नोऽहिरित्येषा । सूचितं च । उत नोऽहिर्बुध्न्यः शृणोतु देवानां पत्नीरुशतीरवंतु नः । आ० ५.२०. । इति ॥

॥ सैषा सूक्ते चतुर्दशी ॥

उ॒त नोऽहि॑र्बु॒ध्न्यः॑ शृणोत्व॒ज एक॑पात्पृथि॒वी स॑मु॒द्रः ।

विश्वे॑ दे॒वा ऋ॑ता॒वृधो॑ हुवा॒नाः स्तु॒ता मंत्राः॑ कवि॒श॒स्ता अ॑वंतु ॥१४॥

उत । नः । अहिः । बुध्न्यः । शृणोतु । अजः । एकऽपात् । पृथिवी । समुद्रः ।
विश्वे । देवाः । ऋतऽवृधः । हुवानाः । स्तुताः । मंत्राः । कविऽशस्ताः । अवंतु ॥१४॥

उतापि चाहिर्बुध्न्यो नोऽस्माकं स्तोत्रं शृणोतु । अजो जन्मरहितः । एकोऽसहाय एव पद्यते गच्छतीत्येकपात् । एतत्पदद्वयाभिधेयो देवश्च पृथिवी समुद्रश्चास्मदीयं स्तोत्रं शृणोतु । अपि च ऋतावृध ऋतस्य यज्ञस्य सत्यस्य वा वर्धयितारो हुवाना अस्माभिराहूयमानाः पूर्वैर्ऋषिभिश्च स्तोत्रैः स्तुता मंत्रा मंत्रणीया गुप्तं भाषितव्या मंत्रप्रतिपाद्या वा कविशस्ताः कविभिर्मेधाविभिर्ऋषिभिः शस्तैः शंसिता ईदृशा विश्वे देवा अवंतु । अस्मान्रक्षंतु ॥

॥ अथ पंचदशी ॥

एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चंत्यर्कैः ।
ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः ॥१५॥
एव । नपातः । मम । तस्य । धीभिः । भरत्ऽवाजाः । अभि । अर्चंति । अर्कैः ।
ग्नाः । हुतासः । वसवः । अधृष्टाः । विश्वे । स्तुतासः । भूत । यजत्राः ॥१५॥

एवैवं योऽहं देवान् स्तुतवान् तस्य मम ऋजिश्वनो नपातः पुत्रा भरद्वाजा भरद्वाजगोत्रजाः सुहोत्रादयो धीभिः स्तोत्रैरर्कैरर्चनसाधनैरभ्यर्चंति । अभिष्टुवंति । हे यजत्रा यष्टव्या देवा हुतासः पुरोडाशादिभिर्हविर्भिर्हुतास्तर्पिता वसवो निवासयितारोऽधृष्टाः कैरप्यहिंसिता एवंभूता विश्वे ते सर्वे यूयं ग्ना देवपत्न्यश्च स्तुतासो भूत । तैः सुहोत्रादिभिः स्तुता भवत ॥

॥ इति चतुर्थस्याष्टमे दशमो वर्गः ॥

उदु त्यदिति षोडशर्चं द्वितीयं सूक्तमृजिश्वन आर्षं वैश्वदेवं । त्रयोदश्याद्यास्तिस्र उष्णिहः षोडश्यनुष्टुप् शिष्टास्त्रिष्टुभः । तथा चानुक्रांतं । उदु त्यत्षोडश त्र्युष्णिगनुष्टुबंतमिति ॥ गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रियं वरुणयोरदब्धं ।
ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत् ॥१॥

उत्। ऊं इति। त्यत्। चक्षुः। महि। मित्रयोः। आ। एति। प्रियं। वरुणयोः। अदब्धं।

ऋतस्य। शुचि। दर्शतं। अनीकं। रुक्मः। न। दिवः। उतऽइता। वि। अद्यौत् ॥१॥

त्यत्तत्प्रसिद्धं चक्षुः प्रकाशकं महि महद्विस्तृतं मित्रयोर्वरुणयोः प्रियं। मित्रशब्दो वरुणशब्दश्चेतरेतरयोगान्मित्रावरुणावुभावप्याचष्टे। मित्रावरुणयोरतिप्रियमदब्धं रक्षोभिरहिंसितं शुचि शुद्धं निर्मलं दर्शतं दर्शनीयं। एवंभूतमृतस्यादित्यस्यानीकं तेज आ सर्वेषामभिमुखमुदेति। उद्गच्छति। उदितोदितौ सूर्यस्योदये सत्युदितं तत्तेजो दिवोऽंतरिक्षस्य रुक्मो न भूषणमिव व्यद्यौत्। विद्योतते। प्रकाशते ॥

॥ अथ द्वितीया ॥

वेद् यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः।

ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान् ॥२॥

वेद। यः। त्रीणि। विदथानि। एषां। देवानां। जन्म। सनुतः। आ। च। विप्रः।

ऋजु। मर्तेषु। वृजिना। च। पश्यन्। अभि। चष्टे। सूरः। अर्यः। एवान् ॥२॥

यः सूर्यस्त्रीणि त्रिसंख्यानि विदथानि वेदितव्यानि स्थानानि त्रींल्लोकान्वेद वेत्ति जानाति। एषामेतल्लोकत्रयवर्तिनां देवानां वसुरुद्रादित्यात्मनां सनुतः। अंतर्हितनामैतत्। अंतर्हितमप्रज्ञायमानं जन्म जननं च यो विप्रो मेधावी सूर्यो वेत्ति। आकारः पूरकः। स सूरः सूर्यो मर्तेषु मनुष्येषु विद्यमानान्यृजूनि शोभनानि कर्माणि वृजिना वृजिनान्यशोभनानि कर्माणि च पश्यन् साक्षितया जानन् अभि चष्टे। अभितः सर्वं जगत्प्रकाशयति। तथार्यः स्वामी भूत्वैवान् प्राप्तव्यान् कामांश्च मनुष्येषु प्रकाशयति ॥

॥ अथ तृतीया ॥

स्तुष उ वो मह ऋतस्य गोपानदितिं मित्रं वरुणं सुजातान्।

अर्यमणं भगमदब्धधीतीनच्छा वोचे सधन्यः पावकान् ॥३॥

स्तुषे। ऊं इति। वः। महः। ऋतस्य। गोपान्। अदितिं। मित्रं। वरुणं। सुऽजातान्।

अर्यमणं। भगं। अदब्धऽधीतीन्। अच्छ। वोचे। सऽधन्यः। पावकान् ॥३॥

हे देवा महो महत ऋतस्य यज्ञस्य गोपान् रक्षकान्वो युष्मान् स्तुषे। स्तुवे।

उ इति पूरणः। तानेव देवानाह। अदितिमदीनां देवमातरं मित्रं वरुणं चैतान् सुजातान् शोभनजननानर्यमणं भगं चादब्धधीतीनहिंसितकर्मणः सधन्यो धनसहितान् पावकान् विश्वस्य शोधकान्। ईदृशान् सर्वान्देवानच्छ वोचे। अभिप्रब्रवीमीत्यर्थः ॥

॥ अथ चतुर्थी ॥

रिशादसः सत्पतीँरदब्धान्महो राज्ञः सुवसनस्य दातॄन्।
यूनः सुक्षत्रान्क्षयतो दिवो नॄनादित्यान्याम्यदितिं दुवोयु ॥४॥
रिशादसः। सत्ऽपतीन्। अदब्धान्। महः। राज्ञः। सुऽवसनस्य। दातॄन्।
यूनः। सुऽक्षत्रान्। क्षयतः। दिवः। नॄन्। आदित्यान्। यामि। अदितिं। दुवःऽयु ॥४॥

रिशादसो रिशतां हिंसकानामसितॄन् क्षेप्तॄन् यद्वा रिशानां हिंसकानामत्तॄन् भक्षयितॄन् सत्पतीन् सतां पालयितॄनदब्धानहिंसितान्महो महतो राज्ञो राजमानानीश्वरान्वा सुवसनस्य शोभननिवासस्य दातॄन् यूनो नित्यतरुणान् सुक्षत्रान् शोभनधनान् शोभनबलान्वा क्षयतः सर्वत्र निवसतः ॥ यद्वा क्षयतिरैश्वर्यकर्मा ॥ ईशानान् दिवो द्युलोकस्य नॄन्नेतॄनादित्यानदितेः पुत्रान्। ईदृशान् सर्वान्देवान्दुवोयु ॥ लुप्तविभक्तिकमेतत् ॥ दुवोयुं दुवोऽस्मदीयं परिचरणं कामयमानामदितिं देवमातरं च यामि। प्राप्नोमि। यद्वा यामि। याचामि ॥

॥ अथ पंचमी ॥

द्यौ३ष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यंत ॥५॥
द्यौः। पितरिति। पृथिवि। मातः। अध्रुक्। अग्ने। भ्रातः। वसवः। मृळत। नः।
विश्वे। आदित्याः। अदिते। सऽजोषाः। अस्मभ्यं। शर्म। बहुलं। वि। यंत ॥५॥

हे पितः पितृस्थानीय द्यौर्द्युलोक हे मातर्मातृस्थानीयेऽध्रुगद्रोग्धि पृथिवि हे भ्रातर्भ्रातृस्थानीयाग्ने हे वसवो वासयितारो देवास्ते सर्वे यूयं नोऽस्मान्मृळत। सुखयत। हे विश्व आदित्याः सर्वेऽदितिपुत्रा देवा हे अदिते यूयं सजोषाः संगता भूत्वास्मभ्यं बहुलमधिकं शर्म सुखं विस्तृतं वा गृहं वियंत। प्रयच्छत ॥

॥ इति चतुर्थस्याष्टम एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।
यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव ॥६॥
मा । नः । वृकाय । वृक्ये । समस्मै । अघऽयते । रीरधत । यजत्राः ।
यूयं । हि । स्थ । रथ्यः । नः । तनूनां । यूयं । दक्षस्य । वचसः । बभूव ॥६॥

हे यजत्रा यष्टव्या देवा नोऽस्मान्वृकाय हिंसकाय स्तेनाय वृक्ये तस्य स्त्रियै च मा रीरधत । मा वशं नैष्ट । मा वशीकुरुत । यद्वा वृकोऽरण्यश्वा तस्य स्त्री वृकी । अपि च समस्मै सर्वस्मा अघायतेऽघमनर्थमस्माकमिच्छते शत्रुजनायास्मान्मा वशं नयत । यूयं हि यूयं खलु नोऽस्माकं तनूनां शरीराणां रथ्यो नेतारः स्थ । भवथ । यूयमेव दक्षस्यास्मदीयस्य बलस्य वचसो वाक्यस्य च नेतारो बभूव । अतः कारणादस्मान्मा रीरधतेत्यन्वयः ॥

॥ अथ सप्तमी ॥

मा व एनो अन्यकृतं भुजेम मा तत्कर्म वसवो यच्चयध्वे ।
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट ॥७॥
मा । वः । एनः । अन्यऽकृतं । भुजेम । मा । तत् । कर्म । वसवः । यत् । चयध्वे ।
विश्वस्य । हि । क्षयथ । विश्वऽदेवाः । स्वयं । रिपुः । तन्वं । रिरिषीष्ट ॥७॥

हे देवा वो युष्माकं स्वभूता वयमन्यकृतमन्यैः शत्रुभिः कृतमुत्पादितमेनः पापं मा भुजेम । मा भुंक्ष्महि । हे वसवो वासयितारो देवा यद्येन कृतेन पापेन चयध्वे अस्मान्बाधध्वे ॥ चयतिर्हिंसाकर्मा ॥ तच्च पापं कर्म मा कर्म । मा कार्ष्म ॥ करोतेर्माङि लुङि मंत्रे घसेति च्लेर्लुक् ॥ हे विश्वदेवाः सर्वे देवा विश्वस्य सर्वस्य जगतो यूयं हि क्षयथ । ईश्वरा भवथ । अतः कारणादस्मदीयो रिपुः शत्रुस्तन्वं स्वशरीरं स्वयमेव रिरिषीष्ट । हिंस्यात् । यथैवं भवति तथा कुरुतेति भावः ॥

॥ अथाष्टमी ॥

नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्यां ।
नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे ॥८॥

नमः । इत् । उग्रं । नमः । आ । विवासे । नमः । दाधार । पृथिवीं । उत । द्यां ।
नमः । देवेभ्यः । नमः । ईशे । एषां । कृतं । चित् । एनः । नमसा । आ । विवासे ॥८॥

आस्तां तावद्देवानां माहात्म्यं तदीयो नमस्कारोऽपीत्थंमहाभाग इति ब्रुवाणः कैमुतिकन्यायेन देवान् स्तौति । नम इत् नमस्कार एवोग्रमुद्गूर्णबलं सर्वोत्कृष्टं । तेन हि सर्वं लभ्यते । अतो नमो नमस्कारमाविवासे । परिचरामि । नमो नमस्कार एव पृथिवीमुत द्यां द्युलोकं च दाधार । धारयति । द्यावापृथिव्यौ प्राणिभिर्नमस्क्रियमाणे सत्यौ तदुपभोगाय चिरकालमवतिष्ठेते । अतो देवेभ्य ईदृशं नमः करोमि । एषां देवानां नमो नमस्कार ईशे । ईष्टे । यतस्तेन ते वशीकृताः । कृतं चित्कृतमप्याचरितमप्येनः पापं नमसा नमस्कारेणाविवासे । विवासो वर्जनं । वर्जयामि । विनाशयामि ॥

॥ अथ नवमी ॥

ऋतस्य वो रथ्यः पूतदक्षानृतस्य पस्त्यसदो अदब्धान् ।
ताँ आ नमोभिरुरुचक्षसो नॄन्विश्वान्व आ नमे महो यजत्राः ॥९॥

ऋतस्य । वः । रथ्यः । पूतऽदक्षान् । ऋतस्य । पस्त्यऽसदः । अदब्धान् ।
तान् । आ । नमःऽभिः । उरुऽचक्षसः । नॄन् । विश्वान् । वः । आ । नमे । महः । यजत्राः ॥९॥

हे यजत्रा यष्टव्या देवा वो युष्मदीयस्य ऋतस्य यज्ञस्य रथ्यो रंहितॄन्नेतॄन् पूतदक्षान् शुद्धबलानृतस्य यज्ञस्य पस्त्यसदो यज्ञसंबंधिनि पस्त्ये देवयजनलक्षणे गृहे सीदतो निषण्णानदब्धान्रक्षःप्रभृतिभिरहिंसितानुरुचक्षसो बहुद्रष्टॄन्नॄन्नेतॄन्महो महतस्तान्विश्वान् सर्वान् वो युष्मानाभिमुख्येन क्रियमाणैर्नमोभिर्नमस्कारैरानमे । आनतोऽस्मि ॥

॥ अथ दशमी ॥

ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वानि दुरिता नयंति ।
सुक्षत्रासो वरुणो मित्रो अग्निर्ऋतधीतयो वक्मराजसत्याः ॥१०॥

ते । हि । श्रेष्ठऽवर्चसः । ते । ऊं इति । नः । तिरः । विश्वानि । दुःऽइता । नयंति ।
सुऽक्षत्रासः । वरुणः । मित्रः । अग्निः । ऋतऽधीतयः । वक्मराजऽसत्याः ॥१०॥

ये देवा वक्ष्यमाणगुणास्ते हि ते खलु श्रेष्ठवर्चसः प्रशस्यतमदीप्तयो भवंति ।

अतस्त उ त एव नोऽस्माकं विश्वानि सर्वाणि दुरिता पापानि तिरस्तिरोहितानि यथा भवंति तथा नयंति । नयंतु । विनाशयंत्वित्यर्थः । ये वरुणादयो देवाः सुक्षत्रासः शोभनबलाः शोभनधना वा ऋतधीतयः सत्यकर्माणो वक्मराजसत्याः । वक्म वचनं स्तोत्रं । तस्य राजान ईशाना वक्मराजानः स्तोतारः । तेषु सत्या अवितथाः । एवंभूता ते हीत्यन्वयः ॥

॥ इति चतुर्थस्याष्टमे द्वादशो वर्गः ॥

॥ अथैकादशी ॥

ते न इंद्रः पृथिवी क्षाम वर्धन्पूषा भगो अदितिः पंच जनाः ।
सुशर्माणः स्ववसः सुनीथा भवंतु नः सुत्रात्रासः सुगोपाः ॥ ११ ॥

ते । नः । इंद्रः । पृथिवी । क्षाम । वर्धन् । पूषा । भगः । अदितिः । पंच । जनाः ।
सुऽशर्माणः । सुऽअवसः । सुऽनीथाः । भवंतु । नः । सुऽत्रात्रासः । सुऽगोपाः ॥ ११ ॥

ते देवा नोऽस्माकं क्षाम निवासभूमिं वर्धन् । वर्धयंतु । के ते । इंद्रः पृथिवी च पूषा च भगश्चादितिरदीना देवमाता च पंच जना देवमनुष्याणां गंधर्वाप्सरसामित्यादिब्राह्मणोक्ता देवमनुष्यादयश्च ते च नोऽस्मदर्थं सुशर्माणः सुसुखाः स्ववसः शोभनान्नाः सुनीथाः सुप्रापणाश्च भवंतुः । अस्मभ्यं शोभनसुखादिकं प्रयच्छंत्विति भावः । तथा सुत्रात्रासः सुष्ठु त्रातारः सुगोपाः शोभनगोपायितारश्च भवंतु । उपस्थितेभ्यः शत्रुभ्यो रक्षणं त्राणं । तेषामुत्पत्तिनिरोधेन रक्षणं गोपनं ॥

॥ अथ द्वादशी ॥

नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता ।
आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्ववंद ॥ १२ ॥

नु । सद्मानं । दिव्यं । नंशि । देवाः । भारत्ऽवाजः । सुऽमतिं । याति । होता ।
आसानेभिः । यजमानः । मियेधैः । देवानां । जन्म । वसुऽयुः । ववंद ॥ १२ ॥

अनया ऋषिरात्मानं परोक्षवदाह । हे देवा भारद्वाजो भरद्वाजगोत्रजो होता स्तोतायमृषिर्दिव्यं दिवि भवं सद्मानं सदनं स्थानं नु क्षिप्रं नंशि । व्याप्नोतु । तथा सुमतिं शोभनां मतिं युष्मदीयामनुग्रहबुद्धिं च याति । याचते । यातिर्याच्ञाकर्मा । तदर्थमासानेभिरासीनैः सत्रासनं कुर्वद्भिर्मियेधैर्मेध्यैर्मेधार्हैरन्ययजमानैः सार्धं

यजमानो यागं कुर्वन्नयमृषिर्वसूयुर्वसूनि धनान्यात्मन इच्छन् देवानां जन्म जनं संघं ववंद। वंदते। स्तौति॥

दशरात्रस्य चतुर्थेऽहनि प्रउगशस्त्रेऽप त्यं वृजिनमित्येषा। वैश्वदेवस्तृचः। सूचितं च। अप त्यं वृजिनं रिपुमंबितमे नदीतम इत्यानुष्टुभं प्रउगं। आ० ७.११। इति॥

॥ तृचे प्रथमा सूक्ते त्रयोदशी॥

अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यं।

दविष्ठमस्य सत्पते कृधी सुगं॥१३॥

अप। त्यं। वृजिनं। रिपुं। स्तेनं। अग्ने। दुःऽआध्यं।

दविष्ठं। अस्य। सत्ऽपते। कृधि। सुऽगं॥१३॥

हे अग्ने त्वं त्यं तं प्रसिद्धं वृजिनं कुटिलं रिपुं पापकारिणं दुराध्यं दुःखस्याध्यातारं दुष्टाभिप्रायमेवंभूतं स्तेनं हिंसकं दविष्ठं दूरतममपास्य। अपक्षिप॥ असु क्षेपण इति धातुः॥ हे सत्पते सतां पालयितरग्ने अस्माकं सुगं शोभनेन गंतव्यं सुखं कृधि। कुरु। अत्र सर्वदेवात्मकस्याग्नेः स्तवनाद्वैश्वदेवत्वं॥

॥ अथ चतुर्दशी॥

ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः।

जही न्यत्रिणं पणिं वृको हि षः॥१४॥

ग्रावाणः। सोम। नः। हि। कं। सखिऽत्वनाय। वावशुः।

जहि। नि। अत्रिणं। पणिं। वृकः। हि। सः॥१४॥

हे सोम नोऽस्मदीया इमे ग्रावाणोऽभिषवार्थाः पाषाणास्तव सखित्वनाय सख्यार्थं वावशुः। कामयंते। कमिति पूरकः। हि यस्मादर्थे। यस्मादेवं तस्मात्त्वं पणिं वणिजमदातारमत्रिणमदनशीलं राक्षसादिकं निजहि। विनाशय। स पणिर्वृको हि। आदानपरः खलु। सर्वदास्मत्तोऽपहरणशीलः। अतस्त्वं जहीत्यर्थः॥ वृक वृक आदान इति धातुः॥

॥ अथ पंचदशी॥

यूयं हि ष्ठा सुदानव इंद्रज्येष्ठा अभिद्यवः।

कर्ता नो अध्वन्ना सुगं गोपा अमा॥१५॥

यूयं। हि। स्थ। सुऽदानवः। इंद्रऽज्येष्ठाः। अभिऽद्यवः।

कर्त। नः। अध्वन्। आ। सुऽगं। गोपाः। अमा ॥१५॥

हे सुदानवः शोभनदाना देवा यूयं हि स्थ। यूयं खलु प्रभवथ। समृद्धाः स्थ। इंद्रज्येष्ठाः। इंद्रो ज्येष्ठो मुख्यो येषां ते। अभिद्यवोऽभिगतदीप्तयस्ते यूयमध्वन्न-ध्वनि मार्गे नोऽस्माकममा सहैव गोपा गोपायितारो रक्षितारः संतः सुगं सुखं। आकारः समुच्चये। सुखं च कर्त। कुरुत ॥

प्रवासादागमनेऽपि पंथामित्येषा यजमानेन जप्या। सूत्रितं च। अपि पंथा-मगन्महीति प्रत्येत्य समित्पाणिः। आ० २.५.। इति ॥

॥ सैषा सूक्ते षोडशी ॥

अपि पंथामगन्महि स्वस्तिगामनेहसं।

येन विश्वाः परि द्विषो वृणक्ति विंदते वसु ॥१६॥

अपि। पंथां। अगन्महि। स्वस्तिऽगां। अनेहसं।

येन। विश्वाः। परि। द्विषः। वृणक्ति। विंदते। वसु ॥१६॥

पंथां पंथानं मार्गमप्यगन्महि। अपिगताः प्राप्ताः स्मः। कीदृशं। स्वस्तिगां सुखेन गंतव्यमनेहसं पापरहितं। येन पथा गच्छन् विश्वाः सर्वा द्विषो द्वेष्ट्रीः प्रजाः परिवृणक्ति परिवर्जयति बाधते वसु धनं च विंदते लभते तादृशं पंथानमित्यर्थः ॥

॥ इति चतुर्थस्याष्टमे त्रयोदशो वर्गः ॥

न तद्दिवेति सप्तदशर्चं तृतीयं सूक्तमृजिश्वन आर्षं वैश्वदेवं। आदितः षट् त्रिष्टुभः सप्तम्याद्याः षट् गायत्र्यस्त्रयोदशी त्रिष्टुप् चतुर्दशी जगती शिष्टास्तिस्र-स्त्रिष्टुभः। तथा चानुक्रांतं। न तत्र्यूना सप्तम्याद्याः षड्गायत्र्यश्चतुर्दशी जगतीति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

न तद्दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः।

उब्जंतु तं सुभ्वः पर्वतासो नि हीयतामतियाजस्य यष्टा ॥१॥

न। तत्। दिवा। न। पृथिव्या। अनु। मन्ये। न। यज्ञेन। न। उत। शमीभिः। आभिः।

उब्जंतु। तं। सुऽभ्वः। पर्वतासः। नि। हीयतां। अतिऽयाजस्य। यष्टा ॥१॥

अतियाजो नाम कश्चिद्दषिरस्माहजिश्वन उत्कृष्टः स्यामहमिति बुद्ध्या देवान्यियक्षुरास। ऋषिस्तदीयं यजनं निराचष्टाद्यया ॥ न तदतियाजस्य ऋषेस्तद्यजनं दिवा द्युलोकेन तचत्येन देवगणेन युक्तमित्यहं नानुमन्ये। नानुमतिं करोमि। न च पृथिव्या पार्थिवेनापि देवगणेन युक्तमिति नानुमन्ये। न च यज्ञेन मयानुष्ठितेन सदृशं तदित्यहं नानुमन्ये। उतापि चाभिः शमीभिरन्यैरपि मया कृतैरेभिः कर्मभिः सदृशमित्यपि नानुमन्ये। मया वशीकृता देवास्तदीयं यजनं नांगीकुर्वंति स चानभिज्ञत्वात्सम्यग्यष्टुमपि न शक्नोतीति भावः। अपि च तमृषिं सुभ्वः सुष्ठु भवंतः पर्वतासः पर्वता इंद्रेण प्रहिताः संत उज्भंतु। हिंसंतु॥ उज्झिर्हिंसाकर्मा ॥ तथा तस्यातियाजस्य ऋजिश्वनोऽप्यतिशयेनाहं देवान्यजामीति बुद्ध्या युक्तस्य ऋषेर्यो यष्टा याजकः स नि हीयतां। नितरां हीनो भवतु ॥

॥ अथ द्वितीया ॥

अति॑ वा॒ यो म॑रुतो॒ मन्य॑ते नो॒ ब्रह्म॑ वा॒ यः क्रि॒यमा॑णं॒ निनि॑त्सात्।
तपूं॑षि॒ तस्मै॑ वृजि॒नानि॑ संतु ब्र॒ह्मद्वि॑षम॒भि तं शो॑चतु॒ द्यौः ॥२॥

अति॑। वा॒। यः। म॒रु॒तः॒। मन्य॑ते। नः॒। ब्रह्म॑। वा॒। यः। क्रि॒यमा॑णं। निनि॑त्सात्।
तपूं॑षि। तस्मै॑। वृ॒जि॒नानि॑। सं॒तु॒। ब्र॒ह्म॒ऽद्वि॑षं। अ॒भि। तं। शो॒च॒तु॒। द्यौः ॥२॥

हे मरुतो यः पुरुषो नोऽस्मानतिमन्यते अतीत्य स्वस्याधिक्यं मन्यते अस्मत्तोऽपि स्वयमधिक इति बुध्यते। अस्माभिः क्रियमाणं ब्रह्म स्तोत्रं वा यो निनित्सात् निंदितुमिच्छेत् तस्मै पुरुषाय तपूंषि तेजांसि वृजिनानि बाधकानि संतु। भवंतु। ब्रह्मद्विषं तं शत्रुं द्यौरादित्यश्चाभिशोचतु। अभितपतु। अभिदहतु॥

॥ अथ तृतीया ॥

किमं॒ग त्वा॒ ब्रह्म॑णः सोम गो॒पां किमं॒ग त्वा॑हुरभिशस्ति॒पां नः॑।
किमं॒ग नः॑ पश्यसि नि॒द्यमा॑नान्ब्रह्म॒द्विषे॑ तपु॑षिं हे॒तिम॑स्य ॥३॥

किं। अं॒ग। त्वा॒। ब्रह्म॑णः। सो॒म॒। गो॒पां। किं। अं॒ग। त्वा॒। आ॒हुः॒। अ॒भि॒श॒स्ति॒ऽपां। नः॒।
किं। अं॒ग। नः॒। प॒श्य॒सि॒। नि॒द्यमा॑नान्। ब्र॒ह्म॒ऽद्विषे॑। तपु॑षिं। हे॒तिं। अ॒स्य॒ ॥३॥

किमंगेति प्रसिद्धिद्योतकौ निपातौ। हे सोम त्वा त्वां खलु ब्रह्मणो मंत्रस्य कर्मणो वा ब्रह्मजातेर्वा गोपां गोपायितारमाहुः। कथयंति पुराविदः। तथा

नोऽस्माकमभिशस्तिपामभिशंसकेभ्यः पालयितारं त्वामेव खल्वाहुः । यद्वांगेत्यभिमुखीकरणे । अंग हे सोम किंकारणं त्वां ब्रह्मणो गोपामाहुः । किंकारणं वा त्वामस्माकमभिशस्तिपामाहुः । निद्यमानान् परैर्दूष्यमाणान्नोऽस्मानंग हे सोम किंकारणं पश्यसि । त्वामेव सर्वे ब्रह्मणो रक्षकं शत्रुभ्यः पालकं च कथयंति अतोऽस्मासु परैर्निंद्यमानेष्वौदासीन्यं तवानुचितं । अतो ब्रह्मद्विषे ब्राह्मणद्वेष्ट्रे तस्मै तपुषिं तापकं हेतिमायुधमस्य । क्षिप । प्रेरय ॥

॥ अथ चतुर्थी ॥

अवंतु मामुषसो जायमाना अवंतु मा सिंधवः पिन्वमानाः ।

अवंतु मा पर्वतासो ध्रुवासोऽवंतु मा पितरो देवहूतौ ॥४॥

अवंतु । मां । उषसः । जायमानाः । अवंतु । मा । सिंधवः । पिन्वमानाः ।

अवंतु । मा । पर्वतासः । ध्रुवासः । अवंतु । मा । पितरः । देवऽहूतौ ॥४॥

जायमानाः प्रादुर्भवंत्य उषसो मामवंतु । रक्षंतु । तथा पिन्वमाना वर्धमानाः सिंधवः स्यंदनशीला नद्यश्च मामवंतु । तथा ध्रुवासो निश्चलाः पर्वतासः पर्वताश्च मामवंतु । तथा देवहूतौ । देवानां हूतिराह्वानमस्मिन्निति देवहूतिर्यागः । तत्र विद्यमानाः पितरः पितृदेवताश्च मामवंतु ॥

॥ अथ पंचमी ॥

विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरंतं ।

तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः ॥५॥

विश्वऽदानीं । सुऽमनसः । स्याम । पश्येम । नु । सूर्यं । उत्ऽचरंतं ।

तथा । करत् । वसुऽपतिः । वसूनां । देवान् । ओहानः । अवसा । आऽगमिष्ठः ॥५॥

हे देवा विश्वदानीं सर्वदा वयं सुमनसः स्याम । शोभनमनस्का भवेम । नुशब्दः समुच्चये । उच्चरंतमुद्यंतं सूर्यं सर्वदा पश्येम च । वसूनां वसुपतिरुत्कृष्टधनाधिपतिरग्निर्देवानवसास्मदीयेन हविषौहानो वहन् प्रापयन् आगमिष्ठ आगंतृतम एवंगुणविशिष्टः सन् तथा करत् । अस्मांस्तथाविधानुक्तप्रकारान्करोतु ॥

॥ इति चतुर्थस्याष्टमे चतुर्दशो वर्गः ॥

॥ अथ षष्ठी ॥

इंद्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिंधुभिः पिन्वमाना ।
पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव ॥ ६ ॥

इंद्रः । नेदिष्ठं । अवसा । आऽगमिष्ठः । सरस्वती । सिंधुऽभिः । पिन्वमाना ।
पर्जन्यः । नः । ओषधीभिः । मयःऽभुः । अग्निः । सुऽशंसः । सुऽहवः । पिताऽइव ॥ ६ ॥

अयमिंद्रो नेदिष्ठमंतिकतमं यथा भवति तथावसा रक्षणेन सार्द्धमागमिष्ठ आगंतृतमोऽस्तु । सिंधुभिः स्यंदनैरुदकैः पिन्वमाना वर्धमाना नदीरूपा सरस्वती चागंतृतमा भवतु । ओषधीभिः सार्द्धं पर्जन्यश्च नोऽस्माकं मयोभुः सुखस्य भावयिता भवतु । अग्निश्च पितेव पुत्रस्य जनक इव सुशंसः सुखेन शंसनीयः सुहवः सुखेनाह्वातव्यश्च भवतु ॥

आग्रयणे वैश्वदेवस्य चरोर्विश्वे देवास आ गतेत्यनुवाक्या । सूचितं च । विश्वे देवास आ गत ये के च ज्मा महिनो अहिमायाः । आ॰ २.९. । इति ॥

॥ सैषा सूक्ते सप्तमी ॥

विश्वे देवास आ गत शृणुता म इमं हवं । एदं बर्हिर्नि षीदत ॥ ७ ॥

विश्वे । देवासः । आ । गत । शृणुत । मे । इमं । हवं । आ । इदं । बर्हिः । नि । सीदत ॥ ७ ॥

हे विश्वे देवासः सर्वे देवा आगत । आगच्छत । आगत्य च मे मदीयमिमं हवमिदमाह्वानं शृणुत । श्रुत्वा चेदमास्तीर्णं बर्हिरानिषीदत । आस्तीर्णे बर्हिषि निषण्णा भवत ॥

॥ अथाष्टमी ॥

यो वो देवा घृतस्नुना हव्येन प्रतिभूषति । तं विश्व उप गच्छथ ॥ ८ ॥

यः । वः । देवाः । घृतऽस्नुना । हव्येन । प्रतिऽभूषति । तं । विश्वे । उप । गच्छथ ॥ ८ ॥

हे देवा वो युष्मान्यो जनो घृतस्नुना घृतप्रक्षरणेन हव्येन हविषा प्रतिभूषति परिचरति तं जनं विश्वे सर्वे यूयमुपगच्छथ । उपगता भवथ ॥

॥ अथ नवमी ॥

उप नः सूनवो गिरः शृण्वंत्वमृतस्य ये । सुमृळीका भवंतु नः ॥ ९ ॥

उप । नः । सूनवः । गिरः । शृण्वंतु । अमृतस्य । ये । सुऽमृळीकाः । भवंतु । नः ॥ ९ ॥

अमृतस्य मरणरहितस्य प्रजापतेर्ये सूनवः पुत्राः ते देवा नोऽस्माकं गिरः स्तुतीरुपशृण्वंतु । नोऽस्माकं सुमृळीकाः सुष्ठु मृडयितारः सुखयितारश्च भवंतु ॥

॥ अथ दशमी ॥

विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः । जुषंतां युज्यं पयः ॥१०॥

विश्वे । देवाः । ऋतऽवृधः । ऋतुऽभिः । हवनऽश्रुतः । जुषंतां । युज्यं । पयः ॥१०॥

ऋतावृध ऋतस्य यज्ञस्य वर्धका ऋतुभिः कालविशेषैर्हवनश्रुतो हवनस्य स्तोत्रस्य श्रोतारस्तस्मिंस्तस्मिन्यागकाले स्तूयमाना ईदृशा विश्वे सर्वे देवा युज्यं योग्यं पय आमिक्षारूपं जुषंतां । सेवंतां । श्रूयते हि । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षेति ॥

॥ इति चतुर्थस्याष्टमे पंचदशो वर्गः ॥

॥ अथैकादशी ॥

स्तोत्रमिंद्रो मरुद्गणस्त्वष्टृमान्मित्रो अर्यमा । इमा हव्या जुषंत नः ॥११॥

स्तोत्रं । इंद्रः । मरुत्ऽगणः । त्वष्टृऽमान् । मित्रः । अर्यमा । इमा । हव्या । जुषंत । नः ॥११॥

मरुद्गणो मरुतो गणभूताः परिजनभूता यस्य तादृश इंद्रस्त्वष्टृमान् त्वष्टृसहितो मित्रोऽर्यमा च नोऽस्माकं स्तोत्रमिमा हव्येमानि हवींषि च जुषंत । सेवंतां ॥

॥ अथ द्वादशी ॥

इमं नो अग्ने अध्वरं होतर्वयुनशो यज । चिकित्वान्दैव्यं जनं ॥१२॥

इमं । नः । अग्ने । अध्वरं । होतः । वयुनऽशः । यज । चिकित्वान् । दैव्यं । जनं ॥१२॥

हे होतर्देवानामाह्वातरग्ने दैव्यं देवसंबंधिनं जनं संघं यजनीयं चिकित्वान् जानंस्त्वं नोऽस्मदीयमिममध्वरं हिंसारहितं यज्ञं वयुनशो ज्ञानक्रमेण यथानुपूर्व्या देवा बुद्धिस्थाः तथा यज । यागं कुरु ॥

वैश्वदेवशस्त्रस्य विश्वे देवा इति याज्या । सूचितं च । आश्रुत्यै त्वेति शस्त्वा जपेद्विश्वे देवाः शृणुतेमं हवं म इति याज्या । आ० ५.१८. । इति ॥ वैश्वदेवे पशावेषैव याज्या । सूचितं च । विश्वे देवाः शृणुतेमं हवं मे ये के च ज्मा महिनो अहिमायाः । आ० ३.७. । इति ॥

॥ सैषा सूक्ते त्रयोदशी ॥

विश्वे देवाः शृणुतेमं हवं मे ये अंतरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वं ॥१३॥

विश्वे । देवाः । शृणुत । इमं । हवं । मे । ये । अंतरिक्षे । ये । उप । द्यवि । स्थ ।
ये । अग्निऽजिह्वाः । उत । वा । यजत्राः । आऽसद्य । अस्मिन् । बर्हिषि । मादयध्वं ॥१३॥

हे विश्वे देवा मे मदीयमिमं हवमाह्वानं शृणुत । ये यूयमंतरिक्षे स्थ अंतरिक्षलोके वर्तमाना भवथ । ये चोप तत्समीपस्थे भूलोके भवथ । ये च द्यवि द्युलोके स्थ । ये चाग्निजिह्वाः । अग्निर्जिह्वास्थानीयो येषां । यद्वाग्नेर्जिह्वा । तया पोष्यमाणत्वादग्निजिह्वा इत्युच्यंते । उत वापि वा ये यजत्रा यजनीयाः ते सर्वे यूयमास्तीर्णेऽस्मिन्बर्हिष्यासद्योपविश्य मादयध्वं । सोमेनात्मानं तर्पयथ ॥

॥ अथ चतुर्दशी ॥

विश्वे देवा मम शृण्वंतु यज्ञिया उभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अंतमा मदेम ॥१४॥

विश्वे । देवाः । मम । शृण्वंतु । यज्ञियाः । उभे इति । रोदसी इति । अपां । नपात् । च । मन्म ।
मा । वः । वचांसि । परिऽचक्ष्याणि । वोचं । सुम्नेषु । इत् । वः । अंतमाः । मदेम ॥१४॥

यज्ञिया यज्ञार्हा विश्वे देवा मम मदीयं मन्म मननीयं स्तोत्रं शृण्वंतु । चित्तेन धारयंतु । तथोभे रोदसी द्यावापृथिव्यावपां नपात् मध्यमस्थानोऽग्निश्चास्मदीयं स्तोत्रं शृण्वंतु । अथ प्रत्यक्षकृतः । हे देवा वो युष्मभ्यं परिचक्ष्याणि वर्जनीयानि वचांसि स्तोत्राणि मा वोचं । मा ब्रवीमि । अपि तु समीचीनानि । अतो वो युष्माकमंतमा अंतिकतमाः संतो वयं सुम्नेष्वित् युष्माभिर्दत्तेषु सुखेष्वेव वर्तमाना मदेम । मोदेम ॥

आग्रयणे वैश्वदेवस्य ये के च ज्मेति याज्या । सूचितं च । विश्वे देवास आ गत ये के च ज्मा महिनो अहिमायाः । आ० २.९. । इति ॥ वैश्वदेवपुरोडाशस्यैषैव याज्या । सूत्रमुदाहृतं ॥

॥ सैषा सूक्ते पंचदशी ॥

ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यंतु देवाः ॥१५॥
ये । के । च । ज्मा । महिनः । अहिऽमायाः । दिवः । जज्ञिरे । अपां । सधऽस्थे ।
ते । अस्मभ्यं । इषये । विश्वं । आयुः । क्षपः । उस्राः । वरिवस्यंतु । देवाः ॥१५॥

महिनो महांतोऽहिमायाः । माया प्रज्ञानाम । आहंतृप्रज्ञाः । एवंभूता ये के चन देवा ज्मा । पृथिवीनामैतत् । पृथिव्यां जज्ञिरे प्रादुर्बभूवुः । ये के चन दिवो द्युलोकाज्जज्ञिरे । ये के चनापां सधस्थे सहांतरिक्षे जज्ञिरे ते सर्वे देवा अस्मभ्यमिषये । इष्यत इतीषिः पुत्रादिः । तस्मै च विश्वं सर्वमायुरन्नं जीवनं वा क्षपः सर्वा रात्रीरुस्राः सर्वाण्यहानि च सर्वदा नैरंतर्येण वरिवस्यंतु । प्रयच्छंतु ॥

॥ अथ षोडशी ॥

अग्नीपर्जन्याववतं धियं मेऽस्मिन्हवे सुहवा सुष्टुतिं नः ।
इळामन्यो जनयद्गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे ॥१६॥
अग्नीपर्जन्यौ । अवतं । धियं । मे । अस्मिन् । हवे । सुऽहवा । सुऽस्तुतिं । नः ।
इळां । अन्यः । जनयत् । गर्भं । अन्यः । प्रजाऽवतीः । इषः । आ । धत्तं । अस्मे इति ॥१६॥

हे अग्नीपर्जन्यौ मे मदीयं धियं कर्म यज्ञलक्षणमवतं । गच्छतं । रक्षतं वा हे सुहवा सुखेन ह्वातुं शक्यावस्मिन्हवे यज्ञे नोऽस्मदीयां सुष्टुतिं शोभनां स्तुतिं च रक्षतं । यद्वानुवृत्तोऽवतिः श्रवणार्थः । अवतं । शृणुतं । युवयोर्मध्येऽन्यः पर्जन्य इळामन्नं जनयत् । जनयति । वृष्ट्या ह्योषधिवनस्पतयो जायंते तेभ्यश्चान्नं जायते । अन्योऽग्निर्गर्भं जनयति । पुरुषेण भुक्तमन्नं जाठरेणाग्निना पक्वं सत् रेतोरूपेण परिणमते तदेव योषित्सु गर्भो भवति । अतो युवां प्रजावतीः प्रजाभिर्युक्ता इषोऽन्नान्यस्मे अस्मास्वाधत्तं । अवस्थापयतं ॥

॥ अथ सप्तदशी ॥

स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे ।
अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वं ॥१७॥

स्तीर्णे । बर्हिषि । संऽइधाने । अग्नौ । सुऽउक्तेन । महा । नमसा । आ । विवासे ।
अस्मिन् । नः । अद्य । विदथे । यजत्राः । विश्वे । देवाः । हविषि । मादयध्वं ॥१७॥

हे विश्वे देवा बर्हिषि दर्भपुंजे वेद्यां स्तीर्णे सत्यग्नौ च समिधाने समिद्धे सत्यनेन सूक्तेन स्तोत्रेण च महा महता नमसा नमस्कारेण चाविवासे । पर्यचरं । हे यजत्रा यजनीया विश्वे देवा अद्यास्मिन्दिने नोऽस्मदीयेऽस्मिन्विदथे यज्ञे हविषि ॥ तृतीयार्थे सप्तमी ॥ हविषास्माभिर्दत्तेन मादयध्वं । तृप्यध्वं ॥

॥ इति चतुर्थस्याष्टमे षोडशो वर्गः ॥

वयमु त्वेति दशर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं पौष्णं । यां पूषन्नित्यनुष्टुप् शिष्टा गायत्र्यः । तथा चानुक्रांतं । वयं दश पौष्णं तन्नायत्रं वै यां पूषन्ननुष्टुबिति ॥ अर्थार्थिभिः प्रवसद्भिरेतज्जप्यं । सूचितं च । वयमु त्वा पथस्पत इत्यर्थचर्यां चरिष्यन् । गृ० सू० ३. ७. । इति । जपेदिति शेषः ॥

॥ तत्र प्रथमा ॥

वयमु त्वा पथस्पते रथं न वाजसातये । धिये पूषन्नयुज्महि ॥१॥
वयं । ऊं इति । त्वा । पथः । पते । रथं । न । वाजऽसातये । धिये । पूषन् । अयुज्महि ॥१॥

हे पथस्पते मार्गस्य पालयितः पूषन् धिये कर्मार्थं वाजसातयेऽन्नस्य लाभाय च वयं रथं न युद्धे रथमिव त्वा त्वामयुज्महि । युंज्महि । अस्मदभिमुखं कुर्मः ॥ उ इति पूरकः ॥

॥ अथ द्वितीया ॥

अभि नो नर्यं वसु वीरं प्रयतदक्षिणं । वामं गृहपतिं नय ॥२॥
अभि । नः । नर्यं । वसु । वीरं । प्रयतऽदक्षिणं । वामं । गृहऽपतिं । नय ॥२॥

हे पूषन् नर्यं नृभ्यो हितं वसु धनमभिप्राप्तुं वीरं दारिद्र्यस्य विशेषेणेरयितारं गमयितारं प्रयतदक्षिणं पूर्वमन्येभ्योऽपि दत्तधनं । यद्वा प्रयतं शुद्धं दक्षिणं धनं यस्य तादृशं । वामं वननीयमेवंविधं गृहपतिं गृहस्थं नोऽस्मान्नय । प्रापय ॥

॥ अथ तृतीया ॥

अदित्संतं चिदाघृणे पूषन्दानाय चोदय । पणेश्चिद्वि म्रदा मनः ॥३॥
अदित्संतं । चित् । आघृणे । पूषन् । दानाय । चोदय । पणेः । चित् । वि । म्रद । मनः ॥३॥

हे आघृण आगतदीप्ते पूषन् अदित्संतं चित् दातुमनिच्छंतमपि पुरुषं दानायास्मद्दानार्थं चोदय। प्रेरय। पणेश्चिद्वणिजोऽपि वार्धुषिकस्य लुब्धस्यापि मनो हृदयं विम्रद। दानार्थं मृदूकुरु ॥

॥ अथ चतुर्थी ॥

वि पथो वाजसातये चिनुहि वि मृधो जहि। साधंतामुग्र नो धियः ॥४॥

वि। पथः। वाजऽसातये। चिनुहि। वि। मृधः। जहि। साधंतां। उग्र। नः। धियः ॥४॥

हे उग्रोद्गूर्णबल पूषन् पथो मार्गान् वाजसातयेऽन्नलाभाय विचिनुहि। शोधितान्कुरु। यैः पथिभिर्गता धनं लभेमहि तादृशान्पथः पृथक्कुर्वित्यर्थः। मृधो बाधकान् तस्करादींश्च विजहि। बाधस्व। तथा नोऽस्माकं धियः कर्माण्यन्नलाभार्थं क्रियमाणानि साधंतां। सिध्यंतु। सफलानि भवंतु ॥

॥ अथ पंचमी ॥

परि तृंधि पणीनामारया हृदया कवे। अथेमस्मभ्यं रंधय ॥५॥

परि। तृंधि। पणीनां। आरया। हृदया। कवे। अथ। ईं। अस्मभ्यं। रंधय ॥५॥

हे कवे प्राज्ञ पूषन् पणीनां वणिजां लुब्धानां हृदया हृदयानि कठिनान्यारया। सूक्ष्मलोहाग्रो दंडः प्रतोद इत्यारेति चाख्यायते। तया परितृंधि। प्रविध्य। तद्गतं काठिन्यमपनयेत्यर्थः। अथानंतरमीमेनान्पणीनस्मभ्यं रंधय। वशीकुरु ॥

॥ इति चतुर्थस्याष्टमे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियं। अथेमस्मभ्यं रंधय ॥६॥

वि। पूषन्। आरया। तुद। पणेः। इच्छ। हृदि। प्रियं। अथ। ईं। अस्मभ्यं। रंधय ॥६॥

हे पूषन् आरया प्रतोदेन पणेर्वणिजो हृदयं वितुद। विविध्य। तस्य पणेर्हृदि हृदये प्रियमस्मभ्यमनुकूलं धनमिच्छ। दातव्यमितीच्छां जनय। अथानंतरमस्मभ्यमीमेनान्रंधय। वशीकुरु ॥

॥ अथ सप्तमी ॥

आ रिख किकिरा कृणु पणीनां हृदया कवे। अथेमस्मभ्यं रंधय ॥७॥

आ। रिख। किकिरा। कृणु। पणीनां। हृदया। कवे। अथ। ईं। अस्मभ्यं। रंधय ॥७॥

हे कवे प्राज्ञ पूषन् पणीनां वणिजां हृदया हृदयान्यारिख। आलिख। आलिख्य च किकिरा कीर्णानि प्रशिथिलानि कृणु। कुरु। मृदूनि कुर्वित्यर्थः। अन्यद्गतं ॥

॥ अथाष्टमी ॥

यां पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे।
तया समस्य हृदयमा रिख किकिरा कृणु ॥८॥
यां। पूषन्। ब्रह्मऽचोदनीं। आरां। बिभर्षि। आघृणे।
तया। समस्य। हृदयं। आ। रिख। किकिरा। कृणु ॥८॥

हे आघृण आगतदीप्ते पूषन् ब्रह्मचोदनीं ब्रह्मणोऽन्नस्य प्रेरयित्रीं यामारां बिभर्षि हस्ते धारयसि तया समस्य सर्वस्य लुब्धजनस्य हृदयमारिख। आलिख। किकिरा किकिराणि कीर्णानि प्रशिथिलानि च कृणु। कुरु ॥

॥ अथ नवमी ॥

या ते अष्ट्रा गोओपशाघृणे पशुसाधनी। तस्यास्ते सुम्नमीमहे ॥९॥
या। ते। अष्ट्रा। गोऽओपशा। आघृणे। पशुऽसाधनी। तस्याः। ते। सुम्नं। ईमहे ॥९॥

हे आघृण आगतदीप्ते पूषन् ते त्वदीया याष्ट्रारा गोओपशा। उपशेरत इत्योपशाः। गाव ओपशा यस्यास्तादृशी। अत एव पशुसाधनी पशूनां साधयित्री भवति ते त्वदीयायास्तस्याः संबंधि सुम्नं सुखमीमहे। याचामहे ॥

॥ अथ दशमी ॥

उत नो गोषणिं धियमश्वसां वाजसामुत। नृवत्कृणुहि वीतये ॥१०॥
उत। नः। गोऽसनिं। धियं। अश्वऽसां। वाजऽसां। उत। नृऽवत्। कृणुहि। वीतये ॥१०॥

उतापि च हे पूषन् गोषणिं गवां सनित्रीमश्वसामश्वानां सनित्रीं वाजसां वाजानामन्नानां सनित्रीमुतापि च नृवत् नृवतीं नृणां वनित्रीं दात्रीमेवंभूतां धियं बुद्धिं कर्म वा नोऽस्माकं वीतये खादनायोपभोगार्थं कृणुहि। कुरु ॥

॥ इति चतुर्थस्याष्टमेऽष्टादशो वर्गः ॥

* सं पूषन्निति दशर्चं पंचमं सूक्तं भरद्वाजस्यार्षं पौष्णं गायत्रं। सं पूषन्नित्यनुक्रांतं ॥ नष्टधनमन्विच्छता पुरुषेणैतज्जप्यं। सूत्रितं च। सं पूषन्विदुषेति नष्टमधिजिगमिषन्मूळ्हो वा। गृ० सू० ३.७.। इति ॥

॥ तत्र प्रथमा ॥

सं पूषन्विदुषा नय यो अंजसानुशासति । य एवेदमिति ब्रवत् ॥१॥

सं । पूषन् । विदुषा । नय । यः । अंजसा । अनुऽशासति । यः । एव । इदं । इति । ब्रवत् ॥१॥

हे पूषन् पोषक देव विदुषा जानता तेन जनेन संनय अस्मान् संगमय यो विद्वानंजसा ऋजुमार्गेणानुशासति अनुशास्ति नष्टद्रव्यप्राप्त्युपायमुपदिशति । यश्चैवेवमिदं नष्टं भवदीयं धनमिति ब्रवत् ब्रवीति । नष्टं धनं दर्शयतीत्यर्थः । तेन विदुषेत्यन्वयः ॥

॥ अथ द्वितीया ॥

समु पूष्णा गमेमहि यो गृहाँ अभिशासति । इम एवेति च ब्रवत् ॥२॥

सं । ऊं इति । पूष्णा । गमेमहि । यः । गृहान् । अभिऽशासति । इमे । एव । इति । च । ब्रवत् ॥२॥

पूष्णानुगृहीता वयं संगमेमहि तेन जनेन संगच्छेमहि यो जनो गृहान् येषु गृहेष्वस्मदीया नष्टाः पशवस्तिष्ठंति तान् गृहानभिशासति अभिशास्ति आभिमुख्येन बोधयति । यश्चेमे त्वदीया नष्टाः पशव एवेवं तिष्ठंतीति च ब्रवत् ब्रूयात् ॥

॥ अथ तृतीया ॥

पूष्णश्चक्रं न रिष्यति न कोशोऽव पद्यते । नो अस्य व्यथते पविः ॥३॥

पूष्णः । चक्रं । न । रिष्यति । न । कोशः । अव । पद्यते । नो इति । अस्य । व्यथते । पविः ॥३॥

पूष्णः पोषकस्य देवस्य चक्रमायुधं न रिष्यति । न विनश्यति । अस्य चक्रस्य कोशश्च नावपद्यते । न हीयते । अस्य पविर्धारा च नो नैव व्यथते । कुंठीभवति । तेन चक्रेण चोरान्हत्वास्मदीयं धनं प्रकाशयेति भावः ॥

॥ अथ चतुर्थी ॥

यो अस्मै हविषाविधन्न तं पूषापि मृष्यते । प्रथमो विंदते वसु ॥४॥

यः । अस्मै । हविषा । अविधत् । न । तं । पूषा । अपि । मृष्यते । प्रथमः । विंदते । वसु ॥४॥

यो यजमानोऽस्मै पूष्णे हविषा चरुपुरोडाशादिनाविधत् परिचरति तं यजमानं पूषा नापि मृष्यते । अपिशब्द ईषदर्थे । ईषदपि न हिनस्ति । स च प्रथमो मुख्यः सन् वसु धनं विंदते । लभते ॥

॥ अथ पंचमी ॥

पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजं सनोतु नः ॥५॥

पूषा । गाः । अनु । एतु । नः । पूषा । रक्षतु । अर्वतः । पूषा । वाजं । सनोतु । नः ॥५॥

पूषा पोषको देवो नोऽस्मदीया गा अन्वेतु । रक्षणार्थमनुगच्छतु । स च पूषार्वतोऽश्वान्रक्षतु चोरेभ्यः । तथा वाजमन्नं च नोऽस्मभ्यं पूषा सनोतु । प्रयच्छतु ॥

॥ इति चतुर्थस्याष्टम एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः । अस्माकं स्तुवतामुत ॥६॥

पूषन् । अनु । प्र । गाः । इहि । यजमानस्य । सुन्वतः । अस्माकं । स्तुवतां । उत ॥६॥

हे पूषन् सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य गाः पशूननुप्रेहि । रक्षणार्थमनुगच्छ । उतापि च स्तुवतां त्वद्विषयं स्तोत्रं कुर्वतामस्माकं गाश्चानुगच्छ ॥

॥ अथ सप्तमी ॥

माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे । अथारिष्टाभिरा गहि ॥७॥

माकिः । नेशत् । माकीं । रिषत् । माकीं । सं । शारि । केवटे । अथ । अरिष्टाभिः । आ । गहि ॥७॥

हे पूषन् अस्मदीयं गोधनं माकिर्नेशत् । मा नश्यतु । माकिर्माकीमित्येतौ प्रतिषेधमात्रे वर्तेते । माकीं रिषत् । मा व्याघ्रादिभिर्हिंस्यतां । माकीं मा च केवटे कूपे संशारि । संशीर्णं भूत् । कूपपातेनापि हिंसितं मा भवतु । अथैवं सत्यरिष्टाभिरहिंसिताभिर्गोभिः सहागहि । सायंकाल आगच्छ ॥

॥ अथाष्टमी ॥

शृण्वंतं पूषणं वयमिर्यमनष्टवेदसं । ईशानं राय ईमहे ॥८॥

शृण्वंतं । पूषणं । वयं । इर्यं । अनष्टऽवेदसं । ईशानं । रायः । ईमहे ॥८॥

अस्मत्स्तोत्राणि शृण्वंतमिर्यं दारिद्र्यस्य प्रेरकमनष्टवेदसमविनष्टधनमीशानं सर्वस्येश्वरमेवंविधं पूषणं देवं वयं रायो धनानीमहे । याचामहे ॥

चातुर्मास्येषु वैश्वदेवे पर्वणि पौष्णस्य हविषः पूषन्तव व्रत इत्येषानुवाक्या। सूत्रितं च। वाममद्य सवितर्वाममु श्वः पूषन्तव व्रते वयं। आ० २.१६.। इति ॥

॥ सैषा सूक्ते नवमी ॥

पूषन्तव व्रते वयं न रिष्येम कदा चन। स्तोतारस्त इह स्मसि ॥९॥

पूषन्। तव। व्रते। वयं। न। रिष्येम। कदा। चन। स्तोतारः। ते। इह। स्मसि ॥९॥

हे पूषन् पोषक ते त्वदीये व्रते कर्मणि वर्तमाना वयं कदा चन कदाचिदपि न रिष्येम। हिंसिता न भवेम। तादृशाश्च वयमिहास्मिन्कर्मणि ते तव स्तोतारः स्मसि। स्मः। भवामः ॥

॥ अथ दशमी ॥

परि पूषा परस्ताद्धस्तं दधातु दक्षिणं। पुनर्नो नष्टमाजतु ॥१०॥

परि। पूषा। परस्तात्। हस्तं। दधातु। दक्षिणं। पुनः। नः। नष्टं। आ। अजतु ॥१०॥

पूषा पोषको देवः परस्तात्परस्मिन्देशे सुसंचारादन्यस्मिन् चोरव्याघ्रादिभिरुषिते देशे गच्छतो गोधनस्य निवारणाय स्वकीयं दक्षिणं हस्तं परिदधातु। परिधानं निवारकं करोतु। नोऽस्मदीयं नष्टं च गोधनं पुनराजतु। आगच्छतु। आगमयतु ॥

॥ इति चतुर्थस्याष्टमे विंशो वर्गः ॥

एहि वामिति षड्टचं षष्ठं सूक्तं भरद्वाजस्यार्षं गायत्रं पौष्णं। अनुक्रम्यते च। एहि वां षडिति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

एहि वां विमुचो नपादाघृणे सं सचावहै। रथीर्ऋतस्य नो भव ॥१॥

आ। इहि। वां। विऽमुचः। नपात्। आघृणे। सं। सचावहै। रथीः। ऋतस्य। नः। भव ॥१॥

हे विमुचो नपात्। विमुंचति सृष्टिकाले स्वसकाशात्सर्वाः प्रजा विसृजतीति विमुक् प्रजापतिः। तस्य पुत्राघृण आगतदीप्ते पूषन् वां। वाति गच्छति स्तुतिं प्राप्नोतीति वा स्तोता ॥ वा गतिगंधनयोरित्यस्मादातो मनिन्क्वनिब्वनिपश्चेति विच् ॥ वां गंतारं स्तोतारं मामेहि। आगच्छ। आवां च संसचावहै। समयाव। संगच्छावहै।

तादृशस्त्वं नोऽस्माकमृतस्य यज्ञस्य रथी रंहिता नेता भव। तथा सति तवत्यं हविस्त्वयापि लभ्यत इत्यर्थः ॥

॥ अथ द्वितीया ॥

रथीतमं कपर्दिनमीशानं राधसो महः। रायः सखायमीमहे ॥२॥

रथिऽतमं। कपर्दिनं। ईशानं। राधसः। महः। रायः। सखायं। ईमहे ॥२॥

रथीतममतिशयेन रथिनं। यद्वातिशयेन रंहितारं नेतारं कपर्दिनं। कपर्दश्चूडा। तद्वंतं। राध्नोत्यनेनेति राधो धनं। महो महतो राधसो धनस्येशानं स्वामिनं सखायमस्माकं मित्रमेवंविधं पूषणं रायो धनानीमहे। याचामहे ॥

॥ अथ तृतीया ॥

रायो धारास्याघृणे वसो राशिरजाश्व। धीवतोधीवतः सखा ॥३॥

रायः। धारा। असि। आघृणे। वसोः। राशिः। अजऽअश्व। धीवतःऽधीवतः। सखा ॥३॥

हे आघृण आगतदीप्ते पूषन् रायो धनस्य धारासि। प्रवाहो भवसि। स्तोतृभ्यो बहु धनं नैरंतर्येण प्रयच्छसीत्यर्थः। अजाश्व। अजाश्छागा एवाश्वा अश्वकार्यापन्ना यस्य तादृश पूषन् वसोर्वसुनो धनस्य राशिः संघश्च भवसि। धनसंघश्च त्वय्येव निवसतीत्यर्थः। धीवतो धीवतः सर्वस्य स्तोत्रवतः पुरुषस्य सखा मित्रभूतश्च भवसि ॥

॥ अथ चतुर्थी ॥

पूषणं न्व१जाश्वमुप स्तोषाम वाजिनं। स्वसुर्यो जार उच्यते ॥४॥

पूषणं। नु। अजऽअश्वं। उप। स्तोषाम। वाजिनं। स्वसुः। यः। जारः। उच्यते ॥४॥

अजाश्वं छागवाहनं वाजिनमन्नवंतं बलवंतं वा पूषणं पोषकं देवं नु अद्योपस्तोषोम। उपस्तवाम। यः पूषा स्वसुरुषसो जार उपपतिरित्युच्यते तं पूषणमित्यन्वयः ॥

॥ अथ पंचमी ॥

मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः। भ्रातेंद्रस्य सखा मम ॥५॥

मातुः। दिधिषुं। अब्रवं। स्वसुः। जारः। शृणोतु। नः। भ्राता। इंद्रस्य। सखा। मम ॥५॥

मातुर्निर्मोच्या रात्रेर्दिधिषुं पतिं पूषणमब्रवं । स्तौमि । स्वसुरुषसो जारश्च पूषा नोऽस्माकं स्तोत्राणि शृणोतु । इंद्रस्य भ्राता सहजातः पूषा मम स्तोतुः सखा मित्रभूतोऽस्तु ॥

॥ अथ षष्ठी ॥

आजासः पूषणं रथे निशृंभास्ते जनश्रियं । देवं वहंतु बिभ्रतः ॥ ६॥

आ । अजासः । पूषणं । रथे । निऽशृंभाः । ते । जनऽश्रियं । देवं । वहंतु । बिभ्रतः ॥ ६॥

अजासोऽजाश्छागा निशृंभा निश्रथ्य संबध्य हर्तारस्ते पूष्णो वाहनतया प्रसिद्धाश्छागा जनश्रियं । जनं स्तोतृसंघं श्रयति गच्छतीति जनश्रीः । तं पूषणं देवं रथे बिभ्रतो धारयंत आवहंतु । आनयंतु ॥

॥ इति चतुर्थस्याष्टम एकविंशो वर्गः ॥

य एनमिति षडृचं सप्तमं सूक्तं भरद्वाजस्यार्षं पौष्णं । अंत्यानुष्टुबादौ पंच गायत्र्यः । तथा चानुक्रांतं । य एनमंत्यानुष्टुबिति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

य एनमादिदेशति करंभादिति पूषणं । न तेन देव आदिशे ॥ १॥

यः । एनं । आऽदिदेशति । करंभऽअत् । इति । पूषणं । न । तेन । देवः । आऽदिशे ॥ १॥

यः स्तोतैनं पूषणं पोषकं करंभात्करंभानां घृतमिश्रानां यवसक्तूनामत्तेत्यादिदेशति अभिष्टौति तेन पुरुषेणान्यो देवो नादिशे । आदेष्टव्यः स्तोतव्यो न भवति । पूष्ण एव सर्वस्याभिमतस्य धनस्य लाभात् देवतांतरं न स्तौतीत्यर्थः ॥

॥ अथ द्वितीया ॥

उत घा स रथीतमः सख्या सत्पतिर्युजा । इंद्रो वृत्राणि जिघ्नते ॥ २॥

उत । घ । सः । रथिऽतमः । सख्या । सत्ऽपतिः । युजा । इंद्रः । वृत्राणि । जिघ्नते ॥ २॥

उत घापि च स यः शत्रूणां हंतृत्वेन प्रसिद्धस्तादृशो रथीतमोऽतिशयेन रथी महारथः सत्पतिः सतां पालयितैवंगुण इंद्रः सख्या मित्रभूतेन पूष्णा युजा सहायभूतेन युक्तः सन् वृत्राणि शत्रून् जिघ्नते । हंति । इंद्रस्याप्ययमेव साहाय्यकारीत्यर्थः ॥

॥ अथ तृतीया ॥

उतादः परुषे गवि सूरश्चक्रं हिरण्ययं। न्यैरयद्रथीतमः ॥३॥

उत। अदः। परुषे। गवि। सूरः। चक्रं। हिरण्ययं। नि। ऐरयत्। रथिऽतमः ॥३॥

उतापि च सूरः प्रेरको रथीतमोऽतिशयेन रथी नेतृतमो वा पूषा परुषे परुष्मति पर्ववति भास्वति वा गवि। गच्छतीति गौरादित्यः। तस्मिन् हिरण्ययं हिरण्मयं सुवर्णनिर्मितमदस्तद्रथस्य चक्रं न्यैरयत्। नितरां प्रेरयति स्म ॥

॥ अथ चतुर्थी ॥

यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मंतुमः। तत्सु नो मन्म साधय ॥४॥

यत्। अद्य। त्वा। पुरुऽस्तुत। ब्रवाम। दस्र। मंतुऽमः। तत्। सु। नः। मन्म। साधय ॥४॥

हे पुरुष्टुत बहुभिर्यजमानैः स्तुत दस्र दर्शनीय मंतुमो ज्ञानवन् पूषन् अद्येदानीं यदुद्दिश्य त्वां ब्रवाम स्तवाम नोऽस्माकं मन्म मननीयं तद्धनं साधय। उत्पादय ॥

॥ अथ पंचमी ॥

इमं च नो गवेषणं सातये सीषधो गणं। आरात्पूषन्नसि श्रुतः ॥५॥

इमं। च। नः। गोऽएषणं। सातये। सीसधः। गणं। आरात्। पूषन्। असि। श्रुतः ॥५॥

हे पूषन् नोऽस्माकं सातये लाभायेमं च गणं मनुष्यसंघं गवेषणं गवामेषयितारं सीषधः। साधय। हे पूषन् आरात् दूरदेशेऽपि त्वं श्रुतो विश्रुतः प्रख्यातोऽसि। भवसि ॥

॥ अथ षष्ठी ॥

आ ते स्वस्तिमीमह आरेअघामुपावसुं।
अद्या च सर्वतातये श्वश्च सर्वतातये ॥६॥

आ। ते। स्वस्तिं। ईमहे। आरेऽअघां। उपऽवसुं।
अद्य। च। सर्वऽतातये। श्वः। च। सर्वऽतातये ॥६॥

हे पूषन् ते त्वदीयां त्वया देयां स्वस्तिं कल्याणीं रक्षामारेअघां। आरे दूरेऽघं पापं यस्यास्तादृशीं। उपावसुमुपगतधनां। ईदृशीं स्वस्तिमद्य चास्मिंश्च काले

सर्वतातये । सर्वैर्ऋत्विग्भिस्तायत इति सर्वतातिर्यज्ञः । तदर्थं । यद्वा सर्वेषां भोगानां विस्ताराय । श्वश्च परस्मिन्नपि दिने सर्वतातये सर्वदा सर्वतात्यर्थमेमहे । अभियाचामहे ॥

॥ इति चतुर्थस्याष्टमे द्वाविंशो वर्गः ॥

इंद्रा नु पूषणेति षडृचमष्टमं सूक्तं भरद्वाजस्यार्षं गायत्रमैंद्रापौष्णं । अनुक्रांतं च । इंद्रा न्विंद्रं चेति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

इंद्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये ॥१॥

इंद्रा । नु । पूषणा । वयं । सख्याय । स्वस्तये । हुवेम । वाजऽसातये ॥१॥

इतरेतरयोगादिंद्रपूषन्शब्दयोरुभयत्र द्विवचनं । इंद्रापूषणौ देवौ नु अद्य च वयं स्वस्तये सख्याय शोभनाय सखित्वाय वाजसातये वाजस्यान्नस्य बलस्य वा सातये संभजनाय च हुवेम । आह्वयाम । स्तवाम ॥

॥ अथ द्वितीया ॥

सोममन्य उपासदत्पातवे चम्वोः सुतं । करंभमन्य इच्छति ॥२॥

सोमं । अन्यः । उप । असदत् । पातवे । चम्वोः । सुतं । करंभं । अन्यः । इच्छति ॥२॥

चम्वोरधिषवणफलकयोः सुतमभिषुतं सोममन्योऽनयोरेकतर इंद्रः पातवे पातुमुपासदत् । उपसीदति । उपगच्छति । अन्य एकतरः पूषा करंभं घृतसिक्तं सक्त्वात्मकं हविर्भक्षयितुमिच्छति ॥

॥ अथ तृतीया ॥

अजा अन्यस्य वह्नयो हरी अन्यस्य संभृता । ताभ्यां वृत्राणि जिघ्नते ॥३॥

अजाः । अन्यस्य । वह्नयः । हरी इति । अन्यस्य । संऽभृता । ताभ्यां । वृत्राणि । जिघ्नते ॥३॥

अनयोरिंद्रापूष्णोरन्यस्यैकस्य पूष्णोऽजाश्छागा वह्नयो वाहका अश्वाः । अन्यस्यापरस्येंद्रस्य संभृता संभृतौ सम्यक् पुष्टौ हरी एतत्संज्ञावश्वौ वाहकौ । स चेंद्रस्ताभ्यां वृत्राणि शत्रून् जिघ्नते । हंति ॥

॥ अथ चतुर्थी ॥

यदिंद्रो अनयद्रितो महीरपो वृषन्तमः । तत्र पूषाभवत्सचा ॥४॥

यत् । इंद्रः । अनयत् । रितः । महीः । अपः । वृषन्ऽतमः । तत्र । पूषा । अभवत् । सचा ॥४॥

यद्यदा वृषंतमोऽतिशयेन वर्षितेंद्रो रितो गंत्रीर्महीर्महतीरपो वृष्ट्युदकान्यनयत् इमं लोकं प्रापयति तत्र तदानीं पूषा पोषको देवः सचाभवत् । अस्येंद्रस्य सहायो भवति ॥

॥ अथ पंचमी ॥

तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव । इंद्रस्य चा रभामहे ॥५॥

तां । पूष्णः । सुऽमतिं । वयं । वृक्षस्य । प्र । वयांऽइव । इंद्रस्य । च । आ । रभामहे ॥५॥

पूष्णः पोषकस्य देवस्येंद्रस्य च तां प्रसिद्धां सुमतिं कल्याणीं मतिमनुग्रहबुद्धिं वृक्षस्य महीरुहस्य प्र वयां प्रकृष्टां दृढां शाखामिव वयमारभामहे । अवलंबामहे । आश्रयामह इत्यर्थः ॥

॥ अथ षष्ठी ॥

उत्पूषणं युवामहेऽभीशूँरिव सारथिः । मह्या इंद्रं स्वस्तये ॥६॥

उत् । पूषणं । युवामहे । अभीशून्ऽइव । सारथिः । मह्यै । इंद्रं । स्वस्तये ॥६॥

पूषणं पोषकं देवमिंद्रं च मह्यै महत्यै स्वस्तये रक्षार्थमुद्युवामहे । उद्योजयामः । उद्योजनमाकर्षणं । तत्र दृष्टांतः । सारथिः सूतोऽभीशूनिव । अभीशून्रश्मीनश्वबंधनार्थान्यथाकर्षति तद्वत् ॥

॥ इति चतुर्थस्याष्टमे त्रयोविंशो वर्गः ॥

शुक्रं त इति चतुर्ऋचं नवमं सूक्तं भरद्वाजस्यार्षं पौष्णं । द्वितीया जगती शिष्टास्त्रिष्टुभः । तथा चानुक्रांतं । शुक्रं चतुष्कं द्वितीया जगतीति ॥ वैश्वदेवे पर्वणि वैश्वदेवस्य हविषः शुक्रं त इति याज्या । सूचितं च । शुक्रं ते अन्यद्यजतं ते अन्यदिहेह वः स्वतवसः । आ० २. १६. । इति ॥ एकादशिनस्य पौष्णस्य पशोर्वपाया एषैव याज्या । सूचितं च । शुक्रं ते अन्यद्यजतं ते अन्यत्प्रपथे पथामजनिष्ट पूषा । आ० ३. ७. । इति ॥ अमाभिष्टवेऽप्येषा । सूचितं च । शुक्रं ते अन्यद्यजतं ते अन्यदपश्यं गोपामनिपद्यमानं । आ० ४. ६. । इति ॥

॥ सैषा प्रथमा ॥

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥१॥

शुक्रं । ते । अन्यत् । यजतं । ते । अन्यत् । विषुरूपे इति विषुऽरूपे । अहनी इति ।
द्यौःऽइव । असि ।
विश्वाः । हि । मायाः । अवसि । स्वधाऽवः । भद्रा । ते । पूषन् । इह । रातिः । अस्तु ॥१॥

हे पूषन् ते तव शुक्रं शुक्लवर्णमन्यदेकमहर्भवति वासरात्मकं । तथा ते तव संबंधि यजतं । यजिरत्र संगतिकरणे वर्तते । यजनीयं प्रकाशेन संगमनीयं स्वतः कृष्णवर्णमन्यदेकमहर्भवति राच्याख्यं । इत्थं विषुरूपे शुक्लकृष्णतया नानारूपे अहनी तव महिम्ना निष्पद्येते । यद्वा हे पूषन् त्वदीयमन्यदेकं रूपं शुक्रं निर्मलं दिवसस्योत्पादकं । त्वदीयमन्यदेकं रूपं यजतं केवलं यजनीयं न प्रकाशकं रात्रेरुत्पादकं । अत एव विषुरूपे विषमरूपे अहनी अहश्च रात्रिश्च भवतः । अहोरात्रयोर्निर्माणे सूर्य एव कर्ता कथमस्य प्रसक्तिरिति तत्राह । द्यौरिवासि । यथा द्यौरादित्यः प्रकाशयिता तथा त्वं प्रकाशकोऽसि । कुत इत्यत आह । हे स्वधावोऽन्नवन्पूषन् विश्वाः सर्वा मायाः प्रज्ञा हि यस्मात्कारणादवसि रक्षसि अतः कारणात्त्वं सूर्य इव भवसीत्यर्थः । तादृशस्य ते तव भद्रा कल्याणी रातिर्दानमिहास्मास्वस्तु । भवतु ॥ यास्कस्त्वाह । शुक्रं ते अन्यल्लोहितं ते अन्यद्यज्ञियं ते अन्यदयज्ञियं ते अन्यदिति वा विषमरूपे अहनी कर्मणा द्यौरिव चासि । सर्वाणि च प्रज्ञानान्यवस्यन्नवन् । नि० १२. १७. । इति ॥

॥ अथ द्वितीया ॥

अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ॥
अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षाणो भुवना देव ईयते ॥२॥

अजऽअश्वः । पशुऽपाः । वाजऽपस्त्यः । धियंऽजिन्वः । भुवने । विश्वे । अर्पितः ।
अष्ट्रां । पूषा । शिथिरां । उत्ऽवरीवृजत् । संऽचक्षाणः । भुवना । देवः । ईयते ॥२॥

अजाश्वश्छागवाहनः पशुपाः पशूनां पालयिता वाजपस्त्यः । वाजा अन्नानि पस्त्ये गृहे यस्य तादृशः । धियंजिन्वः । धियः स्तोतारः कर्माणि वा । तेषां प्रीण-

यिता विश्वे विश्वस्मिन् सर्वस्मिन् भुवने लोकेऽर्पितः प्रजापतिना पोषकत्वेन स्थापितः । अत एवंभूतः पूषा पोषको देवोऽष्ट्रामारां स्वहस्तगतां शिथिरां शिथिलां सतीमुद्वरीवृजत् उद्यच्छन् भुवना भुवनानि सर्वान् लोकान् भूतजातानि वा संचक्षाणः संपश्यन् सूर्यात्मना प्रकाशयन् ईयते । नभसि गच्छति ॥

पौष्णस्य पशोर्वपापुरोडाशयोर्यास्ते पूषन्नित्यादिके द्वे ऋचावनुवाक्ये।सूचितं च। यास्ते पूषन्नावो अंतः समुद्र इति द्वे पूषेमा आशा अनु वेद सर्वाः।आ॰ ७.३.। इति॥

॥ तयोः प्रथमा सूक्ते तृतीया ॥

यास्ते पूषन्नावो अंतः समुद्रे हिरण्ययीरंतरिक्षे चरंति ।
ताभिर्यासि दूत्यं सूर्यस्य कामेन कृत श्रव इच्छमानः ॥३॥
याः । ते । पूषन् । नावः । अंतरिति । समुद्रे । हिरण्ययीः । अंतरिक्षे । चरंति ।
ताभिः । यासि । दूत्यं । सूर्यस्य । कामेन । कृत । श्रवः । इच्छमानः ॥३॥

हे पूषन् ते त्वदीया या हिरण्ययीर्हिरण्मय्यो हितरमणीया नावः समुद्र उदधावंतर्मध्येऽंतरिक्षे नभसि चरंति संचरंति ताभिर्नौभिः सूर्यस्य दूत्यं यासि । गच्छसि । कदाचिद्देवैः सार्धं सूर्येऽसुरवधार्थं प्रस्थिते सति तस्य भार्या स्वभर्तरि संजातोत्सुका बभूव तां प्रति सूर्यः पूषणं प्राहैषीत् तेन चात्र पूषा स्तूयते । अपि च त्वं श्रवो हविर्लक्षणमन्नमिच्छमान इच्छन् कामेन पश्वादिविषयेण स्तोतृभिः कृतो वशीकृतोऽसि ॥

॥ अथ चतुर्थी ॥

पूषा सुबंधुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वंचं ॥४॥
पूषा । सुऽबंधुः । दिवः । आ । पृथिव्याः । इळः । पतिः । मघऽवा । दस्मऽवर्चाः ।
यं । देवासः । अददुः । सूर्यायै । कामेन । कृतं । तवसं । सुऽअंचं ॥४॥

पूषा पोषको देवो दिव आ द्युलोकस्य च पृथिव्याश्च सुबंधुः शोभनो बंधुर्भवति । तथेळस्पतिरिळाया अन्नस्य पतिर्मघवा । मघमिति धननाम । तद्वान् । यद्वा मंहतेर्दानकर्मणो भावसाधनो मघशब्दः । दानवान् दस्मवर्चाः । वर्च इति रूपनाम । दस्मं दर्शनीयं वर्चो यस्य तादृशः । यं पूषणं देवासः सर्वे देवाः सूर्यायै

सूर्यस्य पत्न्यै यद्वा सावित्र्यै सूर्याख्याया अश्विनोर्वरणायाददुः दत्तवंतः । पुत्रः पितरावववृणीत पूषा । ऋग्वे॰ १०. ८५. १४. । इति हि श्रूयते । कीदृशं पूषणं । कामेन पश्वादिविषयेण कृतं स्तोतृभिर्वशीकृतं तवसं बलवंतं प्रवृद्धं वा स्वंचं स्वंचनं सुष्ठु गच्छंतं । एवंविधं यं पूषणं ददुः स पूषा सुबंधुरित्यन्वयः ॥

॥ इति चतुर्थस्याष्टमे चतुर्विंशो वर्गः ॥

प्र नु वोचेति दशर्चं दशमं सूक्तं भरद्वाजस्यार्षमिंद्राग्निदेवताकं । सप्तम्याद्याश्चतस्रोऽनुष्टुभः शिष्टाः षट् बृहत्यः । तथा चानुक्रांतं । प्र नु दशैंद्राग्नं तु बार्हतं चतुरनुष्टुबंतमिति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र नु वो॑चा सु॒तेषु॑ वां वी॒र्या॒३॒॑ यानि॑ च॒क्रथुः॑ ।
ह॒तासो॑ वां पि॒तरो॑ दे॒वश॑त्रव॒ इंद्रा॑ग्नी॒ जीव॑थो यु॒वं ॥१॥
प्र । नु । वो॒च॒ । सु॒तेषु॑ । वां॒ । वी॒र्या॑ । यानि॑ । च॒क्रथुः॑ ।
ह॒तासः॑ । वां॒ । पि॒तरः॑ । दे॒वऽश॑त्रवः । इंद्रा॑ग्नी॒ इति॑ । जीव॑थः । यु॒वं ॥१॥

हे इंद्राग्नी यानि वीर्याणि वीरकर्माणि चक्रथुः कृतवंतौ युवां सुतेष्वभिषुतेषु सोमेष्वस्मद्यज्ञे वां युवयोस्तानि वीर्याणि नु क्षिप्रं प्रवोच । प्रवोचं । प्रब्रवीमि । तदेव वीर्यं दर्शयति । हे इंद्राग्नी देवशत्रवः । देवाः शत्रवः शातयितारो येषां तादृशाः । असुराः पितरो हिंसकाः ॥ पीयतिर्हिंसाकर्मा । तस्यैतद्रूपं ॥ ईदृशा असुरा वां युवाभ्यां हतासो हता आसन् । युवं युवां तु जीवथः । जीवनवंतौ भवथः । असुरैर्न बाधिताविति यावत् ॥

॥ अथ द्वितीया ॥

बळि॒त्था म॑हि॒मा वा॒मिंद्रा॑ग्नी॒ पनि॑ष्ठ॒ आ ।
स॒मा॒नो वां॑ ज॒नि॒ता भ्रात॑रा यु॒वं य॒मावि॒हेह॑मातरा ॥२॥
बट् । इ॒त्था । म॒हि॒मा । वां॒ । इंद्रा॑ग्नी॒ इति॑ । पनि॑ष्ठः । आ ।
स॒मा॒नः । वां॒ । ज॒नि॒ता । भ्रात॑रा । यु॒वं । य॒मौ । इ॒हेह॑ऽमातरा ॥२॥

हे इंद्राग्नी वां युवयोर्महिमा महत्त्वमित्थेत्थमनेन प्रकारेण बट् सत्यं । युष्मद्विषयं यज्जन्ममहत्त्वं प्रतिपाद्यते तत्सर्वं यथार्थमित्यर्थः । पनिष्ठ आ पनिष्ठः

स्तुत्यतमश्च प्रजापतिः समान एक एव वां युवयोर्जनिता जनयिता। अतो युवं युवां भ्रातरा भ्रातरौ स्थः। अपि च यमौ यमलौ सहोत्पन्नाविहेहमातरा। इह चेह च सर्वत्र माता ययोस्तादृशौ स्थः। अदितिर्ह्यनयोर्माता सैव विस्तीर्णा भूमिरितीहेहमातराविति श्रूयते ॥

॥ अथ तृतीया ॥

ओकिवांसा सुते सचाँ अश्वा सप्ती इवादने ।
इंद्रा न्व१ग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥३॥
ओकिऽवांसा। सुते। सचा। अश्वा। सप्ती इवेति सप्तीऽइव। आदने।
इंद्रा। नु। अग्नी इति। अवसा। इह। वज्रिणा। वयं। देवा। हवामहे ॥३॥

हे इंद्राग्नी सुतेऽभिषुते सोमे युवां सचा सहौकिवांसौकिवांसौ समवेतौ संगतौ भवतं ॥ उच समवाय इत्यस्यैतद्रूपं ॥ तत्र दृष्टांतः। आदने भक्षणीये घासे सप्ती इवाश्वा सर्पणशीलावश्वाविव। नु अद्य वयं तादृशाविंद्राग्नी इहास्मिन्यज्ञेऽवसा रक्षणेन हेतुना हवामहे। आह्वयामहे ॥ इतरेतरयोगादिंद्रशब्देऽग्निशब्दे च द्विवचनं ॥ कीदृशाविंद्राग्नी। वज्रिणा वज्रिणावायुधोपेतौ देवा दानादिगुणयुक्तौ ॥

॥ अथ चतुर्थी ॥

य इंद्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ।
जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ॥४॥
यः। इंद्राग्नी इति। सुतेषु। वां। स्तवत्। तेषु। ऋतऽवृधा।
जोषऽवाकं। वदतः। पज्रऽहोषिणा। न। देवा। भसथः। चन ॥४॥

हे ऋतावृधा ऋतस्य सत्यस्य यज्ञस्य वा वर्धयिताराविंद्राग्नी सुतेष्वभिषुतेषु सोमेषु यः स्तोता वां युवां स्तवत् कुत्सितं स्तूयात् तेषु सोमेषु मध्ये जोषवाकं वदतो जोषं जोषयितव्यं प्रीतिहेतुत्वेन कर्तव्यं स्वयमप्रीतिकरं तादृशं वाकं वाक्यं वदतस्तस्य स्तोतुः सोमं हे पज्रहोषिणा पज्रः प्रार्जितः प्रसिद्धो होषो घोषः स्तोत्रं ययोस्तादृशौ हे देवौ युवां न भसथः। न भक्षयथः। चनेति पादपूरणः ॥ अत्र निरुक्तं। जोषवाकमित्यविज्ञातनामधेयं जोषयितव्यं भवति। य इंद्राग्नी

सुतेषु वां सोमेषु स्तौति तेषृतस्य वर्धयितारौ न तस्याश्नीयः। योऽयं जोषवाकं वदति विजंजपः प्रार्जितहोषिणौ देवौ न तस्याश्नीयः। नि॰ ५. २२.। इति ॥

॥ अथ पंचमी ॥

इंद्राग्नी को अस्य वां देवौ मर्तश्चिकेतति।
विषूचो अश्वान्युयुजान ईयत एकः समान आ रथे ॥ ५॥
इंद्राग्नी इति। कः। अस्य। वां। देवौ। मर्तः। चिकेतति।
विषूचः। अश्वान्। युयुजानः। ईयते। एकः। समाने। आ। रथे ॥ ५॥

हे देवौ द्योतमानाविंद्राग्नी वां युवयोरस्येदं कर्म को मर्तो मनुष्यश्चिकेतति। जानीयात्। न कोऽपीत्यर्थः। किं तत्कर्म। विषूचो नानांचतो गच्छतोऽश्वान् समान उभयार्थ एकस्मिन्रथे युवयोरेक इंद्रः सूर्यात्मना वर्तमानो युयुजानस्ता-दृशानश्वान्योजयन् एयते। सर्वं जगदभिगच्छति। यद्वा विषूचो नानारूपानश्वान् व्यापकान् समान एकरूपे रथे संवत्सरात्मके युयुजानो योजयन् युवयोरेकः सूर्यात्मेंद्र एयते। आगच्छति। एतद्युवयोः कर्म को यथावज्जानीयादित्यर्थः ॥

॥ इति चतुर्थस्याष्टमे पंचविंशो वर्गः ॥

॥ अथ षष्ठी ॥

इंद्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः।
हित्वी शिरो जिह्वया वावदच्चरत्त्रिंशत्पदा न्यक्रमीत् ॥ ६॥
इंद्राग्नी इति। अपात्। इयं। पूर्वा। आ। अगात्। पत्ऽवतीभ्यः।
हित्वी। शिरः। जिह्वया। वावदत्। चरत्। त्रिंशत्। पदा। नि। अक्रमीत् ॥ ६॥

हे इंद्राग्नी अपात्पादरहितेयमुषाः पद्वतीभ्यः पादयुक्ताभ्यः सुप्ताभ्यः प्रजाभ्यः पूर्वा प्रथमभाविनी सत्यागात्। आगच्छति। तथा प्राणिनां शिरो हित्वी प्रेरयित्री। यद्वा शिरो हित्वा त्यक्त्वा स्वयमशिरस्का सती। जिह्वया प्राणिस्थया तदीयेन वागिंद्रियेण वावदत् भृशं शब्दं कुर्वती चरत्। एवं चरंत्युषास्त्रिंशत्पदान्यवयवभूतान्त्रिंशन्मुहूर्तान्न्यक्रमीत्। एकेन दिवसेनातिक्रामति। एतच्च युवयोः कर्म। तत्को जानीयादिति पूर्ववान्वयः ॥

॥ अथ सप्तमी ॥

इंद्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः ।
मा नो अस्मिन्महाधने परा वर्क्तं गविष्टिषु ॥ ७ ॥
इंद्राग्नी इति । आ । हि । तन्वते । नरः । धन्वानि । बाह्वोः ।
मा । नः । अस्मिन् । महाऽधने । परा । वर्क्तं । गोऽइष्टिषु ॥ ७ ॥

हे इंद्राग्नी नरो योद्धारो मनुष्या बाह्वोर्हस्तयोर्धन्वानि धनूंष्यातन्वते हि । आततज्यानि कुर्वते हि । युवां चास्मिन्महाधने जेतव्येन महाधनेनोपेते संग्रामे गविष्टिषु गवामन्वेषणेषु नोऽस्मान् मा परावर्क्तं । मा परित्यजतं ॥

॥ अथाष्टमी ॥

इंद्राग्नी तपंति माघा अर्यो अरातयः ।
अप द्वेषांस्या कृतं युयुतं सूर्यादधि ॥ ८ ॥
इंद्राग्नी इति । तपंति । मा । अघाः । अर्यः । अरातयः ।
अप । द्वेषांसि । आ । कृतं । युयुतं । सूर्यात् । अधि ॥ ८ ॥

हे इंद्राग्नी अघा आहंत्र्योऽर्योऽभिगंत्र्योऽरातयः शत्रुसेना मा तपंति । मां बाधंते । ता अपाकृतं । अपाकुरुतं । तथा द्वेषांसि द्वेष्टॄन् शत्रून् सूर्यादधि । अधिः पंचम्यर्थानुवादकः । सूर्यदर्शनाद्युयुतं । पृथक्कुरुतं च । यथा ते सूर्यं न पश्यंति तथा कुरुतं । मारयतमित्यर्थः ॥

॥ अथ नवमी ॥

इंद्राग्नी युवोरपि वसु दिव्यानि पार्थिवा ।
आ न इह प्र यच्छतं रयिं विश्वायुपोषसं ॥ ९ ॥
इंद्राग्नी इति । युवोः । अपि । वसु । दिव्यानि । पार्थिवा ।
आ । नः । इह । प्र । यच्छतं । रयिं । विश्वायुऽपोषसं ॥ ९ ॥

हे इंद्राग्नी युवोर्युवयोर्दिव्यानि दिवि भवानि पार्थिवा पृथिव्यां भवानि लोकद्वयसंबंधीनि वसु वसून्यपिहितानि युवयोरेव वर्तंते । अतः कारणादिहास्मिन्यज्ञे नोऽस्मभ्यं रयिं धनमा अभिप्रयच्छतं । कीदृशं रयिं । विश्वायुपोषसं ।

आयव इति मनुष्यनाम। सर्वेषां मनुष्याणां पोषणाय पर्याप्तं। यद्वा सर्वस्यायुषः पोषणे शक्तं ॥ छांदसो वर्णलोपः ॥

॥ अथ दशमी ॥

इंद्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता ।
विश्वाभिर्गीर्भिरा गतमस्य सोमस्य पीतये ॥१०॥
इंद्राग्नी इति । उक्थऽवाहसा । स्तोमेभिः । हवनऽश्रुता ।
विश्वाभिः । गीःऽभिः । आ । गतं । अस्य । सोमस्य । पीतये ॥१०॥

हे उक्थवाहसोक्थैः स्तुतिभिर्वहनीयौ हे हवनश्रुता हवनस्याह्वानस्य श्रोतारौ एवंभूतौ हे इंद्राग्नी स्तोमेभिः स्तोत्रैर्विश्वाभिः सर्वाभिर्गीर्भिः शस्त्ररूपाभिर्वाग्भिश्च हेतुभूताभिरागतं। आगच्छतं। किमर्थं। अस्यास्मदीयस्य सोमस्य पीतये पानार्थं ॥

॥ इति चतुर्थस्याष्टमे षड्विंशो वर्गः ॥

श्नथद्वृत्रमिति पंचदशर्चमेकादशं सूक्तं भरद्वाजस्यार्षमैंद्राग्नं। आदौ तिस्रस्त्रिष्टुभश्चतुर्थ्याद्या नव गायत्र्यस्त्रयोदशी त्रिष्टुप् चतुर्दशी बृहती पंचदश्यनुष्टुप्। तथा चानुक्रांतं। श्नथत्पंचोना गायत्रं तु त्रित्रिष्टुबादि त्रिष्टुब्बृहत्यनुष्टुबंतमिति ॥ गतः सूक्तविनियोगः ॥ वरुणप्रघासेष्वैंद्राग्नस्य हविषः श्नथदित्येषा याज्या। सूत्रितं च। इंद्राग्नी अवसा गतं श्नथद्वृत्रमुत सनोति वाजं। आ० २.१७.। इति ॥

॥ सैषा प्रथमा ॥

श्नथद्वृत्रमुत सनोति वाजमिंद्रा यो अग्नी सहुरी सपर्यात् ।
इरज्यंता वसव्यस्य भूरेः सहस्तमा सहसा वाजयंता ॥१॥
श्नथत्। वृत्रं। उत। सनोति। वाजं। इंद्रा। यः। अग्नी इति। सहुरी इति। सपर्यात्।
इरज्यंता। वसव्यस्य। भूरेः। सहःऽतमा। सहसा। वाजऽयंता ॥१॥

स पुरुषो वृत्रमावरकं शत्रुं श्नथत्। हिनस्ति। उतापि च वाजमन्नं बलं वा सनोति। लभते। यः पुरुषः सहुरी शत्रूणामभिभविताराविंद्राग्नी सपर्यात् परिचरेत् ॥ इतरेतरयोगादुभयत्र पूर्ववद्विवचनं ॥ कीदृशाविंद्राग्नी। भूरेः प्रभूतस्य वसव्यस्य वसुसमूहस्य ॥ यद्वा स्वार्थिको यत् ॥ धनस्येरज्यंतेशानौ स्वामिनौ ॥

इत्यतिरिच्यर्थकर्मा ॥ सहसा बलेन सहस्तमातिशयेनाभिभवितारौ शत्रूणां वाजयंता वाजं हविर्लक्षणमन्नमात्मन इच्छंतौ । यद्वा वाजं स्तोतृभ्यो दातव्यमन्नं कामयमानौ ॥

॥ अथ द्वितीया ॥

ता योधिष्टमभि गा इंद्र नूनमपः स्वरुषसो अग्न ऊळ्हाः ।
दिशः स्वरुषस इंद्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ॥२॥
ता । योधिष्टं । अभि । गाः । इंद्र । नूनं । अपः । स्वः । उषसः । अग्ने । ऊळ्हाः ।
दिशः । स्वः । उषसः । इंद्र । चित्राः । अपः । गाः । अग्ने । युवसे । नियुत्वान् ॥२॥

हे इंद्र हे अग्ने ता तौ युवां गा अप उदकानि स्वः सूर्यमुषस उषःकालानूळ्हाः पणिभिरपहृता एतान् गवादीनभिलक्ष्य योधिष्टं । तैरसुरैर्युद्धं कृतवंतौ । नूनमिति पादपूरणार्थः । हे इंद्र त्वं दिशः प्राच्याद्याः स्वः सूर्यमुषसश्च चित्राश्चायनीया अप उदकानि च गाश्च पणिभिरपहृतानेतान्युवसे । अनेन लोकेनायोजयः । यद्वासुरैरावृतान्दिगादीनसुरवधेनावरणमपनीय पृथक्कृतवानसीत्यर्थः । हे अग्ने नियुत्वान् नियुद्भिरश्वैर्युक्तः सन् त्वमप्येवमकार्षीरित्यर्थः ॥

ऐंद्राग्नस्य पशोर्वपाया आ वृत्रहणेत्यनुवाक्या । सूत्रितं च । आ वृत्रहणा वृत्रहभिः शुष्मैरा भरतं शिक्षतं वज्रबाहू । आ॰ ३.७. । इति ॥

॥ सैषा तृतीया ॥

आ वृत्रहणा वृत्रहभिः शुष्मैरिंद्र यातं नमोभिरग्ने अर्वाक् ।
युवं राधोभिरकवेभिरिंद्राग्ने अस्मे भवतमुत्तमेभिः ॥३॥
आ । वृत्रऽहना । वृत्रऽहभिः । शुष्मैः । इंद्र । यातं । नमःऽभिः । अग्ने । अर्वाक् ।
युवं । राधःऽभिः । अकवेभिः । इंद्र । अग्ने । अस्मे इति । भवतं । उत्ऽतमेभिः ॥३॥

हे वृत्रहणा वृत्रस्यासुरस्य हंतारौ हे इंद्र हे अग्ने वृत्रहभिर्वृत्रस्य हंतृभिर्वृत्रहननिमित्तैः शुष्मैर्बलैर्नमोभिरस्मभ्यं दातव्यैरन्नैश्च सार्धमर्वागस्मदभिमुखमायातं । आगच्छतं । हे इंद्र हे अग्ने युवं युवामकवेभिरकुत्सितैर्महद्भिरुत्तमेभिरुत्कृष्टतमै राधोभिर्धनैः सहास्मे अस्मासु भवतं । आविर्भवतं ॥

चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे ता हुवे इति षडहस्तोत्रिय-

ऋचः । सूत्रितं च । ता हुवे ययोरिदमियं वामस्य मन्मनः । आ० ७.२. । इति ॥ पृष्ठ्याभिप्लवषडहयोः स्तोमवृद्धौ ता हुव इत्याद्या नवर्चं आवापार्थाः । सूत्रितं च । ता हुवे ययोरिदमिति नवेयं वामस्य मन्मन इत्येकादश । आ० ७.५. । इति ॥

॥ तत्र प्रथमा सूक्ते चतुर्थी ॥

ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतं । इंद्राग्नी न मर्धतः ॥४॥

ता । हुवे । ययोः । इदं । पप्ने । विश्वं । पुरा । कृतं । इंद्राग्नी इति । न । मर्धतः ॥४॥

ता तौ तादृशाविंद्राग्नी हुवे । आह्वये । ययोरिंद्राग्न्योः पुरा पूर्वस्मिन्काले कृतं विश्वं सर्वमिदं पूर्वास्वृक्षु कीर्तितं वीर्यं पप्ने पन्यते ऋषिभिः स्तूयते । ताविंद्राग्नी हुव इत्यन्वयः । तौ चेंद्राग्नी न मर्धतः । स्तोतॄन्न हिंस्तः । अतोऽस्मानप्याहूतौ रक्षतामिति भावः ॥ मर्धतिर्हिंसाकर्मा ॥

॥ अथ पंचमी ॥

उग्रा विघनिना मृध इंद्राग्नी हवामहे । ता नो मृळात ईदृशे ॥५॥

उग्रा । विऽघनिना । मृधः । इंद्राग्नी इति । हवामहे । ता । नः । मृळातः । ईदृशे ॥५॥

उग्रोग्रावुद्गूर्णबलावत एव मृधः शत्रून्विघनिना विघनिनौ विशेषेण हतवंताविंद्राग्नी हवामहे । आह्वयामहे । तौ चेंद्राग्नी ईदृशेऽस्मिन् संग्रामे नोऽस्मान्मृळातः । सुखयतां । यद्वा मृळतिरुपदयाकर्मा । नोऽस्माकं मृळातः । उपदयां कुरुतां ॥

॥ इति चतुर्थस्याष्टमे सप्तविंशो वर्गः ॥

॥ अथ षष्ठी ॥

हतो वृत्राण्यार्या हतो दासानि सत्पती । हतो विश्वा अप द्विषः ॥६॥

हतः । वृत्राणि । आर्या । हतः । दासानि । सत्पती इति सत्ऽपती । हतः । विश्वाः । अप । द्विषः ॥६॥

ताविंद्राग्नी आर्यैः कर्मानुष्ठातृभिः कृतानि वृत्राण्युपद्रवजातानि हतः । हिंस्तः । तथा सत्पती सतां पालयिताराविंद्राग्नी दासानि । दासाः कर्महीनाः शत्रवः । तैः कृतानि चोपद्रवजातानि हतः । अपि च विश्वाः सर्वा द्विषो द्वेष्ट्रीः शत्रुभूताः प्रजा अपहतः । विनाशयतः । अतोऽस्माकमप्येवमेव कुरुतामिति भावः ॥

चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्र इंद्राग्नी युवामिति षळृचस्तो-त्रियस्तृचः । सूत्रितं च । इंद्राग्नी युवामिमे यज्ञस्य हि स्थ ऋत्विजेत्यच्छावाकस्य । आ० ७.२. । इति ॥

॥ तृचे प्रथमा सूक्ते सप्तमी ॥

इंद्राग्नी युवामिमेऽ३भि स्तोमा अनूषत । पिबतं शंभुवा सुतं ॥७॥

इंद्राग्नी इति । युवां । इमे । अभि । स्तोमाः । अनूषत । पिबतं । शंऽभुवा । सुतं ॥७॥

हे इंद्राग्नी युवामिमे स्तोमाः स्तोतारोऽभ्यनूषत । अभिष्टुवंति । हे शंभुवा सुखस्य भावयितारविंद्राग्नी सुतमभिषुतमस्मदीयं सोमं पिबतं ॥

॥ अथाष्टमी ॥

या वां संति पुरुस्पृहो नियुतो दाशुषे नरा । इंद्राग्नी ताभिरा गतं ॥८॥

या । वां । संति । पुरुऽस्पृहः । निऽयुतः । दाशुषे । नरा । इंद्राग्नी इति । ताभिः । आ । गतं ॥८॥

हे नरा नेताराविंद्राग्नी वां युवयोः स्वभूताः पुरुस्पृहः पुरुभिर्बहुभिः स्पृहणीया दाशुषे हवींषि दत्तवते यजमानार्थमुत्पन्ना या नियुतोऽश्वाः संति हे इंद्राग्नी ताभिर्नियुद्भिरागतं । आगच्छतं ॥

॥ अथ नवमी ॥

ताभिरा गच्छतं नरोपेदं सवनं सुतं । इंद्राग्नी सोमपीतये ॥९॥

ताभिः । आ । गच्छतं । नरा । उप । इदं । सवनं । सुतं । इंद्राग्नी इति । सोमऽपीतये ॥९॥

हे नरा नेताराविंद्राग्नी । सूयतेऽभिषूयत इति सवनः सोमः । इदं सवनमिमं सोमं सुतमभिषुतमुप प्रति । यद्वेदं प्रातःसवनमुपास्मिन् सवने सुतमभिषुतं सोमं प्रति ताभिर्नियुद्भिरागच्छतं । किमर्थं । सोमपीतये तस्य सोमस्य पानार्थं ॥

॥ अथ दशमी ॥

तमीळिष्व यो अर्चिषा वना विश्वा परिष्वजत् । कृष्णा कृणोति जिह्वया ॥१०॥

तं । ईळिष्व । यः । अर्चिषा । वना । विश्वा । परिऽस्वजत् । कृष्णा । कृणोति । जिह्वया ॥१०॥

हे स्तोतस्तमग्निमीळिष्व स्तुहि योऽग्निरर्चिषा ज्वालारूपेण तेजसा विश्वा

सर्वाणि वनान्यरण्यानि परिव्रजन् परिव्रजति परितो वेष्टयति । अथ तानि वनानि जिह्वया ज्वालया दग्ध्वा कृष्णा कृष्णवर्णानि कृणोति करोति ॥

॥ इति चतुर्थस्याष्टमेऽष्टाविंशो वर्गः ॥

॥ अथैकादशी ॥

य इद्ध आविवासति सुम्नमिंद्रस्य मर्त्यः । द्युम्नाय सुतरा अपः ॥११॥

यः । इद्धे । आऽविवासति । सुम्नं । इंद्रस्य । मर्त्यः । द्युम्नाय । सुऽतराः । अपः ॥११॥

यो मर्त्यो मनुष्य इद्धे दीप्तेऽग्नौ सुम्नं सुखकरं हविरिंद्रस्येंद्रायाविवासति परिचरति प्रयच्छति ॥ चतुर्थ्यर्थे षष्ठी ॥ तस्य मर्त्यस्य द्युम्नाय द्योतमानायान्नाय तदर्थं सुतराः सुखेन तरणीया अप उदकानि वृष्ट्यात्मकानींद्रः करोतीति शेषः ॥

॥ अथ द्वादशी ॥

ता नो वाजवतीरिष आशून्पिपृतमर्वतः । इंद्रमग्निं च वोळ्हवे ॥१२॥

ता । नः । वाजऽवतीः । इषः । आशून् । पिपृतं । अर्वतः । इंद्रं । अग्निं । च । वोळ्हवे ॥१२॥

हे इंद्राग्नी ता तौ युवां वाजवतीरन्नवतीरिष इष्यमाणा वृष्टीः । यद्वा वाजो बलं । तद्वतीरिषोऽन्नान्याशून् शीघ्रगानर्वतोऽश्वांश्च नोऽस्मभ्यं पिपृतं । पूरयतं । प्रयच्छतं । किमर्थं । इंद्रमग्निं च युवां वोळ्हवे वोढुं हविर्भिः प्रापयितुं ॥

ऐंद्राग्नस्य पशोर्हविषोऽनुवाक्योभा वामित्येषा । सूचितं च । उभा वामिंद्राग्नी आहुवध्यै शुचिं नु स्तोमं नवजातमद्य । आ० ३.७. । इति ॥

॥ सैषा सूक्ते त्रयोदशी ॥

उभा वामिंद्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दातारविषां रयीणामुभा वाजस्य सातये हुवे वां ॥१३॥

उभा । वां । इंद्राग्नी इति । आऽहुवध्यै । उभा । राधसः । सह । मादयध्यै ।
उभा । दातारौ । इषां । रयीणां । उभा । वाजस्य । सातये । हुवे । वां ॥१३॥

हे इंद्राग्नी उभोभौ संहत्य वर्तमानौ वां युवां हुवे । आह्वयामि । किमर्थं । आहुवध्या आभिमुख्येन होतुं । तथोभोभौ युवामाह्वये राधसो राधसा राधकेन हविषा सह युगपदेव मादयध्यै मादयितुं तर्पयितुं । सर्वेषु देवेषु सत्स्वावयोराह्वाने किं कारणमिति चेदुच्यते । उभोभौ तौ युवामिषामन्नानां रयीणां

धनानां च दातारौ स्थः । अतः कारणादुभौ वां युवां वाजस्यान्नस्य सातये संभजनाय हुवे । आह्वये ॥

॥ अथ चतुर्दशी ॥

आ नो गव्येभिरश्व्यैर्वसव्यै३रुप गच्छतं ।

सखायौ देवौ सख्याय शंभुवेंद्राग्नी ता हवामहे ॥१४॥

आ । नः । गव्येभिः । अश्व्यैः । वसव्यैः । उप । गच्छतं ।

सखायौ । देवौ । सख्याय । शंऽभुवा । इंद्राग्नी इति । ता । हवामहे ॥१४॥

हे इंद्राग्नी गव्येभिर्गोसमूहैरश्व्यैरश्वसमूहैर्वसव्यैर्वसुसमूहैश्च सार्द्धं नोऽस्माना-भिमुख्येनोपगच्छतं । शेषः परोक्षकृतः । सखायौ समानख्यानौ देवौ दानादिगु-णयुक्तौ शंभुवा शंभुवौ सुखस्य भावयितारौ ता तादृशाविंद्राग्नी सख्याय सखि-त्वार्थं वयं हवामहे । आह्वयामहे ॥

॥ अथ पंचदशी ॥

इंद्राग्नी शृणुतं हवं यजमानस्य सुन्वतः ।

वीतं हव्यान्या गतं पिबतं सोम्यं मधु ॥१५॥

इंद्राग्नी इति । शृणुतं । हवं । यजमानस्य । सुन्वतः ।

वीतं । हव्यानि । आ । गतं । पिबतं । सोम्यं । मधु ॥१५॥

हे इंद्राग्नी सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य हवमाह्वानं स्तोत्रं शृणुतं । श्रुत्वा च तदीयानि हव्यानि हवींषि वीतं । कामयेथां । कामयित्वा चागतं । आगच्छतं । आगत्य च सोम्यं सोमात्मकं मधु पिबतं ॥

॥ इति चतुर्थस्याष्टम एकोनत्रिंशो वर्गः ॥

इयमददादिति चतुर्दशर्चं द्वादशं सूक्तं भरद्वाजस्यार्षं सरस्वतीदेवताकं । आदि-तस्तिस्रो जगत्यस्त्रयोदश्यपि जगती चतर्दशी त्रिष्टुप् शिष्टा गायत्र्यः । तथा चानुक्रांतं । इयं षळूना सारस्वतं त्रिजगत्यादि जगतीत्रिष्टुबंतमिति ॥ अत्र शौनकः । इयमित्येतदाद्यं तु सूक्तं सारस्वतं जपेत् । द्विजः प्रातः शुचिर्भूत्वा वाग्मी भवति बुद्धिमान् । ऋग्वि० २.२३. । इति ॥ पार्ष्ठिके षष्ठेऽहनि प्रउग इयमददादिति सारस्वतस्तृचः । सूत्रितं च । इयमददाद्रभसमृणच्युतमिति प्रउगं । आ० ८.१. । इति ॥

॥ तत्र प्रथमा ॥

इयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।
या शश्वंतमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति ॥१॥

इयं । अददात् । रभसं । ऋणऽच्युतं । दिवःऽदासं । वध्रिऽअश्वाय । दाशुषे ।
या । शश्वंतं । आऽचखाद । अवसं । पणिं । ता । ते । दात्राणि । तविषा । सरस्वति ॥१॥

इयं सरस्वती रभसं वेगवंतमृणच्युतं वैदिकस्य देवऋषिपितृसंबंधिनो लौकिकस्य च ऋणस्य च्यावयितारं दिवोदासमेतत्संज्ञं पुत्रं दाशुषे हवींषि दत्तवते वध्र्यश्वायेतत्संज्ञाय ऋषयेऽददात् । दत्तवती । या सरस्वती शश्वंतं बहुलं पणिं पणनशीलं वणिजमदातृजनमवसं केवलं स्वात्मन एव तर्पकमाचखाद आजघान सेयमददादित्यन्वयः । अथ प्रत्यक्षीकृत्य स्तौति । हे सरस्वति देवि ता तानि पुत्रदानादीनि ते त्वदीयानि दात्राणि दानानि तविषा तविषाणि महांति भवंति॥

॥ अथ द्वितीया ॥

इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः ॥२॥

इयं । शुष्मेभिः । बिसखाःऽइव । अरुजत् । सानु । गिरीणां । तविषेभिः । ऊर्मिऽभिः ।
पारावतऽघ्नीं । अवसे । सुवृक्तिऽभिः । सरस्वतीं । आ । विवासेम । धीतिऽभिः ॥२॥

सरस्वती देवतारूपेण नदीरूपेण च वर्तते । देवतारूपा स्तुता । अधुनानया नदीरूपां सरस्वतीं स्तौति । इयं नदीरूपा सरस्वती शुष्मैः शोषकैरात्मीयैर्बलैस्तविषेभिर्महद्भिरूर्मिभिस्तरंगैर्गिरीणां पर्वतानां तीरसंबद्धानां सानु सानून्यरुजत भनक्ति । बिसखा इव । बिसं खनतीति बिसखाः । स यथा बिसार्थं पंकं रुजति तद्वत् । तां सरस्वतीं पारावतघ्नीं परावति दूरदेशे विद्यमानस्यापि वृक्षादेर्हंत्रीं सुवृक्तिभिः स्तुतिभिर्धीतिभिः कर्मभिश्चावसे रक्षणार्थमाविवासेम । परिचरेम । यद्वा पारावतघ्नी पारावारे पारावाची तीरे । तयोर्घातिनी । उक्तं च । पारावतघ्नी पारावारघातिनी । नि० २.२४. । इति ॥

॥ अथ तृतीया ॥

सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः ।
उत क्षितिभ्योऽवनीरविंदो विषमेभ्यो अस्रवो वाजिनीवति ॥३॥

सरस्वति । देवऽनिदः । नि । बर्हय । प्रऽजां । विश्वस्य । बृसयस्य । मायिनः ।
उत । क्षितिऽभ्यः । अवनीः । अविंदः । विषं । एभ्यः । अस्रवः । वाजिनीऽवति ॥ ३ ॥

हे सरस्वति देवनिदो देवानां निंदकानसुरान्निबर्हय । न्यबर्हयः । अवधीः । तथा विश्वस्य व्याप्तस्य मायिनो मायाविनो बृसयस्य । बृसय इति त्वष्टुर्नामधेयं । त्वष्टुः प्रजां पुत्रं वृत्रासुरं च न्यवधीः । त्वत्साहाय्यादेवेंद्रो हतवानित्यर्थः । उतापि च हे वाजिनीवति अन्नवति सरस्वति त्वं क्षितिभ्यो मनुष्येभ्योऽवनीरसुरैरपहृता भूमीरविंदः । अलंभयः । एभ्यो मनुष्येभ्यो विषमुदकं चास्रवः । अक्षारयः । यद्वा क्षितयोऽसुरजनाः । तेभ्यः सकाशादवनीर्भूमीरविंदः । लब्धवानसि । तान् हत्वे-भ्यश्चासुरेभ्यो विषं मृतिहेतुभूतं गरलमस्रवः ॥

॥ अथ चतुर्थी ॥

प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ॥ ४ ॥

प्र । नः । देवी । सरस्वती । वाजेभिः । वाजिनीऽवती । धीनां । अवित्री । अवतु ॥ ४ ॥

देवी दानादिगुणयुक्ता वाजिनीवती । वाजोऽन्नं यस्यां क्रियायां सा वाजिनी । तद्युक्ता । धीनां ध्यातॄणां स्तोतॄणामवित्री रक्षित्री । एवंभूता सरस्वती वाजेभिरन्नैर्नोऽस्मान्प्रावतु । प्रकर्षेण तर्पयतु ॥

॥ अथ पंचमी ॥

यस्त्वा देवि सरस्वत्युपब्रूते धने हिते । इंद्रं न वृत्रतूर्ये ॥ ५ ॥

यः । त्वा । देवि । सरस्वति । उपऽब्रूते । धने । हिते । इंद्रं । न । वृत्रऽतूर्ये ॥ ५ ॥

हे देवि सरस्वति यः स्तोता वृत्रतूर्ये संग्रामे धने हिते निहिते निमित्तभूते सतींद्रं न इंद्रमिव त्वामुपब्रूते स्तौति तं रक्षेति शेषः ॥

॥ इति चतुर्थस्याष्टमे त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

त्वं देवि सरस्वत्यवा वाजेषु वाजिनि । रदा पूषेव नः सनिं ॥ ६ ॥

त्वं । देवि । सरस्वति । अव । वाजेषु । वाजिनि । रद । पूषाऽइव । नः । सनिं ॥ ६ ॥

हे देवि दानादिगुणयुक्ते हे वाजिनि । वाजो बलमन्नं वा । तद्युक्ते । हे सरस्वति त्वं वाजेषु संग्रामेष्वव । अस्मान्रक्ष । अपि च नोऽस्मभ्यं पूषेव पोषको देव इव सनिं संभजनीयं धनं रद । विलिख । प्रयच्छेति यावत् ॥

॥ अथ सप्तमी ॥

उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः । वृत्रघ्नी वष्टि सुष्टुतिं ॥७॥

उत । स्या । नः । सरस्वती । घोरा । हिरण्यऽवर्तनिः । वृत्रऽघ्नी । वष्टि । सुऽस्तुतिं ॥७॥

उतापि च स्या सा प्रसिद्धा सरस्वती घोरा शत्रूणां भयकारिणी हिरण्यवर्तनिः । वर्ततेऽनेनेति वर्तनी रथः । हिरण्मयो वर्तनिर्यस्याः सा तथोक्ता । वृत्रघ्नी वृत्राणां शत्रूणां हंत्री । एवंभूता सा सरस्वती नोऽस्मदीयां सुष्टुतिं शोभनां स्तुतिं वष्टि । कामयतां ॥

॥ अथाष्टमी ॥

यस्या अनंतो अह्रुतस्त्वेषश्चरिष्णुरर्णवः । अमश्चरति रोरुवत् ॥८॥

यस्याः । अनंतः । अह्रुतः । त्वेषः । चरिष्णुः । अर्णवः । अमः । चरति । रोरुवत् ॥८॥

यस्याः सरस्वत्या अमो बलमनंतोऽपर्यंतोऽपरिमितोऽह्रुतोऽहिंसितोऽकुटिलो वा त्वेषो दीप्तश्चरिष्णुश्चरणशीलः । सर्वत्राप्रतिहतगतिरित्यर्थः । अर्णव उदकवान् । उदकप्रद इत्यर्थः । एवंभूतः सन् रोरुवत् भृशं शब्दं कुर्वन् चरति वर्तते सा नो विश्वा इत्युत्तरत्र संबंधः ॥

॥ अथ नवमी ॥

सा नो विश्वा अति द्विषः स्वसॄरन्या ऋतावरी । अतन्नहेव सूर्यः ॥९॥

सा । नः । विश्वाः । अति । द्विषः । स्वसॄः । अन्याः । ऋतऽवरी । अतन् । अहाऽइव । सूर्यः ॥९॥

सा सरस्वती नोऽस्मान्विश्वाः सर्वा द्विषो द्वेष्ट्रीः प्रजा अतिनयतु । अतितारयतु । तथा स्वसॄः स्वयं सारिणीः सहोत्पन्ना वा ऋतावरीः । ऋतमित्युदकनाम । तद्युक्ता अन्याश्च नदीरस्मानतिनयतु ॥ यद्वा जस्येव वा छंदसीति पूर्वसवर्णदीर्घः ॥ उदकवत्यः स्वसारो भगिन्योऽन्या गंगाद्या नद्यश्चास्मान् शत्रूनतिनयंतु । तत्र दृष्टांतः । सूर्यः सर्वस्य प्रेरक आदित्योऽतन् सततं गच्छन् अहेवाहानीव । यथाहानि शीघ्रमतिनयति तद्वत् ॥

दशरात्रे तृतीयेऽहनि प्रउग उत नः प्रियेति सारस्वतस्तृचः । सूत्रितं च । उत नः प्रिया प्रियास्वित्यौष्णिहं प्रउगं । आ० ७.१०. । इति ॥ पविचेष्ट्यामुत नः प्रियेति सारस्वतस्य हविषोऽनुवाक्या । सूत्रितं च । उत नः प्रिया प्रियास्विमा जुह्वाना युष्मदा नमोभिः । आ० २.१२. । इति ॥

॥ तृचे प्रथमा सूक्ते दशमी ॥

उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा । सरस्वती स्तोम्या भूत् ॥१०॥

उत । नः । प्रिया । प्रियासु । सप्तऽस्वसा । सुऽजुष्टा । सरस्वती । स्तोम्या । भूत् ॥१०॥

उतापि च नोऽस्माकं प्रियासु प्रियाणां मध्ये प्रिया प्रियतमा सप्तस्वसा । गायत्र्यादीनि सप्त छंदांसि स्वसारो यस्यास्तादृशी । नदीरूपायास्तु गंगाद्याः सप्त नद्यः स्वसारः । सुजुष्टा सुष्ठु पुरातनैर्ऋषिभिः सेविता । एवंभूता सरस्वती देवी स्तोम्या भूत् । स्तोतव्या भवतु ॥

॥ इति चतुर्थस्याष्टम एकत्रिंशो वर्गः ॥

॥ अथैकादशी ॥

आपप्रुषी पार्थिवान्युरु रजो अंतरिक्षं । सरस्वती निदस्पातु ॥११॥

आऽपप्रुषी । पार्थिवानि । उरु । रजः । अंतरिक्षं । सरस्वती । निदः । पातु ॥११॥

पार्थिवानि पृथिव्याः संबंधीन्युरूण्युरूणि विस्तीर्णानि रजो रजांसि लोकानंतरिक्षमंतरा क्षांतं नभश्चापप्रुषी स्वतेजसा पूरितवती सरस्वती देवी निदो निंदकाच्छत्रोः पातु । अस्मान्रक्षतु ॥

॥ अथ द्वादशी ॥

त्रिषधस्था सप्तधातुः पंच जाता वर्धयंती । वाजेवाजे हव्या भूत् ॥१२॥

त्रिऽसधस्था । सप्तऽधातुः । पंच । जाता । वर्धयंती । वाजेऽवाजे । हव्या । भूत् ॥१२॥

त्रिषधस्था त्रिषु लोकेषु सहावतिष्ठमाना त्रिलोकव्यापिनी सप्तधातुः । सप्त धातवोऽवयवा गायत्र्याद्या गंगाद्या वा यस्याः सा तथोक्ता । पंच जाता जातानि निषादपंचमांश्चतुरो वर्णान् गंधर्वादीन्वा वर्धयंत्यभिवृद्धान्कुर्वती । ईदृशी सरस्वती वाजे वाजे युद्धे युद्धे सर्वेषु युद्धेषु हव्या भूत् । ह्वातव्या भवति ॥

॥ अथ त्रयोदशी ॥

प्र या महिम्ना महिनासु चेकिते द्युम्नेभिरन्या अपसामपस्तमा ।
रथ इव बृहती विभ्वने कृतोपस्तुत्या चिकितुषा सरस्वती ॥१३॥

प्र । या । महिम्ना । महिना । आसु । चेकिते । द्युम्नेभिः । अन्याः । अपसां । अपःऽतमा ।
रथःऽइव । बृहती । विऽभ्वने । कृता । उपऽस्तुत्या । चिकितुषा । सरस्वती ॥१३॥

महित्वा माहात्म्येन महिना महती युवेभिर्द्युतिमानैर्यशोभिरन्नैर्वा युक्ता सत्यास्वासां नदीनां देवतानां मध्ये या सरस्वती प्र चेकिते प्रकर्षेण ज्ञायते। या चान्या अन्यासां ॥ सुपां सुलुगिति षष्ठीबहुवचनस्य जस् ॥ अपसां वेगवतीनां नदीनां मध्येऽपस्तमा वेगवत्तमा। या च रथ इव विभ्वने विभुत्वाय बृहती परिवृढा गुणैरधिका कृता प्रजापतिना निर्मिता सा सरस्वती चिकितुषा जानता स्तोत्रोपस्तुत्या। उपस्तोतव्या भवति ॥

॥ अथ चतुर्दशी ॥

सर॑स्वत्यभि नो॑ नेषि॒ वस्यो॒ माप॑ स्फरीः॒ पय॑सा॒ मा न॒ आ ध॑क्।
जु॒षस्व॑ नः स॒ख्या वे॒श्या॑ च॒ मा त्वत्क्षेत्रा॒ण्यर॑णानि गन्म ॥१४॥
सर॑स्वति। अ॒भि। नः॒। ने॒षि॒। वस्यः॑। मा। अप॑। स्फ॒रीः॒। पय॑सा। मा। नः॒। आ। ध॒क्।
जु॒षस्व॑। नः॒। स॒ख्या। वे॒श्या॑। च॒। मा। त्वत्। क्षेत्रा॑णि। अर॑णानि। ग॒न्म॒ ॥१४॥

हे सरस्वति नोऽस्मान्वस्यो वसीयः प्रशस्तं वसु धनमभिनेषि। अभिप्रापय। मापस्फरीः। अप्रवृद्धान्मा कार्षीः ॥ स्फारो वृद्धिः। उपसर्गवशात्तद्विपरीते वर्तते ॥ तथा पयसोदकेनाधिकेन नोऽस्मान्मा धक्। नाभिदह। न बाधस्व। अपि च नोऽस्माकं सख्या सख्यानि सखिकर्माणि वेश्या प्रवेशनानि च जुषस्व। सेवस्व। वयं च त्वत्सकाशादरणान्यरमणानि निकृष्टानि क्षेत्राणि मा गन्म। मा प्राप्नवाम। अपि तु रमणीयान्येव ॥

॥ इति चतुर्थस्याष्टमे द्वात्रिंशो वर्गः ॥
॥ इति षष्ठे मंडले पंचमोऽनुवाकः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टकेऽष्टमोऽध्यायः समाप्तः ॥

ओं

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ पंचमाष्टके प्रथमोऽध्याय आरभ्यते । षष्ठमंडलस्य षष्ठेऽनुवाके चतुर्दश सूक्तानि । तत्र स्तुषे नरेत्येकादशर्चं प्रथमं सूक्तं । अत्रेयमनुक्रमणिका । स्तुष एकादशाश्विनं त्विति । मंडलद्रष्टा बार्हस्पत्यो भरद्वाज ऋषिः । अनुक्तत्वात्त्रिष्टुप् । अश्विनौ देवता ॥ प्रातरनुवाक आश्विने क्रताविदमादिके द्वे सूक्ते । आश्विनशस्त्रे चैते एव । सूचितं च । स्तुषे नरेति सूक्ते । आ॰ ४.१५. । इति ॥

॥ तत्र प्रथमा ॥

स्तुषे नरा दिवो अस्य प्रसंताश्विना हुवे जरमाणो अर्कैः ।
या सद्य उस्रा व्युषि ज्मो अंतान्युयूषतः पर्युरु वरांसि ॥१॥
स्तुषे । नरा । दिवः । अस्य । प्रऽसंता । अश्विना । हुवे । जरमाणः । अर्कैः ।
या । सद्यः । उस्रा । विऽउषि । ज्मः । अंतान् । युयूषतः । परि । उरु । वरांसि ॥१॥

दिवो द्युलोकस्य नरा नेतारावस्य भुवनस्य प्रसंता प्रसंतौ प्रभवंतावीश्वरावश्विनाश्विनावश्वैरन्वितौ स्तुषे । प्रगीतमंत्रसाध्यैः स्तोत्रैः स्तोतुमर्कैरर्चनीयमंत्रसाध्यैः शस्त्रैर्जरमाणः स्तुतिं कुर्वन्हुवे । आह्वयामि । कीदृशावित्यपेक्षायां । या यौ सद्य एवोस्रा शत्रूणां निवारकौ व्युषि व्युष्टौ निशायाः समाप्तौ ज्मः पृथिव्या

अंतान् पर्यंतानुरूरूणि वरांसि रूपस्थावरकाणि तमांसि च परि परितो युयूषतः पृथक्कुरुतः । अथवा वरांसि तेजांसि तमोनिवारणात्परियुयूषतः । विस्तारयतः ॥

॥ अथ द्वितीया ॥

ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः ।
पुरु वरांस्यमिता मिमानापो धन्वान्यति याथो अज्रान् ॥२॥

ता । यज्ञं । आ । शुचिऽभिः । चक्रमाणा । रथस्य । भानुं । रुरुचुः । रजःऽभिः ।
पुरु । वरांसि । अमिता । मिमाना । अपः । धन्वानि । अति । याथः । अज्रान् ॥२॥

किंच ता तौ प्रसिद्धावश्विनौ यज्ञमस्मदीयं यागमाचक्रमाणाभिचक्रमाणौ शुचिभिर्निर्मलै रजोभिः स्वीयैस्तेजोभिः । रजो रजतेर्ज्योती रज उच्यते । नि॰ ४.१९. । इति यास्केनोक्तत्वात् । रथस्य स्वकीयस्य रथस्य भानुं दीप्तिं रुरुचुः । रोचयेते । अपि च पुरु बहूनि वरांसि तमोनिवारकाणि तेजांस्यमितापरिमितानि मिमाना निर्मिमाणावप उद्दिश्य धन्वानि मरुप्रदेशानज्रान् स्वकीयानश्वानतियाथः । अतिक्रामयथः ॥

॥ अथ तृतीया ॥

ता ह त्यद्वर्तिर्यदरध्रमुग्रेत्था धिय ऊहथुः शश्वदश्वैः ।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य ॥३॥

ता । ह । त्यत् । वर्तिः । यत् । अरध्रं । उग्रा । इत्था । धियः । ऊहथुः । शश्वत् । अश्वैः ।
मनःऽजवेभिः । इषिरैः । शयध्यै । परि । व्यथिः । दाशुषः । मर्त्यस्य ॥३॥

ता ह तौ खलूग्रावश्विनौ युवां यदरध्रमसमृद्धं त्यद्वर्तिर्यजमानस्य गृहं समर्धयितुं गच्छथः । किंचेत्थेत्थं धियः स्तोतॄनिषिरैरेषणीयैः काम्यैर्मनोजवेभिर्मनोवेगैरश्वैः स्वीयैरश्वैः शश्वत्सर्वदोहथुः । स्वर्गं प्रापयथः । मर्त्यस्य मनुष्यस्य दाशुषो यजमानस्य व्यथिर्हिंसकः परिशयध्यै परिशयनाय दीर्घनिद्रायै युवाभ्यां क्रियतां ॥

॥ अथ चतुर्थी ॥

ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानसप्ती ।
शुभं पृक्षमिषमूर्जं वहन्ता होता यक्षत्प्रत्नो अध्रुग्युवाना ॥४॥

ता। नव्यसः। जरमाणस्य। मन्म। उप। भूषतः। युयुजानसप्ती इति युयुजानऽसप्ती। शुभं। पृक्षं। इषं। ऊर्जं। वहंता। होता। यक्षत्। प्रत्नः। अध्रुक्। युवाना ॥४॥

ता तावश्विनौ युयुजानसप्ती रथे युज्यमानाश्वौ शुभं शोभनं पृक्षमन्नं। पयः पृक्ष इत्यन्ननामसु पाठात्। इषं पुष्टिमूर्जं रसं च वहंता वहंतौ नव्यसो नवतरस्य जरमाणस्य स्तुतिं कुर्वतो मन्म मननीयं स्तोत्रमुपभूषतः। उपगच्छतः। यद्वा स्तोत्रसमीपे भवतः। किंच युवाना नित्यतरुणौ तौ होता देवानामाह्वाताध्रुगद्रोग्धा प्रियः प्रत्नः पुराणोऽग्निर्यक्षत्। यजतु ॥

॥ अथ पंचमी ॥

ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे।
या शंसते स्तुवते शंभविष्ठा बभूवतुर्गृणते चित्रराती ॥५॥

ता। वल्गू इति। दस्रा। पुरुशाकऽतमा। प्रत्ना। नव्यसा। वचसा। आ। विवासे। या। शंसते। स्तुवते। शंऽभविष्ठा। बभूवतुः। गृणते। चित्ररातो इति चित्रऽराती ॥५॥

या यौ शंसते शस्त्रैः स्तुतिं कुर्वते स्तुवते स्तोत्रैः स्तुतिं कुर्वते जनाय शंभविष्ठावतिशयेन सुखस्य भावयितारावतिशयेन सुखस्वरूपौ वा गृणते स्तोत्रशस्त्रव्यतिरिक्तलौकिकस्तुतिभिः स्तुवते च चित्रराती विचित्रदानौ बभूवतुः ता तौ वल्गू वलनशीलौ रुचिरौ वा पुरुशाकतमातिशयेन बहुकर्माणौ बहुसहायौ वा प्रत्ना प्रत्नौ पुराणौ। प्रत्नं प्रदिव इति पुराणनामसु पाठात्। दस्रा दर्शनीयावश्विनौ नव्यसा नवतरेण वचसा स्तुत्याविवासे। परिचरामि ॥

॥ इति पंचमस्य प्रथमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

ता भुज्युं विभिरद्भ्यः समुद्रात्तुग्रस्य सूनुमूहथू रजोभि।
अरेणुभिर्योजनेभिर्भुजंता पतत्रिभिरर्णसो निरुपस्थात् ॥६॥

ता। भुज्युं। विऽभिः। अत्ऽभ्यः। समुद्रात्। तुग्रस्य। सूनुं। ऊहथुः। रजःऽभिः। अरेणुऽभिः। योजनेभिः। भुजंता। पतत्रिऽभिः। अर्णसः। निः। उपऽस्थात् ॥६॥

ता तावश्विनौ युवां तुग्रस्य सूनुं भुज्युं भुज्युनामकं समुद्रमध्ये भग्ननावं भुजंता

रक्षंतावरेणुभी रेणुरहितैरांतरिक्षै रजोभिर्मार्गैर्योजनेभी रथयुक्तैः पतत्रिभिः पतनवद्भिर्विभिरश्वैरर्णसो जलस्योपस्थाद्योनेः समुद्रादद्भ्यो निरूहथुः। निरगमयतं। समुद्रादद्भ्य इति प्रयोगो मातुर्गृहाद्गच्छतीतिवत् ॥

॥ अथ सप्तमी ॥

वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः।
दशस्यंता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू ॥७॥

वि। जयुषा। रथ्या। यातं। अद्रिं। श्रुतं। हवं। वृषणा। वध्रिऽमत्याः।
दशस्यंता। शयवे। पिप्यथुः। गां। इति। च्यवाना। सुऽमतिं। भुरण्यू इति ॥७॥

रथ्या हे रथारूढावश्विनौ जयुषा जयशीलेन रथेनाद्रिं मार्गे स्थितं पर्वतं वियातं। व्यबाधेथां। यातिरत्र वधकर्मा। तथा च निगमांतरं। विभिंदुना नासत्या रथेन वि पर्वताँ अजरयू अयातं। ऋग्वे० १.११६.२०.। इति। वृषणा कामानां वर्षितारौ वध्रिमत्याः पुत्रार्थिन्या हवमाह्वानं श्रुतं। शृणुतं। दशस्यंता स्तोतृभ्यः कामान्प्रयच्छंतौ शयवे युवां स्तुवते गां निवृत्तप्रसवां पिप्यथुः। क्षीरेणाप्याययतं। तथा च निगमांतरं। शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गां। ऋग्वे० १.११६.२२.। इति। इतीत्थं सुमतिं सुष्टुतिं च्यवाना गच्छंतौ भुरण्यू सर्वत्र गंतारौ यज्ञस्य भर्तारौ वा भवतं ॥

॥ अथाष्टमी ॥

यद्रोदसी प्रदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा।
तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात ॥८॥

यत्। रोदसी इति। प्रऽदिवः। अस्ति। भूम। हेळः। देवानां। उत। मर्त्यऽत्रा।
तत्। आदित्याः। वसवः। रुद्रियासः। रक्षःऽयुजे। तपुः। अघं। दधात ॥८॥

रोदसी हे द्यावापृथिव्यौ हे आदित्या हे वसवो रुद्रियासो हे रुद्रपुत्रा मरुतो मर्त्यत्रा मर्त्येष्वश्विनोः परिचारकेषु देवानां यद्धेळः क्रोधो भूम महानस्ति तद्धेळस्तपुस्तापकं रक्षोयुजे रक्षोभिर्युक्ताय रक्षसां स्वामिने प्रेरकाय वाघमाहंतृ दधात। कुरुत। अथवा रक्षोयुजे रक्षोभिर्युक्ताय यज्वनेऽघमाहंतृ कुरुत ॥

॥ अथ नवमी ॥

य ईं राजानावृतुथा विदधद्रजसो मित्रो वरुणश्चिकेतत् ।
गंभीराय रक्षसे हेतिमस्य द्रोघाय चिद्वचस आनवाय ॥९॥

यः । ईं । राजानौ । ऋतुऽथा । विऽदधत् । रजसः । मित्रः । वरुणः । चिकेतत् ।
गंभीराय । रक्षसे । हेतिं । अस्य । द्रोघाय । चित् । वचसे । आनवाय ॥९॥

यो नरो रजसः समस्तस्य लोकस्य । लोका रजांस्युच्यंत इति यास्केनोक्तत्वात् । राजानावीमेतावश्विनावृतुथा काले काले विदधत् परिचरति तं मित्रो वरुणश्च चिकेतत् । जानीयात् । मित्रवरुणप्रभृतयो देवा एनं विदुरित्यर्थः । किंचायं परिचारको गंभीराय महाबलाय रक्षसे राक्षसाय हेतिं घातकमायुधमस्य । अस्यति । क्षिपति ॥ प्रथमपुरुषस्य मध्यमपुरुषेण व्यत्ययः ॥ द्रोघायाभिद्रोहात्मकायानवाय मनुष्यसंबंधिने वचसे चित् वचनायैव हेतिमस्यति । मनुष्याणामभिद्रोहायैनमास्कंदतीति ॥

॥ अथ दशमी ॥

अंतरैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता रथेन ।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तं ॥१०॥

अंतरैः । चक्रैः । तनयाय । वर्तिः । द्युऽमता । आ । यातं । नृऽवता । रथेन ।
सनुत्येन । त्यजसा । मर्त्यस्य । वनुष्यतां । अपि । शीर्षा । ववृक्तं ॥१०॥

हे अश्विनावंतरैरनिकृष्टैश्चक्रैर्युक्तेन द्युमता दीप्तिमता नृवता नेत्रा सारथिना युक्तेन यद्वाश्वयुक्तेन । पतंगा नर इत्यश्वनामसु पाठात् । रथेन वर्तिरस्माकं गृहं तनयाय तनयं दातुमायातं । अपि च सनुत्येन तिरोहितेन त्यजसा क्रोधेन । हरणस्त्यज इति क्रोधनामसु पाठात् । मर्त्यस्य मनुष्यस्य वनुष्यतां बाधमानानां । वनुष्यतिर्हंतिकर्मेति यास्केनोक्तत्वात् । शीर्षा शिरांस्यपिववृक्तं । प्रवृक्तं ॥

॥ अथैकादशी ॥

आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् ।
दृळ्हस्य चिद्गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती ॥११॥

आ। परमाभिः। उत। मध्यमाभिः। नियुत्ऽभिः। यातं। अवमाभिः। अर्वाक्।
हळ्हस्य। चित्। गोऽमतः। वि। व्रजस्य। दुरः। वर्तं। गृणते। चित्रराती इति
चित्रऽराती ॥११॥

हे अश्विनौ परमाभिरुत्कृष्टाभिरुतापि च मध्यमाभिरनुत्कृष्टाभिरवमाभिर्नि-कृष्टाभिश्च नियुद्भिर्वाहैरर्वागस्मदभिमुखमायातं। हळ्हस्य चिद्दृळ्हापिधानस्यापि गोमतो गोयुक्तस्य व्रजस्य गोष्ठस्य दुरो द्वाराणि विवर्तं। विवृणुतं। किंच गृणते स्तुवते मह्यं चित्रराती विचित्रदानौ भवतं ॥

॥ इति पंचमस्य प्रथमे द्वितीयो वर्गः ॥

क्व त्येत्येकादशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षं। अत्रेयमनुक्रमणिका। क्व त्यैक-पदांतं त्रैष्टुभमिति। आ वां सुम्न इत्येकादश्येकपदा विष्टुप् शिष्टास्त्रिष्टुभः। आश्विनं त्वित्युक्तत्वादस्यापि सूक्तस्याश्विनौ देवता ॥ प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छंदसि विनियोगः ॥

॥ तत्र प्रथमा ॥

क्व१त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नमस्वान् ।
आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन् ॥१॥

क्व। त्या। वल्गू इति। पुरुऽहूता। अद्य। दूतः। न। स्तोमः। अविदत्। नमस्वान्।
आ। यः। अर्वाक्। नासत्या। ववर्त। प्रेष्ठा। हि। असथः। अस्य। मन्मन् ॥१॥

क्व कुत्र स्थितौ वल्गू रुचिरौ पुरुहूता बहुभिराहूतौ त्या तावश्विनौ नम-स्वान्हविषा युक्तः। नम आयुरित्यन्ननामसु पाठात्। स्तोमः पंचदशादिः स्तो-मोऽद्य दूतो न प्रेरितो दूत इवाविदत्। विंदेत्। यः स्तोमोऽर्वागस्मदभिमुखं नासत्यावश्विनावाववर्त आवर्तयत्। हे अश्विनौ युवामस्य स्तोतुर्मन्मन् स्तोत्रे प्रेष्ठा हि प्रियतमौ ह्यसथः। भवथः ॥

॥ अथ द्वितीया ॥

अरं मे गंतं हवनायास्मै गृणाना यथा पिबाथो अंधः ।
परि ह त्यद्वर्तिर्याथो रिषो न यत्परो नांतरस्तुतुर्यात् ॥२॥

अरं। मे। गंतं। हवनाय। अस्मै। गृणाना। यथा। पिबाथः। अंधः।
परि। ह। त्यत्। वर्तिः। याथः। रिषः। न। यत्। परः। न। अंतरः। तुतुर्यात् ॥२॥

हे अश्विनौ युवां मे मदीयायास्मै हवनायाह्वानायारं पर्याप्तं गंतं। गच्छतं। गृणाना स्तूयमानावंधः सोमं यथा पिबाथः पिबतं। रिषो हिंसकस्य शत्रोस्त्यद्वर्तिस्तद्गृहं परि याथः परितो याथः यद्वर्तिः परो विप्रकृष्टो न तुतुर्यात् न हिंस्यात्। अंतरः संनिकृष्टोऽपि न तुतुर्यात्। यद्वा त्यद्वर्तिस्तदस्मदीयं गृहं रिषो हिंसकात्परियाथः। त्यद्वर्तिः परो विप्रकृष्टोऽतरः संनिकृष्टोऽपि न तुतुर्यात्। अयं भावः। यथास्मदीयं गृहं दूरस्थः संनिकृष्टोऽपि न हिंस्यात्तथा रक्षां कुरुथ इति ॥

॥ अथ तृतीया ॥

अकारि वामंधसो वरीमन्नस्तारि बर्हिः सुप्रायणतमं।
उत्तानहस्तो युवयुर्ववंदा वां नक्षंतो अद्रय आंजन् ॥३॥
अकारि। वां। अंधसः। वरीमन्। अस्तारि। बर्हिः। सुप्रऽअयनतमं।
उत्तानऽहस्तः। युवयुः। ववंद। आ। वां। नक्षंतः। अद्रयः। आंजन् ॥३॥

वां युवयोरर्थेऽधसः सोमस्य वरीमन् विस्तृतेऽभिषवादौ यत्कृत्यमस्ति तदकारि। कृतं। सुप्रायणतमं मृदुतमं बर्हिरस्तारि। स्तीर्णं। उत्तानहस्तः कृतांजलिर्युवयुर्युवां कामयमानो होता ववंद। स्तौति। वां युवां नक्षंतो व्याप्नुवंतः॥ तृक्ष पृक्ष नक्ष गताविति धातुः॥ अद्रयो ग्रावाण आंजन्। सोमरसमा समंताद्व्यक्तीकृतवंतः॥

॥ अथ चतुर्थी ॥

ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जूर्णिनी घृताची।
प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन् ॥४॥
ऊर्ध्वः। वां। अग्निः। अध्वरेषु। अस्थात्। प्र। रातिः। एति। जूर्णिनी। घृताची।
प्र। होता। गूर्तऽमनाः। उराणः। अयुक्त। यः। नासत्या। हवीमन् ॥४॥

अग्निर्वां युवयोर्यज्ञार्थमूर्ध्वोऽस्थात्। उदतिष्ठत्। अध्वरेषु यज्ञेषु प्रेति। समिद्ध आहवनीयं गच्छति च। रातिर्धनं हविर्जूर्णिनी प्रगामिनी॥ जूर्णिर्जवतेर्वेति

यास्केनोक्तत्वात् ॥ घृताची घृतेनाक्ता । उपस्तीर्णाभिघारितेत्यर्थः । किंच होत्रोराण उरु कुर्वाणः प्रगूर्तमनाः प्रकर्षेणोद्युक्तमना भवति यो होता नासत्यावश्विनौ हवीमन्नाह्वाने स्तोत्रे वायुक्त योजयति ॥

॥ अथ पंचमी ॥

अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिं ।

प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन्यज्ञियानां ॥५॥

अधि । श्रिये । दुहिता । सूर्यस्य । रथं । तस्थौ । पुरुऽभुजा । शतऽऊतिं ।

प्र । मायाभिः । मायिना । भूतं । अत्र । नरा । नृतू इति । जनिमन् । यज्ञियानां ॥५॥

पुरुभुजा हे पूर्णभुजौ बहूनां रक्षकावश्विनौ युवयोः शतोतिं बहुरक्षकं बहुगमनं वा रथं सूर्यस्य दुहिता सूर्या श्रिये श्रयितुमधितस्थौ । अध्यतिष्ठत् । अपि च यज्ञियानां देवानामत्र जनिमन्नस्मिन् जन्मनि प्रादुर्भावे मायाभिः प्रज्ञानैः ॥ शची मायेति प्रज्ञाननामसु पाठात् ॥ मायिनौ प्रज्ञावंतौ नरा नेतारौ नृतू नृत्यंतौ भूतं । भवतं । यद्वा हे मायिनौ प्राज्ञौ नरौ नेतारौ नृतू नृत्यंतावश्विनौ यज्ञियानां देवानामत्र जनिमन् जन्मनि प्रादुर्भावे प्रभूतं प्राज्ञतममग्न्यादिकं देवं मायाभिः प्रज्ञानैः कौशलैर्वा जितवंतौ स्थ इत्यर्थः । अयमर्थः प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीं । ऐ० ब्रा० ४.७. । इत्यादिना स्पष्टीकृतः ॥

॥ इति पंचमस्य प्रथमे तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

युवं श्रीभिर्दर्शताभिराभिः शुभे पुष्टिमूहथुः सूर्यायाः ।

प्र वां वयो वपुषेऽनु पप्तन्नक्षद्वाणी सुष्टुता धिष्ण्या वां ॥६॥

युवं । श्रीभिः । दर्शताभिः । आभिः । शुभे । पुष्टिं । ऊहथुः । सूर्यायाः ।

प्र । वां । वयः । वपुषे । अनु । पप्तन् । नक्षत् । वाणी । सुऽस्तुता । धिष्ण्या । वां ॥६॥

हे अश्विनौ युवं युवां दर्शताभिर्दर्शनीयाभिराभिः श्रीमतां परिदृश्यमानाभिः श्रीभिर्लक्ष्मीभिः कांतिभिर्वा सूर्याया युवयोः पत्न्याः शुभे शोभनार्थं पुष्टिं पूर्तिमूहथुः । प्रापयथः । किंच वां युवां वयोऽश्वा वपुषे शोभायै प्रानुपप्तन् ।

प्रकर्षेणान्वपतन्। अपि च हे धिष्ण्या स्तुत्यर्हावश्विनौ वां युवां सुष्टुता वाणृ-षीणां स्तुतिर्नक्षत्। व्याप्नोति ॥

॥ अथ सप्तमी ॥

आ वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहंतु।
प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः ॥७॥

आ। वां। वयः। अश्वासः। वहिष्ठाः। अभि। प्रयः। नासत्या। वहंतु।
प्र। वां। रथः। मनःऽजवाः। असर्जि। इषः। पृक्षः। इषिधः। अनु। पूर्वीः ॥७॥

हे नासत्यौ वां युवां वयो गंतारो वहिष्ठा वोढृतमा अश्वासोऽश्वाः प्रयः सोमरूपमन्नमभ्यावहंतु। प्रापयंतु। वां युवयोर्मनोजवा मनोवेगो रथः पृक्षः संपर्चनीय इषिध एषणीयाः पूर्वीर्बह्वीरिषोऽन्नानि सोमाननूपासर्जि। विसृष्टः ॥

॥ अथाष्टमी ॥

पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसक्रां।
स्तुतश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन् ॥८॥

पुरु। हि। वां। पुरुऽभुजा। देष्णं। धेनुं। नः। इषं। पिन्वतं। असक्रां।
स्तुतः। च। वां। माध्वी इति। सुऽस्तुतिः। च। रसाः। च। ये। वां। अनु। रातिं। अग्मन् ॥८॥

पुरुभुजा हे पूर्णभुजौ बहुपालकौ वां युवयोर्देष्णं दातव्यं धनं पुरु बहु हि भवति। अतः कारणान्नोऽस्मभ्यं धेनुं प्रीणयित्रीमसक्रां मन्नोऽन्यत्रासंक्रमणीं। असक्रामसंक्रमणीं। नि॰ ६. २९.। इति यास्केनोक्तत्वात्। इषमन्नं पिन्वतं। प्रयच्छतं। यद्वेषमेषणीयां धेनुमित्यन्वयः। किंच वां स्तुतः। स्तुवंतीति स्तुतः स्तोतारः। संति। माध्वी मदयितारावश्विनौ सुष्टुतिः शोभना स्तुतिश्च स्तोतृषु भवति। रसाः सोमरसाश्च संति। ये रसा वां युवयो रातिं दानमनूद्दिश्याग्मन् देवयजनं प्राप्ताः। अयं भावः। सुष्टुतिं श्रुत्वा देवयजनं प्राप्तान् सोमरसान् पीत्वा स्तोतृभ्यः कामान्प्रयच्छतमिति शेषः ॥

॥ अथ नवमी ॥

उत म ऋज्रे पुरयस्य रघ्वी सुमीळ्हे शतं पेरुके च पक्वा।
शांडो दाद्धिरणिनः स्मद्दिष्टीन्दश वशासो अभिषाच ऋष्वान् ॥९॥

उत। मे। ऋजे इति। पुरयस्य। रघ्वी इति। सुऽमीळ्हे। शतं। पेरुके। च। पक्का।
शांडः। दात्। हिरणिनः। स्मत्ऽदिष्टीन्। दश। वशासः। अभिऽसाचः। ऋष्वान्॥९॥

उतापि च पुरयस्य पुरयनामकस्य स्वभूते ऋजे ऋजुगमने रघ्वी क्षिप्रगामिन्यौ वडवे मेऽश्विनोः स्तुतिं कुर्वतो ममाभूतां। सुमीळ्हे राज्ञि विद्यमानाः संतः शतं गावो ममाभूवन्। पेरुके राज्ञि विद्यमानानि पक्का पक्कान्यन्नानि ममासन्। शांडश्च राजा हिरणिनो हिरण्यवतः स्मद्दिष्टीन् प्रशस्तदर्शनावस्थानश्वान्वा दश दशसंख्याकान्वशासोऽनुगुणानभिषाचः शत्रूणामभिभावुकानृष्वान्दर्शनीयान्पुरुषानश्विनोः स्तोतृभ्यो दात्। ददातु॥

॥ अथ दशमी ॥

सं वां शता नासत्या सहस्राश्वानां पुरुपंथा गिरे दात्।
भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः॥१०॥

सं। वां। शता। नासत्या। सहस्रा। अश्वानां। पुरुऽपंथाः। गिरे। दात्।
भरत्ऽवाजाय। वीर। नु। गिरे। दात्। हता। रक्षांसि। पुरुऽदंससा। स्युरिति स्युः॥१०॥

नासत्या हे अश्विनौ वां युवयोर्गिरे। गृणातीति गीः स्तोता। तस्मा अश्वानां शता शतानि सहस्रा सहस्राणि पुरुपंथाः पुरुपंथा नाम राजा संदात्। संददाति। वीर हे वीरावश्विनौ॥ द्विवचनस्य लुक्॥ गिरे युवयोः स्तोत्रे भरद्वाजाय मह्यमपि नु क्षिप्रं दात्। ददातु। किंच हे पुरुदंससा बहुकर्माणावश्विनौ युवयोरनुग्रहाद्रक्षांसि हता हतानि स्युः॥

॥ अथैकादशी ॥

आ वां सुम्ने वरिमन्त्सूरिभिः ष्यां॥११॥

आ। वां। सुम्ने। वरिमन्। सूरिऽभिः। स्यां॥११॥

हे अश्विनौ वरिमन्विस्तृते सुम्ने वां युवाभ्यां दत्ते सुखावहे धने। जलार्थं सुम्नमिति सुखनामसु पाठात्। सूरिभिर्विद्वद्भिः सह समंतात्स्यां। भवेयं॥

॥ इति पंचमस्य प्रथमे चतुर्थो वर्गः॥

उदु श्रिय इति षडृचं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमुषोदेवताकं। अनु-

क्रम्यते च । उदु श्रिये षळुषस्यं त्विति ॥ प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चैतदादिके द्वे सूक्ते । सूत्र्यते हि । उदु श्रिय इति सूक्ते । आ० ४. १४. । इति ॥

॥ तत्र प्रथमा ॥

उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशंतः ।
कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा मघोनी ॥१॥

उत् । ऊं इति । श्रिये । उषसः । रोचमानाः । अस्थुः । अपां । न । ऊर्मयः । रुशंतः ।
कृणोति । विश्वा । सुऽपथा । सुऽगानि । अभूत् । ऊं इति । वस्वी । दक्षिणा । मघोनी ॥१॥

रोचमाना दीप्यमाना रुशंतः शुक्लवर्णाः ॥ रुशदिति वर्णनामेति यास्कः ॥ उषसः श्रिये जगतः शोभायै जगद्व्याप्तुं वापामूर्मयो न उदकसंबंधिनस्तरंगा इवोदस्थुः । उत्तिष्ठंति । अनंतरमेकवद्विगमः । उषा विश्वा विश्वानि स्थानानि सुपथा समार्गाणि सुगानि सुखेन गम्यानि कृणोति । करोति । अपि च मघोनी धनवत्युषा वस्वी प्रशस्ता दक्षिणा समर्धयित्री चाभूत् ॥

॥ अथ द्वितीया ॥

भद्रा ददृक्ष उर्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन् ।
आविर्वक्षः कृणुषे शुंभमानोषो देवि रोचमाना महोभिः ॥२॥

भद्रा । ददृक्षे । उर्विया । वि । भासि । उत् । ते । शोचिः । भानवः । द्यां । अपप्तन् ।
आविः । वक्षः । कृणुषे । शुंभमाना । उषः । देवि । रोचमाना । महःऽभिः ॥२॥

हे उषो देवि भद्रा कल्याणी ददृक्षे । दृश्यसे । उर्विया विस्तीर्णा च विभासि । ते तव शोचिः शोचिषः ॥ जसो लुक् ॥ दीप्यमाना भानवो रश्मयो द्यामंतरिक्षमुदपप्तन् । उत्पतंति । किंच हे उषो देवि महोभिस्तेजोभिः शुंभमाना शोभमाना रोचमाना दीप्यमाना वक्षस्त्वदीयं रूपमाविष्कृणुषे । प्रकटीकरोषि ॥

॥ अथ तृतीया ॥

वहंति सीमरुणासो रुशंतो गावः सुभगामुर्विया प्रथानां ।
अपेजते शूरो अस्तेव शत्रून्बाधते तमो अजिरो न वोळ्हा ॥३॥

वहंति । सीं । अरुणासः । रुशंतः । गावः । सुऽभगां । उर्विया । प्रथानां ।
अप । ईजते । शूरः । अस्ताऽइव । शत्रून् । बाधते । तमः । अजिरः । न । वोळ्हा ॥३॥

अरुणासो लोहितवर्णा रुशंतो दीप्यमाना गावो रश्मयः ॥ किरणा गाव इति रश्मिनामसु पाठात् ॥ सुभगामुर्वियोर्वी विस्तीर्णा प्रथानां प्रथमानां सीमेनामुषोदेवतां वहंति । सेयमुषोदेवता शूरोऽस्तेव वीरः क्षेप्तेव शत्रून् तमोऽपेजते । अपगमयति । वोळ्हा सेनाया अजिरो न क्षिप्रगामी शत्रून्यथा बाधते तथा तमांसि बाधते च ॥

॥ अथ चतुर्थी ॥

सुगोत ते सुपथा पर्वतेष्ववाते अपस्तरसि स्वभानो ।
सा न आ वह पृथुयामन्नृष्वे रयिं दिवो दुहितरिषयध्यै ॥४॥
सुऽगा । उत । ते । सुऽपथा । पर्वतेषु । अवाते । अपः । तरसि । स्वभानो इति स्वऽभानो ।
सा । नः । आ । वह । पृथुऽयामन् । ऋष्वे । रयिं । दिवः । दुहितः । इषयध्यै ॥४॥

हे उषो देवि पर्वतेषूत दुर्गेष्वप्यवाते गमनसाधनरहिते देशे सुपथा सुपथानि मार्गाणि सुगा सुगानि सुखेन गम्यानि ते तव भवंति । स्वभानो हे स्वप्रकाशेऽपोऽंतरिक्षमाकाशं ॥ आप इत्यंतरिक्षनामसु पाठात् ॥ सामुद्रिकीरपो वा तरसि । पृथुयामन् पृथुरथ ऋष्वे दर्शनीये दिवो दुहितरंतरिक्षसुते हे उषो देवि सा त्वमिषयध्या एषणीयं धनं नोऽस्मभ्यमावह ॥

॥ अथ पंचमी ॥

सा वह योक्षभिरवातोषो वरं वहसि जोषमनु ।
त्वं दिवो दुहितर्या ह देवी पूर्वहूतौ मंहना दर्शता भूः ॥५॥
सा । आ । वह । या । उक्षऽभिः । अवाता । उषः । वरं । वहसि । जोषं । अनु ।
त्वं । दिवः । दुहितः । या । ह । देवी । पूर्वऽहूतौ । मंहना । दर्शता । भूः ॥५॥

हे उषः सा त्वं वरं धनं मह्यमावह । या त्वमवाताप्रतिगता जोषं प्रीतिमनूक्षभिरनडुद्भिरश्वैर्वा स्तोतृभ्यो वरं वहसि । किंच हे दिवो दुहितरंतरिक्षसुते या त्वं देवी द्योतमाना पूर्वहूतौ प्रथमाह्वाने प्रातरनुवाके मंहना पूजनीया भवसि

सा त्वं दर्शता दर्शनीयाभूरिति योजना । या दर्शता भूरित्यन्वये यवृत्तेन सामानाधिकरण्यात् भूरित्यस्य निघातो न स्यात् ॥

॥ अथ षष्ठी ॥

उते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥ ६ ॥

उत् । ते । वयः । चित् । वसतेः । अपप्तन् । नरः । च । ये । पितुऽभाजः । विऽउष्टौ ।
अमा । सते । वहसि । भूरि । वामं । उषः । देवि । दाशुषे । मर्त्याय ॥ ६ ॥

हे उषो देवि ते तव व्युष्टौ सत्यां वयश्चित्पक्षिणोऽपि वसतेर्निवासस्थानादुदपप्तन् । उत्पतंति । ये पितुभाजो हविषां संभक्तारोऽन्नस्योपार्जका वा ॥ पितुरित्यन्ननामसु पाठात् ॥ नरश्च तेऽपि चोत्पतंति । किंच हे उषो देवि त्वममा समीपे सते वर्तमानाय दाशुषे हविषां प्रदात्रे मर्त्याय भूरि प्रभूतं वामं धनं वहसि ॥

॥ इति पंचमस्य प्रथमे पंचमो वर्गः ॥

एषा स्येति षडृचं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं । अनुक्रम्यते च । एषा स्येति । उषस्यं त्विति पूर्वसूक्त उक्तत्वादिदमप्युषोदेवताकं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छंती मानुषीरजीगः ।
या भानुना रुशता राम्यास्वज्ञायि तिरस्तमसश्चिदक्तून् ॥ १ ॥

एषा । स्या । नः । दुहिता । दिवःऽजाः । क्षितीः । उच्छंती । मानुषीः । अजीगरिति ।
या । भानुना । रुशता । राम्यासु । अज्ञायि । तिरः । तमसः । चित् । अक्तून् ॥ १ ॥

एषा स्या सा दिवोजा दिवो जाता अत एव दुहिता दिवः पुत्र्युषा नोऽस्मदर्थमुच्छंती तमांसि वर्जयंती क्षितीः प्रजा मानुषीरजीगः । उद्गिरति ॥ जीगर्तिर्गिरतिकर्मा वेति यास्कः ॥ प्रकाशयतीति यावत् । या रुशता दीप्यमानेन भानुना युक्ता राम्यासु याम्यासु रात्रिषु ॥ रेफयकारयोर्व्यत्ययः ॥ अक्तूनक्ताद्दितेजांसि तमसश्चित् तमांसि च तिरस्तिरस्कुर्वत्यज्ञायि दृश्यते ॥

॥ अथ द्वितीया ॥

वि तद्ययुररुणयुग्भिरश्वैश्चित्रं भांत्युषसंश्चंद्ररथाः ।
अग्रं यज्ञस्यं बृहतो नयंतीर्वि ता बाधंते तम ऊर्म्यायाः ॥२॥

वि । तत् । ययुः । अरुणयुक्ऽभिः । अश्वैः । चित्रं । भांति । उषसंः । चंद्रऽरथाः ।
अग्रं । यज्ञस्यं । बृहतः । नयंतीः । वि । ताः । बाधंते । तमः । ऊर्म्यायाः ॥२॥

चंद्ररथाः कांतिरथाः ॥ चंद्रश्चदतेः कांतिकर्मणः । नि० ११.५. । इति यास्कः ॥ ता उषसस्तत्तदानीं प्रातःकाले बृहतो बृंहणशीलस्य यज्ञस्याग्रं मुखं नयंतीः संपादयंत्योऽरुणयुग्भिररुणवर्णयुक्तैरश्वैर्वि ययुः । विस्तीर्णं यांति । चित्रं यथा भवति तथा भांति च । ऊर्म्याया रात्रेः ॥ अक्तुरूर्म्येति रात्रिनामसु पाठात् ॥ तमो वि बाधंते । सम्यगपनयंति च ॥

॥ अथ तृतीया ॥

श्रवो वाजमिषमूर्जं वहंतीर्नि दाशुषं उषसो मर्त्याय ।
मघोनीर्वीरवत्पत्यमाना अवो धात विधते रत्नमद्य ॥३॥

श्रवः । वाजं । इषं । ऊर्जं । वहंतीः । नि । दाशुषे । उषसः । मर्त्याय ।
मघोनीः । वीरऽवत् । पत्यमानाः । अवः । धात । विधते । रत्नं । अद्य ॥३॥

हे उषसो दाशुषे हविषां दात्रे मर्त्याय श्रवः कीर्तिं वाजं बलमिषमन्नमूर्जं रसं च वहंतीर्वहंत्यो यूयं मघोनीर्धनवत्यः पत्यमाना गच्छंत्योऽद्य विधते परिचरते मह्यं वीरवत्पुत्रपौत्रादिसहितमवोऽन्नं ॥ सिनमव इत्यन्ननामसु पाठात् ॥ रत्नं धनं च ॥ भ्यात्रं रत्नमिति धननामसु पाठात् ॥ निधात । नितरां धत्त ॥

॥ अथ चतुर्थी ॥

इदा हि वो विधते रत्नमस्तीदा वीराय दाशुषं उषासः ।
इदा विप्राय जरते यदुक्था नि ष्मा मावते वहथा पुरा चित् ॥४॥

इदा । हि । वः । विधते । रत्नं । अस्ति । इदा । वीराय । दाशुषे । उषसः ।
इदा । विप्राय । जरते । यत् । उक्था । नि । स्म । माऽवते । वहथ । पुरा । चित् ॥४॥

हे उषस इदा हीदानीमेव वो युष्माकं विधते परिचरते दातुं रत्नं धनमस्ति ।

इदा हीदानीमेव वीराय प्रेरयित्रे हविषां दाशुषे यजमानाय दातुं वो रत्नमस्ति। इदा हीदानीमेव विप्राय प्राज्ञाय जरते स्तुवते दातुं वो रत्नमस्ति। यद्यस्मिन्विप्र उक्थोक्थनामकानि स्तोत्राणि विद्यंते मावते मत्सदृशाय यजमानाय तद्रत्नं वहथ। पुरा चित् पुरापि रत्नं मह्यं दत्तं ॥

॥ अथ पंचमी ॥

इदा हि त उषो अद्रिसानो गोत्रा गवामंगिरसो गृणंति।

व्य१र्केण बिभिदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः ॥५॥

इदा। हि। ते। उषः। अद्रिसानो इत्यद्रिऽसानो। गोत्रा। गवां। अंगिरसः। गृणंति।

वि। अर्केण। बिभिदुः। ब्रह्मणा। च। सत्या। नृणां। अभवत्। देवऽहूतिः ॥५॥

हे उषोऽद्रिसानो आदृतसानो ते तव प्रसादादिदा हि सद्य एव गवां गोत्रा संघानंगिरसो गृणंति। उत्सृजंति। तथा च निगमांतरं। गवां गोत्रमुदसृजो यदंगिरः। ऋग्वे० २.२३.१८.। इति। अर्केणार्चनीयेन ब्रह्मणा स्तोत्रेण विबिभिदुः। तमांसि विदारयंति च। नृणां नेतृणां तेषामंगिरसां देवहूतिर्देवविषया स्तुतिः सत्या सत्यफलाभवत् ॥

॥ अथ षष्ठी ॥

उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद्विधते मघोनि।

सुवीरं रयिं गृणते रिरीह्युरुगायमधि धेहि श्रवो नः ॥६॥

उच्छ। दिवः। दुहितरिति। प्रत्नऽवत्। नः। भरद्वाजऽवत्। विधते। मघोनि।

सुऽवीरं। रयिं। गृणते। रिरीहि। उरुऽगायं। अधि। धेहि। श्रवः। नः ॥६॥

हे दिवो दुहितरुषः प्रत्नवत्पुरातनेभ्य इव नोऽस्मदर्थमुच्छ। तमांसि वर्जय। हे मघोनि भरद्वाजवद्विधते परिचरते। भरद्वाजवदिति वचनादन्योऽप्यस्ति भरद्वाजः। तथा च ब्राह्मणं। प्राणो वै भरद्वाजवदिति। गृणते स्तुतिं कुर्वते मह्यं सुवीरं कल्याणपुत्रपौत्रादियुक्तं रयिं धनं रिरीहि। देहि। किंच नोऽस्मभ्यमुरुगायं बहुभिर्गंतव्यं श्रवोऽन्नमधि धेहि। अधिकं प्रयच्छ ॥

॥ इति पंचमस्य प्रथमे षष्ठो वर्गः ॥

वपुर्नु तदित्येकादशर्चं पंचमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मारुतं। तथा चान-

क्रम्यते । वपुर्न्वेकादश मारुतमिति ॥ व्यूळ्हे दशरात्रे षष्ठेऽहन्याग्निमारुत इदं सूक्तं मारुतनिविद्धानं । सूत्रितं च । हविष्पांतं वपुर्नु तत् । आ० ८.८.। इति ॥ वैश्वदेवे पर्वणि मारुतसप्तकपालस्य प्र चित्रमर्कमिति याज्या। प्र चित्रमर्कं गृणते नवानुयाज्याः । आ० २.१६.। इति ॥ एकादशिने मारुते पशौ प्र चित्रमर्कमित्येषैव याज्या। सूत्रितं च। प्र चित्रमर्कं गृणते तुरायारा इवेदचरमा अहेव। आ० ३.७.। इति ॥

॥ तत्र प्रथमा ॥

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानं ।

मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः ॥१॥

वपुः । नु । तत् । चिकितुषे । चित् । अस्तु । समानं । नाम । धेनु । पत्यमानं ।

मर्तेषु । अन्यत् । दोहसे । पीपाय । सकृत् । शुक्रं । दुदुहे । पृश्निः । ऊधः ॥१॥

तत्प्रसिद्धं समानमेकरूपं । मरुतः सर्वदा समानरूपाः । तथा च निगमांतरं । अज्येष्ठासो अकनिष्ठास एते । ऋग्वे० ५.६०.६.। इति । नाम स्थिराणामपि नामकं धेनु प्रीणयितृ पत्यमानं सर्वदा गच्छद्वपुर्मरुतां रूपं चिकितुषे विदुषे स्तोत्रे नु क्षिप्रमस्तु । प्रादुर्भवतु । चिदिति पूरकं । किंच तद्रूपं मर्त्येषु मर्त्यलोकेऽन्यदोषधिवनस्पत्यादिकं दोहसे कामान्दोग्धुं पीपाय । आप्याययति । किंच मरुतामेव निर्देशात्पृश्निरंतरिक्षं सकृत्संवत्सरस्य वर्षासु शुक्रं शुक्लवर्णमूध उदकं दुदुहे । क्षरति ॥

॥ अथ द्वितीया ॥

ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वावृधंत ।

अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन् ॥२॥

ये । अग्नयः । न । शोशुचन् । इधानाः । द्विः । यत् । त्रिः । मरुतः । ववृधंत ।

अरेणवः । हिरण्ययासः । एषां । साकं । नृम्णैः । पौंस्येभिः । च । भूवन् ॥२॥

ये मरुत इधाना अग्नयो न समिध्यमाना अग्नय इव शोशुचन् दीप्यंते । यद्ये मरुतो द्विर्द्विगुणं त्रिस्त्रिगुणं च ववृधंत इच्छानुरूपं वर्धंते ॥ संहितायां दीर्घश्छांदसः ॥ एषां मरुतां रथा अरेणवो रेणुरहिता हिरण्ययासो हिरण्मयालंकाराश्च भवंति । ते मरुतो नृम्णैर्धनैः पौंस्येभिर्बलैश्च साकं सार्धं भूवन् । प्रादुर्भवंति । तथा च निगमांतरं । ये पृषतीभिर्ऋष्टिभिः । ऋग्वे० १.३७.२.। इति ॥

॥ अथ तृतीया ॥

रुद्रस्य ये मीळ्हुषः संति पुत्रा यांश्चो नु दाधृविर्भरध्यै ।
विदे हि माता महो मही षा सेत्पृश्निः सुभ्वे३ गर्भमाधात् ॥३॥

रुद्रस्य । ये । मीळ्हुषः । संति । पुत्राः । यान् । चो इति । नु । दाधृविः । भरध्यै ।
विदे । हि । माता । महः । मही । सा । सा । इत् । पृश्निः । सुऽभ्वे । गर्भं । आ । अधात् ॥३॥

मीळ्हुषः सेक्तू रुद्रस्य पुत्रा ये मरुतः संति दाधृविर्धरित्री पृश्निरंतरिक्षं यांश्चो नु यांश्च मरुतो नु भरध्यै भर्तुं क्षमा भवति । विदे हि सर्वज्ञाता हि महो महतामेषां माता सा पृश्निर्मही महती । किंच सा पृश्निः सुभ्वे नृणां सम्यक् भवनाय गर्भमुदकमाधात् । आदधाति ॥

॥ अथ चतुर्थी ॥

न य ईषंते जनुषोऽया न्व१ंतः संतोऽवद्यानि पुनानाः ।
निर्यद्दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ॥४॥

न । ये । ईषंते । जनुषः । अया । नु । अंतरिति । संतः । अवद्यानि । पुनानाः ।
निः । यत् । दुह्रे । शुचयः । अनु । जोषं । अनु । श्रिया । तन्वं । उक्षमाणाः ॥४॥

ये प्रसिद्धा मरुतो जनुषो जनान् स्तोतॄन्प्रत्ययायेन गमनसाधनेन नेषंते न गच्छंति । किं तेषां रक्षणीयत्वाभावाद्गमनाभावो नेत्याह । अंतः संतः सर्वेषां हृदि वर्तमाना एवावद्यानि पापानि पुनानाः शोधयंतः । तथा च निगमांतरं । प्राणा वै मरुतः स्वापय इति । अतः सर्वप्राणिनां हृदि वर्तमानानां तेषां गमनं नास्तीति । अध्यात्मं प्राणरूपेणावस्थानं दर्शितं भवति शीघ्रगामित्वं तु तेषामधिदैवतरूपेणेति द्रष्टव्यं । यद्यदा शुचयो दीप्यमाना मरुतो जोषमनु स्तोतॄणां काममनु निर्दुह्रे नितरां दुहंत्युदकं । तथा श्रिया दीप्त्यान्वनुगतास्तन्वमात्मीयं शरीरं प्रकाशयंत उक्षमाणा भूमिं सिंचंतो भवंति । यद्वा तन्वं विस्तीर्णं यथा भवति तथोक्षमाणा भूमिं सिंचंतो भवंतीत्यर्थः ॥

॥ अथ पंचमी ॥

मक्षू न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः ।
न ये स्तौना अयासो मह्ना नू चित्सुदानुरव यासदुग्रान् ॥५॥

मक्षु। न। येषु। दोहसे। चित्। अयाः। आ। नाम। धृष्णु। मारुतं। दधानाः।
न। ये। स्तौनाः। अयासः। मह्ना। नु। चित्। सुऽदानुः। अव। यासत्। उग्रान् ॥५॥

येषु प्रसिद्धेषु मरुत्सु धृष्णु धर्षकं मारुतं नाम मरुत्संज्ञकं शस्त्रमादधाना उच्चारयंतोऽया उपगच्छंतः स्तोतारो मक्षु क्षिप्रं दोहसे कामान्दोग्धुं क्षमा भवंति। नेति संप्रत्यर्थे। ये स्तौनाः स्तेनास्तिरोहिता वा स्तोतृधनानामपहर्तारोऽयासो गंतारो भवंति। मह्ना महत्त्वेन युक्ताश्च भवंति उग्रान्तान्क्रुद्धान् सुदानुः शोभनहविर्धानो यजमानोऽवयासत्। अवयजते। अपगतक्रोधान् करोति। नेति संप्रत्यर्थे ॥

॥ इति पंचमस्य प्रथमे सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

त इदुग्राः शवसा धृष्णुषेणा उभे युजंत रोदसी सुमेके।
अध स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः ॥६॥

ते। इत्। उग्राः। शवसा। धृष्णुऽसेनाः। उभे इति। युजंत। रोदसी इति।
सुमेके इति सुऽमेके।
अध। स्म। एषु। रोदसी। स्वऽशोचिः। आ। अमवत्ऽसु। तस्थौ। न। रोकः ॥६॥

ते मरुत उग्रा शवसा बलेन वेगेन युक्ता धृष्णुषेणा धर्षकसेनाः सुमेके सुरूपे उभे रोदसी द्यावापृथिव्यौ युजंत। योजयंति। वृष्ट्या पृथिवीं तर्पयंतीत्यभिप्रायः। अध स्मापि चैषु येषु मरुत्सु रोदसी रुद्रस्य पत्नी माध्यमिकी वाक् स्वशोचिः स्वदीप्तिर्वर्ततेऽमवत्सु बलवत्सु तेषु रोको दीप्तिबाधको वा नातस्थौ। न तिष्ठति। न निःसरत्येवेत्यर्थः ॥

॥ अथ सप्तमी ॥

अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः।
अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन् ॥७॥

अनेनः। वः। मरुतः। यामः। अस्तु। अनश्वः। चित्। यं। अजति। अरथीः।
अनवसः। अनभीशुः। रजःऽतूः। वि। रोदसी इति। पथ्याः। याति। साधन् ॥७॥

हे मरुतो वो युष्माकं संबंधी यामो रथोऽनेनः पापरहितं यथा भवति

तथास्तु । प्रादुर्भवतु । किंच यं याममरथीः । रथिः सारथिः । न रथिररथीः । असारथिरपि स्तोताजति प्रेरयति स रथोऽनश्वश्चिदश्वरहितोऽप्यनवसः पथ्यदनरहितोऽनभीशुः पाशरहितोऽपि रजस्तूरुदकस्य प्रेरकः साधन् स्तोतृणां कामान् साधयन् रोदसी द्यावापृथिव्यौ पथ्याः पथोऽंतरिक्षमार्गान् वि याति । विविधं गच्छति ॥

॥ अथाष्टमी ॥

नास्य॑ व॒र्ता न त॑रु॒ता न्व॑स्ति॒ मरु॑तो॒ यमव॑थ॒ वाज॑सातौ ।
तो॒के वा॒ गोषु॒ तन॑ये॒ यम॒प्सु स व्र॒जं द॒र्ता पार्ये॒ अध॒ द्योः ॥८॥
न । अ॒स्य॒ । व॒र्ता । न । त॒रु॒ता । नु । अ॒स्ति॒ । मरु॑तः । यं । अव॑थ । वाज॑ऽसातौ ।
तो॒के । वा॒ । गोषु॑ । तन॑ये । यं । अ॒प्ऽसु । सः । व्र॒जं । द॒र्ता । पार्ये॑ । अध॑ । द्योः ॥८॥

हे मरुतो वाजसातौ संग्रामे यमवथ रक्षथ अस्य जनस्य वर्ता प्रेरको नास्ति । अस्य तरुता नु हिंसिता च नास्ति । अधापि च तोके पुत्रे तनये पौत्रे धने वा गोषु वाप्सु वा निमित्तभूतेषु यमवथ स पार्ये संग्रामे द्योर्दीप्तस्यापि विजिगीषोर्वा शत्रोर्व्रजं गवां संघं दर्ता दारयिता भवति ॥

॥ अथ नवमी ॥

प्र चि॒त्रम॒र्कं गृ॑ण॒ते तु॒राय॒ मारु॑ताय॒ स्वत॑वसे भरध्वं ।
ये सहां॑सि॒ सह॑सा॒ सह॑न्ते॒ रेज॑ते अग्ने पृथि॒वी म॒खेभ्यः॑ ॥९॥
प्र । चि॒त्रं । अ॒र्कं । गृ॒ण॒ते । तु॒राय॑ । मारु॑ताय । स्वऽत॑वसे । भ॒र॒ध्वं॒ ।
ये । सहां॑सि । सह॑सा । सह॑न्ते । रेज॑ते । अ॒ग्ने॒ । पृ॒थि॒वी । म॒खेभ्यः॑ ॥९॥

हे अग्ने गृणते शब्दं कुर्वते स्तूयमानाय वा तुराय त्वरिताय स्वतवसे स्वभूतबलाय मारुताय मरुतां गणाय चित्रं दर्शनीयमर्कमन्नं हविः ॥ स्वधार्क इत्यन्ननामसु पाठात् ॥ प्रभरध्वं । त्वत्सहायभूता ऋत्विजस्त्वं च सर्वे यूयं प्रभरत ॥ यथा लोके बहुष्वेककार्यकरेषु मुख्यमेकं संबोध्य यूयमेवं कुरुतेति प्रार्थना तद्वदत्रापि मुख्यमग्निमेकमेव संबोध्य प्रभरध्वमिति बहुवचनप्रयोगः ॥ ये मरुतः सहांसि शत्रूणां बलानि सहसा बलेन सहंते अभिभवंति मखेभ्यो मंहनीयेभ्यो मरुद्भ्यो भयात्पृथिवी रेजते । कंपते ॥ मारुतायेति तद्धितवृत्तावंतर्भूतानामपि मरुतां बुद्ध्या

प्रविभागात् य इति प्रत्ययमर्थः। यथा महाभाष्ये। अथ शब्दानुशासनं। केषां शब्दानामिति। यथा वा लोके। राजपुरुष इत्युक्ते कस्य राज्ञ इति ॥

॥ अथ दशमी ॥

त्विषीमंतो अध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वो३ नाग्नेः।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥१०॥
त्विषिऽमंतः। अध्वरस्यऽइव। दिद्युत्। तृषुऽच्यवसः। जुह्वः। न। अग्नेः।
अर्चत्रयः। धुनयः। न। वीराः। भ्राजत्ऽजन्मानः। मरुतः। अधृष्टाः ॥१०॥

मरुतोऽध्वरस्येव यज्ञस्येव दिद्युत् द्योतमानास्तृषुच्यवसः क्षिप्रगमना अग्नेर्जुह्वो न रश्मय इव त्विषीमंतो दीप्तिमंतोऽर्चत्रयोऽर्चनीया धुनयो न सपत्नान्कंपयंत इव वीराः शूरा भ्राजज्जन्मानो दीप्तशरीरा अधृष्टाः परैरनभिभूताश्च भवंति ॥

॥ अथैकादशी ॥

तं वृधंतं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे।
दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन् ॥११॥
तं। वृधंतं। मारुतं। भ्राजत्ऽऋष्टिं। रुद्रस्य। सूनुं। हवसा। आ। विवासे।
दिवः। शर्धाय। शुचयः। मनीषाः। गिरयः। न। आपः। उग्राः। अस्पृध्रन् ॥११॥

तं प्रसिद्धं वृधंतं वर्धमानं भ्राजदृष्टिं भ्राजमानर्ष्टिं रुद्रस्य सूनुं पुत्रं मारुतं मरुद्गणं हवसा स्तोत्रेणाविवासे। परिचरामि। किंच दिवः स्तोतुः शुचयो निर्मलाः मनीषाः स्तुतय उग्रा उद्गूर्णाः शर्धाय मारुताय बलाय॥ तृक्षः शर्ध इति बलनामसु पाठात्॥ आप आप्नुवंतो गिरयो न मेघा इव॥ गिरिर्व्रज इति मेघनामसु पाठात् ॥ अस्पृध्रन्। अस्पर्धंत ॥

॥ इति पंचमस्य प्रथमेऽष्टमो वर्गः ॥

विश्वेषां व इत्येकादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मैत्रावरुणं। तथा चानुक्रम्यते। विश्वेषां मैत्रावरुणमिति ॥ सूक्तविनियोगो लैंगिकः। मैत्रावरुणे पशावा यातं मित्रावरुणेति पशुपुरोडाशस्यानुवाक्या। सूचितं च। आ यातं मित्रावरुणा सुशस्त्या नो मित्रावरुणा हव्यजुष्टिं। आ० ३.८.। इति ॥ व्यूळ्हे

दशरात्रे सप्तमेऽहनि प्रउगशस्त्रे प्र मद्वामिति मैत्रावरुणस्तृतीयस्तृचः। सूचितं च। प्र मद्वां मित्रावरुणा स्पूर्धन्ना गोमता नासत्या रथेन। आ० ८.९। इति ॥

॥ तत्र प्रथमा ॥

विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै।
सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः ॥१॥

विश्वेषां। वः। सतां। ज्येष्ठऽतमा। गीःऽभिः। मित्रावरुणा। ववृधध्यै।
सं। या। रश्माऽइव। यमतुः। यमिष्ठा। द्वा। जनान्। असमा। बाहुऽभिः। स्वैः ॥१॥

विश्वेषां सतां मध्ये ज्येष्ठतमा ज्येष्ठतमौ मित्रावरुणौ वो वां गीर्भिः स्तुतिभिर्ववृधध्यै वर्धयितुं प्रवृत्तोऽस्मि। या यौ द्वा द्वौ सहितावसमा विषमौ। चिरश्विं हंति चतुरश्रिरुग्रः। ऋग्वे० १.१५२.२.। इति निगमांतरेणासाम्यं दर्शितं। यमिष्ठा यंतृतमौ स्वैरात्मीयैर्बाहुभी रश्मेव रश्मिनेवाश्वान् जनान् संयमतुः संयच्छतः। बाहुभिरिति बहुवचनं पूजार्थं ॥

॥ अथ द्वितीया ॥

इयं मद्वां प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिरच्छ।
यंतं नो मित्रावरुणावधृष्टं छर्दिर्यद्वां वरूथ्यं सुदानू ॥२॥

इयं। मत्। वां। प्र। स्तृणीते। मनीषा। उप। प्रिया। नमसा। बर्हिः। अच्छ।
यंतं। नः। मित्रावरुणौ। अधृष्टं। छर्दिः। यत्। वां। वरूथ्यं। सुदानू इति सुऽदानू ॥२॥

हे मित्रावरुणौ वां युवां मत् ममेयं मनीषा स्तुतिः प्रस्तृणीते। प्रच्छादयति। प्रिया हे प्रियौ युवां नमसान्नेन हविषा सहोपगच्छति च। युवयोर्बर्हिर्यज्ञमच्छाभिगच्छति च। हे मित्रावरुणौ नोऽस्मभ्यमधृष्टमनभिभूतं छर्दिर्गृहं यंतं। प्रयच्छतं। हे सुदानू शोभनदानौ वां युवयोः संबंधि युवाभ्यां देयं यद्गृहं वरूथ्यं शीतवातातपानां वारयितृ भवति ॥

॥ अथ तृतीया ॥

आ यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना।
सं यावप्नःस्थो अपसेव जनाञ्छ्रुधीयतश्चिद्यतथो महित्वा ॥३॥

आ। यातं। मित्रावरुणा। सुऽशस्ति। उप। प्रिया। नमसा। हूयमाना।

सं। यौ। अप्नःऽस्थः। अपसाऽइव। जनान्। श्रुधिऽयतः। चित्। यतथः। महिऽत्वा ॥३॥

हे मित्रावरुणौ सुशस्ति शोभनशंसनं नमसान्नेन हविषा स्तोत्रेण वा हूयमाना स्तूयमानौ प्रिया विश्वस्य प्रियावुपायातं। उपागच्छतं। यौ महित्वा महत्त्वेन युक्तौ युवां श्रुधीयतः श्रुधिमन्नं यशो वात्मन इच्छतो जनान् अप्नःस्थः कर्मण्यधिकृतः पुरुषः ॥ अप अप्न इति कर्मनामसु पाठात् ॥ अपसेव कर्मणेव संयतथः संयच्छथः ॥

॥ अथ चतुर्थी ॥

अश्वा न या वाजिना पूतबंधू ऋता यद्गर्भमदितिर्भरध्यै।

प्र या महि महांता जायमाना घोरा मर्ताय रिपवे नि दीधः ॥४॥

अश्वा। न। या। वाजिना। पूतबंधू इति पूतऽबंधू। ऋता। यत्। गर्भं। अदितिः। भरध्यै।

प्र। या। महि। महांता। जायमाना। घोरा। मर्ताय। रिपवे। नि। दीधरिति दीधः ॥४॥

या यावश्वा नाश्वाविव वाजिना वाजिनौ बलिनौ पूतबंधू पूतस्तोत्रावृता सत्यौ च। यत् यौ गर्भं गर्भभूतावदितिर्देवी भरध्यै बभार। किंच या यौ जायमाना जायमानावेव महि महतो महांता महत्तरौ प्रभूतौ मित्रावरुणौ मर्ताय मर्त्याय रिपवे हिंसकाय घोरा घोरौ घातकौ निदीधः निदधारादितिः स्वोदरे ॥

॥ अथ पंचमी ॥

विश्वे यद्वां मंहना मंदमानाः क्षत्रं देवासो अदधुः सजोषाः।

परि यद्भूथो रोदसी चिदुर्वी संति स्पशो अदब्धासो अमूराः ॥५॥

विश्वे। यत्। वां। मंहना। मंदमानाः। क्षत्रं। देवासः। अदधुः। सऽजोषाः।

परि। यत्। भूथः। रोदसी इति। चित्। उर्वी इति। संति। स्पशः। अदब्धासः। अमूराः ॥५॥

विश्वे सर्वे देवासो देवाः सजोषाः परस्परं प्रीतियुक्ता यद्यौ वां युवां मंहना महत्त्वेन मंदमानाः स्तुवंतः क्षत्रं बलमदधुः धत्तवंतः। किंच यद्यौ युवामुर्वी विस्तीर्णे रोदसी द्यावापृथिव्यौ परिभूथः परिभवथः तयोर्युवयोरदब्धासोऽहिंसिता अमूरा अमूढाः स्पशो रश्मयश्चरा वा संति ॥

॥ इति पंचमस्य प्रथमे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

ता हि क्षत्रं धारयेथे अनु द्यून्दृंहेथे सानुमुपमादिव द्योः ।
दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां धासिनायोः ॥ ६ ॥

ता । हि । क्षत्रं । धारयेथे इति । अनु । द्यून् । दृंहेथे इति । सानुं । उपमात्ऽइव । द्योः ।
दृळ्हः । नक्षत्रः । उत । विश्वऽदेवः । भूमिं । आ । अतान् । द्यां । धासिना । आयोः ॥ ६ ॥

ता तौ मित्रावरुणौ युवामनु द्यून् दिवसे दिवसे क्षत्रं बलं धारयेथे हि । द्योरंतरिक्षस्य सानुं समुच्छ्रितप्रदेशं मेघं सूर्यं वा दृंहेथे । दृढीकुरुतं । उपमादिव । उपमीयते प्रक्षिप्यत इत्युपमात्स्थूणा । सा यथा वत्सं धारयति तद्वदित्यर्थः । दृळ्हो युवाभ्यां दृढीकृतश्च मेघो नक्षत्रोऽंतरिक्षं व्याप्नुवान उतापि च विश्वदेवः सूर्यो भूमिं द्यां दिवं चायोर्मनुष्यस्य ॥ दुह्यव आयव इति मनुष्यनामसु पाठात् ॥ धासिनान्नेन हविषा ॥ क्षुत् धासिरित्यन्ननामसु पाठात् ॥ आप्यायितः सन् आतान् । आतनोति युवाभ्यां दृढीकृत एव ॥

॥ अथ सप्तमी ॥

ता विप्रं धैथे जठरं पृणध्या आ यत्सद्म सभृतयः पृणंति ।
न मृष्यंते युवतयोऽवाता वि यत्पयो विश्वजिन्वा भरंते ॥ ७ ॥

ता । विप्रं । धैथे इति । जठरं । पृणध्यै । आ । यत् । सद्म । सऽभृतयः । पृणंति ।
न । मृष्यंते । युवतयः । अवाताः । वि । यत् । पयः । विश्वऽजिन्वा । भरंते ॥ ७ ॥

ता तौ मित्रावरुणौ युवां विप्रं प्राज्ञं यजमानं ॥ विप्रो विप्र इति मेधाविनामसु पाठात् ॥ धैथे धारयथो जठरमुदरं पृणध्यै सोमेन पूरयितुं । यद्यदा सभृतयः सह भ्रियमाणा ऋत्विजः सद्म यज्ञसदनमापृणंति आपूरयंति । विश्वजिन्वा हे विश्वजिन्वानौ यद्यदा पयो जलं भवद्भ्यां प्रहितं तदा युवतयो नद्यो दिशो वा न मृष्यंते । रजसा नाभिभूयंते । अवाता अशुष्काश्च वि भरंते । विभूतिं धारयंति ॥

॥ अथाष्टमी ॥

ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरतिर्ऋते भूत् ।
तद्वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः ॥ ८ ॥

ता। जिह्वया। सदं। आ। इदं। सुऽमेधाः। आ। यत्। वां। सत्यः। अरतिः। ऋते। भूत्।

तत्। वां। महिऽत्वं। घृतऽअन्नौ। अस्तु। युवं। दाशुषे। वि। चयिष्टं। अंहः ॥८॥

ता तौ मित्रावरुणौ युवां सुमेधाः प्राज्ञो जिह्वया वाचा सदं सर्वदेदं जलमा याचते। आ इत्युपसर्गदर्शनाद्योग्यक्रियाध्याहाराद्याचत इत्याध्याह्रियते। पूर्वस्या-मृचि जलस्य प्रकृतत्वात् बुद्धौ विपरिवर्तमानं जलमिदंशब्देन परामृश्यते। यद्यदा वां युवयोररतिरभिगंता ऋते यज्ञे सत्यो मायारहित आभूत् आभवति हे घृतान्नौ तन्महित्वमपेक्षितप्रदातृत्वलक्षणं वां युवयोरस्तु। किंच युवं युवां दाशुषे दाशुषो यजमानस्य ॥ षष्ठ्यर्थे चतुर्थी ॥ अंहः पापं विचयिष्टं। विना-शयतमित्यर्थः ॥

॥ अथ नवमी ॥

प्र यद्वां मित्रावरुणा स्पूर्धन्प्रिया धाम युवधिता मिनंति।

न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ॥९॥

प्र। यत्। वां। मित्रावरुणा। स्पूर्धन्। प्रिया। धाम। युवऽधिता। मिनंति।

न। ये। देवासः। ओहसा। न। मर्ताः। अयज्ञऽसाचः। अप्यः। न। पुत्राः ॥९॥

हे मित्रावरुणौ वां युवयोः प्रिया प्रियाणि धाम धामानि कर्माणि युवधिता युवाभ्यां विहितानि यद्येऽयजंतो जनाः स्पूर्धन् स्पर्धमानाः प्रमिनंति हिंसंति। ये च देवासो देवा ओहसा वहनसाधनेन स्तोत्रेण न युज्यंते। मर्ता मनुष्या-श्चौहसा न युज्यंते। ये चाप्यः। अपः कर्म। तद्वंतोऽयज्ञसाचो न यज्ञयुक्ताः वृथाकर्माणि कुर्वत इत्यर्थः। ये च न पुत्राः। पृणंतीति पुत्राः। न पुत्रा अपु॰ । इत्यर्थः। तान् सर्वान्विचयिष्टमित्यनुषज्यते ॥

॥ अथ दशमी ॥

वि यद्वाचं कीस्तासो भरंते शंसंति के चिन्निविदो मनानाः।

आद्वां ब्रवाम सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा ॥१०॥

वि। यत्। वाचं। कीस्तासः। भरंते। शंसंति। के। चित्। निऽविदः। मनानाः।

आत्। वां। ब्रवाम। सत्यानि। उक्था। नकिः। देवेभिः। यतथः। महिऽत्वा ॥१०॥

यद्यदा कीस्तासो मेधाविन उशाताः ॥ उशिजः कीस्तास इति मेधाविनामसु पाठात् ॥ वाचं स्तुतिं वि भरंते पृथक् उच्चारयंति तदा केचिदनृता मनाना अग्न्यादीन् स्तुवंतो निविदः शंसंति । आतथा सति वां युवाभ्यां सत्यान्युक्थानि स्तोत्राणि वयं ब्रवाम । महित्वा महत्त्वेन देवेभिरन्यैर्देवैः सह नकिर्यतथः । न गच्छथः ॥

॥ अथैकादशी ॥

अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु ।

अनु यद्गावः स्फुरानृजिप्यं धृष्णुं यद्रणे वृषणं युनजन् ॥११॥

अवोः । इत्था । वां । छर्दिषः । अभिष्टौ । युवोः । मित्रावरुणौ । अस्कृधोयु ।

अनु । यत् । गावः । स्फुरान् । ऋजिप्यं । धृष्णुं । यत् । रणे । वृषणं । युनजन् ॥११॥

हे मित्रावरुणाववोरवतोर्वां युवयोरभिष्टावभिगमने छर्दिषो गृहाय सुखाय वा ॥ चतुर्थ्यर्थे षष्ठी ॥ युवामभिगतेषु स्तोतृषु युवोर्युवयोः संबंधि युवाभ्यां देयं तद्गृहादिकमस्कृधोयुर्विच्छिन्नं भवति । तथा च यास्कः । अस्कृधोयुरकृध्वायुः । कृध्विति ह्रस्वनाम निकृत्तं भवति । नि० ६.३. । इति । इत्था सत्यमेव । कदा मित्रावरुणयोरभिगमनमित्यत आह । यद्यदा गावः स्तुतयोऽनुस्फुरान् अनुस्फुरेयुः । यदा च ऋजिप्यमृजुगामिनं धृष्णुं शत्रूणां धर्षकं वृषणं कामानां वर्षितारं सोमं रणे रमणे यज्ञे युनजन् यजमाना युंज्युः ॥

॥ इति पंचमस्य प्रथमे दशमो वर्गः ॥

श्रुष्टी वामित्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रावरुणं । तथा चानुक्रम्यते । श्रुष्टी वामैंद्रावरुणमुपांत्ये जगत्याविति । प्र सम्राज इंद्रावरुणा सुतपावित्येते जगत्यौ शिष्टास्त्रिष्टुभः । इंद्रावरुणौ देवता ॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने होत्रकशस्त्रेषु स्तोमवृद्धौ मैत्रावरुणस्येदमावापार्थं सूक्तं । सूचितं च । श्रुष्टी वां यज्ञो युवां नरा । आ० ७.९. । इति ॥ तृतीयसवन इंद्रावरुणा सुतपाविमं सुतमिति प्रशास्तुः प्रस्थितयाज्या । सूचितं च । इंद्रावरुणा सुतपाविमं सुतमिंद्रश्च सोमं पिबतं बृहस्पते । आ० ५.५. । इति ॥ उक्थ्ये तृतीयसवन इंद्रावरुणा मधुमत्तमस्येति मैत्रावरुणस्य शस्त्रयाज्या । सूचितं च । इंद्रावरुणा मधुमत्तमस्येति याज्या । आ० ६.१. । इति ॥

॥ तत्र प्रथमा ॥

श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद्वृक्तबर्हिषो यजध्यै ।
आ य इंद्रावरुणाविषे अद्य महे सुम्नाय मह आववर्तत् ॥१॥
श्रुष्टी । वां । यज्ञः । उत्ऽयतः । सऽजोषाः । मनुष्वत् । वृक्तऽबर्हिषः । यजध्यै ।
आ । यः । इंद्रावरुणौ । इषे । अद्य । महे । सुम्नाय । महे । आऽववर्तत् ॥१॥

महे मंहनीयौ हे इंद्रावरुणौ वां युवयोरर्थे श्रुष्टी क्षिप्रं । तथा च यास्कः । श्रुष्टीति क्षिप्रनाम श्रु अष्टीति । यज्ञः सोमः सजोषा ऋत्विग्भिः सहितोऽद्या समंतादुद्यतः प्रवृत्तः । यः सोमो मनुष्वत् मनोरिव वृक्तबर्हिषः स्तीर्णबर्हिषो यजमानस्येषेऽन्नार्थं महे महते सुम्नाय सुखाय च यजध्यै यष्टुं वामाववर्तत् आवर्तयति ॥

॥ अथ द्वितीया ॥

ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतं ।
मघोनां मंहिष्ठा तुविशुष्म ऋतेन वृत्रतुरा सर्वसेना ॥२॥
ता । हि । श्रेष्ठा । देवऽताता । तुजा । शूराणां । शविष्ठा । ता । हि । भूतं ।
मघोनां । मंहिष्ठा । तुविऽशुष्मा । ऋतेन । वृत्रऽतुरा । सर्वऽसेना ॥२॥

हे इंद्रावरुणौ ता तौ प्रसिद्धौ युवां श्रेष्ठा श्रेष्ठौ देवताता देवतातौ यज्ञे ॥ इष्टिर्देवतातेति यज्ञनामसु पाठात् ॥ तुजा धनानां प्रेरकौ हि भूतं । भवतं । किंच ता तौ हि युवां शूराणां मध्ये शविष्ठातिशयेन बलवंतौ भूतं । किंच मघोनां दानवतां मंहिष्ठा दातृतमौ तुविशुष्मा बहुबलावृतेन सत्येन वृत्रतुरा शत्रूणां हिंसकौ सर्वसेना कृत्स्नसेनौ च भूतमिति ॥

॥ अथ तृतीया ॥

ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिंद्रावरुणा चकाना ।
वज्रेणान्यः शवसा हंति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः ॥३॥
ता । गृणीहि । नमस्येभिः । शूषैः । सुम्नेभिः । इंद्रावरुणा । चकाना ।
वज्रेण । अन्यः । शवसा । हंति । वृत्रं । सिसक्ति । अन्यः । वृजनेषु । विप्रः ॥३॥

हे भरद्वाज नमस्येभिः स्तुत्यैः शूषैर्बलैः ॥ शूषमिति बलनामसु पाठात् ॥ सुखेभिः सुखैश्च सर्वैश्चकाना स्तुतौ ॥ कायतिः शब्दकर्मा । तस्य लिटः कानचि रूपमिदं ॥ ता ताविंद्रावरुणौ गृणीहि । स्तुहि । अन्यस्तयोरन्य इंद्रो वृत्रं वृषनामकमसुरं वज्रेण हंति । अन्यो वरुणो विप्रः प्राज्ञो वृजनेषु स्तोतृणामुपद्रवेषु रक्षितुं शवसा बलेन सिषक्ति । संगच्छते ॥

॥ अथ चतुर्थी ॥

ग्राश्च यन्नरश्च वावृधंत विश्वे देवासो नरां स्वगूर्ताः ।
प्रैभ्य इंद्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी ॥४॥

ग्राः । च । यत् । नरः । च । ववृधंत । विश्वे । देवासः । नरां । स्वऽगूर्ताः ।
प्र । एभ्यः । इंद्रावरुणा । महिऽत्वा । द्यौः । च । पृथिवि । भूतं । उर्वी इति ॥४॥

नरां नृणां मनुष्याणां मध्ये ग्राश्च स्त्रियश्च ॥ मेना ग्रा इति स्त्रीणामिति यास्कवचनात् ॥ नरश्च पुरुषाश्च विश्वे सर्वे देवासो देवाः ॥ देवास इत्यत्र पुमान् स्त्रियेत्येकशेषात् देव्यश्च देवाश्च देवास इति निर्देशः पुंवन्निर्देशः ॥ स्वगूर्ताः स्वयमुद्यता यद्यदा ववृधंत स्तुतिभिर्वर्धयंते तदा हे इंद्रावरुणौ महित्वा महत्त्वयुक्तावेभ्यः स्तोतृभ्यः प्रभूतं । प्रभवतं । हे द्यौः पृथिवि चोभे उर्वी विस्तीर्णे युवामेभ्यः प्रभूतमित्यनुषंगः ॥

॥ अथ पंचमी ॥

स इत्सुदानुः स्ववाँ ऋतावेंद्रा यो वां वरुण दाशति त्मन् ।
इषा स द्विषस्तरेद्दास्वान्वंसद्रयिं रयिवतश्च जनान् ॥५॥

सः । इत् । सुऽदानुः । स्वऽवान् । ऋतऽवा । इंद्र । यः । वां । वरुण । दाशति । त्मन् ।
इषा । सः । द्विषः । तरेत् । दास्वान् । वंसत् । रयिं । रयिऽवतः । च । जनान् ॥५॥

हे इंद्रेंद्रौ वरुणा हे वरुणौ ॥ इतरेतरयोगादुभयत्र द्विवचनप्रयोगः । वरुणेत्यत्र संहितायां ह्रस्वश्छांदसः ॥ वां युवाभ्यां यो यजमानस्त्मन् आत्मनैव दाशति । हवींषि ददाति । स इत् स एव सुदानुः शोभनदानो भवति । स्ववान् धनवांश्च ऋतावान् यज्ञवांश्च भवति । किंच स दास्वान् दानवान् द्विषो द्वेष्टॄरिषान्नेन

जयलब्धेन सह तरेत् । प्राप्नोत् । अपि च रयिं धनं रयिवतो धनवतो जनान् पुत्रांश्च वंसत् । संभजेत् ॥

॥ इति पंचमस्य प्रथम एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमंतं पुरुक्षुं ।

अस्मे स इंद्रावरुणावपि ष्यात्प्र यो भनक्ति वनुषामशस्तीः ॥६॥

यं । युवं । दाशुऽअध्वराय । देवा । रयिं । धत्थः । वसुऽमंतं । पुरुऽक्षुं ।

अस्मे इति । सः । इंद्रावरुणौ । अपि । स्यात् । प्र । यः । भनक्ति । वनुषां । अशस्तीः ॥६॥

देवा देवौ स्तूयमानौ हे इंद्रावरुणौ युवं युवां दाश्वध्वराय दत्तहविष्काय वसुमंतं धनानुबंधिनं पुरुक्षुं बह्वन्नं पूर्णयशस्कं वा यं यादृशं रयिं धनं धत्थः प्रयच्छथः । योऽपि च वनुषां हिंसकानामशस्तीरकीर्तीः । शत्रुकृतान्ययशांसीत्यर्थः प्रभनक्ति प्ररुजति स तादृशो रयिरस्मे अस्मासु स्यात् । भूयात् ॥

॥ अथ सप्तमी ॥

उत नः सुत्रात्रो देवगोपाः सूरिभ्य इंद्रावरुणा रयिः ष्यात् ।

येषां शुष्मः पृतनासु साह्वान्प्र सद्यो द्युम्ना तिरते ततुरिः ॥७॥

उत । नः । सुऽत्रात्रः । देवऽगोपाः । सूरिऽभ्यः । इंद्रावरुणा । रयिः । स्यात् ।

येषां । शुष्मः । पृतनासु । सह्वान् । प्र । सद्यः । द्युम्ना । तिरते । ततुरिः ॥७॥

उतापि चेंद्रावरुणा हे इंद्रावरुणौ सूरिभ्यः स्तोतृभ्यो नोऽस्मभ्यं सुत्रात्रः सुरक्षो देवगोपाः । देवा गोपा गोप्तारो यस्य स तथाविधः । रयिर्धनं स्यात् भूयात् । किंच येषामस्माकं शुष्मो बलं पृतनासु युद्धेषु साह्वान् शत्रूणामभिभविता ततुरिर्हिंसकश्च सन् द्युम्ना यशांसि सद्य एव प्रतिरते सम्यक्तिरस्कुर्यात् ॥

॥ अथाष्टमी ॥

नू न इंद्रावरुणा गृणाना पृंक्तं रयिं सौश्रवसाय देवा ।

इत्था गृणंतो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ॥८॥

नु । नः । इंद्रावरुणा । गृणाना । पृंक्तं । रयिं । सौश्रवसाय । देवा ।
इत्था । गृणंतः । महिनस्य । शर्धः । अपः । न । नावा । दुःऽइता । तरेम ॥८॥

हे इंद्रावरुणेंद्रावरुणौ गृणाना स्तूयमानौ युवां नोऽस्मभ्यं सौश्रवसाय । सुश्रवसो भावः सौश्रवसं । तस्मै सुश्रवस्त्वाय रयिं धनं नु क्षिप्रं पृंक्तं । प्रयच्छतं । किंच हे देवा देवौ महिनस्य महतोर्युवयोः शर्धो बलमित्थेत्थं गृणंतः स्तुवंतो वयं दुरिता दुरितानि नावापो न उदकानीव तरेम ॥

॥ अथ नवमी ॥

प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः ।
अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा ॥९॥

प्र । संऽराजे । बृहते । मन्म । नु । प्रियं । अर्च । देवाय । वरुणाय । सऽप्रथः ।
अयं । यः । उर्वी इति । महिना । महिऽव्रतः । क्रत्वा । विऽभाति । अजरः । न ।
शोचिषा ॥९॥

हे स्तोतः सम्राज आज्ञया राज्ञां शासकाय बृहते परिवृढाय देवाय द्योतमानाय वरुणाय प्रियं मनोहरं सप्रथः सर्वतः पृथु । तथा च यास्कः । सप्रथाः सर्वतः पृथुरिति । मन्म स्तोत्रं नु अद्य प्रार्च । प्रोच्चारय । अयं यो योऽयं वरुणो महिना महिम्ना युक्तो महिव्रतो महाकर्मा क्रत्वा प्रज्ञया च युक्तः शोचिषा तेजसा युक्तोऽजरो न जरारहितश्चोर्वी विस्तीर्णे द्यावापृथिव्यौ विभाति विभासयति ॥

॥ अथ दशमी ॥

इंद्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता ।
युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये ॥१०॥

इंद्रावरुणा । सुतऽपौ । इमं । सुतं । सोमं । पिबतं । मद्यं । धृतऽव्रता ।
युवोः । रथः । अध्वरं । देवऽवीतये । प्रति । स्वसरं । उप । याति । पीतये ॥१०॥

इंद्रावरुणा हे इंद्रावरुणौ सुतपौ सुतस्य सोमस्य पातारौ युवां मद्यं मदकरं सुतमभिषुतमिमं सोमं पिबतं । किंच हे धृतव्रता धृतकर्माणौ युवोर्युवयो रथोऽध्व-

रमुद्दिश्य देववीतये देवानां पानार्थं पीतये युवयोरपि सोमपानार्थं स्वसरं मार्गं प्रत्युपयाति ॥

॥ अथैकादशी ॥

इंद्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथां ।

इदं वामंधः परिषिक्तमस्मे आसद्यास्मिन्बर्हिषि मादयेथां ॥११॥

इंद्रावरुणा । मधुमत्ऽतमस्य । वृष्णः । सोमस्य । वृषणा । आ । वृषेथां ।

इदं । वां । अंधः । परिऽसिक्तं । अस्मे इति । आऽसद्य । अस्मिन् । बर्हिषि । मादयेथां ॥११॥

इंद्रावरुणा हे इंद्रावरुणौ वृषणा कामानां वर्षितारौ युवां मधुमत्तमस्यातिशयेन मधुमंतं रसवंतं वृष्णो वर्षितारं सोमस्य सोममावृषेथां । अश्नीतं । तथा च शतपथब्राह्मणं । यथाभागमावृषायध्वमिति यथाभागमश्नीतेत्येवैतदाह । २.४. २.२०. । इति । वां युवयोरर्थं इदमंधः सोमरूपमन्नमस्मे अस्माभिः परिषिक्तं पात्रेषु । अत आसद्योपविश्यास्मिन्बर्हिषि यज्ञे मादयेथां सोमपान इति शेषः ॥

॥ इति पंचमस्य प्रथमे द्वादशो वर्गः ॥

सं वां कर्मणेत्यष्टर्चमष्टमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रावैष्णवं । अनुक्रम्यते च । सं वामष्टावैंद्रावैष्णवमिति ॥ उक्थ्ये तृतीयसवनेऽच्छावाकशस्त्र एतत्सूक्तं । सूत्र्यते हि । सं वां कर्मणेंद्राविष्णू मदपती मदानामिति याज्या । आ० ६.१. । इति ॥ सोमातिरेके प्रातःसवने नैमित्तिके शस्त्रे परिहिते सति गाणगारिमते सं वामिति तस्य शस्त्रयाज्या । सूत्रितं च । ऐंद्रावैष्णव्येति गाणगारिर्दैवतप्रधानत्वात्सं वां कर्मणा समिषा हिनोमि । आ० ६.७. । इति ॥ सोमातिरेके माध्यंदिनसवने या विश्वासामित्येषा शस्त्रयाज्या । सूत्रितं च । या विश्वासां जनितारा मतीनामिति याज्या । आ० ६.७. । इति ॥ उक्थ्ये तृतीयसवनेऽच्छावाकस्येंद्राविष्णू मदपती इति शस्त्रयाज्या । सूत्रं तूदाहृतं ॥ तृतीयसवनेऽच्छावाकस्येंद्राविष्णू पिबतमिति प्रस्थितयाज्या । सूत्रितं च । इंद्राविष्णू पिबतं मध्वो अस्येमं स्तोममर्हते जातवेदसे । आ० ५.५. । इति ॥

॥ तत्र प्रथमा ॥

सं वां कर्मणा समिषा हिनोमींद्राविष्णू अपसस्पारे अस्य ।

जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयंता ॥१॥

सं। वां। कर्मणा। सं। इषा। हिनोमि। इंद्राविष्णू इति। अपसः। पारे। अस्य। जुषेथां। यज्ञं। द्रविणं। च। धत्तं। अरिष्टैः। नः। पथिऽभिः। पारयंता ॥१॥

हे इंद्राविष्णू वां युवां कर्मणा स्तोत्रेणेषा हविषा च सं हिनोमि। सम्यक् प्रेरयामि। अपसः कर्मणोऽस्योक्थस्य पारे समाप्तौ यज्ञं जुषेथां। सेवेथां। किंचारिष्टैरनुपद्रवैः पथिभिर्मार्गैर्नोऽस्मान्पारयंता पारं नयंतौ युवां द्रविणं धनं धत्तं। अस्मभ्यं दत्तं ॥

॥ अथ द्वितीया ॥

या विश्वासां जनितारा मतीनामिंद्राविष्णू कलशा सोमधाना।
प्र वां गिरः शस्यमाना अवंतु प्र स्तोमासो गीयमानासो अर्कैः ॥२॥

या। विश्वासां। जनितारा। मतीनां। इंद्राविष्णू इति। कलशा। सोमऽधाना।
प्र। वां। गिरः। शस्यमानाः। अवंतु। प्र। स्तोमासः। गीयमानासः। अर्कैः ॥२॥

या यौ प्रसिद्धाविंद्राविष्णू विश्वासां सर्वासां मतीनां स्तुतीनां जनितारा जनितारौ ॥ जन जनन इत्यस्माद्धातोस्तृचीदं रूपं। यद्वा जनी प्रादुर्भाव इत्यस्माद्धातोरेव तृचि जनिता मंत्र इति निपातनाण्णिलोपः ॥ कलशा कलशौ सोमधाना सोमस्य निधानभूतौ च स्यातां। अथ प्रत्यक्षस्तुतिः। हे इंद्राविष्णू वां युवां शस्यमाना उच्चार्यमाणाः शस्त्ररूपा गिरो वाचः प्रावंतु। प्राप्नुवंतु। अर्कैः स्तोतृभिर्गीयमानासो गीयमानाः स्तोमासः स्तोमाः स्तोत्राणि च प्रावंतु। प्राप्नुवंतु ॥

॥ अथ तृतीया ॥

इंद्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना।
सं वामंजंत्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः ॥३॥

इंद्राविष्णू इति। मदपती इति मदऽपती। मदानां। आ। सोमं। यातं। द्रविणो इति। दधाना।
सं। वां। अंजंतु। अक्तुऽभिः। मतीनां। सं। स्तोमासः। शस्यमानासः। उक्थैः ॥३॥

हे इंद्राविष्णू मदानां सोमानां मदपती स्वामिनौ। मदपती इत्यत्र मदशब्दोऽनुवादः। द्रविणो द्रविणानि धनान्यपि ॥ द्रविणा उ इति पदद्वयमेकीभूय

द्रविणो इति पदं निष्पन्नं ॥ दधाना ददानौ युवां सोममभ्यायातं । मतीनां स्तोतॄणां स्तोमासः स्तोत्राण्युक्थैः शस्त्रैः सार्द्धं शस्यमानास उच्चार्यमाणा वां युवामक्तुभिस्तेजोभिः समंजंतु । समर्धयंतु । सं समिति द्विरुक्तिरादरार्था ॥

॥ अथ चतुर्थी ॥

आ वामश्वासो अभिमातिषाह इंद्राविष्णू सधमादो वहंतु ।
जुषेथां विश्वा हवना मतीनामुप ब्रह्माणि शृणुतं गिरो मे ॥४॥
आ । वां । अश्वासः । अभिमातिऽसहः । इंद्राविष्णू इति । सधऽमादः । वहंतु ।
जुषेथां । विश्वा । हवना । मतीनां । उप । ब्रह्माणि । शृणुतं । गिरः । मे ॥४॥

हे इंद्राविष्णू वां युवामभिमातिषाहोऽभिमातीनां हिंसकानामभिभवितारः सधमादः सह माद्यंतोऽश्वासोऽश्वा आवहंतु । मतीनां स्तोतॄणां विश्वा विश्वानि हवना हवनानि स्तोत्राणि जुषेथां । सेवेथां । तदर्थं मे मदीयानि ब्रह्माणि स्तोत्राणि गिरः शस्त्ररूपा वाचश्चोपशृणुतं ॥

॥ अथ पंचमी ॥

इंद्राविष्णू तत्पनयाय्यं वां सोमस्य मद उरु चक्रमाथे ।
अकृणुतमंतरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ॥५॥
इंद्राविष्णू इति । तत् । पनयाय्यं । वां । सोमस्य । मदे । उरु । चक्रमाथे इति ।
अकृणुतं । अंतरिक्षं । वरीयः । अप्रथतं । जीवसे । नः । रजांसि ॥५॥

हे इंद्राविष्णू वां युवयोस्तत्कर्म पनयाय्यं स्तुत्यं । किं तत्कर्मेत्यत आह । सोमस्य मदे सति यदुरु विस्तीर्णं चक्रमाथे विचक्रमाथे । यद्यपि विष्णोरेव विक्रमस्तथाप्येकार्थत्वादुभयोरित्युच्यते । यच्चांतरिक्षं वरीय उरुतरमकृणुतं अकुरुतं । यदपि च रजांसि लोकान् सर्वान् । लोका रजांस्युच्यंत इति यास्कः । नोऽस्माकं जीवसे जीवनायाप्रथतं अप्रथयतं ॥

॥ अथ षष्ठी ॥

इंद्राविष्णू हविषा वावृधानाग्राद्वाना नमसा रातहव्या ।
घृतासुती द्रविणं धत्तमस्मे समुद्रः स्थः कलशः सोमधानः ॥६॥

इंद्राविष्णू इति। हविषा। ववृधाना। अग्रंऽअद्वाना। नमसा। रातऽहव्या। घृतासुती इति घृतऽआसुती। द्रविणं। धत्तं। अस्मे इति। समुद्रः। स्थः। कलशः। सोमऽधानः ॥ ६ ॥

घृतासुती घृतान्नाविंद्राविष्णू युवां हविषा सोमेन वावृधाना वर्धमानावयाद्वाना सोमायस्य शुक्रस्यात्तारौ नमसा नमस्कारेण रातहव्या दत्तहविष्कौ यजमानैरस्मे अस्मभ्यं द्रविणं धनं धत्तं। प्रयच्छतं। किंच युवां समुद्र उदधिरिव स्थः। भवथः। यतः सोमधानः सोमनिधानः कलशो भवथः ॥

॥ अथ सप्तमी ॥

इंद्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथां।
आ वामंधांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे ॥ ७ ॥

इंद्राविष्णू इति। पिबतं। मध्वः। अस्य। सोमस्य। दस्रा। जठरं। पृणेथां। आ। वां। अंधांसि। मदिराणि। अग्मन्। उप। ब्रह्माणि। शृणुतं। हवं। मे ॥ ७ ॥

दस्रा हे दर्शनीयाविंद्राविष्णू युवां मध्वोऽस्य मदकरं सोमस्य सोमं पिबतं। किंच जठरमुदरं पृणेथां। सोमेन पूरयेथां। हे इंद्राविष्णू वां युवां मदिराणि मदकराण्यंधांसि सोमात्मकान्यन्नान्याग्मन्। अभिगच्छंतु। मे मदीयानि ब्रह्माणि स्तोत्राणि हवं मदीयमाह्वानं चोपशृणुतं ॥

॥ अथाष्टमी ॥

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः।
इंद्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथां ॥ ८ ॥

उभा। जिग्यथुः। न। परा। जयेथे इति। न। परा। जिग्ये। कतरः। चन। एनोः। इंद्रः। च। विष्णो इति। यत्। अपस्पृधेथां। त्रेधा। सहस्रं। वि। तत्। ऐरयेथां ॥ ८ ॥

हे इंद्राविष्णू उभोभौ युवां जिग्यथुः। शत्रूनजैष्टं। न पराजयेथे। न पुनः कदाचन पराजयेथे। एनोरेनयोर्युवयोर्मध्ये कतरश्चनैकतरोऽपि न पराजिग्ये। न पराजैष्ट। हे विष्णो इंद्रश्च त्वं च युवां यद्यद्वस्तु प्रत्यपस्पृधेथां असुरैः सहास्पृधेथां त्रेधा लोकवेदवागात्मना त्रिधा स्थितं सहस्रममितं च वि तदैरयेथां। व्यक्रमेथामित्यर्थः ॥ तथा च ब्राह्मणं। उभा जिग्यथुरित्यच्छावाकस्योभौ हि तौ जिग्यथुर्न

पराजयेथे न पराजिग्य इति न हि तयोः कतरश्चन पराजिग्य इंद्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामितींद्रश्च ह वै विष्णुश्चासुरैर्युयुधाते तान् ह स्म जित्वोचतुः कल्पामहा इति ते ह तथेत्यसुरा ऊचुः सोऽब्रवीदिंद्रो याव-देवायं विष्णुस्त्रिर्विक्रमते तावदस्माकमथ युष्माकमितरदिति स इमांल्लोकान्वि-चक्रमेऽथो वेदानथो वाचं तदाहुः किं तत्सहस्रमितीमे लोका इमे वेदा अथो वागिति ब्रूयादैरयेथामैरयेथां । ऐ० ब्रा० ६. १५. । इति ॥ यद्वा तत्सहस्रं गवां सहस्रं त्रेधा व्यैरयेथामित्यर्थः ॥

॥ इति पंचमस्य प्रथमे त्रयोदशो वर्गः ॥

घृतवती भुवनानामिति षडृचं नवमं सूक्तं भरद्वाजस्यार्षं जागतं द्यावापृथि-वीदेवताकं । तथा चानुक्रम्यते । घृतवती षट् द्यावापृथिवीयं जागतमिति ॥ आभिप्लविके पंचमेऽहनि वैश्वदेवशस्त्र आद्यस्तृचो द्यावापृथिव्यनिविद्धानार्थः । सूचितं च । घृतवती भुवनानामभिश्रियेंद्र ऋभुभिर्वाजवद्भिरिति तृचौ । आ० ७.६. । इति ॥ बृहस्पतिसवेऽपि वैश्वदेवशस्त्र एष तृचः । सूचितं च । आ० ९. ५. ॥ आभि-प्लविके तृतीयेऽहनि वैश्वदेवशस्त्रे घृतेन द्यावापृथिवी इति तिस्रो द्यावापृथि-व्यनिविद्धानार्थाः । सूचितं च । घृतेन द्यावापृथिवी इति तिस्रोऽनश्वो जातः । आ० ७. ७. । इति ॥

॥ तत्र प्रथमा ॥

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ १ ॥
घृतवती इति घृतऽवती । भुवनानां । अभिऽश्रिया । उर्वी इति । पृथ्वी इति ।
मधुदुघे इति मधुऽदुघे । सुऽपेशसा ।
द्यावापृथिवी इति । वरुणस्य । धर्मणा । विस्कभिते इति विऽस्कभिते । अजरे इति ।
भूरिऽरेतसा ॥ १ ॥

द्यावापृथिवी हे द्यावापृथिव्यौ घृतवती दीप्तिमत्यावुदकवत्यौ वा ॥ वनं घृत-मित्युदकनामसु पाठात् ॥ भवत इति शेषः । भुवनानां भूतानामभिश्रियाभिश्र-यणीये भवत इति सर्वत्रानुसंबंधनीयं । उर्वी विस्तीर्णे पृथ्वी बहुकार्यरूपेण प्रथिते च मधुदुघे मधुन उदकस्य दोग्ध्र्यौ सुपेशसा सुरूपे वरुणस्य सर्वस्य

नियामकस्य धर्मणा धारणेन विष्कभिते पृथग्धारिते अजरे नित्ये भूरिरेतसा बहुरेतस्के बहुकार्ये वा भवतः । अत्र साक्षात् द्यावापृथिव्योः स्तुतिप्रसंगाद्वरुणस्येति द्रष्टव्यं ॥

॥ अथ द्वितीया ॥

असश्चंती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते ।
राजंती अस्य भुवनस्य रोदसी अस्मे रेतः सिंचतं यन्मनुर्हितं ॥२॥
असश्चंती इति । भूरिधारे इति भूरिऽधारे । पयस्वती इति । घृतं । दुहाते इति । सुऽकृते । शुचिव्रते इति शुचिऽव्रते ।
राजंती इति । अस्य । भुवनस्य । रोदसी इति । अस्मे इति । रेतः । सिंचतं । यत् । मनुःऽहितं ॥२॥

असश्चंती असज्यमाने व्युदस्यंत्यौ वा भूरिधारे बहुधारे । दिवो वृष्टिधाराः पृथिव्याश्चाहुत्युद्भूतरसधाराः । एवमुभयोरपि बहुधारत्वं । पयस्वती उदकवत्यौ । तथा च यास्कः । असज्यमाने इति वा व्युदस्यंत्याविति वा बहुधारे उदकवत्यौ । नि० ५.२.। इति । शुचिव्रते शुचिक्रिये द्यावापृथिव्यौ सुकृते शोभनकारिणे यजमानाय घृतं सस्यादिसमृद्धिहेतूदकं दुहाते । अथ प्रत्यक्षस्तुतिः । रोदसी हे द्यावापृथिव्यावस्य भुवनस्य भूतजातस्य राजंती ईशाने युवामस्मे अस्मासु रेतः प्रजननसमर्थं वीर्यं सिंचतं । यद्रेतो मनुर्हितं मनुष्येभ्यो हितं ॥

॥ अथ तृतीया ॥

यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति ।
प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता ॥३॥
यः । वां । ऋजवे । क्रमणाय । रोदसी इति । मर्तः । ददाश । धिषणे इति । सः । साधति ।
प्र । प्रऽजाभिः । जायते । धर्मणः । परि । युवोः । सिक्ता । विषुऽरूपाणि । सऽव्रता ॥३॥

धिषणे धृष्टे सर्वस्य भुवनस्य निवासभूते वा हे रोदसी वां युवाभ्यां यो मर्तो मर्त्य ऋजवे क्रमणाय युवयोः सुखगमनाय ददाश हवींषि ददाति स मर्त्यः साधति । कामान् साधयति । किंच प्रजाभिः पुत्रपौत्रादिभिः प्रजायते । प्रवृद्धो

भवति । धर्मणः कर्मणः पर्युपरि युवोर्युवयोः सिक्ता सिक्तानि रेतांसि विषुरूपाणि नानावर्णानि सव्रता समानकर्माणि भूतानि जायंते ॥

॥ अथ चतुर्थी ॥

घृतेन द्यावापृथिवी अभिवृते घृतश्रिया घृतपृचा घृतावृधा ।
उर्वी पृथ्वी होतृवूर्ये पुरोहिते ते इद्विप्रा ईळते सुम्नमिष्टये ॥४॥

घृतेन । द्यावापृथिवी इति । अभिवृते इत्यभिऽवृते । घृतऽश्रिया । घृतऽपृचा । घृतऽवृधा ।
उर्वी इति । पृथ्वी इति । होतृऽवूर्ये । पुरोहिते इति पुरःऽहिते । ते इति । इत् । विप्राः । ईळते । सुम्नं । इष्टये ॥४॥

द्यावापृथिवी द्यावापृथिव्यौ घृतेनोदकेनाभिवृते आवृते भवतः । घृतश्रियोदकं श्रयंत्यौ च घृतपृचा घृतसंपृक्ते च घृतावृधा घृतं वर्धयंत्यौ चोर्वी विस्तीर्णे पृथ्वी प्रथिते च भवतः । होतृवूर्ये यज्ञे पुरोहिते यजमानैः पुरस्कृते च भवतः । विप्राः प्राज्ञाः स्तोतारस्ते इत् द्यावापृथिव्यावेवेष्टये यज्ञाय ॥ होत्रेष्टिरिति यज्ञनामसु पाठात् ॥ सुम्नं सुखमीळते । याचंते । सुखे सति हि यागाः प्रवर्तंते ॥

॥ अथ पंचमी ॥

मधु नो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते ।
दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यं ॥५॥

मधु । नः । द्यावापृथिवी इति । मिमिक्षतां । मधुऽश्चुता । मधुदुघे इति मधुऽदुघे । मधुव्रते इति मधुऽव्रते ।
दधाने इति । यज्ञं । द्रविणं । च । देवता । महि । श्रवः । वाजं । अस्मे इति । सुऽवीर्यं ॥५॥

मधुश्चुतोदकस्य क्षारयित्र्यौ मधुदुघे उदकदोग्ध्र्यौ मधुव्रते उदकार्थकर्माणौ देवता देवताभूते अस्मे अस्मासु यज्ञं द्रविणं धनं च महि महत् श्रवो यशो वाजमन्नं सुवीर्यं सुवीरत्वं च दधाने ददत्यौ द्यावापृथिवी द्यावापृथिव्यौ नोऽस्मान्मधु मधुना ॥ तृतीयैकवचनस्य लुक् ॥ मिमिक्षतां । सिंचतां ॥

॥ अथ षष्ठी ॥

ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा ।
संरराणे रोदसी विश्वशंभुवा सनिं वाजं रयिमस्मे समिन्वतां ॥ ६ ॥

ऊर्जं । नः । द्यौः । च । पृथिवी । च । पिन्वतां । पिता । माता । विश्वऽविदा । सुऽदंससा ।
संरराणे इति संऽरराणे । रोदसी इति । विश्वऽशंभुवा । सनिं । वाजं । रयिं ।
अस्मे इति । सं । इन्वतां ॥ ६ ॥

पिता वर्षस्य सेक्तृत्वेन पितृभूता द्यौश्च माता धारकत्वेन मातृभूता पृथिवी चोभे नोऽस्मभ्यामूर्जमन्नं पिन्वतां । यच्छतां । किंच विश्वविदा विश्वं जानंत्यौ विश्वस्य वेदयित्र्यौ वा सुदंससा सुकर्माणौ संरराणे परस्परोपकार्योपकारकभावेन सह रममाणे विश्वशंभुवा सर्वस्य भावयित्र्यौ रोदसी द्यावापृथिव्यावस्मे अस्मासु सनिं संभजनीयं पुत्रादिकं वाजं बलं रयिं धनं च समिन्वतां । संप्रेरयतां ॥

॥ इति पंचमस्य प्रथमे चतुर्दशो वर्गः ॥

उदु ष्य देव इति षडृचं दशमं सूक्तं भरद्वाजस्यार्षं सवितृदेवताकं । आद्यास्तिस्रो जगत्यश्चतुर्थ्याद्यास्तिस्रस्त्रिष्टुभः । तथा चानुक्रांतं । उदु ष्य सावित्रं त्रित्रिष्टुबंतमिति ॥ सूक्तविनियोगो लैंगिकः ॥ चातुर्विंशिकेऽहनि वैश्वदेवशस्त्र आद्यस्तृचः सावित्रसूक्तस्थान आवपनीयः । सूचितं च । उदु ष्य देवः सविता हिरण्ययेति तिस्रस्ते हि द्यावापृथिवी । आ॰ ७. ४. । इति ॥ बृहस्पतिसवेऽपि वैश्वदेवशस्त्रे सावित्रसूक्तस्थान एषस्तृचः । सूचितं च । उदु ष्य देवः सविता हिरण्ययेत्यनूत्रिष्टेत् । आ॰ ९. ५. । इति ॥ व्यूळ्हे पंचमेऽहनि वैश्वदेवशस्त्र उदु ष्य देवः सविता दमूना इति तृचः सावित्रनिविद्धानार्थः । सूचितं च । उदु ष्य देवः सविता दमूना इति तिस्रः । आ॰ ८. ८. । इति ॥ वैश्वदेवपर्वणि सावित्रद्वादशकपालस्य वाममद्येति याज्या । सूचितं च । वाममद्य सवितर्वाममु श्वः पूषन्नव व्रते वयं । आ॰ २. १६. । इति ॥

॥ तत्र प्रथमा ॥

उदु ष्य देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुक्रतुः ।
घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणि ॥ १ ॥

उत्। ऊं इति। स्यः। देवः। सविता। हिरण्ययां। बाहू इति। अयंस्त। सवनाय। सुऽक्रतुः। घृतेन। पाणी इति। अभि। प्रुष्णुते। मखः। युवा। सुऽदक्षः। रजसः। विऽधर्मणि ॥१॥

देवो द्योतमानः सुक्रतुः सुकर्मा स्य स प्रसिद्धः सविता हिरण्यया हिरण्मयावात्मीयौ बाहू सवनाय सुवनाय दानाय वोदयंस्त। उद्यच्छति। किंच मखो मंहनीयो युवा नित्यतरुणः सुदक्षः सुप्रज्ञो रजसो लोकस्योदकस्य वा विधर्मणि विधारणे स्थितो घृतेनोदकेन पूर्णौ स्वौ पाणी अभिप्रुष्णुते। अभिप्रेरयति ॥

॥ अथ द्वितीया ॥

देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने।
यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः ॥२॥

देवस्य। वयं। सवितुः। सवीमनि। श्रेष्ठे। स्याम। वसुनः। च। दावने।
यः। विश्वस्य। द्विऽपदः। यः। चतुःऽपदः। निऽवेशने। प्रऽसवे। च। असि। भूमनः ॥२॥

तस्य देवस्य सवितुः प्रेरकस्य सवीमनि प्रसवेऽनुज्ञाने। तथा च यास्कः। सवीमनि प्रसवे। नि॰ ६.७.। इति। श्रेष्ठेऽतिशयेन प्रशस्ते वसुनो धनस्य दावने दाने च स्याम। समर्था भूयास्म। यस्त्वं विश्वस्य सर्वस्य द्विपदो निवेशने स्थितौ प्रसवे च स्वतंत्रोऽसि। यस्त्वं भूमनो भूरेश्चतुष्पदो निवेशने प्रसवे च स्वतंत्रोऽसि ॥

॥ अथ तृतीया ॥

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयं।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशंस ईशत ॥३॥

अदब्धेभिः। सवितरिति। पायुऽभिः। त्वं। शिवेभिः। अद्य। परि। पाहि। नः। गयं।
हिरण्यऽजिह्वः। सुविताय। नव्यसे। रक्ष। माकिः। नः। अघऽशंसः। ईशत ॥३॥

हे सवितरदब्धेभिरहिंसितैः पायुभिस्तेजोभी रक्षणसाधनैर्वा शिवेभिः सुखकारिभिर्नोऽस्माकं गयं गृहं धनं वा॥ गयः कृदर इति गृहनामसु मीळ्हं गय इति धननामसु पाठात् ॥ अद्य परिपाहि। रक्ष। हिरण्यजिह्वो हितरमणीयवाक् त्वं। तथा च यास्कः। हिरण्यं कस्मादित्युपक्रम्य हितरमणं भवतीति वेति। सुविताय

सखाय नव्यसे नवतराय भव । रक्ष । अस्मान्पालय च । नोऽस्माकमघशंसोऽनर्थमाशंसमानः शत्रुर्माकिरीशत । मेशत ॥

॥ अथ चतुर्थी ॥

उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात् ।
अयोहनुर्यजतो मंद्रजिह्व आ दाशुषे सुवति भूरि वामं ॥४॥
उत् । ऊं इति । स्यः । देवः । सविता । दमूनाः । हिरण्यऽपाणिः । प्रतिऽदोषं । अस्थात् ।
अयःऽहनुः । यजतः । मंद्रऽजिह्वः । आ । दाशुषे । सुवति । भूरि । वामं ॥४॥

देवो द्योतमानो दमूना दममना दानमना वा । तथा च यास्कः । दमूना दममना वा दानमना वा दांतमना वेति । हिरण्यपाणिर्हिरण्मयपाणिरयोहनुर्हिरण्मयहनुः ॥ रुक्ममय इति हिरण्यनामसु पाठात् ॥ यजतो यष्टव्यो मंद्रजिह्वो मोदमानवाक् स्य स सविता प्रतिदोषं प्रतिरात्रं रात्रेरवसान उदस्थात् । उत्तिष्ठतु । यो दाशुषे यजमानाय मह्यं भूरि प्रभूतं वामं वननीयं संभजनीयमन्नं । वामं वननीयमिति यास्कः । आसुवति प्रेरयति ॥

॥ अथ पंचमी ॥

उदू अयाँ उपवक्तेव बाहू हिरण्यया सविता सुप्रतीका ।
दिवो रोहांस्यरुहत्पृथिव्या अरीरमत्पतयत्कच्चिदभ्वं ॥५॥
उत् । ऊं इति । अयान् । उपवक्ताऽइव । बाहू इति । हिरण्यया । सविता । सुऽप्रतीका ।
दिवः । रोहांसि । अरुहत् । पृथिव्याः । अरीरमत् । पतयंत् । कत् । चित् । अभ्वं ॥५॥

सवितोपवक्तेवास्माकमधिवक्तेव हिरण्यया हिरण्मयौ सुप्रतीका शोभनावयवौ बाहू उदयान् । उद्यच्छतु । योऽयं पृथिव्याः पृथिवीपर्यंताद्दिवोऽंतरिक्षस्य रोहांस्युच्छ्रितप्रदेशानरुहत् रोहति । पतयत् गच्छत् कच्चित् यत्किंचिदभ्वं महत्सर्वं वस्तुजातं तिरोहितमरीरमत् रमयति च ॥

॥ अथ षष्ठी ॥

वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥६॥

वामं। अद्य। सवितः। वामं। ऊं इति। श्वः। दिवेऽदिवे। वामं। अस्मभ्यं। सावीः।
वामस्य। हि। क्षयस्य। देव। भूरेः। अया। धिया। वामऽभाजः। स्याम ॥६॥

हे सवितरस्मभ्यं वामं धनमद्य सावीः। सुव। श्वश्च वामं धनं प्रसुव। किं बहूक्त्या। दिवे दिवे प्रतिदिनं वामं धनं प्रसुव। हे देव हि यस्मात् क्षयस्य निवासभूतस्य भूरेः प्रभूतस्य वामस्य दातासि अतो वयमयानया धिया स्तुत्या वामभाजो धनवंतः स्याम। भूयास्म ॥

॥ इति पंचमस्य प्रथमे पंचदशो वर्गः ॥

इंद्रासोमा महीति पंचर्चमेकादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमिंद्रासोमदेवताकं। इंद्रासोमा पंचेंद्रासोममित्यनुक्रांतं ॥ सूक्तविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

इंद्रासोमा महि तद्वां महित्वं युवं महानि प्रथमानि चक्रथुः।
युवं सूर्यं विविदथुर्युवं स्व१र्विश्वा तमांस्यहतं निदश्च ॥१॥

इंद्रासोमा। महि। तत्। वां। महिऽत्वं। युवं। महानि। प्रथमानि। चक्रथुः।
युवं। सूर्यं। विविदथुः। युवं। स्वः। विश्वा। तमांसि। अहतं। निदः। च ॥१॥

इंद्रासोमा हे इंद्रासोमौ वां युवयोस्तन्महित्वं महत्त्वं महि महत्। किं तदित्यत आह। युवं युवां महानि महांति प्रथमानि प्रतमानि मुख्यानि वा भूतानि। प्रथम इति मुख्यनाम प्रतमो भवतीति यास्कः। चक्रथुः। अकार्ष्टं। किंच युवं युवां सूर्यं विविदथुः। अलंभयतं च जनान्। युवं युवां स्वरुदकं च विविदथुः ॥ हेम स्वरित्युदकनामसु पाठात् ॥ अपि च विश्वा विश्वानि तमांसि निदश्च निंदितॄनसुरांश्चाहतं। अहिंस्तं ॥

॥ अथ द्वितीया ॥

इंद्रासोमा वासयथ उषासमुत्सूर्यं नयथो ज्योतिषा सह।
उप द्यां स्कंभथुः स्कंभनेनाप्रथतं पृथिवीं मातरं वि ॥२॥

इंद्रासोमा। वासयथः। उषसं। उत्। सूर्यं। नयथः। ज्योतिषा। सह।
उप। द्यां। स्कंभथुः। स्कंभनेन। अप्रथतं। पृथिवीं। मातरं। वि ॥२॥

इंद्रासोमा हे इंद्रासोमावुषसं वासयथः। विवासयथः। उषसं व्युच्छंती कारयथ इत्यर्थः। किंच सूर्यं ज्योतिषा तेजसा सहोन्नयथः। अपि च द्यां दिवं स्कंभनेन स्तंभनहेतुनांतरिक्षेण मध्ये स्थापितेनोपस्कंभथुः। अस्तंभयतं। मातरं विश्वस्य मातृभूतां पृथिवीं व्यप्रथतं। व्यप्रथयतं ॥

॥ अथ तृतीया ॥

इंद्रासोमावहिमपः परिष्ठां हथो वृत्रमनु वां द्यौरमन्यत ।

प्रार्णांस्यैरयतं नदीनामा समुद्राणि पप्रथुः पुरूणि ॥३॥

इंद्रासोमौ। अहिं। अपः। परिऽस्थां। हथः। वृत्रं। अनु। वां। द्यौः। अमन्यत।

प्र। अर्णांसि। ऐरयतं। नदीनां। आ। समुद्राणि। पप्रथुः। पुरूणि ॥३॥

हे इंद्रासोमावहिं जगत आहंतारमपो मेघस्थान्युदकानि परिष्ठां परिवृत्य स्थितं वृत्रमसुरं हथः। हतं। तदानीं द्यौर्वा युवामन्वमन्यत। किंच नदीनामर्णांस्युदकानि प्रैरयतं। पुरूणि बहूनि॥ तुवि पुर्विति बहुनामसु पाठात्॥ समुद्राण्युदकस्थानान्यापप्रथुः। उदकैरापूरयतं च। अथवा समुंदंतीत्युदकान्येव समुद्राणि। तानि रसेनापूरयतमित्यर्थः। तथा च यास्कः। समुद्रः कस्मात्समुद्द्रवंत्यस्मादापः समभिद्रवंत्येनमापः संमोदंतेऽस्मिन्भूतानि समुदको भवति समुनत्तीति वेति ॥

॥ अथ चतुर्थी ॥

इंद्रासोमा पक्वमामास्वंतर्नि गवामिद्दधथुर्वक्षणासु ।

जगृभथुरनपिनद्धमासु रुशच्चित्रासु जगतीष्वंतः ॥४॥

इंद्रासोमा। पक्वं। आमासु। अंतः। नि। गवां। इत्। दधथुः। वक्षणासु।

जगृभथुः। अनपिऽनद्धं। आसु। रुशत्। चित्रासु। जगतीषु। अंतरिति ॥४॥

इंद्रासोमा हे इंद्रासोमावामास्वपक्वासु गवां वक्षणासूधःस्वंतर्मध्ये पक्वं पयो निदधथुः। किंच चित्रासु नानावर्णास्वासु जगतीषु गोषु ॥ इळा जगतीति गोनामसु पाठात् ॥ अंतर्मध्येऽनपिनद्धं केनाप्यबद्धं रुशत् शुक्लवर्णं पयो जगृभथुः। यथा पृथिव्यां स्वयं न क्षरति तथा धारितवंतावित्यर्थः। इदिति पूरकः ॥

॥ अथ पंचमी ॥

इंद्रासोमा युवमंग तरुत्रमपत्यसाचं श्रुत्यं रराथे ।
युवं शुष्मं नर्यं चर्षणिभ्यः सं विव्यथुः पृतनाषाहमुग्रा ॥५॥

इंद्रासोमा । युवं । अंग । तरुत्रं । अपत्यऽसाचं । श्रुत्यं । रराथे इति ।
युवं । शुष्मं । नर्यं । चर्षणिऽभ्यः । सं । विव्यथुः । पृतनाऽसहं । उग्रा ॥५॥

इंद्रासोमा हे इंद्रासोमौ युवं युवां तरुत्रं तारकमपत्यसाचं संतानयुक्तं श्रुत्यं श्रवनीयं रयिं धनमंग क्षिप्रं रराथे । अस्मभ्यं धत्थः । किंचोग्रा हे उद्गूर्णाविंद्रासोमौ युवं युवां नर्यं नृभ्यो हितं पृतनासहं शत्रुसैन्याभिभावुकं शुष्मं बलं चर्षणिभ्यो मनुष्येभ्यः ॥ कृष्टयश्चर्षणय इति मनुष्यनामसु पाठात् ॥ संविव्यथुः । समतनुतं । परिवेष्टयथो वा ॥

॥ इति पंचमस्य प्रथमे षोडशो वर्गः ॥

यो अद्रिभिदिति तृचं द्वादशं सूक्तं बार्हस्पत्यं भरद्वाजस्यार्षं त्रैष्टुभं । तथा चानुक्रांतं । यो अद्रिभित्तृचं बार्हस्पत्यमिति ॥ आभिप्लाविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे स्तोमातिशंसनार्थमिदं सूक्तं । सूत्र्यते हि । यो अद्रिभिद्यज्ञे दिव इति सूक्ते । आ० ७.९.॥ वाजपेये बार्हस्पत्ये चरौ बृहस्पतिः समजयद्वसूनीति ··· त्वामीळते अजिरं दूत्याय । आ० ९.९.। इति ॥

॥ तत्र प्रथमा ॥

यो अद्रिभित्प्रथमजा ऋतावा बृहस्पतिरांगिरसो हविष्मान् ।
द्विबर्हज्मा प्राघर्मसत्पिता न आ रोदसी वृषभो रोरवीति ॥१॥

यः । अद्रिऽभित् । प्रथमऽजाः । ऋतऽवा । बृहस्पतिः । आंगिरसः । हविष्मान् ।
द्विबर्हऽज्मा । प्राघर्मऽसत् । पिता । नः । आ । रोदसी इति । वृषभः । रोरवीति ॥१॥

यो बृहस्पतिरद्रिभित्पाणिभिर्विरचितानां शिलोच्चयानां भेत्ता मेघानां विदारको वा ॥ अद्रिर्ग्रावेति मेघनामसु पाठात् ॥ प्रथमजाः प्रजापतेर्वीर्यात् प्रथमं जात ऋतावा सत्यवान् उदकवान्वांगिरसः पश्चाज्जातः । तथा च निगमः । येऽंगारा आसंस्तेऽंगिरसोऽभवन्यदंगाराः पुनरवशांता उददीप्यंत तद्बृहस्पतिरभवत् । ऐ० ब्रा० ३.३४.। इति । हविष्मान् यज्ञभागवान् द्विबर्हज्मा द्वयोर्लोक-

योर्बृंहितगमनः प्राथमसत् प्रकर्षेण दीप्तस्थाने वर्तमानो नोऽस्माकं पिता पालयिता भवति स बृहस्पतिर्वृषभो वर्षकः सन् रोदसी द्यावापृथिव्यावारोरवीति । अभिगर्जति ॥

॥ अथ द्वितीया ॥

जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार ।
घ्नन्वृत्राणि वि पुरो दर्दरीति जयञ्छत्रूँरमित्रान्पृत्सु साहन् ॥२॥
जनाय । चित् । यः । ईवते । ऊं इति । लोकं । बृहस्पतिः । देवऽहूतौ । चकार ।
घ्नन् । वृत्राणि । वि । पुरः । दर्दरीति । जयन् । शत्रून् । अमित्रान् । पृत्ऽसु । सहन् ॥२॥

अपि च यो बृहस्पतिर्देवहूतौ यज्ञे वर्तमानायेवत उपगच्छते स्तोत्रे जनाय लोकं स्थानं चकार करोति । चिदिति पूरणः । स वृत्राण्यावरकाणि तमांसि घ्नन्निवारयन् पृत्सु युद्धेषु शत्रून् जयन् अमित्रान् सहन् अभिभवन् पुर आसुरीः पुरीर्विदर्दरीति । भृशं विदारयति ॥

॥ अथ तृतीया ॥

बृहस्पतिः समजयद्वसूनि महो व्रजान् गोमतो देव एषः ।
अपः सिषासन्त्स्व१रप्रतीतो बृहस्पतिर्हंत्यमित्रमर्कैः ॥३॥
बृहस्पतिः । सं । अजयत् । वसूनि । महः । व्रजान् । गोऽमतः । देवः । एषः ।
अपः । सिसासन् । स्वः । अप्रतिऽइतः । बृहस्पतिः । हंति । अमित्रं । अर्कैः ॥३॥

देवो द्योतमान एष प्रसिद्धो बृहस्पतिर्वसूनि पणीनामसुराणां वलस्य वा धनानि महो महतो गोमतो गोसहितान् व्रजांश्च समजयत् । तथा च निगमौ । बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार । ऋग्वे॰ १०.६८.९. । इति । दूरमित पणयो वरीय उद्गावो यंतु मिनतीर्ऋतेन । बृहस्पतिर्या अविंदन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः । ऋग्वे॰ १०.१०८.११. । इति । किंच बृहस्पतिरप्रतीतः केनाप्यप्रतिगतः सिषासन् संभक्तुकामः स्वः स्वर्गस्यामित्रमसुरमर्कैरर्चनसाधनैर्मंत्रैर्हंति । अर्को मंत्रो भवति यदेनेनार्चंति । नि॰ ५.४. । इति यास्कः ॥

॥ इति पंचमस्य प्रथमे सप्तदशो वर्गः ॥

सोमारुद्रेति चतुर्ऋचं त्रयोदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं सोमारुद्रदेवताकं । अनुक्रम्यते च । सोमारुद्रा चतुष्कं सोमारौद्रमिति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

सोमारुद्रा धारयेथामसुर्यं१ प्र वामिष्टयोऽरमश्नुवंतु ।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥१॥
सोमारुद्रा । धारयेथां । असुर्यं । प्र । वां । इष्टयः । अरं । अश्नुवंतु ।
दमेऽदमे । सप्त । रत्ना । दधाना । शं । नः । भूतं । द्विऽपदे । शं । चतुःऽपदे ॥१॥

सोमारुद्रा हे सोमारुद्रावसुर्यमसुरसंबंधि बलमस्मासु धारयेथां । किंच दमेदमे सर्वेष्वस्मद्गृहेष्विष्टयो यज्ञा वां युवामरमलं पर्याप्तं प्राश्नुवंतु । प्रकर्षेण व्याप्नुवंतु । अपि च युवां सप्त रत्ना रत्नानि दधाना धारयंतौ नोऽस्मभ्यं शं सुखकरौ सुखरूपौ वा भूतं । भवतं । द्विपदेऽस्मदीयाय पुत्रादये चतुष्पदे पश्वादये च शं भूतं । भवतं ॥

॥ अथ द्वितीया ॥

सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि संतु ॥२॥
सोमारुद्रा । वि । वृहतं । विषूची । अमीवा । या । नः । गयं । आऽविवेश ।
आरे । बाधेथां । निःऽर्ऋतिं । पराचैः । अस्मे इति । भद्रा । सौश्रवसानि । संतु ॥२॥

सोमारुद्रा हे सोमारुद्रौ नोऽस्माकं गयं गृहं गृहगतं प्राणिजातं वा यामीवा यो रोग आविवेश तां विषूचीं विष्वक् सर्वतो गच्छंतीममीवां विवृहतं । वियोजयतं । अपि च निर्ऋतिमलक्ष्मीं पराचैः पराग्यथा भवति तथारे दूरे बाधेथां । निवारयतं । अस्मे अस्माकं भद्रा भद्राणि सौश्रवसान्यन्नानि यशांसि च संतु । भवंतु । सुश्रवसो भावः सौश्रवसं । श्रवोऽन्नं यशश्च ॥

॥ अथ तृतीया ॥

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तं ।
अव स्यतं मुंचतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥३॥

सोमारुद्रा । युवं । एतानि । अस्मे इति । विश्वा । तनूषु । भेषजानि । धत्तं ।
अव । स्यतं । मुंचतं । यत् । नः । अस्ति । तनूषु । बद्धं । कृतं । एनः । अस्मत् ॥ ३ ॥

हे सोमारुद्रौ युवं युवामस्मे अस्माकं तनूष्वंगेष्वेतानि प्रसिद्धानि विश्वा सर्वाणि भेषजानि धत्तं । धारयतं । किंच नोऽस्माकं तनूष्वंगेष्वस्माभिः कृतं बद्धं च यदेनः पापमस्ति विद्यते तत्पापमवस्यतं । क्षपयतं । श्रथयतं । शिथिलबंधं कुरुतमित्यर्थः । अस्मदस्मत्तो मुंचतं च ॥

॥ अथ चतुर्थी ॥

तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः ।
प्र नो मुंचतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥ ४ ॥

तिग्मऽआयुधौ । तिग्महेती इति तिग्मऽहेती । सुऽशेवौ । सोमारुद्रौ । इह । सु । मृळतं । नः ।
प्र । नः । मुंचतं । वरुणस्य । पाशात् । गोपायतं । नः । सुऽमनस्यमाना ॥ ४ ॥

हे सोमारुद्रौ तिग्मायुधौ दीप्तधनुष्कौ तिग्महेती तीक्ष्णशरौ सुशेवौ शोभनसुखप्रदौ सुमनस्यमाना शोभनं मनः स्तोत्रमिच्छंतौ सुमनस्यमानौ स्तूयमानौ सुमनसौ वा संतौ युवामिह लोके नोऽस्मान् सु अत्यंतं मृळतं । सुखयतं । नोऽस्मान्वरुणस्य पाशात्प्रमुंचतं । नोऽस्मान् गोपायतं । आपद्भ्यो रक्षतं च ॥

॥ इति पंचमस्य प्रथमेऽष्टादशो वर्गः ॥

जीमूतस्येत्येकोनविंशत्यृचं चतुर्दशं सूक्तं भारद्वाजस्य पायोरार्षं । अनुक्रम्यते च । जीमूतस्यैकोना पायुर्भारद्वाजः संग्रामांगान्यृक्शोऽभितुष्टाव वर्म धनुर्ज्यामार्त्नीं इषुधिं जगत्यर्द्धे सारथिमर्द्धे रश्मीनश्वान् रथं रथगोपान् जगत्यादि लिंगोक्तदेवता द्वाभ्यामिषूः प्रतोदं हस्तघ्नं द्वाभ्यामिषूः पराः पंक्त्यादयो लिंगोक्तदेवताः संग्रामाशिषोऽंत्याऽनुष्टुबृजीत आलाक्तेति च द्वे द्वे इति । रथे तिष्ठन् ब्राह्मणास इति षष्ठीदशम्यौ जगत्यावंत्या यो नः स्व इत्येषानुष्टुबृजीत आ जंघंत्यालाक्ताऽवसृष्टा यो न स्व इति पंचानुष्टुभो यत्र बाणा इति पंक्तिः शिष्टास्त्रिष्टुभः । आद्यया वर्म स्तूयते द्वितीयया धनुस्तृतीयया ज्या चतुर्थ्यार्त्नीं पंचम्येषुधिः । अतः पंचानां वर्माद्या देवताः । षष्ठ्याः पूर्वार्द्धेन सारथिः स्तूयते । अतः सोऽर्द्धस्तद्देवताकः ।

उत्तरार्धेन रश्मयः स्तूयंते। सप्तम्याश्चा अष्टम्या रथो नवम्या रथगोपाः। अत-स्तास्तद्देवताकाः। ब्राह्मणास इत्यस्यां ब्राह्मणपितृसोम्यद्यावापृथिवीपूषाणो लिं-गोक्तदेवताः। एकादशीद्वादश्याविषुस्तुतिरूपत्वादिषुदेवताके। त्रयोदश्या प्रतोदः। चतुर्दश्या हस्तघ्नः। पंचदशीषोडश्याविषुदेवताके। सप्तदश्या युद्धभूमिब्रह्मणस्प-त्यदितिरूपा लिंगोक्तदेवताः। अष्टादश्याः कवचसोमवरुणा देवताः। अंत्याया देवा ब्रह्म च देवताः॥ युद्धेऽनेन सूक्तेन राजानं संनाहयेत्। तथा चाश्वलायनः। संग्रामे समुपोळ्हे राजानं संनाहयेदा त्वाहार्षमंतरेधीति पश्चाद्रथस्यावस्थाय जी-मूतस्येव भवति प्रतीकमिति कवचं प्रयच्छेत् उत्तरया धनुरुत्तरां वाचयेत्स्वयं चतुर्थीं जपेत्पंचम्येषुधिं प्रयच्छेदभिप्रवर्तमाने षष्ठीं सप्तम्याश्चानष्टमीमिषूनवे-क्षमाणं वाचयत्यहिरिव भोगैः पर्येति बाहुमिति तलं नह्यमानं। गृ॰ सू॰ ३.११.। इति। तथा चावसृष्टा परा पतेतीषून्विसर्जयेद्यत्र बाणाः संपतंति युध्यमानेषु जपेत्संशिष्याद्वा। गृ॰ सू॰ ३.११.। इति ॥ अध्यायोपाकरणोत्सर्जनयोर्मंडलांत्य-होमे यो नः स्व इत्येषा। गृ॰ सू॰ ३.५.॥

॥ तत्र प्रथमा ॥

जीमूत॑स्येव भवति प्रती॑कं यद्व॒र्मी या॑ति स॒मदा॑मु॒पस्थे॑।
अना॑विद्धया त॒न्वा॑ जय॒ त्वं स त्वा॒ वर्म॑णो महि॒मा पि॑पर्तु ॥१॥

जीमूत॑स्यऽइव। भवति। प्रती॑कं। यत्। व॒र्मी। या॑ति। स॒ऽमदा॑ं। उ॒पऽस्थे॑।
अना॑विद्धया। त॒न्वा॑। जय॒। त्वं। सः। त्वा॒। वर्म॑णः। महि॒मा। पि॑पर्तु ॥१॥

समदां संग्रामाणामुपस्थ उपस्थाने सति यद्यदायं राजा वर्मी कवची याति तदा लोहमयेन वर्मणा संनद्धस्य राज्ञः प्रतीकं रूपं जीमूतस्येव मेघस्येव भवति। मेघस्य यादृशं रूपं तादृशमस्य भवतीत्यर्थः। हे राजन् त्वमनाविद्धया शत्रुभिरबाधितया तन्वा शरीरेण शत्रून् जय। वर्मणः स तादृशो महिमा त्वा त्वां पिपर्तु। पालयतु॥

॥ अथ द्वितीया ॥

धन्व॑ना॒ गा धन्व॑ना॒जिं ज॑येम॒ धन्व॑ना ती॒व्राः स॒मदो॑ जयेम।
धनुः॒ शत्रो॑रपका॒मं कृ॑णोति॒ धन्व॑ना॒ सर्वा॑ः प्र॒दिशो॑ जयेम ॥२॥

धन्वना । गाः । धन्वना । आजिं । जयेम । धन्वना । तीव्राः । सऽमदः । जयेम ।
धनुः । शत्रोः । अपऽकामं । कृणोतु । धन्वना । सर्वाः । प्रऽदिशः । जयेम ॥२॥

धन्वना चापेन गाः शत्रूणां जयेम । वयं वशीकरवाम । धन्वनाजिं संग्रामं च जयेम । धन्वना तीव्रा उद्धताः समदोऽत्यंतं मदवतीः शत्रुसेनाश्च जयेम । तथा च यास्कः । समदः समदो वात्तेः संमदो वा मदतेः । नि॰ ९. १७. । इति । धनुः शत्रोरपकामं कामस्यापायं कृणोति । करोतु । किंच धन्वना वयं सर्वाः प्रदिशः सर्वासु दिक्षु वर्तमानान् शत्रून् जयेम । प्रदिक्शब्दो लक्षणया तत्स्थेषु पुरुषेषु वर्तते मंचाः क्रोशंतीतिवत् । धन्वन्शब्दस्य जयतेश्चावृत्तिरादरार्था ॥

॥ अथ तृतीया ॥

वक्ष्यंतीवेदा गनीगंति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिंक्ते वितताधि धन्वन् ज्या इयं समने पारयंती ॥३॥

वक्ष्यंतीऽइव । इत् । आ । गनीगंति । कर्णं । प्रियं । सखायं । परिऽसस्वजाना ।
योषाऽइव । शिंक्ते । विऽतता । अधि । धन्वन् । ज्या । इयं । समने । पारयंती ॥३॥

पूर्वेण ऋग्द्वयेन कवचधनुषी स्तुते । अत्र ज्यास्तुतिः । इयं ज्या समने संग्रामे धन्वन् धन्वनि । अधीति सप्तम्यर्थानुवादः । वितता विस्तृता पारयंती पारं नयंती प्रियं प्रियकरं वाक्यं वक्ष्यंतीव कर्णं धन्विनो राज्ञः कर्णप्रदेशमागनीगंति । आगच्छति । इदिति पूरणः । योषा नारी सखायं पतिमिव परिष्वस्वजानेषुं परिष्वजमाना शिंक्ते । शब्दायते च । तथा च यास्कः । वक्ष्यंतीवागच्छति कर्णं प्रियमिव सखायमिषुं परिष्वजमाना योषेव शिंक्ते शब्दं करोति वितताधि धनुषि ज्येयं समने संग्रामे पारयंती पारं नयंती । नि॰ ९. १८. । इति ॥

॥ अथ चतुर्थी ॥

ते आचरंती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विष्फुरंती अमित्रान् ॥४॥

ते इति । आचरंती इत्याऽचरंती । समनाऽइव । योषा । माताऽइव । पुत्रं । बिभृतां । उपऽस्थे ।
अप । शत्रून् । विध्यतां । संविदाने इति संऽविदाने । आर्त्नी इति । इमे इति । विस्फुरंती इति विऽस्फुरंती । अमित्रान् ॥४॥

अथ धनुःकोट्योः स्तुतिः । ते धनुःकोट्यौ समनेव समनस्केव योषा पतिसमीपं न त्यजति तद्वदाचरंती अभितश्चरंत्यावुपस्थ उपस्थाने मातेव पुत्रं यथा माता पुत्रं धारयति तद्वद्बिभृतां । राजानं धारयेतां । किंचेमे धनुःकोट्यौ संविदाने संजानाने विसंवादरहिते आर्त्नी गच्छंत्यौ ॥ ऋ गताविति धातोर्ऋर्तिगिभ्यां निरिति बाहुलकात् निप्रत्ययो धातोरार्तभावश्च । ततः कृदिकारादक्तिन इति ङीष् । द्विवचनस्य पूर्वसवर्णः ॥ अस्य राज्ञोऽमित्रान् विष्फुरंती विहिंसंत्यौ शत्रूंश्चापविध्यतां । तथा च यास्कः । ते आचरंती समनसाविव योषे मातेव पुत्रं बिभृतामुपस्थ उपस्थानेऽपविध्यतां शत्रून् संविदाने आर्त्न्याविमे विघ्नत्यावमित्रान् । नि० ९.३९. । इति ॥

॥ अथ पंचमी ॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः संकाः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥५॥

बह्वीनां । पिता । बहुः । अस्य । पुत्रः । चिश्चा । कृणोति । समना । अवऽगत्य ।
इषुऽधिः । संकाः । पृतनाः । च । सर्वाः । पृष्ठे । निऽनद्धः । जयति । प्रऽसूतः ॥५॥

इषुधिरत्र स्तूयते । इषुधिर्बह्वीनामिषूणां पिता भवति । रक्षणहेतुत्वात्पितेत्युच्यते । इषुशब्दस्योभयलिंगत्वाद्बह्वीनामिति प्रयोगः । अस्येषुधेः पुत्र इषुर्बहुर्भवति । बहव इषवो हीषुधौ निधीयंते । इषूणां निधानत्वादिषुधिः । तथा च यास्कः । इषुधिरिषूणां निधानं । नि० ९.१३. । इति । चिश्चा कृणोति । चिश्चेति शब्दानुकृतिः । इषुषूद्ध्रियमाणेष्विषुधिश्चिश्चाशब्दं करोति । किंचेषुधिः पृष्ठे निनद्धो धन्विनो राज्ञः पृष्ठभागे बद्धः समना युद्धान्यवगत्य प्राप्य प्रसूतः प्रसुवन् ॥ कर्तरि निष्ठा ॥ इषून्प्रेरयन् संकाः । सह कायंति शब्दायंत इति संकाः पृतनाः । सर्वाः सेना जयति ॥

॥ इति पंचमस्य प्रथम एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छंति रश्मयः ॥६॥

रथे । तिष्ठन् । नयति । वाजिनः । पुरः । यत्रऽयत्र । कामयते । सुऽसारथिः ।
अभीशूनां । महिमानं । पनायत । मनः । पश्चात् । अनु । यच्छंति । रश्मयः ॥६॥

अथ पूर्वार्धे सारथिस्तुतिरुत्तरार्धेऽभीशूनां स्तुतिः । सुषारथिः शोभनसारथी रथे तिष्ठन् पुरः पुरस्ताद्वर्तमानान्वाजिनोऽश्वान्यत्र यत्र नेतुं कामयते तत्र तत्र नयति । ये रथे रश्मयोऽश्वग्रीवाभ्यां व्याप्य वर्तमानाः पाशाः पश्चात् रथस्य पृष्ठभागे विद्यमाना अश्वान् मनः सारथेर्मनोऽनुकूलमनुयच्छंति । नियच्छंति । तेषामभीशूनां रश्मीनां महिमानं महत्त्वं पनायत । हे जनाः स्तुत । तथा च यास्कः । रथे तिष्ठन्नयति वाजिनः पुरस्तात्ततो यत्र यत्र कामयते सुषारथिः कल्याणसारथिरभीशूनां महिमानं पूजयत मनः पश्चात्ततोऽनुयच्छंति रश्मयः । नि० ९. १६. । इति ॥

॥ अथ सप्तमी ॥

तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयंतः ।

अवक्रामंतः प्रपदैरमित्रान् क्षिणंति शत्रूँरनपव्ययंतः ॥ ७ ॥

तीव्रान् । घोषान् । कृण्वते । वृषऽपाणयः । अश्वाः । रथेभिः । सह । वाजयंतः ।

अवऽक्रामंतः । प्रऽपदैः । अमित्रान् । क्षिणंति । शत्रून् । अनपऽव्ययंतः ॥ ७ ॥

अथाश्वस्तुतिः । अश्वा वृषपाणयः पांसूनां वर्षकखुरा रथेभी रथैः सह वाजयंतो वेगमाचरंतस्तीव्रानुच्चतरान्घोषान् शब्दान् कृण्वते । कुर्वते । किंचान-पव्ययंतोऽपलायमाना अमित्रान् हिंसकान् शत्रून् प्रपदैः पादाग्रैरवक्रामंतः क्षिणंति । हिंसंति ॥

॥ अथाष्टमी ॥

रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।

तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ॥ ८ ॥

रथऽवाहनं । हविः । अस्य । नाम । यत्र । आयुधं । निऽहितं । अस्य । वर्म ।

तत्र । रथं । उप । शग्मं । सदेम । विश्वाहा । वयं । सुऽमनस्यमानाः ॥ ८ ॥

अस्य राज्ञो रथवाहनं शत्रून् जित्वा रथेनोह्यमानं धनं हविर्भवति । अग्नेर्ह-विरिव वर्धकं भवतीत्यर्थः । नामेति संमतिः । यत्र रथेऽस्य राज्ञ आयुधं धनुःश-रादिकं वर्म कवचं च निहितं भवति तत्र तं ॥ तत्रेत्यव्ययस्य सर्वविभक्तिकत्वात् ॥ शग्मं सुखकरं विश्वाहा सर्वदा सुमनस्यमानाः सुखमनसो भवंतो वयं पायवो भरद्वाजा उपसदेम । उपगच्छेम ॥

॥ अथ नवमी ॥

स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवंतो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥९॥

स्वादुऽसंसदः । पितरः । वयःऽधाः । कृच्छ्रेऽश्रितः । शक्तिऽवंतः । गभीराः ।
चित्रऽसेनाः । इषुऽबलाः । अमृध्राः । सतःऽवीराः । उरवः । व्रातऽसहाः ॥९॥

अथ रथगोपस्तुतिः । पितरो रथस्य पालयितारः स्वादुषंसदः शत्रूणां स्वादुन्यन्ने संसीदंतः शत्रूणामन्नमवसादयंतो वा वयोधा अन्नस्य दातारः कृच्छ्रेश्रित आपदि श्रयंतः शक्तीवंतः । शक्तिरायुधविशेषः । तद्वंतः । शक्तीवंतः शक्तीहस्ता इति यावत् । यद्वा शक्तिर्बलं । तद्वंतः । गभीरा अनाधृष्याश्चित्रसेना दर्शनीयसेना इषुबला बाणबला अमृध्रा हिंसितुमशक्याः सतोवीराः प्राप्तवीर्याः । तथा च यास्कः । तिरः सत इति प्राप्तस्य तिरस्तीर्णं भवति सतः संसृतं भवतीति । उरवो महांतो व्रतसाहाः समूहानामभिभवितारो भवंतीति ॥

॥ अथ दशमी ॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत ॥१०॥

ब्राह्मणासः । पितरः । सोम्यासः । शिवे इति । नः । द्यावापृथिवी इति । अनेहसा ।
पूषा । नः । पातु । दुःऽइतात् । ऋतऽवृधः । रक्ष । माकिः । नः । अघऽशंसः । ईशत ॥१०॥

ब्राह्मणासो हे ब्राह्मणाः पितर ऋतावृध ऋतस्य यज्ञस्य सत्यस्य वा वर्धयितार सोम्याः सोमार्हाः सोमसंपादिनो वा । तथा च यास्कः । सोम्याः सोमसंपादिनः । नि॰ ११.१८. । इति । नोऽस्मान्रक्षत । रक्षेत्युपरितनमेकवचनांतं सत्यपि व्यवधाने बहुवचनांततया विपरिणतं सदत्र संबध्यतेऽध्याहारस्यातिजघन्यत्वात् । किंचानेहसापापे द्यावापृथिवी द्यावापृथिव्यौ नोऽस्माकं शिवे सुखकृतौ भवतां । पूषा पोषको देवोऽपि नोऽस्मान्दुरिताद्दुष्कृतात्पातु । रक्षतु । नोऽस्माकमघशंसः पापशंसः शत्रुरपि माकिरीशत । मेष्ट ॥

॥ इति पंचमस्य प्रथमे विंशो वर्गः ॥

॥ अथैकादशी ॥

सुपर्णं वस्ते मृगो अस्या दंतो गोभिः संनद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवंति तत्रास्मभ्यमिषवः शर्म यंसन् ॥११॥
सुऽपर्णं । वस्ते । मृगः । अस्याः । दंतः । गोभिः । संऽनद्धा । पतति । प्रऽसूता ।
यत्र । नरः । सं । च । वि । च । द्रवंति । तत्र । अस्मभ्यं । इषवः । शर्म । यंसन् ॥११॥

अस्यामृचीषवः स्तूयंते । सुपर्णं शोभनं वाजं वस्ते । इयमिषुर्धारयति । अस्या इषोर्मृगो मृगावयवः शृंगं दंतो भवति । इषवः काश्चिद्दंतमुखा भवंति हि । अथवास्या दंतो मृगः शत्रून्मृगयमाणो भवति । किंच गोभिर्गोविकारैः स्नायुभिः संनद्धा सम्यग्बद्धा । अथवा गौरिति ज्यानाम । तया संबद्धा । अत्र वचनव्यत्ययः । तथा च निगमः । वृक्षे वृक्षे नियता मीमयद्गौः । ऋग्वे० १०.२७.२२. । इति । अस्यायमर्थः । वृक्षे वृक्षे धनुषि धनुषि गौर्ज्या नियता मीमयत् शब्दं करोतीति । तथा च यास्कः । वृक्षे वृक्षे धनुषि धनुषि । वृक्षो व्रश्चनाद्वृत्वा क्षां तिष्ठतीति वा । क्षा क्षियतेर्निवासकर्मणः । नियता मीमयद्गौः शब्दं करोति । मीमयतिः शब्दकर्मा । नि० २.६. । इति । प्रसूता प्रेरिता सती पतति । यत्र युद्धे नरः सं च सह च वि च पृथक्च द्रवंति चरंति तत्रास्मभ्यमिषवः शराः शर्म सुखं यंसन् । प्रयच्छंतु । तथा च यास्कः । सुपर्णं वस्त इति वाजानभिप्रेत्य मृगमयोऽस्या दंतो मृगयतेर्वा गोभिः संनद्धा पतति प्रसूतेति व्याख्यातं । यत्र नराः संद्रवंति च विद्रवंति च तत्रास्मभ्यमिषवः शर्म शरणं प्रयच्छंतु । नि० ९.१९. । इति ॥

॥ अथ द्वादशी ॥

ऋजीते परि वृंधि नोऽश्मा भवतु नस्तनूः ।
सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥१२॥
ऋजीते । परि । वृंधि । नः । अश्मा । भवतु । नः । तनूः ।
सोमः । अधि । ब्रवीतु । नः । अदितिः । शर्म । यच्छतु ॥१२॥

ऋजीते । ऋजु गच्छतीत्यृजीतिरिषुः । हे इषो नोऽस्मान्परिवृंधि । परितो वर्धय । नोऽस्माकं तनूः शरीरमश्मा भवतु । अश्मवदभेद्या दृढा भवतु । किंच नोऽस्मभ्यं सोमोऽधिब्रवीतु । पक्षपातेन ब्रवीतु । अदितिरपि शर्म सुखं यच्छतु ॥

॥ अथ त्रयोदशी ॥

आ जंघंति सान्वेषां जघनाँ उप जिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥ १३ ॥
आ । जंघंति । सानु । एषां । जघनान् । उप । जिघ्नते ।
अश्वऽअजनि । प्रऽचेतसः । अश्वान् । समत्ऽसु । चोदय ॥ १३ ॥

अश्वाजन्यश्वानां क्षेप्त्रि कशे यया त्वया प्रचेतसः प्रकृष्टज्ञानाः सादिनः सारथयो वैषामश्वानां सानु सानूनि सक्थीन्याजंघंति आघ्नंति । जघनान् जघनान्युपजिघ्नते उपजिघ्नंति सा त्वं समत्सु संग्रामेष्वश्वान् चोदय । प्रेरय । तथा च यास्कः । आघ्नंति सानून्येषां सरणानि सक्थीनि । सक्थि सचतेरासक्तोऽस्मिन् कायः । जघनानि चोपघ्नंति । जघनं जंघन्यतेः । अश्वाजनि प्रचेतसः प्रवृद्धचेतसोऽश्वान् समत्सु समरणेषु संग्रामेषु चोदय । नि॰ ९.२०. । इति ॥

॥ अथ चतुर्दशी ॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥ १४ ॥
अहिःऽइव । भोगैः । परि । एति । बाहुं । ज्यायाः । हेतिं । परिऽबाधमानः ।
हस्तऽघ्नः । विश्वा । वयुनानि । विद्वान् । पुमान् । पुमांसं । परि । पातु । विश्वतः ॥ १४ ॥

अथ धन्विनः प्रकोष्ठे बंधनीयस्य हस्तघ्नस्य स्तुतिः । हस्तघ्नः । हस्ते हस्तसमीपे वर्तिनि प्रकोष्ठे स्थितः सन् ज्यया हन्यत इति हस्तघ्नः ॥ घजर्थे कविधानमिति कः ॥ ज्याया हेतिं ज्याहेतुकां हिंसां परिबाधमानो निवारयन् भोगैः शरीरेण । वचनव्यत्ययः । अहिरिव सर्प इव बाहुं प्रकोष्ठं । लक्षणया बाहुशब्दः प्रकोष्ठे वर्तते । पर्येति । परिवेष्टयति । किंच विश्वा विश्वानि वयुनानि ज्ञानानि ज्ञातव्यानि ॥ माया वयुनमिति तन्नामसु पाठात् ॥ विद्वान् जानन् पुमान्पौरुषोपेतः स्वयं पुमांसं धन्विनं विश्वतः सर्वतः परिपातु । रक्षतु । तथा च यास्कः । अहिरिव भोगैः परिवेष्टयति बाहुं ज्याया वधात्परित्रायमाणो हस्तघ्नः सर्वाणि प्रज्ञानानि प्रजानन् पुमान्पुरुमना भवति पुंसतेर्वा । नि॰ ९.१५. । इति ॥

॥ अथ पंचदशी ॥

आलाक्ता या रुरुशीर्ष्ण्यथो यस्या अयो मुखं ।

इदं पर्जन्यरेतस इष्वै देव्यै बृहन्नमः ॥ १५ ॥

आलऽअक्ता । या । रुरुऽशीर्ष्णी । अथो इति । यस्याः । अयः । मुखं ।

इदं । पर्जन्यऽरेतसे । इष्वै । देव्यै । बृहत् । नमः ॥ १५ ॥

येषुरालाक्तालेन विषेणाक्ता रुरुशीर्ष्णी हंतृशिरस्का ॥ अर्तेर्हिंसाकर्मणो रुरुशब्दोत्पत्तिः ॥ शृंगशीर्ष्णी वा । अथो किंच यस्या इषोर्मुखमयोऽयोमयं भवति पर्जन्यरेतसे । पर्जन्यो रेतो यस्याः सा पर्जन्यरेताः । तस्यै पर्जन्यकार्यभूतायै । शरकांडस्य पर्जन्यजन्यत्वात् । बृहत् बृहत्यै तस्यै देव्या इष्वा इदं नमः क्रियत इति ॥

॥ इति पंचमस्य प्रथम एकविंशो वर्गः ॥

॥ अथ षोडशी ॥

अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।

गच्छामित्रान्प्र पद्यस्व मामीषां कं चनोच्छिषः ॥ १६ ॥

अवऽसृष्टा । परा । पत । शरव्ये । ब्रह्मऽसंशिते ।

गच्छ । अमित्रान् । प्र । पद्यस्व । मा । अमीषां । कं । चन । उत् । शिषः ॥ १६ ॥

ब्रह्मसंशिते मंत्रेण तीक्ष्णीकृते शरव्ये हिंसाकुशल इषो त्वमवसृष्टा क्षिप्ता परापत । परागच्छ । इतो देशाद्गच्छ च । अमित्रान्हिंसकान्प्रपद्यस्व । प्राप्नुहि च । अमीषाममित्राणां मध्ये कं चन कंचिदपि मोच्छिषः । अवशिष्टं मा कुरु ॥

॥ अथ सप्तदशी ॥

यत्र बाणाः संपतंति कुमारा विशिखा इव ।

तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥ १७ ॥

यत्र । बाणाः । संऽपतंति । कुमाराः । विशिखाःऽइव ।

तत्र । नः । ब्रह्मणः । पतिः । अदितिः । शर्म । यच्छतु । विश्वाहा । शर्म । यच्छतु ॥ १७ ॥

यत्र युद्धे कुमारा विशिखा इव मुंडिता इव बाणाः संपतंति तत्र नोऽस्मभ्यं ब्रह्मणस्पतिः शर्म सुखं विश्वाहा सर्वदा यच्छतु । अदितिश्च शर्म यच्छतु । द्विरुक्तिरादरार्था ॥

॥ अथाष्टादशी ॥

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्तां ।
उरोर्वरीयो वरुणस्ते कृणोतु जयंतं त्वानु देवा मदंतु ॥१८॥

मर्माणि । ते । वर्मणा । छादयामि । सोमः । त्वा । राजा । अमृतेन । अनु । वस्तां ।
उरोः । वरीयः । वरुणः । ते । कृणोतु । जयंतं । त्वा । अनु । देवाः । मदंतु ॥१८॥

हे राजन् ते त्वदीयानि मर्माणि । येषु स्थानेषु विद्धः सद्यो म्रियते तानि मर्माणि । वर्मणा कवचेन छादयामि । सोमो राजा त्वा त्वामनु मर्मच्छादनानंतरममृतेन वस्तां । आच्छादयतु । किंच वरुणोऽपि ते तुभ्यमुरोर्वरीय उरुतरं सुखं कृणोतु । करोतु । जयंतं त्वा त्वां देवाः सर्वेऽप्यनुमदंतु । अनुहृष्यंतु ॥

॥ अथैकोनविंशी ॥

यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति ।
देवास्तं सर्वे धूर्वंतु ब्रह्म वर्म ममांतरं ॥१९॥

यः । नः । स्वः । अरणः । यः । च । निष्ट्यः । जिघांसति ।
देवाः । तं । सर्वे । धूर्वंतु । ब्रह्म । वर्म । मम । अंतरं ॥१९॥

यः स्वो ज्ञातिररणोऽरममाणो यश्च निष्ट्यस्तिरोभूतो दूरे स्थितो नोऽस्मान् जिघांसति हंतुमिच्छति तं देवाः सर्वे देवा धूर्वंतु । हिंसंतु । ब्रह्म मंत्रो ममांतरं शराणां निवारकं वर्म विद्यते ॥

॥ इति पंचमस्य प्रथमे द्वाविंशो वर्गः ॥

॥ इति सायणाचार्यविरचिते दाशतय्याः षष्ठे मंडले षष्ठोऽनुवाकः समाप्तं मंडलं च ॥

॥ अथ सप्तमं मंडलं ॥

अथ सप्तमं मंडलमारभ्यते । तस्मिन्मंडले षडनुवाकाः । प्रथमेऽनुवाके सप्तदश सूक्तानि । तत्राग्निं नर इति पंचविंशत्यृचं प्रथमं सूक्तं । अत्रेयमनुक्रमणिका । अग्निं पंचाधिका विराजोऽष्टादशाद्या इति । सप्तमं मंडलं वसिष्ठोऽपश्यदित्युक्तत्वान्मंडलद्रष्टा वसिष्ठ ऋषिः । आदितोऽष्टादश विराजस्त्र्येकादशकाः शिष्टा अनादेशपरिभाषया त्रिष्टुभः । मंडलादिपरिभाषयाग्निर्देवता ॥ विश्वजितीदं सूक्तमाज्यशस्त्रं । सूत्रितं च । विश्वजितोऽग्निं नर इत्याज्यं । आ० ८.७. । इति ॥ अत्रैश्वतुर्वीराख्ये चतूरात्रे चतुर्थेऽहनीदमेव सूक्तमाज्यशस्त्रं । सूत्र्यते हि । अग्निं नर इति चतुर्थे । आ० १०.२. । इति ॥ व्यूळ्हे दशरात्रे चतुर्थेऽहनीदं सूक्तं जातवेदस्यनिविद्धानं । सूत्रितं च । अग्निं नर इत्याग्निमारुतं । आ० ८.८. । इति ॥ महाव्रतेऽपीदमाज्यशस्त्रं । तथैव पंचमारण्यके सूत्र्यते । आज्यप्रउगे विश्वजितः । ऐ० आ० ५.१. । इति ॥ प्रातरनुवाके त्वमग्ने वसूनित्यादीनामनुष्टुभां स्थान आद्यस्तृचः प्रक्षेपणीयः । सूत्र्यते हि । दशमेऽहन्यनुष्टुभां स्थानेऽग्निं नरो दीधितिभिररण्योरिति तृचमाग्नेये क्रतौ । आ० ८.१२. । इति ॥ आद्याः षडृचस्तस्मिन्नेवाहन्याग्निमारुते शस्त्रे स्तोत्रियानुरूपार्थाः । सूत्रितं च । अग्निं नरो दीधितिभिररण्योरिति स्तोत्रियानुरूपौ । आ० ८.१२. । इति ॥ मंडलादिहोमेऽप्येषा ॥ आधाने तृतीयायामिष्टौ प्रेद्ध इति स्विष्टकृतोऽनुवाक्या ॥ सूत्रितं च । प्रेद्धो अग्न इमो अग्न इति संयाज्ये । आ० २.१. । इति ॥ एवमन्यत्रापि दीक्षणीयादिषु स्विष्टकृतोऽनुवाक्या । प्रायणीयेष्टौ सेदग्निरग्नीनित्यादिके द्वे स्विष्टकृतो यज्यानुवाक्ये । सूत्रितं च । सेदग्निरग्नीँरत्यस्त्वन्यानिति द्वे संयाज्ये । आ० ४.३. । इति ॥ आधाने तृतीयायामिष्टाविमो अग्न इति स्विष्टकृतो याज्या । सूत्रितं च । इमो अग्न इति संयाज्ये । आ० २.१. । इति ॥ एवमन्यत्रापि दीक्षणीयादिष्वेषा सौविष्टकृती याज्या ॥ प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे च त्वमग्ने सुहव इत्याद्याः पंचर्चः । सूत्रितं च । त्वमग्ने सुहवो रण्वसंदृक् । आ० ४.१३. । इति ॥

॥ तत्र प्रथमा ॥

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयंत प्रशस्तं ।

दूरेदृशं गृहपतिमथर्युं ॥१॥

अग्निं । नरः । दीधितिऽभिः । अरण्योः । हस्तऽच्युती । जनयंत । प्रऽशस्तं ।

दूरेऽदृशं । गृहऽपतिं । अथर्युं ॥१॥

नरो नेतार ऋत्विजः प्रशस्तं प्रकर्षेण स्तुतं दूरेदृशं दूरे दृश्यमानं दूरे पश्यंतं वा गृहपतिं गृहाणां पालकमथर्युमागम्यमतनवंतं वाग्निमरण्योर्विद्यमानं हस्तच्युती हस्तप्रच्युत्या हस्तगत्या दीधितिभिरंगुलिभिर्जनयंत । दीधितयोऽगुलयो भवंति धीयंते कर्मसु । अरणी प्रत्यृत एने अग्निः समरणाज्जायत इति वा । हस्तच्युती हस्तप्रच्युत्याजनयंत प्रशस्तं दूरेदर्शनं गृहपतिमतनवंतं । नि० ५.१०. । इति ॥

॥ अथ द्वितीया ॥

तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित् ।

दक्षाय्यो यो दम आस नित्यः ॥२॥

तं । अग्निं । अस्ते । वसवः । नि । ऋण्वन् । सुऽप्रतिचक्षं । अवसे । कुतः । चित् ।

दक्षाय्यः । यः । दमे । आस । नित्यः ॥२॥

योऽग्निर्दमे गृहे दक्षाय्यः पूजनीयो हविर्भिः समर्धनीयो वा नित्योऽजस्र आस बभूव तं सुप्रतिचक्षं सुप्रतिदर्शनमग्निं कुतश्चित् सर्वस्मादपि भयहेतोरवसे रक्षणाय वसवो वासका ये वसिष्ठा अस्ते गृहे न्यृण्वन् । न्यदधुः ॥

॥ अथ तृतीया ॥

प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।

त्वां शश्वंत उप यंति वाजाः ॥३॥

प्रऽइद्धः । अग्ने । दीदिहि । पुरः । नः । अजस्रया । सूर्म्या । यविष्ठ ।

त्वां । शश्वंतः । उप । यंति । वाजाः ॥३॥

यविष्ठ युवतम हे अग्ने प्रेद्धः प्रकर्षेण समिद्धस्त्वमजस्रया सरणशीलया सूर्म्या

आलया नोऽस्मदर्थं पुरः पुरस्तादाहवनीयायतने दीदिहि। दीप्यस्व। त्वां प्रत्यंतो बह्वो वाजा अन्नानि हवींष्युपयंति। उपगच्छंति॥

॥ अथ चतुर्थी ॥

प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचंत द्युमंतः।
यत्रा नरः समासते सुजाताः ॥४॥
प्र। ते। अग्नयः। अग्निऽभ्यः। वरं। निः। सुऽवीरासः। शोशुचंत। द्युऽमंतः।
यत्र। नरः। संऽआसते। सुऽजाताः ॥४॥

अग्निभ्यो लौकिकेभ्योऽग्निभ्यो वरमत्यंतं द्युमंतो दीप्तिमंतः सुवीरासः कल्याणपुत्रपौत्रप्रदास्तेऽग्नयो प्र निः शोशुचंत। प्रकर्षेण नितरां दीप्यंते। यत्र येष्वग्निषु सुजाताः सुजन्मानो नरः कर्मणां नेतारो यजमाना ऋत्विजो वा समासते सहासते॥

॥ अथ पंचमी ॥

दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तं।
न यं यावा तरति यातुमावान् ॥५॥
दाः। नः। अग्ने। धिया। रयिं। सुऽवीरं। सुऽअपत्यं। सहस्य। प्रऽशस्तं।
न। यं। यावा। तरति। यातुऽमावान् ॥५॥

सहस्याभिभवकुशल हे अग्ने सुवीरं शोभनपुत्रपौत्रोपेतं स्वपत्यं शोभनपौत्रोपेतं प्रशस्तं श्रेष्ठं रयिं धनं धिया स्तोत्रेण नोऽस्मभ्यं दाः। देहि। यं रयिं यावाभिगंता शत्रुर्यातुमावान् हिंसाया निर्गतः॥ नलोपाभावश्छांदसः॥ यद्वा हिंसायुक्तः॥ परो वतिर्मत्वर्थीयः पूरकः॥ न तरति न बाधते॥

॥ इति पंचमस्य प्रथमे त्रयोविंशो वर्गः॥

॥ अथ षष्ठी ॥

उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची।
उप स्वैनमरमतिर्वसूयुः ॥६॥
उप। यं। एति। युवतिः। सुऽदक्षं। दोषा। वस्तोः। हविष्मती। घृताची।
उप। स्वा। एनं। अरमतिः। वसुऽयुः ॥६॥

सुदक्षं सुबलं यमग्निं हविष्मती हविषा युक्ता घृताची। घृतमंचतीति घृताची जुहूः। युवतिरग्निना नित्ययुक्ता दोषा वस्तो रात्रावहनि चोपैति उपगच्छति तमेनं स्वा स्वकीयारमतिर्दीप्तिर्वसूयुः स्तोतॄणां धनमिच्छंत्युपैति ॥

॥ अथ सप्तमी ॥

विश्वा अग्नेऽप दहारातीर्येभिस्तपोभिरदहो जरूथं।

प्र निस्वरं चातयस्वामीवां ॥७॥

विश्वाः। अग्ने। अप। दह। अरातीः। येभिः। तपःऽभिः। अदहः। जरूथं।

प्र। निऽस्वरं। चातयस्व। अमीवां ॥७॥

हे अग्ने विश्वा विश्वानरातीः शत्रून् तपोभिस्तेजोभिरपदह। येभिर्यैस्तपोभिर्जरूथं परुषशब्दकारिणं राक्षसं॥ गृणातेरूथन्प्रत्यये सति जरूथशब्दनिष्पत्तिः॥ अदहः दहसि। किंचामीवां रोगं निस्वरं न्यक्कृतोपतापं यथा भवति तथा॥ स्वृ शब्दोपतापयोरिति धातुः॥ प्र चातयस्व। प्रकर्षेण नाशय॥ चततिर्गत्यर्थो वेति भट्टभास्करमिश्रः॥

॥ अथाष्टमी ॥

आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक।

उतो न एभिः स्तवथैरिह स्याः ॥८॥

आ। यः। ते। अग्ने। इधते। अनीकं। वसिष्ठ। शुक्र। दीदिऽवः। पावक।

उतो इति। नः। एभिः। स्तवथैः। इह। स्याः ॥८॥

वसिष्ठ श्रेष्ठ शुक्र शुभ्र दीदिवो दीप्त पावक शोधक हे अग्ने ते तवानीकं तेजो य एधते समेधयति तस्येव नोऽस्माकमुतो अपि चैभिः स्तवथैः स्तोत्रैरिहास्मिन्यज्ञे स्याः। भव॥

॥ अथ नवमी ॥

वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पित्र्यासः पुरुत्रा।

उतो न एभिः सुमना इह स्याः ॥९॥

वि। ये। ते। अग्ने। भेजिरे। अनीकं। मर्ताः। नरः। पित्र्यासः। पुरुऽत्रा।

उतो इति। नः। एभिः। सुऽमनाः। इह। स्याः ॥९॥

हे अग्ने ते तवानीकं तेजः पिप्यासः पितृहिता आर्षेया वा मर्ता मनुष्या नरः कर्मणां नेतारो ये यजमानाः पुरुत्रा बहुषु देशेषु विभेजिरे विभजंते । आदधुरिति यावत् । तेषामिव नोऽस्माकमुतो अग्नेभिः स्तुतैः सह स्तोत्रैर्वा सुमना अनुग्राहकमनाः सन् इह यज्ञे स्याः । भव ॥

॥ अथ दशमी ॥

इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि संतु मायाः ।
ये मे धियं पनयंत प्रशस्तां ॥१०॥

इमे । नरः । वृत्रऽहत्येषु । शूराः । विश्वाः । अदेवीः । अभि । संतु । मायाः ।
ये । मे । धियं । पनयंत । प्रऽशस्तां ॥१०॥

ये मनुष्या मे मदीयां प्रशस्तां प्रकृष्टां धियं कर्म स्तुतिं वा पनयंत स्तुवंति ब्रुवंति वा त इमे मयि स्निग्धा नरो मनुष्या वृत्रहत्येषु संग्रामेषु शूरा अदेवीरासुरीर्विश्वाः सर्वा माया अभिसंतु । अभिभवंतु ॥

॥ इति पंचमस्य प्रथमे चतुर्विंशो वर्गः ॥

॥ अथैकादशी ॥

मा शूने अग्ने नि षदाम नृणां माशेषसोऽवीरता परि त्वा ।
प्रजावतीषु दुर्यासु दुर्य ॥११॥

मा । शूने । अग्ने । नि । सदाम । नृणां । मा । अशेषसः । अवीरता । परि । त्वा ।
प्रजाऽवतीषु । दुर्यासु । दुर्य ॥११॥

हे अग्ने शूने शून्ये पुत्रादिरहिते गृहे मा निषदाम । न निवसाम । नृणामन्येषां च गृहे मा निषदाम । दुर्य गृहेभ्यो हित हे अग्ने अशेषसोऽपुत्राः । तोकम् शेष इति पुत्रनामसु पाठात् । अवीरतावीरतया युक्ताश्च संतस्त्वा त्वां परिचरंतः प्रजावतीष्वेव दुर्यासु गृहेषु निवसाम ॥

॥ अथ द्वादशी ॥

यमश्वी नित्यमुपयाति यज्ञं प्रजावंतं स्वपत्यं क्षयं नः ।
स्वजन्मना शेषसा वावृधानं ॥१२॥

यं। अश्वी। नित्यं। उपऽयाति। यज्ञं। प्रजाऽवंतं। सुऽअपत्यं। क्षयं। नः।
स्वऽजन्मना। शेषसा। ववृधानं ॥१२॥

यं यज्ञं यज्ञाश्रयमश्वमश्ववानग्निर्नित्यमुपयाति तं प्रजावंतं भृत्यादिसहितं स्वपत्यं शोभनसंतानोपेतं स्वजन्मनौरसेन शेषसा पुत्रेण ववृधानं वर्धमानं क्षयं गृहं नोऽस्मभ्यं हे अग्ने देहीति शेषः ॥

॥ अथ त्रयोदशी ॥

पाहि नो अग्ने रक्षसो अजुष्टात्पाहि धूर्तेरररुषो अघायोः।
त्वा युजा पृतनायूँरभि ष्यां ॥१३॥

पाहि। नः। अग्ने। रक्षसः। अजुष्टात्। पाहि। धूर्तेः। अररुषः। अघऽयोः।
त्वा। युजा। पृतनाऽयून्। अभि। स्यां ॥१३॥

हे अग्ने नोऽस्मानजुष्टादप्रीतिविषयाद्रक्षसो राक्षसात्पाहि। रक्ष। किंचाररुषोऽदातुरघायोः पापमिच्छतो धूर्तेर्हिंसकात्पाहि। अपि च त्वा त्वया युजा सहायभूतेन पृतनायून् पृतनाकामानभिष्यां। अहमभिभवेयं ॥

॥ अथ चतुर्दशी ॥

सेदग्निरग्नीँरत्यस्त्वन्यान्यत्र वाजी तनयो वीळुपाणिः।
सहस्रपाथा अक्षरा समेति ॥१४॥

सः। इत्। अग्निः। अग्नीन्। अति। अस्तु। अन्यान्। यत्र। वाजी। तनयः। वीळुऽपाणिः।
सहस्रऽपाथाः। अक्षरा। संऽएति ॥१४॥

स इत् स एवाग्निराहवनीयादिरस्मदीयोऽन्यानितरानन्यदीयानग्नीनत्यस्तु। अतिभवतु। यत्र यस्मिन्नग्नौ वाज्यशनवान् बलवान्वा वीळुपाणिर्दृढहस्तः। वीळु द्योत्नमिति बलनामसु पाठात्। सहस्रपाथा बह्वन्नो बहुस्थानो वा बहूदको वा तनयोऽस्मत्पुत्रोऽक्षराक्षरेण क्षयरहितेन स्तोत्रेण समेति सम्यक् परिचरन्नेति। समर्थपुत्रवत एवाग्निरन्यदीयानग्नीनभिभवतीति भावः ॥

॥ पंचदशी ॥

सेदग्निर्यो वनुष्यतो निपाति समेद्धारमंहस उरुष्यात्।
सुजातासः परि चरंति वीराः ॥१५॥

सः। इत्। अग्निः। यः। वनुष्यतः। निऽपाति। संऽएद्धारं। अंहसः। उरुष्यात्।
सुऽजातासः। परि। चरंति। वीराः ॥१५॥

यः समेद्धारं प्रबोधकं वनुष्यतो हिंसकात्। वनुष्यतिर्हंतिकर्मेति यास्कः। उरुष्यात् अधिकादंहसः पापाच्च निपाति अत्यंतं रक्षति। यं च सुजातासः सुजन्मान एव वीराः स्तोतारः सुता वा परिचरंति स इत् स एवाग्निः ॥

॥ इति पंचमस्य प्रथमे पंचविंशो वर्गः ॥

॥ अथ षोडशी ॥

अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिदिंधे हविष्मान्।
परि यमेत्यध्वरेषु होता ॥१६॥

अयं। सः। अग्निः। आऽहुतः। पुरुऽत्रा। यं। ईशानः। सं। इत्। इंधे। हविष्मान्।
परि। यं। एति। अध्वरेषु। होता ॥१६॥

यमग्निमीशानः समृद्ध ऐश्वर्यमिच्छन् वा हविष्मान् यजमानः समिंधे सम्यक् दीपयति। यं चाध्वरेषु हिंसारहितेषु यज्ञेषु होता देवानामाह्वाता पर्येति परिगच्छति सोऽयमग्निः पुरुत्रा बहुषु देशेषु बहुषु यज्ञेषु वाहुत आहुतिभिरभिहुतः ॥

॥ अथ सप्तदशी ॥

त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या।
उभा कृण्वंतो वहतू मियेधे ॥१७॥

त्वे इति। अग्ने। आऽहवनानि। भूरि। ईशानासः। आ। जुहुयाम। नित्या।
उभा। कृण्वंतः। वहतू इति। मियेधे ॥१७॥

हे अग्ने त्वे त्वयीशानासो धनानामीश्वराः संतो नित्या नित्यान्यग्निहोत्रादीन्युभौ वहतू वहनहेतू स्तोत्रं शस्त्रं च कृण्वंतः कुर्वंतो मियेधे यज्ञे भूरि बहून्याहवनानि हवींष्याजुहुयाम। आजुहवाम ॥

॥ अथाष्टादशी ॥

इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ ।
प्रति न ईं सुरभीणि व्यंतु ॥१८॥

इमो इति । अग्ने । वीतऽतमानि । हव्या । अजस्रः । वक्षि । देवऽतातिं । अच्छ ।
प्रति । नः । ईं । सुरभीणि । व्यंतु ॥१८॥

हे अग्ने त्वमजस्रोऽनवरतः सन् इमो इमानि वीततमान्यतिशयेन कांतानि हव्या हव्यानि देवतातिं देवानां समूहमभि वक्षि । वह । अच्छ गच्छ च । नोऽस्मदीयानि सुरभीणि शोभनानीमेतानि हव्यानि देवाः प्रति व्यंतु । प्रत्येकं कामयंतां ॥

॥ अथैकविंशी ॥

मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै ।
मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ जुहूर्थाः ॥१९॥

मा । नः । अग्ने । अवीरते । परा । दाः । दुःऽवाससे । अमतये । मा । नः । अस्यै ।
मा । नः । क्षुधे । मा । रक्षसे । ऋतऽवः । मा । नः । दमे । मा । वने । आ । जुहूर्थाः ॥१९॥

हे अग्ने नोऽस्मानवीरतेऽपुत्रतायै मा परादाः । मा देहि । दुर्वाससे दुष्टवस्त्राय च नो मा परादाः । अस्या अमतयेऽभिहान्यै नोऽस्मान्मा परादाः । क्षुधेऽशनायायै नोऽस्मान्मा च परादाः । रक्षसे बलिने चास्मान्मा परादाः । हे ऋतावः सत्यवन्नग्ने नोऽस्मान् दमे गृहे मा जुहूर्थाः । मा हिंसीः ॥ हुर्छा कौटिल्ये इति धातुः ॥ वने चास्मान्मा जुहूर्थाः ॥

॥ अथ विंशी ॥

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ॥२०॥

नु । मे । ब्रह्माणि । अग्ने । उत् । शशाधि । त्वं । देव । मघवत्ऽभ्यः । सुसूदः ।
रातौ । स्याम । उभयासः । आ । ते । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥२०॥

हे अग्ने मे मम मदर्थं ब्रह्माण्यन्नानि नु क्षिप्रमुच्छशाधि । उत्कर्षेण शोधितानि

कुरु। किंच हे देव द्योतमानाग्ने मघवद्भ्यो हविष्मद्भ्योऽस्मभ्यं सुषूदः। अन्नानि प्रेरय। ते त्वदीयायां रातौ दान उभयासः स्तोतारः शस्तारश्च अथवा स्तुवंतो यजमानाश्च वयमा स्याम। अत्यर्थं भवेम। नोऽस्मान्यूयं त्वं त्वत्परिवाराश्च सर्वे स्वस्तिभिरविनाशिभिर्मंगलैः। तथा च यास्कः। स्वस्तीत्यविनाशनामास्तिरभिपूजितः स्वस्तीति। सदा पात। रक्षत ॥

॥ इति पंचमस्य प्रथमे षड्विंशो वर्गः ॥

॥ अथैकविंशी ॥

त्वम॑ग्ने सु॒हवो॑ र॒ण्वसं॑दृक्सु॒दीती॑ सूनो सहसो दिदीहि।
मा त्वे सचा॒ तन॑ये॒ नित्य॒ आ ध॒ङ्मा वीरो॒ अ॒स्मन्नर्यो॒ वि दा॑सीत् ॥२१॥

त्वं। अ॒ग्ने॒। सु॒ऽहवः॑। र॒ण्वऽसं॑दृक्। सु॒ऽदीती। सूनो॒ इति॑। स॒ह॒सः॒। दि॒दी॒हि॒।
मा। त्वे इति॑। सचा॑। तन॑ये। नित्ये॑। आ। ध॒क्। मा। वी॒रः॒। अ॒स्मत्। नर्यः॑।
वि। दा॒सी॒त् ॥२१॥

सहसः सूनो सहसः सुत हे अग्ने सुहवः स्वाह्वानो रण्वसंदृक् रमणीयसंदर्शनस्त्वं सुदीती शोभनया दीप्त्या दिदीहि। दीप्यस्व। किंच तनये नित्य औरसे पुत्रे त्वे त्वं सचा सहायभूतो माधक्। माभिधाक्षीः। अपि चास्मत् पृथग्भूतोऽस्माकं वा ॥ षष्ठ्यर्थे पंचमी ॥ वीरः पुत्रो नर्यो नरहितो मा विदासीत्। मोपक्षीयत ॥

॥ अथ द्वाविंशी ॥

मा नो॑ अग्ने दु॒र्भृत॑ये॒ सचै॒षु दे॒वेद्धे॑ष्व॒ग्निषु॒ प्र वो॑चः।
मा ते॑ अ॒स्मान्दु॑र्म॒तयो॑ भृ॒माच्चि॑द्दे॒वस्य॑ सूनो सहसो नशंत ॥२२॥

मा। नः॒। अ॒ग्ने॒। दुः॒ऽभृत॑ये। सचा॑। ए॒षु। दे॒वऽइ॑द्धेषु। अ॒ग्निषु॑। प्र। वो॒चः॒।
मा। ते॒। अ॒स्मान्। दुः॒ऽम॒तयः॑। भृ॒मात्। चि॒त्। दे॒वस्य॑। सूनो॒ इति॑। स॒ह॒सः॒। न॒शं॒त॒ ॥२२॥

हे अग्ने सचा सहायभूतस्त्वं देवेद्धेष्वृत्विग्भिः समिद्धेष्वेष्वग्निषु दुर्भृतये कृच्छ्रभरणाय नोऽस्मान्मा प्रवोचः। न ब्रूहि। त्वत्सहायभूता अग्नयो यथा मामकृच्छ्रेण बिभृयुस्तथा ब्रूहीत्यर्थः। किंच सहसः सूनो हे बलस्य पुत्राग्ने देवस्य द्योतमानस्य ते तव दुर्मतयो निग्रहबुद्धयो भृमाच्चित् भ्रमादपि ॥ अथ संप्रसारणं

छांदसं ॥ प्रमादादपीत्यर्थः । अस्मान्मा नशंत । मा व्याप्नुवंतु ॥ नशदिति व्याप्तिकर्मसु पाठात् ॥

॥ अथ त्रयोविंशी ॥

स मर्तो अग्ने स्वनीक रेवानमर्त्ये य आजुहोति हव्यं ।
स देवता वसुवनिं दधाति यं सूरिरर्थी पृच्छमान एति ॥२३॥

सः । मर्तः । अग्ने । सुऽअनीक । रेवान् । अमर्त्ये । यः । आऽजुहोति । हव्यं ।
सः । देवता । वसुऽवनिं । दधाति । यं । सूरिः । अर्थी । पृच्छमानः । एति ॥२३॥

स्वनीक सुतेजस्क हे अग्ने अमर्त्येऽमनुष्ये देवतात्मनि त्वयि हव्यं हविर्य आजुहोति स मर्तो मनुष्यो रेवान् धनवान्भवति । यं मर्त्यं सूरिः प्राज्ञोऽर्थी धनादिकामः पृच्छमानोऽसावुदारः क्वास्त इति पृच्छन्नेति अभिगच्छति स एव मनुष्यो देवता देवताभ्यो वसुवनिं धनपोषं ददाति । धारयति । यद्वा स देवताग्निर्वसुवनिं यजमानं दधाति धारयति यमग्निं सूरिः स्तोतार्थी प्रयोजनवान् पृच्छमानः कोऽसावग्निरिति पृच्छमान एति ॥

॥ अथ चतुर्विंशी ॥

महो नो अग्ने सुवितस्य विद्वान्रयिं सूरिभ्य आ वहा बृहंतं ।
येन वयं सहसावन्मदेमाविक्षितास आयुषा सुवीराः ॥२४॥

महः । नः । अग्ने । सुवितस्य । विद्वान् । रयिं । सूरिऽभ्यः । आ । वह । बृहंतं ।
येन । वयं । सहसाऽवन् । मदेम । अविऽक्षितासः । आयुषा । सुऽवीराः ॥२४॥

हे अग्ने नोऽस्मदीयस्य महो महतः सुवितस्य कल्याणस्य कर्मणो विद्वान् । अस्मदीयं कल्याणं कर्म जानन्नित्यर्थः । त्वं सूरिभ्यः स्तोतृभ्योऽस्मभ्यं बृहंतं महांतं रयिं धनमावह । रयिमेव विशिनष्टि । हे सहसावन् बलवन्नग्ने येन धनेन वयं स्तोतारोऽविक्षितासोऽविक्षीणा आयुषा पूर्णायुषः सुवीराः कल्याणपुत्रपौत्राश्च संतो मदेम हृष्येम ॥

॥ अथ पंचविंशी ॥

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ॥२५॥

न। मे। ब्रह्माणि। अग्ने। उत्। शशाधि। त्वं। देव। मघवत्ऽभ्यः। सुसूदः।
रातौ। स्याम। उभयासः। आ। ते। यूयं। पात। स्वस्तिऽभिः। सदा। नः ॥२५॥

इयमृक् प्रागेव व्याख्याता ॥

॥ इति पंचमस्य प्रथमे सप्तविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके प्रथमोऽध्यायः समाप्तः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

जुषस्व न इत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं। आप्रशब्दोक्तत्वादिदं तनूनपाद्रहितं। समिद्धाद्या अग्निविशेषाः प्रत्यृचं देवता उक्ताः। तथा चानुक्रम्यते। जुषस्वैकादशाप्रमिति ॥ पशाविष्टाविदमाप्रीसूक्तं। सूत्रितं च। जुषस्व नः समिधमिति वसिष्ठानां। आ० ३.२.। इति ॥ पत्नीसंयाजे त्वाष्ट्रयागस्य याज्या त्वाष्ट्रे पशावपि पुरोडाशस्यानुवाक्येयमिति पूर्वमुक्तं ॥

॥ तत्र प्रथमामृचमाह ॥

जुषस्व नः समिधमग्ने अद्य शोचा बृहद्यजतं धूममृण्वन्।
उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस्ततनः सूर्यस्य ॥१॥

जुषस्व। नः। संऽइधं। अग्ने। अद्य। शोच। बृहत्। यजतं। धूमं। ऋण्वन्।
उप। स्पृश। दिव्यं। सानु। स्तूपैः। सं। रश्मिऽभिः। ततनः। सूर्यस्य ॥१॥

हे अग्ने नोऽस्माकं समिधमद्य जुषस्व। सेवस्व। यजतं यजनीयं प्रशस्तं

धूममृण्वन् प्रेरयन् बृहद्व्यंतं शोच । दीप्यस्व च । किंच दिव्यमंतरिक्षभवं सानु समुच्छ्रितं स्तूपैस्त्वमे रश्मिभिरुपस्पृश । अपि च सूर्यस्य रश्मिभिस्तेजोभिः संततनः । संगच्छस्व ॥

॥ अथ द्वितीया ॥

नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियंधाः स्वदंति देवा उभयानि हव्या ॥२॥
नराशंसस्य । महिमानं । एषां । उप । स्तोषाम । यजतस्य । यज्ञैः ।
ये । सुऽक्रतवः । शुचयः । धियंऽधाः । स्वदंति । देवाः । उभयानि । हव्या ॥२॥

ये देवाः सुक्रतवः सुप्रज्ञाः सुकर्माणो वा शुचयो दीप्तिमंतो धियंधाः कर्मणां धारयितार उभयानि सौमिकानि च हविःसंस्थादीनि च हव्या हव्यानि स्वदंति स्वदयंति भक्षयंति तेषामेषां मध्ये यज्ञैर्हविर्भिः स्तोत्रैर्वा यजतस्य यजनीयस्य नराशंसस्य नरैः प्रशंसनीयस्याग्निविशेषस्य महिमानं महत्त्वमुपस्तोषाम। वयमुपस्तुमः । तथा च यास्कः । नरा आसीनाः शंसंति । अग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति । तस्यैषा भवति । नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैर्ये सुकर्माणः शुचयो धियं धारयितारः स्वदयंतु देवा उभयानि हवींषि सोमं चेतराणि च । नि॰ ८. ६. । इति ॥

॥ अथ तृतीया ॥

ईळेन्यं वो असुरं सुदक्षमंतर्दूतं रोदसी सत्यवाचं ।
मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम ॥३॥
ईळेन्यं । वः । असुरं । सुऽदक्षं । अंतः । दूतं । रोदसी इति । सत्यऽवाचं ।
मनुष्वत् । अग्निं । मनुना । संऽइद्धं । सं । अध्वराय । सदं । इत् । महेम ॥३॥

हे अध्वर्यवो वो यूयमीळेन्यं स्तुत्यमसुरं बलवंतं सुदक्षं सुप्रज्ञं रोदसी रोदस्योरंतर्मध्ये दूतं देवानां हविर्वहनार्थं चरंतं सत्यवाचं मनुष्वन्मनुष्यवन्मनुना समिद्धं यथेदानीं मनुष्याः समिंधते तथा पूर्वं मनुना प्रजापतिना समिद्धमग्निमध्वराय यज्ञाय सदमित्सदैव संमहेम । संपूजयत ॥ मध्यमपुरुषस्य व्यत्ययेनोत्तमपुरुषत्वं ॥

॥ अथ चतुर्थी ॥

सपर्यवो भरमाणा अभिज्ञु प्र वृंजते नमसा बर्हिरग्नौ ।
आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो हविषा मर्जयध्वं ॥४॥

सपर्यवः । भरमाणाः । अभिऽज्ञु । प्र । वृंजते । नमसा । बर्हिः । अग्नौ ।
आऽजुह्वानाः । घृतऽपृष्ठं । पृषत्ऽवत् । अध्वर्यवः । हविषा । मर्जयध्वं ॥४॥

सपर्यवः परिचरणमिच्छंतोऽभिज्ञु अभिगतजानुकं भरमाणाः पादैर्भरंतो बर्हिर्नमसा हविषा सहाग्नौ प्रवृंजते । प्रभरंति । तदेव विशदयति । हे अध्वर्यवो घृतपृष्ठं घृतसंसिक्तपृष्ठं पृषद्वत् स्थूलविंदुभिर्युक्तं बर्हिर्हविषा सहाजुह्वाना मर्जयध्वं । अग्निं परिचरत ॥

॥ अथ पंचमी ॥

स्वाध्यो३ वि दुरो देवयंतोऽशिश्रयू रथयुर्देवताता ।
पूर्वी शिशुं न मातरा रिहाणे समग्रुवो न समनेष्वंजन् ॥५॥

सुऽआध्यः । वि । दुरः । देवऽयंतः । अशिश्रयुः । रथऽयुः । देवऽताता ।
पूर्वी इति । शिशुं । न । मातरा । रिहाणे इति । सं । अग्रुवः । न । समनेषु । अंजन् ॥५॥

स्वाध्यः सुकर्माणो देवयंतो देवकामा यजमाना रथयू रथकामाश्च ॥ जसि पूर्वसवर्णो ह्रस्वश्च ॥ देवताता देवतातौ यज्ञे दुरो यज्ञगृहद्वाराणि व्यशिश्रयुः । आश्रितवंतः । किंच समनेषु यज्ञेषु पूर्वी प्राचीने प्रागग्रे जुहूपभृतौ शिशुं न वत्समिव मातरौ गावौ रिहाणे अग्निं लिहाने अग्रुवो न यथा नद्यः क्षेचाणयुदकेन तद्वत्समंजन् । अध्वर्यव आज्येन समंजंति ॥

॥ इति पंचमस्य द्वितीये प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः ।
बर्हिषदा पुरुहूते मघोनी आ यज्ञिये सुविताय श्रयेतां ॥६॥

उत । योषणे इति । दिव्ये इति । मही इति । नः । उषसानक्ता । सुदुघाऽइव । धेनुः ।
बर्हिऽसदा । पुरुहूते इति पुरुऽहूते । मघोनी इति । आ । यज्ञिये इति । सुविताय ।
श्रयेतां ॥६॥

उतापि च योषणे युवत्यौ स्त्रीरूपे वा दिव्ये दिवि भवे मही महत्यौ बर्हिषदा बर्हिषि सीदंत्यौ पुरुहूते बहुभिः स्तुते मघोनी धनवत्यौ यज्ञिये यज्ञार्हे उषासानक्ताहोरात्रे सुदुघेव धेनुः कामधुग्धेनुरिव नोऽस्मान् सुविताय कल्याणायाश्रयेतां ॥

॥ अथ सप्तमी ॥

विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै ।

ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि ॥७॥

विप्रा । यज्ञेषु । मानुषेषु । कारू इति । मन्ये । वां । जातऽवेदसा । यजध्यै ।

ऊर्ध्वं । नः । अध्वरं । कृतं । हवेषु । ता । देवेषु । वनथः । वार्याणि ॥७॥

हे दैव्यौ होतारौ विप्रा मेधाविनौ जातवेदसा जातधनौ मानुषेषु मनुष्यैः क्रियमाणेषु यज्ञेषु कारू कर्मणां कर्तारौ वां युवां यजध्यै यष्टुं मन्ये । स्तौमि । किंच हवेषु हवनेषु स्तोत्रेषु सत्सु नोऽस्माकमध्वरमकुटिलं यज्ञमूर्ध्वं देवाभिमुखं कृतं । कुरुतं च । अपि च ता तौ युवां देवेषु विद्यमानानि वार्याणि धनानि वनथः । संभजथः । तान्यस्मभ्यं संप्रयच्छथ इत्यर्थः ॥

॥ अथाष्टमी ॥

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।

सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदंतु ॥८॥

आ । भारती । भारतीभिः । सऽजोषाः । इळा । देवैः । मनुष्येभिः । अग्निः ।

सरस्वती । सारस्वतेभिः । अर्वाक् । तिस्रः । देवीः । बर्हिः । आ । इदं । सदंतु ॥८॥

एतदाद्यृक्चतुष्टयं द्वितीयाष्टकस्याष्टमाध्याये । म० ३.४.८. । यद्यपि व्याख्यातं तथापि व्यवधानात्संक्षेपतोऽत्रापि व्याख्यायते । भारती भरतस्यादित्यस्य पत्नी भारतीभिः सजोषाः सहितेळा मनुष्येभिर्मनुष्यलोकभवैर्देवैः सार्धमग्निरागच्छतु । सरस्वती सारस्वतेभिः सारस्वतैर्मध्यमस्थानैर्देवैः सार्धमर्वागस्मदभिमुखमागच्छतु । आगत्य तिस्रो देवीर्देव्यः ॥ प्रथमार्थे द्वितीया ॥ बर्हिरिदमासदंतु ॥

॥ अथ नवमी ॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥९॥

तत् । नः । तुरीपं । अध । पोषयित्नु । देव । त्वष्टः । वि । रराणः । स्यस्वेति स्यस्व ।
यतः । वीरः । कर्मण्यः । सुऽदक्षः । युक्तऽग्रावा । जायते । देवऽकामः ॥९॥

देव द्योतमान हे त्वष्टा रराणो रममाणस्त्वं नोऽस्माकं तुरीपं त्वरितमाप्नुवत् पोषयित्नु पोषकं तद्रेतो वि स्यस्व । विशेषेणावसानं प्रापय । विमोचयेत्यर्थः । यतो रेतसः कर्मण्यः कर्मसु साधुः सुदक्षः सुबलो युक्तग्रावा सोमसुत् देवकामो वीरः पुत्रो जायते ॥

॥ अथ दशमी ॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥१०॥

वनस्पते । अव । सृज । उप । देवान् । अग्निः । हविः । शमिता । सूदयाति ।
सः । इत् । ऊं इति । होता । सत्यऽतरः । यजाति । यथा । देवानां । जनिमानि । वेद ॥१०॥

हे वनस्पते देवानुपावसृज । अथ परोक्षस्तुतिः । अग्निर्वनस्पतिः शमिता शामित्ररूपः सन् हविः सूदयाति । प्रेरयतु । सेत्स एव वनस्पतिर्होता देवानामाह्वाता सत्यतरोऽपि सन् यजाति । यजतु । देवानां जनिमानि जननानि यथा स्वयं वेद तथा ॥

॥ अथैकादशी ॥

आ याह्यग्ने समिधानो अर्वाङिंद्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयंतां ॥११॥

आ । याहि । अग्ने । संऽइधानः । अर्वाङ् । इंद्रेण । देवैः । सऽरथं । तुरेभिः ।
बर्हिः । नः । आस्तां । अदितिः । सुऽपुत्रा । स्वाहा । देवाः । अमृताः । मादयंतां ॥११॥

हे अग्ने समिधान अर्वागस्मदभिमुखस्त्वमिंद्रेण तुरेभिस्त्वरितैर्देवैश्च सरथं

समानरथं यथा भवति तथायाहि। आगच्छ। नोऽस्माकं बर्हिरध्यास्तामदितिश्च सपुत्रा कल्याणपुत्रा। स्वाहा देवाश्च सर्वेऽमृताः संतो मादयंतामिति ॥

॥ इति पंचमस्य द्वितीये द्वितीयो वर्गः ॥

अग्निं वो देवमिति दशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। अत्रेयमनुक्रमणिका। अग्निं वो दशेति ॥ अग्निं वो देवमित्येतदादीनि दश सूक्तानि तृतीयचतुर्थवर्जितानि प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे च विनियुक्तानि। सूचितं च। अग्निं वो देवमिति दशानां तृतीयचतुर्थे उद्धरेत्। आ० ४.१३.। इति ॥ व्यूळ्हे दशरात्रेऽष्टमेऽहनीदं सूक्तमाज्यशस्त्रं। सूत्र्यते हि। द्वितीयस्याग्निं वो देवमित्याज्यं। आ० ८.१०.। इति ॥

॥ तत्र प्रथमा ॥

अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वं।
यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥१॥
अग्निं। वः। देवं। अग्निऽभिः। सऽजोषाः। यजिष्ठं। दूतं। अध्वरे। कृणुध्वं।
यः। मर्त्येषु। निऽध्रुविः। ऋतऽवा। तपुःऽमूर्धा। घृतऽअन्नः। पावकः ॥१॥

हे देवा वो यूयं देवं द्योतमानमग्निमग्निभिरन्यैरग्निभिः सजोषाः सजोषसं सहितं ॥ द्वितीयार्थे प्रथमा ॥ यजिष्ठं यष्टृतममग्निमध्वरे कौटिल्यरहिते यज्ञे दूतं कृणुध्वं। कुरुत। योऽग्निर्देवोऽपि सन् मर्त्येषु निध्रुविर्नितरां ध्रुवस्तिष्ठति ऋतावा यज्ञवान् सत्यवान्वा तपुर्मूर्धा तापकतेजा घृतान्नः पावकः शोधकश्च भवति ॥

॥ अथ द्वितीया ॥

प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥२॥
प्रोथत्। अश्वः। नः। यवसे। अविष्यन्। यदा। महः। संऽवरणात्। वि। अस्थात्।
आत्। अस्य। वातः। अनु। वाति। शोचिः। अध। स्म। ते। व्रजनं। कृष्णं। अस्ति ॥२॥

यवसे घासेऽविष्यन् भक्षयन् प्रोथत् शब्दं कुर्वन् संचरन्वाश्वो न अश्व इव महो महतः संवरणान्निरोधात् दावरूपोऽग्निर्यदा व्यस्थात् सततेषु वृक्षेषु वितिष्ठते

आसद्यास्याग्नेः शोचिरर्चिरस्तु वातो वाति। अथ प्रत्यक्षस्तुतिः। अथानंतरं हे अग्ने ते तव प्रजनं वर्त्म कृष्णमस्ति। भवति। स्मेति पूरणः ॥

॥ अथ तृतीया ॥

उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरंत्यजरा इधानाः।

अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥३॥

उत्। यस्य। ते। नवऽजातस्य। वृष्णः। अग्ने। चरंति। अजराः। इधानाः।

अच्छ। द्यां। अरुषः। धूमः। एति। सं। दूतः। अग्ने। ईयसे। हि। देवान् ॥३॥

हे अग्ने नवजातस्य नवप्रादुर्भावस्य वृष्णो वर्षितुर्यस्य ते तवाजरा जरारहिता ज्वाला इधाना उच्चरंति उद्गच्छंति अस्यारुष आरोचमानो धूमो द्यामच्छ दिवमभ्येति। गच्छति। हे अग्ने त्वं दूतः सन् देवान् समीयसे हि। संप्राप्नोषि च ॥

॥ अथ चतुर्थी ॥

वि यस्य ते पृथिव्यां पाजो अश्रेत्तृषु यदन्ना समवृक्त जंभैः।

सेनेव सृष्टा प्रसितिष्ट एति यवं न दस्म जुह्वा विवेक्षि ॥४॥

वि। यस्य। ते। पृथिव्यां। पाजः। अश्रेत्। तृषु। यत्। अन्ना। संऽअवृक्त। जंभैः।

सेनाऽइव। सृष्टा। प्रऽसितिः। ते। एति। यवं। न। दस्म। जुह्वा। विवेक्षि ॥४॥

हे अग्ने यस्य दावरूपस्य ते तव पाजस्तेजः पृथिव्यां भूम्यां तृषु क्षिप्रं व्यश्रेत् विश्रयति यद्यदान्नानि काष्ठादीनि जंभैर्दंतैः। ज्वालाभिरित्यर्थः। समवृक्त वृंक्ते खादति। तथा सेनेव सृष्टोद्युक्ता ते तव प्रसितिर्ज्वालैति। गच्छति। दस्म हे दर्शनीयाग्ने त्वं यवं न यवमिव जुह्वा ज्वालया विवेक्षि। काष्ठादीनि भक्षयसि व्याप्नोषि वा ॥

॥ अथ पंचमी ॥

तमिद्दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयंत नरः।

निशिशाना अतिथिमस्य योनौ दीदाय शोचिराहुतस्य वृष्णः ॥५॥

तं। इत्। दोषा। तं। उषसि। यविष्ठं। अग्निं। अत्यं। न। मर्जयंत। नरः।

निऽशिशानाः। अतिथिं। अस्य। योनौ। दीदाय। शोचिः। आऽहुतस्य। वृष्णः ॥५॥

यविष्ठं युवतममतिथिमतिथिवत्पूज्यं तमित्तमेवाग्निं दोषा दोषायां रात्रावुषसि वासरेऽपि तमेवास्याग्नेर्योनौ स्थाने आहवनीयायतने धिष्ण्ये वा निशिशाना दीपयंतो नरो मनुष्या अत्यं न सततगमनयुक्तं वोढारमश्वमिव मर्जयंत। परिचरंति। आहुतस्य च वृष्णः कामानां वर्षितुरग्नेस्तस्य शोचिर्ज्वाला दीदाय। दीप्यते॥

॥ इति पंचमस्य द्वितीये तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

सुसंदृक्ते स्वनीक प्रतीकं वि यद्रुक्मो न रोचस उपाके।
दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूरः प्रति चक्षि भानुं ॥६॥
सुऽसंदृक्। ते। सुऽअनीक। प्रतीकं। वि। यत्। रुक्मः। न। रोचसे। उपाके।
दिवः। न। ते। तन्यतुः। एति। शुष्मः। चित्रः। न। सूरः। प्रति। चक्षि। भानुं ॥६॥

स्वनीक हे सुतेजस्काग्ने यद्यदा रुक्मो न सूर्य इव। सुवर्णमिव वा। उपाकेऽंतिके वि रोचसे विशेषेण दीप्यसे तदा ते तव प्रतीकं रूपमंगं वा सुसंदृक् सुसंदर्शनं भवति। किंच ते तव शुष्मो दिवोऽंतरिक्षात्तन्यतुर्नाशनिरिवैति। निर्गच्छति। चित्रो दर्शनीयः सूरो न सूर्य इव भानुं स्वां दीप्तिं प्रतिचक्षि। प्रदर्शयसि ॥

॥ अथ सप्तमी ॥

यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिश्च हव्यैः।
तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि ॥७॥
यथा। वः। स्वाहा। अग्नये। दाशेम। परि। इळाभिः। घृतवत्ऽभिः। च। हव्यैः।
तेभिः। नः। अग्ने। अमितैः। महःऽभिः। शतं। पूःऽभिः। आयसीभिः। नि। पाहि ॥७॥

हे अग्ने अग्नयेऽग्रस्य नेत्रे वस्तुभ्यं स्वाहा स्वाहुतं हविः। किंच यथा वयमिळाभिर्गोभिर्गोविकारैः क्षीरादिभिर्घृतवद्भिर्घृतसहितैर्हव्यैः पुरोडाशादिभिश्च दाशेम परिचरेम तथा त्वमपि तेभिः प्रसिद्धैरमितैरपरिमितैर्महोभिस्तेजोभिः शतमपरिमिताभिरायसीभिर्हिरण्मयीभिः। रुक्ममय इति हिरण्यनामसु पाठात्। पूर्भिर्नगरीभिरिव नोऽस्मान् नि पाहि। नितरां रक्ष ॥

॥ अथाष्टमी ॥

या वा ते संति दाशुषे अधृष्टा गिरो वा याभिर्नृवतीरुरुष्याः ।
ताभिर्नः सूनो सहसो नि पाहि स्मत्सूरीञ्जरितॄञ्जातवेदः ॥८॥

याः । वा । ते । संति । दाशुषे । अधृष्टाः । गिरः । वा । याभिः । नृऽवतीः । उरुष्याः ।
ताभिः । नः । सूनो इति । सहसः । नि । पाहि । स्मत् । सूरीन् । जरितॄन् । जातऽवेदः ॥८॥

सहसः सूनो हे बलस्य पुत्र जातवेदोऽग्ने दाशुषे दाशुषस्ते तव या वा याश्च ज्वालाः संति । अधृष्टा रक्षोभिरप्रधर्षिता गिरो वा गिरश्च संति । याभिर्गीर्भिर्नृवतीः पुत्रवतीः प्रजा उरुष्या रक्षेः ताभिरुभयीभिर्नोऽस्मान् । स्मदिति प्रशस्तवचनः । प्रशस्तान् सूरीन् हविषां प्रेरकान् जरितॄन् स्तोतॄंश्च नि पाहि । नितरां रक्ष ॥

॥ अथ नवमी ॥

निर्यत्पूतेव स्वधितिः शुचिर्गात्स्वया कृपा तन्वा३रोचमानः ।
आ यो मात्रोरुशेन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः ॥९॥

निः । यत् । पूताऽइव । स्वऽधितिः । शुचिः । गात् । स्वया । कृपा । तन्वा । रोचमानः ।
आ । यः । मात्रोः । उशेन्यः । जनिष्ट । देवऽयज्याय । सुऽक्रतुः । पावकः ॥९॥

यद्यदा शुचिरग्निः स्वया स्वकीयया तन्वा ततया कृपा कृपया दीप्त्या रोचमानः पूतेव स्वधितिस्तीक्ष्णीकृता स्वधितिरिव निर्गात् काष्ठान्निर्गच्छति तदानीं देवयज्याय भवति । तदेव विशदयति । योऽग्निरुशेन्यः कमनीयः सुक्रतुः सुकर्मा पावकः शोधकश्च मात्रोररण्योराजनिष्ट आजायत स देवयज्याय भवतीति ॥

॥ अथ दशमी ॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च संतु यूयं पात स्वस्तिभिः सदा नः ॥१०॥

एता । नः । अग्ने । सौभगा । दिदीहि । अपि । क्रतुं । सुऽचेतसं । वतेम ।
विश्वा । स्तोतृऽभ्यः । गृणते । च । संतु । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥१०॥

हे अग्ने एतैतानि परिदृश्यमानानि सौभगा सौभगानि शोभनानि धनानि नोऽस्मभ्यं दिदीहि । दीपय । देहि वा । अप्यपि च क्रतुं कर्म यज्ञानां कर्तारं

वा सुचेतसं शोभनप्रज्ञानयुक्तं सुप्रज्ञानं पुत्रं वा वनेम । संभजेमहि ॥ वनतेः संभजनार्थस्य वर्णोतरागमे सति रूपं ॥ विश्वा विश्वानि धनानि स्तोतृभ्य उद्गातृभ्यो गृणते शंसते च संतु । यूयं तत्परिवाराश्च सर्वे यूयं नोऽस्मान् स्वस्तिभिः क्षेमैः सदा सर्वदा पात । रक्षत ॥

॥ इति पंचमस्य द्वितीये चतुर्थो वर्गः ॥

प्र वः शुक्रायेति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं । प्र व इत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तमध्ये द्वितीयत्वेनोक्तः सूक्तविनियोगः । । आ॰ ४.१३.॥ एकादशिन आग्नेये पशौ प्र वः शुक्रायेत्येषा वपाया याज्या । सूत्रितं च । प्र वः शुक्राय भानवे भरध्वं यथा विप्रस्य मनुषो हविर्भिः । आ॰ ३.७.। इति ॥

॥ तत्र प्रथमा ॥

प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतं ।
यो दैव्यानि मानुषा जनूंष्यंतर्विश्वानि विद्मना जिगाति ॥१॥

प्र । वः । शुक्राय । भानवे । भरध्वं । हव्यं । मतिं । च । अग्नये । सुऽपूतं ।
यः । दैव्यानि । मानुषा । जनूंषि । अंतः । विश्वानि । विद्मना । जिगाति ॥१॥

हे हविषां वोढारो वो यूयं शुक्राय शुभ्राय भानवे दीप्तायाग्नये सुपूतं सुशुद्धं हव्यं मतिं स्तुतिं च प्रभरध्वं । योऽग्निर्दैव्यानि मानुषा मानुषाणि च विश्वा विश्वानि जनूंषि जातान्यंतरंतरा विद्मना प्रज्ञानेन मार्गेण वा जिगाति गच्छति । देवान्मनुष्यांश्चांतरा हवींषि नेतुं वर्तत इत्यर्थः ॥

॥ अथ द्वितीया ॥

स गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः ।
सं यो वना युवते शुचिदन्भूरि चिदन्ना समिदत्ति सद्यः ॥२॥

सः । गृत्सः । अग्निः । तरुणः । चित् । अस्तु । यतः । यविष्ठः । अजनिष्ट । मातुः ।
सं । यः । वना । युवते । शुचिऽदन् । भूरि । चित् । अन्ना । सं । इत् । अत्ति । सद्यः ॥२॥

स चित्स एव गृत्सो मेधावी । तथा च यास्कः । गृत्स इति मेधाविनाम । अग्निस्तरुणस्तारको भवति । तदा यतो यदा मातुररण्या यविष्ठो युवतमः सन्

अजनिष्ट । योऽग्निः शुचिदन् दीप्तदंतो वना वनानि संयुवते आत्मना संयोजयति । किंच भूरि चित् भूरीण्यप्यन्ना स्वीयान्यन्नानि सद्य इत्सद्य एव समत्ति सम्यग्भक्षयति ॥

॥ अथ तृतीया ॥

अस्य देवस्यं संसद्यनीके यं मर्तासः श्येतं जंगृभ्रे ।
नि यो गृभं पौरुषेयीमुवोचं दुरोकमग्निरायवें शुशोच ॥३॥
अस्य । देवस्यं । संऽसदि । अनीके । यं । मर्तासः । श्येतं । जगृभ्रे ।
नि । यः । गृभं । पौरुषेयीं । उवोचं । दुःऽओकं । अग्निः । आयवे । शुशोच ॥३॥

अस्य देवस्याग्नेरनीके मुख्ये संसदि स्थाने श्येतं श्वेतं शुभ्रं यमग्निं मर्तासो मनुष्या जगृभ्रे परिगृह्णंति । यश्चाग्निः पौरुषेयीं पुरुषैः क्रियमाणां गृभं गृभीतं न्युवोच ॥ अत्र वचिः सेवार्थे वर्तते ॥ निषेवत इत्यर्थः । सोऽग्निरायवे मनुष्यार्थं ॥ द्वाव आयव इति मनुष्यनामसु पाठात् ॥ दुरोकं सपत्नैर्दुःसेवं यथा भवति तथा शुशोच । दीप्यते ॥

॥ अथ चतुर्थी ॥

अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि ।
स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम ॥४॥
अयं । कविः । अकविषु । प्रऽचेताः । मर्तेषु । अग्निः । अमृतः । नि । धायि ।
सः । मा । नः । अत्र । जुहुरः । सहस्वः । सदा । त्वे इति । सुऽमनसः । स्याम ॥४॥

कविः क्रांतदृक् प्रचेताः प्रकाशकोऽमृतो मरणधर्मरहितोऽयमग्निरकविष्वक्रांतदृक्षु मर्तेषु मरणधर्मकेषु निधायि । निहितः । अथ प्रत्यक्षस्तुतिः । सहस्वो बलवन्नग्ने त्वे यस्मिन् त्वयि सदा वयं सुमनसः सुमतयः स्याम स त्वमत्रास्मिंल्लोके नोऽस्मान्मा जुहुरः । मा हिंसीः ॥

॥ अथ पंचमी ॥

आ यो योनिं देवकृतं ससाद क्रत्वा ह्य१ग्निरमृताँ अतारीत् ।
तमोषधीश्च वनिनश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति ॥५॥

आ। यः। योनिं। देवऽकृतं। ससाद। क्रत्वा। हि। अग्निः। अमृतान्। अतारीत्।
तं। ओषधीः। च। वनिनः। च। गर्भं। भूमिः। च। विश्वऽधायसं। बिभर्ति ॥५॥

योऽग्निर्देवकृतं देवैः कल्पितं योनिं स्थानमाससाद अध्यास्ते। किमर्थं देवाः स्थानं कल्पयंत्यग्नेरित्यत आह। हि यस्मात्कारणादग्निः क्रत्वा प्रज्ञयामृतान्देवानतारीत्। विश्वधायसं विश्वस्य धारकमोषधीरोषधयो वनिनश्च वृक्षाश्च गर्भं गर्भे संतं तं बिभ्रति। भूमिश्च बिभर्ति॥ श्रुतमेव बिभर्तीति पदं बहुवचनांततया विपरिणतं सदोषधीभिर्वनिभिश्च संबध्यते ॥

॥ इति पंचमस्य द्वितीये पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

ईशे ह्य१ग्निरमृतस्य भूरेरीशे रायः सुवीर्यस्य दातोः।
मा त्वा वयं सहसावन्नवीरा माप्सवः परि षदाम मादुवः ॥६॥

ईशे। हि। अग्निः। अमृतस्य। भूरेः। ईशे। रायः। सुऽवीर्यस्य। दातोः।
मा। त्वा। वयं। सहसाऽवन्। अवीराः। मा। अप्सवः। परि। सदाम। मा। अदुवः ॥६॥

अमृतस्यान्नमुदकं वा ॥ द्वितीयार्थे षष्ठी ॥ भूरेरधिकं दातोर्दातुमग्निरीशे। ईष्टे हि। सुवीर्यस्य शोभनवीर्ययुक्तं रायो धनं दातुमीशे। ईष्टे। अथ प्रत्यक्षस्तुतिः। सहसावन् हे बलवन्नग्ने वयं वसिष्ठा अवीराः पुत्रादिरहिताः संतो मा परिषदाम। मा पर्युपविशाम। अप्सवो रूपरहिताश्च संतो मा परिषदाम। तथा च यास्कः। अप्स इति रूपनामेति। अदुवः परिचरणहीनाश्च मा परिषदाम ॥

॥ अथ सप्तमी ॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम।
न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः ॥७॥

परिऽसद्यं। हि। अरणस्य। रेक्णः। नित्यस्य। रायः। पतयः। स्याम।
न। शेषः। अग्ने। अन्यऽजातं। अस्ति। अचेतानस्य। मा। पथः। वि। दुक्षः ॥७॥

अरणस्यानृणस्य रेक्णो धनं परिषद्यं पर्याप्तं भवति हि। अतो नित्यस्यापुनर्देयस्य रायो धनस्य पतयः स्याम। यद्वारणस्य रेक्णो धनं परिषद्यं परिहर्तव्यं

भवति। अतो नित्यस्यौरसस्य रायः पुत्राख्यस्य धनस्य पतयः स्याम। हे अग्ने अन्यजातमनौरसं शेषोऽपत्यं नास्ति। न भवति। अचेतानस्याविदुषः पथो मार्गान् पुत्रोत्पादनप्रमुखान्मार्गान् मा विदुक्षः। मा विदुदुषः॥ दुष वैकृत्य इति धातुः॥ तथा च यास्कः। परिहर्तव्यं हि नोपसर्तव्यमरणस्य रेक्णोऽरणोऽपार्णो भवति रेक्ण इति धननाम रिच्यते प्रयतः। नित्यस्य रायः पतयः स्याम। न शेषो अग्ने अन्यजातमस्ति। शेष इत्यपत्यनाम शिष्यते प्रयतोऽचेतयमानस्य तत्प्रमत्तस्य भवति मा नः पथो विदूदुषः। नि॰ ३.२.। इति॥

॥ अथाष्टमी ॥

नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मंतवा उ।
अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः॥८॥

नहि। ग्रभाय। अरणः। सुऽशेवः। अन्यऽउदर्यः। मनसा। मंतवै। ऊं इति।
अध। चित्। ओकः। पुनः। इत्। सः। एति। आ। नः। वाजी। अभीषाट्। एतु। नव्यः॥८॥

पूर्वस्यामृच्युक्त एवार्थोऽत्र प्रपंच्यते। अरणोऽरममाणोऽन्योदर्यः सुशेवः सुखतमो सन् ग्रभाय पुत्रत्वेन ग्रहणाय मनसा मंतवा उ मनसापि मंतव्यो न भवति हि। अध चिदपि च सोऽन्योदर्य ओक इत् स्वस्थानमेव पुनरेति। प्राप्नोति। अतो वाज्यन्नवानभीषाट् शत्रूणामभिभविता नव्यो नवजातः पुत्रो नोऽस्मानेतु। आगच्छतु॥

॥ अथ नवमी ॥

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥९॥

त्वं। अग्ने। वनुष्यतः। नि। पाहि। त्वं। ऊं इति। नः। सहसाऽवन्। अवद्यात्।
सं। त्वा। ध्वस्मन्ऽवत्। अभि। एतु। पाथः। सं। रयिः। स्पृहयाय्यः। सहस्री॥९॥

हे अग्ने त्वं वनुष्यतो हिंसकान्नोऽस्मान्निपाहि। त्वमु त्वमेवावद्यात्पापात् नोऽस्मान्निपाहि। त्वा त्वां ध्वस्मन्वत् ध्वस्तदोषं पाथोऽन्नं हविः समभ्येतु। सम्यक् प्राप्नोतु। अपि चास्मान् स्पृहयाय्यः स्पृहणीयः सहस्री सहस्रसंख्याको रयिरभ्येतु॥

॥ अथ दशमी ॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम।
विश्वा स्तोतृभ्यो गृणते च संतु यूयं पात स्वस्तिभिः सदा नः ॥१०॥
एता। नः। अग्ने। सौभगा। दिदीहि। अपि। क्रतुं। सुऽचेतसं। वतेम।
विश्वा। स्तोतृऽभ्यः। गृणते। च। संतु। यूयं। पात। स्वस्तिऽभिः। सदा। नः ॥१०॥

एषा ऋग्व्याख्याता ॥

॥ इति पंचमस्य द्वितीये षष्ठो वर्गः ॥

प्राग्नये तवस इति नवर्चं पंचमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकं। तथा चानुक्रांतं। प्राग्नये नव वैश्वानरीयं त्विति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्राग्नये तवसे भरध्वं गिरं दिवो अरतये पृथिव्याः।
यो विश्वेषाममृतानामुपस्थे वैश्वानरो वावृधे जागृवद्भिः ॥१॥
प्र। अग्नये। तवसे। भरध्वं। गिरं। दिवः। अरतये। पृथिव्याः।
यः। विश्वेषां। अमृतानां। उपऽस्थे। वैश्वानरः। ववृधे। जागृवत्ऽभिः ॥१॥

हे स्तोतारस्तवसे प्रवृद्धाय दिवेऽंतरिक्षस्य पृथिव्याश्चारतये गंत्रेऽग्नये वैश्वानरसंज्ञकायाग्नये गिरं स्तुतिं प्रभरध्वं। यो वैश्वानरो विश्वनरहितोऽग्निर्विश्वेषां सर्वेषाममृतानां देवानामुपस्थ उपस्थाने यज्ञे जागृवद्भिः प्रबुद्धैर्देवैः सहितः सन् ववृधे स्तुतिभिर्हविर्भिश्च वर्धते ॥

॥ अथ द्वितीया ॥

पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिंधूनां वृषभः स्तियानां।
स मानुषीरभि विशो वि भाति वैश्वानरो वावृधानो वरेण ॥२॥
पृष्टः। दिवि। धायि। अग्निः। पृथिव्यां। नेता। सिंधूनां। वृषभः। स्तियानां।
सः। मानुषीः। अभि। विशः। वि। भाति। वैश्वानरः। ववृधानः। वरेण ॥२॥

सिंधूनां नदीनां नेता स्तियानामपां। स्तिया आपो भवंति स्त्यायनादिति यास्कवचनात्। नि० ६.१७.। वृषभो वर्षिता पृष्टोऽर्चितस्तेजसा संपृक्तो वा

योऽग्निर्दिव्यंतरिक्षे पृथिव्यां च धायि न्यधायि स वैश्वानरो विश्वनरहितोऽग्निर्वरेण श्रेष्ठेन हविषा तेजसा वा वावृधानो वर्धमानः सन् मानुषीर्विशोऽभि मानुषीः प्रजाः प्रति विभाति ॥

॥ अथ तृतीया ॥

त्वद्भिया विश आयन्नसिक्नीरसमना जहतीर्भोजनानि ।
वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः ॥३॥
त्वत् । भिया । विशः । आयन् । असिक्नीः । असमनाः । जहतीः । भोजनानि ।
वैश्वानर । पूरवे । शोशुचानः । पुरः । यत् । अग्ने । दरयन् । अदीदेः ॥३॥

हे वैश्वानर विश्वनरहिताग्ने त्वत्त्वत्तो भिया भीत्यासिक्नीरसितवर्णा राजस्यः ॥ प्रथमार्थे द्वितीया ॥ विशः प्रजा असमनाः परस्परमसमेता भोजनानि धनानि जहतीस्त्यजंत्य आयन् । आगच्छन् । कदेत्यत आह । यद्यदा पूरवे राज्ञे शोशुचानो दीप्यमानः पुरस्तस्य शत्रूणां पुरो दरयन् दारयन्नदीदेः अज्वलः । तथा च निगमः । अंहो राजन्वरिवः पूरवे कः । ऋग्वे० १.६३.७. । इति ॥

॥ अथ चतुर्थी ॥

तव त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचंत ।
त्वं भासा रोदसी आ ततंथाजस्रेण शोचिषा शोशुचानः ॥४॥
तव । त्रिऽधातु । पृथिवी । उत । द्यौः । वैश्वानर । व्रतं । अग्ने । सचंत ।
त्वं । भासा । रोदसी इति । आ । ततंथ । अजस्रेण । शोचिषा । शोशुचानः ॥४॥

हे वैश्वानर विश्वेषां नराणां नेतरग्ने । तथा च यास्कः । वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयंतीति वेति । तव व्रतं त्वत्प्रीतिकरं कर्म त्रिधात्वंतरिक्षं पृथिवी च उतापि च द्यौरिति त्रयो लोकाः सचंत । सेवंते । त्रैलोक्यवर्तिन्यः प्रजास्त्वदर्थं कर्म कुर्वंतीत्यर्थः । अपि च त्वमजस्रेण शोचिषा प्रकाशेन शोशुचानो दीप्यमानो भासा दीप्त्या रोदसी द्यावापृथिव्यौ चाततंथ । विस्तारयसि ॥

॥ अथ पंचमी ॥

त्वामग्ने हरितो वावशाना गिरः सचंते धुनयो घृताचीः ।
पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नां ॥५॥
त्वां । अग्ने । हरितः । वावशानाः । गिरः । सचंते । धुनयः । घृताचीः ।
पतिं । कृष्टीनां । रथ्यं । रयीणां । वैश्वानरं । उषसां । केतुं । अह्नां ॥५॥

हे अग्ने कृष्टीनां प्रजानां । क्षितयः कृष्टय इति मनुष्यनामसु पाठात् । पतिं स्वामिनं रयीणां धनानां रथ्यं नेतारमुषसामह्नां महांतं केतुं प्रज्ञापकं वैश्वानरं विश्वनरहितं त्वां हरितोऽश्वा वावशानाः कामयमानाः सचंते । सेवंते । तथा गिरो नृणां स्तुतिरूपा वाचो धुनयः पापं धुन्वाना घृताचीर्घृतमंचंत्यः । हविषा सहिता इत्यर्थः । सचंते ॥

॥ इति पंचमस्य द्वितीये सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

त्वे असुर्यं१ वसवो न्यृण्वन्क्रतुं हि ते मित्रमहो जुषंत ।
त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्जनयन्नार्याय ॥६॥
त्वे इति । असुर्यं । वसवः । नि । ऋण्वन् । क्रतुं । हि । ते । मित्रऽमहः । जुषंत ।
त्वं । दस्यून् । ओकसः । अग्ने । आजः । उरु । ज्योतिः । जनयन् । आर्याय ॥६॥

हे मित्रमहो मित्राणां पूजयितरग्ने त्वे त्वयि वसवो वासका देवा असुर्यं बलं न्यृण्वन् । न्यगमयन् । ते क्रतुं त्वत्प्रीतिकरं कर्म जुषंत । असेवंत हि । किंच त्वमार्याय कर्मवते जनायोरु ज्योतिरधिकं तेजो जनयन् दस्यून् कर्महीनानोकसः स्थानादाजः । निरगमयः ॥

॥ अथ सप्तमी ॥

स जायमानः परमे व्योमन्वायुर्न पाथः परि पासि सद्यः ।
त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दशस्यन् ॥७॥
सः । जायमानः । परमे । विऽओमन् । वायुः । न । पाथः । परि । पासि । सद्यः ।
त्वं । भुवना । जनयन् । अभि । क्रन् । अपत्याय । जातऽवेदः । दशस्यन् ॥७॥

हे वैश्वानर स प्रसिद्धस्त्वं परमे दूरस्थे व्योमन्नंतरिक्षे जायमानः सूर्यरूपेण प्रादुर्भवन् वायुर्न यथा वायुर्विदेवत्यग्रहेषु प्रथमं सोमं पिबति तथा पाथः सोमं सद्यः परिपासि। परिपिबसि। यद्वा वायुरिव पाथो जलं परिपासि। परिपिबसि। शोषयसीत्यर्थः। किंच हे जातवेदो जातधनाग्ने त्वं भुवना भुवनान्युदकानि ॥ भूतं भुवनमित्युदकनामसु पाठात् ॥ जनयन्नपत्यायापत्यवत्पालनीयाय यजमानाय दशस्यन् कामान् च यच्छन् अभिक्रन्। वैद्युतात्मनाभिक्रंदसि अभिगर्जसि वा ॥

॥ अथाष्टमी ॥

तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः।
यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय ॥८॥

तां। अग्ने। अस्मे इति। इषं। आ। ईरयस्व। वैश्वानर। द्युऽमतीं। जातऽवेदः।
यया। राधः। पिन्वसि। विश्वऽवार। पृथु। श्रवः। दाशुषे। मर्त्याय ॥८॥

हे जातवेदो जातप्रज्ञ वैश्वानर विश्वनरहिताग्ने तामिषमेषणीयां वृष्टिं द्युमतीं दीप्तिमतीमस्मे अस्मभ्यमेरयस्व। प्रेरयस्व। वृष्ट्या त्रैलोक्यं द्योतते हि। यद्वा द्युमतीं तामिषमन्नमेरयस्व। तथा च श्रूयते। तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजतीति। अथवेषमेषणीयां तां द्युमतीं भास्वतीं दीप्तिमेरयस्व। ययेषा राधो धनं पिन्वसि पालयसि। अपि च हे विश्ववार विश्वैर्वरणीयाग्ने पृथु विस्तीर्णं श्रवो यशो दाशुषे मर्त्याय यजमानाय पिन्वसि ॥

॥ अथ नवमी ॥

तं नो अग्ने मघवद्भ्यः पुरुक्षुं रयिं नि वाजं श्रुत्यं युवस्व।
वैश्वानर महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः ॥९॥

तं। नः। अग्ने। मघवत्ऽभ्यः। पुरुऽक्षुं। रयिं। नि। वाजं। श्रुत्यं। युवस्व।
वैश्वानर। महि। नः। शर्म। यच्छ। रुद्रेभिः। अग्ने। वसुऽभिः। सऽजोषाः ॥९॥

हे अग्ने मघवद्भ्यो धनवद्भ्यः। हविष्मद्भ्य इत्यर्थः। नोऽस्मभ्यं पुरुक्षुं बह्वन्नं बहुयशस्कं वा तं प्रसिद्धं रयिं श्रुत्यं श्रवणीयं वाजं बलं च नि युवस्व। नितरां

मिश्रयस्व। किंच हे वैश्वानर विश्वनरहिताग्ने त्वं रुद्रेभी रुद्रैर्वसुभिश्च देवैः सजोषाः सहितश्च सन् नोऽस्मभ्यं महि महत् शर्म सुखं यच्छ। प्रयच्छ॥

॥ इति पंचमस्य द्वितीये ऽष्टमो वर्गः ॥

प्र सम्राज इति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं। अनुक्रम्यते च। प्र सम्राजः सप्त। वैश्वानरीयं त्वित्युक्तत्वादस्यापि वैश्वानरोऽग्निर्देवता॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा ॥

प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य।
इंद्रस्येव प्र तवसस्कृतानि वंदे दारुं वंदमानो विवक्मि॥१॥
प्र। संऽराजः। असुरस्य। प्रऽशस्तिं। पुंसः। कृष्टीनां। अनुऽमाद्यस्य।
इंद्रस्यऽइव। प्र। तवसः। कृतानि। वंदे। दारुं। वंदमानः। विवक्मि॥१॥

दारुं पुरां भेत्तारं वंदे। वंदमानः सन् सम्राजः सर्वस्य भुवनस्येश्वरस्यासुरस्य बलवतः पुंसो वीरस्य। पौंस्यमिति वीर्यमुच्यते। तथा च यास्कः। पुमान् पुरुमना भवति पुंसतेर्वेति। कृष्टीनां जनानामनुमाद्यस्य स्तुत्यस्य तवसो बलवत इंद्रस्येव तस्य वैश्वानरस्य प्रशस्तिं स्तुतिं कृतानि कर्माणि च प्रविवक्मि। प्रब्रवीमि॥

॥ अथ द्वितीया ॥

कविं केतुं धासिं भानुमद्रेर्हिन्वंति शं राज्यं रोदस्योः।
पुरंदरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि॥२॥
कविं। केतुं। धासिं। भानुं। अद्रेः। हिन्वंति। शं। राज्यं। रोदस्योः।
पुरंऽदरस्य। गीःऽभिः। आ। विवासे। अग्नेः। व्रतानि। पूर्व्या। महानि॥२॥

कविं प्राज्ञं केतुं विश्वस्य प्रज्ञापकं धासिमद्रेर्धर्तारमादतुः स्तोतुर्वा भानुं भासकं शं सुखकरं रोदस्योर्द्यावापृथिव्यो राज्यं राजानं वैश्वानरमग्निं हिन्वंति। मदीयाः प्रीणयंति प्रेरयंति वा देवाः। अहं च पुरंदरस्य पुरां दारयितुरग्नेः पूर्व्या पूर्व्याणि पुरातनानि महानि महांति व्रतानि कर्माणि गीर्भिराविवासे। परिचरामि॥

॥ अथ तृतीया ॥

न्यक्रतून्ग्रथिनो मृध्रवाचः पणीँरश्रद्धाँ अवृधाँ अयज्ञान्।
प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून् ॥३॥

नि। अक्रतून्। ग्रथिनः। मृध्रऽवाचः। पणीन्। अश्रद्धान्। अवृधान्। अयज्ञान्।
प्रऽप्र। तान्। दस्यून्। अग्निः। विवाय। पूर्वः। चकार। अपरान्। अयज्यून् ॥३॥

अक्रतूनयज्ञान् ग्रथिनो जल्पकान्मृध्रवाचो हिंसितवचस्कान् पणीन् पणिनामकान्वार्धुषिकानश्रद्धान्यज्ञादिषु श्रद्धारहितानवृधान् स्तुतिभिरग्निमवर्धयतोऽयज्ञान्यज्ञहीनान् तान्दस्यून् वृथा कालस्य नेतॄनग्निः प्रप्र अत्यंतं नि विवाय। नितरां गमयेत्। तदेवाह। अग्निः पूर्वो मुख्यः सन् अयज्यूनयजमानानपरान् जघन्यान् चकार ॥

॥ अथ चतुर्थी ॥

यो अपाचीने तमसि मदंतीः प्राचीश्चकार नृतमः शचीभिः।
तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयंतं पृतन्यून् ॥४॥

यः। अपाचीने। तमसि। मदंतीः। प्राचीः। चकार। नृऽतमः। शचीभिः।
तं। ईशानं। वस्वः। अग्निं। गृणीषे। अनानतं। दमयंतं। पृतन्यून् ॥४॥

नृतमो नेतृतमो योऽग्निरपाचीनेऽप्रकाशमाने तमसि निमग्नाः प्रजा मदंतीः स्तुवंतीः शचीभिस्ताभ्यो दत्ताभिः प्रज्ञाभिः प्राचीर्ऋजुगामिनीश्चकार। यद्वा नेतृतमो योऽग्निरपाचीने तमसि निशायां मदंतीर्माद्यंतीरुषसः शचीभिः प्रज्ञाभिः प्राचीश्चकारेत्यर्थः। तं वस्वो धनस्येशानमनानतमप्रह्वं पृतन्यून् युद्धकामांश्च दमयंतमग्निं गृणीषे। स्तौमि ॥

॥ अथ पंचमी ॥

यो देह्यो३ अनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार।
स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः ॥५॥

यः। देह्यः। अनमयत्। वधऽस्नैः। यः। अर्यऽपत्नीः। उषसः। चकार।
सः। निऽरुध्य। नहुषः। यह्वः। अग्निः। विशः। चक्रे। बलिऽहृतः। सहःऽभिः ॥५॥

योऽग्निर्दह्यो देहीरुपचिता आसुरीर्विद्या वधस्नैर्वधैरायुधैर्वानमयत् हीना अकरोत् । यश्चार्यपत्नीः । अर्यः सूर्यः पतिर्यासां ता अर्यपत्न्यः । ता उषसश्च- कार अकरोत् स यह्वो महानग्निर्विशः प्रजाः सहोभिर्बलैर्निरुध्य नहुषो राज्ञो बलिहृतः करप्रदाश्चक्रे ॥

॥ अथ षष्ठी ॥

यस्य शर्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः ।
वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थं ॥६॥

यस्य । शर्मन् । उप । विश्वे । जनासः । एवैः । तस्थुः । सुऽमतिं । भिक्षमाणाः ।
वैश्वानरः । वरं । आ । रोदस्योः । आ । अग्निः । ससाद । पित्रोः । उपऽस्थं ॥६॥

विश्वे सर्वे जनासो जनाः शर्मन् शर्मणि सुखनिमित्तं यस्य वैश्वानरस्य सुमतिं भिक्षमाणाः प्रार्थमाना एवैः कर्मभिर्हविर्भिर्वोपतस्थुः यमेवोपतिष्ठंते स वैश्वा- नरो विश्वनरहितोऽग्निः सूर्यः सन् पित्रोर्मातापित्रो रोदस्योर्द्यावापृथिव्योर्वर- मुत्कृष्टमुपस्थं मध्यमंतरिक्षमाससाद । आगच्छत् ॥

॥ अथ सप्तमी ॥

आ देवो ददे बुध्न्या३ वसूनि वैश्वानर उदिता सूर्यस्य ।
आ समुद्रादवरादा परस्मादाग्निर्ददे दिव आ पृथिव्याः ॥७॥

आ । देवः । ददे । बुध्न्या । वसूनि । वैश्वानरः । उत्ऽइता । सूर्यस्य ।
आ । समुद्रात् । अवरात् । आ । परस्मात् । आ । अग्निः । ददे । दिवः । आ । पृथिव्याः ॥७॥

वैश्वानरो विश्वनरहितोऽग्निर्देवो द्योतमानो बुध्न्या बुध्न्यान्यांतरिक्षाणि । बुध्नमंतरिक्षं । तथा च यास्कः । बुध्नमंतरिक्षं बद्धा अस्मिन्धृता आप इति वा । नि॰ १०.४४. । इति । वसून्याच्छादकानि तमांसि ॥ वस आच्छादन इति धातुः ॥ सूर्यस्योदितोदितावुदये सत्याददे । समुद्रादंतरिक्षात् ॥ सगरं समुद्र इत्यंतरिक्षनामसु पाठात् ॥ अवरात्पृथिव्यास्तमांस्याददे । समुद्रात्परस्माद्दिवोऽपि तमांस्याददे । तदेव दर्शयति । अग्निर्दिवस्तमांस्याददे पृथिव्याश्च तमांस्याददे ॥

॥ इति पंचमस्य द्वितीये नवमो वर्गः ॥

प्र वो देवमिति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। प्र वो देवमित्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्त उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र वो देवं चित्सहसानमग्निमश्वं न वाजिनं हिषे नमोभिः ।
भवा नो दूतो अध्वरस्य विद्वान्त्मना देवेषु विविदे मितद्रुः ॥१॥

प्र। वः। देवं। चित्। सहसानं। अग्निं। अश्वं। न। वाजिनं। हिषे। नमःऽभिः।
भव। नः। दूतः। अध्वरस्य। विद्वान्। त्मना। देवेषु। विविदे। मितऽद्रुः ॥१॥

हे अग्ने वस्त्वां देवं द्योतमानादिगुणयुक्तं सहसानं राक्षसानभिभवंतं बलमाचरंतं वाग्निमयस्य नेतारमश्वं न अश्वमिव वाजिनं वेगवंतं बलवंतं वा नमोभिः स्तुतिभिर्हविर्भिर्वा प्रहिषे। हे अग्ने त्वां चित्प्रहिणोम्येव। किंच हे अग्ने त्वं विद्वान् जानन् नोऽस्माकमध्वरस्य यज्ञस्य दूतो भव। अथ परोक्षस्तुतिः। त्मनात्मना स्वयमेव देवेषु मितद्रुर्दग्धद्रुमोऽग्निरिव विविदे। प्रज्ञायते ॥

॥ अथ द्वितीया ॥

आ याह्यग्ने पथ्या३ अनु स्वा मंद्रो देवानां सख्यं जुषाणः ।
आ सानु शुष्मैर्नदयन्पृथिव्या जंभेभिर्विश्वमुशधग्वनानि ॥२॥

आ। याहि। अग्ने। पथ्याः। अनु। स्वाः। मंद्रः। देवानां। सख्यं। जुषाणः।
आ। सानु। शुष्मैः। नदयन्। पृथिव्याः। जंभेभिः। विश्वं। उशधक्। वनानि ॥२॥

हे अग्ने त्वं मंद्रो मदयिता स्तुत्यो वा देवानां सख्यं। देवैः सह सख्यमित्यर्थः। जुषाणः सेवमानः पृथिव्याः सानु समुच्छ्रितं तृणगुल्मादिकं शुष्मैः शोषकैर्दाहकैस्तेजोभिर्नदयन् शब्दायमानः। दह्यमानं हि शब्दायते। जंभेभिर्दंष्ट्राभिः। ज्वालाभिरित्यर्थः। विश्वं विश्वानि वनान्युशधक् कामयमानो दहन् स्वाः पथ्या अनु। स्वैर्मार्गैरित्यर्थः। आ आयाहि। आकारस्य पुनर्वचनमादरार्थं ॥

॥ अथ तृतीया ॥

प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता ।
आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः ॥३॥

प्राचीनः। यज्ञः। सुऽधितं। हि। बर्हिः। प्रीणीते। अग्निः। ईळितः। न। होता।
आ। मातरा। विश्ववारे इति विश्वऽवारे। हुवानः। यतः। यविष्ठ। जज्ञिषे।
सुऽशेवः ॥३॥

अयं यज्ञः प्राचीनः। सम्यगनुष्ठीयत इत्यर्थः। यद्वा यज्ञो यष्टा होता प्राचीनः। यद्वा यज्ञो हविः प्राचीनः प्राचीनं प्राङ्मुखमासन्नं। बर्हिर्हि बर्हिश्च सुधितं सुनिहितं। ईळितः स्तुतोऽग्निः प्रीणीते। तृप्तश्च भवति। होता न होता च। नेति चार्थे। विश्ववारे विश्वैर्वरणीये मातरा द्यावापृथिव्याविडायामाहुवानो भवति। कदेत्यत आह। यतो यदा यविष्ठ हे युवतमाग्ने त्वं सुशेवः सुसुखो जज्ञिषे जायसे ॥

॥ अथ चतुर्थी ॥

सद्यो अध्वरे रथिरं जनंत मानुषासो विचेतसो य एषां।
विशामधायि विश्पतिर्दुरोणे३ग्निर्मंद्रो मधुवचा ऋतावा ॥४॥
सद्यः। अध्वरे। रथिरं। जनंत। मानुषासः। विऽचेतसः। यः। एषां।
विशां। अधायि। विश्पतिः। दुरोणे। अग्निः। मंद्रः। मधुऽवचाः। ऋतऽवा ॥४॥

विचेतसो विविक्तप्रज्ञा मानुषासो मनुष्या अध्वरे यज्ञे रथिरं रथिनं नेतारमग्निं सद्यो जनंत। जनयंति। य एषां हविर्वहति सोऽयमग्निर्विश्पतिर्विशां पतिर्विश्वस्य पतिर्वा मंद्रो मदयिता मधुवचा मादयितृवचस्क ऋतावा यज्ञवान् विशां मनुष्याणां दुरोणे गृहेऽधायि। आहितः ॥

॥ अथ पंचमी ॥

असादि वृतो वह्निराजगन्वानग्निर्ब्रह्मा नृषदने विधर्ता।
द्यौश्च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारं ॥५॥
असादि। वृतः। वह्निः। आऽजगन्वान्। अग्निः। ब्रह्मा। नृऽसदने। विऽधर्ता।
द्यौः। च। यं। पृथिवी। ववृधाते इति। आ। यं। होता। यजति। विश्वऽवारं ॥५॥

वृतो होतृत्वेन वह्निर्हविषां वोढा ब्रह्मा परिवृढो विधर्ता विश्वस्य धारकोऽग्निराजगन्वान् द्युलोकादागत आगमनशीलो वा नृषदने होतुः स्थानेऽसादि।

उपविष्टः । यमग्निं द्यौश्च पृथिवी चोभे ववृधाते वर्धयतः । यं च विश्ववारं विश्वैर्वरणीयं होता मानुष आयजति ॥

॥ अथ षष्ठी ॥

एते द्युम्नेभिर्विश्वमातिरंत मंत्रं ये वारं नर्या अतंक्षन् ।
प्र ये विशस्तिरंत श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य ॥ ६ ॥

एते । द्युम्नेभिः । विश्वं । आ । अतिरंत । मंत्रं । ये । वा । अरं । नर्याः । अतंक्षन् ।
प्र । ये । विशः । तिरंत । श्रोषमाणाः । आ । ये । मे । अस्य । दीधयन् । ऋतस्य ॥ ६ ॥

एते मदीयाः पुरुषा द्युम्नेभिरन्नैर्विश्वं पोष्यवर्गमातिरंत । वर्धयंति । अथवा द्युम्नेभिर्यशोभिर्विश्वं जगदातिरंत । अभ्यगच्छन्नित्यर्थः । क इत्यत आह । ये नर्या मनुष्या मंत्रं स्तोत्रं स्तुत्यं वारं पर्याप्तमतक्षन् समस्कुर्वन् । वेति समुच्चये । ये च विशो जनाः श्रोषमाणाः ॥ शृणोतेः सन्यङोरिति द्वित्वं इको झलिति सनः किव्वं च सर्वे विधयश्छंदसि विकल्प्यंत इति न भवतः । ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदं च ॥ अतिरंत वर्धयंति । मे मदीया ये वा ऋतस्यास्य सत्यमिममग्निं ॥ कर्मणि षष्ठी । मानुषाणामग्नीयादितिवत् ॥ आदीधयन् आदीपयन् ॥

॥ अथ सप्तमी ॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनां ।
इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नु । त्वां । अग्ने । ईमहे । वसिष्ठाः । ईशानं । सूनो इति । सहसः । वसूनां ।
इषं । स्तोतृऽभ्यः । मघवत्ऽभ्यः । आनट् । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

सहसः सूनो बलस्य पुत्राग्ने वसिष्ठा वयं वसूनामीशानं त्वामस्मदीयेभ्यः स्तोतृभ्यो मघवद्भ्यो हविष्मद्भ्यश्चेषमन्नं नु क्षिप्रमद्य वानट् । प्रापयेः ॥ नशेर्व्याप्तिकर्मणोऽतर्णीतण्यर्थाल्लुङि छंदस्यपि दृश्यत इत्यडागमः ॥ यूयं त्वत्परिवाराश्च सर्वे यूयं नोऽस्मान् सदा स्वस्तिभिः पातेत्येवमीमहे । याचामहे ॥

॥ इति पंचमस्य द्वितीये दशमो वर्गः ॥

इंधे राजेति सप्तर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं । इंधे राजेत्यनुक्रांतं ॥

प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः ॥ आतिथ्यायां प्रयायमग्निरिति स्विष्टकृतो याज्या । सूत्रितं च । प्रयायमग्निर्भरतस्य शृण्व इति संयाज्ये । आ० ४.५. । इति ॥

॥ तत्र प्रथमा ॥

इंधे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
नरो हव्येभिरीळते सबाध आग्निरग्र उषसामशोचि ॥१॥

इंधे । राजा । सं । अर्यः । नमःऽभिः । यस्य । प्रतीकं । आऽहुतं । घृतेन ।
नरः । हव्येभिः । ईळते । सऽबाधः । आ । अग्निः । अग्रे । उषसां । अशोचि ॥१॥

राजा दीप्तोऽर्यः स्वामी हविषां प्रेरको वाग्निर्नमोभिः स्तुतिभिः सह समिंधे । समिध्यते । यस्याग्नेः प्रतीकं रूपं घृतेनाहुतं भवति । यं च नरोऽस्मदीयाः सबाधः संश्लिष्टाः संजातबाधा वा हव्येभिर्हव्यैः सार्धमीळते स्तुवंति सोऽग्निरुषसामग्र आशोचि । आदीप्यते ॥

॥ अथ द्वितीया ॥

अयमु ष्य सुमहाँ अवेदि होता मंद्रो मनुषो यह्वो अग्निः ।
वि भा अकः ससृजानः पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे ॥२॥

अयं । ऊं इति । स्यः । सुऽमहान् । अवेदि । होता । मंद्रः । मनुषः । यह्वः । अग्निः ।
वि । भाः । अकरित्यकः । ससृजानः । पृथिव्यां । कृष्णऽपविः । ओषधीभिः । ववक्षे ॥२॥

स्य सोऽयं होता देवानामाह्वाता मंद्रो मदयिता यह्वो महानग्निर्मनुषो मनुष्यस्य सुमहानवेदि । सुमहत्त्वेन प्रज्ञायते । अपि च सोऽयं भा दीप्तीर्व्यकः विकरोत्यंतरिक्षे । किंच सोऽयं कृष्णपविः कृष्णमार्गोऽग्निः पृथिव्यां ससृजानः सृज्यमानः सन्नोषधीभिर्ववक्षे । वर्धते ॥

॥ अथ तृतीया ॥

कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः ।
कदा भवेम पतयः सुदत्र रायो वंतारो दुष्टरस्य साधोः ॥३॥

कया । नः । अग्ने । वि । वसः । सुऽवृक्तिं । कां । ऊं इति । स्वधां । ऋणवः । शस्यमानः ।
कदा । भवेम । पतयः । सुऽदत्र । रायः । वंतारः । दुस्तरस्य । साधोः ॥३॥

हे अग्ने त्वं कया स्वधया हविषा नोऽस्माकं सुवृक्तिं स्तुतिं विवसः। व्याप्नुवे आच्छादयसि वा। कामु कां च स्तवं ममानः स्तूयमानस्त्वमृञ्जसः। प्राप्नुयाः। हे सुदत्र शोभनदानाग्ने। तथा च यास्कः। सुदत्रः कल्याणदान इति। वयं कदा दुष्टरस्य शत्रुभिर्दुर्हिंसकस्य साधोः समीचीनस्य रायो धनस्य पतयः स्वामिनो भवेम। वंतारः संभक्तारश्च कदा भवेम ॥

॥ अथ चतुर्थी ॥

प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः।
अभि यः पूरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ॥४॥
प्रऽप्र। अयं। अग्निः। भरतस्य। शृण्वे। वि। यत्। सूर्यः। न। रोचते। बृहत्। भाः।
अभि। यः। पूरुं। पृतनासु। तस्थौ। द्युतानः। दैव्यः। अतिथिः। शुशोच ॥४॥

अयं प्रसिद्धोऽग्निर्भरतस्य यजमानस्य मम प्रप्रात्यंतं शृण्वे। प्रथितो भवति। कदेत्यत्राह। यद्यदा सूर्यो न सूर्य इव बृहद्भा बृहद्भासमानो विरोचते प्रकाशते। किंच योऽग्निः पृतनासु संग्रामेषु पूरुं पूरुनामकमसुरमभितस्थौ अभिबभूव सोऽयं द्युतानो दीप्यमानो दैव्योऽतिथिर्देवानामतिथिवत्पूज्यः सन् शुशोच। जज्वाल ॥

॥ अथ पंचमी ॥

असन्नित्त्वे आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः।
स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ॥५॥
असन्। इत्। त्वे इति। आऽहवनानि। भूरि। भुवः। विश्वेभिः। सुऽमनाः। अनीकैः।
स्तुतः। चित्। अग्ने। शृण्विषे। गृणानः। स्वयं। वर्धस्व। तन्वं। सुऽजात ॥५॥

हे अग्ने त्वे त्वय्याहवनानि हवींष्याहुतयो वा भूरि बहून्यसन्नित्। भवंत्येव। त्वं च विश्वेभिर्विश्वैरनीकैस्तेजोभिस्त्वद्विभूतिभिरग्निभिर्वा सह सुमना भुवः। भव। हे अग्ने स्तुतः स्तोतुः। स्तौतीति स्तुत्। स्तोत्रं शृण्विषे। शृणु। हे सुजात कल्याणप्रादुर्भावाग्ने गृणानः स्तूयमानस्त्वं स्वयं स्वयमेव तन्वं स्वां तनुं मम तनुं वा वर्धस्व। वर्धयस्व ॥

॥ अथ षष्ठी ॥

इदं वचः शतसाः संसहस्रमुदग्नये जनिषीष्ट द्विबर्हाः ।
शं यत्स्तोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा ॥६॥
इदं । वचः । शतऽसाः । संऽसहस्रं । उत् । अग्नये । जनिषीष्ट । द्विऽबर्हाः ।
शं । यत् । स्तोतृऽभ्यः । आपये । भवाति । द्युऽमत् । अमीवऽचातनं । रक्षःऽहा ॥६॥

शतसा गवां शतस्य संभक्ता संसहस्रं गवां सहस्रेण च संयुतो द्विबर्हा द्वाभ्यां विद्याकर्मभ्यां बृहन् वसिष्ठो द्वयोः स्थानयोर्द्युलोकयोर्महान्वा । तथा च यास्कः । द्विबर्हा द्वयोः स्थानयोः परिवृढ इति । इदं वच इदं स्तोत्रमग्नय उज्जनिषीष्ट । उदजीजनत् । किं तदित्यत आह । यद्वचो द्युमत् दीप्तिमत् । यशस्करमित्यर्थः । अमीवचातनं रोगाणां निवारकं रक्षोहा रक्षसां हंतृ च स्तोतृभ्य आपये तद्बंधवे पुत्रादिकायापि शं सुखदं भवाति भवेत् ॥

॥ अथ सप्तमी ॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनां ।
इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः ॥७॥
नु । त्वां । अग्ने । ईमहे । वसिष्ठाः । ईशानं । सूनो इति । सहसः । वसूनां ।
इषं । स्तोतृऽभ्यः । मघवत्ऽभ्यः । आनट् । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥७॥

इयमृक् प्रागेव व्याख्याता ॥

॥ इति पंचमस्य द्वितीय एकादशो वर्गः ॥

अबोधि जार इति षड्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं । अबोधि षडित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तमध्य उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

अबोधि जार उषसामुपस्थाद्धोता मंद्रः कवितमः पावकः ।
दधाति केतुमुभयस्य जंतोर्हव्या देवेषु द्रविणं सुकृत्सु ॥१॥
अबोधि । जारः । उषसां । उपऽस्थात् । होता । मंद्रः । कविऽतमः । पावकः ।
दधाति । केतुं । उभयस्य । जंतोः । हव्या । देवेषु । द्रविणं । सुकृत्ऽसु ॥१॥

जारः सर्वेषां प्राणिनां जरयिता होता देवानामाह्वाता च मंद्रो मदयिता स्तुत्यो वा कवितमः प्राज्ञतमः पावकः शोधकोऽग्निरुषसामुपस्थात् मध्येऽबोधि । अबुध्यत । किंचोभयस्य द्विपदश्च चतुष्पदश्च दैव्यस्य मानुषस्य वा जंतोः प्राणिनः केतुं प्रज्ञानं दधाति । विदधाति । देवेषु च हव्या हव्यानि दधाति । सुकृत्सु यजमानेषु च द्रविणं धनं दधाति ॥

॥ अथ द्वितीया ॥

स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः ।
होता मंद्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणां ॥२॥

सः । सुऽक्रतुः । यः । वि । दुरः । पणीनां । पुनानः । अर्कं । पुरुऽभोजसं । नः ।
होता । मंद्रः । विशां । दमूनाः । तिरः । तमः । ददृशे । राम्याणां ॥२॥

सोऽग्निः सुक्रतुः सुकर्मा सुप्रज्ञो वा भवति । योऽग्निः पणीनामसुराणां दुरो द्वाराणि गवां पिधानानि विवृतवान् । पुरुभोजसं बहुक्षीरमर्कमर्चनीयं गवां संघं नोऽस्मदर्थं पुनानः शोधयन् । हरन्नित्यर्थः । होता देवानामाह्वाता मंद्रो मदयिता स्तुत्यो वा दमूना दांतमना दममना दानमना वा राम्याणां रात्रीणां रमयित्रीणां वा विशां जनानां यजमानानां दा तमोऽंधकारं तिरस्कुर्वन् ददृशे दृश्यते च । यद्वा तमस्तिरो ददृशे । नाशयतीत्यर्थः ॥

॥ अथ तृतीया ॥

अमूरः कविरदितिर्विवस्वान्सुसंसन्मित्रो अतिथिः शिवो नः ।
चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्व१ आ विवेश ॥३॥

अमूरः । कविः । अदितिः । विवस्वान् । सुऽसंसत् । मित्रः । अतिथिः । शिवः । नः ।
चित्रऽभानुः । उषसां । भाति । अग्रे । अपां । गर्भः । प्रऽस्वः । आ । विवेश ॥३॥

योऽग्निरमूरोऽमूढः कविः प्राज्ञोऽदितिरदीनो विवस्वान्दीप्तिमान् सुसंसत् शोभनसदनः शोभनसंवेदनो वा मित्रः प्रमीतेस्त्राता सर्वेषामतिथिरतिथिवत्पूज्यः शिवः शिवकरो जगतश्चित्रभानुश्चित्रदीप्तिरुषसामग्रे मुखे भाति सोऽयमपां गर्भः सन् प्रस्वो जायमाना ओषधीराविवेश ॥

॥ अथ चतुर्थी ॥

ईळेन्यो वो मनुषो युगेषु समनगा अशुचज्जातवेदाः ।

सुसंदृशा भानुना यो विभाति प्रति गावः समिधानं बुधंत ॥४॥

ईळेन्यः । वः । मनुषः । युगेषु । समनऽगाः । अशुचत् । जातऽवेदाः ।

सुऽसंदृशा । भानुना । यः । विऽभाति । प्रति । गावः । संऽइधानं । बुधंत ॥४॥

हे अग्ने वस्त्वं ॥ अत्र विभक्तेर्वचनव्यत्ययः ॥ मनुषो मनुष्यस्य युगेषु यागकालेषु सर्वेष्वपि दिवसेषु वेळेन्यः स्तुत्यः । अतः परं परोक्षस्तुतिः । योऽग्निर्जातवेदा जातधनः समनगा युद्धेषु संगंता सन् अशुचत् दीप्यते । सुसंदृशा सुसंदर्शनेन भानुना तेजसा विभाति च । तमग्निं समिधानं समिध्यमानं गावः स्तुतयः प्रतिबुधंत । प्रतिबोधयंति ॥

वैश्वदेवे पशावग्ने याहीति हविषो याज्या । सूचितं च । अग्ने याहि दूत्यं मा रिषण्य इंद्रं नरो नेमधिता हवंत इति तिस्रः । आ॰ ३.७. । इति ॥

॥ सैषाच पंचमी ॥

अग्ने याहि दूत्यं१ मा रिषण्यो देवाँ अच्छा ब्रह्मकृता गणेन ।

सरस्वतीं मरुतो अश्विनापो यक्षि देवान्रत्नधेयाय विश्वान् ॥५॥

अग्ने । याहि । दूत्यं । मा । रिषण्यः । देवान् । अच्छ । ब्रह्मऽकृता । गणेन ।

सरस्वतीं । मरुतः । अश्विना । अपः । यक्षि । देवान् । रत्नऽधेयाय । विश्वान् ॥५॥

हे अग्ने दूत्यं दूतस्य कर्म हविर्वहनादि याहि । देवानच्छाभिगच्छ । गणेन संघेन सह ब्रह्मकृता ब्रह्मकृतोऽस्मानस्मदीयांश्च तव स्तोतॄन्मा रिषण्यः । मा हिंसीः । सरस्वतीं मरुतोऽश्विनाश्विनावपश्च एतान् देवान् रत्नधेयायास्मभ्यं रत्नदानाय यक्षि च ॥

॥ अथ षष्ठी ॥

त्वामग्ने समिधानो वसिष्ठो जरूथं हन्यक्षि राये पुरंधिं ।

पुरुणीथा जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा नः ॥६॥

त्वां । अग्ने । संऽइधानः । वसिष्ठः । जरूथं । हन् । यक्षि । राये । पुरंऽधिं ।

पुरुऽनीथा । जातऽवेदः । जरस्व । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥६॥

हे अग्ने त्वां वसिष्ठ ऋषिः समिधानो भवति। त्वं च जरूथं परुषभाषिणं जरणीयं वा रक्षोगणं हन्। जहि। राये धनवते यजमानाय पुरंधिं बहुधियं देवगणं। तथा च यास्कः। पुरंधिर्बहुधीरिति। यक्षि। यज। किंच हे जातवेदोऽग्ने पुरुणीथा पुरुनीथेन बहुना स्तोत्रेण जरस्व। देवान् स्तुहि। यद्वा पुरुणीथानेकमार्गाणि रक्षांसि जरयेत्यर्थः ॥

॥ इति पंचमस्य द्वितीये द्वादशो वर्गः ॥

उषो न जार इति पंचर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। तथा चानुक्रांतं। उषो न पंचेति ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

उषो न जारः पृथु पाजो अश्रेद्दविद्युतद्दीद्यच्छोशुचानः।
वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजीगः ॥१॥

उषः। न। जारः। पृथु। पाजः। अश्रेत्। दविद्युतत्। दीद्यत्। शोशुचानः।
वृषा। हरिः। शुचिः। आ। भाति। भासा। धियः। हिन्वानः। उशतीः। अजीगरिति ॥१॥

अग्निरुषो न जार उषसो जारः सूर्यस्तद्वत् पृथु विस्तीर्णं पाजस्तेजोऽश्रेत्। श्रयति। किंच दविद्युतत् दीद्यत् शोशुचान इति त्रयोऽपि शब्दा यद्यपि दीप्तिकर्माणस्तथापि दीप्तेर्भूयस्त्वज्ञापनाय प्रयुक्ता इति न पुनरुक्तिः। अत्यंतं दीप्यमान इत्यर्थः। वृषा कामानां वर्षिता हरिर्हविषां प्रेरकः शुचिः शुद्धिकृदग्निर्धियः कर्माणि हिन्वानः प्रेरयन् भासा दीप्त्याभाति। प्रकाशते। अपि चोशतीः कामयमाना अजीगः। जागरयति। तमसा तिरोहिताः प्रजा उद्गिरति वा ॥

॥ अथ द्वितीया ॥

स्व१र्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म।
अग्निर्जन्मानि देव आ वि विद्वान्द्रवद्दूतो देवयावा वनिष्ठः ॥२॥

स्वः। न। वस्तोः। उषसां। अरोचि। यज्ञं। तन्वानाः। उशिजः। न। मन्म।
अग्निः। जन्मानि। देवः। आ। वि। विद्वान्। द्रवत्। दूतः। देवऽयावा। वनिष्ठः ॥२॥

अग्निर्वस्तोरहनि। वस्तोर्द्युरित्यहर्नामसु पाठात्। उषसामग्रे स्वर्ण आदित्य

इव । तथा च यास्कः । स्वरादित्यो भवति सुअरणः सुईरण इति । अरोचि । दीप्यते । उशिजो न ऋत्विजश्च यज्ञं तन्वाना विस्तारयंतो मन्म मन्मानि मननीयानि स्तोत्राणि पठंतीति शेषः । नेति संप्रत्यर्थः । अपि च विद्वान् जानन् दूतो देवानां देवयावा देवान् प्रति गच्छन् वनिष्ठो दातृतमोऽग्निर्व्यद्रवत् । विविधमाद्रवति ॥

॥ अथ तृतीया ॥

अच्छा गिरो मतयो देवयंतीरग्निं यंति द्रविणं भिक्षमाणाः ।
सुसंदृशं सुप्रतीकं स्वंचं हव्यवाहमरतिं मानुषाणां ॥३॥

अच्छ । गिरः । मतयः । देवऽयंतीः । अग्निं । यंति । द्रविणं । भिक्षमाणाः ।
सुऽसंदृशं । सुऽप्रतीकं । सुऽअंचं । हव्यऽवाहं । अरतिं । मानुषाणां ॥३॥

मतयः स्तुतिरूपा देवयंतीर्देवानिच्छंत्यो द्रविणं धनं भिक्षमाणा याचमाना गिरो वाचः सुसंदृशं कल्याणसंदर्शनं सुप्रतीकं सुरूपं शोभनांगं वा स्वंचं सुष्ठु गच्छंतं हव्यवाहं हव्यानां वोढारं मानुषाणामरतिं स्वामिनमग्निमच्छाभि यंति । अभिगच्छंति ॥

॥ अथ चतुर्थी ॥

इंद्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहंतं ।
आदित्येभिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारं ॥४॥

इंद्रं । नः । अग्ने । वसुऽभिः । सऽजोषाः । रुद्रं । रुद्रेभिः । आ । वह । बृहंतं ।
आदित्येभिः । अदितिं । विश्वऽजन्यां । बृहस्पतिं । ऋक्वऽभिः । विश्वऽवारं ॥४॥

हे अग्ने वसुभिर्देवैः सजोषाः संगतस्त्वं नोऽस्मदर्थमिंद्रमावह । रुद्रेभी रुद्रैर्देवैः संगतो बृहंतं महांतं रुद्रं चावह । आदित्येभिरादित्यैर्देवैः संगतो विश्वजन्यां विश्वजनहितामदितिं चावह । ऋक्वभिः स्तुत्यैरंगिरोभिर्देवैः संगतो विश्ववारं विश्वैः संभजनीयं बृहस्पतिं चावह ॥

॥ अथ पंचमी ॥

मंद्रं होतारमुशिजो यविष्ठमग्निं विश ईळते अध्वरेषु ।
स हि क्षपावाँ अभवद्रयीणामतंद्रो दूतो यजथाय देवान् ॥५॥

मंद्रं। होतारं। उशिजः। यविष्ठं। अग्निं। विशः। ईळते। अध्वरेषु।
सः। हि। क्षपाऽवान्। अभवत्। रयीणां। अतंद्रः। दूतः। यजथाय। देवान् ॥५॥

उशिजः कामयमाना विशो मनुष्या मंद्रं स्तुत्यं होतारमाह्वातारं यविष्ठं युवतममग्निमध्वरेषु यागेष्वीळते। स्तुवंति। हि यस्मात्कारणात्सोऽग्निः क्षपावान् रात्रिमान्। रात्रौ खल्वग्नयेऽग्निहोत्रं हूयते। रयीणां सूर्यस्य रयिमतां हविष्मतां यजमानानां देवान्यजथाय यष्टुमतंद्रस्तंद्रारहितोऽभवत्। तथा च श्रूयते। यस्माद्दूतोऽभवत्तस्माद्विशस्तमध्वर ईळत इति ॥

॥ इति पंचमस्य द्वितीये त्रयोदशो वर्गः ॥

महाँ असीति पंचर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। महानित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

महाँ अस्यध्वरस्य प्रकेतो न ऋते त्वदमृता मादयंते।
आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः सदेह ॥१॥
महान्। असि। अध्वरस्य। प्रऽकेतः। न। ऋते। त्वत्। अमृताः। मादयंते।
आ। विश्वेभिः। सऽरथं। याहि। देवैः। नि। अग्ने। होता। प्रथमः। सद। इह ॥१॥

हे अग्ने त्वमध्वरस्य प्रकेतः प्रज्ञापनः सन् महानसि। त्वदृते त्वया विनामृता देवा न मादयंते। न माद्यंति। विश्वेभिर्विश्वैर्देवैः सरथं यथा भवत्यायाहि च। इह स्तीर्णे बर्हिषि प्रथमो मुख्यो होताह्वाता सन् निषद। निषीद च ॥

वाजपेये बार्हस्पत्यचरोः स्विष्टकृतोऽनुवाक्या। सूत्रितं च। त्वामीळते अजिरं दूत्यायाग्निं सुदीतिं सुदृशं गृणंतः। आ० ९.९.। इति ॥

॥ सैषात्र द्वितीया ॥

त्वामीळते अजिरं दूत्याय हविष्मंतः सदमिन्मानुषासः।
यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवंति ॥२॥
त्वां। ईळते। अजिरं। दूत्याय। हविष्मंतः। सदं। इत्। मानुषासः।
यस्य। देवैः। आ। असदः। बर्हिः। अग्ने। अहानि। अस्मै। सुऽदिना। भवंति ॥२॥

हे अग्ने अजिरं प्रगामिनं त्वां मानुषासो मानुषा हविष्मंतो यजमानाः सदमित्सदैव दूत्याय दूतकर्मणे हविर्वहनायेळते । याचंते । किमर्थमित्यत आह । यस्य हविष्मतो बर्हिर्देवैः सार्धमासदः त्वमधितिष्ठसि अस्मै हविष्मतेऽहानि सुदिना सुदिनानि शोभनदिनानि भवंति ॥

॥ अथ तृतीया ॥

त्रिश्चिदक्तोः प्र चिकितुर्वसूनि त्वे अंतर्दाशुषे मर्त्याय ।

मनुष्वदग्न इह यक्षि देवान्भवा नो दूतो अभिशस्तिपावा ॥३॥

त्रिः । चित् । अक्तोः । प्र । चिकितुः । वसूनि । त्वे इति । अंतः । दाशुषे । मर्त्याय ।

मनुष्वत् । अग्ने । इह । यक्षि । देवान् । भव । नः । दूतः । अभिशस्तिऽपावा ॥३॥

हे अग्ने त्वे त्वय्यंतर्मध्येऽक्तोरह्नः । यद्यप्यक्तुरिति रात्रेर्नाम तथाप्यत्राज्यंते व्यज्यंते रूपादीन्यस्मिन्नित्यह्नो नाम । त्रिस्त्रिवारं त्रिषु सवनेषु वसूनि हवींषि दाशुषे हविषां प्रदात्रे मर्त्याय मनुष्याय । तदर्थमित्यर्थः । प्रचिकितुः । प्रवेदयंत्यृत्विजः । यद्वाक्तोरह्नि त्रिस्त्रीनग्निमश्वमजं च त्वय्यंतर्निहितानि प्रचिकितुः । अविदन्नित्यर्थः । अपि च मनुष्वत् मनोरिवेह ममास्मिन्यज्ञे दूतस्त्वं देवान्यक्षि । यज । नोऽस्माकमभिशस्तिपावाभिशस्तेरभिशंसकात् शात्रवात्पावा रक्षिता भव ॥

॥ अथ चतुर्थी ॥

अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः कृतस्य ।

क्रतुं ह्यस्य वसवो जुषंताथा देवा दधिरे हव्यवाहं ॥४॥

अग्निः । ईशे । बृहतः । अध्वरस्य । अग्निः । विश्वस्य । हविषः । कृतस्य ।

क्रतुं । हि । अस्य । वसवः । जुषंत । अथ । देवाः । दधिरे । हव्यऽवाहं ॥४॥

बृहतो महतोऽध्वरस्य कौटिल्यरहितस्य यज्ञस्याग्निरीशे । ईष्टे । विश्वस्य सर्वस्य कृतस्य संस्कृतस्य हविषश्चाग्निरेवेष्टे । हि यस्मादस्याग्नेः क्रतुं कर्म वसवो देवा जुषंत सेवंते । अथापि च देवा अग्निं हव्यवाहं हव्यानां वोढारं दधिरे चक्रिर इत्यर्थः ॥

॥ अथ पंचमी ॥

आग्ने वह हविरद्याय देवानिंद्रज्येष्ठास इह मादयंतां ।

इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः ॥५॥

आ। अग्ने। वह। हविःऽअद्याय। देवान्। इंद्रऽज्येष्ठासः। इह। मादयंतां।
इमं। यज्ञं। दिवि। देवेषु। धेहि। यूयं। पात। स्वस्तिऽभिः। सदा। नः ॥५॥

हे अग्ने हविरद्याय हविषां भक्षणाय देवानावह। किमर्थमत्यित आह। इहास्मिन्यज्ञ इंद्रज्येष्ठास इंद्रप्रमुखा देवा मादयंतां। इमं यज्ञमिदं यष्टव्यं हविर्दिवि स्थितेषु देवेषु धेहि। निधेहि। देवान्वेह नयेदं हविर्वा देवेषु नयेति भावः। अंतिमः पादो व्याख्यातचरः ॥

॥ इति पंचमस्य द्वितीये चतुर्दशो वर्गः ॥

अगन्म महेति तृचात्मकं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। तथा चानुक्रांतं। अगन्म तृचमिति ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥ व्यूळ्हे दशरात्रे नवमेऽहनीदं सूक्तमाज्यशस्त्रं। सूचितं च। तृतीयस्यागन्म महेत्याज्यं। आ० ९.११.। इति ॥

॥ तत्र प्रथमा ॥

अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे।
चित्रभानुं रोदसी अंतरुर्वी स्वाहुतं विश्वतः प्रत्यंचं ॥१॥

अगन्म। महा। नमसा। यविष्ठं। यः। दीदाय। संऽइद्धः। स्वे। दुरोणे।
चित्रऽभानुं। रोदसी इति। अंतः। उर्वी इति। सुऽआहुतं। विश्वतः। प्रत्यंचं ॥१॥

योऽग्निः स्वे दुरोणे स्वे स्थान आहवनीये समिद्धः काष्ठैः समिद्धः सन् दीदाय दीप्यते तमिमं यविष्ठं युवतममुर्वी विस्तीर्णयो रोदसी रोदस्योर्द्यावापृथिव्योरंतर्मध्येऽंतरिक्षे चित्रभानुं चित्रज्वालं स्वाहुतं सुष्ठ्वाहुतिभिर्हुतं संतं विश्वतः सर्वतः प्रत्यंचं प्रतिगच्छंतमग्निं महा महता नमसा नमस्कारेणागन्म। वयमुपगच्छाम ॥

॥ अथ द्वितीया ॥

स मह्ना विश्वा दुरितानि साह्वानग्निः ष्टवे दम आ जातवेदाः।
स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥२॥

सः। मह्ना। विश्वा। दुःऽइतानि। सह्वान्। अग्निः। स्तवे। दमे। आ। जातऽवेदाः।
सः। नः। रक्षिषत्। दुःऽइतात्। अवद्यात्। अस्मान्। गृणतः। उत। नः। मघोनः ॥२॥

योऽग्निर्मह्ना महत्त्वेन विश्वा विश्वानि दुरितानि सह्वानभिभवन् जातवेदा जातधनो जातप्रज्ञो वा दमे यज्ञगृहे स्तवे अस्माभिः स्तूयते सोऽग्निरस्मान्दुरितात्पापादवद्यात् निंदिताच्च कर्मणो रक्षिषत् । रक्षतु । अस्मान् गृणतः स्तुवतोऽपि रक्षिषत् । उतापि च सोऽग्निर्नो मघोनो हविष्मतो रक्षिषत् ॥

॥ अथ तृतीया ॥

त्वं वरुण उत मित्रो अग्ने त्वां वर्धंति मतिभिर्वसिष्ठाः ।

त्वे वसु सुषणनानि संतु यूयं पात स्वस्तिभिः सदा नः ॥३॥

त्वं । वरुणः । उत । मित्रः । अग्ने । त्वां । वर्धंति । मतिऽभिः । वसिष्ठाः ।

त्वे इति । वसु । सुऽसननानि । संतु । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥३॥

हे अग्ने त्वं वरुणोऽसि । उतापि च त्वं मित्रोऽसि जगतः प्रमीतेस्त्रातासि । त्वां वसिष्ठा मतिभिः स्तुतिभिर्वर्धंति । वर्धयंति । त्वे त्वयि विद्यमानानि वसु वसूनि सुसननानि सुसंभजनानि संत्विति । स्पष्टमन्यत् ॥

॥ इति पंचमस्य द्वितीये पंचदशो वर्गः ॥

प्राग्नय इति तृचं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकं । तथा चानुक्रांतं । प्राग्नये वैश्वानरीयमिति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वं ।

भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनां ॥१॥

प्र । अग्नये । विश्वऽशुचे । धियंऽधे । असुरऽघ्ने । मन्म । धीतिं । भरध्वं ।

भरे । हविः । न । बर्हिषि । प्रीणानः । वैश्वानराय । यतये । मतीनां ॥१॥

हे सखायो विश्वशुचे विश्वं यो दीपयति तस्मै धियंधे धियां कर्मणां यो धाता तस्मा असुरघ्नेऽसुराणां यो हंता तस्मा अग्नये मन्म मननीयं स्तोत्रं धीतिं कर्म च प्रभरध्वं । मतीनामभिमतानां कामानां यतये दात्रे वैश्वानराय विश्वनरहितायाग्निविशेषाय बर्हिषि यज्ञे हविर्न हविरिव स्तुतिं प्रीणानः प्रीयमाणोऽहं भरे । भरामि । यद्वा हविः प्रीणानः प्रीणयन्नहं बर्हिषि हविर्भरे । संभरामि । नेति संप्रत्यर्थे ॥

॥ अथ द्वितीया ॥

त्वम॑ग्ने शो॒चिषा॒ शोशु॑चान॒ आ रोद॑सी अपृणा॒ जाय॑मानः ।
त्वं दे॒वाँ अ॒भिश॑स्तेरमुंचो॒ वैश्वा॑नर जातवेदो महि॒त्वा ॥२॥
त्वं । अ॒ग्ने॒ । शो॒चिषा॑ । शोशु॑चानः । आ । रोद॑सी॒ इति॑ । अ॒पृ॒णाः॒ । जाय॑मानः ।
त्वं । दे॒वान् । अ॒भिऽश॑स्तेः । अ॒मुं॒चः॒ । वैश्वा॑नर । जात॒ऽवे॒दः॒ । म॒हि॒ऽत्वा ॥२॥

हे अग्ने त्वं शोचिषा दीप्त्या शोशुचानो दीप्यमानो जायमानो जायमान एव रोदसी द्यावापृथिव्यावापृणाः । आपूरयः । अपि च जातवेदो जातप्रज्ञ जातधन वा वैश्वानर विश्वनरहित हे अग्ने त्वं देवान्महित्वा महत्त्वेनाभिशस्तेरभिशंसकाच्चोरमुंचः । अमोचयः ॥

॥ अथ तृतीया ॥

जा॒तो यद॑ग्ने॒ भुव॑ना॒ व्यख्यः॑ प॒शून्न गो॒पा इर्यः॒ परि॑ज्मा ।
वैश्वा॑नर॒ ब्रह्म॑णे विंद गा॒तुं यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥३॥
जा॒तः । यत् । अ॒ग्ने॒ । भुव॑ना । वि । अ॒ख्यः॑ । प॒शून् । न । गो॒पाः । इर्यः॑ । परि॑ऽज्मा ।
वैश्वा॑नर । ब्रह्म॑णे । विं॒द॒ । गा॒तुं । यू॒यं । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥३॥

हे अग्ने जातः सूर्यात्मना जातस्त्वमिर्यः स्वामी प्रेरयन्वा परिज्मा परितो गंता सन् पशून्न गोपाः । यथा गवां पालकः पशून्पश्यति तद्वत् । यद्यदा भुवना भूतानि व्यख्यः रक्षार्थं पश्यसि तदा ब्रह्मणे । ब्रह्म स्तोत्रं । तदर्थं गातुं गतिं फलप्राप्तिं विंद । यद्वा ब्रह्मणे ब्राह्मणार्थं गातुं विंद । येन ब्राह्मणोपद्रवान्निर्गच्छंति तं गातुं विंदेत्यर्थः । स्पष्टमन्यत् ।

॥ इति पंचमस्य द्वितीये षोडशो वर्गः ॥

समिधा जातवेदस इति तृचं चतुर्दशं सूक्तं वसिष्ठस्यार्षमाग्नेयं । आद्या बृहती द्वितीयातृतीये त्रिष्टुभौ । तथा चानुक्रम्यते । समिधा बृहत्यादीति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

स॒मिधा॑ जा॒तवे॑दसे दे॒वाय॑ दे॒वहू॑तिभिः ।
ह॒विर्भिः॑ शु॒क्रशो॑चिषे नम॒स्विनो॑ व॒यं दा॑शेमा॒ग्नये॑ ॥१॥

संऽइधा । जातऽवेदसे । देवाय । देवहुतिऽभिः ।
हविःऽभिः । शुक्रऽशोचिषे । नमस्विनः । वयं । दाशेम । अग्नये ॥१॥

जातवेदसे जातवेदसं जातप्रज्ञमग्नयेऽग्निं समिधा वयं वसिष्ठा दाशेम । परिचरेम । देवाय देवं स्तुत्यमग्निं देवहूतिभिर्देवस्तुतिभिर्दाशेम । शुक्रशोचिषे शुक्रशोचिषं शुभ्रदीप्तिं नमस्विनो हविष्मंतो वयं हविर्भिर्दाशेम ॥ अत्र दाशतियोगात्कर्मणि चतुर्थी । प्रायेण सर्वत्र दाशतियोगे कर्मणि चतुर्थी दृश्यते ॥

॥ अथ द्वितीया ॥

वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र ।
वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे ॥२॥
वयं । ते । अग्ने । संऽइधा । विधेम । वयं । दाशेम । सुऽस्तुती । यजत्र ।
वयं । घृतेन । अध्वरस्य । होतः । वयं । देव । हविषा । भद्रऽशोचे ॥२॥

हे अग्ने ते त्वां वयं वसिष्ठाः समिधा विधेम । परिचरेम । हे यजत्र यष्टव्याग्ने वयं सुष्टुती शोभनया स्तुत्या दाशेम । त्वां परिचरेम । अध्वरस्य यज्ञस्य होतरग्ने वयं घृतेनाज्येन त्वां दाशेम । हे भद्रशोचे कल्याणज्वाल देव द्योतमानाग्ने त्वां वयं हविषा दाशेम ॥

॥ अथ तृतीया ॥

आ नो देवेभिरुप देवहूतिमग्ने याहि वषट्कृतिं जुषाणः ।
तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः ॥३॥
आ । नः । देवेभिः । उप । देवऽहूतिं । अग्ने । याहि । वषट्ऽकृतिं । जुषाणः ।
तुभ्यं । देवाय । दाशतः । स्याम । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥३॥

हे अग्ने नोऽस्माकं देवहूतिं स्तोत्रं यज्ञं वा देवेभिर्देवैः सार्धं वषट्कृतिं हविर्जुषाणः सेवमानस्त्वमुपायाहि । देवाय द्योतमानाय तुभ्यं वयं दाशतः परिचरंतः स्याम । भवेम । सिद्धमन्यत् ॥

॥ इति पंचमस्य द्वितीये सप्तदशो वर्गः ॥

उपसद्यायेति पंचदशर्चं पंचदशं सूक्तं वसिष्ठस्यार्षं गायत्रमाग्नेयं । तथा चानु-

क्रांतं । उपसद्याय पंचोना गायत्रमिति ॥ प्रातरनुवाके [illegible]
छंदस्याश्विनशस्त्रे चेदं सूक्तं। सूचितं च। उपसद्याय त्वमग्ने यज्ञानामिति तिस्र
उत्तमा उद्धरेत्। आ० ४.१३.। इति ॥ उपसदि पौर्वाह्णिक्यामुपसद्यायेत्याद्यास्तिस्र
ऋचः सामिधेन्यः। सूत्र्यते च। उपसद्याय मीळ्हुष इति तिस्र एकैकां त्रिरनवानं
। आ० ४.८.। इति ॥ पविचेष्ट्याममे रक्षांसीत्येषा प्रथमाज्यभागानुवाक्या ।
सूचितं च । पावकवंतावाज्यभागावग्नी रक्षांसि सेधति । आ० २.१२.। इति ॥
अन्वारंभणीयायामग्नेर्भगिनो याज्या। सूचितं च। आ सवं सवितुर्यथा स नो
राधांस्या भर। आ० २.८.। इति ॥ स्वस्त्ययन्यामिष्टावग्ने रक्षा ण इति प्रथमा-
ज्यभागानुवाक्या। सूचितं च । स्वस्त्ययन्यां रक्षितवंतावग्ने रक्षा णो अंहसः
। आ० २.१०.। इति ॥

॥ तत्र प्रथमा ॥

उपसद्याय मीळ्हुषं आस्ये जुहुता हविः। यो नो नेदिष्ठमाप्यं ॥१॥

उपऽसद्याय। मीळ्हुषे। आस्ये। जुहुत। हविः। यः। नः। नेदिष्ठं। आप्यं ॥१॥

हे अध्वर्यव उपसद्यायोपसदनीयाय मीळ्हुषे कामानां वर्षित्रेऽग्नये तत्प्री-
त्यर्थमास्ये तस्यैव मुखे हविर्जुहुत। योऽग्निर्नेदिष्ठमासन्नतममाप्यं भवति। आसन्न-
तमो बंधुर्भवतीत्यर्थः ॥ आप्यमिति स्वार्थिकस्तद्धितः ॥

॥ अथ द्वितीया ॥

यः पंच चर्षणीरभि निषसाद दमेदमे। कविर्गृहपतिर्युवा ॥२॥

यः। पंच। चर्षणीः। अभि। निऽससाद। दमेऽदमे। कविः। गृहऽपतिः। युवा ॥२॥

योऽग्निः कविः प्राज्ञो गृहपतिर्गृहाणां पालयिता युवा नित्यतरुणः सन्
पंच चर्षणीः पंच जनान् मनुष्यानभि अभिमुखं दमे दमे गृहे गृहे निषसाद
निषीदति। उत्तरया वाक्यपरिसमाप्तिः ॥

॥ अथ तृतीया ॥

स नो वेदो अमात्यमग्नी रक्षतु विश्वतः। उतास्मान्पात्वंहसः ॥३॥

सः। नः। वेदः। अमात्यं। अग्निः। रक्षतु। विश्वतः। उत। अस्मान्। पातु। अंहसः ॥३॥

सोऽग्निर्नोऽस्माकं वेदो धनममात्यमंतिके भवं सहभूतं वा विश्वतः सर्वतो
बाधकाद्रक्षतु। उतापिचास्मान्वसिष्ठानंहसः पापात्पातु। रक्षतु ॥

॥ अथ चतुर्थी ॥

नवं नु स्तोममग्नये दिवः श्येनाय जीजनं । वस्वः कुविद्वनाति नः ॥४॥

नवं । नु । स्तोमं । अग्नये । दिवः । श्येनाय । जीजनं । वस्वः । कुवित् । वनाति । नः ॥४॥

दिवो द्युलोकस्य श्येनाय श्येनसदृशाय नु क्षिप्रं गंत्रेऽग्नये यस्मै नवं नूतनं स्तोमं जीजनं जनयामि सोऽग्निर्नोऽस्मभ्यं कुविद्बहु वस्वो वसु धनं ॥ कर्मणि षष्ठी ॥ वनाति । ददात्वित्यर्थः ॥

॥ अथ पंचमी ॥

स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा । अग्रे यज्ञस्य शोचतः ॥५॥

स्पार्हाः । यस्य । श्रियः । दृशे । रयिः । वीरऽवतः । यथा । अग्रे । यज्ञस्य । शोचतः ॥५॥

यज्ञस्याग्रे पुरस्ताद्भागे शोचतो दीप्यमानस्य यस्याग्नेः श्रियो दीप्तयो वीरवतः पुत्रवतो रयिर्धनं यथा तद्वत् दृशे द्रष्टुं चक्षुषे वा स्पार्हाः स्पृहणीया भवंति तस्मै नवं स्तोमं जीजनमित्यनुषंगः । उत्तरत्र संबंधो वा ॥

॥ इति पंचमस्य द्वितीयेऽष्टादशो वर्गः ॥

॥ अथ षष्ठी ॥

सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः । यजिष्ठो हव्यवाहनः ॥६॥

सः । इमां । वेतु । वषट्ऽकृतिं । अग्निः । जुषत । नः । गिरः । यजिष्ठः । हव्यऽवाहनः ॥६॥

यजिष्ठो यजनीयतमो यष्टृतमो वा हव्यवाहनो हव्यानां हविषां वोढा सोऽग्निरिमां वषट्कृतिमस्माभिर्दीयमानामाहुतिं वेतु । कामयतां । भक्षयतु वा । नोऽस्माकं गिरः स्तुतीश्च जुषत । सेवतां ॥

॥ अथ सप्तमी ॥

नि त्वा नक्ष्य विश्पते द्युमंतं देव धीमहि । सुवीरमग्न आहुत ॥७॥

नि । त्वा । नक्ष्य । विश्पते । द्युऽमंतं । देव । धीमहि । सुऽवीरं । अग्ने । आऽहुत ॥७॥

नक्ष्योपगंतव्य । नक्षतिर्व्याप्तिकर्मा । विश्पते विशां पते देव द्योतमानाहुत सर्वैर्यजमानैरभिहुत हे अग्ने द्युमंतं दीप्तिमंतं सुवीरं कल्याणस्तोत्रिकं त्वा त्वां वयं निधीमहि । निहितवंतः ॥

॥ अथाष्टमी ॥

क्षपं उस्रश्च दीदिहि स्वग्नयस्त्वया वयं । सुवीरस्त्वमस्मयुः ॥८॥

क्षपः । उस्रः । च । दीदिहि । सुऽअग्नयः । त्वया । वयं । सुऽवीरः । त्वं । अस्मऽयुः ॥८॥

हे अग्ने त्वं क्षपो रात्रीरुस्रोऽहानि च । सर्वदेति यावत् । दीदिहि । दीप्यस्व । दीप्यमानेन त्वया वयं वसिष्ठाः स्वग्नयः शोभमानाग्नयो भवाम । अस्मयुरस्मान् कामयमानः ॥ सुप आत्मनः क्यजिति क्यचि कृते क्याच्छंदसीत्युप्रत्ययः । दकारलोपश्छांदसः ॥ तथा च यास्कः । अस्मयुरस्मान् कामयमान इति ॥ त्वं सुवीरः सुस्तोत्रिको भव ॥

॥ अथ नवमी ॥

उप त्वा सातये नरो विप्रासो यंति धीतिभिः । उपाक्षरा सहस्रिणी ॥९॥

उप । त्वा । सातये । नरः । विप्रासः । यंति । धीतिऽभिः । उप । अक्षरा । सहस्रिणी ॥९॥

हे अग्ने त्वा त्वां नरो नेतारो यजमाना विप्रासो विप्रा मेधाविनो धीतिभिः कर्मभिः सातये धनाय कामानां लाभाय वोपयंति । उपगच्छंति । सहस्रिणी सहस्रसंख्याकाक्षरा क्षयरहिता स्तुतिरूपास्मदीया वाक् त्वामुपयाति च ॥

॥ अथ दशमी ॥

अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्यः ॥१०॥

अग्निः । रक्षांसि । सेधति । शुक्रऽशोचिः । अमर्त्यः । शुचिः । पावकः । ईड्यः ॥१०॥

शुक्रशोचिः शुभ्रज्वालोऽमर्त्यो मरणरहितो देवतात्मा शुचिः स्वयं शुद्धः पावकोऽन्येषामपि शोधक ईड्यः स्तुत्योऽग्नी रक्षांसि राक्षसान् सेधति । बाधतां ॥

॥ इति पंचमस्य द्वितीय एकोनविंशो वर्गः ॥

॥ अथैकादशी ॥

स नो राधांस्या भरेशानः सहसो यहो । भगश्च दातु वार्यं ॥११॥

सः । नः । राधांसि । आ । भर । ईशानः । सहसः । यहो इति । भगः । च । दातु । वार्यं ॥११॥

हे सहसो यहो बलस्य पुत्राग्ने स प्रसिद्धस्त्वमीशानः सर्वस्य जगत ईश्वरः सन् नोऽस्मभ्यं राधांसि धनानि ॥ रायो राध इति धननामसु पाठात् ॥ आभर ।

आहर। भगश्च भगो देवोऽपि वार्यं धनं दातु। अस्मभ्यं ददातु ॥ अभ्यासलोपश्छांदसः ॥ भगोऽत्र सूक्ते निपातभागिनी देवता ॥

॥ अथ द्वादशी ॥

त्वमग्ने वीरवद्यशो देवश्च सविता भगः। दितिश्च दाति वार्यं ॥१२॥

त्वं। अग्ने। वीरऽवत्। यशः। देवः। च। सविता। भगः। दितिः। च। दाति। वार्यं ॥१२॥

हे अग्ने त्वं वीरवत्पुत्रपौत्रोपेतं यशोऽन्नं देहीति शेषः। देवश्च सविता सविता देवोऽपि वार्यं वरणीयं धनं दाति। ददातु। भगश्च देवोऽपि ददातु। दितिश्च दितिरपि देवी ददातु। सवित्रादिः सूक्ते निपातभागिनी देवता ॥

॥ अथ त्रयोदशी ॥

अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः। तपिष्ठैरजरो दह ॥१३॥

अग्ने। रक्ष। नः। अंहसः। प्रति। स्म। देव। रिषतः। तपिष्ठैः। अजरः। दह ॥१३॥

हे अग्ने त्वं नोऽस्मानंहसः पापाद्रक्ष। पाहि ॥ संहितायां दीर्घश्छांदसः ॥ अपि च हे देव द्योतमानाग्ने अजरो जरारहितस्त्वं रिषतो हिंसतः शत्रून् तपिष्ठैरतिशयेन तापकैस्तेजोभिर्दह। भस्मीकुरु ॥

॥ अथ चतुर्दशी ॥

अधा मही न आयस्यनाधृष्टो नृपीतये। पूर्भवा शतभुंजिः ॥१४॥

अध। मही। नः। आयसी। अनाधृष्टः। नृऽपीतये। पूः। भव। शतऽभुंजिः ॥१४॥

अधाधुना हे अग्ने अनाधृष्टोऽप्रतिधर्षणीयस्त्वं नोऽस्माकं नृपीतये नृणां रक्षणार्थं मही महत्यायस्ययसा निर्मिता शतभुजिरत्यंतं विस्तृता शतगुणा पूः पुरी। तद्रक्षासाधनभूतप्रकारादिर्वा पूरुच्यते। भव ॥ यथायसा निर्मिता पुरी तद्रक्षासाधनभूतप्रकारादिर्वा शत्रुभ्यो भीतान्रक्षति तद्वद्राक्षसेभ्यो भीतानस्मान् पाहीत्यर्थः ॥

॥ अथ पंचदशी ॥

त्वं नः पाह्यंहसो दोषावस्तरघायतः। दिवा नक्तमदाभ्य ॥१५॥

त्वं। नः। पाहि। अंहसः। दोषाऽवस्तः। अघऽयतः। दिवा। नक्तं। अदाभ्य ॥१५॥

हे अदाभ्याहिंस्य दोषावस्ता रात्रेराच्छादयितः। तमसो वारयितरित्यर्थः। अग्ने त्वं नोऽस्मानंहसः पापादघायतः पापमिच्छतः शत्रोश्च दिवा नक्तमहनि रात्रौ च सर्वदा पाहि। रक्ष ॥

॥ इति पंचमस्य द्वितीये विंशो वर्गः ॥

एना व इति द्वादशर्चं षोडशं सूक्तं वसिष्ठस्यार्षमग्निदेवताकं। अयुजो बृहत्यो युजः सतोबृहत्यः। तथा चानुक्रांतं। एना वो द्वादश प्रागाथमिति ॥ प्रातरनुवाक आग्नेये क्रतौ बार्हते छंदस्याश्विनशस्त्रे चेदं सूक्तं। सूचितं च। एना वो अग्निं प्र वो यह्वं। आ० ४.१३.। इति ॥ आग्निमारुतशस्त्रे देवो वो द्रविणोदा इति प्रगाथोऽनुरूपः। सूचितं च। देवो वो द्रविणोदा इति प्रगाथौ स्तोत्रियानुरूपौ। आ० ५.२०.। इति ॥

॥ तत्र प्रथमा ॥

एना वो अग्निं नमसोर्जो नपातमा हुवे।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतं ॥१॥

एना। वः। अग्निं। नमसा। ऊर्जः। नपातं। आ। हुवे।
प्रियं। चेतिष्ठं। अरतिं। सुऽअध्वरं। विश्वस्य। दूतं। अमृतं ॥१॥

ऊर्जो बलस्य नपातं पुत्रं ॥ सूनुर्नपादित्यपत्यनामसु पाठात् ॥ प्रियं प्रियमस्माकं चेतिष्ठमतिशयेन ज्ञातारं प्रज्ञापकं वारतिं गंतारं स्वामिनं वा स्वध्वरं सुयज्ञं विश्वस्य सर्वस्य यजमानस्य दूतममृतं नित्यमग्निमेनेनेन नमसा स्तोत्रेण ॥ यद्यप्यत्रान्वादेशो नास्ति तथापि छांदसत्वादिदंशब्दस्यैनादेशः। यद्वैनेनमित्यग्नेर्विशेषणं। समानार्षत्वात्पूर्वेषु सूक्तेष्वादिष्टत्वाद्वसिष्ठेनान्वादिश्यते ॥ वो युष्मदर्थमाहुवे। आह्वयामि ॥

॥ अथ द्वितीया ॥

स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानां ॥२॥

सः। योजते। अरुषा। विश्वऽभोजसा। सः। दुद्रवत्। सुऽआहुतः।
सुऽब्रह्मा। यज्ञः। सुऽशमी। वसूनां। देवं। राधः। जनानां ॥२॥

सोऽग्निररुषारोचमानौ विश्वभोजसा विश्वस्य पालयितारावश्वौ योजते। रथे युनक्तु। यद्वा सोऽरुषारोचमानेन तेजसा विश्वभोजसा विश्वस्य रक्षकेण योजते। अयुज्यत। किंच सोऽग्निर्दुद्रवत्। आनेतुं देवान् प्रति भृशं द्रवतु द्रवति वा। स्वाहुतः सुष्ठाहुतः सुब्रह्मा सुस्तुतिः शोभनान्नो वा यज्ञो यष्टव्यः सुशमी सुकर्मा च भवति। तमिमं देवं द्योतमानं वसूनां वासकानां जनानां वसिष्ठानां राधो हविरभिगच्छत्विति शेषः। यद्वैवंगुणविशिष्टोऽग्निर्वसूनां धनानां मध्ये देवमत्यंतप्रकाशमानं राधो धनं जनानां यजमानानां धनवत् प्रियतम इत्यर्थः॥

॥ अथ तृतीया ॥

उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः।

उद्धूमासो अरुषासो दिविस्पृशः समग्निमिंधते नरः॥३॥

उत्। अस्य। शोचिः। अस्थात्। आऽजुह्वानस्य। मीळ्हुषः।

उत्। धूमासः। अरुषासः। दिविऽस्पृशः। सं। अग्निं। इंधते। नरः॥३॥

मीळ्हुषः कामानां वर्षितुराजुह्वानस्याभिहूयमानस्याग्नेः शोचिस्तेज उदस्थात्। उत्तिष्ठति। अरुषास आरोचमाना दिविस्पृशोऽतरिक्षस्पृशो धूमासो धूमाश्चो-दस्थुः। अस्थादित्येकवचनांतं बहुवचनांततया विपरिणतं सदन्वेति। तमिम-मग्निं नरः कर्मणां नेतार ऋत्विजः समिंधते। सम्यक् दीपयंति॥

॥ अथ चतुर्थी ॥

तं त्वा दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह।

विश्वा सूनो सहसो मर्तभोजना रास्व तद्यत्त्वेमहे॥४॥

तं। त्वा। दूतं। कृण्महे। यशःऽतमं। देवान्। आ। वीतये। वह।

विश्वा। सूनो इति। सहसः। मर्तऽभोजना। रास्व। तत्। यत्। त्वा। ईमहे॥४॥

हे सहसः सूनो बलस्य पुत्राग्ने यशस्तममतिशयेन यशस्विनं तं प्रसिद्धं यं त्वा त्वां दूतं कृण्महे कुर्मः स त्वं देवान्वीतये हविषां भक्षणायावह। किंच यद्यदा त्वा त्वामीमहे याचामहे तदेव विश्वा विश्वानि मर्तभोजनानि मनुष्याणां भोग्यानि कल्याणानि धनानि रास्व। अस्मभ्यं देहि॥

॥ अथ पंचमी ॥

त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे।

त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यं ॥५॥

त्वं। अग्ने। गृहऽपतिः। त्वं। होता। नः। अध्वरे।

त्वं। पोता। विश्वऽवार। प्रऽचेताः। यक्षि। वेषि। च। वार्यं ॥५॥

हे विश्ववार विश्वैर्वरणीयाग्ने त्वं नोऽस्माकमध्वरे यागे गृहपतिरसि। यजमानोऽसि। त्वं होता देवानामाह्वाता। त्वं त्वमेव पोतासि। अतः प्रचेताः प्रकृष्टमतिस्त्वं वार्यं वरणीयं हविर्यक्षि। यज। वेषि च। कामयस्व। भक्षय वा॥

॥ अथ षष्ठी ॥

कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि।

आ न ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते ॥६॥

कृधि। रत्नं। यजमानाय। सुक्रतो इति सुऽक्रतो। त्वं। हि। रत्नऽधाः। असि।

आ। नः। ऋते। शिशीहि। विश्वं। ऋत्विजं। सुऽशंसः। यः। च। दक्षते ॥६॥

हे सुक्रतो शोभनकर्मन्नग्ने यजमानाय मह्यं रत्नं धनं॥ श्वात्रं रत्नमिति धननामसु पाठात्॥ कृधि। कुरु। देहीत्यर्थः। हि यस्मात्त्वं रत्नधा रत्नस्य दातासि। नोऽस्माकमृते यज्ञे विश्वं सर्वमृत्विजमाशिशीहि। तीक्ष्णीकुरु। किंच यः सुशंसः सुस्तुतिरस्मत्पुत्रो दक्षते वर्धते तं वर्धय। यद्वा यः सुशंसो होता वर्धते तं वर्धयेत्यर्थः। होतुः पृथगुपादानमादरार्थं॥

॥ इति पंचमस्य द्वितीय एकविंशो वर्गः॥

॥ अथ सप्तमी ॥

त्वे अग्ने स्वाहुत प्रियासः संतु सूरयः।

यंतारो ये मघवानो जनानामूर्वान्दयंत गोनां ॥७॥

त्वे इति। अग्ने। सुऽआहुत। प्रियासः। संतु। सूरयः।

यंतारः। ये। मघऽवानः। जनानां। ऊर्वान्। दयंत। गोनां ॥७॥

हे अग्ने स्वाहुत यजमानैः सुष्ठ्वाहुत त्वे तव सूरयः प्रेरकाः स्तोतारो वा प्रियासः

प्रियाः संतु । भवंतु । किंच ये मघवानो धनवंतो यंतारः प्रदातारो जनानाम-स्मदीयानामूर्वान् समूहान् गोनां गवां चोर्वान्दयंत प्रयच्छंति ते च मम प्रियासः संत्विति पूर्वेणान्वयः ॥

॥ अथाष्टमी ॥

येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति ।
तांस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत् ॥८॥

येषां । इळा । घृतऽहस्ता । दुरोणे । आ । अपि । प्राता । निऽसीदति ।
तान् । त्रायस्व । सहस्य । द्रुहः । निदः । यच्छ । नः । शर्म । दीर्घऽश्रुत् ॥८॥

येषां दुरोणे गृहे घृतहस्ता । घृतयुक्तौ हस्तौ यस्या असौ घृतहस्ता । घृतेनाभिघारितेत्यर्थः । इळान्नरूपा हविर्लक्षणा देवी ॥ इरेळेत्यन्ननामसु पाठात् ॥ प्राता पूर्णानिषीदति आसीदति । अपीति पूरणः । तान्हविष्मतो यजमानान् हे सहस्य सहसे बलाय हिताग्ने द्रुहो द्रोग्धुर्निदो निंदकाच्च शत्रोस्त्रायस्व । नोऽस्मभ्यं दीर्घश्रुत् दीर्घकालं श्रोतव्यं शर्म सुखं गृहं वा यच्छ च । देहि ॥

॥ अथ नवमी ॥

स मंद्रया च जिह्वया वह्निरासा विदुष्टरः ।
अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय ॥९॥

सः । मंद्रया । च । जिह्वया । वह्निः । आसा । विदुःऽतरः ।
अग्ने । रयिं । मघवत्ऽभ्यः । नः । आ । वह । हव्यऽदातिं । च । सूदय ॥९॥

हे अग्ने मंद्रया च मोदयित्र्या देवानामासास्यस्थानीयया जिह्वया ज्वालया वह्निर्हविषां वोढा विदुष्टरो विद्वत्तरः स प्रसिद्धस्त्वं मघवद्भ्यो हविष्मद्भ्यो नोऽस्मभ्यं रयिं धनमावह च । हव्यदातिं । हव्यानि ददातीति हव्यदातिर्यजमानः । तं । तथा च वाजसनेयिन आमनंति । यजमानो वै हव्यदातिरिति । सूदय च । कर्मसु प्रेरय च ॥

॥ अथ दशमी ॥

ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः ।
ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य ॥१०॥

ये । राधांसि । ददति । अश्व्या । मघा । कामेन । श्रवसः । महः ।

तान् । अंहसः । पिपृहि । पर्तृऽभिः । त्वं । शतं । पूःऽभिः । यविष्ठ्य ॥१०॥

हे यविष्ठ्य युवतमाग्ने त्वं ये यजमाना महो महतः श्रवसो यशसः कामेनेच्छया । यशस्कामाः संत इत्यर्थः । राधांसि साधकान्यश्व्याश्वात्मकानि मघा मघानि ददति तान्दातॄनंहसः पापात् शत्रोर्वा पर्तृभी रक्षासाधनभूतैः शतमपरिमिताभिः पूर्भिर्नगरीभिश्च पिपृहि । पालय ॥

॥ अथैकादशी ॥

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचं ।

उद्वा सिंचध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥११॥

देवः । वः । द्रविणःऽदाः । पूर्णां । विवष्टि । आऽसिचं ।

उत् । वा । सिंचध्वं । उप । वा । पृणध्वं । आत् । इत् । वः । देवः । ओहते ॥११॥

द्रविणोदा धनानां दाता देवोऽग्निर्वो युष्मदीयां पूर्णां हविषासिचमासिक्तां स्रुचं विवष्टि । कामयते । अत उत्सिंचध्वं वा सोमेन पात्रं । उपपृणध्वं वा सोमं ॥ वाशब्दौ समुच्चयार्थौ ॥ ध्रुवग्रहेण होतृचमसं पूरयत चाग्नये सोमं यच्छत चेत्यर्थः । आदिदनंतरमेव देवोऽग्निर्वो युष्मानोहते । वहति ॥

॥ अथ द्वादशी ॥

तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।

दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥१२॥

तं । होतारं । अध्वरस्य । प्रऽचेतसं । वह्निं । देवाः । अकृण्वत ।

दधाति । रत्नं । विधते । सुऽवीर्यं । अग्निः । जनाय । दाशुषे ॥१२॥

देवाः प्रचेतसं प्रकृष्टमतिमग्निमध्वरस्य यज्ञस्य वह्निं वोढारं होतारं चाकृण्वन् । अकुर्वन् । किमर्थमित्यत आह । स चाग्निर्विधते परिचरते दाशुषे हविषां प्रदात्रे जनाय सुवीर्यं शोभनवीर्योपेतं रत्नं रमणीयं धनं दधाति । ददातीत्यर्थः ॥

॥ इति पंचमस्य द्वितीये द्वाविंशो वर्गः ॥

अग्ने भव सुषमिधेति सप्तर्चं सप्तदशं सूक्तं वसिष्ठस्यार्षमग्निदेवताकं । सप्तापि

द्विपदास्त्रिष्टुभः । तथैवानुक्रम्यते । अग्ने भव सप्त द्वैपदं त्रैष्टुभमिति ॥ अतिरात्रे षष्ठेऽहनि तृतीयसवने मैत्रावरुणशस्त्रेऽग्ने भवेति तृचोऽनुरूपः । सूत्र्यते हि । अग्ने त्वं नोऽंतमोऽग्ने भव सुषमिधा समिद्ध इति स्तोत्रियानुरूपौ । आ० ८.२. । इति ॥

॥ तत्र प्रथमा ॥

अग्ने भवं सुषमिधा समिंद्ध उत बर्हिरुर्विया वि स्तृणीतां ॥१॥

अग्ने । भवं । सुऽसमिधा । संऽइंद्धः । उत । बर्हिः । उर्विया । वि । स्तृणीतां ॥१॥

हे अग्ने सुषमिधा शोभनया समिधा समिद्धो भव । सम्यक् दीप्तो भव । उतापि च बर्हिरुर्विया विस्तीर्णमुपस्तृणीतामध्वर्युः ॥

॥ अथ द्वितीया ॥

उत द्वारं उशतीर्वि श्रयंतामुत देवाँ उंशत आ वहेह ॥२॥

उत । द्वारंः । उशतीः । वि । श्रयंतां । उत । देवान् । उशतः । आ । वह । इह ॥२॥

उतापि चोशतीर्देवान् कामयमाना द्वारो यज्ञगृहस्य देव्यो वा ॥ तथा च यास्कः । द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा । नि० ८.९. । इति ॥ विश्रयंतां । उतापि चोशतो यज्ञं कामयमानान्देवानिह यज्ञ आवह ॥

॥ अथ तृतीया ॥

अग्ने वीहि हविषा यक्षि देवान्त्स्वध्वरा कृणुहि जातवेदः ॥३॥

अग्ने । वीहि । हविषा । यक्षि । देवान् । सुऽअध्वरा । कृणुहि । जातऽवेदः ॥३॥

हे जातवेदो जातधनाग्ने वीहि । देवानभिगच्छ । हविषा देवान्यक्षि । यज च । स्वध्वरा स्वध्वरान् शोभनयज्ञांश्च कृणुहि । कुरु ॥

॥ अथ चतुर्थी ॥

स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्पिप्रयंच्च ॥४॥

सुऽअध्वरा । करति । जातऽवेदाः । यक्षत् । देवान् । अमृतान् । पिप्रयंत् । च ॥४॥

जातवेदा जातधनोऽग्निरमृतान्मरणरहितान्देवान् स्वध्वरा स्वध्वरान् शोभनयज्ञान् करति । करोतु । यक्षत् । हविषा यजतु च । पिप्रयत् । स्तोत्रैः प्रीणयतु च ॥

॥ अथ पंचमी ॥

वंस्व विश्वा वार्याणि प्रचेतः सत्या भवंत्वाशिषो नो अद्य ॥५॥

वंस्व । विश्वा । वार्याणि । प्रचेत इति प्रऽचेतः । सत्याः । भवंतु । आऽशिषः । नः । अद्य ॥५॥

हे प्रचेतः प्रकृष्टमतिमन्नग्ने विश्वा विश्वानि वार्याणि वरणीयानि धनानि वंस्व । अस्मभ्यं देहि । नोऽस्माकमाशिषोऽद्य सत्या यथार्था भवंतु ॥

॥ अथ षष्ठी ॥

त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातं ॥६॥

त्वां । ऊं इति । ते । दधिरे । हव्यऽवाहं । देवासः । अग्ने । ऊर्जः । आ । नपातं ॥६॥

हे अग्ने ऊर्जो बलस्य नपातं पुत्रं ॥ सूनुर्नपादित्यपत्यनामसु पाठात् ॥ त्वामु त्वामेव ते प्रसिद्धा देवासो देवा हव्यवाहं हविषो वोढारमादधिरे । अकुर्वन्नित्यर्थः ॥

॥ अथ सप्तमी ॥

ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः ॥७॥

ते । ते । देवाय । दाशतः । स्याम । महः । नः । रत्ना । वि । दधः । इयानः ॥७॥

हे अग्ने देवाय द्योतमानाय ते तुभ्यं ते प्रसिद्धा वसिष्ठा वयं दाशतो हवींषि ददतः स्याम । भवेम । अतो महो महांस्त्वमियान उपगम्यमानो याच्यमानो वा नोऽस्मभ्यं रत्ना रत्नानि रमणीयानि धनानि विदधः । विधत्स्व ॥

॥ इति पंचमस्य द्वितीये त्रयोविंशो वर्गः ॥

॥ इति सप्तमे मंडले प्रथमोऽनुवाकः ॥

द्वितीयेऽनुवाके षोडश सूक्तानि । तत्र त्वे ह यत्पितर इति पंचविंशत्यृचं प्रथमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमिंद्रदेवताकं । द्वाविंशादिभिश्चतसृभिः सुदासनाम्नो राज्ञो दानं स्तूयते । अतस्तास्तद्देवताकाः । अनुक्रम्यते हि । त्वे ह यत्पंचाधिकेंद्रं सुदासः पैजवनस्य चतस्रोंऽत्या दानस्तुतिरिति ॥ महाव्रत आदितः पंचदशर्चः शंसनीयाः । तथैव पंचमारण्यके सूचितं । त्वे ह यत्पितरश्चिन्न इंद्रेति पंचदश । ऐ॰ आ॰ ५.८. । इति ॥

॥ तत्र प्रथमा ॥

त्वे ह यत्पितरश्चिन्न इंद्र विश्वा वामा जरितारो असंन्वन् ।
त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥१॥

त्वे इति । ह । यत् । पितरः । चित् । नः । इंद्र । विश्वा । वामा । जरितारः । असंन्वन् ।
त्वे इति । गावः । सुऽदुघाः । त्वे इति । हि । अश्वाः । त्वं । वसु । देवऽयते । वनिष्ठः ॥१॥

हे इंद्र त्वे ह त्वय्येव नोऽस्माकं पितरश्चित् पितरोऽपि जरितारः स्तोतारः संतो यद्यस्मात्कारणाद्विश्वा विश्वानि वामा वामानि वननीयानि धनानि । तथा च यास्कः । वामं वननीयं भवतीति । असन्वन् अलभंत तस्माद्वयमपि धनकामास्त्वां स्तुमः । तद्युक्तं । हि यस्मात्कारणात्त्वे त्वयि गावः सुदुघा दोग्धुं सुशकाः संति त्वे त्वय्यश्वाः संति त्वं वसु धनं देवयते देवं त्वामिच्छते यजमानाय वनिष्ठो दातृतमो भवसि ॥

॥ अथ द्वितीया ॥

राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन् ।
पिशा गिरो मघवन्गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान् ॥२॥

राजाऽइव । हि । जनिऽभिः । क्षेषि । एव । अव । द्युऽभिः । अभि । विदुः । कविः । सन् ।
पिशा । गिरः । मघऽवन् । गोभिः । अश्वैः । त्वाऽयतः । शिशीहि । राये । अस्मान् ॥२॥

हे इंद्र त्वं जनिभिर्जायाभी राजेव द्युभिर्दीप्तिभिः सह क्षेष्येव । निवसस्येव । हीति पूरणः । किंच हे मघवन् धनवन्निंद्र विदुर्विद्वान् कविः क्रांतकर्मा क्रांतप्रज्ञो वा सन् गिरः स्तोतॄनस्मान् पिशा रूपेण हिरण्यादिना वा गोभिरश्वैश्चाभि अभितो रक्ष । त्वायतस्त्वत्कामानस्मान् राये शिशीहि । धनार्थं च संस्कुरु ॥

॥ अथ तृतीया ॥

इमा उ त्वा पस्पृधानासो अत्र मंद्रा गिरो देवयंतीरुप स्थुः ।
अर्वाची ते पथ्या राय एतु स्याम ते सुमताविंद्र शर्मन् ॥३॥

इमाः । ऊं इति । त्वा । पस्पृधानासः । अत्र । मंद्राः । गिरः । देवऽयंतीः । उप । स्थुः ।
अर्वाची । ते । पथ्या । रायः । एतु । स्याम । ते । सुऽमतौ । इंद्र । शर्मन् ॥३॥

हे इंद्र त्वा त्वामच यज्ञे स्तोतरि वा प्रवर्तमानाः पस्पृधानासः स्पर्धमाना मंद्रा मोदमाना इमा गिरः स्तुतय उपस्थुः । उपतिष्ठंति । अतस्ते तव रायो धनस्य पथ्या सृतिर्वोध्यस्मदभिमुख्येतु । गच्छतु । हे इंद्र वयं च ते सुमतौ सष्टुतौ वर्तमानाः शर्मन् शर्मणि सुखे स्याम । भूयास्म ॥

॥ अथ चतुर्थी ॥

धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ।

त्वामिन्मे गोपतिं विश्व आहा न इंद्रः सुमतिं गंत्वच्छ ॥४॥

धेनुं । न । त्वा । सुऽयवसे । दुधुक्षन् । उप । ब्रह्माणि । ससृजे । वसिष्ठः ।

त्वां । इत् । मे । गोऽपतिं । विश्वः । आह । आ । नः । इंद्रः । सुऽमतिं । गंतु । अच्छ ॥४॥

हे इंद्र सुयवसे सुतृणे गोष्ठे वर्तमानां धेनुं न धेनुमिव सुहविष्के यज्ञगृहे । दृष्टांतसामर्थ्याद्दार्ष्टांतिकलाभः । वर्तमानं त्वां दुधुक्षन् ॥ संहितायां व्यत्ययेन दकारः ॥ कामान् दोग्धुमिच्छन्वसिष्ठो ब्रह्माणि वत्सस्थानीयानि स्तोत्राण्युपससृजे । उपसृजते । मे मम विश्वः सर्वो जनस्त्वामित्त्वामेव गोपतिं गवां स्वामिनमाह । ब्रवीति । अथ परोक्षस्तुतिः । नोऽस्माकं सुमतिं सुष्टुतिमच्छाभि इंद्र आगंतु । आगच्छतु ॥

॥ अथ पंचमी ॥

अर्णांसि चित्पप्रथाना सुदास इंद्रो गाधान्यकृणोत्सुपारा ।

शर्धंतं शिम्युमुचथस्य नव्यः शापं सिंधूनामकृणोदशस्तीः ॥५॥

अर्णांसि । चित् । पप्रथाना । सुऽदासे । इंद्रः । गाधानि । अकृणोत् । सुऽपारा ।

शर्धंतं । शिम्युं । उचथस्य । नव्यः । शापं । सिंधूनां । अकृणोत् । अशस्तीः ॥५॥

नव्यः स्तुत्य इंद्रोऽर्णांसि शत्रुभिर्विदारितायाः परुष्ण्या उदकानि पप्रथाना चित् प्रथमानान्यपि सुदासे राज्ञे गाधानि सुपारा सुपाराणि पारयितुं तर्तुं योग्यानि चाकृणोत् । अकरोत् । अपि च शर्धंतमुत्साहमानं शिम्युं बोधमानं शापं विश्वरूपोद्भवमात्मनोऽभिशापमशस्तीरभिशस्तीश्चोचथस्य स्तोतुः सिंधूनां नदीनामकृणोत् । अकरोत् ॥

॥ इति पंचमस्य द्वितीये चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव ।
श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विषूचोः ॥६॥

पुरोळाः । इत् । तुर्वशः । यक्षुः । आसीत् । राये । मत्स्यासः । निऽशिताः । अपिऽइव ।
श्रुष्टिं । चक्रुः । भृगवः । द्रुह्यवः । च । सखा । सखायं । अतरत् । विषूचोः ॥६॥

यक्षुर्यज्ञकुशलः ॥ यजेः सन्प्रत्ययो न तु सनंतः । अतो न द्विर्भावः ॥ पुरोळाः पुरोगामी पुरोदाता वा । इदिति पूरणः । तुर्वशो नाम राजासीत् । स तुर्वशो राये धनप्राप्तय इंद्रस्य सखायं सुदासं जगाम । मत्स्यास इव जले निहिता मत्स्या इव निशिता नियंत्रिता अपि भृगवो द्रुह्यवश्च योधाश्च सुदासस्तुर्वशस्य च श्रुष्टिमाशुप्राप्तिं चक्रुः । विषूचोर्विष्वगंचतोरुभयोर्मध्ये सखा सुदासश्चेंद्रः सखायं सुदासमतरत् । अतारयत् । तुर्वशं चावधीदित्यर्थः । यद्वा यक्षुर्यज्ञशीलः पुरोळाः पुरोदाता तुर्वशो नाम राजासीत् । तेन मत्स्यासो मत्स्यजनपदा निशिता बाधिता आसन् । अपि च भृगवो द्रुह्यवश्च श्रुष्टिं सुखं तुर्वशस्य चक्रुः । विषूचोर्विष्वगंचतोरुभयोर्मध्ये सखा तुर्वशस्य सखेंद्रः सखायं राजानमतरत् । अतारयत् ॥

॥ अथ सप्तमी ॥

आ पक्थासो भलानसो भनंतालिनासो विषाणिनः शिवासः ।
आ योऽनयत्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा नॄन् ॥७॥

आ । पक्थासः । भलानसः । भनंत । आ । अलिनासः । विषाणिनः । शिवासः ।
आ । यः । अनयत् । सधऽमाः । आर्यस्य । गव्या । तृत्सुऽभ्यः । अजगन् । युधा । नॄन् ॥७॥

पक्थासः पक्था हविषां पाचका भलानसो भद्रमुखाः । भलेति भद्रवाची । अलिनासोऽलिनाः । तपोभिरप्रवृद्धा इत्यर्थः । विषाणिनः कंडूयनार्थं कृष्णविषाणहस्ताः । दीक्षिता इत्यर्थः । शिवासः शिवा यागादिना सर्वस्य लोकस्य शिवकराः । यागेन हि शिवं भवति लोकस्य । आभनंत । अभिष्टुवंति तमिंद्रं ॥ भनतिः शब्दकर्मा नौति भनतीति शब्दकर्मसु पाठात् ॥ य इंद्रः सधमाः । सोमपानेन सह माद्यतीति सधमादः । सधमाद एव सधमाः । आर्यस्य कर्मशीलस्य

गव्या गोसंघान् तृत्सुभ्यो हिंसकेभ्य आनयत्। अजगन् अजगत् स्वयं च गोसंघान् लेभे। युधा युद्धेन तान्नॄन् शत्रून् जघान चेति शेषः॥

॥ अथाष्टमी ॥

दुराध्यो३ अदितिं स्रेवयंतोऽचेतसो वि जगृभ्रे परुष्णीं।
महाविव्यक्पृथिवीं पत्यमानः पशुष्कविरशयच्चायमानः॥८॥
दुःऽआध्यः। अदितिं। स्रेवयंतः। अचेतसः। वि। जगृभ्रे। परुष्णीं।
मह्ना। अविव्यक्। पृथिवीं। पत्यमानः। पशुः। कविः। अशयत्। चायमानः॥८॥

दुराध्यो दुष्टाभिसंधयोऽचेतसो मंदमतयः सुदासः शत्रवोऽदितिमदीनां परुष्णीं नदीं स्रेवयंतो विजगृभ्रे। वियहः कूलभेदः। तमकुर्वन्। परुष्ण्याः कूलं बिभिदुरित्यर्थः। स सुदासो महेंद्रप्रसादलब्धेन महिम्ना पृथिवीमविव्यक्। तदेव व्याप्नोत्। न पुनरुदकेनाबाध्यत। ततः सुदासः शत्रुश्चायमानश्चयमानस्य पुत्रः कविः कविनामा पत्यमानः पाल्यमानः पशुर्यागे संज्ञप्तः पशुरिवाशयत्। अशेत। सुदासा निहत इत्यर्थः॥

॥ अथ नवमी ॥

ईयुरर्थं न न्यर्थं परुष्णीमाशुश्चनेदभिपित्वं जगाम।
सुदास इंद्रः सुतुकाँ अमित्रानरंधयन्मानुषे वध्रिवाचः॥९॥
ईयुः। अर्थं। न। निऽअर्थं। परुष्णीं। आशुः। चन। इत्। अभिऽपित्वं। जगाम।
सुऽदासे। इंद्रः। सुऽतुकान्। अमित्रान्। अरंधयत्। मानुषे। वध्रिऽवाचः॥९॥

अथेंद्रः परुष्ण्या विच्छिन्नानि पर्वाणि संदधे। ततः परुष्ण्या आपो यथापूर्वमर्थं गंतव्यमेव प्रवणदेशं प्रति परुष्णीमीयुः। आययां चक्रुः॥ इण् गताविति धातोरंतर्भावितण्यर्थात् लिटीयुरिति। अतो द्विकर्मकमाख्यातं॥ न्यर्थमगंतव्यं परुष्ण्याः पार्श्वयोः स्थितं निम्नं देशं प्रति परुष्णीं नेयुः। आशुश्चन राज्ञः सुदासोऽश्वोऽप्यभिपित्वमभिप्राप्तव्यमेव जगाम। इंद्रश्च सुदासे राज्ञे मानुषे लोके वध्रिवाचो जल्पकानमित्रान् शत्रून् सुतुकान् सुतोकान्॥ तुक् तोकमित्यपत्यनामसु पाठात्॥ अरंधयत्। वशमानयत्॥

॥ अथ दशमी ॥

ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः ।
पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रंतयश्च ॥१०॥

ईयुः । गावः । नः । यवसात् । अगोपाः । यथाऽकृतं । अभि । मित्रं । चितासः ।
पृश्निऽगावः । पृश्निऽनिप्रेषितासः । श्रुष्टिं । चक्रुः । निऽयुतः । रंतयः । च ॥१०॥

यदेंद्रः सुदासो रक्षणार्थमागच्छति तदा पृश्निनिप्रेषितासः पृश्निनिप्रेषिताः पृश्न्या मात्रा नितरां प्रहिताश्चितासः संहता जानंतो वा पृश्निगावः । पृश्निवर्णा गावोऽश्वा येषां ते पृश्निगावो मरुतो यथाकृतमिंद्रस्य साहाय्यं करवामेति यथा पूर्वं समयः कृतस्तं समयमनतिक्रम्य मित्रमिंद्रं यवसात् ॥ निमित्तार्थे पंचमी ॥ यवसं निमित्तीकृत्यागोपा गोपालेनारक्षिता गावो न गाव इवाभीयुः । अभिजग्मुः । रंतयो रममाणा नियुतो मरुतामश्वाश्च श्रुष्टिं शीघ्रप्राप्तिं चक्रुः । तस्मिन्युद्धे मरुत इंद्रं साहाय्यार्थमभ्यगच्छन्नित्यर्थः ॥

॥ इति पंचमस्य द्वितीये पंचविंशो वर्गः ॥

॥ अथैकादशी ॥

एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान्राजा न्यस्तः ।
दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिंद्र एषां ॥११॥

एकं । च । यः । विंशतिं । च । श्रवस्या । वैकर्णयोः । जनान् । राजा । नि । अस्तरित्यस्तः ।
दस्मः । न । सद्मन् । नि । शिशाति । बर्हिः । शूरः । सर्गं । अकृणोत् । इंद्रः । एषां ॥११॥

यो सुदासो राजा श्रवस्या यशस इच्छयान्नेच्छया वा परुष्ण्याः पार्श्वस्थयोर्वैकर्णयोर्जनपदयोर्विद्यमानानेकं च विंशतिं च जनान् न्यस्तः आत्मनाहन् स राजा दस्मो न दर्शनीयो युवाध्वर्युरिव सद्मन्यज्ञगृहे बर्हिर्यस्मिन्युद्धे सपत्नान्नि शिशाति नितरां लुनाति तस्मिन्युद्धे शूर इंद्र एषां मरुतां सर्गं प्रसवमकृणोत् सुदासः साहाय्यार्थमकरोत् ॥

॥ अथ द्वादशी ॥

अध श्रुतं कवषं वृद्धमप्स्वनु द्रुह्युं नि वृणग्वज्रबाहुः ।
वृणाना अत्र सख्याय सख्यं त्वायंतो ये अमदन्ननु त्वा ॥१२॥

अधं। श्रुतं। कवषं। वृद्धं। अप्ऽसु। अनुं। द्रुह्युं। नि। वृणक्। वज्रंऽबाहुः।
वृणानाः। अत्रं। सख्याय। सख्यं। त्वाऽयंतः। ये। अमंदन्। अनुं। त्वा ॥१२॥

अधापि च वज्रबाहुरिंद्रः श्रुतं कवषं च वृद्धं च त्रीन् तथा द्रुह्युमनु आनुपूर्व्येणाप्सूदकेषु निवृणक्। न्यमज्जयदित्यर्थः। अत्रास्मिन्नवसरे ये त्वायंतस्त्वत्कामास्त्वा त्वामन्वमदन् अस्तुवन् ते सखायः सख्याय सख्यार्थं त्वां वृणानाः सख्यं लेभिर इति शेषः ॥

॥ अथ त्रयोदशी ॥

वि सद्यो विश्वा दृंहितान्येषामिंद्रः पुरः सहसा सप्त दर्दः।
व्यानंवस्य तृत्सवे गयं भाग्जेष्म पूरुं विदथे मृध्रवाचं ॥१३॥

वि। सद्यः। विश्वां। दृंहितानिं। एषां। इंद्रः। पुरः। सहसा। सप्त। दर्दरिति दर्दः।
वि। आनंवस्य। तृत्सवे। गयं। भाक्। जेष्मं। पूरुं। विदथे। मृध्रऽवाचं ॥१३॥

एषां कवषादीनां विश्वा विश्वानि दृंहितानि दृढानि दुर्गाणि पुरो नगरीश्च तद्रक्षासाधनभूतान् सप्त प्रकारांश्चेंद्रः सहसा बलेन सद्य एव विदर्दः। विदारयामास। अपि चानवस्यानोः संबंधिनो बलस्यानोः पुत्रस्य वा गयं गृहं धनं वा तृत्सवे तृत्सुनामकाय राज्ञे तृत्सूनां गणाय वा विभाक्। व्यभजत्। अदादित्यर्थः। इत्थमिंद्रं स्तुवंतो वयं विदथे युद्धे मृध्रवाचं बाधवाचं पूरुं मनुष्यं जेष्म। जयेम ॥

॥ अथ चतुर्दशी ॥

नि गव्यवोऽनंवो द्रुह्यवंश्च षष्टिः शता सुंषुपुः षट् सहस्रां।
षष्टिर्वीरासो अधि षट् दुवोयु विश्वेदिंद्रस्य वीर्या कृतानिं ॥१४॥

नि। गव्यवंः। अनंवः। द्रुह्यवंः। च। षष्टिः। शता। सुसुपुः। षट्। सहस्रां।
षष्टिः। वीरासंः। अधिं। षट्। दुवःऽयु। विश्वां। इत्। इंद्रस्य। वीर्या। कृतानिं ॥१४॥

गव्यवो गोकामा अनवोऽनोः संबंधिनो द्रुह्यवो द्रुह्योः संबंधिनश्च वीरासो वीराः षष्टिः शता शतानि। सहस्राणीत्यर्थः। षट् सहस्रा सहस्राणि च षष्टिश्चाधि षडधिकाः षट् दुवोयु दुवोयुवे॥ चतुर्थी लुक्॥ परिचरणकामाय सुदासे॥ नमस्यति दुवस्यतीति परिचरणकर्मसु पाठात्॥ नि सुसुपुः। नितरां शेरते।

निहता इत्यर्थः । तान्येतानि विश्वा विश्वानि कृतानि कार्याणींद्रस्येत् इंद्रस्यैव वीर्या वीर्याणीति ॥

॥ अथ पंचदशी ॥

इंद्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवंत नीचीः ।
दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे ॥१५॥

इंद्रेण । एते । तृत्सवः । वेविषाणाः । आपः । न । सृष्टाः । अधवंत । नीचीः ।
दुःऽमित्रासः । प्रकलऽवित् । मिमानाः । जहुः । विश्वानि । भोजना । सुऽदासे ॥१५॥

कदाचिदिंद्रेण रक्षिता अप्यन्यदा तेनैव बाध्यंते । एते तृत्सवो दुर्मित्रासो दुष्टमित्राः प्रकलविद्जानंत इंद्रेण वेविषाणा युद्धार्थं संगताः सृष्टाः पलायनार्थमुद्युक्ता नीची नीचीना आपो न आप इवाधवंत । अधावंत । ततो मिमानाः सुदासा बाध्यमाना विश्वा विश्वानि भोजना भोग्यानि धनानि सुदासे राज्ञे जहुः ॥

॥ इति पंचमस्य द्वितीये षड्विंशो वर्गः ॥

॥ अथ षोडशी ॥

अर्धं वीरस्य शृतपामनिंद्रं परा शर्धंतं नुनुदे अभि क्षां ।
इंद्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः ॥१६॥

अर्धं । वीरस्य । शृतऽपां । अनिंद्रं । परा । शर्धंतं । नुनुदे । अभि । क्षां ।
इंद्रः । मन्युं । मन्युऽम्यः । मिमाय । भेजे । पथः । वर्तनिं । पत्यमानः ॥१६॥

इंद्रोऽभि क्षां भूमिमभि । भूम्यामित्यर्थः । वीरस्य वीर्ययुक्तस्य सुदासोऽर्धं हिंसकं॥ अर्धहिंसाकर्मणोऽर्धशब्दस्य निष्पत्तिः॥ अनिंद्रं। यस्य बुद्धाविंद्रो नास्त्यसावनिंद्रः । तं । इंद्रमगणयंतमित्यर्थः । शृतपां शृतस्य क्षीरादेर्हविषः पातारं शर्धंतमुत्सहमानं परानुनुदे । किंच मन्युम्यो मन्युकर्तुर्मन्युना मिनतो हिंसतो वा शत्रोर्मन्युं क्रोधं मिमाय । बबाधे । अथ सुदासः शत्रुः पथो मार्गान् पत्यमानो गच्छन् वर्तनिं पलायनमार्गं भेजे । प्राप ॥

॥ अथ सप्तदशी ॥

आध्रेण चित्तद्वेकं चकार सिंह्यं चित्पेत्वेना जघान ।
अव स्रक्तीर्वेश्यावृश्चदिंद्रः प्रायच्छद्विश्वा भोजना सुदासे ॥१७॥

आध्रेण । चित् । तत् । ऊं इति । एकं । चकार । सिंह्यं । चित् । पेत्वेन । जघान ।
अव । स्रक्तीः । वेश्या । अवृश्चत् । इंद्रः । प्र । अयच्छत् । विश्वा । भोजना । सुऽदासे ॥१७॥

इंद्रस्तत्तदाध्रेण चित् दरिद्रेणापि सुदासैकं मुख्यं दानकर्म चकार । कारयामास । सिंह्यं चित् । प्रवयाः सिंहः सिंह्यः । तमपि पेत्वेन छागेन जघान । घातयामास । वेश्या । वेशी सूची । तया स्रक्तीर्यूपादेरश्रीनवावृश्चत् । अववृक्तवान् । वेश्यादेः कृत्यं सूच्यैवाकरोदित्यर्थः । तान्येतानि त्रीणि कर्माण्यसंभावितानीति नाशंकनीयानींद्रस्य महिम्नोऽधिकत्वात् । विश्वा विश्वानि भोजना भोजनानि भोग्यानि धनानि सुदासे राज्ञे प्रायच्छत् । अदाच ॥

॥ अथाष्टादशी ॥

शश्वंतो हि शत्रवो रारधुष्टे भेदस्य चिच्छर्धतो विंद रंधिं ।
मर्तां एनः स्तुवतो यः कृणोति तिग्मं तस्मिन्नि जहि वज्रमिंद्र ॥१८॥

शश्वंतः । हि । शत्रवः । ररधुः । ते । भेदस्य । चित् । शर्धतः । विंद । रंधिं ।
मर्तान् । एनः । स्तुवतः । यः । कृणोति । तिग्मं । तस्मिन् । नि । जहि । वज्रं । इंद्र ॥१८॥

हे इंद्र ते तव शत्रवोऽरयः शश्वंतो बहवो ररधुः । वशमीयुः । चिदपि च शर्धत उत्सहमानस्य भेदस्य । भिनत्ति मर्यादा इति भेदो नास्तिकः । तस्य । यद्वा भेदो नाम सुदासः शत्रुः कश्चित् । तस्येत्यर्थः । रंधिं वशीकरं विंद । लभ । यो भेदः स्तुवतस्त्वां स्तुवतो मर्तान्मर्त्यान् प्रत्येनः पापं कृणोति करोति तस्मिन् भेदे तिग्मं निशितं योद्धारमुत्साहयंतं । तथा च यास्कः । तिग्मं तेजतेरुत्साहकर्मणः । नि० १०.६. । इति । वज्रं । वजति गच्छत्येव शत्रुं न प्रतिहन्यत इति वज्रः । तं ॥ वज्रशब्दो वजेर्ऋज्रेंद्राग्रवज्रविप्रेत्यादिना रन्प्रत्ययांतो निपातितः ॥ तं जहि । वज्रेण भेदं प्रहरेत्यर्थः ॥

॥ अथैकोनविंशी ॥

आवदिंद्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वताता मुषायत् ।
अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि ॥१९॥

आवत् । इंद्रं । यमुना । तृत्सवः । च । प्र । अत्र । भेदं । सर्वऽताता । मुषायत् ।
अजासः । च । शिग्रवः । यक्षवः । च । बलिं । शीर्षाणि । जभ्रुः । अश्व्यानि ॥१९॥

अथास्मिन् सर्वताता सर्वतातौ युद्धे य इंद्रो भेदं नास्तिकं भेदनामकं वा सुदासः शत्रुं प्रमुषायत् प्रामुष्णात्। अवधीदित्यर्थः। तमिंद्रं यमुनावत्। अतोषयत्। तत्तीरवासी जनः सर्वोऽप्यतोषयदित्यर्थः। तृत्सवस्तृत्सोः पुरुषाश्चावन्। आवदित्येकवचनं बहुवचनांततया विपरिणतं सदत्र संबध्यते। किंचाजासोऽजा जनपदाः शिग्रवो जनपदा यक्षवश्च जनपदा अश्व्यान्यश्वसंबंधीनि शीर्षाणि शिरांसि। युद्धे हतानामश्वानां शिरांसीत्यर्थः। बलिमुपहारं तस्मा इंद्रायोपजभ्रुः। उपजह्रुः। यद्वाश्व्यानि शीर्षाणि युद्धे गृहीतान्मुख्यानश्वानिंद्रायोपहारं जह्रुरित्यर्थः॥

॥ अथ विंशी ॥

न त॑ इंद्र सुम॒तयो॒ न रायः॑ सं॒चक्षे॒ पूर्वा॑ उ॒षसो॒ न नूत्नाः॑।
देव॑कं चिन्मान्यमा॒नं ज॑घं॒थाव॒ त्मना॑ बृह॒तः शंब॑रं भेत् ॥२०॥

न। ते॒। इं॒द्र॒। सु॒ऽम॒तयः॑। न। रायः॑। सं॒ऽचक्षे॑। पूर्वाः॑। उ॒षसः॑। न। नूत्नाः॑।
देव॑कं। चि॒त्। मा॒न्य॒मा॒नं। ज॒घं॒थ॒। अव॑। त्मना॑। बृ॒ह॒तः। शंब॑रं। भे॒त् ॥२०॥

हे इंद्र ते तव पूर्वाः पुरातनाः सुमतयः शोभनमतयो रायो धनानि चोषसो न उषस इव न संचक्षे संख्यातुं न शक्याः। न नूत्ना नूतनाश्च सुमतयो रायश्च न संचक्षे। किंच त्वं मान्यमानं मन्यमानस्य पुत्रं देवकं देवकनामानं शत्रुं जघंथ। अवधीः। त्मना स्वयमेव बृहतो महतः शैलात् शंबरं चावभेत्। अवाभैत्सीरिति॥

॥ इति पंचमस्य द्वितीये सप्तविंशो वर्गः॥

॥ अथैकविंशी ॥

प्र ये गृ॒हादम॑मदुस्त्वा॒या प॑राश॒रः श॒तया॑तु॒र्वसि॑ष्ठः।
न ते॑ भो॒जस्य॑ स॒ख्यं मृ॑षं॒ताधा॑ सू॒रिभ्यः॑ सु॒दिना॒ व्यु॑च्छान् ॥२१॥

प्र। ये। गृ॒हात्। अम॑मदुः। त्वा॒ऽया। प॒रा॒ऽश॒रः। श॒तऽया॑तुः। वसि॑ष्ठः।
न। ते॒। भो॒जस्य॑। स॒ख्यं। मृ॒षं॒त॒। अध॑। सू॒रिऽभ्यः॑। सु॒ऽदिना॑। वि। उ॒च्छा॒न् ॥२१॥

हे इंद्र पराशरः शतयातुर्बहुरक्षाः। बहूनि रक्षांसि बाधितुं यं कामयंते स शतयातुर्बहूनां रक्षसां शातयिता वा। शक्तिर्वसिष्ठश्चैवमादयो ये ऋषयस्त्वाया

त्वदिच्छया गृहाद्गृहं प्राप्य ॥ ल्यब्लोपे द्वितीयार्थे पंचमी । पा० २. ३. २८. १. ॥ यद्वा गृहात् गृहे ॥ सप्तम्यर्थे पंचमी ॥ प्राममदुः त्वां प्रतुष्टुवुः प्रकर्षेण तर्पितवंतो वा ते पराशरप्रभृतयो भोजस्य भोजकस्य पालस्य ते तव सख्यं सख्युः कर्म स्तोत्रं यजनं वा न मृषंति । न विस्मरंति । मृष मर्षे । मर्षो मर्षणं । तन्न कुर्वंतीत्यर्थः । यतो न विस्मरंत्यधातो हेतोः सूरिभ्यः सूरीणां स्तोतृणामेषां ॥ अत्र विभक्तिव्यत्ययः ॥ सुदिना सुदिनानि व्युच्छान् । व्युच्छंति । निवसंति । उपगच्छंतीत्यर्थः ॥

॥ अथ द्वाविंशी ॥

द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमंता सुदासः ।

अर्हन्नग्ने पैजवनस्य दानं होतेव सद्म पर्येमि रेभन् ॥२२॥

द्वे इति । नप्तुः । देवऽवतः । शते इति । गोः । द्वा । रथा । वधूऽमंता । सुऽदासः ।

अर्हन् । अग्ने । पैजऽवनस्य । दानं । होताऽइव । सद्म । परि । एमि । रेभन् ॥२२॥

देववतो राज्ञो नप्तुः पौत्रस्य पैजवनस्य पिजवनपुत्रस्य सुदासो राज्ञो गोर्गवां द्वे शते वधूमंता वधूसंयुक्तौ द्वा द्वौ रथा रथौ च देयं दानं दानभूतान् रेभन् इंद्र स्तुवन् अत एवार्हन्योग्योऽहं वसिष्ठो हे अग्ने सद्म यज्ञगृहं होतेव वषट्कर्तेव पर्येमि । अत्राग्नेः संबोधनं सर्वदेवमुख्यत्वप्रतिपादनार्थं न तु देवतात्वज्ञापनार्थमतद्देवताकत्वादस्य सूक्तस्य ॥

॥ अथ त्रयोविंशी ॥

चत्वारो मा पैजवनस्य दानाः स्मद्दिष्टयः कृशनिनो निरेके ।

ऋज्रासो मा पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहंति ॥२३॥

चत्वारः । मा । पैजऽवनस्य । दानाः । स्मत्ऽदिष्टयः । कृशनिनः । निऽरेके ।

ऋज्रासः । मा । पृथिविऽस्थाः । सुऽदासः । तोकं । तोकाय । श्रवसे । वहंति ॥२३॥

पैजवनस्य पिजवनपुत्रस्य सुदासो राज्ञः स्मद्दिष्टयः प्रशस्तातिसर्जनश्रद्धादिदानांगयुक्ताः कृशनिनो हिरण्यालंकारवंतो निरेके दुर्गतौ सत्यामृज्रास ऋजुगामिनः पृथिविष्ठाः पृथिव्यां सुप्रतिष्ठिता दाना देयभूताश्चत्वारोऽश्वास्तोकं पुत्रवत्पालनीयं मां वसिष्ठं रथे स्थितं तोकाय तोकस्य पुत्रस्य ॥ षष्ठ्यर्थे चतुर्थी ॥ श्रवसेऽन्नाय यशसे वा वहंति । पुनर्मेति पूरणः ॥

॥ अथ चतुर्विंशी ॥

यस्य श्रवो रोदसी अंतरुर्वी शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता।
सप्तेदिंद्रं न स्रवतो गृणंति नि युध्यामधिमशिशादभीके ॥२४॥

यस्य। श्रवः। रोदसी इति। अंतः। उर्वी इति। शीर्ष्णेऽशीर्ष्णे। विऽबभाज। विऽभक्ता।
सप्त। इत्। इंद्रं। न। स्रवतः। गृणंति। नि। युध्यामधिं। अशिशात्। अभीके ॥२४॥

यस्य सुदासः श्रवो यश उर्वी विस्तीर्णे रोदसी द्यावापृथिव्यावंतः। विस्तीर्णयोर्द्यावापृथिव्योर्मध्ये वर्तत इत्यर्थः। यश्च सुदा विभक्ता धनस्य प्रदाता शीर्ष्णेशीर्ष्णे श्रेष्ठाय श्रेष्ठाय विबभाज धनं प्रददौ तं सुदासं सप्तेत् सप्तैव लोका इंद्रं न इंद्रमिव गृणंति। स्तुवंति। किंच स्रवतो नद्योऽभीके युद्धे युध्यामधिं युध्यामधिनामकं सपत्नं न्यशिशात्। न्यहन् ॥

॥ अथ पंचविंशी ॥

इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः।
अविष्टना पैजवनस्य केतं दूणाशं क्षत्रमजरं दुवोयु ॥२५॥

इमं। नरः। मरुतः। सश्चत। अनु। दिवःऽदासं। न। पितरं। सुऽदासः।
अविष्टन। पैजऽवनस्य। केतं। दुःऽनशं। क्षत्रं। अजरं। दुवःऽयु ॥२५॥

हे नरो नेतारो मरुत इमं सुदासं राजानं सुदासो राज्ञः पितरं दिवोदासं न दिवोदासमिव। दिवोदास इति पिजवनस्यैव नामांतरं। अनुसश्चत। अनुसेवध्वं। किंच दुवोयु परिचरणकामस्य॥ षष्ठ्या लुक्॥ पैजवनस्य पिजवनपुत्रस्य सुदासः केतं मंत्रं गृहं वाविष्टन। रक्षत। अपि चास्य सुदासः क्षत्रं बलं दूणाशं दुर्नशमविनाश्यजरमशिथिलं चास्तु ॥

॥ इति पंचमस्य द्वितीयेऽष्टाविंशो वर्गः ॥

यस्तिग्मशृंग इत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। यस्तिग्मशृंग एकादशेति॥ आभिप्लविके पंचमेऽहन्येतन्निविद्धानं। सूत्रितं च। कया शुभा यस्तिग्मशृंग इति माध्यंदिनः। आ० ७.७.। इति ॥ विषुवति निष्केवल्यशस्त्रेऽप्येतत्सूक्तं। सूत्रितं च। यस्तिग्मशृंगोऽभि त्यं मेषं। आ० ८.६.।

इति ॥ महाव्रते निष्केवल्येऽप्येतत्सूक्तं । सूचितं च । यस्तिग्मशृंगो वृषभो न भीम उग्रो जज्ञे वीर्याय स्वधावान् । ऐ० आ० ५.८.। इति ॥ आयुष्कामेष्ट्यां मा ते अस्यामितींद्रस्य चातुर्याज्या । सूचितं च । मा ते अस्यां सहसावन्परिष्टौ पाहि नो अग्ने पायुभिः । आ० २.१०.। इति ॥

॥ तत्र प्रथमा ॥

यस्तिग्मशृंगो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः ।
यः शश्वतो अदाशुषो गयस्य प्रयंतासि सुष्वितराय वेदः ॥१॥
यः । तिग्मऽशृंगः । वृषभः । न । भीमः । एकः । कृष्टीः । च्यवयति । प्र । विश्वाः ।
यः । शश्वतः । अदाशुषः । गयस्य । प्रऽयंता । असि । सुस्विऽतराय । वेदः ॥१॥

य इंद्रस्तिग्मशृंगस्तीक्ष्णशृंगो वृषभो न वृषभ इव भीमो भयंकरः सन् एकोऽसहाय एव विश्वाः सर्वान् कृष्टीः शत्रुजनान् स्थानात् प्रच्यावयति । यश्चेंद्रोऽदाशुषोऽयजमानस्य शश्वतो बहोर्गयस्य गृहस्य धनस्य वापहर्ता भवतीति शेषः । हे इंद्र स त्वं सुष्वितरायातिशयेन सोमाभिषवं कुर्वते जनाय वेदो धनं प्रयंता प्रदातासि ॥ तृनंतत्वाद्च षष्ठ्या अभावः । असीत्यस्याख्यातस्यानुदात्तत्वाद्यद्वृत्तयोगाच्चानुदात्तत्वासंभवात् यद्वृत्तयुक्तमाख्यातांतरमध्याहृत्य योजना कृता ॥

॥ अथ द्वितीया ॥

त्वं ह त्यदिंद्र कुत्समावः शुश्रूषमाणस्तन्वा समर्ये ।
दासं यच्छुष्णं कुयवं न्यस्मा अरंधय आर्जुनेयाय शिक्षन् ॥२॥
त्वं । ह । त्यत् । इंद्र । कुत्सं । आवः । शुश्रूषमानः । तन्वा । सऽमर्ये ।
दासं । यत् । शुष्णं । कुयवं । नि । अस्मै । अरंधयः । आर्जुनेयाय । शिक्षन् ॥२॥

हे इंद्र त्वं ह त्वं खलु त्यत्तदा तन्वा शरीरेण शुश्रूषमाण उपचरन् समर्ये मर्यैर्मर्त्यैर्योद्धृभिः सहिते युद्धे कुत्समावः । अरक्षः । कदेत्यत्राह । यद्यदार्जुनेयायार्जुन्याः पुत्रायास्मै कुत्साय शिक्षन् धनं प्रयच्छन् दासं दासनामकमसुरं शुष्णं च कुयवं च न्यरंधयः नितरां वशमानयः ॥

॥ अथ तृतीया ॥

त्वं धृष्णो धृषता वीतहव्यं प्रावो विश्वाभिरूतिभिः सुदासं ।
प्र पौरुकुत्सिं त्रसदस्युमावः क्षेत्रसाता वृत्रहत्येषु पूरुं ॥३॥
त्वं । धृष्णो इति । धृषता । वीतऽहव्यं । प्र । आवः । विश्वाभिः । ऊतिऽभिः । सुऽदासं ।
प्र । पौरुऽकुत्सिं । त्रसदस्युं । आवः । क्षेत्रऽसाता । वृत्रऽहत्येषु । पूरुं ॥३॥

हे धृष्णो शत्रूणां धर्षकेंद्र धृषता धर्षकेण वज्रेण बलेन वा वीतहव्यं दत्तहविष्कं प्रजनितहविष्कं वा सुदासं राजानं विश्वाभिः सर्वाभिरूतिभी रक्षाभिः प्रावः। प्रकर्षेणारक्षः। किंच वृत्रहत्येषु युद्धेषु क्षेत्रसाता क्षेत्रसातौ क्षेत्रस्य भूमेर्भजने निमित्ते पौरुकुत्सिं पुरुकुत्सस्यापत्यं त्रसदस्युं पूरुं च प्रावः ॥

॥ अथ चतुर्थी ॥

त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि ।
त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहंतु ॥४॥
त्वं । नृऽभिः । नृऽमनः । देवऽवीतौ । भूरीणि । वृत्रा । हरिऽअश्व । हंसि ।
त्वं । नि । दस्युं । चुमुरिं । धुनिं । च । अस्वापयः । दभीतये । सुऽहंतु ॥४॥

हे नृमणो नृभिर्यज्ञानां नेतृभिः स्तोतृभिर्मननीय स्तोतव्येंद्र। नृषु मनो यस्येति बहुव्रीहिर्वा। देववीतौ यज्ञे क्रियमाणे सति संग्रामे वा। देवा विजिगीषवो यस्मिन् वियंति गच्छंतीति संग्रामो देववीतिः। नृभिर्मरुद्भिः सह भूरीणि बहूनि वृत्रा वृत्राणि शत्रून् हंसि। मारितवानसि। किंच हे हर्यश्वेंद्र त्वं दभीतये दभीतिनामकाय राजर्षये। तदर्थमित्यर्थः। दस्युं चुमुरिं च धुनिं च सुहंतु सुहंतुना वज्रेण नि नितरामस्वापयः। मारितवानसीत्यर्थः ॥

॥ अथ पंचमी ॥

तव च्यौत्नानि वज्रहस्त तानि नव यत्पुरो नवतिं च सद्यः ।
निवेशने शततमाविवेषीरहन् च वृत्रं नमुचिमुताहन् ॥५॥
तव । च्यौत्नानि । वज्रऽहस्त । तानि । नव । यत् । पुरः । नवतिं । च । सद्यः ।
निऽवेशने । शतऽतमा । अविवेषीः । अहन् । च । वृत्रं । नमुचिं । उत । अहन् ॥५॥

हे वज्रहस्त तव च्यौत्नानि बलानि तानि तादृशानि । यद्यदा त्वं शंबरस्य नव नवतिं च पुरः सद्यो युगपदेव विदारितवानसीति शेषः । तदा निवेशने निवेशनार्थं शततमा शततमीं पुरमविवेषीः । व्याप्नोः । वृत्रं चाहन् । उतापि च नमुचिमहन् ॥

॥ इति पंचमस्य द्वितीय एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

सना ता तं इंद्र भोजनानि रातहव्याय दाशुषे सुदासे ।

वृष्णे ते हरी वृषणा युनज्मि व्यंतु ब्रह्माणि पुरुशाक वाजं ॥६॥

सना । ता । ते । इंद्र । भोजनानि । रातऽहव्याय । दाशुषे । सुऽदासे ।

वृष्णे । ते । हरी इति । वृषणा । युनज्मि । व्यंतु । ब्रह्माणि । पुरुऽशाक । वाजं ॥६॥

हे इंद्र ते तव रातहव्याय दत्तहव्याय दाशुषे यजमानाय सुदासे ता तानि त्वया दत्तानि भोजनानि भोग्यानि धनानि सना सनानि सनातनानि बभूवुरिति शेषः । हे पुरुशाक बहुकर्मन्निंद्र वृष्णे कामानां वर्षित्रे ते तुभ्यं । त्वामानेतुमित्यर्थः । वृषणा वृषणौ हरी अश्वौ युनज्मि । रथे योजयामि । ब्रह्माण्यस्मदीयानि स्तोत्राणि वाजं बलिनं त्वां व्यंतु । गच्छंतु ॥

॥ अथ सप्तमी ॥

मा ते अस्यां सहसावन्परिष्टावघाय भूम हरिवः परादै ।

त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम ॥७॥

मा । ते । अस्यां । सहसाऽवन् । परिष्टौ । अघाय । भूम । हरिऽवः । पराऽदै ।

त्रायस्व । नः । अवृकेभिः । वरूथैः । तव । प्रियासः । सूरिषु । स्याम ॥७॥

हे सहसावन् बलवन् हरिवो हरिवन्निंद्र ते तवास्यां स्तोत्रेणास्माभिः क्रियमाणायां परिष्टावन्वेषणायां परादै परादानायाघायाहंत्रे वयं मा भूम । किंच नोऽस्मानवृकेभिरबाधैर्वरूथैः । वारयंत्युपद्रवेभ्य इति वरूथानि रक्षणानि । तैस्त्रायस्व । पाहि । तव सूरिषु स्तोतृषु मध्ये वयं प्रियासः प्रियाः स्याम । भूयास्म ॥

॥ अथाष्टमी ॥

प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः ।
नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ॥८॥
प्रियासः । इत् । ते । मघऽवन् । अभिष्टौ । नरः । मदेम । शरणे । सखायः ।
नि । तुर्वशं । नि । याद्वं । शिशीहि । अतिथिऽग्वाय । शंस्यं । करिष्यन् ॥८॥

हे मघवन् धनवन्निंद्र ते तवाभिष्टावभ्येषणे नरः स्तोत्राणां नेतारो वयं सखायः समानख्यातयः प्रियासः प्रियाश्च संतः शरण इत् गृह एव मदेम । मोदेम । किंचातिथिग्वाय । पूजयातिथीन् गच्छतीत्यतिथिग्वः । तस्मै सुदासे दिवोदासाय वास्मदीयाय राज्ञे शंस्यं शंसनीयं सुखं करिष्यन् कुर्वन् तुर्वशं राजानं निशिशीहि । वशं कुरु । याद्वं च राजानं निशिशीहीत्यर्थः ॥

॥ अथ नवमी ॥

सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसंत्युक्थशास उक्था ।
ये ते हवेभिर्वि पणीँरदाशन्नस्मान्वृणीष्व युज्याय तस्मै ॥९॥
सद्यः । चित् । नु । ते । मघऽवन् । अभिष्टौ । नरः । शंसंति । उक्थऽशासः । उक्था ।
ये । ते । हवेभिः । वि । पणीन् । अदाशन् । अस्मान् । वृणीष्व । युज्याय । तस्मै ॥९॥

हे मघवन् धनवन्निंद्र ते तव नु अद्याभिष्टावभ्येषणे ये नर उक्थशास उक्थानां शंसितार उक्थोक्थानि शस्त्राणि सद्यश्चित् सद्य एव शंसंति । किंच ते तव हवेभिः स्तोत्रैः पणीनप्रदानशीलान् वणिजोऽपि व्यदाशन् । धनानि विशेषेणादापयन्नित्यर्थः । तानस्मान् तस्मै युज्याय सख्याय तत्सख्यमनुवर्तयितुं वृणीष्व । परिगृहाण ॥

॥ अथ दशमी ॥

एते स्तोमा नरां नृतम तुभ्यमस्मद्र्यंचो ददतो मघानि ।
तेषामिंद्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणां ॥१०॥
एते । स्तोमाः । नरां । नृऽतम । तुभ्यं । अस्मद्र्यंचः । ददतः । मघानि ।
तेषां । इंद्र । वृत्रऽहत्ये । शिवः । भूः । सखा । च । शूरः । अविता । च । नृणां ॥१०॥

हे नृतम नेतृतमेंद्र तुभ्यं नरां नेतॄणां य एते स्तोमाः संघा मघानि मंहनीयानि हवींषि ददतो ददंतोऽस्मद्र्यंचोऽस्मदभिमुखा अभूवन्निति शेषः । तेषां नृणां वृत्रहत्ये संग्रामे शिवः कल्याणकृत् भूः । भव । सखा च भूः । अविता रक्षिता च भूः ॥

॥ अथैकादशी ॥

नू इंद्र शूर स्तवमान ऊती ब्रह्मजूतस्तन्वा वावृधस्व ।
उप नो वाजान्मिमीह्युप स्तीन्यूयं पात स्वस्तिभिः सदा नः ॥११॥

नु । इंद्र । शूर । स्तवमानः । ऊती । ब्रह्मऽजूतः । तन्वा । ववृधस्व ।
उप । नः । वाजान् । मिमीहि । उप । स्तीन् । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥११॥

हे शूरेंद्र नु अद्य स्तवमानः स्तूयमानो ब्रह्मजूतो ब्रह्मणा स्तोत्रेण प्रेरितस्तन्वा शरीरेण ववृधस्व । अपि च नोऽस्मभ्यं वाजानन्नान्युपमिमीहि । प्रयच्छेत्यर्थः । स्तीन् गृहांश्चोपमिमीहि । स्पष्टमन्यत् ॥

॥ इति पंचमस्य द्वितीये त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके द्वितीयोऽध्यायः समाप्तः ॥

SARVÁNUKRAMAḤ.

Hymn.	Mandala Anuvaka Sukta.	Ashtaka Adhyaya Varga.	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
1	4.1.1	3.4.12	Tvám hy agne sadam it	20	Vámadevaḥ.	Agniḥ, 2–4 Agniḥ or Varuṇah.	1 Ashṭiḥ, 2 Atijagatí, 3 Dhṛitiḥ, 4–20 Trishṭup.	1
2	4.1.2	3.4.16	Yo martyeshu	20	The same.	Agniḥ.	Trishṭup.	13
3	4.1.3	3.4.20	Á vo rájánam	16	......	The same.	The same.	24
4	4.1.4	3.4.23	Kriṇushva	15	......	Agniḥ (rakshohá).	......	33
5	4.1.5	3.5.1	Vaiśvánaráya	15	......	Agnir Vaiśvánaraḥ.	......	42
6	4.1.6	3.5.4	Úrddhva ú shu naḥ	11	......	Agniḥ.	......	50
7	4.1.7	3.5.6	Ayam iha	11	......	The same.	1 Jagatí, 2–6 Anushṭup, 7–11 Trishṭup.	54
8	4.1.8	3.5.8	Dútam vaḥ	8	......	......	Gáyatrí.	60
9	4.1.9	3.5.9	Agne mṛila	8	......	......	The same.	62
10	4.1.10	3.5.10	Agne tam adya	8	......	......	1–3 Padapanktiḥ, 4, 6 and 7 Padapanktiḥ or Ushṇik, 5 Mahápadapanktiḥ, 8 Ushṇik.	64
11	4.2.1	3.5.11	Bhadram te	6	......	......	Trishṭup.	68
12	4.2.2	3.5.12	Yas tvám agne	6	......	......	The same.	71
13	4.2.3	3.5.13	Praty agniḥ	5	......	Agniḥ or the Lingoktadevatáḥ.	......	73
14	4.2.4	3.5.14	Praty agnir ushasaḥ	5	......	Agniḥ or the Lingoktadevatáḥ.	......	76
15	4.2.5	3.5.15	Agnir hotá	10	......	Agniḥ, 7 and 8 Somakaḥ Sáhadevyaḥ, 9 and 10 Aśvinau.	Gáyatrí.	78
16	4.2.6	3.5.17	Á satyo yátu	21	......	Indraḥ.	Trishṭup.	81
17	4.2.7	3.5.21	Tvam mahán	21	......	The same.	1 Trishṭup, 15 Ekapadá Viráṭ.	90
18	4.2.8	3.5.25	Ayam pantháḥ	13	Samváda Indra-	Aditi-Vámadevánám.	Trishṭup.	100
19	4.2.9	3.6.1	Evá tvám	11	Vámadevaḥ.	Indraḥ.	The same.	107
20	4.2.10	3.6.3	Á na indra	11	The same.	The same.	......	111
21	4.2.11	3.6.5	Á yátv indraḥ	11	......	......	......	116
22	4.3.1	3.6.7	Yan na indraḥ	11	......	......	......	121
23	4.3.2	3.6.9	Kathá mahám	11	......	Indraḥ, 8–10 Indraḥ or Ṛitadevatáḥ.	......	125

Hymn.	Mandala Anuvaka Sukta.	Ashtaka Adhyaya Varga	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
24	4.3.3	3.6.11	Ká sushṭutiḥ	11	Vámadevaḥ.	Indraḥ.	Trishṭup, 10 Anushṭup.	130
25	4.3.4	3.6.13	Ko adya	8	The same.	The same.	Trishṭup.	135
26	4.3.5	3.6.15	Aham manuḥ	7	1–3 Vámadevaḥ or Indraḥ, 4–7 Vámadevaḥ.	1–3 Indraḥ or Paramátmá, 4–7 S'yenastutiḥ.	The same.	138
27	4.3.6	3.6.16	Garbhe nu	5	Vámadevaḥ.	1–4 S'yenaḥ, 5 S'yenaḥ or Indraḥ.	Trishṭup, 5 S'akvarí.	142
28	4.3.7	3.6.17	Tvá yujá	5	The same.	Indrá-Somau.	Trishṭup.	144
29	4.3.8	3.6.18	Á naḥ stutaḥ	5	......	Indraḥ.	The same.	146
30	4.3.9	3.6.19	Nakir indra	24	......	Indraḥ, 9–11 Indraḥ and Usháḥ.	Gáyatrí, 8 and 24 Anushṭup.	148
31	4.3.10	3.6.24	Kayá naḥ	15	......	Indraḥ.	Gáyatrí, 4 Pádanicṛit.	155
32	4.3.11	3.6.27	Á tú naḥ	24	......	Indraḥ, 23 and 24 Indrasyáśvau.	Gáyatrí.	159
33	4.4.1	3.7.1	Pra ṛibhubhyaḥ	11	......	Ṛibhavaḥ.	Trishṭup.	166
34	4.4.2	3.7.3	Ṛibhur vibhvá	11	......	The same.	The same.	171
35	4.4.3	3.7.5	Ihopa yáta	9	......	......	......	175
36	4.4.4	3.7.7	Anaśvo játaḥ	9	......	......	Jagatí, 9 Trishṭup.	179
37	4.4.5	3.7.9	Upa no vájá	8	......	......	Trishṭup.	183
38	4.4.6	3.7.11	Uto hi vám	8	......	Dadhikrává, 1 Dyávápṛithiví.	The same.	186
39	4.4.7	3.7.13	Áśum	6	......	Dadhikrává.	1–5 Trishṭup, 6 Anushṭup.	191
40	4.4.8	3.7.14	Dadhikrávṇaḥ	5	......	The same.	1 Trisht., 2–5 Jagatí.	193
41	4.4.9	3.7.15	Indrá ko vám	11	......	Indrá-Varuṇau.	Trishṭup.	196
42	4.4.10	3.7.17	Mama dvitá	10	Trasadasyuḥ Paurukutsyaḥ.	1–6 Átmá, 7–10 Indrá-Varuṇau.	The same.	201
43	4.4.11	3.7.19	Ka u śravat	7	Purumílha-Agamílhau Sauhotrau.	Aśvinau.	......	205
44	4.4.12	3.7.20	Tam vám	7	The same.	The same.	......	208
45	4.4.13	3.7.21	Esha sya	7	Vámadevaḥ.	......	Jagatí, 7 Trishṭup.	211
46	4.5.1	3.7.22	Agram piba	7	The same.	Váyuḥ, 1 Indra-Váyú.	Gáyatrí.	214
47	4.5.2	3.7.23	Vayo śukraḥ	4	......	1 Váyuḥ, 2–4 Indra-Váyú.	Anushṭup.	216
48	4.5.3	3.7.24	Vihi hotráḥ	5	......	Váyuḥ.	The same.	217
49	4.5.4	3.7.25	Indram vám	6	......	Indrá-Bṛihaspatí.	Gáyatrí.	219
50	4.5.5	3.7.26	Yas tastambha	11	......	Bṛihaspatiḥ, 10 and 11 Bṛihaspatiḥ and Indraḥ.	Trishṭup, 10 Jagatí.	221
51	4.5.6	3.8.1	Idam u tyat	11	......	Usháḥ.	Trishṭup.	226
52	4.5.7	3.8.3	Prati shyá	7	......	The same.	Gáyatrí.	231
53	4.5.8	3.8.4	Tad devasya	7	......	Savitá.	Jagatí.	233
54	4.5.9	3.8.5	Abhúd devaḥ	6	......	The same.	Jagatí, 6 Trishṭup.	236

Hymn.	Mandala Anuvaka Sukta.	Ashtaka Adhyaya Varga.	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
55	4.5.10	3.8.6	Ko vas trátá	10	Vámadevaḥ.	Visve Deváḥ.	Trishṭup, 8–10 Gáyatrí.	239
56	4.5.11	3.8.8	Mahí	7	The same.	Dyává-Prithiví.	Trishṭup, 5–7 Gáyatrí.	243
57	4.5.12	3.8.9	Kshetrasya	8	......	1–3 Kshetrapatiḥ, 4 Sunaḥ, 5 and 8 Sunásírau, 6 and 7 Sítá.	1, 4, 6 and 7 Anushṭup, 5 Pura-ushṇik, 2, 3 and 8 Trishṭup.	245
58	4.5.13	3.8.10	Samudrát	13	......	Agniḥ, or Súryaḥ, or Ápaḥ, or Gávaḥ, or Ghṛitam.	1–12 Jagatí, 13 Trishṭup.	249
1	5.1.1	3.8.12	Abodhi	12	Budhaḥ and Gavishṭhiraḥ, of the family of Atriḥ.	Agniḥ.	Trishṭup.	256
2	5.1.2	3.8.14	Kumáram	12	2 and 9 Vṛisaḥ, son of Jaraḥ, 1, 3–8, 10–12 Kumáraḥ, son of Atriḥ, or Vṛisaḥ, or both.	The same.	1–11 Trishṭup, 12 Sakvarí.	261
3	5.1.3	3.8.16	Tvam agne	12	Vasusrutaḥ.	......	Trishṭup.	267
4	5.1.4	3.8.18	Tvám agne	11	The same.	......	The same.	272
5	5.1.5	3.8.20	Susamiddháya	11	......	Áprídevatáḥ.	Gáyatrí.	277
6	5.1.6	3.8.22	Agnim tam	10	......	Agniḥ.	Panktiḥ.	280
7	5.1.7	3.8.24	Sakháyaḥ	10	Ishaḥ.	......	1–9 Anushṭup, 10 Panktiḥ.	284
8	5.1.8	3.8.26	Tvám agne	7	......	......	Jagatí.	288
9	5.1.9	4.1.1	Tvám agne	7	Gayaḥ.	......	Anushṭup, 5 and 7 Panktiḥ.	293
10	5.1.10	4.1.2	Agna ojishṭham	7	The same.	......	Anushṭup, 4 and 7 Panktiḥ.	298
11	5.1.11	4.1.3	Janasya	6	Sutambharaḥ.	......	Jagatí.	303
12	5.1.12	4.1.4	Prágnaye	6	The same.	......	Trishṭup.	306
13	5.1.13	4.1.5	Arcantaḥ	6	......	......	Gáyatrí.	309
14	5.1.14	4.1.6	Agnim	6	......	......	The same.	311
15	5.2.1	4.1.7	Pra vedhase	5	Dharuṇaḥ, the Ángirasaḥ.	......	Trishṭup.	313
16	5.2.2	4.1.8	Bṛihad vayaḥ	5	Púruḥ, the Átreyaḥ.	......	1–4 Anushṭup, 5 Panktiḥ.	315
17	5.2.3	4.1.9	Á yajnaiḥ	5	The same.	......	The same.	317
18	5.2.4	4.1.10	Prátar agniḥ	5	Mṛiktaváhá Dvitaḥ.	......	......	319
19	5.2.5	4.1.11	Abhy avastháḥ	5	Vavriḥ.	......	1 and 2 Gáyatrí, 3 and 4 Anushṭup, 5 Virádrúpá.	321
20	5.2.6	4.1.12	Yam agne	4	Prayasvantaḥ.	......	1–3 Anushṭup, 4 Panktiḥ.	322
21	5.2.7	4.1.13	Manushvat	4	Sasaḥ.	......	The same.	324
22	5.2.8	4.1.14	Pra visvasáman	4	Visvasámá.	......	......	326

Hymn.	Mandala Anuvaka Sukta.	Ashtaka Adhyaya Varga.	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
23	5.2.9	4.1.15	Agne sahantam	4	Dyumno Viśvacarshaṇiḥ.	Agniḥ.	1–3 Anushṭup, 4 Panktiḥ.	327
24	5.2.10	4.1.16	Agne tvam	4	1, 2, 3 and 4 Bandhuḥ, Subandhuḥ, Śrutabandhuḥ, Viprabandhuḥ, the Gaupáyanas or Laupáyanas.	The same.	Dvaipadam (vairájam).	329
25	5.2.11	4.1.17	Acchá vaḥ	9	Vasúyavaḥ.	......	Anushṭup.	330
26	5.2.12	4.1.19	Agne pávaka	9	The same.	......	Gáyatrí.	333
27	5.2.13	4.1.21	Anasvantá	6	Tryaruṇaḥ, son of Trivṛishṇaḥ; and Trasadasyuḥ, son of Purukutsaḥ; and Aśvamedhaḥ, son of Bharataḥ; or Atriḥ.	Agniḥ, 6 Indra-Agní.	1–3 Trishṭup, 4–6 Anushṭup.	336
28	5.2.14	4.1.22	Samiddhaḥ	6	Viśvavárá Átreyí.	Agniḥ.	1 and 3 Trishṭup, 2 Jagatí, 4 Anushṭ., 5 and 6 Gáyatrí.	338
29	5.2.15	4.1.23	Try aryamá	15	Gauravítiḥ, of the family of Śaktiḥ.	Indraḥ, 9*a* Indraḥ or Uśanáḥ.	Trishṭup.	341
30	5.2.16	4.1.26	Kva syaḥ	15	Babhruḥ.	Indraḥ, also king Riṇañcayaḥ.	The same.	348
31	5.2.17	4.1.29	Indro ratháya	13	Avasyuḥ.	Indraḥ, 8*c.d* Indraḥ or Kutsaḥ and Uśanáḥ, 9 Indraḥ and Kutsaḥ.	......	354
32	5.2.18	4.1.32	Adardaḥ	12	Gátuḥ.	Indraḥ.	......	360
33	5.3.1	4.2.1	Mahi mahe	10	Samvaraṇaḥ Prájápatyaḥ.	The same.	......	365
34	5.3.2	4.2.3	Ajátaśatrum	9	The same.	......	Jagatí, 9 Trishṭup.	370
35	5.3.3	4.2.5	Yas te	8	Prabhúvasuḥ (Áṅgirasaḥ).	......	1–7 Anushṭup, [illegible] Panktiḥ.	374
36	5.3.4	4.2.7	Sa á gamat	6	The same.	......	Trishṭup, 3 Jagatí.	377
37	5.3.5	4.2.8	Sam bhánuná	5	Atriḥ.	......	Trishṭup.	379
38	5.3.6	4.2.9	Urosh ṭe	5	The same.	......	Anushṭup.	382
39	5.3.7	4.2.10	Yad indra	5	......	......	Anushṭ., 5 Panktiḥ.	383
40	5.3.8	4.2.11	Á yáhy adribhiḥ	9	......	Indraḥ, 5 Súryaḥ, 6–9 Atriḥ.	1–3 Ushṇik, 5 and 9 Anushṭup, 4, 6, 7 and 8 Trishṭup.	385
41	5.3.9	4.2.13	Ko nu vám	20	Atriḥ (Bhaumaḥ).	Viśve Deváḥ.	Trishṭup, 16 and 17 Atijagatí, 20 Ekapadá Viráṭ.	389
42	5.3.10	4.2.17	Pra śantamá	18	The same.	Viśve Deváḥ, 11 Rudraḥ.	Trishṭup, 17 Ekapadá.	398

Hymn.	Maṇḍala Anuvaka Sukta.	Ashṭaka Adhyaya Varga.	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
43	5.3.11	4.2.20	Á dhenavaḥ	17	Atriḥ(Bhaumaḥ)	Viśve Deváḥ.	Trishṭ., 16 Ekapadá.	406
44	5.3.12	4.2.23	Tam pratnathá	15	Avatsáraḥ Káśyapaḥ, anye ca ṛishayo dṛishṭalingáḥ.	The same.	Jagatí, 14 and 15 Trishṭup.	413
45	5.4.1	4.2.26	Vidá divaḥ	11	Sadápṛiṇaḥ.	......	Trishṭup.	420
46	5.4.2	4.2.28	Hayo na	8	Pratikshatraḥ.	Viśve Deváḥ, 7 and 8 Devapatnyaḥ.	Jagatí, 7 and 8 Trishṭup.	425
47	5.4.3	4.3.1	Prayunjatí	7	Pratirathaḥ.	Viśve Deváḥ.	Trishṭup.	430
48	5.4.4	4.3.2	Kadu priyáya	5	Pratibhánuḥ.	The same.	Jagatí.	433
49	5.4.5	4.3.3	Devam vaḥ	5	Pratiprabhaḥ.	......	Trishṭup.	436
50	5.4.6	4.3.4	Viśvo devasya	5	Svastyátreyaḥ.	......	1–4 Anushṭup, 5 Panktiḥ.	438
51	5.4.7	4.3.5	Agne sutasya	15	The same.	......	1–4 Gáyatrí, 5–10 Ushṇik, 11–13 Jagatí or Trishṭup, 14 and 15 Anushṭup.	440
52	5.4.8	4.3.8	Pra śyáváśva	17	Śyáváśvaḥ.	Marutaḥ.	Anushṭup, 6 and 17 Panktiḥ.	446
53	5.4.9	4.3.11	Ko veda	16	The same.	The same.	1, 5, 10, 11 and 15 Kakup, 2 Bṛihatí, 3 Anushṭup, 4 Puraushṇik, 6, 7, 9, 13, 14 and 16 Satobṛihatí, 8 and 12 Gáyatrí.	453
54	5.4.10	4.3.14	Pra śardháya	15	......	......	Jagatí, 14 Trishṭup.	459
55	5.4.11	4.3.17	Prayajyavaḥ	10	......	......	Jagatí, 10 Trishṭup.	466
56	5.4.12	4.3.19	Agne śardhantam	9	......	......	Bṛihatí, 3 and 7 Satobṛihatí.	470
57	5.5.1	4.3.21	Á rudrásaḥ	8	......	......	Jagatí, 7 & 8 Trishṭ.	474
58	5.5.2	4.3.23	Tam u núnam	8	......	......	Trishṭup.	478
59	5.5.3	4.3.24	Pra vaḥ spaṭ	8	......	......	Jagatí, 8 Trishṭup.	481
60	5.5.4	4.3.25	Íḷe agnim	8	......	Marutaḥ, or Agniḥ and Marutaḥ.	Trishṭup, 7 and 8 Jagatí.	485
61	5.5.5	4.3.26	Ko shṭhá naraḥ	19	......	1–4 Marutaḥ, 5–8 Śaśíyasí Tarantamahishí, 9 Purumíḷho Vaidadaśviḥ, 10 Taranto Vaidadaśviḥ, 11–16 Marutaḥ, 17–19 Rathavítir Dálbhyaḥ.	Gáyatrí, 5 Anushṭup, 9 Satobṛihatí.	489
62	5.5.6	4.3.30	Ṛitena	9	Śrutavit.	Mitrá-Varuṇau.	Trishṭup.	496
63	5.5.7	4.4.1	Ṛitasya gopau	7	Arcanánáḥ.	The same.	Jagatí.	500
64	5.5.8	4.4.2	Varuṇam vaḥ	7	The same.	......	Anushṭ., 7 Panktiḥ.	503
65	5.5.9	4.4.3	Yaś ciketa	6	Rátahavyaḥ.	......	Anushṭ., 6 Panktiḥ.	506

Hymn.	Mandala Anuvaka Sukta.	Ashtaka Adhyaya Varga.	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
66	5.5.10	4.4.4	Á cikitána	6	**Rátahavyaḥ.**	**Mitrá-Varuṇau.**	**Anushṭup.**	509
67	5.5.11	4.4.5	**Baḷ itthá**	5	**Yajataḥ.**	**The same.**	**The same.**	511
68	5.5.12	4.4.6	**Pra vo mitráya**	5	**The same.**	......	**Gáyatrí.**	513
69	5.5.13	4.4.7	Trí rocaná	4	Urucakriḥ.	......	Trishṭup.	515
70	5.5.14	4.4.8	Purúruṇá	4	The same.	......	Gáyatrí.	516
71	5.5.15	4.4.9	Á no gantam	3	Báhuvṛiktaḥ.	......	The same.	518
72	5.5.16	4.4.10	Á mitre	3	The same.	......	Ushṇik.	519
73	5.6.1	4.4.11	Yad adya	10	Pauraḥ.	Aśvinau.	Anushṭup.	520
74	5.6.2	4.4.13	Kúshṭho devau	10	The same.	The same.	The same.	524
75	5.6.3	4.4.15	Prati priyat.	9	Avasyuḥ.	......	Panktiḥ.	528
76	5.6.4	4.4.17	Á bháti	5	Atriḥ.	......	Trishṭup.	532
77	5.6.5	4.4.18	Prátaryáváṇá	5	The same.	......	The same.	534
78	5.6.6	4.4.19	Aśvinau	9	Saptavadhriḥ.	......	1–3 Ushṇik, 4 Trishṭup, 5–9 Anushṭup.	537
79	5.6.7	4.4.21	Mahe naḥ	10	Satyaśraváḥ.	Usháḥ.	Panktiḥ.	540
80	5.6.8	4.4.23	Dyudadyámán.	6	The same.	The same.	Trishṭup.	544
81	5.6.9	4.4.24	Yuñjate	5	Śyáváśvaḥ.	Savitá.	Jagatí.	547
82	5.6.10	4.4.25	Tat savituḥ	9	The same.	The same.	1 Anushṭup, 2–9 Gáyatrí.	549
83	5.6.11	4.4.27	Acchá vada	10	Atriḥ.	Parjanyaḥ.	Trishṭup, 2–4 Jagatí, 9 Anushṭup.	552
84	5.6.12	4.4.29	Baḷ itthá	3	The same.	Pṛithiví.	Anushṭup.	556
85	5.6.13	4.4.30	Pra samráje	8	......	Varuṇaḥ.	Trishṭup.	558
86	5.6.14	4.4.32	Indrágní	6	......	Indra-Agní.	Anushṭup, 6 Viráṭ-púrvá.	562
87	5.6.15	4.4.33	Pra vo mahe	9	Evayámarut.	Marutaḥ.	Atijagatí.	564
1	6.1.1	4.4.35	Tvam hy agne	13	Bharadvájo Bárhaspatyaḥ.	Agniḥ.	Trishṭup.	571
2	6.1.2	4.5.1	Tvam hi kshaitavat	11	The same.	The same.	Anushṭup, 11 Śakvarí.	576
3	6.1.3	4.5.3	Agne saḥ	8	......	......	Trishṭup.	581
4	6.1.4	4.5.5	Yathá hotaḥ	8	......	......	The same.	585
5	6.1.5	4.5.7	Huve vaḥ	7	......	......	......	[illegible]
6	6.1.6	4.5.8	Pra navyasá	7	......	......	......	592
7	6.1.7	4.5.9	Múrddhánam	7	......	Vaiśvánarágniḥ.	Trishṭ., 6 & 7 Jagatí.	595
8	6.1.8	4.5.10	Pṛikshasya	7	......	The same.	Jagatí, 7 Trishṭup.	599
9	6.1.9	4.5.11	Ahaś ca	7	......	......	Trishṭup.	602
10	6.1.10	4.5.12	Puro vaḥ	7	......	Agniḥ.	Trishṭ., 7 Dvipadá.	607
11	6.1.11	4.5.13	Yajasva	6	......	The same.	Trishṭup.	610
12	6.1.12	4.5.14	Madhye hotá	6	......	......	The same.	612
13	6.1.13	4.5.15	Tvad viśvá	6	......	......	......	615
14	6.1.14	4.5.16	Agná yaḥ	6	......	......	Anushṭ., 6 Śakvarí.	618
15	6.1.15	4.5.17	Imam ú shu	19	Bharadvájaḥ or Vítahavyaḥ (Ángirasaḥ).	......	Jagatí, 3 and 15 Śakvarí, 6 Atiśakvarí, 10–14, 16 and 19 Trishṭ., 17 Anushṭup, 18 Bṛihatí.	620

Hymn.	Mandala Anuvaka Sukta.	Ashtaka Adhyaya Varga.	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
16	6.2.1	4.5.21–30	Tvam agne	48	Bharadvájaḥ.	Agniḥ.	Gáyatrí, 1 and 6 Vardhamáná, 27, 47 and 48 Anushṭup, 46 Trishṭup.	630
17	6.2.2	4.6.1	Pibá somam	15	The same.	Indraḥ.	Trishṭup, 15 Dvipadá.	645
18	6.2.3	4.6.4	Tamu shṭuhi	15	......	The same.	Trishṭup.	652
19	6.2.4	4.6.7	Mahán indraḥ	13	......	......	The same.	659
20	6.2.5	4.6.9	Dyaur na	13	......	......	Trishṭup, 7 Viráṭ.	664
21	6.2.6	4.6.11	Imá u	12	......	Indraḥ, 9 and 11 Viśve Deváḥ.	Trishṭup.	670
22	6.2.7	4.6.13	Ya eka it	11	......	Indraḥ.	The same.	675
23	6.2.8	4.6.15	Suta it	10	......	The same.	......	680
24	6.3.1	4.6.17	Vṛishá madaḥ	10	......	......	......	684
25	6.3.2	4.6.19	Yá ta útiḥ	9	......	......	......	689
26	6.3.3	4.6.21	Śrudhí naḥ	8	......	......	......	693
27	6.3.4	4.6.23	Kim asya	8	......	Indraḥ, 8 Ábhyávartinaś Cáyamánasya dánastutiḥ.	......	696
28	6.3.5	4.6.25	Á gávaḥ	8	......	Gauḥ, 2 and 8 *d* Gauḥ or Indraḥ.	Trishṭup, 2–4 Jagatí, 8 Anushṭup.	700
29	6.3.6	4.7.1	Indram vaḥ	6	......	Indraḥ.	Trishṭup.	704
30	6.3.7	4.7.2	Bhúya it	5	......	The same.	The same.	707
31	6.3.8	4.7.3	Abhúr ekaḥ	5	Suhotraḥ.	......	Trishṭup, 4 Śakvarí.	709
32	6.3.9	4.7.4	Apúrvyá	5	The same.	......	Trishṭup.	712
33	6.3.10	4.7.5	Ya ojishṭhaḥ	5	Śunahotraḥ.	......	The same.	714
34	6.3.11	4.7.6	Sam ca tve	5	The same.	......	......	717
35	6.3.12	4.7.7	Kadá bhuvan	5	Naraḥ.	......	......	719
36	6.3.13	4.7.8	Satrá madásaḥ	5	The same.	......	......	721
37	6.3.14	4.7.9	Arvág ratham	5	Bharadvájaḥ.	......	......	724
38	6.3.15	4.7.10	Apád itaḥ	5	The same.	......	......	726
39	6.3.16	4.7.11	Mandrasya	5	......	......	......	728
40	6.3.17	4.7.12	Indra piba	5	......	......	......	730
41	6.3.18	4.7.13	Aheḷamánaḥ	5	......	......	......	733
42	6.3.19	4.7.14	Praty asmai	4	......	......	Anushṭup, 4 Bṛihatí.	735
43	6.3.20	4.7.15	Yasya tyat	4	......	......	Ushṇik.	737
44	6.4.1	4.7.16	Yo rayivaḥ	24	Śamyur Bárhaspatyaḥ.	......	1–6 Anushṭup, 7 & 9 Viráṭ or Trishṭup, 8 Viráṭ.	738
45	6.4.2	4.7.21	Ya ánayat	33	The same.	Indraḥ, 31–33 Bṛibus takshá.	Gáyatrí, 29 Atinicṛit, 33 Anushṭup.	749
46	6.4.3	4.7.27	Tvám id dhi	14	......	Indraḥ.	Prágátham (1, 3, 5, 7, 9, 11 & 13 Bṛihatí, 2, 4, 6, 8, 10, 12 & 14 Satobṛihatí).	759

Hymn.	Mandala Anuvaka Sukta.	Ashtaka Adhyaya Varga.	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
47	6.4.4	4.7.30	Sváduḥ.	31	Gargaḥ, son of Bharadvájaḥ.	Indraḥ, 1–5 Somaḥ, 20*a* Deváḥ, 20*b* Bhúmiḥ, 20*c* Bṛihaspatiḥ, 20*d* Indraḥ, 22–25 Prastokasya Sárnjayasya dánastutiḥ, 26–28 Rathaḥ, 29–31 *a.b* Dundubhiḥ, 31 *c.d* Indraḥ.	Trishṭup, 19 Bṛihatí, 22 Trishṭup, 23 Anushṭup, 24 Gáyatrí, 25 Dvipadá, 27 Jagatí.	765
48	6.4.5	4.8.1	Yajnáyajná	22	S'aṃyur Bárhaspatyaḥ.	1–10 Agniḥ, 11 and 12 Marutaḥ, 13–15 Marutaḥ or Lingoktadevatáḥ, 16–19 Púshá, 20 and 21 Pṛiśniḥ, Marutám mátá, 22 Pṛiśniḥ or Dyávábhúmí.	1, 3, 5, 9, 14, 19 and 20 Bṛihatí, 2, 4, 10, 12 and 17 Satobṛihatí, 6 and 8 Mahásatobṛihatí, 7 Mahábṛihatí, 11 and 16 Kakup, 13 and 18 Puraushṇik, 15 Atijagatí, 21 Savamadhyá Mahábṛihatí, 22 Anushṭup.	780
49	6.4.6	4.8.5	Stushe janam	15	Ṛijiśvá Bháradvájaḥ.	Viśve Deváḥ.	Trishṭup, 15 S'akvarí.	791
50	6.5.1	4.8.8	Huve vaḥ	15	The same.	The same.	Trishṭup.	799
51	6.5.2	4.8.11	Udu tyat	16	......	......	Trishṭup, 13–15 Ushṇik, 16 Anushṭup.	805
52	6.5.3	4.8.14	Na tad divá	17	......	......	1–6, 13 and 15–17 Trishṭup, 7–12 Gáyatrí, 14 Jagatí.	812
53	6.5.4	4.8.17	Vayam u tvá	10	Bharadvájaḥ.	Púshá.	Gáyatrí, 8 Anushṭup.	819
54	6.5.5	4.8.19	Sam púshan	10	The same.	The same.	Gáyatrí.	821
55	6.5.6	4.8.21	Ehi vám	6	......	......	The same.	824
56	6.5.7	4.8.22	Ya enam	6	......	......	1–5 Gáyatrí, 6 Anushṭup.	826
57	6.5.8	4.8.23	Indrá nu	6	......	Indrá-Púshaṇau.	Gáyatrí.	828
58	6.5.9	4.8.24	S'ukram te	4	......	Púshá.	Trishṭup, 2 Jagatí.	829
59	6.5.10	4.8.25	Pra nu vocá	10	......	Indra-Agní.	1–6 Bṛihatí, 7–10 Anushṭup.	832
60	6.5.11	4.8.27	S'nathad vṛitram	15	......	The same.	1–3 and 13 Trishṭup, 4–12 Gáyatrí, 14 Bṛihatí, 15 Anushṭup.	836
61	6.5.12	4.8.30–32	Iyam adadát	14	......	Sarasvatí.	1–3 and 13 Jagatí, 4–12 Gáyatrí, 14 Trishṭup.	841

Hymn.	Mandala Anuvaka Sukta.	Ashtaka Adhyaya Varga.	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
62	6.6.1	5.1.1	Stushe nará	11	Bharadvájaḥ.	Aśvinau.	Trishṭup.	847
63	6.6.2	5.1.3	Kva tyá	11	The same.	The same.	Trishṭup, 11 Ekapadá.	852
64	6.6.3	5.1.5	Udu śriye	6	......	Usháḥ.	Trishṭup.	856
65	6.6.4	5.1.6	Eshá syá	6	......	The same.	The same.	859
66	6.6.5	5.1.7	Vapur nu tat	11	......	Marutaḥ.	......	861
67	6.6.6	5.1.9	Viśveshám	11	......	Mitrávaruṇau.	......	866
68	6.6.7	5.1.11	Śrushṭí vám	11	......	Indrá-Varuṇau.	Trishṭup, 9 and 10 Jagatí.	871
69	6.6.8	5.1.13	Sam vám	8	......	The same.	Trishṭup.	876
70	6.6.9	5.1.14	Ghṛitavatí	6	......	Dyává-Pṛithiví.	Jagatí.	880
71	6.6.10	5.1.15	Udu shyaḥ	6	......	Savitá.	1–3 Jagatí, 4–6 Trishṭup.	883
72	6.6.11	5.1.16	Indrásomá	5	......	Indrá-Somau.	Trishṭup.	886
73	6.6.12	5.1.17	Yo adribhit	3	......	Bṛihaspatiḥ.	The same.	888
74	6.6.13	5.1.18	Somárudrá	4	......	Somá-Rudrau.	......	890
75	6.6.14	5.1.19	Jímútasya	19	Páyur Bháradvájaḥ.	1 Varma, 2 Dhanuḥ, 3 Jyá, 4 Ártní, 5 Ishudhiḥ, 6*a* Sárathiḥ, 6*b* Raśmayaḥ, 7 Aśváḥ, 8 Rathaḥ, 9 Rathagopáḥ, 10 Lingoktadevatáḥ, 11 and 12 Ishavaḥ, 13 Pratodaḥ, 14 Hastaghnaḥ, 15 and 16 Ishavaḥ, 17 Lingoktadevatáḥ (yuddhabhúmi-brahmaṇaspaty-aditayaḥ), 18 Kavaca-Soma-Varuṇáḥ, 19 Deváḥ & Brahma.	Trishṭup, 6 and 10 Jagatí, 12, 13, 15, 16 and 19 Anushṭup, 17 Panktiḥ.	891
1	7.1.1	5.1.23–27	Agnim naraḥ	25	Vasishṭhaḥ.	Agniḥ.	1–18 Viráṭ, 19–25 Trishṭup.	901
2	7.1.2	5.2.1	Jushasva	11	The same.	Áprídevatáḥ.	Trishṭup.	911
3	7.1.3	5.2.3	Agnim vaḥ	10	......	Agniḥ.	The same.	916
4	7.1.4	5.2.5	Pra vaḥ śúkráya	10	......	The same.	......	920
5	7.1.5	5.2.7	Prágnaye	9	......	Vaiśvánarágniḥ.	......	924
6	7.1.6	5.2.9	Pra samrájaḥ	7	......	The same.	......	928
7	7.1.7	5.2.10	Pra vo devam	7	......	Agniḥ.	......	931
8	7.1.8	3.2.11	Indhe rájá	7	......	The same.	......	933
9	7.1.9	5.2.12	Abodhi járaḥ	6	......	......	......	936
10	7.1.10	5.2.13	Usho na	5	......	......	......	939
11	7.1.11	5.2.14	Mahán asi	5	......	......	......	941
12	7.1.12	5.2.15	Aganma	3	......	......	......	943
13	7.1.13	5.2.16	Prágnaye	3	......	Vaiśvánarágniḥ.	......	944
14	7.1.14	5.2.17	Samidhá	3	......	Agniḥ.	1 Bṛihatí, 2 and 3 Trishṭup.	945

Hymn.	Mandala Anuvaka Sukta.	Ashtaka Adhyaya Varga.	Beginning of the hymn.	Number of Verses.	Author.	Deity.	Metre.	Pag.
15	7.1.15	5.2.18	Upasadyáya	15	Vaśishṭhaḥ.	Agniḥ.	Gáyatrí.	946
16	7.1.16	5.2.21	Ená vaḥ	12	The same.	The same.	Prágátham.	951
17	7.1.17	5.2.23	Agne bhava	7	......	......	Trishṭup (dvaipadam).	956
18	7.2.1	5.2.24	Tve ha yat	25	......	Indraḥ, 22–25 Sudásaḥ Paijavanasya dánastutiḥ.	Trishṭup.	957
19	7.2.2	5.2.29	Yas tigmaśṛing.	11	......	Indraḥ.	The same.	968

CORRECTIONS.

Page 17, line 13, read रक्षोपाभावः — 34, 1. आत्मनेपदं — 44, 12. तिग्मजंभ — 66, 4. सुऽमनाः — 78, 11. होता — 88, 10. षोडशी — 116, 16. मधऽमात् — 121, 12. स्तोमं — 139, 19. सर्वात्मकं — 145, 23. दुरवने — 165, 16. सूम° — 232, 25. ६. १४. — 240, 20. तृतीया — 240, 26. नामिकां — 382, 19. अनभि° — 741, 7. इंद्रस्य — 817, 21. सुप्तेषु — 831, 18. चतुर्थी — 841, 22. चतुर्दशी — 855, 2. व्याप्नोति.